A word or a sentence is said to have relation to a specific meaning as its import when it is uttered with a desire to give rise to the cognition of that meaning.

12.2. Gaṅgeśa's definition of *tātparya*

Gaṅgeśa in his *Tattvacintāmaṇi* defines *tātparya* as follows: a word or a sentence which is uttered with a desire of the cognition of a particular meaning — the cognition which would prompt one toward certain activity or make one refrain from committting certain deed — has that meaning as its import.

12.3. Mahādeva Puṇatāmbekara's view

A decisive knowledge of the speaker's intention must be admitted as the cause of all verbal cognitions on the following ground: from the sentence *gaṅgāyāṃ ghoṣaḥ* there arises the cognition of the primary meaning, viz. the current of the river and also that of the secondary meaning, viz. bank of the river. In order to identify that it is only the secondary meaning that is the content of the verbal cognition, a decisive knowledge of the intention of the speaker is necessary.

It must be noted here that the word "*saindhava*" in the sentence "Bring *saindhava*" has the primary significative power to convey the meanings of salt and horse. The cognition of the second meaning arises, according to the view of the some earlier Naiyāyika-s, by recollecting the sentence once again. But neo- Naiyāyika-s hold that the cognitions of both the primary senses can be had simultaneously without recollecting the sentence once again.

12.4. *Import:* is it present in word or sentence ?

Tātparya or import consists in being uttered with a desire to give rise to the cognition of a particular meaning. Mahādeva in his *Dinakarī* considers that the word "meaning" in the defintion stands for the meaning of the sentence. Nīlakaṇṭha in his commentary on the *Tarkasaṅgrahadīpikā* takes the word "meaning" in the definition as representing the meaning of the word.

12.5. Nāgeśa's view

Nāgeśa does not favour the view that the cognition of import is the cause of verbal cognition. He argues that if the verbal cognition is caused by the cognition of the import of the sentence, then one cannot explain the doubt in regard to the import of the sentence subsequent to the rise of the verbal cognition. A decisive knowledge of the import is useful only in ascertaining the validity of verbal cognition, and in certain other places when there is the possibility of the relation of several meanings, the decisive knowledge of the import is necessary in order to identify a particular meaning as fit for being related. For example, when it is said "door", owing to the cognition of the import or the desire of the speaker, we incorporate the word "close". Thus the decisive knowledge of the import is not the means to verbal cognition.

12.6. Is *tātparya* a significative power?

Some Ālaṅkārika-s are of the view that import or *tātparya* is a separate significative power. This *tātparya* is different from the one that is accepted by those who advocate the *abhihitānvaya-vāda*. According to the *abhihitānvayavāda* the word-meanings conveyed by the words constituting a sentence signify the relation among them, i.e. the sentence-meaning. The question arises as to how the sentence-meaning could be viewed as verbal in nature as it is not directly derived from the words. Jayantabhaṭṭa and Pārthasārathimiśra point out that there is significative power, viz. *tātparya*, in all the words that constitute a sentence. It is with this in view that it is said in the *Kāvyaprakāśa* 2.6: *tātparyārtho'pi keṣucit*. It must be noted here that *abhidhā*, *lakṣaṇā* and *vyañjanā* are significative powers that rest in words. *Tātparya*, however, is the significative power of a sentence. This *tātparya* is common to all verbal cognitions, and it is distinct from the *tātparya* that is adopted only in the case of words having several meanings. All this is explained in great detail in the present treatise.

Aim of this work

The chief aim of this work is to provide in one place every detail relating to the nature of a sentence, its meaning, etc. according to the schools of *Nyāya, Vyākaraṇa, Mīmāṃsā* and *Vedānta*. We shall feel amply rewarded if reading of this treatise would make it somewhat easier for its readers to embark upon a study of the original texts of different śāstras dealing with words, sentences and their meaning, and our ways of knowing from words.

॥ श्रीः ॥

शाब्दबोधमीमांसा

वाक्यवाक्यार्थविचारात्मकप्रथमभागस्य

उपोद्घातः

इह खलु लौकिकाः परीक्षकाश्च बुभुत्सितं श्रोतृपुरुषानवगतमर्थं बोधयितुमिच्छन्तो वाक्यमुच्चारयन्ति, प्रतिपत्तुमिष्टं च प्रमेयं पृच्छन्ति बोद्धारः। एवं लोकयात्रां निर्वहति शब्दः। अत एव शब्दः सर्वार्थप्रकाशकं ज्योतिः इत्याह दण्डी[१] —

"इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥" इति।

भर्तृहरिरपि[२] —

"अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।" इत्याह।

बोद्धारश्च भूयोभूयः समधिगतं पदार्थमात्रं न बुभुत्सन्ते, न वा प्रतिपादयन्ति प्रेक्षावन्तः। तथा सति अबुभुत्सितावबोधने अनवधेयवचनतया ते न लौकिका नापि परीक्षका इति उन्मत्तवत् उपेक्षणीया भवेयुः। अतोऽनधिगतं पदार्थं वाक्यार्थमेव च बुभुत्सन्ते बोद्धारः, बोधयितुमुच्चारयन्ति पदानि वाक्यानि च बोधयितार इति सर्वसंप्रतिपन्नम्। तत्र वाक्यात्मकशब्दजन्यो बोधः शाब्दबोध इति, वाक्यार्थबोध अन्वयबोध इति च आख्यायते। तमिमं शाब्दबोधमधिकृत्य विचारं प्रवर्तयन् शाब्दबोधमीमांसानामकः चतुर्भागात्मकः ग्रन्थश्चिकीर्षितः।

तत्र वाक्यवाक्यार्थविचारात्मकः प्रथमो भागो भवति। तत्रापि पदरूपस्य वाक्यरूपस्य च शब्दस्य प्रामाण्यविषये, पृथक् प्रामाण्यविषये च मतभेदस्य सद्भावात् तद्विमर्शपूर्वकं शब्दस्य प्रामाण्यं, पृथक् प्रामाण्यं च आदौ स्थाप्यते। ततः शब्दस्य लक्षणं विमृश्यते। ततः अर्थबोधकस्य वाक्यस्य स्वरूपं निरूप्यते। तत्प्रसङ्गात् स्फोटवादः प्रस्तूयते। ततः वाक्यार्थबोधे आद्यं पदं निमित्तम्, वाक्यान्त्यवर्णो निमित्तम् इत्यादिविवादसद्भावात् वाक्यार्थबोधनिमित्तमधिकृत्य

---

[१] का.आ.१.४.
[२] वा.प.१.१३.

विचार्यते। ततः वाक्यार्थबोधविषये अभिहितान्वयवादः, अन्विताभिधानवादः इति वादद्वये कैः कैः कीदृशो वाद आश्रित इति निरूप्यते। ततः शब्दबोधे मुख्य-विशेष्यः क इति विचार्यते। ततः एकवाक्यतायाः, भिन्नवाक्यतायाः, वाक्य-शेषस्य, अध्याहारानुषङ्गादेश्च सोदाहरणं निरूपणं क्रियते। ततश्च आसत्ति-योग्यता-आकाङ्क्षा-तात्पर्याणां शाब्दबोधसहकारिकारणानां विचारः क्रियते इति प्रथम-भागस्य प्रतिपाद्यसारांशः।

१. शब्दप्रामाण्यम्

१.१. शब्दस्याप्रामाण्यनिरासः

प्रत्यक्षमेकमेव प्रमाणमिति वदन्तश्चार्वाकाः शब्दस्य प्रमाणतामेव नाङ्गी-कुर्वन्ति। तन्मतनिरासप्रकारोऽयम्। चार्वाकाः केन हेतुना शब्दस्य अप्रामाण्यं वदन्तीति परिशीलनीयम्। केचन शब्दा अप्रमाणभूता अपि दृश्यन्त इति तत्साधर्म्येण सर्वे शब्दा अप्रमाणमिति तेषामाकूतम्। तथा च "विमतः शब्दः अप्रमाणं, शब्दत्वात्, अप्रमाणत्वेन संप्रतिपन्नशब्दवत्" इति अनुमानं तेषा-मभिमतं भवति। एतच्च प्रत्यक्षातिरिक्तस्यानुमानस्य शब्दस्य च प्रामाण्यानङ्गीकारे न घटते। शब्दाप्रामाण्यसाधकानुमानस्याप्रामाण्ये शब्दप्रामाण्यमेव स्थिरीकृतं भवति। तस्य प्रामाण्ये तु अनुमानप्रामाण्यमेव स्थिरीकृतं भवति। अपि च "शब्दः अप्रमाणम्" इति प्रयोगः अप्रामाण्यसंशयवन्तं तद्विपर्ययवन्तं प्रति वा अर्थवान्। पुरुषान्तरगतौ च संशयविपर्ययौ न प्रत्यक्षगोचरौ। अतोऽनुमानेन शब्देन वा तदीयसंशयविपर्ययौ ज्ञात्वा तन्निरासाय पुरुषान्तरं प्रति शब्दाप्रामाण्य-साधकानुमानप्रयोगः कार्य इति शब्दानुमानयोः प्रामाण्यमवर्जनीयम्।

अपि च अनाप्तानुक्तवाक्यं प्रमाणम्, कारणदोषबाधकप्रत्यययोरदर्शनात्। अना-प्तोक्तवाक्यं तु न प्रमाणम्, कारणदोषबाधकप्रत्यययोः दर्शनात्। न च "अनाप्ता-नुक्तवाक्यं न प्रमाणम्, वाक्यत्वात् अनाप्तोक्तवाक्यवत्" इति शङ्कनीयम्। स्ववचनविरोधात्। तथा हि — "अनाप्तानुक्तवाक्यं न प्रमाणम्" इति भवद्वाक्यं प्रमाणं न वा? आद्ये 'न प्रमाणम्' इति त्वद्वचनविरोधः। द्वितीये 'न प्रमाणम्' इति वाक्यस्याप्रमाणत्वे अनाप्तानुक्तवाक्यं प्रमाणमित्येव सिध्यतीति त्वद्वचनविरोध-स्तदवस्थ एव। न च मद्वाक्यव्यतिरिक्तवाक्यं पक्षः, अतो न स्ववचनविरोध इति वाच्यम्। तर्हि त्वद्वाक्ये अप्रमाणत्वरूपसाध्याभाववति वाक्यत्वरूपहेतुसत्त्वात् व्यभिचारः। न चैवं सर्वेषां वाक्यानां प्रामाण्यं स्यात् इत्याशङ्कनीयम्। भ्रान्तादिवाक्यानां दोषमूलत्वस्य दुरपह्नवत्वात्। अन्येषां तु तदभावात् इति।

१.२. शब्दस्य पृथक् प्रमाणत्वम्

१.२.१. न्यायदर्शने शब्दस्य पृथक्प्रामाण्यसमर्थनम्

बौद्धा वैशेषिकाश्च शब्दस्य प्रमाणत्वेऽपि पृथक् प्रामाण्यम् अनङ्गीकुर्वाणाः अनुमानविधयैव प्रामाण्यमाचक्षते। तत्र तावत् न्यायसूत्रकारः शङ्कासमाधानपूर्वकं शब्दस्यानुमानगतार्थतां निराचख्यौ[१]।

तथा हि — शब्दः न पृथक् प्रमाणम्। सः अनुमानविधयैवार्थप्रत्यायकः। यथा खलु प्रत्यक्षेणाज्ञायमानं साध्यं ज्ञातेन लिङ्गेन पश्चान्मीयतेऽनुमानस्थले, तथैव ज्ञातेन (श्रुतेन) शब्देन पश्चादर्थो ज्ञायते प्रत्यक्षादिना अनवगम्यमान इति शब्दोऽपि लिङ्गविधयैवार्थबोधकः।

अपि च यत्र द्वयोः प्रमाणयोः भेदो भवति तत्र प्रमाणयोः अर्थबोधनप्रकारे वैलक्षण्यं दृश्यते, यथा प्रत्यक्षानुमानयोः अनुमानोपमानयोश्च। प्रत्यक्षस्थले हि अज्ञायमानात् इन्द्रियात् अर्थज्ञानं भवति, अनुमानस्थले तु ज्ञायमानात् लिङ्गात्। उपमानस्थले सादृश्यज्ञानात् अर्थप्रतिपत्तिः, नैवमनुमानस्थल इति प्रमाणप्रवृत्तिभेदात् प्रमाणभेदः। शब्दानुमानयोस्तु नैवं प्रवृत्तिभेदोऽस्ति। ज्ञातादेव शब्दात् अर्थप्रतीतेः, ज्ञातादेव लिङ्गादर्थप्रतीतेश्च। अतः शब्दोऽनुमानमेव।

किं च अनुमानस्थले संबद्धयोः हेतुसाध्ययोर्मध्ये हेतोः दर्शनानन्तरं संबन्धस्मृतौ सत्यां साध्यप्रतीतिर्भवति। तथैव शब्दस्थले संबद्धयोः शब्दार्थयोः मध्ये शब्दविषयकश्रावणप्रत्यक्षानन्तरं संबन्धस्मृतौ सत्यामर्थप्रतीतिर्भवति इति शब्दस्य नानुमानात् पृथक् प्रामाण्यम् इति पूर्वपक्षः ।

सिद्धान्तस्तु — प्रत्यक्षेणानवगम्यमानानां स्वर्गः, अप्सरसः, उत्तराः कुरवः, सप्त द्वीपाः लोकसंनिवेशः इत्यादीनामर्थानां न शब्दमात्रात् प्रत्ययः। किं तर्हि? "अयं शब्दः आप्तैरुक्तः" इति शब्दगतस्य आप्तोक्तत्वस्य ज्ञानादेव समीचीनः प्रत्ययो भवति। अनुमानस्थले तु नैवमिति प्रवृत्तिभेदसद्भावात् शब्दः अनुमानातिरिक्तं प्रमाणम्। शब्दार्थयोः संबन्धः कश्चित् अङ्गीक्रियते। प्राप्तिरूपस्तु संबन्धो नाङ्गीक्रियते। प्राप्तिर्नाम संयोगः, एकार्थसंयोगः, समवायो वा। किं तु समयरूपः संबन्धः। न हीमं संबन्धं पुरस्कृत्य अनुमानस्थलेऽर्थप्रतीतिः। अपि तु अविनाभावरूपं संबन्धम्। अतः प्रवृत्तिभेदसद्भावात् न शब्दः अनुमानविधया प्रमाणमिति।

---

[१] न्या.सू.२.१.४९-५२.

१.२.२. दिङ्नागमतेन शब्दस्यानुमानत्वम्

न्यायवार्त्तिक-तात्पर्यटीकयोः "आप्तोपदेशः शब्दः" इति [१]सूत्रभाष्यव्याख्यानावसरे शब्दस्यानुमानान्तर्भावं वदतो दिङ्नागस्य मतमेवमन्ववादि — अर्थासंबद्धस्य शब्दस्यार्थनिर्णयहेतुत्वे सर्वस्मात् शब्दात् सर्वार्थनिश्चयप्रसङ्गात् शब्दार्थयोः संबन्धं स्वीकृत्य शब्दादर्थनिश्चयो वक्तव्यः। तयोर्न तादात्म्यं संबन्धः। शब्दस्य अर्थात्मत्वाभावात्। नापि कार्यकारणभावः, शब्दस्यार्थकार्यत्वाभावात्। विनाप्यर्थं पुरुषविवक्षामात्रादेव शब्दोत्पत्तेः। तस्मात् न साक्षात् शब्दादर्थनिश्चयः। विवक्षाकार्यतया तु विवक्षां गमयेत्। विवक्षा चाभिप्रायहेतुका। अभिप्रायश्च कश्चिन्मनोमात्रहेतुकः, कश्चित् प्रमाणमूलकः। तत्र यः प्रमाणनिश्चितमर्थं विवक्षति यथाविवक्षं च उच्चारयति स आप्तः। तस्य वचनात् कार्यात् कारणभूता विवक्षा अनुमीयते। तया च तत्कारणभूतमर्थज्ञानमनुमीयते। अर्थज्ञानेन च तत्कारणभूतोऽर्थोऽनुमीयते, अर्थज्ञानस्यार्थजन्यत्वात्, इत्यनया परंपरया शब्दस्य अर्थानुमापकत्वमिति।

१.२.३. उक्तस्य दिङ्नागमतस्य खण्डनम्

इदं मतं न युक्तम्। यदि शब्दः न अर्थं प्रत्याययेत्, ज्ञानमात्रमनुमापयेत्, तदा नार्थविशेषः सिध्येत्। न च ज्ञानविशेषादेवार्थविशेषः सिध्यतीति वाच्यम्। ज्ञानेऽर्थादन्यस्य विशेषस्य अभावात्। तस्मात् वक्तृज्ञानविशेषणाय पूर्वं शब्दादेव केवलात् वाक्यार्थज्ञानमेषितव्यम्। एवं च कृतं वक्तृज्ञानानुमानेनार्थप्रतिपत्त्यर्थेन। तस्मात् पदानि कृतसंकेतानि स्वार्थान् स्मारयन्ति, आकाङ्क्षायोग्यतासत्तिसहकृतानि अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न संगतिग्रहणमपि प्रतीक्षन्त इति दूरेऽनुमानात् भवन्तीति टीकाकाराः निरूपयन्ति स्म।

१.२.४. कणादमतम्

एतावता समानप्रवृत्तिकत्वात् शब्दस्यानुमानत्वमिति पक्षः, विवक्षानुमानद्वारा अर्थानुमापकत्वमिति पक्षश्च निरस्तः। शब्दस्यानुमानविधया संसर्गरूपवाक्यार्थबोधकत्वमिति विषये अर्थपक्षकं पदपक्षकं चेत्यनुमानद्वयं वैशेषिकसंमततया तात्पर्यटीकायां[२] प्रस्तुतं न्यायकुसुमाञ्जलौ तत्त्वचिन्तामणौ च विस्तरेण परिपोष्य दूषितम्।

---

[१] न्या.सू.१.१.७.

[२] न्या.वा.ता.टी.२.१.५२.

न्यायलीलावतीकारेण प्रदर्शितम् "एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि संसृष्टार्थपरत्वात्" इत्यनुमानं तत्त्वचिन्तामणौ विस्तरेणानूद्य दूषितम्। तत् सर्वमत्र ग्रन्थे क्रोडीकृत्य प्रदर्शितम्।

तत्रभवता कणादेन महर्षिणा —

"अस्येदं कारणं कार्यं संबन्धि एकार्थसमवायि विरोधि चेति लैङ्गिकम्"[१]

इत्यनुमानलक्षणमभिधाय "एतेनैव शाब्दं व्याख्यातम्" इति वदता[२] शब्दोऽनुमानमिति स्वमतमाविष्कृतम्। भाष्यकारेण प्रशस्तपादाचार्येण[३] —

"शब्दादीनामप्यनुमानेऽन्तर्भावः, समानविधित्वात्। यथा प्रसिद्धसमयस्यासंदिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्देऽपि"

इति प्रतिपादितम्। तावद्धि शब्दो नार्थं प्रतिपादयति, यावत् 'अयं शब्दः अस्यार्थस्याव्यभिचारी' इत्येवं नावगम्यते। ज्ञाते त्वव्यभिचारे अर्थं प्रतिपादयन् शब्दः धूम इव लिङ्गं स्यादिति तदाशयः।

१.२.५. न्यायमञ्जर्यामस्य मतस्य खण्डनम्

जयन्तभट्टेन न्यायमञ्जर्यां[४] शब्दस्यानुमानेऽन्तर्भावं बहुभिः साम्यैः आशङ्क्य, एवं समाहितम् — द्विविधः शब्दः पदं वाक्यं चेति। तत्र वाक्यमज्ञातसंबन्धमेव वाक्यार्थमवगमयति, वाक्ये शक्त्यभावात्। अभिनवपुरुषविरचितश्लोकश्रवणे सति पदसंस्कृतमतीनां वाक्यार्थावगमदर्शनात्। अतो वाक्यस्य संबन्धज्ञानमूलकप्रवृत्तिमता अनुमानेन नास्ति साम्यसंभावना।

पदस्य तु संबन्धज्ञानसापेक्षप्रवृत्तिकत्वेऽपि विषयभेदात् सामग्रीभेदाच्च अनुमानात् भिन्नत्वम्। विषयस्तावत् विसदृश एव पदलिङ्गयोः। जातिविशिष्टव्यक्तिमात्रं पदस्यार्थः। अनुमानं तु वाक्यार्थविषयकम्। "अत्राग्निः" "अग्निमान् पर्वतः" इति वा ततः प्रतीतेः।

किं च पर्वतादिरूपं यद्विशेष्यं तज्ज्ञानपूर्वकम् अग्न्यादिविशेषणज्ञानं लिङ्गादुदेति। पदात्तु विशेषणावगतिपूर्विका विशेष्यावगतिरिति विषयभेदः।

सामग्रीभेदाच्च न शब्दोऽनुमानम्। पक्षसत्त्वसपक्षसत्त्वादिरूपसापेक्षमनुमानम्, शब्दे तु न तानि रूपाणि सन्ति, न वा अपेक्षितानि।

---

१ वै.सू.९.२.१.

२ वै.सू.९.२.३.

३ प्र.पा.भा.पृ.५१२.

४ न्या.मं, आ.३.भा.१.पृ.४०१-४११.

किं च शब्दस्य अर्थसंबन्धज्ञानसापेक्षप्रवृत्तिकत्वेऽपि नानुमानाविशेषः। लिङ्ग-लिङ्गिनोर्हि अविनाभावो नाम संबन्धः, शब्दार्थयोस्तु समयापरनामा वाच्यवाचक-संबन्धः प्रत्ययाङ्गम्। एवं च विषयभेदात् सामग्रीभेदाच्च प्रत्यक्षवत् अनुमानात् अन्यः शब्दः — इति।

१.२.६. नव्यनैयायिकोक्तरीत्या शब्दस्यानुमानातिरिक्तत्वम्

अत्राहुः न्यायकौस्तुभकारादयः[१] नव्यनैयायिकाः — व्याप्त्यादिज्ञानविरहदशा-यामपि शब्दबोधस्यानुभवसिद्धतया तदानीमनुमितिसामग्र्यभावेन अनुमित्यसंभवात् शब्दः प्रमाणान्तरम्।

अपि च "चैत्रवाक्यात् अयमर्थः श्रुतः" इत्यादिव्यवहारविषयतया श्रुधा-त्वर्थस्य शाब्दाख्यस्य विलक्षणानुभवस्य स्वीकार आवश्यकः इति तत्करणतया शब्दस्य प्रमाणान्तरत्वमावश्यकम्।

न च श्रुधातोः अनुमित्यर्थकतया "श्रुतः" इति व्यवहारमात्रेण न विलक्षणानु-भवसिद्धिः, कुतस्तत्करणतया शब्दस्य प्रमाणान्तरत्वमिति वाच्यम्। तथा सति "पर्वतो वह्निमान्" इत्यनुमित्यनन्तरं "पर्वते वह्निः श्रुतः" इत्यादिव्यवहारापत्तेः।

अपि च शब्दजन्यज्ञानानन्तरं "शाब्दयामि" इत्येवानुव्यवसायो भवति न "अनुमिनोमि" इति। अतोऽपि शाब्दमतिः अनुमितितो विलक्षणा।

किं च शब्दात् अर्थज्ञानानन्तरं "नानुमिनोमि" इत्यनुव्यवसायानुरोधेन शाब्द-ज्ञानस्यानुमितिरूपत्वं न संभवति।

अपि च सिद्धिसत्त्वे शब्दश्रवणानन्तरम् इच्छां विनापि शब्दबोधो जायते। अनुमितिस्तु सिद्धिसत्त्वे अनुमितीच्छां विना न जायत इति वैलक्षण्यात् अनुमिति-विलक्षणा शब्दप्रमितिः — इति।

२. शब्दलक्षणम्

एतावता पदरूपस्य वाक्यरूपस्य च शब्दस्य पृथक् प्रमाणत्वं साधितम्। अथ शब्दस्य लक्षणमधिकृत्य किंचित् प्रस्तूयते। पदस्य लक्षणं तु शक्तत्वम् इति, विभक्त्यन्तत्वम् इति च।

वाक्यरूपस्य शब्दस्य लक्षणम् "आप्तोपदेशः शब्दः" इति सूत्रकारः[२] प्रोवाच। हिताहितप्राप्तिपरिहारप्रयोजनकपदार्थतत्त्वनिश्चयवन्तः आप्ताः। ते च ऋषयः,

---

[१] न्या.कौ.पृ.३५.
[२] न्या.सू.१.१.७.

आर्याः, म्लेच्छा वा भवितुमर्हन्ति। तेषामुपदेशः = तैः उच्चरितम् आकाङ्क्षा-योग्यतासत्तियुक्तपदसमूहात्मकं वाक्यं, शब्द इति शब्दलक्षणम् इति टीकादिषु निष्कृष्टम्।

अर्थप्रतीतिकरणभूतं श्रोत्रग्राह्यं वस्तु शब्दप्रमाणमिति न्यायमञ्जरीकाराः[१]। इदं तु पदवाक्योभयसाधारणं लक्षणम्।

समयबलेन सम्यक्परोक्षानुभवसाधनमागमः इति न्यायसारे[२] भासर्वज्ञः। इदं पदलक्षणं भवितुमर्हति, न वाक्यलक्षणम्। वाक्ये समयाभावात्।

मणिकारास्तु शब्दखण्डारम्भे[३] "अथ शब्दो निरूप्यते। प्रयोगहेतुभूतार्थ-तत्त्वज्ञानजन्यः शब्दः प्रमाणम्" इति शब्दप्रमाणस्य निरूपणीयतया प्रतिज्ञातस्य लक्षणमाहुः।

अत्रेदमवधेयम् — प्रमाणान्तरज्ञातार्थकानां पदानामर्थस्मारकत्वमेव, न तु अनुभवात्मकप्रमाजनकत्वमिति न प्रमाणता। वाक्यार्थस्य तु अपूर्वतया तद्विषय-कप्रमाजनकत्वरूपं प्रमाणत्वं वाक्यस्य भवितुमर्हति। अत एव सूत्रोक्तं शब्द-प्रमाणलक्षणं वाक्ये संगमयन्ति टीकाकारादयः। अपूर्वार्थबोधकानां स्वर्गादिपदानां तु प्रमितिजनकत्वमस्तीति पदानां प्रमाणतामाहुः केचनेति।

अत एव तर्कसंग्रहे[४] — "आप्तवाक्यं शब्दः" इत्युक्तम्। "आप्तत्वं च प्रयोग-हेतुभूतार्थज्ञानवत्त्वम्। तथा च प्रयोगहेतुभूतार्थज्ञानजन्यशब्दत्वमिति पर्यव-सन्नार्थः" इति न्यायबोधिनी[५]। मणिच्छायामियमनुकरोति।

नीलकण्ठप्रकाशिकायामपि[६] — "प्रकृतवाक्यार्थगोचरयथार्थज्ञानजन्यवाक्यं प्रमाणशब्द इति तु निष्कर्षः। वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात् लक्षण-संगतिः। अनाप्तोक्तवाक्येऽतिव्याप्तिवारणाय जन्यान्तम्। स्फुटमेतत् शब्दमणौ" इत्युक्तम्।

नृसिंहप्रकाशिकायां[७] तु — आप्तवाक्यमिति। आप्तोच्चरितवाक्यम् इत्यर्थः। शब्द इति। शब्दप्रमाणमित्यर्थः। इदं च ज्ञायमानशब्दस्य प्रमाणत्ववाद्याचार्यमता-नुसारेण। सिद्धान्ते तु वाक्यज्ञानं शब्दप्रमाणम्। एतेन वाक्याभावेऽपि मौनिकर्तृ-

---

१ न्या.मं, आ.३.भा.१.पृ.३९६.
२ न्या.सा.पृ.३७९.
३ त.चिं.म,च.भा.प्र.प.पृ.१.
४ त.सं.पृ.६५.
५ त.सं.न्या.बो.पृ.६५.
६ नी.प्र.पृ.३१३.
७ नृ.प्र.पृ.३१३.

कलिप्यादिज्ञानजन्यवाक्यज्ञानात् शाब्दबोधोत्पत्त्या व्यतिरेकव्यभिचारेण वाक्यस्य शब्दप्रमाणत्वं न संगच्छत इति दूषणमपास्तम् — इत्यभाणि।

तात्पर्यटीकायामपि[१] वाक्यज्ञानं शब्दप्रमाणमिति पक्षः प्रास्तावि। तर्कसंग्रह-यथाश्रुतमूलात् प्रकृतवाक्यार्थविषयकयथार्थज्ञानपूर्वकवाक्योच्चारयितृकर्तृकवाक्यं शब्द इति लभ्यते। तत्र तादृशप्रमातृकर्तृकवाक्यत्वापेक्षया प्रकृतवाक्यार्थविषयक-प्रमाजन्यवाक्यत्वस्य लघुतया तस्यैव शब्दप्रमाणलक्षणत्वमुचितम्।

दीपिकाव्याख्याने रामरुद्रीयेऽपि[२] — आप्तवाक्यमिति। वाक्यज्ञानमित्यर्थः। तेन मौनिश्लोकादौ वाक्यविरहेऽपि शाब्दबोधोत्पत्त्या वाक्यस्य शाब्दबोधकारण-त्वासंभवेऽपि न क्षतिः। तत्रापि वाक्यानुमानेन वाक्यज्ञानसत्त्वात्। अनाप्तो-च्चरितत्वप्रकारकवाक्यविशेष्यकज्ञानेऽतिव्याप्तिवारणाय आप्तपदम्। तथा च "इद-माप्तोच्चरितम्" इत्याकारकम् आप्तोच्चरितत्वप्रकारकवाक्यविशेष्यकज्ञानं शब्द-प्रमाणमित्यर्थः — इत्यभ्यधायि।

शब्दशक्तिप्रकाशिकायामपि[३] —

"अनुभवहेतुः सकले सद्यः समुपासिता मनुजे।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी॥"

इति मङ्गलश्लोकेन अनुभवजनकसाकाङ्क्षासन्नयोग्यपदसमूहात्मकं ज्ञायमानं वाक्यं शब्दप्रमाणमिति लक्षणं सूचितम्।

मीमांसाभाष्यकारेण शबरस्वामिना[४] —

"शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानम्" इत्युक्तम्। शास्त्रपदं प्रमाणशब्द-सामान्योपलक्षणम्। यः शब्दः स्वविषयकज्ञानेन मानान्तराप्राप्ताबाधितार्थज्ञानं जनयति स प्रमाणम् इत्युक्तं भवति। तेन मानान्तराप्राप्ताबाधितार्थविषयकज्ञान-जनकज्ञानविषयत्वे सति शब्दत्वं शब्दप्रमाणलक्षणमिति फलितम्।

वेदान्तपरिभाषायां[५] — "यस्य वाक्यस्य तात्पर्यविषयीभूतः संसर्गो मानान्त-रेण न बाध्यते तद्वाक्यं प्रमाणम्" इत्युक्तम्। मानान्तराबाधिततात्पर्यविषयी-भूतपदार्थसंसर्गबोधकवाक्यत्वं शब्दप्रमाणलक्षणमिति निष्कर्षः।

प्रमाणपद्धतौ शब्दखण्डारम्भे "निर्दोषशब्दत्वं निर्दोषवाक्यत्वं वा आगम-लक्षणम्" इत्युक्तम्।

---

[१] न्या.वा.ता.टी.१.१.७, पृ.३६७.
[२] दी.व्या.रा.रु.पृ.३१३.
[३] श.श.प्र.१.
[४] शा.भा.१.१.५, भा.१.पृ.४४.
[५] वे.प.पृ.२०८.

न्यायपरिशुद्धौ शब्दखण्डारम्भे वेदान्तदेशिकैः "अनाप्तानुक्तवाक्यं शब्दः" इत्युक्तम्। इदं च पौरुषेयापौरुषेयप्रमाणशब्दानां सामान्यलक्षणम्। 'आप्तवाक्यम्' इत्युक्तावपौरुषेये वेदेऽव्याप्तिः स्यादित्यालोच्य अनाप्तानुक्तवाक्यमित्युक्तम्। अपौरुषेये वेदे आप्तोक्तत्वमिव अनाप्तोक्तत्वमपि नास्तीति अनाप्तानुक्तवाक्यत्व-सत्त्वात् लक्षणसमन्वयः। आप्तोक्ते पौरुषेयवाक्येऽपि अनाप्तानुक्तत्वसत्त्वात् समन्वयः। अनाप्तोक्ते शब्दाभासे च अनाप्तोक्तत्वविरहान्नातिव्याप्तिरिति तदाशयः।

सांख्यकारिकायाम्[१] "आप्तश्रुतिराप्तवचनं तु" इति आप्तवचनस्य लक्षणमुक्तम्। "आप्ता = प्राप्ता, युक्तेति यावत्। आप्ता चासौ श्रुतिश्चेत्याप्तश्रुतिः। श्रुतिः = वाक्यजनितं वाक्यार्थज्ञानम्" इति तद्व्याख्यायां कौमुद्याम्[२] उक्तम्। आप्तशब्दस्य समीचीना दोषहीनेति वा अर्थः। बुद्धिवृत्तेरेव सांख्यमते प्रमाणशब्देन व्यवह्रियमाणत्वात् वाक्यजनितं वाक्यार्थज्ञानमित्युक्तम्। तथा च निर्दोषवाक्य-जन्यं वाक्यार्थज्ञानम् आगमप्रमाणम् इत्युक्तं भवति। शब्दस्य प्रमाणत्वे तु निर्दोषवाक्यं शब्द इति फलति।

नागेशेन लघुमञ्जूषायाम्[३] — "आप्तोपदेशः शब्दः प्रमाणम्। आप्तो नाम अनुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन विद्वान्, रागादिवशादपि नान्यथावादी। आप्तोपदेश इत्यस्य आप्तश्चासौ उपदेशः, आप्तस्योपदेश इति द्वेधा विग्रहात् आप्तत्व-आप्तोक्तत्वान्यतरवान् उपदेश इत्यर्थः। अपौरुषेयस्य वेदस्य स्वत एवाप्तत्वम्। पौरुषेयस्य वाक्यस्य तु आप्तोक्तत्वमित्युभयानुयायीदं लक्षणमित्युक्तम्।

३. वाक्य-वाक्यार्थविचारः

एतावत्पर्यन्तं वक्ष्यमाणविषयोपयोगितया शब्दस्य प्रामाण्यसमर्थनपूर्वकं तत्त-द्वाद्यभिमतानि शब्दप्रमाणलक्षणानि समगृह्यन्त। अथ वाक्यवाक्यार्थविचारः प्रस्तूयते।

तत्र वाक्यात् वाक्यार्थबोधविषये चत्वारोंऽशाः प्राधान्येनात्र विचार्यन्ते — किं नाम वाक्यम्? को नाम वाक्यार्थः? वाक्यवाक्यार्थयोः कः संबन्धः? वाक्यार्थबोधस्य निमित्तं किम्? इति। तत्र एकैकमप्यंशं न्याय-मीमांसा-वेदान्त-व्याकरणप्रभृतिदर्शनानुसारेण कंचित् क्रममवलम्ब्य अत्र उपक्षिपामः।

---

[१] सां.का.५.
[२] सां.त.कौ.पृ.१५३.
[३] ल.मं.पृ.११.

३.१. वाक्यस्वरूपविचारः

३.१.१. न्यायदर्शनानुसारेण वाक्यस्वरूपम्

३.१.१.१. न्यायदर्शने वाक्यलक्षणम्

तत्रभवान् न्यायसूत्रकारो गोतमः "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणनि" इति सूत्रेण[१] प्रमाणानि नाम्ना निर्दिश्य तेषां प्रत्येकं लक्षणम् एकैकेन सूत्रेण प्रोवाच। तत्र शब्दप्रमाणलक्षणपरं सूत्रम्[२] —

"आप्तोपदेशः शब्दः" इति।

अनेन आप्तवक्तृकः उपदेशः शब्द इति लभ्यते। उपदिश्यतेऽनेनेत्युपदेश इति व्युत्पत्त्या अज्ञातार्थज्ञापकवाक्यमेवोपदेशशब्देन विवक्षितम्। तच्च वाक्यं सावयवमनवयवं वा किंस्वरूपमिति सूत्रतो न लभ्यते। परं तु —

"न सामयिकत्वाच्छब्दादर्थसंप्रत्ययस्य"

इति सूत्रे[३] "पदसमूहो वाक्यमर्थपरिसमाप्तौ" इति भाष्यात् वाक्यं सावयवं, तच्च पदयोः पदानां वा समूहः इति अवगम्यते। एवं च वाक्यार्थप्रमाकरणं शब्दः। शब्दश्च पदसमूहात्मकवाक्यरूप इति भाष्यकारस्य आशयः। अत एव —

"अलातचक्रदर्शनवत्तदुपलब्धिराशुसंचारात्"

इति सूत्रे[४] भाष्यं "वाक्यस्थेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावत् श्रवणं भवति। श्रुतं वर्णमेकमनेकं वा पदभावेन स प्रतिसन्धत्ते। प्रतिसन्धाय पदं व्यवस्यति। पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते। पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति। संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते।" इति।

३.१.१.२. वाक्यस्य पदातिरिक्तत्व-अनतिरिक्तत्वविचारः

अस्तु पदसमूहो वाक्यमिति। किं तु स समूहः पदात् अतिरिक्तः अनतिरिक्तो वेति संदेहे पदानतिरिक्तः समूह इति निर्णीयते। समूहम् = एकज्ञानविषयतां, प्राप्तानि पदान्येव वाक्यमिति यावत्। अत एव न्यायमञ्जर्याम्[५] —

---

[१] न्या.सू.१.१.३.

[२] न्या.सू.१.१.७.

[३] न्या.सू.२.१.५४.

[४] न्या.सू.३.२.६२.

[५] न्या.मं, आ.६.भा.२.पृ.२०१.

"पदं वर्णसमूहोऽस्तु वाक्यं च पदसंहतिः।
वर्णा एव भवन्त्वेते वाचकाः केनचित् पथा॥" इति,

"वाक्यं च किमुच्यते? संहत्यार्थमभिदधति पदानि वाक्यम्। एकार्थः पदसमूहो वाक्यमिति वाक्यविदः"

इति[१] चोक्तम्।

३.१.१.२.१. तात्पर्यटीकायां[२] च —

"तस्मात् पदानि कृतसंकेतानि स्वार्थं स्मारयित्वा.........अदृष्टपूर्वं वाक्यार्थं बोधयन्ति" इति,

"पदानामेव पदार्थस्मरणावान्तरव्यापाराणां वाक्यार्थप्रमां प्रति करणतया प्रमाणत्वात्" इति,

"तस्मात् पदान्येव पदार्थस्मरणद्वारेण तत्संसर्गं लक्षयन्ति"

इति[३] च निरूपितम्।

३.१.१.२.२. उदयनाचार्येण च न्यायकुसुमाञ्जलौ पञ्चमस्तबके षष्ठश्लोकव्याख्यानावसरे —

"वाक्यादपि। संसर्गभेदप्रतिपादकत्वं ह्यत्र वाक्यत्वमभिप्रेतम्। तथा च यत्पदकदम्बकं यत्संसर्गभेदप्रतिपादकं तत् तदनपेक्षसंसर्गज्ञानपूर्वकं, यथा लौकिकम्। तथा च वैदिकमिति प्रयोगः"

इत्युक्तम्। अनेन पदसमूहः वाक्यमिति स्पष्टीकृतम्। पदसमूहोऽपि समूढानि पदान्येव न तदतिरिक्त इत्यपि, वाक्यात्मकशब्दस्य ईश्वरबाधकत्वनिरसनावसरे "अनुमानस्य यथा नेश्वरबाधकत्वमिति पूर्वमुक्तं, तथा अनुमानानतिरिक्तत्वात् शब्दस्यापि न बाधकत्वम्" इत्युक्त्वा वैशेषिकमतानुसारेण शब्दस्यानुमानविधया वाक्यार्थबोधकत्वकथनावसरे[४] —

"एतानि पदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वात्, एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वात्" इति वाक्यस्य बहुवचनान्तपदशब्देन निर्देशात् अवगम्यते। अनेन निराकाङ्क्षादिपदसमूहस्य वाक्यत्वं नास्तीत्यपि आवेदितम्।

---

१ न्या.मं, आ.६.भा.२.पृ.२०५.
२ न्या.सू.१.१.७
३ न्या.सू.२.१.५२.
४ न्या.कु.३.१३.

३.१.१.२.३. तत्त्वचिन्तामणिकारस्य गङ्गेशस्यापीदमेवाभिमतम्। तथा हि शब्दखण्डारम्भे —

"अथ शब्दो निरूप्यते। प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्"
इति गङ्गेशः शब्दप्रमाणस्य लक्षणमुक्तवान्। अत्र शब्दशब्देन वाक्यमेव विवक्षति। वाक्यमपि पदसमूह इत्येव तस्याभिमतम्। अत एवाग्रे शब्दस्यानुमानान्तर्भाववादिवैशेषिकमतानुवादसमये[१] —

"गामभ्याज दण्डेनेति पदानि, वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्पदकदम्बत्वात्, घटमानयेतिवत्"

इत्युक्तवान्। अत्र पदानि इति पक्षं, पदकदम्बत्वात् इति हेतुं च निर्दिशन् पदसमूहस्य पदेभ्यो भेदाभावं सूचयति।

तथा अन्विताभिधानवादखण्डनानन्तरं स्वसिद्धान्तनिगमनावसरे[२] —

"तस्मात् पदं करणम्, पदार्थस्मरणं व्यापारः, आकाङ्क्षादिसहकारिवशात् स्मारितार्थान्वयानुभवः फलम्"

इति वदन् अन्वयबोधकरणानि पदान्येव वाक्यमिति मन्यते।

३.१.१.२.४. न्यायकोशे[३] चिन्तामणिस्थत्वेन एकं वाक्यमुद्धृतमस्ति —

"वाक्यं पदसमूहः। वाक्यत्वं च विशिष्टार्थपरशब्दत्वम्"

इति। तदपि प्रकृतोपोद्बलकम्।

३.१.१.२.५. केशवमिश्रकृतायां तर्कभाषायामपि[४] —

"आकाङ्क्षायोग्यतासंनिधिमतां पदानां समूहः प्रमाणवाक्यम्, यथा गामानयेत्यादि"

इत्युक्तम्। अनेन निराकाङ्क्षपदसमूहस्य वाक्यत्वं नास्तीत्यपि सूचितम्।

३.१.१.२.६. अत एव जगदीशतर्कालंकारैः शब्दशक्तिप्रकाशिकायाम्[५] —

अनुभवहेतुः सकले सद्यः समुपासिता मनुजे।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी॥

---

१ त.चिं.म, च.भा.प्र.प.पृ.२५.
२ त.चिं.म, च.भा.द्वि.प.पृ.५४८.
३ न्या.को.पृ.७३०.
४ त.भा.पृ.४७.
५ श.श.प्र.१.

इत्युक्तम्। अनेन अनुभवजनकसाकाङ्क्षासन्नयोग्यपदसमूहात्मकं वाक्यं शब्द-प्रमाणमिति सूचितं भवति। तत्रैव द्वादशश्लोकस्य टीकायाम् —

"अथ वा यादृशशब्दानां यादृशार्थविषयकबोधं प्रति अनुकूला परस्परा-काङ्क्षा तादृशशब्दस्तोम एव तथाविधार्थे वाक्यम्"

इति साकाङ्क्षपदसमूहस्य वाक्यत्वं स्पष्टीकृतम्।

अन्नम्भट्टकृते तर्कसंग्रहेऽपि —

"शक्तं पदम्। वाक्यं तु पदसमूहः। आप्तवाक्यं शब्दः। आकाङ्क्षादिरहितं वाक्यं न प्रमाणम्"

इति आकाङ्क्षादिमत्पदसमूहस्य वाक्यत्वं स्पष्टमुक्तम्।

३.१.१.३. पदसमूहस्य वाक्यत्वे अनुपपत्तयः, तत्परिहारमार्गाश्च

अत्रेदं विचार्यते। नैयायिकानां मते वर्णसमूहः पदम्, पदसमूहो वाक्यम् इति सिद्धान्तः। समूहश्च न समूह्यपेक्षया अतिरिक्त इत्युक्तम्। तथा सति वर्णा एव पदम्, पदान्येव वाक्यमित्युक्तावपि एकबुद्ध्युपारूढानां वर्णानामेव वाक्यत्वमिति पर्यवस्यति। तत्र यथा पदं पदार्थप्रतिपादकम्, तथा वाक्यं वाक्यार्थप्रतिपादक-मित्यविवादम्। पदानां वाक्यार्थप्रतिपादकत्वं वृत्त्या, प्रकारान्तरेण वेत्यन्यदेतत्। वर्णानां पदरूपत्वं वाक्यरूपत्वं च कथं भवतीत्येवेदानीं विचारणीयमस्ति।

३.१.१.३.१. वर्णानां पदभावप्रदर्शनम्

न्यायमञ्जर्यां[१] विषयोऽयं सम्यक् विवेचितो निर्णीतश्च। तदनुसारेणात्र लिख्यते। कया पुनः कल्पनया पदभावं वाक्यभावं चोपगताः वर्णाः पदार्थप्रतीतिं वाक्यार्थप्रतीतिं च जनयन्ति इति शङ्कामुपक्षिप्य स्वसिद्धान्तकथनावसरे एवं वर्णितम् —

वर्णक्रमेण तावत् प्रथमपदज्ञानं भवति[२]। एवंरीत्या प्रथमपदज्ञानानन्तरं संकेतस्मरणम्, पदविषयकः संस्कारश्च युगपत् भवतः। ज्ञानयोर्हि यौगपद्यं शास्त्रे प्रतिषिद्धम्, न संस्कारज्ञानयोः। ततः पदार्थज्ञानम्। ततः पदार्थविषयकः संस्कारः। पुनः वर्णक्रमेण द्वितीयपदज्ञानम्। ततः संकेतस्मरणम्। पूर्वसंस्कारसहितेन तेन

---

[१] न्या.मं, आ.६.भा.२.पृ.१९२-२००.

[२] प्रथमं वर्णज्ञानम्, ततः संस्कारः। ततो द्वितीयवर्णज्ञानम्। तेन प्रथमवर्णज्ञानजनितेन संस्कारेण च पटुतरः संस्कारः। ततः तृतीयवर्णज्ञानम्। तेन प्राक्तनेन संस्कारेण च पटुतरः संस्कारः। एवं यावदन्त्यवर्णज्ञानं संस्कारः जायते। अन्त्यवर्णज्ञानानन्तरं तु ततः संस्कारात् सकलपूर्ववर्णविषयकमेकं स्मरणं जायते। तेन अन्त्यवर्णज्ञानस्य विनश्यत्ता। विनश्यदवस्थग्रहणस्मरणविषयीकृतो वर्णसमूहः पदमिति ज्ञायते।

पटुतरः संस्कारः। पुनः वर्णक्रमेण तृतीयपदज्ञानम्, संकेतस्मरणम्, पूर्वसंस्कारापेक्षः पटुतरः संस्कारः इत्येवं पदज्ञानजनिते पीवरे संस्कारे, पदार्थज्ञानजनिते च तादृशि संस्कारे स्थिते अन्त्यपदज्ञानानन्तरं पदसंस्कारात् सर्वपदविषयकस्मृतिः, पदार्थसंस्काराच्च पदार्थविषया स्मृतिरिति संस्कारत्रयात् क्रमेण द्वे स्मृती भवतः। तत्रैकस्यां स्मृतावुपारूढः पदसमूहो वाक्यम्, इतरस्यामुपारूढः पदार्थसमूहो वाक्यार्थः।

३.१.१.३.२. अथ वा कृतं स्मरणकल्पनया। अन्त्यपदार्थज्ञानानन्तरं सकलपदपदार्थविषयको मानसोऽनुव्यवसायः शतादिप्रत्ययस्थानीयो भविष्यति। तदुपारूढानि = तद्विषयभूतानि, पदानि वाक्यम्, तद्विषयः पदार्थसमूहो वाक्यार्थः। तथाविधश्च मानसोऽनुव्यवसायः सकललोकसाक्षिकत्वात् अप्रत्याख्येयः।

३.१.१.३.३. अनया च प्रक्रियया "एकम् इदं वाक्यम्" "एकोऽयं वाक्यार्थः" इति एकत्वप्रत्ययः एकस्मृतिविषयत्वकृतः उपपन्नो भवति। इत्थं च स्मरणारूढं संकलनज्ञानविषयीकृतं च इदं पदनिकुरुम्बं वाक्यम्, तथाविधश्चैष पदार्थसमूहो वाक्यार्थः इति सिद्धम्।

३.१.२. मीमांसादर्शनानुसारेण वाक्यस्वरूपम्

प्रायः मीमांसकाः अपि वर्णसमूहः पदं, पदसमूहः वाक्यम् इत्येव स्वीकुर्वन्ति। परं तु ते वर्णनित्यत्ववादिनः, नैयायिकास्तु तदनित्यत्ववादिन इति विशेषः। वर्णानां पदभाववाक्यभावकल्पनप्रक्रियायां च सूक्ष्मो भेदः वर्तते। अतः तद्दर्शनरीतिः अधुना प्रतिपाद्यते।

"अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयते"

इति[१] सूत्रव्याख्यानावसरे भाष्यम्—

"यावन्ति पदानि एकं प्रयोजनमभिनिर्वर्तयन्ति, तावन्ति पदानि एकं वाक्यम्" इति। तथा सूत्रकारः[२] —

"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्"

इति वाक्यलक्षणमुक्तवान्।

तत्र भाष्यं —

"यावता पदसमूहेनेज्यते तावान् पदसमूहः एकं यजुः। कियता चेज्यते?

---

१ जै.सू.२.२.२६.

२ जै.सू.२.१.१४.४६.

यावता क्रियाया उपकारः प्रकाश्यते, तावत् वक्तव्यत्वात् वाक्यमित्युच्यते। तेनाभिधीयते 'अर्थैकत्वादेकं वाक्यम्' इति। तस्मादेकार्थः पदसमूहो वाक्यम्" इति। अनेन पदसमूहः = समूहमापन्नानि पदानि, वाक्यमिति भाष्यकाराशयः स्पष्टः। विशिष्टैकार्थपरपदानि वाक्यमिति भावत्।

३.१.२.१. वार्त्तिककारमिश्रा[१] अप्याहुः —

"तस्मात् पदेषु यावत्सु श्रूयमाणेषु दृश्यते।
विस्पष्टमैक्यमर्थस्य तावतामेकवाक्यता॥" इति।

तथा "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति सूत्रे[२] भाष्यम् —

"अथ किं वाक्यं नाम? संहत्यार्थमभिदधति पदानि वाक्यम्" इति,

"एकार्थमनेकं पदं वाक्यमित्युक्तमेव। तदेतत् सर्वेष्वेव वाक्येषु समवेतं विविक्तं च दृश्यते" इति एतमेवार्थमुपपादयन्ति।

प्रकरणपञ्चिकायां[३] च —

"पदान्येव वाक्यम्। पदार्था एव वाक्यार्थ इति गुरुमतस्थितिः"
इत्यभ्यधायि।

३.१.२.२. वर्णानां पदवाक्यभावः

मीमांसका अपि वर्णातिरिक्तं पदं पदातिरिक्तं च वाक्यं नाङ्गीकुर्वन्ति। अतस्तन्मते वर्णानां पदभावः वाक्यभावश्च कया रीत्या भवति इति शङ्कायाम्, भगवता भाष्यकारेण शबरस्वामिना —

"अथ गौरित्यत्र कः शब्दः? गकारौकारविसर्जनीया इति भगवानुपवर्षः। लोके श्रोत्रेन्द्रियग्राह्यो वस्तुनि शब्द इति शब्दः प्रसिद्धः। वर्णा एव श्रोत्रेन्द्रियग्राह्याः, न तदतिरिक्तः कश्चित्।"

इति प्रतिपादितम्। ततः वर्णानां साहित्यासंभवात् कथं तेषां पदत्वमित्याशङ्क्य —

"पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः अर्थप्रत्यायक इत्यदोषः" इत्युक्तम्। अनेन पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितस्यान्त्यवर्णस्य पदरूपता स्पष्टमुक्ता भवति। अनेनैव न्यायेन पूर्वपूर्वपदज्ञानजनितसंस्कारसहितमन्त्यं पदं वाक्यमित्यपि

---

[१] तं.वा.२.१.४६.
[२] जै.सू.३.३.१४.
[३] प्र.पं.पृ.३७७.

लभ्यते। किं तु तन्मते पदमेव पदार्थबोधकम्। वाक्यं नार्थबोधकम्, पदार्थानामेव वाक्यार्थबोधकत्वात्। एतत्तत्त्वं तु वाक्यार्थबोधे निमित्तस्य प्रतिपादनावसरे विस्तरेण वक्ष्यते।

३.१.३. वेदान्तदर्शनानुसारेण वाक्यस्वरूपम्

३.१.३.१. अद्वैतवेदान्तदर्शनानुसारेण वाक्यस्वरूपम्

वेदान्तिनोऽपि अद्वैतिनः अन्ये च स्फोटनिराकर्तारः "प्रत्येकवर्णानुभवभावितभावनानिचयलब्धजन्मस्मृतिदर्पणारूढा वर्णमाला पदं वाक्यं वा" इति स्वीकुर्वन्ति। तदुक्तं शाब्दनिर्णये[१] —

"वर्णाः स्वज्ञानसंस्कारैः संभूय स्मृतिकारिभिः।
क्रमेणैकस्मृतौ बुद्धाः बोधयन्त्यर्थमञ्जसा॥" इति।

ब्रह्मसूत्रशांकरभाष्ये[२] च —

"सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्य एव पिपीलिकाः पङ्क्तिबुद्धिमारोहन्ति। एवं क्रमानुरोधिन एव हि वर्णाः पदबुद्धिमारोक्ष्यन्ति" इति। अनेन क्रमविशेषविशिष्टानां वर्णानामेव पदत्वं कथितम्। वाक्यत्वमपि तादृशानां पदानां वर्णानां वेत्यपि सूचितमनेन।

३.१.३.२. विशिष्टाद्वैतवेदान्तिनोऽपि एकबुद्ध्युपारूढानां वर्णानामेव पदत्वम्, तादृशानां पदानामेव च वाक्यत्वं स्वीकुर्वन्ति। तदुक्तं तत्त्वमुक्ताकलापे[३] —

"न ह्यक्षैः केऽपि वर्णाभ्यधिकमिह विदुर्वाचकं सावधानाः
शब्दादर्थं प्रतीमस्त्विति च जनवचो नैकमन्यद् व्यनक्ति।
सामग्र्यैक्यादिनीत्या भवति मतिरियं तादृशे वर्णसङ्घे
संभेदे वा पदानामिति न तदधिकः कोऽपि शब्दोऽपरोक्षः॥" इति।

तत्र सर्वार्थसिद्धिव्याख्यायाम् —

"एकार्थप्रतिपादकत्वेन व्याकरणादिव्युत्पन्ना एकबुद्ध्युपग्रहेण संघातभावमापन्ना वर्णा एव पदम्। एवमेकार्थप्रतिपादनरूपकार्यावच्छिन्नानि पदार्थप्रतिपादकानि पदान्येव वाक्यम्। अत्र ऐक्यम् एकबुद्ध्यवस्थितानां सङ्घातभावविषयम्। अतो न विरोधः"

इत्यभिहितमत्रानुसन्धेयम्।

---

[१] शा.नि.श्लो.१२.
[२] ब्र.सू.शां.भा.१.३.२८.
[३] त.मु.क, बुद्धिसरे.श्लो.८७.

३.१.३.३. द्वैतवेदान्तिनोऽपि इत्थमेव मन्यन्ते। तथा हि तर्कताण्डवे[१] —

"पद्धतौ निर्दोषशब्दत्वं निर्दोषवाक्यत्वं वा आगमलक्षणम्। अत्राद्यं 'निर्दोषः शब्द आगमः' इति प्रमाणलक्षणानुसारि। द्वितीयं तु 'आगमोऽदुष्टवाक्यं च' इति ब्रह्मतर्कानुसारि। अत्र वाक्यग्रहणं शिष्याणां पदवाक्यादिस्वरूपज्ञापनार्थम्। अत एव पद्धतौ द्वितीयपक्षे 'विभक्त्यन्ता वर्णाः पदम्। आकाङ्क्षायोग्यतासंनिधिमन्ति पदानि वाक्यम्' इत्यादिना पदादीनां लक्षणमुक्तम्"

इति ग्रन्थेन वर्णानां पदत्वं, पदानां वाक्यत्वं च स्पष्टमुक्तम्।

३.१.४. व्याकरणदर्शनानुसारेण वाक्यस्वरूपम्

एकोऽनवयवः शब्दः वाक्यमिति वैयाकरणानां परमसिद्धान्तः।

तथापि वाक्यस्वरूपविषये अष्टौ पक्षा भर्तृहरिणा वाक्यपदीये उपन्यस्ताः, तेऽत्र संगृह्यन्ते। तथा हि वाक्यपदीयम्[२] —

"आख्यातशब्दः संघातो जातिः संघातवर्तिनी।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः॥
पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम्॥" इति।

अयमर्थः — न्यायदर्शिनां = विदुषां, वाक्यं प्रति = वाक्यविषये, बहुधा = अष्टधा, मतिर्भिन्ना। अत्र न्यायो नाम वाक्यविषयकस्तर्कः। ते चाष्टौ पक्षभेदा इमे — १. आख्यातशब्दो वाक्यम् २. संघातः (पदसंघातः) वाक्यम् ३. संघातवर्तिनी जातिः वाक्यम् ४. एकोऽनवयवः शब्दः वाक्यम् ५. क्रमः वाक्यम् ६. बुद्ध्यनुसंहृतिः वाक्यम् ७. आद्यं पदं वाक्यम् ८. पृथक् सर्वं पदं साकाङ्क्षं वाक्यम् इति।

३.१.४.१. आख्यातशब्दो वाक्यम्

तत्र आख्यातशब्दो वाक्यमिति वादिनाम् आख्यातशब्दः (तिङन्तशब्दः) एव वाक्यमिति नाभिप्रायः, "देवदत्त गामभ्याज दण्डेन" इत्यादौ सुप्तिङन्तचये वाक्यत्वव्यवहारस्य सर्वजनीनस्य अपलापप्रसङ्गात्। किं तु क्वचित् आख्यातशब्दोऽपि वाक्यम्, यत्र कारकशब्दप्रयोगं विना केवलाख्यातशब्दप्रयोगेऽपि वाक्यार्थावगतिः, यथा "पिधेहि" इति। तदिदं शब्दार्थनिर्णयप्रकरणे[३] दर्शयिष्यति —

---

[१] त.तां, भा.२.पृ.३.
[२] वा.प.२.१,२.
[३] वा.प.२.३२६.

"आख्यातशब्दे नियतं साधनं यत्र गम्यते।
तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते॥"

इति। अत्र तदप्येकं वाक्यम् इत्युक्त्या अन्यदपि वाक्यमस्तीति गम्यते।

३.१.४.२. पदसंघातो वाक्यम्

पदसमूहः वाक्यमिति वादिनस्तु "पिधेहि" इत्यादौ न केवलाख्यातस्य वाक्यत्वम्। किं तु "द्वारम्" इति कर्माध्याहृत्य तत्संहतस्यैव। केवलाख्यातशब्दस्य यथा न वाक्यत्वं, तथा केवलसुबन्तस्य "द्वारम्" इत्यादेः न वाक्यत्वम्, तत्र नियमेन पिधानक्रियायाः अनुपस्थितेः।

"गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते॥" [१]

३.१.४.३. संघातवर्तिनी जातिः वाक्यम्

सुप्तिङन्तपदसंघातवर्तिनी जातिर्वाक्यमिति वादिनामभिसन्धिस्तु "देवदत्त गामभ्याज दण्डेन" इत्यादिपदसंघातरूपेषु वाक्येषु अस्ति कश्चन प्रतिवाक्यं भिद्यमानो जातिविशेषः, येन प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं च भिद्यमाने पदसंघाते वाचकत्वं न संभवति, आनन्त्यव्यभिचारदोषप्रसङ्गात्। अतः पदसंघातगतायाः जातेरेकस्या एव वाचकत्वमिति तस्या एव वाक्यत्वमिति। तदाह[२] —

"यथा क्षेपविशेषेऽपि कर्मभेदो न गृह्यते।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः॥"

३.१.४.४. एकोऽनवयवः शब्दः वाक्यम्

एकोऽनवयवः शब्दो वाक्यमिति केषांचिन्मतम्। एतन्मते वाक्यस्फोटोऽखण्डः। तत्र वर्णपदापोद्धारकल्पनायामपि वस्तुतो वर्णाः पदानि वा तत्र न सन्तीति। तदाह[३] —

"यथैक एव सर्वार्थप्रत्ययः प्रविभज्यते।
दृश्यभेदानुकारेण वाक्यार्थानुगमस्तथा॥"

---

[१] वा.प.२.४८.
[२] वा.प.२.२०.
[३] वा.प.२.७.

३.१.४.५. क्रमः वाक्यम्

पदानां क्रमः पौर्वापर्यं, पूर्वापरीभूतानि पदान्येव वाक्यम् इत्यपरे। एतन्मते वाक्यस्फोटस्य सखण्डत्वं पदसमुदायारब्धत्वं चेति। तदाह[१] —

"सन्त एव विशेषा ये पदार्थेषु व्यवस्थिताः।
ते क्रमादनुगम्यन्ते न वाक्यमभिधायकम्॥"

३.१.४.६. बुद्ध्यनुसंहृतिः वाक्यम्

बुद्ध्यनुसंहृतिः वाक्यमित्यन्ये। एतस्मिन् मते वाक्यमखण्डम्। तत्र पदानि न सन्ति। किं तु पदानि पदबुद्धयश्च कल्पितानि। तत्र पदबुद्धीनां कल्पितानाम् अनु = क्रमेण, संहारः, उपसंहारः इति पदसमुदायरूपत्वं बुद्ध्या प्रकल्प्य वाक्यत्वव्यवहारः। तदाह[२] —

"यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितम्।
तदाहुरपरे शब्दं तस्य वाक्ये तदेकता॥"

३.१.४.७. आद्यं पदं वाक्यम्

आद्यं पदं वाक्यमित्यपि केषांचित् मतम्। अस्मिन् मतेऽनेकपदारब्धं सखण्डं वाक्यम्। अस्मिन् पक्षे प्रथमोपस्थितत्वात् शक्ततावच्छेदकानुपूर्वीकल्पनायां लाघवाच्च आद्यं पदमेव वाचकम्। इतरपदानि तु तत्सहकारीणि तच्छक्तिद्योतकानि। यथा — "साक्षात्क्रियते" इत्यत्र साक्षात्पदमेव साक्षात्कारवाचकम्। "क्रियते" इति पदं तु पूर्वपदस्य तदर्थे शक्तिद्योतकमिति आद्यपदस्यैव वाक्यत्वमिति।

३.१.४.८. पृथक् सर्वं पदं साकाङ्क्षं वाक्यम्

पृथक् सर्वं पदं साकाङ्क्षं वाक्यमिति वादिनामयं भावः — पृथक् = वाक्यात् पृथक्कारे, साकाङ्क्षं = पदान्तरसाकाङ्क्षं, सर्वं पदम् आद्यं मध्यमम् अन्त्यं च समुदितं वाक्यम् इति। तदुक्तं जैमिनिना[३] —

"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति।

३.१.४.९. वार्त्तिककाराश्च[४] "आख्यातं साव्ययकारकविशेषणं वाक्यम्" इत्येकम्, "एकतिङ् वाक्यम्" इत्यपरं च वाक्यलक्षणं वदन्ति। तयोः संघातपक्षेऽन्तर्भावः।

---

[१] वा.प.२.४९.
[२] वा.प.२.३०.
[३] जै.सू.२.४.१४.४६.
[४] व्या.वा.११९९,१२०१, म.भा. २.१.१, भा.२.पृ.३३६-३३७.

एतेषु वाक्यविकल्पेषु पक्षद्वयमस्ति — सखण्डवाक्यपक्षः, अखण्डवाक्यपक्षश्चेति। तत्र जातिः संघातवर्तिनी, एकोऽनवयवः शब्दः, बुद्ध्यनुसंहृतिः इति त्रीणि लक्षणानि अखण्डवाक्यपक्षे। आख्यातशब्दः, क्रमः, संघातः, आद्यं पदम्, पृथक् सर्वं पदं साकाङ्क्षम् इति पञ्च लक्षणानि सखण्डवाक्यपक्षे।

अत्र "तत्र वैयाकरणस्य अखण्ड एव एकोऽनवयवः शब्दः स्फोटलक्षणः वाक्यम्। प्रतिभैव वाक्यार्थः, अध्यासश्च संबन्ध इति पदवादिपक्षदूषणपरः परं टीकाकारो[1] (भर्तृहरिः) व्यवस्थापयति" इति पुण्यराजेनोक्तं ध्येयम्।

३.१.५. सांख्यदर्शनानुसारेण वाक्यस्वरूपम्

सांख्याः कार्याणां वर्णानामेव वाचकत्वमिच्छन्तः वैयाकरणाभिमतं स्फोटवादं भाट्टाभिमतं वर्णनित्यत्वं च निराचक्रुः।

"प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः"

"न शब्दनित्यत्वं कार्यताप्रतीतेः"

इति सांख्यसूत्रद्वयम्[2] अत्रानुसन्धेयम्। एवं च नैयायिकवत् वर्णसमूहः पदम्, पदसमूहो वाक्यम् इत्येव सांख्यानां मतम्।

३.१.६. योगदर्शनानुसारेण वाक्यस्वरूपम्

पातञ्जला योगास्तु वैयाकरणवत् वाक्यस्वरूपम् आहुः। यथा योगसूत्रे[3] —

"शब्दार्थप्रत्ययानामितरेतराध्यासात् संकरः तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्" इत्युक्तम्।

तत्र भाष्यं —

"तदेकं पदमेकबुद्धिविषयमेकप्रयत्नाक्षिप्तमभागमक्रमवर्णं बौद्धमन्त्यवर्णप्रत्ययव्यापारोपस्थापितं परत्र प्रतिपिपादयिषया वर्णैरेवाभिधीयमानैः उच्चार्यमाणैः श्रूयमाणैश्च श्रोतृभिरनादिवाग्व्यवहारवासनानुविद्धया लोकबुद्ध्या सिद्धवत्संप्रतिपत्त्या प्रतीयते। तस्य संकेतबुद्धितः प्रविभागः"

इति। तद्व्याख्यायां वाचस्पतिमिश्राः —

"तस्माद्वर्णेभ्योऽसंभवन्नर्थप्रत्ययः एकपदानुभवमेव स्वनिमित्तमुपकल्पयति" इति प्राहुः।

---

१ वा.प, भा.२, पृ.१७.
२ सां.सू.५.५७, ५८.
३ यो.सू.३.१७.

३.२. वाक्यार्थस्वरूपम्

अथ वाक्यार्थः क इति विविधदर्शनानुसारं प्रतिपाद्यते।

३.२.१. न्यायदर्शनानुसारेण वाक्यार्थस्वरूपम्

न्यायभाष्यकारः[१] —

"संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते"

इति वदन् पदार्थज्ञानानन्तरं वाक्यार्थज्ञानं भवतीति आवेदयति। वाक्यार्थस्वरूपं तु भाष्यकारेण न प्रदर्शितम्।

३.२.१.१. तात्पर्यटीकाकारा वाचस्पतिमिश्राः शब्दप्रमाणस्यानुमानविधया प्रमाजनकत्वमिति वैशेषिकमतानुवादसमये अनुमानद्वयमुपातिष्ठिपन्। यथा[२] —

"पदैः स्मारिताः पदार्था गुणप्रधानभावेनावस्थिताः संसर्गवन्तः, आकाङ्क्षायोग्यतासत्तिमत्त्वे सति पदैः स्मारितत्वात्" इति, "अयं पदकदम्बकविशेषः स्मारितपदार्थसंसर्गवान् आकाङ्क्षादिमत्त्वे सति पदकदम्बत्वात्" इति च। अनेन पदार्थानां संसर्गो वाक्यार्थः इति सूचयन्ति। तथा तत्रैव स्वमतप्रतिपादनावसरे[३] —

"तस्मात् पदान्येव पदार्थस्मरणद्वारेण तत्संसर्गं लक्षयन्ति वाक्यार्थे प्रमाणम्"

इति पदार्थानां संसर्गस्य वाक्यार्थत्वमाविष्कृतवन्तः।

३.२.१.२. न्यायमञ्जर्यां वाक्यार्थस्वरूपविषयेऽनेकानि मतानि प्रदर्शितानि। यथा[४] —

१. बाह्यस्य वाक्यार्थस्यासंभवात् पदार्थसंसर्गनिर्भासं ज्ञानमेव वाक्यार्थ इति केचित्।

२. वास्तवः पदार्थानां परस्परसंसर्गो बाह्य एव वाक्यार्थ इत्यन्ये।

३. अन्ययोगव्यवच्छेदो वाक्यार्थ इत्यपरे।

४. गुणीभूतकारकनिकरनिर्वर्त्या क्रिया वाक्यार्थ इत्येके।

५. भाव्यनिष्ठः पुरुषव्यापारः करोत्यर्थो भावनाशब्दवाच्यः वाक्यार्थ इत्यन्ये।

६. लिङादिशब्दवाच्यः शब्दभावनाख्यः पुरुषस्य अर्थभावनानुष्ठाने प्रवर्तकः विधिः वाक्यार्थः इत्यपरे।

---

१ न्या.सू.३.२.६२.
२ न्या.वा.ता.टी.२.१.५२, पृ.४१४, ४१५.
३ न्या.वा.ता.टी.२.१.५२, पृ.४१५.
४ न्या.मं, आ.५.भा.२, पृ.६९.

७. नियोगाख्यं कार्यं वाक्यार्थ इत्यपरे।

८. उद्योगो वाक्यार्थ इति केचित्।

इति। ततः स्वमतनिरूपणावसरे[१] —

वाक्यार्थस्तु न क्वचिदपि सूत्रकारभाष्यकाराभ्यां सूचित इति कुतः शिक्षित्वा वाक्यार्थस्वरूपं वयमाचक्ष्महे। किमिति ताभ्यामसौ न सूचितः —

इत्याक्षेपं कृत्वा —

पृथक्प्रस्थाना हीमा विद्याः, प्रमाणविद्या चेयमान्वीक्षिकी न वाक्यार्थविद्येति। यद्येवं, पदार्थोऽपि कस्मादिह दर्शितः "व्यक्त्याकृतिजातयस्तु पदार्थः" इति। स्थाने प्रश्नः। स तु शब्दानामर्थासंस्पर्शितां वदन्तं रुदन्तं च शमयितुं शब्द-प्रामाण्यसिद्धये सूत्रकृता यत्नः कृतः। यद्येवं वाक्यार्थमपि बाह्यं वास्तवमन्तरेण शास्त्रस्य प्रमाणता न प्रतिष्ठां लभत इति तत्रापि यत्नः कर्तव्य एव। सत्यम्; पदार्थप्रतिपादनयत्नेनैव तु कृतेन तत्र यत्नं कृतं मन्यते सूत्रकारः। यदयं पृथक् पदार्थेभ्यो न वाक्यार्थमुपदिशति स्म, तस्मादयमस्याशयः पदार्थ एव वाक्यार्थ इति। किं तु नैकः पदार्थः वाक्यार्थः, अपि तु अनेकः पदार्थो वाक्यार्थः।

यद्यपि "सामान्ये हि पदं वर्तते, विशेषे वाक्यम्। अन्यच्च सामान्यम्, अन्यो विशेषः" इति मीमांसाभाष्यकारेण शबरस्वामिना,[२] "यदत्राधिक्यं स वाक्यार्थः" इति व्याकरणभाष्यकारेण पतञ्जलिना[३] चोक्तत्वात् पदार्थादन्यो वाक्यार्थ इति प्रतीयते। तथापि, अनेकः पदार्थो वाक्यार्थः, न पुनरेक इत्युक्तौ न कोऽपि दोषः। एतदुक्तं भवति — परस्परसंसृष्टपदार्थसमुदायो वाक्यार्थ इति संसर्ग एवाधिक इति "यदत्राधिक्यम्" इत्युच्यते। न चानाक्षिप्तविशेषः संसर्गः संभवतीति विशेषो वाक्यार्थ इत्युच्यते।

संसर्गस्तु स्वरूपतो न वाक्यार्थः, अपदार्थत्वत्। तस्मात् संसृष्टो वाक्यार्थः इत्युपपादितम्। अग्रेऽपि —

"तस्मात् गुणप्रधानभावानियमात् अन्योन्यसंसृष्टपदार्थसमुदायो वाक्यार्थ इत्येतावदेव श्रेयः" इति,

"वाक्यार्थं मन्यते ये च नियोगं भावनां क्रियाम्।
तैरप्यन्योन्यसंसृष्टः पदार्थग्राम इष्यते॥"

इति च निगमनं कृतम्। तेन परस्परसंसृष्टाः पदार्थाः वाक्यार्थ इति जयन्त-भट्टस्य सिद्धान्तः।

---

१ न्या.मं, आ.५.भा.२, पृ.१३५-१३६.

२ शा.भा.१.१.२४.

३ म.भा.२.३.४६.

३.२.१.३. उदयनाचार्यास्तु टीकाकारवत् पदार्थानां संसर्गस्यैव वाक्यार्थत्वं मन्यन्ते। न्यायकुसुमाञ्जलौ पञ्चमस्तबके षष्ठश्लोकव्याख्यानावसरे —

"पदवाक्ययोः पदार्थसंसर्गौ विहाय प्रतिपाद्यान्तराभावात्"

इति, तथा षोडशश्लोकव्याख्यानावसरे —

"संसर्गभेदप्रतिपादकत्वं ह्यत्र वाक्यत्वमभिप्रेतम्"

इति च तैः उक्तत्वात्।

३.२.१.४. मणिकृतोऽपि पदार्थानां ससर्ग एव वाक्यार्थ इति आशेरते। तदुक्तं शब्दखण्डे[१] तैः —

"तस्मात् पदं करणम्, पदार्थस्मरणं व्यापारः, आकाङ्क्षादिसहकारिवशात् स्मारितार्थान्वयानुभवः फलम्"

इति। स्मारितार्थान्वयः = पदस्मारितानामर्थानां संसर्गः।

३.२.१.५. गदाधरभट्टाचार्याः व्युत्पत्तिवादे —

"शब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते"

इति प्रथमवाक्येन वाक्यघटकपदार्थानां यः अभेदरूपो भेदरूपो वा संबन्धः स आकाङ्क्षया शाब्दबोधे भासत इति प्रतिपादयन्तः पदार्थानां संसर्गस्य वाक्यार्थत्वं मन्यन्ते।

३.२.१.६. अत्र किंचिदवधेयम्। नैयायिकमते वाक्यार्थ इत्यस्य वाक्यशक्य इति वा वाक्यलक्ष्य इति वा नार्थः। वाक्ये शक्तिलक्षणयोरनङ्गीकारात्। किं तु वाक्यप्रतिपाद्य इत्यर्थः। पदसमूहात्मकवाक्यजन्यशाब्दबोधात्मकप्रतिपत्तिविषयः इत्यर्थः। सा च प्रतिपत्तिः आकाङ्क्षावशात् इति।

किं च न्यायनये शक्तं पदमिति स्वीकारात् प्रकृतिप्रत्यययोरपि स्वस्वार्थे शक्तत्वात् प्रकृतिप्रत्ययसमुदायस्य वाक्यत्वमस्ति वा न वा? अस्ति चेत् "घटमानय" इति वाक्यद्वयं स्यात्। न चेष्टापत्तिः, एकं वाक्यमिति लोकप्रसिद्धिविरोधात्। नास्ति चेत्, शक्तं पदम्, वाक्यं तु पदसमूहः इति स्वोक्तिविरोध इति बहवः पृच्छन्ति।

अत्र समाधानं तावत् एवं वक्तव्यम् — "घटमानय" इति वाक्यद्वयम्। एकवाक्यताप्रसिद्धिस्तु वाक्यैकवाक्यतामवलम्ब्य — इति ।

---

[१] त.चिं.म, च.भा.द्वि.प.पृ.५४८.

तदुक्तम् आकाङ्क्षावादे मणिकारैः[१] —

"प्रकृतिप्रत्ययाभ्यामन्वयबोधे जनितेऽपि वाक्यैकवाक्यतावत् क्रियाकारकपदयोः अजनितान्वयबोधत्वमाकाङ्क्षा"

इति। तत्र "वाक्यैकवाक्यतावत्" इत्यस्य "एकवाक्यतापन्नवाक्यद्वयवत्" इति विवरणं कृतं मथुरानाथेन —

अत्र "वाक्यैकवाक्यतावत्" इति वत्कारं कुर्वतः मणिकारस्य अयमाशयः, यत्र परिपूर्णयोः द्वयोः वाक्ययोः उत्थापिताकाङ्क्षावशात् परस्परार्थान्वयानुभावकत्वं तत्रैव वाक्यैकवाक्यता। तदुक्तं भट्टपादैः[२] —

"स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते॥"

इति। प्रकृते "घटम्" इति पदस्य "आनयेति" पदस्य च शक्तसमुदायरूपस्यापि क्रियाकारकसाकाङ्क्षत्वेन परिपूर्णत्वाभावात् कथमत्र वाक्यैकवाक्यता मुख्या स्यात्। अतः "वाक्यैकवाक्यतावत्" इत्युक्तम्। संसर्गबोधकं वाक्यमिति मत्वा वाक्यद्वयमिति स्वीकृत्य वाक्यैकवाक्यतान्यायोऽत्र — इति।

३.२.२. मीमांसादर्शनानुसारेण वाक्यार्थस्वरूपम्

३.२.२.१. मीमांसाभाष्ये वाक्यार्थस्वरूपम्

इतरपदार्थान्वितः पदार्थ एव वाक्यार्थ इति मीमांसकानां मतम्। तथा हि भाष्ये[३] —

"अनेकपदार्थानुरक्तो वाक्यार्थः, स च पदार्थमूलः, न निर्मूलः, न च संकेतमूलः"

इति, तथा "अर्थाभिधानसामर्थ्यात्" इति सूत्रे[४] —

"अथ वाक्यार्थोऽयमित्युच्येत, नैवं शक्यम्, न हि अनन्वितः पदार्थो भवति वाक्यार्थः"

इति चोक्तम्। तेन इतरपदार्थान्वितः पदार्थो वाक्यार्थ इति प्रतीयते।

परं तु "उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्निमित्तत्वात्" इति सूत्रे[५] —

---

[१] त.चिं.म, च.भा.प्र.प.पृ.२३८.
[२] तं.वा.१.४.२२.
[३] शा.भा.१.१.७.
[४] जै.सू.३.२.१.१.
[५] जै.सू.१.१.२४.

"न च पदार्था एव वाक्यार्थः, सामान्ये हि पदं वर्तते, विशेषे वाक्यम्। अन्यच्च सामान्यम् अन्यो विशेषः" इति भाष्यात्, तत्रत्यात् —

"परस्परान्विततता हि विशेष उच्यते। अनन्वितावस्थं सामान्यम्"

इति बृहतीग्रन्थात् पञ्चिकाग्रन्थाच्च पदार्थानां परस्परसंसर्गः वाक्यार्थ इत्यवगम्यते। तथा "तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्" इति [१]सूत्रभाष्ये —

"विशिष्टार्थसंप्रत्ययश्च वाक्यार्थः" इत्युक्तम्। अत्र वाक्यार्थ इत्यस्य वाक्यफलमित्यर्थः। वाक्यफलज्ञानविषयः विशिष्टार्थः = परस्परान्वितोऽर्थः वाक्यार्थ इति तदाशयः। तथा —

"पदार्थैः संस्कृतः पिण्डितोऽर्थो वाक्यार्थः"

इति भाष्यादपि[२] संसृष्टोऽर्थो वाक्यार्थ इति लभ्यते।

तथा अरुणाधिकरणे[३] भाष्यकार आह —

"सर्वत्र तु बोधिते पदार्थे वाक्यार्थ उपपद्यते नान्यथा। सामान्यवृत्ति हि पदम्, विशेषवृत्ति वाक्यम्। सामान्येनाभिप्रवृत्तानां पदार्थानां यत् विशेषेऽवस्थानं स वाक्यार्थः"

इति। अत्र विशेषपदेन संसर्गमेव भाष्यकारो विवक्षति।

३.२.२.२. वार्त्तिककारमिश्रैः[४] —

"आकृतिपदार्थपक्षे शुक्लत्वगोत्वयोः स्वरूपेणाभिहितयोः संनिधानात् इतरेतरानुरञ्जनमर्थसिद्धभेदं वाक्यार्थः"

इति कथितम्। इतरेतरानुरञ्जनं नाम परस्परसंसर्गः। स एव वाक्यार्थः। अर्थसिद्धभेदमित्यनेन बौद्धसंमतं भेदस्य वाक्यार्थत्वं खण्डितं भवति। पदार्थयोः संसर्गे बुद्धे भेदस्यार्थात् सिद्धेः।

३.२.२.३. प्रकरणपञ्चिकायां शालिकनाथमिश्रैः[५] —

प्रधानगुणभावेन लब्धान्योन्यसमन्वयान्।
पदार्थानेव वाक्यार्थान् संगिरन्ते विपश्चितः॥

---

[१] जै.सू.१.१.२५.
[२] शा.भा.१.१.८.३२.
[३] जै.सू.३.१.१२.
[४] तं.वा.२.१.१४.४६, भा.२.पृ.५२९.
[५] प्र.पं.पृ.३३७.

पदान्येव वाक्यम्, पदार्था एव वाक्यार्थ इति गुरुमतस्थितिः। पदार्थमेवैकं प्रधानं गुणभूतार्थान्तरव्यतिषक्तं वाक्यार्थं मन्यन्ते प्राभाकराः — इत्युक्तम्।

३.२.२.४. भाट्टचिन्तामणौ[१] गागाभट्टेन —

पदज्ञानकरणको वाक्यार्थो द्विविधः, भेदरूपः संसर्गरूपश्च, राज्ञः पुरुष इत्यादौ अराजसंबन्धिभिन्नः पुरुष इत्यन्वयबोधात् इति केचित्। सर्वत्र संबन्ध एव वाक्यार्थः, उक्तरूपापोहस्य प्राचुर्येण भानाभावात्, अपोहस्याप्रसिद्धेश्च। अतः संसर्ग एव वाक्यार्थः। स च "घटमानय" इत्यादौ घटकर्मकत्वादिरूपविशेषण-विशिष्टं विशेष्यमेव वाक्यार्थ इत्याचार्याः —

इति स्पष्टमुक्तं संसर्ग एव वाक्यार्थ इति। एतन्मतेऽपि वाक्यार्थ इत्यस्य पद-समूहजन्यपदार्थज्ञानजन्यज्ञानविषय इत्यर्थः। न तु वाक्यशक्य इत्यर्थः। शक्त्य-नभ्युपगमात्।

३.२.३. वेदान्तदर्शनानुसारेण वाक्यार्थस्वरूपम्

३.२.३.१. अद्वैतवेदान्तदर्शनानुसारेण वाक्यार्थस्वरूपम्

"तत्तु समन्वयात्" इति सूत्रभाष्ये[२] शंकरभगवत्पादैः अन्विताभिधान-वादखण्डनपूर्वकमभिहितान्वयवादस्य समर्थितत्वात् सखण्डार्थवाक्यानां "गामा-नय" इत्यादीनां प्रतिपाद्योऽर्थः पदार्थानां परस्परमन्वयः इत्यवगम्यते। तत्त्व-मस्यादिवाक्यानामखण्डार्थपराणां तु संसर्गागोचरप्रमितिजनकत्वस्वीकारात् न संसर्गः प्रतिपाद्यः, अपि तु शुद्धचैतन्यम्।

तथा चैतन्मते वाक्यार्थ इत्यस्य वाक्यतात्पर्यविषय इत्यर्थः। स च क्वचित् संसर्गः। क्वचित् वस्तु इति निष्कर्षः। अत एव वेदान्तपरिभाषायां[३] —

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम्। उच्यते। वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तन्त्रम्। अनभिमतसंसर्गस्यापि वाक्य-जन्यज्ञानविषयत्वापत्तेः। किंतु तात्पर्यविषयत्वम्। प्रकृते च "सदेव सोम्येदमग्र आसीत्" इत्युपक्रम्य "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इत्युपसंहारेण विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्याविषयं संसर्गमव-बोधयेत् —

इत्युक्तम्।

---

[१] भा.चिं.पृ.७९-८०.
[२] ब्र.सू.१.१.४.
[३] वे.प.प्र.खं.पृ.८०.

३.२.३.२. विशिष्टाद्वैतिनामपि वाक्यप्रतिपाद्योऽर्थः पदार्थानां परस्परं संसर्ग एव। तदुक्तं तत्त्वमुक्ताकलापे[१] —

"संसर्गं वाक्यवेद्यं स्फुटमभिदधते कानिचित् भाष्यवाक्यानि" इति। संसर्गस्य वाक्यवेद्यत्वं चाभिहितान्वयस्वीकारे वाक्यघटकपदाभिहितपदार्थगम्यत्वरूपम्, अन्विताभिधानपक्षे च संहतपदशक्तिज्ञानजन्यज्ञानविषयत्वरूपम्।

३.२.४. व्याकरणदर्शनानुसारेण वाक्यार्थस्वरूपम्

अर्थवत्सूत्रे[२] वार्त्तिके भाष्ये च अर्थवतः शब्दस्वरूपस्य प्रातिपदिकसंज्ञायां विधीयमानायाम् अर्थवतो वाक्यस्यापि प्रातिपदिकसंज्ञा प्राप्नोति, तत्प्रतिषेधो वक्तव्य इत्याशयेन —

"वाक्यप्रतिषेधोऽर्थवत्त्वात्" (वार्त्तिकम्)

"देवदत्त गामभ्याज शुक्लाम्, देवदत्त गामभ्याज कृष्णामिति। किं कारणम्। अर्थवत्त्वात्। अर्थवद्धि एतद्वाक्यम्"

इत्याक्षेपः कृतः। ततः आक्षेपबाधकभाष्यं —

"न वै पदार्थादन्यस्यार्थस्योपलब्धिर्भवति वाक्ये"

इति। तत्र कैयटः —

"न वै पदार्थादिति। स्वं स्वमर्थं प्रतिपादयन्ति पदानि वाक्यम्। पदार्था एव तु आकाङ्क्षायोग्यतासंनिधिवशात् परस्परसंसृष्टा वाक्यार्थः। न तु वाक्यं वाक्यार्थो वा पृथगस्तीति भावः।"

इति व्याचख्यौ। तत्रोद्द्योतः —

"नन्वन्वयरूपोऽर्थः पदार्थातिरिक्त उपलभ्यते। अत आह — स्वं स्वमिति। "पदार्था एव तु" इत्यनेन संसर्गबोधे पदानां व्यापारो नास्तीति दर्शयति। एवं च पदार्थैरेव आकाङ्क्षादिभिः संसर्गस्य गम्यमानत्वात् न तत्र वाक्यशक्तिः। वाक्यस्यातिरिक्तस्याभावाच्च। तदाह — न तु वाक्यमिति। वाक्यार्थो वेति। संसर्गस्य पदार्थबोध्यत्वादिति भावः।

— इति। तदनन्तरम् आक्षेपसाधकवार्त्तिकं —

"पदार्थादन्यस्यानुपलब्धिरिति चेत् पदार्थाभिसंबन्धस्योपलब्धिः (तस्मात् प्रतिषेधः)"

इति। तत्र भाष्यं —

---

१ बु.स.श्लो.९३.
२ पा.सू.१.२.४५.

"पदार्थादन्यस्यानुपलब्धिरिति चेत् इदमुच्यते पदार्थाभिसंबन्धस्योपलब्धिर्भवति वाक्ये।...... एषां पदानां सामान्यतो वर्तमानानां यद्विशेषेऽवस्थानं स वाक्यार्थः। तस्मात् प्रतिषेधो वक्तव्यः।"

इति। तत्र कैयटः —

"पदार्थाभिसंबन्धस्येति। ध्वनिव्यङ्ग्यं नित्यं वाक्यं विशिष्टस्यार्थस्य पदार्थसंसर्गरूपस्य वाचकम्। अन्यथा हि अशाब्दो वाक्यार्थः स्यात्। यद्विशेषेऽवस्थानमिति। पदार्थसंसर्गरूपे वाक्यार्थे इत्यर्थः। अत एव वाक्यमेव मुख्यः शब्दः। वाक्यार्थ एव मुख्यः शब्दार्थः"

इति। तत्रोद्योते वाक्यवाक्यार्थयोस्तादात्म्यं संबन्ध इति न्यरूपि।

अनेन भाष्यादिसंदर्भेण पदार्थानां संसर्गो वाक्यार्थः। संसर्गस्तु अनवयववाक्यशक्त्या बोधनीयः। शक्तिश्च वाक्यवाक्यार्थयोस्तादात्म्यम् इति लभ्यते।

तथा प्रातिपदिकार्थसूत्रे भाष्ये[१] च — "वीरः पुरुषः" इत्यादौ प्रातिपदिकार्थादतिरिक्तस्य विशेषणविशेष्यभावस्य प्रतीयमानतया प्रातिपदिकार्थमात्रे विहिता प्रथमा विभक्तिर्न प्राप्नोतीत्याशङ्क्य,

"न वा वाक्यार्थत्वात्। न वा वक्तव्यम्। किं कारणम्? वाक्यार्थत्वात्। यदत्राधिक्यं स वाक्यार्थः"

इत्युक्तम्। (आधिक्यमिति स्वार्थे ष्यञ्। अधिकमित्यर्थः। वाक्यार्थत्वात् = वाक्यशक्यत्वात्)

तत्र कैयटेनोक्तं "वीरप्रातिपदिकात् अनपेक्षितशब्दान्तरार्थसंसर्गोपहितविशेषणभावात् स्वार्थमात्रनिष्ठात् प्रथमा विधीयते। एवं पुरुषशब्दादपि। पश्चात्तु आकाङ्क्षादिवशात् विशेषणविशेष्यभावावगतिरुपजायमाना बहिरङ्गत्वात् पूर्वप्रवृत्तमन्तरङ्गं संस्कारं बाधितुं नोत्सहते" इति। अनेन संदर्भेण पदार्थादधिकः पदार्थानां संसर्गः वाक्यार्थः = वाक्यशक्य इति स्पष्टम् अवबुध्यामहे।

३.२.४.१. वाक्यपदीयेऽपि वाक्यविषये अष्टौ पक्षाः उपन्यस्ता इति वाक्यस्वरूपविचारावसरे प्रदर्शितम्। तत्र प्रदर्शितेषु वाक्यविकल्पेषु पक्षद्वयमस्ति सखण्डवाक्यपक्षः अखण्डवाक्यपक्षश्चेति। तत्र जातिः संघातवर्तिनी, एकोऽनवयवः शब्दः, बुद्ध्यनुसंहतिः इति त्रीणि लक्षणान्यखण्डवाक्यपक्षे। आख्यातशब्दः, क्रमः, संघातः, आद्यं पदम्, पृथक् सर्वं पदं साकाङ्क्षम् इति पञ्च लक्षणानि सखण्डपक्षे। तत्राखण्डपक्षे त्रिष्वपि लक्षणेषु प्रतिभा वाक्यार्थः। सखण्डपक्षे संघातः क्रमः वाक्यमित्यनयोः पक्षयोः अभिहितान्वयवादः। संसर्गश्च वाक्यार्थः।

---

[१] म.भा.२.३.४६.

आख्यातशब्द इति पक्षेऽन्विताभिधानवादः। क्रिया च वाक्यार्थः (= प्रधानभूतः)। पदमाद्यम्, पृथक् सर्वं पदं साकाङ्क्षमिति पक्षद्वये संसृष्ट एवार्थो वाक्यार्थः, अन्विताभिधानवादश्चेति निरूपितं पुण्यराजेन। विस्तरः ग्रन्थे (अस्मदीये) द्रष्टव्यः।

३.२.४.२. वाक्यवाक्यार्थयोः संबन्धः

अनवयवं वाक्यमनवयवश्च वाक्यार्थ इति वैयाकरणानां मते वाच्यवाचकभावप्रयोजकः तादात्म्यापरपर्यायशक्तिरेव वाक्यवाक्यार्थयोः संबन्धः।

सावयवं वाक्यं सावयवश्च वाक्यार्थ इति मते पदसमूहरूपवाक्यस्य संसर्गरूपस्य वाक्यार्थस्य च अन्विताभिधानस्वीकारे शक्तिरेव संबन्धः। अभिहितान्वयस्वीकारे च नास्त्येव वाक्यवाक्यार्थयोः साक्षात् संबन्धः। पदजन्यपदार्थस्मृतिजन्यशाब्दबोधविषयत्वमात्रेण संसर्गस्य वाक्यार्थत्वव्यवहारः। स्पष्टीकृतं चेदं पूर्वं, स्पष्टीकरिष्यते च पश्चात् अभिहितान्विताभिधानवादनिरूपणावसर इति संक्षेपः।

४. स्फोटविचारः

४.१. न्यायदर्शने स्फोटनिराकरणप्रकारः

नैयायिकाः किमर्थं स्फोटं निराकुर्वन्तीत्यत्र कारणमुक्तं जयन्तभट्टेन न्यायमञ्जर्यां[१] —

नन्वेवमस्तु। वर्णातिरिक्तः स्फोट एवार्थप्रतिपादको भवतु, का क्षतिर्नैयायिकानाम्? कथं न क्षतिः। आप्तप्रणीतत्वेन हि शब्दस्य प्रामाण्यमुक्तं सूत्रकारेण। स्फोटस्य च नित्यत्वेन न आप्तप्रणीतत्वम्। अतश्च यस्यानित्यत्वं वर्णात्मनः शब्दस्य साधितम्, नासावर्थप्रतीतिहेतुः। अतो न प्रमाणम्। यश्च अर्थप्रतीतिहेतुः स्फोटात्मा शब्दः, तस्य नानित्यत्वम्, नाप्याप्तप्रणीतत्वमिति अस्थाने नैयायिकाः क्लिष्टा भवेयुः। तस्मात् अनित्यानां वर्णानामेव वाचकत्वं प्रतिष्ठापनीयम्, पराकरणीयश्च स्फोटवादः।

लोके वर्णपदपूर्वको व्यवहारो न भवति, वाक्येन व्यवहारात्। वाक्यस्य च अयमवयवः अयमवयवी इति व्यवस्थानुपपत्तेः निर्भागमेव वाक्यं वाचकम्, निर्भागश्च तस्य वाच्योऽर्थः। अवान्तरवाक्यमपि प्रयोगयोग्यं व्यवहारकारणमिति तन्न निह्नूयते। अविद्यावस्थेयं वर्तते। तत्रेयं व्यवहारवर्तनी यथादृश्यमानैवास्तु। विद्यायां सर्वमेवेदमसारम्। पदस्य वर्णस्य वा केवलस्याप्रयोगात् तत्स्वरूपमविद्यावस्थायामपि न वास्तवमिष्यत इति स्फोटवादसारः।

---

[१] न्या.मं, आ.६.भा.२.पृ.१४४.

अत्राभिधीयते — किमयमनुमानमहिम्ना स्फोटाभ्युपगमः प्रत्यक्षमहिम्ना वा। नाद्यः, परिदृश्यमानविशिष्टानुपूर्वीकवर्णसमूहरूपेण करणेनार्थप्रतीतेः उपपन्नतया स्फोटानुमानानवसरात्। न द्वितीयः, वर्णातिरिक्तस्य निर्भागस्य स्फोटस्य श्रोत्रेणाग्रहणात्। वाक्ये पदे चावयवप्रतीतेः भ्रान्तित्वं न युक्तम्, बाधकाभावात्। वाक्यस्य अर्थोऽपि सावयव एव। तस्मात् न निरवयवौ वाक्यवाक्यार्थौ। वृद्धव्यवहारतः वाक्यात् भवन्ती व्युत्पत्तिः पदार्थपर्यन्ता भवति।

यत्तु केवलं पदं न प्रयुज्यत इति तदसत्यमिति। तदसत्। महावाक्य-स्थानेऽवान्तरवाक्यं न प्रयुज्यत इति तदप्यसत्यं स्यात्। स्वार्थे तत् प्रयुज्यत इति चेत् — पदमपि स्वार्थे क्वचित् प्रयुज्यत एव, यत्र पदान्तराणामर्थोऽर्थप्रकरणादिना लभ्यते। तत्र यावत् अप्राप्तं तावत् पदमेव केवलमुच्चारयन्ति। ग्रन्थग्रहणावसरेषु वर्णानां पदानां च स्वरूपावधारणं भवति। रथावयववत् रथकार्यैकदेशम्, वाक्यकार्यैकदेशं पदान्यपि कुर्वन्त्येव। वर्णा अपि केचित् अर्थवन्तो भवन्त्येव। तस्मान्नासत्त्वं पदानां वर्णानां च।

अपि च पदोपजनापायाभ्यां (पदान्वयव्यतिरेकाभ्यां) तदर्थोपजनापायदर्शनात् वाक्यवाक्यार्थौ सावयवौ। अनयैव युक्त्या पदभागा अपि प्रकृतिप्रत्ययादयः तात्त्विका इति अवगन्तव्याः। वृक्षं वृक्षेणेत्यत्र प्रकृत्यर्थैक्येऽपि प्रत्ययार्थो भिद्यते। वृक्षं घटमित्यत्र प्रत्ययार्थैक्येऽपि प्रकृत्यर्थो भिद्यते। तत्र योऽर्थो यं शब्द-मनुगच्छति स तस्यार्थ इति निश्चीयते। तत् कथमसत्या भागाः? कूपयूपसूपादौ बहुवर्णानुगमेऽपि एकवर्णभेदात् अर्थभेदो नानुपपन्नः।

यत्तु व्याकरणवैविध्यात् प्रकृतिप्रत्ययविभागनियमो नावकल्पत इति। एतदपि न युक्तम्। आप्ततरोक्तीनां प्रामाण्यात् पाणिन्यादिमुनित्रयसंमतः प्रकृतिप्रत्यय-विभागः अवितथ इति निर्णेष्यामः। बहुष्वेतेषु प्रायेण सर्वेषां व्याकरणकर्तॄणा-मविवाद एव। विकरणादिविसंवादमात्रं तु अकिंचित्करम्।

तस्मात् पारमार्थिकत्वात् पदतदर्थानां न निरवयवौ वाक्यवाक्यार्थाविति स्फोट-निराकरणसारः।

४.२. मीमांसादर्शने स्फोटनिराकरणम्

मीमांसकाः किमर्थं स्फोटं निराकुर्वन्तीति शङ्कायाः समाधानमुक्तं भट्ट-पादैः[१] —

"कार्याणि वाक्यावयवाश्रयाणि सत्यानि कर्तुं कृत एष यत्नः"

---

[१] श्लो.वा.स्फोट.१३७.

इति। स्फोटपक्षे हि निरवयवं वाक्यं निरवयवस्य वाक्यार्थस्य वाचकम्। अवयवास्तु पदात्मका वर्णात्मकाश्च मृषाभूताः। ततश्च पदतदवयवाश्रितस्य ऊहादेः, महावाक्यावयवावान्तरवाक्यार्थप्रयाजाद्याश्रितस्य प्रसङ्गतन्त्रादेः कार्यस्य मृषात्वं स्यात्। अतस्तत्सत्यतासिद्ध्यर्थं स्फोटनिराकरणं न निष्फलमिति।

तत्र वैयाकरणा अर्थप्रत्यायकत्वं शब्दलक्षणं वदन्तः वर्णानामर्थप्रत्यायकत्वासंभवात् वर्णातिरिक्तं स्फोटं समसाधयन्। भाष्यकारास्तु श्रोत्रग्राह्यत्वं शब्दलक्षणं वदन्तः श्रोत्राग्राह्यं स्फोटं निराकुर्वन्ति। किमत्र युक्तम्। शबरस्वाम्युक्तमेव युक्तम्। लोकप्रसिद्ध्यनुसारात्। लोकप्रसिद्धस्यार्थप्रत्यायकत्वासंभवे हि अन्यस्य कल्पनम्। अर्थप्रत्याकत्वं तु न शब्दलक्षणम्। वह्न्यादिप्रत्यायके धूमादावतिव्याप्तेः। प्रत्येकवर्णेष्वव्याप्तेश्च। "ते च श्रोत्रग्रहणाः" इति भाष्ये[१] गकारादीनामेव श्रोत्रग्राह्यत्वकथनात् पूर्वापरवस्तुनोः श्रोत्रग्राह्यत्वं निराकृतम्। पूर्वशब्देन वर्णकारणभूताः तदवयवा निराकृताः। अपरशब्देन गत्वादिजातिः, अवयवी, गोशब्दः, स्फोटश्च निराकृताः। अतः प्रथमं वर्णावयवनिरसनं कृतं वार्त्तिके। ततो गत्वादिजातिनिरासः कृतः। ततः गोशब्दाख्यावयविनिरासः। ततः श्रोत्रग्राह्यानां वर्णानामेवार्थप्रत्यायकत्वं समसाधि। संस्कारव्यापारकाणां वर्णानामर्थधीहेतुत्वमिति। प्रत्येकं वा समुदायस्य वा समुदितानां वा वर्णानां प्रत्यायकत्वम् इत्यादिविकल्पास्तु स्फोटस्य वर्णव्यङ्ग्यतापक्षेऽपि प्रसजन्ति। तत्र यः परिहारः स एवार्थप्रत्यायकत्वेऽपीत्युक्तं[२] —

यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः।
सोऽपि पर्यनुयोगेन नैवैतेन विमुच्यते॥
तत्रापि प्रतिवर्णं हि पदस्फोटो न गम्यते।
न चावयवशो व्यक्तिस्तदभावाच्च नात्र धीः॥
प्रत्येकं चाप्यशक्तानां समुदायेऽप्यशक्तता।
तत्र यः परिहारस्ते सा नोऽत्रापि भविष्यति॥ — इति।

पूर्वपूर्ववर्णसंस्कारसहितस्यान्त्यवर्णस्य प्रत्यायकत्वे वर्णविषयकसंस्कारस्य वर्णस्मृतिहेतुत्वसंभवेऽपि अर्थधीहेतुत्वं कथमिति शङ्कायाः समाधानमुक्तं वार्त्तिके[३] —

यद्यपि स्मृतिहेतुत्वं संस्कारस्य व्यवस्थितम्।
कार्यान्तरेषु सामर्थ्यं न तस्य प्रतिषिध्यते॥ — इति।

---

[१] शा.भा.१.१.५, भा.१.पृ.५४.

[२] श्लो.वा.स्फोट.९१-९३.

[३] श्लो.वा.स्फोट.१०२.

अत्र पक्षे स्मृतिहेतोः संस्कारस्य कार्यान्तरेऽपि सामर्थ्यमन्यत्राद्दष्टं कार्यानुसारेण कल्पनीयं भवतीत्यालोच्य भाष्यानुक्तं पक्षान्तरमुक्तं वार्त्तिककृता[१] —

यद्वा प्रत्यक्षतः पूर्वं क्रमज्ञातेषु यत् परम्।
समस्तवर्णविज्ञानं तदर्थज्ञानकारणम॥
तत्र ज्ञाने च वर्णानां यौगपद्यं प्रतीयते।
नावश्यं यौगपद्येन प्रत्यक्षस्थेन तद्भवेत्॥
चित्ररूपां च तां बुद्धिं सदसद्वर्णगोचराम्।
केचिदाहुर्यथा वर्णो गृह्यतेऽन्त्यः पदे पदे॥ — इति।

उत्तरोत्तरवर्णप्रत्यक्षवेलायामपि पूर्वपूर्ववर्णाः स्मृत्या अनुसन्धीयन्ते। तेनान्त्यवर्णप्रत्यक्षेऽपि पूर्वे स्मर्यन्ते। तेन येयं सद्रूपान्त्यवर्णविषये प्रत्यक्षा, पूर्वेषु चातीतेषु स्मृतिरूपा चित्ररूपा बुद्धिः सैवार्थप्रतीतिहेतुः इति।

संस्कारो न भावना, अपि तु अव्यवहितोत्तरत्वम् इति पक्षान्तरमप्युक्तं वार्त्तिके। तत्र न तावानादरः।

अथ अन्त्यवर्णप्रत्यक्षानन्तरं समस्तवर्णविषया स्मृतिः, ततोऽर्थप्रतीतिः इति पक्षान्तरमाह[२] —

केचिदाहुर्यथा वर्णो गृह्यतेऽन्त्यः पदे पदे॥
अन्त्यवर्णेऽपि विज्ञाते पूर्वसंस्कारकारितम्।
स्मरणं यौगपद्येन सर्वेष्वन्ये प्रचक्षते॥ — इति।

क्रमगृहीतानां वर्णानां युगपत् स्मरणं कथमित्यत्राह[३] —

सर्वेषु चैवमर्थेषु मानसं सर्ववादिनाम्।
इष्टं समुच्चयज्ञानं क्रमज्ञानेषु सत्स्वपि॥
न चेत्तथाभ्युपेयेत क्रमदृष्टेषु नैव हि।
शतादिरूपं जायेत तत्समुच्चयदर्शनम्॥ — इति।

क्रमेणोच्चारिता वर्णाः स्वयमक्रमा अपि उपलब्धौ विद्यमानस्य क्रमस्य आरोपेण क्रमवन्त इव प्रतीयन्ते। ततः पश्चाच्च युगपत् स्मर्यमाणा अपि तत्क्रमतः स्मर्यमाणाः अर्थप्रत्यायका इति न व्यत्क्रमोच्चारणे अर्थप्रतीतिप्रसङ्गः।

अस्मिंश्च पक्षे "शब्दादर्थं प्रतिपद्यामहे" इति लौकिकं वचनमुपपन्नतरम्, स्मृत्यारूढानां शब्दानामव्यवधानेनैवार्थप्रतीतिहेतुत्वात्। तदाह[४] —

---

१ श्लो.वा.स्फोट.१०९-१११.
२ श्लो.वा.स्फोट.१११ cd, ११२.
३ श्लो.वा.स्फोट.११३, ११४.
४ श्लो.वा.स्फोट.११५, ११६.

तेन श्रोत्रमनोभ्यां स्यात् क्रमाद्वर्णेषु यद्यपि।
पूर्वज्ञानं, परस्ताच्च युगपत् स्मरणं भवेत्॥
तदारूढास्ततो वर्णा न दूरेऽर्थावबोधनात्।
शब्दादर्थगतिस्तेन लौकिकैरभिधीयते॥ — इति।

वैयाकरणास्तु "गौः" इत्येवं गकारादिविलक्षणं शब्दान्तरं प्रत्यक्षमवगम्यत इत्याहुः। तेषां च भ्रान्तिरेव। भ्रान्तौ चेयमेव चित्रा बुद्धिः निमित्तम्। एकैकज्ञानात् विलक्षणेयमन्त्यवर्णांशे प्रत्यक्षरूपा, पूर्ववर्णांशे स्मृतिरूपा च धीः। तावतैव प्रत्यक्षः स्फोट इति विभ्रमः।

कथं पुनरसति शब्दान्तरे नानाभूतेषु वर्णेषु एकशब्दत्वप्रत्यय इति शङ्कायाः समाधानमाह[१] —

गौरित्येकमतित्वं तु नैवास्माभिर्निवार्यते।
तद्ग्राह्यैकार्थतायां च शब्दे स्यादेकतामतिः॥ — इति।

गकारौकारविसर्गाणामेकबुद्धिविषयत्वात् एकार्थकत्वाद्वा एकत्वव्यपदेशः। "पूर्ववर्णसंस्कारसहितोऽन्त्यो वर्णो वाचकः" इति भाष्ये[२] अन्त्यवर्णस्य साक्षादर्थबोधकत्वम् इतरवर्णानां संस्कारद्वारेति कथनात् अन्त्यवर्णस्य शब्दत्वात् तद्गतमव्यवधानेन अर्थबोधकत्वमादाय "शब्दादर्थं प्रतिपद्यामहे" इति लोकव्यवहारसामञ्जस्यमित्यपि कथितं वार्त्तिककारैः[३] —

"वर्णोऽन्त्यो गमकस्तस्य शब्दत्वान्मुख्यता भवेत्।" इति।

अयं मीमांसादर्शनस्थस्फोटनिराकरणसारांशः।

४.३. वेदान्तदर्शने स्फोटनिराकरणम्

४.३.१. अद्वैतवेदान्ते स्फोटनिराकरणम्

ब्रह्ममीमांसायां प्रथमाध्यायतृतीयपादे अष्टमे देवताधिकरणे[४] —

"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्"

इति सूत्रे वैदिकेभ्यः शब्देभ्यः तत्तदर्थानामादौ सृष्टिः इति प्रोक्तम्। तत्र शांकरं भाष्यम् —

---

१ श्लो.वा.स्फोट.१२०.
२ शा.भा.१.१.५, भा.१, पृ.५५.
३ श्लो.वा.स्फोट.१३०.
४ ब्र.सू.१.३.२८.

"अपि च चिकीर्षितमर्थमनुतिष्ठन् तस्य वाचकं शब्दं पूर्वं स्मृत्वा पश्चात् तमर्थमनुतिष्ठतीति सर्वेषां नः प्रत्यक्षमेतत्। तथा प्रजापतेरपि स्रष्टुः सृष्टेः पूर्वं वैदिकाः शब्दा मनसि प्रादुर्बभूवुः। पश्चात् तदनुगतानर्थान् ससर्जेति गम्यते। तथा च श्रुतिः[१] 'स भूरिति व्याहरत्, स भूमिमसृजत' इत्येवमादिका भूरादिशब्देभ्य एव मनसि प्रादुर्भूतेभ्यः भूरादिलोकान् सृष्टान् दर्शयति"

इति। तदनन्तरं "किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते" इत्याशङ्क्य, "स्फोटमित्याह। वर्णपक्षे हि तेषामुत्पन्नध्वंसित्वात् नित्येभ्यः शब्देभ्यः देवादिव्यक्तीनां प्रभव इत्यनुपपन्नं स्यात्"

इत्यादिना स्फोटवादमनूद्य तत्खण्डनं शंकरभगवत्पादैरकारि। खण्डनप्रकारोऽपि कुमारिलादृतरीत्यैव वर्तते।

४.३.२. विशिष्टाद्वैतवेदान्ते स्फोटनिरासः

श्रीभाष्ये जिज्ञासाधिकरणे असत्यादपि वेदात् सत्यस्य ब्रह्मणः प्रतिपत्तिर्भवितुमर्हतीत्यत्र अद्वैतिभिः प्रदर्शितानां दृष्टान्तानां निराकरणसंदर्भे स्फोटोऽप्येकः दृष्टान्तः प्रदर्शितः। तन्निराकरणव्याजेन स्फोटवादनिराकरणं भगवद्रामानुजाचार्यैः व्यधायि। तथा हि — नादैः स्फोट्यत इति व्युत्पत्त्या स्फोट एकरूपः शब्दः। तदभिव्यञ्जकनादविशेषा बहवः। कत्वखत्वादिभेदः व्यञ्जकगतः स्फोटरूपे शब्दे आरोपितः अर्थविशेषप्रतिपत्तिहेतुः। तत्रासत्यात् सत्योत्पत्तिः इति शङ्का। कत्वखत्वादिविशेषान्विततत्तन्नादकृतोऽभिव्यक्तिविशेषः सत्यः। तद्विशिष्टः सत्यशब्दः अर्थप्रतिपत्तिहेतुः। यद्यपि कत्वखत्वादिवैशिष्ट्यं शब्दस्यारोपितम्, तथापि तज्ज्ञानं सत्यमेवार्थप्रतीतिकारणमिति समाधानम्।

एवं शब्दस्यैकरूपत्वमभ्युपगम्य परिहृतः। वस्तुतः शब्दस्यैकरूपत्वमेव न युक्तम् इत्याशयेनोक्तं भाष्यकारैः[२] —

"शब्दस्यैकरूपत्वमेव न साधीयः, गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात्"

इति। श्रोत्रग्राह्याणां नानारूपाणां गकारादिवर्णानामेवार्थबोधकत्वम्, न तु तदतिरिक्तस्यैकस्य स्फोटस्येति तदाशयः। तत्र श्रुतप्रकाशिकायां विस्तरेण स्फोटवादानुवादः तन्निरासश्च कृतः। सः प्रबन्धेऽस्मिन् संनिवेशितः।

---

[१] तै.ब्रा.२.२.४.२.

[२] श्रीभा.१.१.१, भा.१.पृ.१८०.

४.३.३. द्वैतवेदान्ते स्फोटवादनिरासः

जिज्ञासाधिकरणे श्रूयमाणानां पदानामेवान्विताभिधायित्वमभिधाय अश्रूयमाणस्य निरवयवस्य वाक्यस्य वाक्यार्थबोधकत्वकल्पने गौरवम् इत्याशयेन आनन्दतीर्थभगवत्पादैः अनुव्याख्याने[१] —

"अतोऽन्विताभिधायित्वं गौरवं कल्पनेऽन्यथा"

इत्यभिहितम्। तद्व्याख्यायां सुधायां च विस्तरेण स्फोटवादः अनूदितः खण्डितश्च। तत्प्रकारोऽप्यत्र प्रबन्धे संनिवेशितः।

५. वाक्यार्थधीनिमित्तविचारः

एतावता वाक्यस्वरूपम्, वाक्यार्थस्वरूपम्, वाक्यवाक्यार्थसंबन्धः इति त्रितयमधिकृत्य विविधदर्शनानुसारेण प्रत्यपादि। अथ वाक्यार्थधीनिमित्तविषये विचारः प्रस्तूयते।

५.१. वाचस्पतिमिश्राः तत्त्वबिन्दौ[२] —

इह खलु पदकदम्बकश्रवणसमनन्तरम् अविवादं विदितसंगतीनामनधिगतार्थविषया धीरुदयमासादयति पुंसाम्। अस्याः निमित्तं प्रति विवदन्ते वादिनः इत्युपक्रम्य,

(१) अनवयवमेव वाक्यम् अनाद्यविद्योपदर्शितालीकवर्णपदविभागमस्याः निमित्तम् इति केचित् (वैयाकरणाः)।

(२) पारमार्थिकपूर्वपदपदार्थानुभवजनितसंस्कारसहितमन्त्यवर्णविज्ञानमित्येके (शबरस्वामिनः, नैयायिकाश्च)।

(३) प्रत्येकवर्णपदपदार्थानुभवभावितभावनानिचयलब्धजन्मस्मृतिदर्पणारूढा वर्णमालेत्यन्ये (प्रत्येकं वर्णानां पदानां पदार्थानां चानुभवैः जनिताः ये संस्काराः तत्समूहेन जायमाना या स्मृतिः तद्विषयभूता वर्णमाला = वर्णसमूहः)।

(४) पदान्येव आकाङ्क्षितयोग्यसंनिहितपदार्थान्तरान्वितस्वार्थाभिधायीनीत्यपरे (प्राभाकरमीमांसकाः)।

(५) पदैरेव समभिव्याहारवद्भिः अभिहिताः स्वार्थाः आकाङ्क्षायोग्यतासत्तिसध्रीचीनाः वाक्यार्थधीहेतवः इत्याचार्याः (भट्टपादाः)।

इति पञ्च पक्षानुपन्यस्य इतरपक्षचतुष्टयखण्डनपूर्वकं पञ्चममन्तिमं पक्षं प्रतिष्ठापयांबभूवुः।

---

[१] अ.व्या.१.१.१, पृ.९७५.

[२] त.बिं.पृ.४.

५.२. पार्थसारथिमिश्राः न्यायरत्नमालायां वाक्यार्थनिर्णये[1] —

वाक्यार्थसंविदो मूलं बहुधा वादिनो विदुः।
तत्र वार्त्तिककारीयैर्न्यायैर्मार्गः प्रदर्श्यते॥

— इत्युपक्रम्य —

(१) तत्र केचित् तावत् अविभागमेव वाक्यं व्यञ्जकध्वनिभेदात् तेन तेन वर्णपदविपर्यासात्मनावगम्यमानं तस्य तस्य वाक्यार्थस्य प्रतिपादकमिति मन्यन्ते।

(२) अन्ये तु एवंविधमेव ज्ञानं वाक्यम्। तदनन्तरं चानेकजातिगुणद्रव्य-क्रियासंसर्गावभासं जायमानं विज्ञानमेव वाक्यार्थः। कार्यकारणभाव एव च वाक्यवाक्यार्थयोः संबन्ध इति प्रतिजानते। उभयस्मिन्नपि पक्षे काल्पनिकपद-पदार्थसंबन्धव्युत्पत्तिरभ्युपायः।

(३) अपरे तु पदवत् वाक्यमपि पूर्वपूर्ववर्णसंस्कारसचिवोऽन्त्यो वर्णो वाचकः इत्यादिना मार्गेण सावयवमेव प्रतिलब्धसंबन्ध-अवयवभूतपदजनितपदार्थसंविदु-पायसहायं वाक्यार्थस्य वाचकं संगिरन्ते।

(४) पदान्येव पदार्थान्तरान्वितं स्वार्थमभिदधतीति टीकाकारपादाः।

(५) पदैरभिहिताः पदार्था एव वाक्यार्थं प्रतिपादयन्तीत्याचार्याः।

इति पञ्च पक्षानुपन्यस्य अन्तिमं पक्षं समर्थयांबभूवुः।

५.३. तत्र श्रोत्रेन्द्रियग्राह्यनानावर्णव्यङ्ग्यः स्फोटः अर्थबोधक इति वैयाकरणानां पक्षः तदितरैः सर्वैः दार्शनिकैः सयुक्तिकं निरस्त इति तत्तद्दर्शनस्थप्रधानग्रन्थेभ्यः सानुवादनिराकरणप्रकारः अस्मिन् प्रबन्धे प्रदर्शितः।

५.४. बौद्धानां पक्षोऽपि सर्वैः निराकृतः।

इतरेषु पक्षेषु अन्विताभिधानवादो वा अभिहितान्वयवादो वा अवर्जनीय इति तौ वादौ तत्तद्दर्शनप्रदर्शितरीत्या अत्र प्रदर्शितौ। तथा नैयायिकसंमतः भट्टमतात् ईषत् भिन्नः अभिहितान्वयवादोऽप्यत्र प्रदर्शित इति विवेकः।

६. अभिहितान्वय-अन्विताभिधानवादौ

६.१. अभिहितान्वय-अन्विताभिधानवादयोः प्रस्तावः

अनवयवस्य स्फोटस्यार्थबोधकत्वे निराकृतेऽपि, वर्णानामेवार्थबोधकत्वे स्वीकृतेऽपि वाक्यार्थप्रतिपत्तिहेतुत्वं वर्णानामस्ति न वेत्यत्र विप्रतिपत्त्या अभिहितान्वयवाद-अन्विताभिधानवादयोः प्रसङ्गः आगच्छति। पदभावमापन्नाः वर्णाः

[1] न्या.र.मा.पृ.९२.

पदार्थान् अभिधाय उपरता भवन्ति। पदैरभिहिताः पदार्था एव वाक्यार्थ-मभिदधतीत्यभिहितान्वयवादः। पदभावमापन्नाः वर्णाः पदार्थान् स्मारयित्वा वाक्यार्थमभिदधतीत्यन्विताभिधानवादः।

अखण्डस्फोटातिरिक्तपक्षेषु अनयोर्वादयोरन्यतरस्य अवर्जनीयता वाक्यपदीय-व्याख्याने पुण्यराजेन स्पष्टीकृता। तथा हि — अष्टसु वाक्यविकल्पेषु पक्षद्वयमस्ति सखण्डवाक्यपक्षः अखण्डवाक्यपक्षश्चेति। तत्र जातिः सङ्घातवर्तिनी, एकोऽ-नवयवः शब्दः, बुद्ध्यनुसंहृतिः इति त्रीणि लक्षणानि अखण्डवाक्यपक्षे। आख्यात-शब्दः, क्रमः, संघातः, आद्यं पदम्, पृथक् सर्वं पदं साकाङ्क्षम् इति पञ्च लक्षणानि सखण्डपक्षे।

तत्राखण्डपक्षे त्रिष्वपि लक्षणेषु प्रतिभा वाक्यार्थः। सखण्डपक्षे संघातः, क्रमः इत्यनयोः पक्षयोः अभिहितान्वयवादः। संसर्गश्च वाक्यार्थः। आख्यातशब्द इति पक्षेऽन्विताभिधानवादः। क्रिया च वाक्यार्थः। पदमाद्यम्, पृथक् सर्वं पदं साकाङ्क्षमिति पक्षद्वये संसृष्ट एवार्थो वाक्यार्थः। अन्विताभिधानवादश्च।

तथा हि — पदमेव शक्तम्, न तु वाक्यम्। वाक्यार्थभूतस्तु पदार्थानां संसर्गः आकाङ्क्षाभास्यः। आकाङ्क्षा च तत्तच्छाब्दबोधं प्रति नियतः पदानां समभि-व्याहारविशेषः। अभिहितयोः = शक्त्या उपस्थापितयोः पदार्थयोः अन्वयः आकाङ्क्षाभास्य इति ये वदन्ति तेऽभिहितान्वयवादिनः। तथा च पदानां संघातो वाक्यम्, पदानां पौर्वापर्यरूपः क्रमो वा वाक्यमिति पक्षेऽभिहितान्वयवादः आपतति। पदानामेव शक्तत्वात्। पदसंघातरूपे वाक्ये शक्त्यनभ्युपगमात्। एष चाभिहितान्वयवादो नैयायिकानाम्। तत्र च संसर्गस्य आकाङ्क्षाभास्यत्वं व्युत्पत्ति-वादादौ निरूपितम्।

भाट्टास्तु — पदैः अभिहिताः पदार्था एव वाक्यार्थमवगमयन्ति। परं तु वाक्यार्थस्य शाब्दत्वसंपत्तये पदेषु वाक्यार्थलक्षणा स्वीक्रियत इत्याहुः।

आख्यातशब्दः, पदमाद्यम्, पृथक् सर्वं पदं साकाङ्क्षम् इति वाक्यस्य लक्षणत्रयं तु अन्विताभिधानपक्षे बोध्यम्। तथा हि — कार्यान्विते इतर-पदार्थान्विते वा स्वार्थे पदानां शक्तिः इति अन्वयरूपः संसर्गोऽपि शक्तिभास्य एव। अत्र पक्षे आख्यातशब्दः इतरपदार्थान्वितस्वार्थाभिधायकः, आद्यं पदमि-तरपदार्थान्वितस्वार्थबोधकम्, पृथक् साकाङ्क्षं सर्वं पदम् इतरपदार्थान्वित-तत्तत्स्वार्थबोधकमिति रीत्या अस्मिन् वाक्यलक्षणत्रयेऽन्विताभिधानवादसंभवः।

सघातपक्षेऽन्विताभिधानवादः। संसर्गवशात् निराकाङ्क्षो विशेषावस्थितः पदार्थ एव वाक्यार्थ इति। एवं सर्ववाक्यलक्षणसाधारणं प्रयोजनं वाक्यार्थ इत्ययमपि पक्षः। तदुक्तं पुण्यराजेन सर्वं संकलय्य —

तदेवं प्रतिभा, संसर्गः, संसर्गवशात् निराकाङ्क्षो विशेषावस्थितः पदार्थ एव, संसृष्ट एवार्थः, क्रिया, प्रयोजनं चेति षड् वाक्यार्था इहोपदर्शिताः। संसर्गे, संसर्गवशात् विशेषावस्थिते पदार्थे च वाक्यार्थे अभिहितान्वयः। संसृष्टे, क्रियायां चान्विताभिधानम्। प्रतिभायां तु एकरसैव प्रतिपत्तिरिति न तत्र काचित् अभिहितान्वय-अन्विताभिधानवादचर्चा। प्रयोजने तु अभिहितान्वय एवेति।

६.१.१. अवान्तरशङ्का-समाधाने

यथा वा पदे पूर्ववर्णसंस्कारसहितोऽन्त्यो वर्णो वाचक इति रीत्या पदार्थवाचकता स्वीक्रियते, तथैव वाक्येऽपि पूर्ववर्णसंस्कारसहितस्यान्त्यवर्णस्य वाक्यार्थवाचकत्वमस्तु, किमभिहितान्वयवादान्विताभिधानवादयोराश्रयणेनेति शङ्का।

अत्र समाधानं वार्त्तिकोक्तरीत्या लिख्यते। वाक्यार्थप्रतिपत्तेः अन्यथाप्युपपत्तेः कल्पनेयं न युक्ता। अपि च पदवर्तिनां वर्णानां नष्टानां क्लेशेन युगपत् स्मरणमाश्रित्य पदार्थवाचकता कल्पिता। वाक्ये तु बहूनां वर्णानामतिक्लेशेन स्मरणं कल्पनीयं स्यादित्यपि दोषः।

अपि च पदार्थप्रतिपादने व्यापृतानां वर्णानां पुनः वाक्यार्थेऽपि व्यापृतिकल्पनायां गौरवम्। न केवलम्दृष्टकल्पना, दृष्टहानिश्च। पदार्थानां वाक्यार्थबोधनसामर्थ्यस्यावगम्यमानस्य अपह्नवात्। पदार्थानां तत्सामर्थ्यं तु आनन्तर्यात्। वर्णेभ्यो हि पदार्थेषु प्रतीतेषु वाक्यार्थः प्रतीयते। अतो वाक्यार्थप्रतीत्यव्यवहितपूर्ववृत्तित्वात् पदार्थप्रतिपत्तेः, सैव मूलं वाक्यार्थप्रतीतौ।

किं च पूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णो वाचक इत्ययं प्रकारः पदेष्वाश्रितः। स वाक्येषु न संभवति। एकस्य संस्कारस्य कार्यद्वयजनकत्वायोगात्। पदार्थबोधनोपक्षीणः संस्कारः कथं वाक्यार्थं बोधयेत्। न च कार्यद्वयदर्शनात् एकस्यैव शक्त्यन्तरं च कल्पनीयमिति वाच्यम्। गौरवात्, वाक्यार्थप्रतीतेरन्यथाप्युपपत्तेः।

किं च पदे विद्यमानानां वर्णानां विजातीयव्यवधानाभावात् अन्त्यवर्णप्रत्ययवेलायां पूर्ववर्णानां स्मरणं युज्यते। वाक्ये तु अन्त्यवर्णप्रत्ययवेलायां न केवलं सजातीयवर्णबुद्धिभिः व्यवधानम्, किं तु आन्तरालिकैः पदज्ञानपदपदार्थसंबन्धज्ञानपदार्थज्ञानैश्च व्यवधानात् अतीतवर्णानां स्मरणं दुर्घटम्। स्मृत्यारूढानां सर्वेषां वर्णानां वाचकत्वपक्षेऽपि समानोऽयं दोषः। अशक्यं च दीर्घतमेषु वाक्येषु सर्वेषां वर्णानां पदानां वा स्मरणम्। असत्यपि सर्ववर्णस्मरणे पदार्थस्मरणमात्रेण वाक्यार्थप्रतीतिरुत्पद्यत इति सर्वजनीनम्। अतो न वाक्यं साक्षात् वाक्यार्थस्य वाचकम्। नापि पदानि, यथैकदेशिनः (प्राभाकराः) मन्यन्ते, यथा पदार्थाः

वाक्यार्थप्रतिपादकाः तथा पदार्थद्वारेण पदानामपि संहतानां लब्धवाक्यव्यपदेशानां वाक्यार्थप्रतिपादकत्वम् इति।

अत्र पार्थसारथिमिश्रादयः — संहतेषु पदेषु लक्षणया वाक्यार्थस्य शाब्दत्वात्। तात्पर्याख्यव्यापारस्य वाक्यार्थपर्यन्तत्वात् तस्य शाब्दत्वमित्याहुः।

जयन्तभट्टोऽपि अभिधाख्यव्यापारस्य पदार्थपर्यवसितत्वेऽपि तात्पर्याख्यशक्तेः वाक्यार्थपर्यवसितत्वं स्वीकृत्य वाक्यार्थस्य शाब्दत्वमुपपादयति स्म।

६.२. दर्शनेषु अभिहितान्वय-अन्विताभिधानवादयोः चर्चायाः संक्षिप्तं विवरणम्

"पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि भवन्ति, अथेदानीं पदार्था अभिहिताः सन्तः वाक्यार्थमवगमयन्ति"
इति शाबरभाष्यम्[१],

"न वै पदार्थादन्यस्यार्थस्योपलब्धिर्भवति"
इत्यर्थवत्सूत्रस्थं महाभाष्यं[२] च अभिहितान्वयवादस्य मूलम्।

"तस्मात् व्यतिषक्तार्थाभिधानम्, व्यतिषक्तेनावगतेः व्यतिषङ्गस्य"
इति बृहतीग्रन्थ[३] अन्विताभिधाने मूलम्।

अपि च पूर्वोदाहृतशाबरभाष्यवाक्यात् पूर्वतनः आक्षेपभाष्यग्रन्थः अन्विताभिधानवादस्य मूलम् इति वक्तुं शक्यते। अयं हि स ग्रन्थः "नन्वर्थापत्तिरस्ति, यत् पदार्थव्यतिरिक्तमर्थमवगच्छामः। न च शक्तिमन्तरेण तदवगच्छामः" इत्यन्तः। ततः सिद्धान्तग्रन्थः —

"तन्न। अर्थस्य तन्निमित्तत्वात्। भवेदर्थापत्तिः, यद्यसत्यामपि शक्तौ नान्यन्निमित्तमवकल्प्येत। अवगम्यते तु निमित्तम्। किं? पदार्थाः"

इति। तदनन्तरग्रन्थस्तु —

"पदानि हि स्वं स्वमर्थमभिधाय" इत्यादिः। ततः —

"तस्मात् पदार्थप्रत्ययत एव वाक्यार्थो नास्य पदसमुदायेन संबन्धः"

इति निगमनभाष्यम्। तेन भाष्यकारेणैव अन्विताभिधानवादः अनूदितः, तत्खण्डनपूर्वकमभिहितान्वयवादश्च स्थापित इति प्रतीयते।

अथ के के दार्शनिकाः अभिहितान्वयवादं स्वीकुर्वन्ति, के चान्विताभिधानवादमिति संक्षेपेण प्रतिपाद्यते।

---

१ शा.भा.१.१.२५.
२ म.भा.१.२.४५.
३ बृ.१.१.७, भा.१.पृ.३८६.

६.२.१. जयन्तभट्टाः न्यायमञ्जर्यां[१] वादद्वयेऽपि गुणदोषचर्चां विधाय स्वमतमेवं प्रादीदृशन् —

तस्मात् पक्षद्वयमपि न क्षेमाय। तात्पर्यशक्त्या वाक्यार्थप्रत्यय इति पक्ष एव श्रेयान्। "स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि" इति कथयन् यदर्थतात्पर्यकाणि पदानि तत्रानिवृत्तव्यापाराण्येवेति सूचयति। एवं हि शाब्दता वाक्यार्थप्रत्ययस्य न हास्यते। सर्वात्मना तु विरतव्यापारे शब्दे सावश्यं हीयते। शब्दावगतिमूलकत्वात्तु शाब्दत्वे श्रौत्रत्वमपि स्यात्, श्रोत्रस्य परंपरया मूलत्वात्। तस्मात् वर्णेभ्य एव कयाचित् कल्पनया पदभावमुपगतेभ्यः पदार्थवाक्यार्थप्रत्यय इति युक्तम्। अतः पदार्थजन्या न भवति वाक्यार्थबुद्धिः। अनुपरतव्यापारात् वाक्यादेवोद्भवति।

अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः॥
संहत्यकारितापक्षे दोषो नैकोऽपि विद्यते।
तेनायमुपगन्तव्यो मार्गो विगतकण्टकः॥ — इति।

६.२.१.१. अन्वीयमानाभिधानम्, अभिधीयमानान्वयः इति पक्षौ

अन्ये त्वाहुः — अन्वीयमानाभिधानम्, अभिधीयमानान्वयश्चेति। अयं तेषामाशयः — पदार्थान्तरेणान्वयं गच्छन् पदार्थः पदैरभिधीयत इति पक्षेऽन्वितस्यानभिधानात् पदार्थनियमानवधारणपदान्तरवैफल्यादिदोषानवकाशः। अभिधीयमानानां शब्दैः प्रतिपाद्यमानानामन्वय इति द्वितीयपक्षे अभिहितान्वयपक्षोक्तः वाक्यार्थस्याशाब्दत्वमिति दोषो नास्ति। अभिधीयमानानाम् अभिधाविषयत्वमजहतां हि योऽन्वयः स कथम् अशाब्दः स्यादिति।

तदसत्। अभिधानक्रिया अन्वयक्रियेति द्वयोः क्रिययोः पृथगनुपलम्भात्। ते हि क्रमेण वा स्याताम्, युगपद्वा? क्रमेणेति पक्षे पूर्वमन्वयक्रिया चेत् तदिदमन्विताभिधानमेव, नान्वीयमानाभिधानम्। अभिधानक्रिया पूर्वं चेत् अभिहितान्वय एव, नाभिधीयमानान्वयः। युगपत्तु क्रियाद्वयसंवेदनं नास्ति। अर्थगतायाः अन्वयक्रियायाः शब्दप्रयोगकालेऽनुपलम्भात्।

अस्मिन् पक्षद्वयेऽपि उक्तेरेव नूतनता, न तु वस्तुनः। दोषाश्च सन्ति। अन्वीयमानाश्चेत् अभिधीयन्ते, तदा एकेनैव पदेन इतरपदार्थान्वीयमानस्याभिधानात् पदान्तरवैयर्थ्यमित्यादि समानम्। अभिधीयमानानां चान्वये पुनरप्यशाब्दत्वम्। शब्दव्यापारस्य शुद्धाभिधानक्रियायामेवोपक्षीणत्वात्' — इति जयन्तभट्टेन निरूपितम्।

[१] न्या.मं, आ.६.भा.२.पृ.२१५.

६.२.१.२. सामान्येनान्विताभिधानम्, विशेषतश्च अभिहितान्वय इति मतम्

अन्ये मन्यन्ते सामान्येनान्विताभिधानम्, विशेषतश्च अभिहितान्वयः इति। गोशब्दो हि स्वार्थम् अनवगतविशेषेण गुणक्रियासामान्येनान्वितमभिधत्ते। तावता अन्विताभिधानम्। शुक्लादिगुण-आनयनादिक्रियाविशेषसंबन्धस्तु पदान्तरादवगम्यते। सोऽयं विशेषः अभिहितान्वय इति।

एतदपि न युक्तम्। क्रियापदेन कारकसामान्यान्वितस्वार्थप्रतिपादनात् कारकपदनैष्फल्यमित्यादिदोषात्। न च कारकविशेषप्रतिपत्तये कारकपदोच्चारणमिति वाच्यम्। पदानां सामान्यप्रतिपत्तावेव चरितार्थत्वेन विशेषप्रतिपत्तेरशाब्दत्वप्रसङ्गात्। विशेषान्वयस्यैव वाक्यार्थत्वात्। तस्मात् पूर्वोक्ता रीतिरेव समञ्जसेति जयन्तभट्टमतम्।

६.२.२. तत्त्वबिन्दौ[१] वाचस्पतिमिश्राः वादद्वयमुपस्थाप्य अन्विताभिधानवादे दोषान् प्रदर्श्य अभिहितान्वयपक्षे लाघवादियुक्तीः प्रदर्श्य —

"तस्मात् अभिधातृत्वमपि नान्विताभिधान इति कल्पनालाघवात् आकाङ्क्षादिलक्षणसहकारिप्रत्यासन्नैः समभिव्याहृतपदस्मारितैः पदार्थैः प्रत्यासत्त्या गम्यमानो वाक्यार्थः लाक्षणिकः शाब्दश्चेति रमणीयम्"

इति निश्चकर्षुः।

६.२.३. उदयनाचार्याः न्यायकुसुमाञ्जलौ[२] तृतीयस्तबके शब्दस्य ईश्वरबाधकत्वनिराकरणावसरे प्रसङ्गात् लौकिकशब्दानामनुमानविधया प्रामाण्यमिति प्राभाकरमतं निरस्य तत्प्रसङ्गात् तत्संमतमन्विताभिधानं दूषयित्वा स्वयमभिहितान्वयमतमास्थाय तत्र भाट्टमतात् विशेष प्रदर्शितः।

भाट्टा हि पदैरभिहिताः पदार्था एव वाक्यार्थबोधे करणमित्याहुः। तत्तु न। पूर्वकालसंबन्धिनमिव उत्तरकालभाविनम् उत्पद्यमानं च पदार्थमधिकृत्यापि व्यवहारात्, तत्र बोधाच्च। न हि उत्तरकालभाविनः पदार्थस्य ज्ञानक्रियानिर्वर्तकत्वरूपं कारकत्वं भवितुमर्हति, न तरां कारकत्वविशेषरूपं करणत्वम्। अतः पदार्थाः न शाब्दबोधे करणम्। पदानां तु करणत्वं सुवचम् अव्यवहितपूर्ववृत्तित्वाभावेऽपि पदार्थस्मरणद्वारा पूर्ववृत्तित्वात्। व्यापारेण व्यवधानस्य चादोषत्वात्।

६.२.४. मणिकारैश्च[३] अन्विताभिधानवादं निरस्य उदयनाचार्यदर्शितपथैव निष्कर्षः कृतः —

---

१ त.बिं.पृ.१६१.
२ न्या.कु.३.पृ.२१६.
३ त.चिं.म, च.भा.द्वि.भा.पृ.५४८-५४९.

तस्मात् पदं करणम्। पदार्थस्मरणं व्यापारः। आकाङ्क्षादिसहकारिवशात् स्मारितार्थान्वयानुभवः फलम्। पदार्थस्मरणं न व्यवधायकं, व्यापारत्वात्। न च स्मरणद्वारा पदार्थ एव करणमस्तु इति वाच्यम्। तस्यानागतत्वादिना स्वस्मरणेऽन्वयानुभवे चाजनकत्वात्।

ननु तथापि पदार्थस्मरणमेव करणमस्तु, आवश्यकत्वात्। अत एव चिन्तावशेनोपनीतपदार्थानामन्वयबोधात् काव्यादीनामुत्पत्तिरिति चेत् — न। स्मरणस्य निर्व्यापारत्वेनाकरणत्वात्। अनन्यथासिद्धान्वयव्यतिरेकाभ्याम् आकाङ्क्षादिमत्पदस्य अन्वयानुभवविशेषे करणत्वात्। पदार्थोपस्थितेः संसर्गधीसामान्यहेतुत्वेऽपि शाब्दे संसर्गधीविशेषे पदस्यैव हेतुत्वात्। काव्यस्थले च पदार्थज्ञानव्यापारकमुत्प्रेक्षादिसहकृतं मन एवान्वयानुभवकरणम् इति।

६.२.५. "तत्तु समन्वयात्" इति ब्रह्मसूत्रव्याख्याने शांकरभाष्ये[१] प्राभाकरमतानुसारेण वेदान्तानां कार्यपरत्वमेव, न तु सिद्धब्रह्मपरत्वम् इत्याक्षेपसमाधानप्रसङ्गेन अन्विताभिधानवादं खण्डयित्वा अभिहितान्वयवादः सूचितः। भामत्यां वाचस्पतिमिश्रैः स्पष्टीकृतश्च। कल्पतरुपरिमलयोः तद्विस्तरः कृतः।

विशिष्टाद्वैतवेदान्तपरिपोषकैः श्रीमद्वेदान्तदेशिकैः तत्त्वमुक्ताकलापे वादद्वयमपि सम्यक् प्रतिपाद्य युक्तिसाम्यात् यः कोऽपि पक्षः स्वीक्रियते। प्रधानसिद्धान्तविरोधाभावादिति प्रत्यपादि।

द्वैतवेदान्तिभिस्तु अन्विताभिधानवादः समर्थितः। एतद्विस्तरः अनुव्याख्यानन्यायसुधायां द्रष्टव्यः।

६.३. निगमनम्

एतौ वादौ मूलतः मीमांसकैः प्रस्तुतौ इतरदार्शनिकैः विमृष्टाविति प्रथमतः मीमांसाग्रन्थेभ्यः तत्संकलनमुचितमिति भाष्य-वार्त्तिक-तत्त्वबिन्दु-बृहती-प्रकरणपञ्चिका-न्यायरत्नमालादिप्रसिद्धग्रन्थेभ्यः तौ वादौ अत्र प्रबन्धे प्रतिपादितौ। ततः न्यायमञ्जरी-न्यायकुसुमाञ्जलि-तत्त्वचिन्तामणिप्रभृतिन्यायग्रन्थेभ्यः भामती-कल्पतरु-परिमल-न्यायपरिशुद्धि-तत्त्वमुक्ताकलाप-अनुव्याख्यान-न्यायसुधादिवेदान्त-ग्रन्थेभ्यः विषयसंकलनपूर्वकं तौ वादौ स्पष्टीकृतौ। अन्ते अद्वैतसिद्धिव्याख्यायां लघुचन्द्रिकायां ब्रह्मानन्दसरस्वतीश्रीचरणैः नव्यन्यायसरण्या सुसूक्ष्मदृष्ट्या अनयोर्वादयोः मर्मोद्घाटनं कृतमिति तत्रत्यो विचारोऽत्र प्रस्तुतः।

---

[१] ब्र.सू.शां.भा.१.१.४.

७. वाक्यार्थबोधे मुख्यविशेष्यः

वाक्यघटकानां पदानां येऽर्थाः तेषां संसर्गमवगाहमानं ज्ञानं शाब्दबोधः। तत्र विषयभूतेषु पदार्थेषु एकः मुख्यविशेष्यतया भासते। अन्ये पदार्थाः विशेषणतया भासन्ते। तत्र कः मुख्यविशेष्यतया भासत इति जिज्ञासायां धात्वर्थो व्यापारो मुख्यविशेष्यतया भासत इति वैयाकरणाः। तथा च तन्मते "चैत्रो ग्रामं गच्छति" इति वाक्यात् 'चैत्रकर्तृकग्रामनिष्ठसंयोगजनको व्यापारः' इति बोधः।

प्रथमान्तार्थः मुख्यविशेष्यतया भासत इति नैयायिकाः। तन्मते "चैत्रो ग्रामं गच्छति" इति वाक्यात् 'ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृत्याश्रयः चैत्रः' इति शाब्दबोधः।

आख्यातार्थकृतिः मुख्यविशेष्यतया भासते इति मीमांसकाः। तन्मते "चैत्रो ग्रामं गच्छति" इति वाक्यात् 'चैत्रनिष्ठा ग्रामसंयोगानुकूलव्यापारानुकूला कृतिः' इति बोधः।

धात्वर्थफलं मुख्यविशेष्यतया भासते इति जयन्तभट्टाः। 'चैत्रकर्तृकव्यापारजन्यः ग्रामनिष्ठः चैत्रसंयोगः' इति तन्मते बोधः।

आख्यातार्थः कर्ता मुख्यविशेष्यतया भासत इति विशिष्टाद्वैतिनः। 'चैत्राभिन्नः ग्रामनिष्ठसंयोगजनकव्यापारकर्ता' इति बोधः।

एतेषां पञ्चानां पक्षाणां साधकानि प्रमाणानि, युक्तयश्च विस्तरेण प्रबन्धे प्रतिपाद्यन्ते।

८. एकवाक्य-वाक्यभेदादिविचारः

परस्परसाकाङ्क्षार्थविषयकमेकमुख्यविशेष्यकं च यत् ज्ञानं तज्जनकं वाक्यमेकवाक्यम् इति "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति सूत्रेण[१] जैमिनिना प्रोक्तम्। प्रायेणेदं सर्वैः दार्शनिकैरङ्गीक्रियते। अनेकमुख्यविशेष्यकबोधजनकत्वे तु वाक्यस्य नानात्वम्, अर्थात् भेदः। कुत्र कुत्र वाक्यभेदः इति विषयः मीमांसकैः बहुधा तत्र तत्र चर्चितः। तत् सर्वमत्र प्रबन्धे संकलय्य प्रदर्श्यते।

तथा कानिचित् वाक्यानि अपूर्णानि भवन्ति। तत्र अध्याहारः अनुवृत्तिः इत्यादिभिः उपायैः वाक्यस्य पूरणं कृत्वा परिपूर्णो वाक्यार्थो वर्णनीयो भवति। तत्र अध्याहारो नाम वाक्ये पूर्वं परत्र वा अश्रूयमाणस्य पदस्य पदसमूहस्य वा योजनम्। अनुवृत्तिर्नाम पूर्ववाक्यश्रुतस्य पदस्य उत्तरवाक्यस्थतया अनुसन्धानम्।

---
[१] जै.सू.२.१.१४.४६.

अनुषङ्गो नाम उत्तरवाक्यस्थस्य पदस्य पूर्ववाक्ये आकर्षणं = पूर्ववाक्यस्थतया अनुसन्धानम्। आवृत्तिर्नाम एकस्य वाक्यस्य पदस्य वा द्विः अनुसन्धानम्। एतेषां सोदाहरणं विवेचनम् अत्र ग्रन्थे कृतमस्ति।

९. आकाङ्क्षानिरूपणम्

प्रथमं वाक्यघटकानि पदानि श्रूयन्ते, अथ वा ज्ञायन्ते। ततः पदार्थाः स्मर्यन्ते। पदार्थस्मृतौ वृत्तिज्ञानं सहकारिकारणम्। पदार्थस्मृत्यनन्तरं च आकाङ्क्षा-योग्यतासत्तितात्पर्यज्ञानवशात् पदार्थानां संसर्गरूपस्य वाक्यार्थस्य बोधो भवति। शाब्दबोधस्य वाक्यार्थबोधात्मकस्य पदज्ञानं कारणम्। तस्य सहकारिकारणानि आकाङ्क्षादिज्ञानानीति नैयायिकसिद्धान्तः।

९.१. श्रोतृगतजिज्ञासा आकाङ्क्षेति मतम्

तत्र आकाङ्क्षायाः स्वरूपं तावत् वाचस्पतिमिश्रैः तत्त्वबिन्दौ[१] "प्रतिपत्तुः श्रोतुः जिज्ञासा" इत्युक्तम्।

प्रकरणपञ्चिकायाम्[२] —

अभिधानापर्यवसानात् अभिधेयापर्यवसानाद्वा पदार्थान्तरे पुरुषस्य जायमाना जिज्ञासा (आकाङ्क्षा)। तत्र अभिधानापर्यवसानस्योदाहरणं "द्वारम्" इति। अत्र "द्वारम्" इत्यनेनान्वयस्य यः प्रतियोगी पिधानादिः तदुपस्थापकपदाभावादभिधानं न पर्यवस्यति। तस्मात् अन्वयप्रतियोगिविषयकजिज्ञासा जायते। तस्यां सत्याम-परिपूर्णस्य वाक्यस्य पूरकतया प्रकरणादिवशेनान्वयप्रतियगिनः योग्यस्याध्याहारः क्रियते।

अभिधेयापर्यवसानात् जिज्ञासा यथा "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति" इत्यादिष्वभिहितस्यापूर्वात्मकस्य कार्यस्यानुष्ठानं विना कार्यत्वानुपपत्तेः, कर्त्रा च विनानुष्ठानासंभवात्, अधिकारं विना च कर्तृत्वायोगात्, नियोज्यं विना चाधिकारस्यानुपपत्तेः नियोज्यविषये जिज्ञासा जायते। तत्पूरणाय च नियोज्यः स्वर्गकामोऽध्याह्रियते इत्युक्तम्।

९.२. अभिधानापर्यवसानमाकाङ्क्षेति मणिकारमतम्

अत्राहुर्मणिकाराः[३] — न तावत् जिज्ञासा आकाङ्क्षा। अजिज्ञासोरपि पुंसः शाब्दबोधोदयेन व्यतिरेकव्यभिचारात्। नापि एकपदार्थेन साकमपरपदार्थस्या-

---

१ त.बिं.पृ.१०५.
२ प्र.पं.पृ.३८४-३८८.
३ त.चिं.म,च.भा.प्र.प.पृ.१८५.

विनाभाव आकाङ्क्षा। "नीलं सरोजम्" इत्यादौ तदभावात्। अनीलस्य सरोजस्य सद्भावेन सरोजत्वावच्छेदेन नीलरूपाविनाभावविरहात्।

न च जिज्ञासायोग्यता आकाङ्क्षा। सा च श्रोतरि तद्वाच्यज्ञानजन्यशाब्दबोधप्रागभावरूपा। उत्पन्ने शाब्दबोधे जिज्ञासायाः अभावादिति वाच्यम्। प्रागभावस्य कार्यसामान्यं प्रति हेतुतया प्रागभावरूपाकाङ्क्षायाः शाब्दबोधं प्रति असाधारणकारणत्वायोगात्।

अपि च, उत्थिताकाङ्क्षा उत्कृष्टा, उत्थाप्याकाङ्क्षा अपकृष्टेत्याकाङ्क्षायामुत्कर्षापकर्षावनुभूयेते। आकाङ्क्षायाः प्रागभावरूपत्वे तस्यामुत्कर्षापकर्षौ न स्याताम्। प्रागभावे तयोरभावात्।

अतः अभिधानापर्यवसानमाकाङ्क्षा। यस्य येन विना न स्वार्थानुभावकत्वं तस्य तत् अपर्यवसानम्। तथा च यत्पदस्य यत्पदव्यतिरेकप्रयुक्तो यादृशान्वयबोधाभावः तत्पदस्य तत्पदवत्त्वं तादृशान्वयबोधेऽभिधानापर्यवसानमिति फलितोऽर्थः।

तत्पदवत्त्वं चाव्यवहितपूर्वत्व-अव्यवहितोत्तरवर्तित्वान्यतररूपसमभिव्याहारसंबन्धेन।

भवति हि घटपदस्य "घटवत् कर्मत्वम्" इत्यन्वयबोधजनकत्वाभावः अम्पदव्यतिरेकप्रयुक्तः, अम्पदस्य तदभावश्च घटपदव्यतिरेकप्रयुक्त इति घटपदवत्त्वम् अम्पदे, अम्पदवत्त्वं च घटपदे आकाङ्क्षा इति।

९.३. नागेशमतेन इच्छायाः आकाङ्क्षत्वम्

नागेशभट्टास्तु[१] — एकपदार्थज्ञाने तदर्थान्वययोग्यस्य अर्थस्य यत् ज्ञानं तद्विषयकेच्छा "अस्यान्वयी अर्थः कः" इत्याकारा पुरुषनिष्ठैव। तथापि तस्याः आकाङ्क्षाविषयेऽर्थे आरोपः। आरोपितमर्थनिष्ठाकाङ्क्षास्वरूपमेव अभिधानापर्यवसानमित्युच्यते। "अयमर्थोऽर्थान्तरसाकाङ्क्षः" इति व्यवहारात्। पदे तु नारोपः, प्रमाणाभावात्। अर्थबोधोत्तरमेव जिज्ञासोदयाच्च। पदं साकाङ्क्षमिति व्यवहारस्तु साकाङ्क्षार्थबोधकमित्यर्थक इत्याहुः।

९.४. जिज्ञासाविषयत्वयोग्यता आकाङ्क्षा

वेदान्तपरिभाषाकृतस्तु[२] एवमाहुः — पदार्थानां परस्परजिज्ञासाविषयत्वयोग्य-

---

[१] ल.मं.पृ.४८७-५०२.
[२] वे.प.पृ.२१२.

त्वमाकाङ्क्षा। क्रियापदश्रवणे सति कारकस्य जिज्ञासाविषयत्वम्, कारकपदश्रवणे सति क्रियायाः जिज्ञासाविषयत्वम्, करणश्रवणे सति कथमिति जिज्ञासाविषयत्वमितिकर्तव्यतायाः, इति पदार्थानां परस्परजिज्ञासाविषयत्वमस्ति। अजिज्ञासोरपि शाब्दबोधोदयात् जिज्ञासाविषयत्वमित्यनुक्त्वा जिज्ञासाविषयत्वयोग्यत्वमित्युक्तम्। तच्च जिज्ञासाविषयतावच्छेदकधर्मवत्त्वम्। स च धर्मः क्रियात्वकारकत्वादिः। क्रियाकारकभावरहितेषु "नीलो घटः" "तत्त्वमसि" इत्यादिसिद्धपरवाक्येषु समानविभक्तिकपदप्रतिपाद्यत्वमवच्छेदकम्। अत एव तत्र "नीलः" इत्युक्ते "कः" इति, "घटः" इत्युक्ते "कीदृशः" इति च जिज्ञासा जायते इति।

१०. योग्यतानिरूपणम्

"तस्य निराकाङ्क्षादौ संसर्गज्ञानाजनकत्वात् आकाङ्क्षादिकं सहकारि" इति मणौ[१] शब्दप्रामाण्यसमर्थनवादान्ते उक्तम्। तत्र आकाङ्क्षायाः सहकारित्वं पूर्वमपपादितम्। आदिपदग्राह्ययोग्यतायाः सहकारित्वम् इदानीम् उपपाद्यते।

१०.१. शालिकनाथमतेन योग्यतास्वरूपम्

प्रकरणपञ्चिकायां[२] "यत् संबन्धार्हं तद्योग्यम्। यत् संबन्धित्वेन दृष्टं तत् संबन्धार्हम्" इत्युक्तम्। तेन एकपदार्थेऽपरपदार्थस्य संबन्धो योग्यतेति लभ्यते।

१०.२. मणिकारमतेन योग्यतास्वरूपम्

मणिकारास्तु[३] — तत्सजातीये तत्सजातीयस्यान्वयदर्शनं योग्यता, प्रकृतपदार्थसंसर्गव्याप्यधर्मवत्वं योग्यता, प्रकृतपदार्थसंसर्गाभावव्याप्यधर्मशून्यत्वं योग्यता, बाधकप्रमाणाभावो योग्यता, असंबन्धग्राहकप्रमाणाभावो योग्यता, बोधनीयसंसर्गाभावप्रमाविरहो योग्यता इति पक्षाननूद्य, निरस्य, सिद्धान्ते "बाधकप्रमाविरहो योग्यता" इति पक्षं समर्थयित्वा, बाधकप्रमाविरहो नाम इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावः। "पयसा सिञ्चति" इत्यादौ पयोनिष्ठकरणताया निरूपकत्वसंसर्गे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावोऽस्ति। "पयोनिष्ठकरणतानिरूपकत्वं सेकनिष्ठात्यन्ताभावप्रतियोगि" इत्याकारकप्रमाविरहादिति लक्षणसमन्वयः। "वह्निना

[१] त.चि.म, च.भा.प्र.प.पृ.१८१.
[२] प्र.पं.पृ.३९०-३९१.
[३] त.चि.म,च.भा.प्र.प.पृ.२४५.

सिञ्चति" इत्यादौ वह्निनिष्ठकरणतानिरूपकत्वे सेकनिष्ठात्यन्ताभावप्रतियोगित्व-प्रकारकप्रमाविशेष्यत्वस्यैव सत्त्वान्न तत्र योग्यता।

वस्तुतस्तु — इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदक-धर्मशून्यत्वं योग्यता। "पयसा सिञ्चति" इत्यादौ पयोनिष्ठकरणतानिरूपकत्वे सेक-निष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वमस्तीति समन्वयः। उक्ता योग्यता न स्वरूपसती शाब्दबोधहेतुः, "वह्निना सिञ्चति" इत्यादौ शाब्दभ्रमस्यानुपपत्तेः, तत्र स्वरूपसत्या उक्तयोग्यतायाः विरहात्। अपि तु संशयविपर्ययप्रमासाधारणं योग्यताज्ञानं कारणम् — इत्याहुः।

१०.३. योग्यताज्ञानस्य शाब्दबोधकारणत्वाभावः

मुक्तावल्यां[1] — नव्यास्तु योग्यताज्ञानं न शाब्दबोधहेतुः। "वह्निना सिञ्चति" इत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः, योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इत्याहुः — इति नव्यमतमुप-न्यस्तम्।

तर्कताण्डवकारास्तु[2] मणिकृन्मतं खण्डयित्वा, अन्ततो योग्यताज्ञानं न शाब्दधीहेतुः, न वा अयोग्यतानिश्चयः शाब्दधीप्रतिबन्धकः। योग्यतायाः संसर्गा-त्मकत्वेन तज्ज्ञानस्य शाब्दसंसर्गज्ञानहेतुत्वे आत्माश्रयात्, अयोग्यतानिश्चयसत्त्वेन प्रतिवादिवाक्यस्याबोधकतया तत्खण्डनाद्यसंभवादिति न्यरूपयन्।

१०.४. वेदान्तपरिभाषानुसारेण योग्यतास्वरूपम्

वेदान्तपरिभाषाकारास्तु[3] — तात्पर्यविषयसंसर्गाबाधः योग्यता। "वह्निना सिञ्चति" इत्यादौ तादृशसंसर्गबाधान्न योग्यता। 'तात्पर्यविषय' इति संसर्गविशेषणात् "स प्रजापतिरात्मनो वपामुदखिदत्" इत्याद्यर्थवादवाक्ये वाच्यार्थसंसर्गबाधसत्त्वेऽपि तात्पर्यविषयीभूतस्य वपायागप्राशस्त्यस्य अबाधात् योग्यता निर्वहति — इत्याहुः।

१०.५ नागेशोक्तं योग्यतास्वरूपम्

लघुमञ्जूषाकारास्तु[4] — शाब्दबोधं प्रति योग्यताज्ञानं न कारणं, नापि अयोग्यतानिश्चयः प्रतिबन्धकः। अपि तु अयोग्यतानिश्चयः शाब्दबोधे अप्रामाण्य-ग्राहक इति सयुक्तिकं न्यरूपयन्। तथा हि —

---

[1] मु.पृ.४२०-४२२.
[2] त.तां, भा.२.पृ.३३-४७.
[3] वे.प.पृ.२२६.
[4] ल.मं.पृ.५०६.

"अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया
....अकीर्तयः"

इत्यत्र संख्यायां परार्धाधिकत्वबाधज्ञानेऽपि शाब्दबोधो जायते।

किं च "वह्निना सिञ्चति" इत्यादितोऽयोग्यार्थकवाक्यात् यदि बोध एव न जायते तदा तद्वाक्यश्रवणानन्तरं तद्वाक्यप्रयोक्तारं प्रति "अद्रवेण वह्निना कथं सेकं ब्रवीषि" इत्युपहासः श्रोतृभिः क्रियमाणः असंगतः स्यात्।

अपि च वादे अयोग्यार्थकत्वेन निश्चितस्य प्रतिवादिशब्दस्याबोधकत्वे सति वादिनः तत्खण्डनरूपकथायाः उच्छेदापत्तिः इत्याहुः।

११. आसत्तिनिरूपणम्

११.१. अव्यवधानेन पदार्थोपस्थितिराकाङ्क्षेति मणिकारमतम्

आकाङ्क्षायोग्यताज्ञानवत् आसत्तिज्ञानमपि शाब्दबोधकारणम्। तत्र केयमासत्तिर्नामेति जिज्ञासायां मणिकाराः[१] प्राहुः —

आसत्तिर्नाम अव्यवधानेन अन्वयप्रतियोग्युपस्थितिः। अन्वयप्रतियोगिनोः पदार्थयोः अव्यवधानेनोपस्थितिः आसत्तिरित्यर्थः। स्वाव्यवहितत्वसंबन्धेन तत्पदार्थोपस्थितिविशिष्टा तत्पदार्थोपस्थितिः तत्पदार्थे तत्पदार्थस्य आसत्तिरिति फलितार्थः। यथा "नीलो घटः" इत्यत्र नीलपदार्थोपस्थित्यव्यवहिता घटपदार्थोपस्थितिः आसत्तिः। इयं चोपस्थितिरूपा आसत्तिः स्वरूपसती शाब्दबोधहेतुः — इति।

११.२ अव्यवधानेन पदोपस्थितिराकाङ्क्षेति विश्वनाथमतम्

विश्वनाथपञ्चाननास्तु — "संनिधानं तु पदस्यासत्तिरुच्यते" इति कारिकावल्यां[२], "यत्पदेन यत्पदार्थस्य अन्वयोऽपेक्षितः तयोः पदयोः अव्यवधानेनोपस्थितिः शाब्दबोधे कारणम्" इति मुक्तावल्यां[३] च अन्वयप्रतियोग्यर्थोपस्थापकपदयोरव्यवधानेन ज्ञानमासत्तिः — इत्याहुः।

११.३. तत्खण्डनम्

मुक्तावलीव्याख्यायां दिनकर्यां[४] मुक्तावलीखण्डनपूर्वकं नव्यमतमुपन्यस्तम्। तथा हि — उक्तासत्तिः मौनिश्लोके न संभवति। तत्र पदाभावेन पदाव्यवधाना-

---

[१] त.चिं.म, च.भा.प्र.प.पृ.२८६.
[२] कारिकावली.८२.
[३] मु.पृ.६२०.
[४] दि.पृ.६२२.

संभवात्। उक्तासत्तिज्ञानविलम्बेन शाब्दबोधविलम्बाभावाच्च। किन्तु वृत्त्या पदजन्या पदार्थानामव्यवधानेन उपस्थितिः आसत्तिः इत्याहुः — इति।

तर्कसंग्रहे[1] — "पदानामविलम्बेनोच्चारणं संनिधिः" इत्युक्तम्। दीपिकायाम्[2] — "अविलम्बेन पदार्थोपस्थितिः संनिधिः। उच्चारणं तु तदुपयोगितयोक्तम्" इत्युक्तम्।

११.४. तर्कताण्डवमतेन आसत्तिस्वरूपम्

तर्कताण्डवकारास्तु[3] — पदोपस्थित्यनुकूलवक्तृव्यापारे निष्फलस्य अन्वयबोधविरोधिव्यवधानस्य अभावः आसत्तिः। पदयोः पदानां चोपस्थितेरनुकूलो यो वक्तुः व्यापारः लिपिः उच्चारणं तात्पर्यं वा, तस्मिन् निष्फलस्य अन्वयबोधविरोधिव्यवधानस्याभावः आसत्तिः। इयं चासत्तिः ज्ञातैव शाब्दधीहेतुः। आसत्तिभ्रमेण शाब्दबोधभ्रमात् इति — निरूपयन्ति।

११.५. नागेशमतेन आसत्तिस्वरूपम्

नागेशभट्टास्तु लघुमञ्जूषायाम्[4] —

आसत्तिर्नाम अन्वयिनां पदार्थानां तद्बोधकपदानां च अव्यवधानेनोपस्थितिः। "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यनासन्नस्थले योजनावाक्यात् मन्दस्य बोधेऽपि विलम्बः अस्त्येवेति तावन्मात्रेणानासन्नत्वव्यवहारः। अमन्दस्य तु आसत्त्यभावेऽपि पदार्थोपस्थितौ सत्यामाकाङ्क्षाज्ञानवतः बोधोऽविलम्बेनैव भवतीति अमन्दस्य बोधे आसत्तेर्न कारणत्वम्। ध्वनितं चेदं "न पदान्त" सूत्रे भाष्ये[5] "अनानुपूर्व्येणापि संनिविष्टानां यथेष्टमभिसंबन्धो भवति। तद्यथा — 'अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीः' " इति — इत्याहुः।

१२. तात्पर्यनिरूपणम्

१२.१. उदयनोक्तं तात्पर्यलक्षणम्

आकाङ्क्षादिज्ञानवत् तात्पर्यज्ञानमपि शाब्दबोधकारणम्। तत्र तात्पर्यं नाम तदुद्देश्यकत्वम्। यदुद्देशेन यः शब्दः प्रवृत्तः स तत्परः। उद्देशः = इच्छा। तथा च

---

[1] त.सं.पृ.६७.
[2] त.सं.दी.पृ.३४२.
[3] त.तां, भा.२.पृ.२४.
[4] ल.मं.पृ.५२४-५२६.
[5] म.भा.१.१.५८.

तद्विषकेच्छाधीनत्वं तत्परत्वम्। समन्वेति चेदं प्रशंसानिन्दापरेषु लौकिकवाक्येषु। तेषाम् "अयमिदमुपादत्ताम्" "अयमिदं जहातु" इति उपादानहानरूपार्थेच्छया प्रवृत्त्वात्। यद्यपि गङ्गापदस्य तीरपरत्वं न तीरेच्छाधीनत्वम्। तथापि तज्ज्ञानेच्छाधीनत्वमेव तत्परत्वं सर्वत्र बोध्यम्। तथा च "वैदिकार्थवादाः उपादानहानरूपकार्यविषयकेच्छापूर्वकाः, कार्यशेषार्थवादत्वात्, लौकिकार्थवादवत्" इत्यनुमानेन इच्छाया अनुमितौ तदाश्रयत्वेन ईश्वरोऽनुमीयत इति न्यायकुसुमाञ्जलौ पञ्चमस्तबके उदयनाचार्याः[१] आहुः।

१२.२. मणिकृन्मतं तात्पर्यलक्षणम्

मणिकाराः[२] — तत्प्रयोजनकत्वं तत्परत्वम्। तच्छब्दार्थः प्रतीतिः, प्रवृत्तिनिवृत्ती च। प्रयोजनत्वं च प्रतिपादकेच्छाविषयत्वम्। प्रतिपादको वक्ता। तथा च वक्ता यदर्थविषयकप्रतीतिप्रवृत्तिनिवृत्तिविषयकेच्छया यं शब्दं प्रयुङ्क्ते स शब्दः तत्परः। जनकतासम्बन्धेन तद्विषयकप्रतीत्यादिप्रकारकेच्छाविशेष्यत्वं वा, जन्यतासंबन्धेन तद्विषयकप्रतीत्यादिविशेष्यकेच्छाप्रकारत्वं वा तत्परत्वम्। भवति च "अयं शब्दोऽमुकप्रतीतिमान् भवतु" इति इच्छायाः जनकतासंबन्धेन प्रतीतिप्रकारिकायाः विशेष्यः शब्दः, "अमुकविषयकप्रतीतिः एतच्छब्दात् भवतु" इति इच्छायाः जन्यतासंबन्धेन प्रतीतिविशेष्यिकायाश्च प्रकारः शब्द इति प्रतीतिपरत्वं शब्दस्य। एतेन प्रवृत्त्यादिपरत्वमपि व्याख्यातम्। किं तु प्रतीतिपरत्वमेव शाब्दबोधोपयोगि, न तु प्रवृत्त्यादिपरत्वम्। "अयं शब्दः एतदर्थपरः" इति अर्थपरत्वव्यवहारस्तु अर्थविषयकप्रतीतिपरत्वनिबन्धनो भाक्तः — इति वदन्ति।

एतादृशतात्पर्यनिर्णयस्य शाब्दबोधहेतुत्वं नानार्थकस्थलानुरोधेन स्वीक्रियते।

१२.३. शाब्दसामान्ये तात्पर्यज्ञानस्य हेतुत्वम्

नन्वेवमपि नानार्थकस्थले तात्पर्यनिर्णयस्य हेतुत्वेऽपि शाब्दसामान्ये तस्य हेतुत्वे मानाभाव इति चेत् —

अत्राहुः न्यायकौस्तुभकाराः[३] — लवणादिनानार्थशक्तसैन्धवादिपदस्थले लवणादितात्पर्यज्ञानस्य हेतुत्वे कल्पनीये नानार्थशक्तसैन्धवादिपदजन्यलवणादिविषयकशाब्दत्वस्य कार्यतावच्छेदकत्वे गौरवेण सैन्धवादिपदजन्यलवणादिविषयकशाब्दत्वमेव कार्यतावच्छेदकं कल्प्यते लाघवात्।

---

[१] न्या.कु.५, पृ.३१२.
[२] त.चिं.म, च.भा.प्र.प.पृ.३१९.
[३] न्या.कौ.पृ.१०७.

एवं लक्षणास्थले शक्तिलक्षणाभ्यां शक्यलक्ष्यार्थयोः उपस्थितौ, लक्ष्यार्थस्यैव शाब्दबोधः न तु शक्यार्थस्येति नियमनिर्वाहाय, लक्षणयैव नानालक्ष्यार्थोपस्थितौ एकस्यैव लक्ष्यार्थस्य शाब्दबोधनिर्वाहाय च तात्पर्यनिर्णयस्य हेतुत्वमावश्यकमिति सर्वत्र शाब्दबोधे तस्य हेतुत्वसिद्धिः। अत्रेदं बोध्यम्। "सैन्धवमानय" इत्यादौ लवणतुरगादिनानार्थे यत्र शक्तिग्रहः, तत्र द्वितीयार्थविषयकबोधः प्राचां मते पदस्य वाक्यस्य च पुनरनुसन्धानरूपया आवृत्त्यैव भवति। 'सकृदुच्चारितः शब्दः सकृदेवार्थं गमयति' इति व्युत्पत्तेः। तादृशव्युत्पत्त्यनङ्गीकर्तृमते तु आवृत्तिं विनैव एकदा उभयार्थबोधः — इति।

१२.४. तात्पर्यं किं पदस्य उत वाक्यस्य ?

तत्प्रतीतीच्छया उच्चरितत्वं तात्पर्यमिति तात्पर्यस्वरूपं पर्यवसितम्। तत्र तत्प्रतीतिपदेन पदार्थप्रतीतिः गृह्यते वा, वाक्यार्थप्रतीतिः गृह्यते वा इति संशयः। उभयं ग्रहीतुं शक्यमिति प्रतिभाति। तथा हि — "वक्तुरिच्छा तु तात्पर्यम्" इति कारिकाभागमुपादाय दिनकर्यां[१] " 'घटमानय' इत्यादौ कर्मत्वविशेष्यकाधेयता-संसर्गकघटप्रकारकप्रतीतीच्छा वक्तुस्तात्पर्यम्। 'तादृशेच्छया उच्चरितमिदं वाक्यम्' इत्याकारकं श्रोतुस्तात्पर्यज्ञानं शाब्दबोधे कारणमित्यर्थः" इति व्याख्यातम्। अतः तात्पर्यघटकतत्पदेन वाक्यार्थप्रतीतिर्ग्राह्येति प्रतीयते।

तर्कसंग्रहदीपिकायां[२] तु "तत्प्रतीतीच्छया उच्चरितत्वं तात्पर्यम्। तात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुः, नानार्थानुरोधात्" इत्युक्तम्। "तत्प्रतीति" प्रतीकमुपादाय नीलकण्ठप्रकाशिकायां "तीरादिरूपार्थप्रतीतीत्यर्थः" इति व्याख्यातम्। तेन पदार्थप्रतीतिरपि तत्पदेन ग्रहीतुं शक्येति प्रतीयते।

१२.५. नागेशमते तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वाभावः

नागेशस्तु[३] तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वं नानुमन्यते। "अस्मात् पदाद् वाक्याद् वा अर्थद्वयविषयको बोधो जायते। तात्पर्यं तु क्वेति न जानीमः" इत्यनुभवविरोधात्। तेनानुभवेन तात्पर्यज्ञानं विनैव बोधोत्पत्तेर्विषयीकरणात्। बोधस्य च तात्पर्यज्ञानाधीनत्वे बोधानन्तरं तात्पर्यसंदेहः कथं स्यात्। तात्पर्य-निर्णयस्योपयोगस्तु शाब्दज्ञाने प्रामाण्यनिश्चयद्वारा प्रवृत्तौ, क्वचिदनेकपदार्थ-स्यान्वययोग्यत्वे कस्याध्याहारः इत्यत्र च। यथा "द्वारम्" इत्युक्ते "द्वारनिष्ठं कर्मत्वम्" इति बोधे जाते, किं "पिधेहि" इत्यध्याहार्यम्, अथवा "उद्घाटय" इति

[१] दि.पृ.६४३.
[२] त.सं.दी.पृ.३३१.
[३] ल.मं.पृ.५२६.

संदेहे, तात्पर्यवशादन्यतरस्याध्याहारः क्रियते। ततश्चाध्याहारे तात्पर्यज्ञानस्योपयोगः, न तु बोधे — इति नागेशस्य निरूपणम्।

१२.६. अपि तात्पर्यं वृत्तिः?

एतावता नानार्थस्थलानुरोधेन तात्पर्यज्ञानस्य हेतुत्वमुपपादितम्। अथ आलंकारिकाः "तात्पर्यं वृत्तिः इति केषांचिदाशयः" इति वदन्ति। तत्तु तात्पर्यं पूर्वोक्ततात्पर्यापेक्षया अन्यत्। तथा हि — अभिहितान्वयवादे पदैरभिहिताः पदार्थाः लक्षणया वाक्यार्थं बोधयन्तीति स्वीक्रियते। तत्र पदवृत्तिं विनापि वाक्यार्थबोधस्वीकारे वाक्यार्थस्य पदार्थसंसर्गात्मकस्य शाब्दत्वं न निर्वहति इत्याशयेन वाक्यघटकेषु पदेषु संहतिमापन्नेषु सर्वेषु पदेषु संसर्गतात्पर्यरूपा वृत्तिः स्वीक्रियते इति न्यायमञ्जर्यां जयन्तभट्टैः, श्लोकवार्तिकव्याख्याने न्यायरत्नाकरे पार्थसारथिमिश्रैश्च प्रत्यपादि। तदेव "तात्पर्यार्थोऽपि केषुचित्" इति काव्यप्रकाशे अनूदितम्। एवं च अभिधा लक्षणा व्यञ्जना च पदवृत्तिः। तात्पर्यं तु वाक्यवृत्तिः। इयं च नानार्थस्थलीयतात्पर्यविलक्षणा सकलवाक्यजन्यशाब्दबोधसाधारणी इति अवधेयम्। न्यायमञ्जरीन्यायरत्नाकरग्रन्थयोरपि न तात्पर्याख्यवृत्तिपरत्वमिति मया प्रबन्धे विस्तरेण निरूपितम्। विस्तरभयादुपरम्यते।

ग्रन्थस्य मुख्यमुद्देश्यम्

लौकिके शास्त्रीये च व्यवहारे च वाक्यस्य प्रयोगोऽवर्जनीयः। तत्र वाक्यस्य वाक्यघटकपदानां पदघटकप्रकृतिप्रत्यययोश्च कस्कोऽर्थः? कश्च तेषां संसर्गः? कथं च विशिष्टार्थबोधः भवति? इत्यादिविषये सूक्ष्मदृष्टिकोणैः दार्शनिकाः विवेचनं कृतवन्तः। तेषां सर्वेषां विवेचनानां प्रौढपण्डितैकावगम्यानाम् एकत्र क्रोडीकरणेन सुबोधक्रमबद्धशैल्या प्रदर्शनं प्राचीनपद्धत्या अधीतिनाम्, आधुनिकभाषाविज्ञानिनां च जिज्ञासूनामनुसंधानकर्मनिरतानां च महते उपकाराय स्यात् इत्येव मुख्यमुद्देश्यमस्य प्रबन्धस्य।

निगमनम्

एकमेव विषयं यदा ग्रन्थकाराः सयुक्तिकं येन क्रमेण प्रतिपादयन्ति, तदा तेनैव क्रमेण तदध्ययनमेव मनःसंतोषाय कल्पत इति तत्तद्ग्रन्थस्थक्रममेवानुसृत्य अत्र संकलनं कृतमस्ति। यत्र ग्रन्थस्थशैली सुलभा वर्तते तत्र तथैव वाक्यसंनिवेशः कठिनपदस्थाने सुबोधपदप्रक्षेपपूर्वकमत्र कृतोऽस्ति। एतद्ग्रन्थपठनेन एकत्र सर्वग्रन्थस्थविषयावगमः एकं प्रयोजनं प्राप्येत, पश्चात् मूलग्रन्थे प्रवेशसौलभ्यं चापरं प्रयोजनं लभ्येतेति अस्माकं विश्वासः।

विषयसूची

१. शब्दप्रामाण्यविचारः पृ. १-७९

१. चार्वाकमतम्, तन्निरासश्च	१-२
२. भामत्यां शब्दानुमानयोः पृथक्प्रामाण्यस्थापनम्	२-३
३. वेदान्तदेशिककृतं शब्दप्रामाण्यस्थापनम्	३
४. शब्दमणौ शब्दप्रामाण्यस्थापनम्	३-४
५. न्यायसूत्रानुसारेण शब्दस्य पृथक्प्रमाणत्वम्	४-५
६. दिङ्नागमतेन शब्दस्यानुमानेऽन्तर्भावः	५-७
७. वार्त्तिके प्रदर्शितः तद्दूषणप्रकारः	७-८
८. शब्दस्यानुमानान्तर्भाववादिकणादमतम्	८-९
१) शब्दादर्थानुमाने पक्षः क इति विचारः	९
२) शब्दानुमानयोः साधर्म्यनिरूपणम्	९-१०
३) शब्दस्यार्थाव्यभिचारित्वम्	१०
४) शब्दस्यार्थेन संबन्धाभावः	१०-११
५) शब्दार्थयोः स्वाभाविकसम्बन्धे प्रमाणाभावः	११
९. लीलावतीकारमतम्	११-१२
१०. न्यायमञ्जर्यां शब्दस्यानुमानेऽन्तर्भावखण्डनम्	१२-१८
१) पूर्वपक्षः	१२-१४
२) सिद्धान्तः	१४
३) विषयभेदात् सामग्रीभेदाच्च शब्दस्यानुमानात् पृथक्त्वम्	१४
४) शब्दानुमानयोः विषयभेदः	१४-१५
५) अर्थविशिष्टस्य शब्दस्य न साध्यत्वम्	१५
६) अर्थप्रत्यायनशक्तिविशिष्टत्वस्य न साध्यत्वम्	१५
७) शब्दानुमानयोः सामग्रीभेदः	१६-१७
८) आप्तोक्तत्वहेतुजन्यत्वात् शाब्दस्यानुमानत्वमिति शङ्कायाः निरासः	१७
९) शब्दः विवक्षायां प्रमाणं, न त्वर्थे इति मतस्य निरासः	१७-१८
११. न्यायभूषणे शब्दस्यानुमानत्वनिरासः	१८-१९
१२. उदयनाचार्येण शब्दस्यानुमानत्वनिरसनप्रकारः	१९-२९

१. कुसुमाञ्जलौ वैशेषिकमतनिरासः १९-२४

१) कुसुमाञ्जलौ अनूदितं वैशेषिकमतम् १९-२१

२) वैशेषिकमतनिरासः, पदार्थपक्षकानुमानखण्डनम् २१-२२

३) पदपक्षकानुमानखण्डनम् २२

४) हेतुघटकाकाङ्क्षाविचारः २२

५) विशेषणविशेष्यभावस्य आकाङ्क्षात्वनिरासः २२

६) अविनाभावस्य आकाङ्क्षात्वनिरासः २२-२३

७) जिज्ञासायाः आकाङ्क्षात्वनिरासः २३

८) जिज्ञासायोग्यतायाः आकाङ्क्षात्वम् २३-२४

९) आकाङ्क्षायाः सत्तया शाब्दधीहेतुत्वम् २४

२. लौकिकशब्दस्यानुमानान्तर्भाववादिप्राभाकरमतनिरासः २५-२९

१) प्राभाकरमतानुवादः २५-२६

२) प्राभाकरमतखण्डनम् २६

३) आप्तोक्तत्वनिश्चयस्य शाब्दबोधं प्रत्यकारणत्वम् २६-२७

४) शाब्दबोधं प्रति अनाप्तोक्तत्वज्ञानाभावस्य अकारणत्वम् २७-२८

५) लौकिकशब्दस्येव वेदस्याप्यनुवादकत्वापादनम् २८-२९

१३. तत्त्वचिन्तामण्यनुसारेण शब्दस्यानुमानगतार्थतानिरसनम् २९-३५

१) आदौ शब्दस्य प्रमितिकरणत्वस्थापनम् २९-३०

२) शाब्दत्वरूपविलक्षणजातिसाधनम् ३०

३) शाब्दत्वस्य मानसत्वव्याप्यत्वमिति शङ्का ३०-३१

४) शाब्दत्वस्य मानसत्वव्याप्यत्वखण्डनम् ३१-३२

५) लीलावतीकारोक्तपदपक्षकानुमानोपन्यासः ३२-३३

६) अनुमानेन संसर्गज्ञानसाधने संसर्गस्यापि सिद्धिः ३३

७) ज्ञानज्ञानस्य ज्ञानविषयविषयकत्वम् ३४

८) भ्रमविषयकज्ञानस्य भ्रमत्वशङ्कासमाधानम् ३४

९) मणौ लीलावतीकारोक्तपदपक्षकसंसर्गानुमानदूषणम् ३५

१०) मणौ वैशेषिकोक्तपदार्थपक्षकसंसर्गानुमानोपन्यासः ३५

१) प्रथमहेतुशोधनम् ३६-३७

२) द्वितीयहेतुशोधनम् ३७

३) अवान्तरशङ्का, तत्परिहारश्च ३८-३९

४) योग्यतादेः प्रामाण्यप्रयोजकत्वम् ३९

११) मणौ वैशेषिकोक्तपदार्थपक्षकसंसर्गानुमानदूषणम् ३९-४१

१४. न्यायकौस्तुभोक्तरीत्या शब्दस्यानुमानातिरिक्तत्वम् ४१-४२

१५. नागेशोक्तरीत्या शब्दस्यानुमानातिरिक्तत्वम् ४२-४३

१६. नव्यनैयायिकरीत्या शाब्दप्रमितेः अनुमितिविलक्षणत्वं, शब्दस्य प्रमाणान्तरत्वं च ४३-४६

१) तत्र निष्कर्षः ४७

१७. शब्दस्य पृथक्प्रमाणत्वे शब्दशक्तिप्रकाशिकोक्तरीतिः ४७-५४

१) लिङ्गजन्यत्वेन शाब्दबुद्धेरनुमितित्वमिति शङ्काया निरासः ४८-४९

२) नव्यवैशेषिकमतम् ४९

३) तन्मतखण्डनम् ४९-५०

४) वाक्यार्थज्ञानस्यानुमितित्वाभावसमर्थनम् ५०-५१

५) जरन्मीमांसककृतं वैशेषिकमतदूषणम् ५१-५२

६) जरन्मीमांसकमतदूषणम् ५२

७) तात्पर्यनिश्चयाधीनसिद्धसाधनशङ्कायाः परिहारः ५३

८) तात्पर्यज्ञानस्य शाब्दबोधं प्रति अहेतुत्वम् ५३-५४

१८. मथुरानाथोक्तरीत्या अतिनव्यवैशेषिकमतनिरसनम् ५४-५७

१) अतिनव्यवैशेषिकमतानुवादः ५४-५६

२) उक्तातिनव्यवैशेषिकमतखण्डनम् ५६-५७

१९. मणौ वाक्यार्थबोधस्यानुमितिरूपत्ववादिजरन्मीमांसकमतम् ५७-६०

१) तन्मतखण्डनम् ५८-६०

२०. मणौ प्रकारान्तरेण प्राभाकरमतोपन्यास-तद्दूषणे ६०-७०

१) प्राभाकरमतोपन्यासः ६०-६६

१) तात्पर्यमेव शाब्दप्रमाप्रयोजकं, न तु आप्तोक्तत्वम् ६१-६२

२) भ्रमजनकदोषाभावः प्रमाप्रयोजक इति मतनिरासः ६२-६३

३) दोषाभावस्य शाब्दप्रमाप्रयोजकत्वनिरासः ६३

४) यथार्थतात्पर्यकत्वस्य शाब्दप्रमाप्रयोजकत्वम् ६३-६४

५) तात्पर्यस्य ज्ञातस्य शाब्दप्रमाप्रयोजकत्वम् ६४

६) तात्पर्यभ्रमस्य शाब्दभ्रमहेतुत्वम् ६४

७) वास्तवस्य तात्पर्यस्य शाब्दधीहेतुत्वाभावः ६५

८) तात्पर्यग्राहकस्य प्रकरणादेः शाब्दधीहेतुत्वाभावः ६५

९) न्यायगम्यस्य तात्पर्यस्य वेदजन्यशाब्दबोधहेतुत्वम् ६५

१०) पुरुषेच्छानियन्त्रितस्य तात्पर्यस्य लोके शाब्दधीहेतुत्वम् ६५-६६

११) यथार्थतात्पर्यनिश्चयानुमानप्रकारः ६६

२) उक्तप्राभाकरमतनिरासः ६७-७०
१) वेदे न्यायगम्यस्य तात्पर्यस्य शाब्दधीहेतुत्वनिरासः ६७
२) तर्कसंशययोः तात्पर्यनिर्णये उपयोगाभावः ६७-६८
३) वेदतुल्यं लौकिकवाक्यस्य प्रामाण्यम् ६८-६९
४) स्वरूपसतामेव भ्रमाद्यजन्यत्वादीनां शाब्दप्रमाहेतुत्वम् ६९-७०
२१. वैशेषिकैकदेशिमतनिरासः ७०-७३
१) तन्मतखण्डनम् ७०-७१
२) वैशेषिकैकदेश्युक्तेऽनुमाने उपाधिप्रदर्शनम् ७१-७२
३) शब्दस्यानुवादकत्वमिति मतस्य निराकरणम् ७२
४) निगमनम् ७२-७३
२२. पदार्थतात्पर्यग्रहस्यैव शाब्दधीहेतुत्वं, न तु वाक्यार्थतात्पर्यग्रहस्येति मतोपन्यासः ७३-७५
२३. मथुरानाथीये प्रदर्शितः अभिनववैशेषिकैकदेशिमतनिरासः ७५-७६
१) अभिनववैशेषिकैकदेशिमतानुवादः ७५-७६
२) तन्मतनिराकरणम् ७६
२४. शब्दप्रामाण्यविषये चित्सुखाचार्यकृतः आक्षेपः ७६-७८
१) चित्सुखाचार्यकृताक्षेपस्य समाधानम् ७८
२५. गुरुमतसारः ७८-७९
१) तन्मतनिरासः ७८-७९
२६. कणादमतनिराससारः ७९

२. शब्दलक्षणविचारः पृ. ८१-९८

१. न्यायसूत्रानुसारेण शब्दलक्षणम् ८१-८३
२. न्यायमञ्जर्युक्तं शब्दलक्षणम् ८३-८५
१) उपदेशशब्दार्थविचारः ८३-८५
३. न्यायभूषणोक्तं शब्दलक्षणम् ८५-८६
४. तात्पर्यटीकापरिशुद्धौ भूषणोक्तलक्षणदूषणम् ८६-८७
५. मण्युक्तं शब्दप्रमाणलक्षणम् ८७-८८
१) प्रयोगहेतुभूतेति विशेषणस्य प्रयोजनम् ८८
२) शब्दलक्षणस्य न्यायसूत्राल्लाभप्रकारः ८८-८९
३) माथुर्यां प्रयोगहेतुभूतेत्यस्य व्याख्यानम् ८९

४) शब्दलक्षणस्य मौनिश्लोकेऽव्याप्तिवारणम् ८९
५) रुचिदत्तीयं शब्दलक्षणस्य व्याख्यानम् ८९-९०
६. तर्कभाषायां शब्दलक्षणम् ९०-९१
७. तर्कसंग्रह-तद्व्याख्यानेषु शब्दलक्षणम् ९१-९३
८. शब्दशक्तिप्रकाशिकोक्तं शब्दलक्षणम् ९३
९. मीमांसाशास्त्रोक्तं शब्दप्रमाणलक्षणम् ९३-९४
१०. शास्त्रदीपिकायां शब्दलक्षणस्य विवरणम् ९४
११. वेदान्तपरिभाषोक्तं शब्दप्रमाणलक्षणम् ९४-९५
१२. द्वैतवाद्युक्तं शब्दलक्षणम् ९५
१३. न्यायपरिशुद्ध्युक्तं शब्दलक्षणम् ९५
१४. सांख्यदर्शनोक्तं शब्दलक्षणम् ९५-९६
१५. नागेशोक्तं शब्दप्रमाणलक्षणम् ९६
१६. खण्डनखण्डखाद्योक्तशब्दलक्षणदूषण-तत्परामर्शौ ९६-९७
१) खण्डनोक्तशब्दलक्षणदूषणानि ९६-९७
२) श्रीहर्षोक्तशब्दलक्षणदूषणविमर्शः ९७
१७. शब्दप्रामाण्यविषये चित्सुखोक्तदूषण-तत्परिहारौ ९८

३. वाक्य-वाक्यार्थस्वरूपविचारः पृ.९९-१३३

१. वाक्यविचारः ९९-१००
१) आख्यातशब्दो वाक्यम् १००
२) पदसंघातो वाक्यम् १००
३) संघातवर्तिनी जातिः वाक्यम् १०१
४) एकोऽनवयवः शब्दो वाक्यम् १०१
५) क्रमः वाक्यम् १०१-१०२
६) बुद्ध्यनुसंहतिः वाक्यम् १०२
७) आद्यं पदं वाक्यम् १०२
८) पृथक् सर्वं पदं वाक्यम् १०२-१०३
२. सखण्डवाक्यपक्षः अखण्डवाक्यपक्षश्च १०३-१०४
३. प्रतिभालक्षणम् १०४
४. क्रियायाः वाक्यार्थत्वम् १०५
५. पदार्थानां संसर्गस्य वाक्यार्थत्वम् १०५-१०६

६. विशेषरूपापन्नपदार्थस्यैव वाक्यार्थत्वम् १०६-१०७
७. प्रयोजनं वाक्यार्थः १०८-१०९
८. विध्यादीनां वाक्यार्थत्वपक्षाः १०९
९. विधिर्वाक्यार्थः १०९
१०. नियोगो वाक्यार्थः १०९-११०
११. भावना वाक्यार्थः ११०-१११
१२. विज्ञानवादिनां वाक्यार्थः १११-११२
१३. नैयायिकमते वाक्यार्थः ११३
१४. वाक्यवाक्यार्थयोः संबन्धः ११३-११४
१५. मीमांसकमते वाक्यस्वरूपम् ११५
१६. नैयायिकमते वाक्यस्वरूपम् ११५
१७. वेदान्तिमते वाक्यस्वरूपम् ११५-११६
१८. सांख्यमते वाक्यस्वरूपम् ११६
१९. योगमते वाक्यस्वरूपम् ११६-११७
२०. वर्णानां पदरूपतापत्तौ पदानां वाक्यरूपतापत्तौ च न्यायमञ्जरी-प्रदर्शिताः विविधा मार्गाः ११७-१२१
१) एतत्पक्षे दोषाः ११८
२) पक्षान्तरोपन्यासः ११८
३) तन्निराकरणम् ११९
४) पक्षान्तरम् ११९
५) तन्निराकृतिः ११९-१२०
६) नैयायिकमते वर्णैः वाक्यार्थबोधक्रमनिरूपणम् १२०-१२१
२१. नैयायिकमतेन वाक्यार्थस्वरूपविचारः १२१-१२८
१) वाक्यार्थविषये सप्तपक्षाणामनुवादः १२१-१२२
२) वाक्यार्थविषये नैयायिकमतम् १२२
३) वाक्यार्थस्य सूत्रभाष्यकाराभ्यामनुक्तौ कारणम् १२२-१२३
४) पदार्थस्य वाक्यार्थत्वे आक्षेपः १२३
५) अनेकः पदार्थो वाक्यार्थ इति समाधानम् १२३
६) पदार्थानां गुणप्रधानभावानियमः १२४
७) प्रधानभूतपदार्थो वाक्यार्थः १२४
८) बौद्धमतपरामर्शः १२४-१२५
९) व्यवच्छेदस्य वाक्यार्थत्वनिरासः १२५

१०) क्रियाया: वाक्यार्थत्वपक्ष: १२५-१२६
११) कर्तुरपि क्रियाशेषत्वमेव १२६
१२) कर्तुरप्राधान्येऽपि प्रवृत्त्युपपत्ति: १२६
१३) क्रियाप्राधान्यखण्डनम् १२६-१२७
१४) फलस्य वाक्यार्थत्वम् १२७
१५) उद्योगस्य वाक्यार्थत्वपक्ष: १२७-१२८
१६) प्रतिभाया: वाक्यार्थत्वपक्ष: १२८
२२. लघुमञ्जूषायां वाक्यशक्तिविचार: १२९
२३. मीमांसाकौस्तुभे वाक्यशक्तिमतानुवाद:, तत्खण्डनं च १२९-१३१
१) वाक्यशक्तिमतानुवाद: १२९-१३०
२) वाक्यशक्तिखण्डनम् १३०-१३१
२४. शब्दवृत्त्यगम्यस्य वाक्यार्थस्य कथं शाब्दत्वम्? इति शङ्का-समाधाने १३२-१३३
१) न्यायरत्नाकरे तद्विचार: १३२
२) खण्डदेवमतम् १३२-१३३

४. स्फोटविचार: पृ.१३५-१९१

१. वाक्यार्थबोधनिमित्तानि १३५-१३६
१) प्राभाकरमते वाक्यार्थबोधनिमित्तम् १३५-१३६
२) भाट्टमते वाक्यार्थबोधनिमित्तम् १३६
२. न्यायमञ्जर्यां स्फोटवाद: १३६-१४९
१) स्फोटवादोपक्षेप: १३७
२) स्फोटवादनिराकरणस्य उद्देश्यम् १३७
३) वर्णा एवार्थप्रत्यायका इति प्रतिज्ञा १३७
४) अनित्यानां वर्णानामर्थप्रत्यायकत्वाक्षेप: १३७-१३८
५) वर्णविषयकबुद्धीनामर्थप्रत्यायकत्वासंभव: १३८
६) अन्तिमवर्णस्याप्यर्थप्रत्यायकत्वासंभव: १३८-१३९
७) व्युत्पत्तेरर्थप्रत्यायकत्वमित्याक्षेप: १३९
८) तस्य समाधानम् १३९
९) स्फोटवाद: १४०
१०) स्फोटस्य शब्दात्मकत्वम् १४०

११) वर्णानां स्फोटव्यञ्जकत्वपक्षः	१४०-१४१
१२) ध्वनीनां स्फोटव्यञ्जकत्वमिति पक्षः	१४१
१३) स्फोटस्य प्रत्यक्षत्वसाधनम्	१४१
१४) वाक्यस्याखण्डता	१४२
१५) वाक्यार्थस्याखण्डता	१४२
१६) प्रकृतिप्रत्ययविभागस्य काल्पनिकत्वम्	१४२-१४३
१७) वाक्तत्त्वविभागः	१४३-१४४
१८) स्फोटवादनिगमनम्	१४४
१९) स्फोटवादनिराकरणम्	१४४
२०) वर्णानामर्थप्रत्यायकत्वोपपादनम्	१४४-१४५
२१) वर्णसंस्कारस्यार्थप्रतीतिहेतुत्वोपपादनम्	१४५
२२) वर्णैः स्फोटाभिव्यक्तिरिति मतनिरासः	१४५
२३) स्फोटस्य ध्वनिव्यङ्ग्यत्वनिरासः	१४५-१४६
२४) वर्णक्रमस्य स्फोटत्वनिरासः	१४६
२५) शब्दादर्थं प्रतिपद्यामहे इति व्यवहारस्योपपत्तिः	१४६
२६) अर्थप्रतीतिहेतुत्वस्य शब्दलक्षणत्वखण्डनम्	१४६
२७) अन्योन्याश्रयपरिहारः	१४७
२८) पदवाक्ययोः सावयवत्वम्	१४७
२९) वाक्यजन्यव्युत्पत्तेः पदार्थपर्यन्तत्वम्	१४७
३०) पदस्य सत्यता	१४७
३१) वर्णानां सावयवत्वप्रसङ्गनिरासः	१४७-१४८
३२) वाक्यवाक्यार्थयोः सावयवत्वम्	१४८
३३) अश्वकर्णदृष्टान्तपरिशीलनम्	१४८
३४) पाणिनिव्याकरणस्यानुसरणीयता	१४८-१४९
३५) असत्यात् सत्यप्रतिपत्तिनिराकरणम्	१४९
३. तत्त्वबिन्दुग्रन्थात् स्फोटवादसंग्रहः	१४९-१५८
१) अनुभवबलात् स्फोटस्य वाक्यार्थधीहेतुत्वमिति पक्षस्य निरासः	१४९-१५१
२) अतिरिक्तस्फोटसाधनम्	१५१
३) अर्थापत्त्या स्फोटस्यार्थधीहेतुत्वमिति पक्षः	१५२-१५३
४) वर्णवादिनां सिद्धान्तान्तरस्य दूषणम्	१५३
५) स्फोटखण्डनम्	१५४-१५६

६) अन्त्यवर्णविज्ञानं वाक्यार्थधीहेतुः इति मतस्य निरासः १५७-१५८
४. शाबरभाष्यानुसारेण पदवाक्यस्वरूपं, स्फोटपरामर्शश्च १५८-१६०
५. श्लोकवार्त्तिकानुसारेण स्फोटवादनिरासः १६०-१६४
१) स्फोटनिराकरणस्य प्रयोजनम् १६४
६. प्रकरणपञ्चिकायां स्फोटवादः १६४
१) वर्णानामेव शब्दत्वम् १६४
२) वर्णातिरिक्तं पदमित्याक्षेपः १६४-१६५
३) वर्णानां वाचकत्वेऽनुपपत्तिः १६५
४) स्फोटनिरासः १६५-१६६
७. न्यायरत्नमालायां स्फोटवादः १६६-१६९
१) स्फोटवादानुवादः १६६-१६७
२) वर्णस्मरणानाम् अर्थावगतिहेतुत्वे आक्षेपः १६७-१६८
३) पूर्वोक्ताक्षेपसमाधानपूर्वकं स्फोटनिरासः १६८
४) वाक्यार्थावगतिप्रकारः १६९
८. शांकरब्रह्मसूत्रभाष्ये स्फोटवादः १६९-१७२
१) स्फोटवादोपक्षेपः १६९
२) स्फोटवादनिरासः १७०-१७२
९. भामतीस्था स्फोटवादरीतिः १७२-१७७
१) स्फोटवादोपक्षेपः १७२-१७४
२) स्फोटनिरासः १७४-१७७
१०. श्रीभाष्यरीत्या स्फोटवादपर्यालोचनम् १७७
११. श्रुतप्रकाशिकायां स्फोटवादः १७७-१७९
१) स्फोटवादानुवादः १७७-१७८
२) स्फोटवादनिरासः १७८-१७९
१२. द्वैतवेदान्तानुसारेण स्फोटखण्डनम् १७९-१८२
१) पूर्वपक्षः १८०
२) सिद्धान्तः १८०-१८१
३) वर्णमालायाः वाक्यार्थवाचकत्वनिरासः १८१
४) वाक्यान्त्यवर्णस्य वाचकत्वनिरासः १८२
१३. नागेशरीत्या अष्टविधस्फोटनिरूपणम् १८२-१९१
१) व्यस्ताव्यस्तविकल्पेन वर्णानामर्थप्रत्यायकत्वाभावः १८२-१८३

२) पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितस्य अन्त्यवर्णस्यार्थ-प्रत्यायकत्वमिति पक्षस्य निरासः १८३-१८४
३) अन्यथानुपपत्त्या स्फोटस्यार्थप्रत्यायकत्वम् १८४
४) स्फोटसद्भावे महाभाष्यप्रामाण्यम् १८४-१८५
५) स्फोटस्य प्रणवब्रह्मरूपता १८५
६) विवर्तवादावलम्बनेन स्फोटप्रक्रिया १८५-१८६
७) परापश्यन्त्यादिविभागः १८६-१८७
८) स्फोटस्य विभुत्वं नित्यत्वं च १८७
९) स्फोटस्याष्टविधत्वम् १८७-१८८
१०) वर्णस्फोटस्वरूपम् १८८-१८९
११) वाक्यस्फोटस्वरूपम् १८९
१२) जातिस्फोटस्वरूपम् १८९-१९१

५. वाक्यार्थबोधनिमित्तविचारः पृ.१९३-२०७

१. तत्त्वबिन्दौ स्मृतिदर्पणारूढा वर्णमालैव वाक्यार्थधीहेतुः इति मतम्, तन्निरासश्च १९३-१९४
२. शाबरभाष्ये वाक्यार्थबोधे निमित्तविचारः १९४-१९७
१) आक्षेपः १९४-१९५
२) समाधानम् १९६
३) वाक्यशक्त्या वाक्यार्थबोध इति शङ्कायाः निरासः १९६-१९७
३. श्लोकवार्त्तिके वाक्यार्थबोधनिमित्तविचारः १९७-२०७
१) पूर्वपक्षः १९७-२००
२) सिद्धान्तः २०१-२०२
३) निर्भागौ वाक्यवाक्यार्थाविति मतस्य निरासः २०२-२०५
४) सभागस्य वाक्यस्य वाक्यार्थवाचकत्वमिति मतस्य निरासः २०५
५) वाक्यार्थस्य तात्पर्यवृत्त्या पदार्थगम्यत्वम् २०५-२०६
६) वाक्यवाक्यार्थयोर्निर्भागत्वनिरासस्य फलम् २०६-२०७

६. अन्विताभिधानवाद-अभिहितान्वयवादौ पृ.२०९-३२७

१. प्रकरणपञ्चिकानुसारेण अन्विताभिधानवादाभिहितान्वयवाद-समीक्षा २०९-२२१

१) अन्विताभिधानानुपपत्तिशङ्का २१०
२) उक्तानुपपत्तिशङ्कानिराकरणम् २१०
३) तत्र शङ्का २११
४) आकाङ्क्षादीनामुपलक्षणता २११
५) आकाङ्क्षादिस्वरूपम् २११-२१२
६) अभिहितान्वयेऽप्याकाङ्क्षादीनामुपलक्षणत्वस्यावश्यकता २१३
७) प्रमाणान्तरावगतपदार्थानामन्वयबोधकत्वनिरासः २१३-२१४
८) अन्विताभिधाने शक्तिकल्पनलाघवम् २१४
९) वाक्यार्थविषये नूतनं मतम् २१४-२१५
१०) भाट्टमतम् २१५-२१६
११) वाक्यार्थे लक्षणापक्षस्य दूषणम् २१६-२१७
१२) पदानां पदार्थस्वरूपाभिधायकत्वानुपपत्तिः २१७
१३) पदानां पदार्थाभिधायकत्वे शक्तित्रयम् २१७-२१८
१४) वाक्ये एकमेव पदमन्विताभिधायकम् इति मतस्य निरासः २१९
१५) लाक्षणिकपदानां नान्विताभिधायिता २१९-२२०
१६) सामान्यान्विताभिधानवाद-तत्खण्डने २२०-२२१
२. अन्विताभिधानवादस्य साधकयुक्तयः २२१-२२३
३. अस्मिन्मते बाधयुक्तीनां समाधानप्रकारः २२३-२२९
४. न्यायरत्नमालानुसारेण अन्विताभिधानवादपरिशीलनपूर्वकमभिहितान्वयवादोपस्थापनम् २२९-२३९
१) अन्विताभिधानवादः २२९
२) पदानामन्विते शक्तिग्रहः २२९-२३०
३) अन्वितानामनन्तानामेकपदाभिधेयत्वनिरूपणम् २३०
४) वाक्यशक्तिवादनिराकरणम् २३०
५) स्वरूपमात्राभिधायकत्वे लाघवमिति शङ्कायाः समाधानम् २३०-२३१
६) अन्विताभिधानपक्षे वाक्यार्थस्य शाब्दत्वम् २३१
७) अन्विताभिधानपक्षे अन्योन्याश्रयपरिहारः २३१
८) अन्विताभिधानखण्डनम् २३२
९) अभिहितान्वयपक्षे एकवाक्यत्वोपपादनम् २३२
१०) सामान्यस्य पदार्थत्वं, विशेषस्य वाक्यार्थत्वम् २३३

११) उभयोः विशेषः २३३

१२) एकवाक्यतायाः नियतैकान्वयबोधाय आवश्यकता २३४

१३) पदार्थानां वाक्यार्थावगमकत्वे युक्त्यन्तरप्रदर्शनम् २३४-२३५

१४) दीर्घतमेषु वाक्येषु पदार्थानामेव वाक्यार्थबोधे सामर्थ्यम् २३५

१५) तात्पर्यवृत्त्या पदानामन्वितप्रतिपादकत्वमित्याक्षेपस्य समाधानम् २३५

१६) पदानां पदार्थस्मारकत्वनिरूपणम् २३५-२३६

१७) न पदानां पदार्थस्मारकत्वमिति मतस्योपन्यासः २३६

१८) तन्मतनिरासपूर्वकं पदस्याभिधायकत्वनिरूपणम् २३६-२३७

१९) अन्विताभिधाने दूषणान्तरम् २३७

२०) सिद्धार्थस्थले अन्विताभिधानासंभवः २३७-२३८

२१) अन्विताभिधानवादे कल्पनागौरवम् २३८

२२) श्रुतार्थापत्तेः शब्दगोचरत्वम् २३८

२३) अन्विताभिधाने शक्तिकल्पनागौरवम् २३८-२३९

५. न्यायरत्नमालायां कथिताः अभिहितान्वयवादस्य साधकयुक्तयः २३९-२४१

६. अभिहितान्वयपक्षे बाधकयुक्तीनां समाधानम् २४१-२४४

७. मीमांसातिरिक्तदर्शनेषु वादद्वयसरणिः, तत्र न्यायमञ्जर्याम् अभिहितान्वयवादः २४४-२५४

१) अभिहितान्वयवादस्य युक्तत्वम् २४५

२) वृद्धव्यवहारेषु व्युत्पत्तेः पदपर्यन्तत्वम् २४५

३) अन्विताभिधानवादे पदान्तरोच्चारणवैयर्थ्यम् २४५-२४६

४) वाक्यार्थस्य पदार्थगम्यत्वमेव श्रेयः २४६-२४७

५) अन्विताभिधानवादः २४७

६) वाक्यस्वरूपम् २४७

७) पदान्तरावैयर्थ्यम् २४८

८) वाक्यार्थप्रतीतेः पदसंघातकार्यत्वम् २४८

९) प्रतिवाक्यं व्युत्पत्तेर्नापेक्षा २४९

१०) पदान्तरोच्चारणसाफल्यम् २४९

११) वाक्यार्थबुद्धेः शाब्दत्वोपपादनम् २४९-२५०

१२) अन्विताभिधानवादखण्डनम् २५०

१३) व्युत्पत्तेः पदार्थपर्यन्तत्वम् २५०-२५१

१४) संसर्गांशे न अभिधात्री शक्तिः २५१

१५) अभिहितान्वयवादः २५२
१६) तत्खण्डनम् २५२
१७) तात्पर्यशक्त्या वाक्यार्थप्रत्यय इति स्वमतम् २५२
१८) अन्वीयमानाभिधानम्, अभिधीयमानान्वयश्चेति पक्षनिरासः २५२-२५३
१९) सामान्येनान्विताभिधानम्, विशेषतश्चाभिहितान्वय इति मतम्, तन्निरासश्च २५३
२०) जयन्तभट्टस्य स्वमतम् २५३-२५४
२१) संहत्य पदानामर्थप्रत्यायकत्वम् २५४
८. चित्सुखाचार्येण संगृहीतः वाचस्पतिमतः अभिहितान्वयवादः २५५-२६२
१) अभिहितान्वयवादे आक्षेपः २५६-२५८
२) अभिहितान्वयवादिसमाधानम् २५८-२५९
३) अभिहितान्वये दोषशङ्कापरिहारौ २५९-२६०
४) लक्षणालक्षणानुपपत्तिशङ्का, तत्समाधानं च २६०-२६२
९. उदयनाचार्यसंमतः अभिहितान्वयवादः २६२-२६८
१) अन्विताभिधानखण्डनम् २६२-२६३
२) अन्विते पदानां शक्तिः इति आक्षेपः २६३-२६४
३) अन्वितशक्तिपक्षे वाक्यभेदापत्तिपरिहारः २६४
४) अन्वितशक्तिवादखण्डनम् २६५
५) अर्थापत्तेः अन्वयशक्तौ प्रमाणत्वाभावः २६५
६) पदशक्त्यैव संसर्गग्रह इत्याक्षेपः २६५
७) तस्य आक्षेपस्य समाधानम् २६५-२६६
८) काव्यरचनायां पदशक्तिं विनापि संसर्गग्रहस्य हेतुत्वम् २६६
९) अन्विताभिधानपक्षे शक्तिकल्पनाधिक्यम् २६६-२६८
१०) उदयनमतम् २६८
१०. अद्वैतवेदान्ते अन्विताभिधान-अभिहितान्वयवादविचारः २६८-२७२
१) भामती-कल्पतरु-परिमलेषु वादद्वयम् २७०-२७२
११. विशिष्टाद्वैतानुसारेण अन्विताभिधानवादः २७२-२७३
१२. न्यायपरिशुद्धौ अभिहितान्वयवादः २७४-२७७
१) अभिहितान्वयवाददूषणम् २७६-२७७
२) अभिहितान्वयपक्षसमर्थनम् २७७
१३. द्वैतवेदान्तरीत्या अन्विताभिधानाभिहितान्वयवादौ २७७-२८०
१) अभिहितान्वयवादनिरासः २८०

१४. मणिग्रन्थरीत्या अन्विताभिधानवादपरिशीलनम् २८२-३०१

१) पूर्वपक्षे कार्यान्विते पदानां शक्तिरिति प्रतिज्ञा २८२

२) पदज्ञानस्य कार्यत्वान्वितशाब्दहेतुत्वं न संभवतीति शङ्कासमाधानम् २८२-२८३

३) शब्दस्य प्रवृत्तिहेतुत्वं नेति निरूपणम् २८३

४) पदम् अन्वितबुद्धिं प्रत्येव कारणं न तु कार्यान्वितबुद्धिं प्रति इति अवान्तरशङ्का २८३-२८४

५) उक्तावान्तरशङ्कासमाधानम् २८५

६) अन्यलभ्यत्वात् कार्यत्वांशस्य न पदशक्यतेति शङ्का-समाधानम् २८५-२८६

७) लिङादीनामपि कार्यान्विते शक्त्युपपादनम् २८६-२८७

८) सिद्धार्थेऽपि शक्तिः संभवतीति शङ्कायाः समाधानम् २८७

९) प्रसिद्धार्थकपदसमभिव्याहारस्थलेऽपि कार्यान्विते शक्तिः इति निरूपणम् २८७-२८८

१०) पूर्वपक्षस्य निगमनम् २८८

११) सिद्धान्तः (कार्यान्वितशक्तिवादखण्डनम्) २८८-२८९

१२) सामान्यकार्यकारणभावस्यानुपयोगः २९०

१३) अन्विते पदानां शक्तिरिति निरूपणम् २९०-२९२

१४) कार्यत्वस्यान्यलभ्यत्वात् न पदशक्यता २९२-२९३

१५) सिद्धार्थबोधकत्वं पदानामिति निरूपणम् २९३-२९४

१६) इतरान्विते शक्तिः इति मतस्य निरासः २९४-२९५

१७) अन्वयांशस्य त्यागो नोचित इति शङ्कायाः समाधानम् २९५-२९६

१८) अन्वये शक्तिः इति आक्षेपः २९६-२९७

१९) आक्षेपसमाधानम् २९७-२९८

२०) अन्वयसामान्ये पदानां शक्तिः इति शङ्कायाः समाधानम् २९८-२९९

२१) पदार्थस्मरणमेव करणं, न तु पदज्ञानमित्याक्षेपस्य समाधानम् २९९

२२) काव्यस्थले अनुभवकरणस्य कथनम् २९९

२३) पदानां पदार्थस्मरणे उपक्षयः, पदार्थस्मरणमेवान्वयबोध-कारणमिति शङ्कायाः परिहारः २९९-३००

२४) पदज्ञानवत् पदार्थस्मरणस्यापि हेतुत्वमिति शङ्कायाः समाधानम् ३००-३०१

२५) मणिग्रन्थोक्तस्य विचारस्य सारांशः ३०१
१५. गदाधरभट्टाचार्यैः शक्तिवादे प्रदर्शितः प्रकारः ३०१-३०२
१६. अद्वैतसिद्धिव्याख्यायां लघुचन्द्रिकायां ब्रह्मानन्दसरस्वतीभि-
रुक्ताः अभिहितान्वयान्विताभिधानवादयोः विशेषाः ३०२-३२७
१) तद्व्याख्यायां लघुचन्द्रिकायामुक्ताः विशेषाः ३०२
२) अभिहितान्वयवादे पक्षत्रयम् ३०३-३०४
३) प्रथमपक्षस्य विस्तरः ३०४
४) द्वितीयतृतीयपक्षयोः विस्तरः ३०४
५) प्रत्ययार्थस्य विशेष्यत्वम् ३०४-३०५
६) प्रथमपक्षे पदार्थबोधस्योपयोगः ३०५-३०६
७) प्रथमपक्षे गौरवशङ्कानिरासः ३०६-३०७
८) आसत्तेः पृथग्घेतुत्वे मूलम् ३०७-३०८
९) प्रथमपक्षे पदजन्यपदार्थानुभवस्य आसत्तिविधया हेतुत्वम् ३०८-३०९
१०) पदार्थज्ञानस्य विशेषणज्ञानविधया हेतुत्वम् ३०९
११) प्रथमपक्षे शब्दस्य पृथक्प्रमाणत्वोपपादनम् ३०९-३१०
१२) शब्दजन्यज्ञानस्य निर्विकल्पकता ३१०
१३) प्राथमिकस्य अनुमित्यादेः निर्विकल्पकता ३१०
१४) द्वितीयतृतीयपक्षोपपादनम्, तत्र प्रथमपक्षखण्डनम् ३११-३१२
१५) द्वितीयतृतीयपक्षयोः पदानां संसर्गानुभावकत्वोपपादनम् ३१२
१६) द्वितीयतृतीयपक्षयोः व्यवहारात् शक्तिग्रहप्रकारः ३१३
१७) एकवाक्यत्वप्रकारकज्ञानस्य शाब्दधीहेतुत्वम् ३१३-३१४
१८) विशेषतो हेतुत्वविचारः ३१४
१९) प्रथमपक्षसमर्थकपार्थसारथिमिश्रादिमतनिरासपूर्वकम्
अन्वितशक्तिवादोपपादनम् ३१४-३१५
२०) अन्वितघटत्वं घटपदशक्यमित्युक्तेः आशयविवरणम् ३१५-३१६
२१) तार्किकमते घटादिपदकार्यतावच्छेदकम् ३१६
२२) मीमांसकमते घटादिपदकार्यतावच्छेदकम् ३१६
२३) अन्वितविषयकशाब्दं प्रति पदज्ञानं न कारणमित्याक्षेपः ३१७
२४) उक्ताक्षेपस्य समाधानम् ३१७
२५) अन्वितज्ञानपदज्ञानयोः प्रकारान्तरेण कार्यकारणभावः ३१७-३१८
२६) संसर्गस्य लक्षणया बोधः ३१८-३१९
२७) लक्षणालक्षणविरहात् संसर्गे न लक्षणेत्याक्षेपः ३१९

२८) उक्ताक्षेपस्य समाधानम् ३१९-३२०
२९) अन्विताभिधानवादे संसर्गस्य शक्यत्वम् ३२०
३०) सम्बन्धांशे कुब्जशक्तिरिति मतम् ३२१
३१) पदाभ्यां स्मृतिसमबोधः ३२२
३२) स्मृतिसमबोधस्य खण्डनम् ३२३-३२४
३३) आद्यपक्षे कुब्जशक्तिः, द्वितीयपक्षे लक्षणेति निरूपणम् ३२४-३२५
३४) लक्षणायाः ज्ञातायाः एव शाब्दधीहेतुत्वम् ३२५-३२६
३५) पदार्थ इव वाक्यार्थेऽपि व्युत्पत्तिग्रहस्य हेतुत्वम् ३२६
३६) लक्षणाज्ञानं शाब्दधीहेतुः इति निगमनम् ३२७

७. वाक्यार्थबोधे मुख्यविशेष्यविचारः पृ.३२९-३७५

१. न्यायमञ्जर्यां शाब्दबोधे मुख्यविशेष्यनिरूपणम् ३२९-३४८
१) मुख्यविशेष्यविचारः, तत्र नाना मतानि ३२९-३३०
२) ज्ञानस्यैव वाक्यार्थत्वमिति पक्षः ३३०-३३१
३) उक्तबौद्धमतनिरासः ३३१
४) व्यवच्छेदस्य वाक्यार्थत्वनिरसनम् ३३१
५) क्रियायाः वाक्यमुख्यार्थत्वपक्षः ३३२
६) सर्वेषां क्रियापारतन्त्र्ये निदर्शनानि ३३२
७) कर्तुरपि क्रियाशेषत्वमेव ३३२
८) फलस्यैव प्राधान्यमिति जयन्तभट्टमतम् ३३२-३३४
९) स्वर्गकामादिपदानामन्वयक्रमः ३३४
१०) अधिकारिणः कर्तुश्च विशेषः ३३४-३३५
११) क्रियायाः अपि फलशेषत्वमेव ३३५
१२) फलस्यापि वाक्यार्थत्वासंभवः इति पूर्वपक्षः ३३५
१३) पुरुषस्यापि वाक्यार्थत्वासंभवः ३३५-३३६
१४) भावनायाः वाक्यार्थत्वम् ३३६
१५) भावना न क्रियारूपा ३३७-३३८
१६) आख्यातार्थवस्तुस्वरूपे पक्षभेदाः ३३८
१७) धात्वर्थानुगतं व्यापारसामान्यं भावना ३३८
१८) भावनायाः अंशत्रयम् ३३८
१९) करणाकाङ्क्षाविवरणम् ३३९

२०) इतिकर्तव्यताकाङ्क्षाविवरणम् ३३९
२१) विधिप्रत्ययस्य नावश्यकता इति शङ्का ३३९-३४०
२२) विधिस्वरूपे शङ्का ३४०
२३) समाधानम् ३४०-३४१
२४) प्रवर्तकस्वरूपम् ३४१
२५) श्रेयस्साधनत्वस्य प्रवर्तकत्वम् ३४१
२६) तत्खण्डनम्, विधिप्रत्ययस्य प्रवर्तकत्वं च ३४१-३४२
२७) लिङादेः शब्दस्य प्रवर्तकत्वप्रकारः ३४२
२८) भावनाद्वैविध्यम् ३४२
२९) शाब्दभावनायाः अंशत्रयम् ३४२
३०) विधेः (शाब्दभावनायाः) वाक्यार्थेऽन्वयः ३४२-३४३
३१) विधेः प्रेरकत्वप्रकारः, अन्वयप्रकारश्च ३४३-३४४
३२) भावनायाः पूर्णं स्वरूपम् ३४४
३३) शाब्दभावनायाः वाक्यार्थत्वविचारः ३४४-३४५
३४) भावनाद्वयसद्भावे प्रमाणाभावः ३४५
३५) नियोगवाक्यार्थत्वविचारः ३४५
३६) णिजर्थ-लिङर्थयोर्वैलक्षण्यम् ३४५-३४६
३७) नियोगे व्युत्पत्तिप्रदर्शनम् ३४६
३८) प्रेरकत्व-कार्यत्वयोरविरोधः ३४६-३४७
३९) नियोगवाक्यार्थत्वनिरासः ३४७-३४८

२. धात्वर्थक्रियाप्राधान्येन बोधः ३४८-३५१

३. नैयायिकमतम् ३५१-३६३

१) व्युत्पत्तिवादे गदाधरभट्टाचार्यैः प्रदर्शितं प्रथमान्तार्थमुख्य-विशेष्यत्वम् ३५१
२) अत्र प्रकाशकाराशयः ३५१-३५४
३) शब्दशक्तिप्रकाशिकायां मुख्यविशेष्यविचारः ३५४-३५५
४) न्यायकौस्तुभे भावप्रधानमाख्यातमिति निरुक्तवचनतात्पर्य-प्रदर्शनम् ३५५
५) गूढार्थतत्त्वालोके विशेषाः ३५५-३५७
६) मीमांसकमतानुवादः ३५७-३५८
७) उक्तमीमांसकमतपरिशीलनम् ३५८-३६३

४. शाब्दतरङ्गिण्यां विशेषाः ३६४-३६५

१) तत्र मतत्रयरीत्या एकस्मिन्वाक्ये शाब्दबोधः ३६४

१) वैयाकरणमते ३६४
२) मीमांसकमते ३६५
३) नैयायिकमते ३६५
५. शाब्दबोधे मुख्यविशेष्यविचारः ३६६-३७४
१) वैयाकरणमतम् ३६७-३६९
२) मीमांसकमतम् ३६९-३७०
३) नैयायिकमतम् ३७०-३७४
६. नूतनमतविचारः ३७४-३७५

८. एकवाक्य-वाक्यभेदादिविचारः पृ.३७७-४०२

१. एकवाक्यत्वविचारः ३७७-३[illegible]
१. न्यायकोशे वाक्यादिलक्षणम् ३७७-३७९
२. मीमांसाकोशे एकवाक्यादिलक्षणम् ३७९-३८१
३. मीमांसाकोशे वाक्यार्थस्वरूपम् ३८१-३८३
४. एकवाक्यत्वलक्षणाधिकरणम् ३८३-३८४
५. वाक्यभेदाधिकरणम् ३८४-३८६
६. अनुषङ्गाधिकरणम् ३८६-३८७
७. व्यवेतानुषङ्गाधिकरणम् ३८७-३८८
८. शंकरमिश्रकृते मीमांसाबालप्रकाशे विशेषाः ३८८
९. वेदान्तपरिभाषायां विशेषाः ३८८-३९१
२. वाक्यभेदविचारः ३९१-३९८
१. मीमांसाकोशे वाक्यभेदविचारः ३९२
२. अन्यान्यपि नानाविधानि वैरूप्याणि ३९३-३९८
३. वाक्यशेषः ३९८
४. अध्याहारादिकम् ३९९-४०२
१. विपरिणामोदाहरणम् ३९९
२. व्यवहितकल्पना ४००
१. सूत्रव्यवधानस्योदाहरणम् ४००
२. सूत्रान्यथाकरणम् ४००-४०१
३. वाक्यभेदः ४०१
४. गुणकल्पना ४०१-४०२

९. आकाङ्क्षाविचारः पृ.४०३-४३३

१. तत्त्वबिन्द्वनुसारेण आकाङ्क्षानिरूपणम् ४०३

२. प्रकरणपञ्चिकायाम् आकाङ्क्षानिरूपणप्रकारः ४०४-४०७

  १. पञ्चिकाकारमतम् ४०५-४०६

  २. आकाङ्क्षाविषये पञ्चिकाकारमतसंग्रहः ४०६

३. आकाङ्क्षाविषये उदयनाचार्यमतम् ४०७

४. मणिग्रन्थस्थः आकाङ्क्षाविचारः ४०७-४१९

  १. अविनाभावस्य आकाङ्क्षात्वनिरासः ४०७

  २. समभिव्याहृतपदस्मारितपदार्थजिज्ञासायाः आकाङ्क्षात्वनिरासः ४०७-४०८

  ३. जिज्ञासायोग्यतायाः आकाङ्क्षात्वनिरासः ४०८-४१०

  ४. सौन्दडीयम् आकाङ्क्षालक्षणम् ४१०-४११

  ५. सौन्दडीयलक्षणदूषणम् ४११

  ६. आकाङ्क्षायाः सिद्धान्तरीत्या लक्षणम् ४१२-४१३

  ७. गौणलाक्षणिकपदघटितवाक्ये आकाङ्क्षायाः उपपादनम् ४१३-४१४

  ८. प्रकाशकृद्विवृतमाकाङ्क्षालक्षणम् ४१४

  ९. तत्र आक्षेप-समाधाने ४१४-४१६

  १०. अजनितान्वयबोधत्वस्य आकाङ्क्षालक्षणे प्रवेशाभावः ४१६

  ११. तत्र मतान्तरम् ४१६-४१७

  १२. आकाङ्क्षाज्ञानस्य कारणत्वमेव नास्तीति नव्यमतम् ४१७

  १३. तदुभयमतखण्डनम् ४१७-४१८

  १४. आकाङ्क्षाविषये रुचिदत्तमतम् ४१८-४१९

५. आकाङ्क्षास्वरूपे मुक्तावलीदिनकर्युक्तः निर्णयः ४१९-४२१

६. रामरुद्रभट्टमतम् ४२१

७. प्रभाकृन्निष्कर्षः ४२१

८. न्यायकौस्तुभोक्तरीत्या आकाङ्क्षाविचारः ४२३-४२५

  १. आकाङ्क्षाज्ञानस्य शाब्दधीहेतुतायामाक्षेपः ४२३

  २. तत्र समाधानम् ४२४

  ३. धात्वाख्यातयोरन्वयस्थले कार्यकारणभावनिरूपणम् ४२४-४२५

९. गदाधरभट्टाचार्यकृतनिष्कर्षः ४२५

१०. तर्कताण्डवोक्तिपरामर्शः ४२५-४२६

११. नागेशीयमाकाङ्क्षानिरूपणम् ४२६-४२८
१. नागेशमतपरिशीलनम् ४२८-४२९
१२. वेदान्तपरिभाषोक्तरीत्या आकाङ्क्षाविचारः ४२९-४३२
१. शिखामण्युक्तिपरिशीलनम् ४३२
१३. न्यायकोशे आकाङ्क्षाविचारः ४३२-४३३

१०. योग्यताविचारः पृ.४३५-४५२

१. प्रकरणपञ्चिकारीत्या योग्यतानिरूपणम् ४३५
२. मणिग्रन्थोक्तरीत्या योग्यतानिरूपणम् ४३५-४४३
१. तत्र सजातीयेऽन्वयदर्शनं योग्यता इति मतम्, तत्खण्डनं च ४३५-४३६
२. अनन्वयनिश्चयविरहो योग्यता इति मतखण्डनम् ४३७
३. अनन्वयव्याप्यधर्मशून्यत्वं योग्यता इति मतनिरासः ४३७-४३८
४. बाधकप्रमाणाभावो योग्यता इति मतखण्डनम् ४३८-४३९
५. एकपदार्थप्रतियोगिकसंसर्गाभावप्रकारकप्रमाविशेष्यत्वाभावो योग्यता इति मतनिरासः ४३९
६. बोधनीयसंसर्गाभावप्रमाविरहो योग्यता इति मतनिरासः ४३९-४४०
७. बाधकप्रमाविरहो योग्यता इति सिद्धान्तः ४४०-४४१
८. मणौ योग्यतायाः लक्षणान्तरम् ४४१-४४२
९. योग्यताज्ञानस्य शाब्दधीकारणत्वोपपादनम् ४४२-४४३
१०. मथुरानाथीयं विवेचनम् ४४३
३. विश्वनाथोक्तरीत्या योग्यताज्ञानस्य शाब्दधीहेतुत्वम् ४४३-४४४
४. माथुरीरीत्या अयोग्यतानिश्चयस्य प्रतिबन्धकत्वविमर्शः ४४४-४४५
१. मतान्तरेण योग्यताज्ञानस्य हेतुत्वाभावः, अयोग्यतानिश्चयस्य प्रतिबन्धकत्वाभावश्च ४४५-४४६
५. तर्कताण्डवोक्तरीतिः ४४६-४४७
६. वेदान्तपरिभाषोक्तं योग्यतालक्षणम् ४४७
७. नागेशोक्ता रीतिः ४४८-४५१
८. प्राभाकरमतसंवादि भर्तृहरिमतम् ४५१-४५२

११. आसत्तिविचारः पृ.४५३-४७१

१. मणिग्रन्थे आसत्तिनिरूपणम् ४५३-४६३

  १. अव्यवधानेन अन्वयप्रतियोग्युपस्थितिरिति मणिग्रन्थस्य केषांचिन्मतेन व्याख्यानम् ४५३-४५४

  २. तस्य खण्डनम् ४५४

  ३. मतान्तरेण व्याख्यानम् ४५५

  ४. नव्यमतम् ४५५

  ५. मथुरानाथीयं मणिव्याख्यानम् ४५५

  ६. मण्युक्तायामासत्तौ अन्योन्याश्रय-तत्परिहारौ ४५५-४५६

  ७. पदार्थोपस्थितीनां यौगपद्यसंपादनम् ४५६

  ८. खण्डवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधे समूहालम्बनस्मृतेः उपयोगः ४५६-४५७

  ९. खण्डवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधे मतान्तरम् ४५७

  १०. पदार्थोपस्थितिनिष्ठकारणतावच्छेदकविषयको विचारः ४५८

  ११. प्राभाकरमतम् ४५९

  १२. पदार्थोपस्थितेः पदजन्यत्वनिर्बन्धाभावः ४५९-४६१

  १३. पूर्वपक्षसंग्रहः ४६१-४६२

  १४. आसत्तिवादसिद्धान्तः, अर्थाध्याहारखण्डनं च ४६२-४६३

२. मुक्तावल्यनुसारेण आसत्तिनिरूपणम् ४६३-४६४

३. न्यायकौस्तुभानुसारेण आसत्तिनिरूपणम् ४६४-४६५

४. तर्कताण्डवानुसारेण आसत्तिनिरूपणम् ४६५-४६७

५. नागेशोक्तमासत्तिस्वरूपम् ४६७-४६८

६. वेदान्तपरिभाषोक्तमासत्तिस्वरूपम् ४६८-४६९

७. न्यायकोशे आसत्तिनिरूपणम् ४६९-४७०

  १. तर्कभाषायाम् आसत्तिनिरूपणम् ४६९

  २. तर्कसंग्रहव्याख्यायां वाक्यवृत्तौ आसत्तिविचारः ४६९

  ३. न्यायसिद्धान्तमञ्जर्यां, तद्व्याख्याने प्रकाशे च आसत्तिविचारः ४७०

८. पदादनुपस्थितस्यापि शाब्दबोधविषयत्वमिति भाट्टमतम्, तस्य विमर्शश्च ४७०-४७१

१२. तात्पर्यविचारः पृ.४७३-४९७

१. कुसुमाञ्जल्युक्तं तात्पर्यलक्षणम् ४७३-४७६
१. तत्साध्यकत्वं न तात्पर्यम् ४७४
२. तत्प्रतिपाद्यकत्वं न तात्पर्यम् ४७४-४७५
३. तत्प्रयोजनकत्वं न तात्पर्यम् ४७५
४. तदुद्देश्यकत्वं तात्पर्यमिति सिद्धान्तः ४७५-४७६
२. अथ मणिग्रन्थानुसारेण तात्पर्यनिरूपणम् ४७६-४८१
१. तत्साध्यकत्वं तत्परत्वम् इति मतनिरासः ४७६-४७७
२. तत्प्रतिपाद्यकत्वं तत्परत्वम् इति मतनिरासः ४७७-४७८
३. तत्प्रयोजनकत्वं तात्पर्यमिति सिद्धान्तः ४७८-४७९
४. मणिकारमतम् ४७९-४८१
३. न्यायकौस्तुभोक्ताः विशेषाः ४८१-४८३
१. नानार्थस्थले क्रमेण वा युगपद्वा अर्थद्वयबोध इति मतभेदः ४८२-४८३
४. तात्पर्यं किं पदस्य उत वाक्यस्य? ४८३
५. नागेशीया तात्पर्यनिरूपणसरणिः ४८४-४८६
६. वेदान्तपरिभाषोक्तरीत्या तात्पर्यस्वरूपम् ४८६
७. अपि तात्पर्यं वृत्तिः? ४८७-४९७
१. कुमारिलभट्टैः तात्पर्याख्यवृत्तेः अनुक्तिः ४८८-४८९
२. तात्पर्याख्यवृत्तौ जयन्तभट्टाशयः ४८९-४९१
३. सारस्वतीसुषमापत्रिकायां तात्पर्यविचारः ४९१-४९२
४. सारस्वतीसुषमास्थविचारस्य परिशीलनम् ४९२-४९४
५. तात्पर्याख्यवृत्तिविषये निष्कर्षः ४९४-४९७

शाब्दबोधमीमांसा

वाक्यवाक्यार्थविचारात्मकः प्रथमो भागः

॥ श्रीः ॥

यदात्मानो वेदा यदनुगुणवर्णाकृतिजुषः
प्रमाणं यत्रैते नियतमपरिच्छेद्यविभवे।
य एषामाहर्ता दनुजमथनो वाजिवदनः
स मे देवः श्रीमान् विशदयतु वागर्थयुगलम्॥

शब्दप्रामाण्यविचारः

शाब्दबोधमीमांसा इति संकल्पितो ग्रन्थः। तस्य प्रथमभागः वाक्यवाक्यार्थविचारः इति भवति। तत्र वाक्यं नाम पदसमूहात्मकः शब्दः एव, यः वाक्यार्थप्रमां जनयितुमीष्टे। शब्दस्य पृथक् प्रमाणत्वे सिद्धे एव वाक्यवाक्यार्थविचारः शोभते। अतः शब्दस्य प्रमाणत्वम् अनुमानादिभ्यः पृथक्त्वं च व्यवस्थापनीयमिति आदौ तत्प्रामाण्यसिद्धये विचारः प्रस्तूयते — शब्दः प्रमाणं न वा? प्रमाणत्वेऽपि अनुमानातिरिक्तं न वा? इति।

चार्वाकमतम्, तन्निरासश्च

प्रत्यक्षमेकमेव प्रमाणमिति वदन्तश्चार्वाकाः शब्दस्य प्रमाणतामेव नाङ्गीकुर्वन्ति। तन्मतनिरासप्रकारोऽयम् — चार्वाकाः केन हेतुना शब्दस्य अप्रामाण्यं वदन्तीति परिशीलनीयम्। केचन शब्दाः अप्रमाणभूता अपि दृश्यन्त इति तत्साधर्म्येण सर्वे शब्दाः अप्रमाणमिति तेषामाकूतम्। तथा च, "विमतः शब्दः अप्रमाणम्, शब्दत्वात्, अप्रमाणत्वेन संप्रतिपन्नशब्दवत्" इत्यनुमानं फलितम्। एतच्च प्रत्यक्षातिरिक्तस्यानुमानस्य शब्दस्य च प्रामाण्यानङ्गीकारे न घटते। शब्दाप्रामाण्यसाधकानुमानस्याप्रामाण्ये शब्दप्रामाण्यमेव स्थिरीकृतं भवति। तस्य प्रामाण्ये तु अनुमानप्रामाण्यमेव स्थिरीकृतं भवति। अपि च "शब्दः अप्रमाणम्" इति प्रयोगः अप्रामाण्यसंशयवन्तं तद्विपर्ययवन्तं प्रति वा अर्थवान्। पुरुषान्तरगतौ च संशयविपर्ययौ न प्रत्यक्षगोचरौ। अतोऽनुमानेन शब्देन वा तदीयसंशयविपर्ययौ ज्ञात्वा तन्निरासाय पुरुषान्तरं प्रति शब्दाप्रामाण्यसाधकानुमानप्रयोगः कार्य इति शब्दानुमानयोः प्रामाण्यमवर्जनीयम्।

अपि च "प्रत्यक्षातिरिक्तं न प्रमाणम्" इति भवद्वचनं प्रमाणं न वा? आद्ये शब्दस्य भवद्वचनाख्यस्य प्रामाण्यं सिद्धम्। द्वितीये प्रत्यक्षातिरिक्ताप्रामाण्यबोधकस्य भवद्वचनस्याप्रमाणत्वे प्रत्यक्षातिरिक्तस्य अप्रामाण्यासिद्ध्या प्रत्यक्षातिरिक्तशब्दादेः प्रामाण्यमेव दृढीकृतं भवति। तदुक्तमनुमानमणौ[१] —

"अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात्, एतद्वाक्यस्य संदिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्, तयोश्च परकीययोरप्रत्यक्षत्वात् अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च" इति।

भामत्यां शब्दानुमानयोः पृथक्प्रामाण्यस्थापनम्[२]

नाप्रत्यक्षं प्रमाणमिति ब्रुवाणः प्रष्टव्यो जायते। कुतो भवान् अनुमानादीनाम् अप्रामाण्यमवधारितवानिति? प्रत्यक्षं हि लिङ्गादिरूपमात्रग्राहि नाप्रामाण्यमेषां विनिश्चेतुमर्हति। न हि धूमज्ञानमिव एषामिन्द्रियार्थसंनिकर्षात् अप्रामाण्यज्ञानमुदेतुमर्हति। किं तु देशकालावस्थारूपभेदेन व्यभिचारोत्प्रेक्षया। न चैतावान् प्रत्यक्षस्य व्यापारः संभवति। यथाहुः "न हीदमियतो व्यापारान्[३] कर्तुं समर्थं, संनिहितविषयबलेनोत्पत्तेरविचारकत्वात्" इति। तस्मादस्मिन्ननिच्छतापि प्रमाणान्तरमभ्युपेयम्[४]।

अपि च प्रतिपन्नं = प्रतिपत्तिमन्तं पुमांसमपहाय अप्रतिपन्नसंदिग्धाः प्रेक्षावद्भिः प्रतिपाद्यन्ते (व्युत्पाद्यन्ते)। न चैषामित्थंभावः (अप्रतिपत्तिमत्त्वादिकं) भवदीयप्रत्यक्षगोचरः। न खल्वेते गौरत्वादिवत् प्रत्यक्षगोचराः। किं तु वचनचेष्टालिङ्गानुमेयाः। न च लिङ्गं भवन्मते प्रमाणं, यत एते सिध्यन्ति। न च पुंसाम् अप्रतिपत्तिमत्त्वादिकमविज्ञाय यं कंचन पुरुषं बोधयितुमिच्छतः अनवधेयवचनस्य प्रेक्षावत्ता नाम।

अपि च पशवोऽपि हिताहितप्राप्तिपरिहारार्थिनः कोमलशष्पश्यामलायां[५] भुवि प्रवर्तन्ते। परिहरन्ति च [६]आश्यानतृणकण्टकावकीर्णाम्। नास्तिकस्तु पशोरपि पशुः इष्टानिष्टसाधनमविद्वान्। [७]न खल्वस्मिन्ननुमानगोचरप्रवृत्तिनिवृत्तिगोचरे प्रत्यक्षं प्रभवति। न च परप्रत्यायनाय शब्दं प्रयुञ्जीत। शाब्दस्यार्थस्याप्रत्यक्षत्वात्। तदेवं

---

[१] त.चिं.म, द्वि.भा. प्र.प. पृ. २२.

[२] ब्र.सू.शां.भा.व्या.भामती. ३.३.३०.५४, पृ. ८५२.

[३] लिङ्गस्वरूपतद्व्यभिचारतदप्रामाण्यादिपरिच्छेदान्।

[४] प्रमाणान्तराभ्युपगमे तदप्रामाण्योक्तिर्व्याहतेत्यर्थः।

[५] शष्पं = बालतृणम्।

[६] आश्यानम् = ईषत् शुष्कम्।

[७] अनुमानविषयभूते इष्टसाधनत्वे अनिष्टसाधनत्वे च न प्रत्यक्षं प्रभवतीत्यर्थः।

मा नाम भून्नास्तिकस्य जन्मान्तरम्। अस्मिन्नेव जन्मन्युपस्थितोऽस्य मूकत्वप्रवृत्तिनिवृत्तिविरहरूपो महान् नरकः। पराक्रान्तं चात्र सूरिभिः। अत्यन्तपरोक्षगोचराप्यन्यथानुपपद्यमानार्थप्रभवा अर्थापत्तिः। भूयस्सामान्ययोगेन चोपमानमुपपादितं प्रमाणलक्षणे।

इति भामत्यां शब्दानुमानयोः पृथक्प्रामाण्यं व्यवस्थापितम्।

वेदान्तदेशिककृतं शब्दप्रामाण्यस्थापनम्[१]

अपि च अनाप्तानुक्तवाक्यं प्रमाणम्, कारणदोषबाधकप्रत्यययोरदर्शनात्। अनाप्तोक्तवाक्यं तु न प्रमाणम्, कारणदोषबाधकप्रत्यययोर्दर्शनात्। न च "अनाप्तानुक्तवाक्यं न प्रमाणम्, वाक्यत्वात्, अनाप्तोक्तवाक्यवत्" इति वाच्यम्। स्ववचनविरोधात्। तथा हि "अनाप्तानुक्तवाक्यं न प्रमाणम्" इति भवद्वाक्यं प्रमाणं? न वा? आद्ये "न प्रमाणम्" इति त्वद्वचनविरोधः। द्वितीये "न प्रमाणम्" इति वाक्यस्याप्रमाणत्वे अनाप्तानुक्तवाक्यं प्रमाणमित्येव सिध्यतीति त्वद्वचनविरोधः तदवस्थ एव। न च मद्वाक्यव्यतिरिक्तवाक्यं पक्षः, अतो न स्ववचनविरोधः इति वाच्यम्। तर्हि त्वद्वाक्ये अप्रमाणत्वरूपसाध्याभाववति वाक्यत्वरूपहेतुसत्त्वात् व्यभिचारः। न चैवं सति सर्वेषां वाक्यानां प्रामाण्यं स्यादित्याशङ्कनीयम्। भ्रान्तादिवाक्यानां दोषमूलत्वस्य दुरपह्नवत्वात्। अन्येषां तु तदभावात्।

इति न्यायपरिशुद्धौ वेदान्तदेशिकैः प्रत्यपादि।

शब्दमणौ शब्दप्रामाण्यस्थापनम्

शब्दमणौ[२] गङ्गेशोपाध्यायैः —

ननु शब्दो न प्रमाणम्। तथा हि — करणविशेषः प्रमाणम्। करणं च तत् यस्मिन् सति क्रिया भवत्येव। न च शब्दे सति प्रमा भवत्येवेति नायं शब्दः प्रमाणम्। न च "शब्दो न प्रमाणम्" इति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघातः। अस्याप्रामाण्येऽपि एतदुत्थाप्यमानाविसंवादात्[३] — इत्याशङ्क्य,

आकाङ्क्षादिमतः पदार्थस्मरणादिव्यापारवतः प्रमाणत्वेन, तथाभूतात् प्रमोत्पत्तेरावश्यकत्वात्, अतथाभूतत्वे च फलाजनकत्वस्य करणान्तरसाम्यात् — इति समाहितम्।

---

[१] न्या.प.३.१, पृ.२३०.

[२] त.चिं.म, च.भा. प्र.प.पृ. १४.

[३] एतज्जन्यायाः प्रमितेः अबाधादित्यर्थः।

पूर्वपक्षसमाधानयोरयमाशयः —

पूर्वपक्षः — प्रमायाः करणं हि प्रमाणम्। फलोपधायकं कारणमेव करणम्। यदि च शब्दे श्रुते सति अवश्यं प्रमा भवेत् तदा शब्दः प्रमाणं भवेत्। आकाङ्क्षादिज्ञानविरहदशायां पदार्थस्मरणादिव्यापारविरहदशायां च शब्दात् प्रमानुत्पत्तेः न शब्दः प्रमाणम्। ननु "शब्दो न प्रमाणम्" इति वाक्यस्य प्रमोपधायकत्वे प्रमोपधायकान्यत्वव्याघातः। आयातं चास्य शब्दस्य प्रमाणत्वम्। अप्रमोपधायकत्वे च, किं तत् अप्रमोपधायकत्वं? भ्रमोपधायकत्वं वा, प्रमानुपधायकत्वं वा? आद्ये आयातं शब्दमात्रस्य प्रमोपधायकत्वम्। प्रकृतवाक्यजन्यज्ञानस्य विषयबाधेनैव भ्रमत्वात्। द्वितीये शब्दस्य प्रमोपधायकान्यत्वे मानाभावः। भवदुक्तवाक्यस्यैव तत्र मानत्वात्। तथा च यदि "शब्दः न प्रमाणम्" इति भवदुक्तवाक्यं प्रमित्युपधायकं, तदा शब्दमात्रस्य प्रमित्यनुपधायकत्वं निष्प्रमाणकम् इति चेन्न। एतज्जन्यपदपदार्थोपस्थितितदसंसर्गाग्रहसहकृतमनस एव शब्दस्य प्रमोपधायकान्यत्वे प्रमाणत्वात् — इति।

सिद्धान्तस्तु — आकाङ्क्षाज्ञानादिसहकृतस्य पदार्थोपस्थितिव्यापारवतः शब्दस्यैव प्रमाणत्वस्वीकारात् तथाविधशब्दाच्च प्रमोत्पत्तेरावश्यकत्वात् शब्दः प्रमाणमेव। इतरसामग्र्यसमवधाने फलाजनकत्वं तु चक्षुरादावपि तुल्यम्। अतो न अन्वयव्यभिचारेण शब्दस्य प्रमाजनकत्वाभावः शङ्कनीयः। स्वेतरयावत्कारणसत्त्वे स्वसत्त्वे यदि न कार्यं, तदैव अन्वयव्यभिचारात् — इति।

न्यायसूत्रानुसारेण शब्दस्य पृथक्प्रमाणत्वम्

तत्र बौद्धाः वैशेषिकाश्च शब्दस्य पृथक्प्रामाण्यमनङ्गीकुर्वाणाः अनुमानविधयैव प्रामाण्यमाचक्षते। तत्र तावत् न्यायसूत्रकारः शङ्कासमाधानपूर्वकं शब्दस्यानुमानगतार्थतां निराचख्यौ।

तथा हि — शब्दः न पृथक् प्रमाणम्, सः अनुमानविधयैवार्थप्रत्यायकः। यथा खलु प्रत्यक्षेणाज्ञायमानं साध्यं ज्ञातेन लिङ्गेन पश्चान्मीयतेऽनुमानस्थले, तथैव ज्ञातेन (श्रुतेन) शब्देन पश्चादर्थो ज्ञायते प्रत्यक्षादिनानवगम्यमानः, इति शब्दोऽपि लिङ्गविधयैवार्थबोधकः इति भावेन —

"शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्"

इति सूत्रेणाशङ्कितवान्[१]। ततः, यत्र द्वयोः प्रमाणयोः भेदो भवति तत्र प्रमाणयोः अर्थबोधनप्रकारे वैलक्षण्यं दृश्यते, यथा प्रत्यक्षानुमानयोः, अनुमानोप-

[१] न्या.सू. २.१.४९.

मानयोश्च। प्रत्यक्षस्थले हि अज्ञायमानात् इन्द्रियात् अर्थज्ञानं भवति, अनुमानस्थले च ज्ञायमानात् लिङ्गात् अर्थज्ञानं भवति। उपमानस्थले सादृश्यज्ञानादर्थप्रतिपत्तिः, नैवमनुमानस्थले इति प्रमाणप्रवृत्तिभेदात् प्रमाणभेदः। शब्दानुमानयोस्तु नैवं प्रवृत्तिभेदोऽस्ति, ज्ञातादेव शब्दादर्थप्रतीतेः, ज्ञातादेव लिङ्गादर्थप्रतीतेश्च। अतः शब्दोऽनुमानमेवेत्याशशङ्के[१] —

"उपलब्धेरद्विप्रवृत्तित्वात्"

इति सूत्रेण। अपि च अनुमानस्थले संबद्धयोः हेतुसाध्ययोर्मध्ये हेतोः दर्शनानन्तरं संबन्धस्मृतौ सत्यां साध्यप्रमितिर्भवति। तथैव संबद्धयोः शब्दार्थयोर्मध्ये शब्दविषयकश्रावणप्रत्यक्षानन्तरं संबन्धस्मृतौ सत्यामर्थप्रतीतिर्भवति शब्दस्थले इति शब्दस्य नानुमानात् पृथक् प्रामाण्यमिति —

"संबन्धाच्च"

इति सूत्रेण शङ्कितवान्[२]।

ततः समाधानमवोचत् —

"आप्तोपदेशसामर्थ्याच्छब्दादर्थसंप्रत्ययः"

इति सूत्रेण[३]। प्रत्यक्षेणानवगम्यमानानां "स्वर्गः अप्सरसः उत्तराः कुरवः सप्त द्वीपाः समुद्रः लोकसंनिवेशः" इत्यादीनामर्थानां न शब्दमात्रात् प्रत्ययः। किं तर्हि? "अयं शब्दः आप्तैरुक्तः" इति शब्दगतस्य आप्तोक्तत्वस्य ज्ञानादेव समीचीनः प्रत्ययः भवति। अनुमानस्थले तु नैवमिति प्रवृत्तिभेदसद्भावात् शब्दस्यानुमानातिरिक्तप्रमाणत्वमिति तदर्थः।

एवं च सूत्रद्वयोक्तशङ्काद्वयनिरासो जातः। यदुक्तं "संबन्धाच्च" इति, तत्र भाष्यकारः समाधत्ते — शब्दार्थयोः संबन्धः कश्चित् अङ्गीक्रियते, प्राप्तिरूपस्तु[४] संबन्धो नाङ्गीक्रियते। किं तु समयरूपः संबन्धः। न हीमं संबन्धं पुरस्कृत्य अनुमानस्थलेऽर्थप्रतीतिः। अपि तु अविनाभावरूपं संबन्धम्। अतः प्रवृत्तिभेदसद्भावात् संबन्धभेदसद्भावाच्च न शब्दोऽनुमानविधया प्रमाणमिति भाष्यकारस्य आशयः।

दिङ्नागमतेन शब्दस्यानुमानेऽन्तर्भावः

"आप्तोपदेशः शब्दः" इति[५] सूत्रभाष्यव्याख्यानावसरे वार्त्तिककारेण[६] —

---

[१] न्या.सू. २.१.५०.

[२] न्या.सू. २.१.५१.

[३] न्या.सू. २.१.५२.

[४] प्राप्तिर्नाम संयोगः, एकार्थसंयोगः, समवायो वा।

[५] न्या.सू. १.१.७.

" 'आप्तोपदेशः शब्दः' इति किमाप्तानामविसंवादित्वं प्रतिपाद्यते, अथार्थस्य तथाभाव इति। यद्याप्तानामविसंवादित्वं प्रतिपाद्यते, तदनुमानात्। अथार्थस्य तथाभावः, सोऽपि प्रत्यक्षात्। यदा ह्ययमर्थं प्रत्यक्षत उपलभते, तदा तथाभावमर्थस्य प्रतिपद्यत इति"

इति प्रोक्तम्। अयं ग्रन्थः दिङ्नागमतानुवादरूप इति टीकाकाराः। "अथ शब्दं प्रमाणान्तरमसहमानो दिङ्नागः तल्लक्षणं विकल्प्य आक्षिपति — आप्तोपदेश इति" इत्यादिः टीकाग्रन्थः[२]।

तत्सारांशः एवम्। सूत्रे उपदेशशब्दः यदि भावे घञन्तः, तदा 'आप्तस्य उपदेशः' इति षष्ठीतत्पुरुषः। यदि कर्मणि घञन्तः, तदा 'आप्तश्चासावुपदेशो यस्मात्' इति बहुव्रीहिः। तत्राद्ये उपदेशकर्तुः आप्तत्वकथनेन अविसंवादित्वं लभ्यते। द्वितीये उपदिश्यमानस्यार्थस्याविसंवादित्वम्। तत्राद्यः कल्पः न युक्तः। न तावत् असंबद्धात् अन्यस्मात् अन्यस्य निश्चयो भवति, अतिप्रसङ्गात्, असंबन्धाविशेषेण सर्वस्मात् सर्वनिश्चयप्रसङ्गात्। अतः शब्दार्थयोः संबन्धं स्वीकृत्य शब्दादर्थप्रत्ययो वक्तव्यः। तयोश्च कः संबन्धः? न तावत् तादात्म्यम्। न हि शब्दः अर्थात्मा। नापि कार्यकारणभावः, न हि शब्दः अर्थकार्यः। विनाप्यर्थं पुरुषविवक्षामात्रादेव शब्दोत्पत्तेः। तस्मात् न साक्षात् शब्दादर्थनिश्चयः। विवक्षाकार्यतया तु विवक्षां गमयेत्। विवक्षा चाभिप्रायहेतुका। अभिप्रायश्च कश्चिन्मनोमात्रहेतुकः, कश्चित् प्रमाणमूलकः। तत्र यः प्रमाणनिश्चितमर्थं विवक्षति, यथाविवक्षं च उच्चारयति स आप्तः। तस्य वचनात् कार्यात् कारणभूता विवक्षा अनुमीयते। तया च तत्कारणभूतमर्थज्ञानमनुमीयते। अर्थज्ञानेन च तत्कारणभूतोऽर्थोऽनुमीयते। अर्थज्ञानस्यार्थजन्यत्वात् इति प्रमाणगतिः। तत्र "आप्तोपदेशः" इत्यत्रोपदेशक्रियया उपदेष्टार उपस्थापिताः। ते च प्रायेण विसंवादका दृष्टा इति आप्तग्रहणेन तेषामविसंवादित्वमुच्यते। तेषामविसंवादित्वेन च तदुपदेशादर्थनिश्चयो भवतीति यद्युच्यते, तर्हि उपदेष्टुः अविसंवादित्वमानुमानिकम्, तादृशस्य वचनमर्थनिश्चयेऽनुमानमेव। तथा हि "विवादाध्यासितः उपदेशः अर्थवान्, निर्दोषपुरुषीयवचनत्वात्, यद् यद् निर्दोषसत्त्वीयं (निर्दोषपुरुषीयं) वचनं तत् सर्वमर्थवत्, यथा बुद्धस्य क्षणिकनैरात्म्यादिविषय उपदेशः, तथा चायं विवादाध्यासित उपदेशः" इति। यथोक्तं भदन्तेन[३] —

"आप्तवाक्याविसंवादसामान्यादनुमानता" इति।

---

[१] न्या.वा. १.१.७, पृ. ३६७.

[२] न्या.वा.ता.टी.१.१.७, पृ. ३७०.

[३] प्रमाणसमुच्चये द्वितीयपरिच्छेदे।

द्वितीयः कल्पोऽपि न कल्पते। अत्र हि 'उपदिश्यत इति उपदेशः' इति व्युत्पत्त्या अर्थ उच्यते। आप्तः = प्राप्तः, उपदेशो यस्मात् स तथोक्तः। एतदुक्तं भवति — यस्माच्छब्दादर्थमवगम्य प्रवर्तमानः पुरुषः तमेवार्थं प्राप्नोति स आप्तोपदेशः शब्दः प्रमाणम्। एवं च शब्देन यथा योऽर्थो दर्शितः तस्य प्राप्त्या तथात्वं दर्शितं भवति इति। एतन्न युक्तम्। प्राप्त्या हि तथात्वमर्थस्य विनिश्चिन्वन् ज्ञातस्यैवार्थस्य तथात्वं निश्चेतुमर्हति, नाज्ञातस्य। ज्ञानं चार्थस्य प्रायः प्रत्यक्षेणेति अर्थज्ञानं प्रात्यक्षिकं, न शाब्दमिति दिङ्नागाशयः।

वार्त्तिके प्रदर्शितः तद्दूषणप्रकारः

"तन्न। सूत्रार्थापरिज्ञानात्। नायं सूत्रार्थः 'आप्तोपदेशः शब्दः' इति। अपि तु इन्द्रियसंबद्धासंबद्धेष्वर्थेषु या शब्दोल्लेखेन प्रतिपत्तिः सा आगमस्यार्थः। तस्मादसंबद्धोऽयं विकल्पः" इति वार्त्तिकम्[1]।

अस्यायमाशयः — 'आप्तत्वनिश्चयसहायः शब्दः अर्थं निश्चाययति' इति वा, 'शब्दार्थप्राप्त्या शब्दार्थतथात्वनिश्चयः' इति वा न सूत्रार्थः। अपि तु, 'इन्द्रियसंबद्धासंबद्धेषु = दृष्टादृष्टेषु अर्थेषु, या शब्दोल्लेखेन = पदार्थस्मरणावान्तरव्यापारकेण "शब्दादेवार्थं प्रत्येमि" इत्यनेनोल्लेखेन (अनुव्यवसायेन) विषयीकृता प्रतिपत्तिः, सा आगमस्य, अर्थः = फलम्' इति।

एवं तर्हि आप्तोक्तत्वनिश्चयः क्वोपयुज्यते इति चेत् — वाक्यस्य प्रामाण्यनिश्चये उपयुज्यते, न तु वाक्यार्थप्रतीतौ। न हि येन प्रामाण्यमवगम्यते तेन प्रमेयमप्यवगम्यते। तथा सति प्रत्यक्षादिप्रामाण्यज्ञानहेतुभूतादनुमानादेव प्रत्यक्षादीनां यत्प्रमेयं तस्याप्यवगतिः स्यादिति प्रत्यक्षादीनां विषयप्रमाजनकत्वाभावप्रसङ्गः। नापि आप्तवाक्यं वक्तृज्ञानकार्यं सत् कारणभूतवक्तृज्ञानानुमानद्वारेणार्थेऽप्यनुमानमेव, न त्वर्थस्य प्रत्यायकमिति युक्तम्। यदि हि नार्थं प्रत्याययेत्, ज्ञानमात्रमनुमापयेत्, तदा नार्थविशेषसिद्धिः। न च ज्ञानविशेषादेवार्थविशेषः सिध्यतीति वाच्यम्। ज्ञानेऽर्थादन्यस्य विशेषस्याभावात्। तस्मात् वक्तृज्ञानविशेषणाय पूर्वं शब्दादेव केवलात् वाक्यार्थज्ञानम् एषितव्यम्। एवं च कृतं वक्तृज्ञानानुमानेनार्थप्रतिपत्त्यर्थेनेति।

तस्मात् पदानि कृतसंकेतानि स्वार्थान् स्मारयन्ति, आकाङ्क्षायोग्यतासत्तिसध्रीचीनानि तान्येव अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न (वाक्यार्थे) संगतिग्रहणमपि प्रतीक्षन्त इति दूरेऽनुमानात् भवन्ति — इति टीकाकाराः[2] निरूपयन्ति।

---

[1] न्या.वा. पृ. १.१.७, ३६७.
[2] न्या.वा.ता. टी.१.१.७, पृ. ३७१-२.

एतावता दिङ्नागानुमतः शब्दस्यानुमानान्तर्भावपक्षः विमृष्टः। अथ काणादमतं परिशील्यते।

शब्दस्यानुमानान्तर्भाववादिकणादमतम्

शब्दस्यानुमानविधया प्रामाण्यं बौद्धाः, काणादाः, जरन्मीमांसकाः, प्राभाकराश्च आतिष्ठन्ते। समानप्रवृत्तिकत्वात् शब्दस्यानुमानत्वमिति पक्षः न्यायसूत्रकारेण निरस्तः। विवक्षानुमानद्वारा (अथ वा वक्त्रभिप्रायानुमानद्वारा) अर्थानुमापकत्वं शब्दस्येति दिङ्नागपक्षः प्रशस्तपादाभिप्रेतपक्षश्च तात्पर्यटीकायां, न्यायमञ्जर्यां, न्यायभूषणे च निरस्तः। शब्दस्यानुमानविधया संसर्गरूपवाक्यार्थबोधकत्वमिति विषये अर्थपक्षकं पदपक्षकं चेत्यनुमानद्वयं वैशेषिकसंमततया तात्पर्यटीकायां[1] प्रस्तुतं न्यायकुसुमाञ्जलौ विस्तरेण दूषितम्।

न्यायलीलावतीकारेण प्रदर्शितम् "एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि, संसृष्टार्थपरत्वात्" इत्यनुमानं तत्त्वचिन्तामणौ विस्तरेणानूद्य दूषितम्। तत्सर्वमत्र अस्माभिः क्रोडीकृत्य प्रदर्श्यते।

"अस्येदं कारणं[2] कार्यं संबन्धि एकार्थसमवायि विरोधि चेति लैङ्गिकम्" इत्यनुमानलक्षणमभिधाय, "एतेनैव शाब्दं व्याख्यातम्" इति वदता महर्षिणा कणादेन[3] शब्दोऽनुमानमिति स्वमतमाविष्कृतम्। भाष्यकारेण प्रशस्तपादाचार्येण[4] "शब्दादीनामपि अनुमानेऽन्तर्भावः, समानविधित्वात्। यथा प्रसिद्धसमयस्यासंदिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवति अनुमानम्, एवं शब्दादिभ्योऽपीति" इति प्रतिपादितम्।

कन्दल्यनुसारेणैतद्विव्रियते[5]।

शब्दादीन्यपि प्रमाणान्तराणि संगिरन्ते वादिनः, तानि कस्मादिह नोक्तानीति पर्यनुयोगमाशङ्क्य, तेषाम् अत्रैवान्तर्भावान्न पृथगभिधानमित्याह - शब्दादीनामपीति। शब्दादीनामनुमानेऽन्तर्भावः = अनुमानाव्यतिरेकित्वम् (अनुमानानतिरिक्तत्वं), समानविधित्वात् = समानप्रवृत्तिप्रकारवत्त्वात्। यथा व्याप्तिग्रहणबलेनानुमानं प्रवर्तते, तथा शब्दादयोऽपि प्रवर्तन्त इत्यर्थः। "शब्दोऽनुमानं, व्याप्तिबलेनार्थप्रतिपादकत्वात्, धूमवत्"। समानविधित्वमेव दर्शयति- यथेति। प्रसिद्धः =

---

[1] न्या.वा.ता.टी. २.१.५२

[2] "अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम्" इति वीरराघवाचार्यसंपादितपुस्तकपाठः (वै.र. पृ.२७७)।

[3] वै.सू. ९.२.१,३.

[4] प्र.पा.भा.अनुमानप्रकरणे. पृ. ५१२.

[5] न्या.कं. अनुमानप्रकरणे. पृ. ५१२.

ज्ञातः, समयः = अविनाभावः, यस्य पुरुषस्य, तस्य लिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यां, लिङ्गदर्शनं = पक्षे हेतुदर्शनं, प्रसिद्ध्यनुस्मरणं = यत्र धूमस्तत्राग्निरित्येवंभूतायाः प्रसिद्धेरनुस्मरणं व्याप्तिस्मरणमिति यावत्, ताभ्यां यथातीन्द्रियेऽर्थे भवत्यनुमानं, तथा शब्दादिभ्योऽपीति। तावद्धि शब्दो नार्थं प्रतिपादयति यावत् 'अयं शब्दः अस्यार्थस्याव्यभिचारि' इत्येवं नावगम्यते। ज्ञाते त्वव्यभिचारे, अर्थं प्रतिपादयन् शब्दः धूम इव लिङ्गं स्यादिति।

शब्दादर्थानुमाने पक्षः क इति विचारः

ननु अनुमाने साध्यधर्मविशिष्टो धर्मी प्रतीयते। शब्दादर्थानुमाने को धर्मी? न तावदर्थः, तस्य तदानीमप्रतीयमानत्वात्, पक्षस्य तु पूर्वप्रतीतेरावश्यकत्वात्। शब्दो धर्मीति चेत्, किमस्य साध्यम्? अर्थवत्त्वं चेत् — न। पर्वतादेरिव वह्न्यादिना शब्दस्यार्थेन सह न संयोगसमवायादिलक्षणः कश्चित् संबन्धो ज्ञायते (निरूप्यते), येन संबन्धेनायं शब्दः अर्थविशिष्टः साधनीयः। प्रतिपाद्यप्रतिपादकभाव एव हि शब्दार्थयोः संबन्धः। सोऽर्थप्रतीत्युत्तरकालभावी न अर्थप्रतिपादनात् पूर्वं संभवति। नाप्यग्निधूमयोरिव शब्दार्थयोरविनाभावनियमः संभवति, देशकालव्यभिचारात्। तद्व्यभिचारश्च, असत्यपि युधिष्ठिरे कलियुगे युधिष्ठिरशब्दः प्रयुज्यते, असत्यामपि लङ्कायां जम्बूद्वीपे लङ्काशब्दः श्रूयते। तस्मात् अनुमानसामग्रीवैलक्षण्यात् शब्दो नानुमानम्। देशविशेषे चार्थं विनापि शब्दस्य सद्भावात्। तथा हि — चौर इति भक्ताभिधानं (अन्नाभिधानं) दाक्षिणात्यानाम्; आर्यावर्तनिवासिनां तु तस्कराभिधानम्।

अपि च यदि शब्दोऽनुमानं स्यात्, तदास्य पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वरूपत्रैरूप्यप्रतीत्या प्रामाण्यनिश्चयः स्यात्, नाप्तोक्तत्वप्रतीत्या। तत्प्रतीत्या (आप्तोक्तत्वज्ञानेन) तु निश्चीयमानप्रामाण्यकः शब्दः अनुमानादतिरिक्त एव, तद्वैधर्म्यात्।

शब्दानुमानयोः साधर्म्यनिरूपणम्

अत्रोच्यते। अस्मिन् प्रसङ्गेऽस्माभिः प्रदर्श्यमानः कश्चन दृष्टान्तः अवगन्तव्यो भवद्भिः आदौ। 'तर्जन्यामूर्ध्वीकृतायां दशसंख्येत्यवगन्तव्यम्' इति संकेतकरणानन्तरम्, तत्संकेताभिज्ञस्य पुरुषस्य यत्, ऊर्ध्वीकृतायां तर्जन्यां देशकालव्यवहितेष्वर्थेषु दशसंख्यानुमानम्, न तत्र संख्या धर्मिणी। तस्याः पूर्वमज्ञातत्वात्। नापि तर्जनीविन्यासः, तस्य प्रतिपाद्यमानया दशसंख्यया सह संबन्धान्तराभावेन तद्विशिष्टतया प्रतिपत्त्यसंभवात्। नापि तर्जनीविन्यासदशसंख्ययोः एकदेशता एककालता वास्ति, तस्मात् कथमनुमानप्रवृत्तिः इति शङ्कायाम्, एवमुत्तरं

वक्तव्यं — क्रयविक्रयव्यवहारे वणिजाम् ऊर्ध्वतर्जनीविन्यासस्य दशसंख्याप्रतिपादनाभिप्रायेण सहाव्यभिचारस्योपलम्भात्, ऊर्ध्वतर्जनीविन्यासकर्तुः दशसंख्याप्रतिपादनाभिप्रायज्ञापनद्वारा दशसंख्याप्रतिपत्तिहेतुत्वमूर्ध्वतर्जनीविन्यासस्य इति। एवमेव शब्दस्यापि। तथा हि — प्रथमं गोशब्दात् उच्चरितात् वक्तुः ककुदादिमदर्थविवक्षा गम्यते। स्वज्ञातशब्दसमूहे गोशब्दोच्चारणस्य पदार्थविवक्षापूर्वकत्वदर्शनात्। पदार्थविवक्षया च पदार्थानुमानम्। अयमत्रानुमानप्रयोगः — "पुरुषः धर्मी (पक्षः) ककुदादिमदर्थविवक्षावान्, गोशब्दोच्चारणकर्तृत्वात्, अहमिव" इति। न च अर्थाभावेऽपि अनाप्तानां विवक्षाया उपलब्धेः न विवक्षातोऽर्थसिद्धिरिति वाच्यम्। शब्दादपि तर्हि अर्थसिद्ध्यसंभवप्रसङ्गः। भ्रान्त्या विप्रलम्भधिया वा अर्थशून्यस्य शब्दस्य प्रयोगदर्शनात्। आप्तोक्ताच्छब्दादर्थप्रतीतिरिति चेत् — आप्तविवक्षात एवार्थाधिगतिरिति तुल्यं समाधानम्।

शब्दस्यार्थाव्यभिचारित्वम्

यत्तूक्तं देशविशेषे शब्दस्यार्थव्यभिचारात् न लिङ्गत्वमिति। तत्रोच्यते। धूमः स्वाभाविकेन संबन्धेन अग्नेर्लिङ्गम्। शब्दस्तु चेष्टावत् पुरुषेच्छाकृतेन संकेतेन प्रवर्तमानः यत्र यत्रार्थे पुरुषेण संकेत्यते तस्य तस्यैवार्थस्य विवक्षावगतिद्वारेणावगतौ लिङ्गम्। तथा च धूमः अविच्छिन्नमूलोर्ध्वगमनादिविशिष्ट एव यथाग्निनिश्चये हेतुः, तथा शब्दोऽपि आप्तोक्तत्वविशिष्टः संकेतितार्थाव्यभिचारी सन् अर्थानुमापको भवितुमर्हति।

शब्दस्यार्थेन संबन्धाभावः

ननु शब्दः अभिधाख्यया मुख्यवृत्त्यैवार्थं बोधयतु, कुतः अनुमानविधया बोधकत्वमाश्रीयत इति चेन्न। संबन्धाभावात्। न हि शब्दस्यार्थेन सह कोऽपि संबन्धोऽस्ति। असंबद्धस्य शब्दस्य मुख्यवृत्त्या बोधकत्वे, घटशब्दः पटमपि बोधयेत्। न च शब्दार्थयोः शक्तिरूपः स्वाभाविकः संबन्धोऽस्ति, स एव मुख्यवृत्त्या अर्थबोधनियामक इति वाच्यम्। शब्दस्यैकस्य देशभेदेनानेकेष्वर्थेषु प्रयोगदर्शनात्; स्वाभाविकसंबन्धस्यानेकेष्वर्थेष्वयोगात्।

ननु यत्रार्थे यः शब्दः आर्यैः प्रयुज्यते, तस्य तदर्थवाचकत्वम्, अन्यस्मिन्नर्थे संकेतानुरोधात् प्रवृत्तस्य शब्दस्य लिङ्गत्वमिति चेत् — न। तुल्य एव तावत् चौरशब्दः तस्करे भक्ते (अन्ने) च प्रतीतिकरः। तत्रास्य तस्करे वाचकत्वम्, अन्ने च लिङ्गत्वम् इत्यत्र नास्ति विशेषहेतुः। तथा च प्रयोगः — "आर्याणामपि

चौरशब्दादर्थप्रतीतिः लिङ्गपूर्विका, चौरशब्दजनितप्रतिपत्तित्वात्, उभयाभ्युपेत-दाक्षिणात्यप्रयुज्यमानचौरशब्दजनितप्रतिपत्तिवत्'' इति।

शब्दार्थयोः स्वाभाविकसंबन्धे प्रमाणाभावः

किं च शब्दस्यार्थेन सह स्वाभाविकसंबन्धसत्त्वे नास्ति प्रमाणम्। शब्दस्य वाच्यबोधानुकूला स्वाभाविकी वाचकशक्तिरेव स्वाभाविकसंबन्ध इतीष्यते भवद्भिः। तथा चोक्तं ''शक्तिरेव हि संबन्धः'' इति। शब्दशक्तेश्च स्वभावादेव वाच्यबोधानुकूलत्वे व्युत्पन्नपुरुषवत् अव्युत्पन्नोऽपि पुरुषः शब्दादर्थं प्रतीयात्, शब्दस्य, अर्थस्य, तयोः संबन्धस्य च सद्भावात्। न च संबन्धः ज्ञातः सन्नेवार्थप्रत्ययहेतुः, न सत्तामात्रेणेति वाच्यम्। तर्हि कीदृशं तत्संबन्धज्ञानम्? ''अस्य शब्दस्यायमर्थो वाच्यः'' इत्येतादृशं तत् इति चेत्, तत् ज्ञानं कस्मात् भवति? वृद्धव्यवहारादिति चेत् — तर्हि वृद्धव्यवहारजन्यं वाच्यवाचकालम्बनं ज्ञानमेव संकेतो व्युत्पत्तिरिति चाभिधीयमानं संस्कारद्वारा अर्थप्रतीतिकारणमस्तु, किं शक्त्याख्यसंबन्धान्तरकल्पनेन?

इति भाष्यकन्दल्योः शब्दस्यानुमानान्तर्भावरीतिः। वेदस्यापि पौरुषेयत्वात् वक्तृतात्पर्यानुमानद्वारा अर्थानुमापकत्वमित्यपि तत्र निरूपितम्।

लीलावतीकारमतम्

न्यायलीलावत्यां[१] शब्दस्यानुमानेऽन्तर्भाव एवं निरूपितः —

शब्दस्तु न मानान्तरम्। पदार्थसंसर्गस्यानुमानादेव सिद्धेः। तथा हि — ''पदानि स्मारितार्थसंसर्गविज्ञप्तिपूर्वकाणि (स्मरणविषयाः येऽर्थाः तत्संसर्गज्ञान-जन्यानि), योग्यतासत्तिमत्त्वे सति संसृष्टार्थपरत्वात्, 'गामभ्याज' इतिपद-कदम्बवत्'' इत्यनुमानादेव साध्यसिद्धेः। वैदिकानि लौकिकानि च पदानि तात्पर्यविषयपदार्थसंसर्गज्ञानपूर्वकाणीत्यर्थः। संसर्गस्य बहुविधत्वात् अनभिमत-संसर्गसिद्ध्या अर्थान्तरवारणाय साध्ये 'तात्पर्यविषय' इति संसर्गविशेषणम्।

ननु संसृष्टो योऽर्थः तत्परत्वं, तत्परसंनिधिमत्त्वं वा असिद्धम्; संसर्गस्य प्रागप्रतीतत्वात्। प्रतीतत्वे चानुमानवैयर्थ्यात्। संसर्गज्ञानार्थं ह्यनुमानम्। न च संसृष्टत्वप्रकारकप्रतीतिपरत्वं तत्प्रकारकसंनिधिमत्त्वं वा तदर्थ इति वाच्यम्। अनाप्तोक्ते निराकाङ्क्षे च व्यभिचारात्। मैवम्। आकाङ्क्षायोग्यतासत्तिमत्त्वस्य हेत्वर्थत्वात्।

---

[१] न्या.ली.पृ. ५२६-५३०.

नन्वनेनानुमानेन संसर्गज्ञानस्य सिद्धावपि संसर्गस्य असिद्ध्या कथं संसर्गरूपस्य वाक्यार्थस्यानुमेयत्वमिति चेत् — न। ज्ञानावच्छेदकतया संसर्गस्याप्यनुमितिविषयत्वात्। ज्ञानविषयकज्ञानस्य ज्ञानविषयविषयकत्वमिति नियमात्। संसर्गज्ञानविषयिण्याः अनुमितेः ज्ञानविषयीभूतसंसर्गविषयकत्वम् आवश्यकम् — इति।

ननु वाक्यार्थज्ञाने तात्पर्यज्ञानस्याहेतुत्वात् न संसृष्टार्थपरत्वं ज्ञातुं शक्यत इति विशेषणासिद्धिरिति चेन्न। नानार्थस्थले लक्षणास्थले च शाब्दबोधं प्रति तात्पर्यज्ञानस्य हेतुत्वात्। यथा "श्वेतो धावति" इत्यत्र 'श्वित्री नेनेक्ति', 'श्वेतगुणयुक्तः पुरुषः द्रुततरं याति' इत्यर्थद्वये यत्र श्लेषः, तत्र तात्पर्यग्रहं विनान्यतरनिश्चयाभावात्। "यष्टीः प्रवेशय" इत्यत्र संसर्गेऽनुपपत्तिज्ञानाभावात् नान्वयानुपपत्तिज्ञानं लक्षणाबीजम्, किं तु तात्पर्यानुपपत्तिज्ञानम्। तच्च तात्पर्ये ज्ञात एव भवतीति। संसृष्टार्थपरत्वं चानन्यथासिद्धसंभूयोच्चारणादेव ज्ञायत इति।

न्यायमञ्जर्यां शब्दस्यानुमानेऽन्तर्भावखण्डनम्[1]

पूर्वपक्षः —

जयन्तभट्टेन पूर्वोत्तरपक्षोपन्यासपूर्वकं शब्दस्यानुमानान्तर्भावो निरस्तः। तथा हि —

शब्दस्य खलु पश्यामो नानुमानाद्विभिन्नताम्।
अतस्तल्लक्षणाक्षेपात् न वाच्यं लक्षणान्तरम्॥

अनुमानलक्षणेनैव शब्दलक्षणस्यापि ज्ञानात् न शब्दस्य पृथग्लक्षणं वक्तव्यम्।

परोक्षविषयत्वं हि तुल्यं तावत् द्वयोरपि।
सामान्यविषयत्वं च संबन्धापेक्षणात् द्वयोः॥

शब्दानुमानयोः द्वयोरपि प्रत्यक्षागोचरविषयकत्वं तुल्यम्। द्वयोरपि संबन्धसापेक्षत्वात् सामान्यविषयत्वं तुल्यम्।

अगृहीतेऽपि संबन्धे नैकस्यापि प्रवर्तनम्।
संबन्धश्च विशेषाणामानन्त्याददतिदुर्गमः॥

शब्दानुमानयोरेकस्यापि ज्ञाते एव संबन्धे प्रवृत्तिः, नाज्ञाते संबन्धे। विलक्षणसंबन्धमूलकयोः शब्दानुमानयोः कथमैक्यम्? इत्यत्राह- संबन्धश्चेति। संबन्धश्च सर्वत्र नैकरूपो भवितुमर्हति। किं च —

यथा प्रत्यक्षतो धूमं दृष्ट्वाग्निरनुमीयते।
तथैव शब्दमाकर्ण्य तदर्थोऽप्यवगम्यते॥

---

[1] न्या.मं,आ.३.भा.१.पृ.४०१-४११.

अन्वयव्यतिरेकौ च भवतोऽत्रापि लिङ्गवत्।
यो यत्र दृश्यते शब्दः स तस्यार्थस्य वाचकः॥
पक्षधर्मत्वमप्यस्ति शब्द एव यतोऽर्थवान्।
प्रकल्पयिष्यते पक्षो धूमो दहनवानिव॥

"शब्दः अर्थवान्, शब्दत्वात्", "धूमः दहनवान्, धूमत्वात्" इतिवत्।

तत्र धूमत्वसामान्यं यथा वहति हेतुताम्।
गोत्वादिशब्दसामान्यं तद्वदत्रापि वक्ष्यते॥
एवं विषयसामग्रीसाम्यादेकत्वनिश्चये।
न विलक्षणतामात्रं किंचिदन्यत्वकारणम्॥

विलक्षणतामात्रम् = "अनुमिनोमि" "शाब्दयामि" इत्याद्यनुव्यवसायरूपं वैलक्षण्यम्।

पूर्ववर्णक्रमोद्भूतसंस्कारसहकारिता।
पुरुषापेक्षवृत्तित्वं विवक्षानुसृतिक्रमः॥
इत्यादिना विशेषेण न प्रमाणान्तरं भवेत्।

पुरुषापेक्षवृत्तित्वं = पुरुषसंकेतसापेक्षप्रवृत्तिमत्त्वम्।

कार्यकारणधर्मादिविशेषोऽत्रापि नास्ति किम्।
यथेष्टविनियोज्यत्वमपि नान्यत्वकारणम्॥
हस्तसंज्ञादिलिङ्गेऽपि तथाभावस्य दर्शनात्।

तथाभावस्य = यथेष्टविनियोज्यत्वस्य, दर्शनात्।

नन्वनुमाने महानसादिदृष्टान्तापेक्षा नियता, न तथा शाब्दबोधे इति शङ्कायाम्, असकृदभ्यस्तविषये अनुमानेऽपि न दृष्टान्तापेक्षा नियता। अनभ्यस्ते तु सा समानैवेत्याह —

दृष्टान्तनिरपेक्षत्वमभ्यस्तविषये समम्।
अनभ्यस्ते तु संबन्धस्मृतिसापेक्षता द्वयोः॥

नन्वेक एव अश्वादिशब्दः श्रोतृप्रतिभानुगुणं 'मृगविशेषः' 'श्वोऽभवितृ' इत्याद्यर्थान् बहून् प्रत्याययति; न तथा धूमः नानार्थान् प्रत्याययति, किं तु अग्निमेकम्। एवं स्फुटार्थत्वास्फुटार्थत्वादिभेदः शब्दे दृश्यते, न धूमादौ। अतोऽस्ति महत् अन्तरं शब्दानुमानयोः इत्याशङ्कायामाह —

अनेकप्रतिभोत्पत्तिहेतुत्वमपि विद्यते।
अस्पष्टलिङ्गे कस्मिंश्चिदश्व इत्यादिशब्दवत्॥
स्फुटार्थानवसायश्च प्रमाणाभासतो यथा।
लिङ्गे तथैव शब्देऽपि नानार्थभ्रमकारिणि॥

धूमधूलीपटलसाधारणाकारज्ञानात् एकस्य वह्न्यनुमितिः, अपरस्य सेनाद्यनुमितिरिति दृश्यत एवानुमानेऽपि प्रतिपत्तिभेदः।

अपि चानुमानसापेक्षत्वस्य शब्देऽवर्जनीयतया न स्वतन्त्रप्रमाणता शब्दस्य इत्याह —

अपि च प्रतिभामात्रे शब्दाज्ज्ञातेऽपि कुत्रचित्।
आप्तवादत्वलिङ्गेन जन्यते निश्चिता मतिः॥
अत एव हि मन्यन्ते शब्दस्यापि विपश्चितः।
आप्तवादाविसंवादसामान्यादनुमानताम्॥

विपश्चितः = कणादप्रशस्तपादादयः। "प्रामाणमविसंवादि ज्ञानम्" इति कथनात् शब्दस्याविसंवादरूपं प्रमाण्यमाप्तोक्तत्वमूलकम्। एवं चानुमानवत् शब्दोऽपि स्वप्रामाण्ये अन्यदपेक्षत इति नानुमानादतिरिच्यते।

किं च शब्दो विवक्षायामेव प्रामाण्यमश्नुते।
न बाह्ये, व्यभिचारित्वात् तस्यां चैतस्य लिङ्गता॥

शब्दश्रवणानन्तरम् "एतदर्थबोधेच्छया अयं शब्दः प्रयुक्तः" इति जानाति लोकः। अनेन शब्दस्य वक्तृगतेच्छाविशेषानुमापकत्वं स्पष्टम्। अतः तादृशेच्छायां शब्दो लिङ्गम्, न तु बाह्ये घटादौ, व्यभिचारित्वात् इति। अर्थं विनापि शब्दस्य सत्त्वात्। यथा कलौ युधिष्ठिररूपमर्थं विनापि युधिष्ठिरशब्दोऽस्ति। असत्यामपि लङ्कायां जम्बूद्वीपे लङ्काशब्दः प्रयुज्यत इति। अतः शब्देन इच्छा अनुमीयते, इच्छया चार्थ इति शब्दः नार्थांशे प्रमाणम् — इति पूर्वपक्षः।

सिद्धान्तः

विषयभेदात् सामग्रीभेदाच्च शब्दस्यानुमानात् पृथक्त्वम्

तत्रोच्यते। द्विविधः शब्दः, पदं वाक्यं चेति। तत्र वाक्यमज्ञातसंबन्धमेव वाक्यार्थमवगमयति, वाक्ये शक्त्यभावात्। अभिनवपुरुषविरचितश्लोकश्रवणे सति पदशक्तिसंस्कृतमतीनां वाक्यार्थावगमदर्शनात्। अतो वाक्यस्य संबन्धज्ञानमूलकप्रवृत्तिमता अनुमानेन नास्ति साम्यसंभावना।

शब्दानुमानयोः विषयभेदः

पदस्य तु संबन्धज्ञानसापेक्षप्रवृत्तिकत्वेऽपि सामग्रीभेदात् विषयभेदाच्च अनुमानाद्भिन्नत्वम्। विषयस्तावत् विसदृश एव पदलिङ्गयोः। जातिविशिष्टव्यक्तिमात्रं पदस्यार्थ इति स्थापयिष्यते। अनुमानं तु वाक्यार्थविषयकम्; "अत्राग्निः" इति,

"अग्निमान् पर्वतः" इति वा ततः प्रतीतेः। किं च पर्वतादिरूपं यद्विशेष्यं तज्ज्ञानपूर्वकम् अग्न्यादिविशेषणज्ञानं लिङ्गादुदेति। पदात्तु विशेषणावगतिपूर्विका[१] विशेष्यावगतिरिति विषयभेदः।

अर्थविशिष्टस्य शब्दस्य न साध्यत्वम्

ननु यथानुमाने धर्मविशिष्टो धर्मी साध्यः, एवमिहार्थविशिष्टः शब्दः साध्यो भवतु। मैवम्। शब्दस्य हेतुत्वात्। न च हेतुरेव पक्षो भवितुमर्हति।

ननु यथा "अयं धूमः अग्निमान्[२] धूमत्वात्, महानसीयधूमवत्" इत्युक्तं[३] —

"सा देशस्याग्नियुक्तस्य धूमस्यान्यैश्च कल्पिता"

इति। एवं गोशब्द एवार्थवत्त्वेन साध्यताम्, गोशब्दत्वादिसामान्यं च हेतूक्रियताम् इति चेत् न। शब्दस्य धर्मिणः किम् अर्थविशिष्टत्वं वा साध्यते? अर्थप्रत्यायनशक्तिविशिष्टत्वं वा? अर्थप्रतीतिविशिष्टत्वं वा?

नाद्यः, शैलज्वलनयोरिव शब्दार्थयोः धर्मधर्मिभावविरहात्। न चार्थविषयकत्वाच्छब्दस्य अर्थविशिष्टत्वमुच्यत इति वाच्यम्। निर्विषयकस्य शब्दस्यार्थप्रतीतिजननमन्तरेण अर्थविषयकत्वानुपपत्तेः। प्रतीतौ तु सिद्धायां किं तद्विषयत्वद्वारकतद्धर्मत्वेन? यदि तु शब्दजन्यप्रतीतिविषयत्वमूला तद्धर्मत्वसिद्धिः, तद्धर्मत्वमूला अर्थप्रतीतिः, अर्थप्रतीतिमूलं च तद्विषयत्वम्, तदा अन्योन्याश्रयः चक्रकं वा। तस्मान्नार्थविशिष्टः शब्दः साध्यः।

अर्थप्रत्यायनशक्तिविशिष्टत्वस्य न साध्यत्वम्

न द्वितीयः, अर्थप्रत्यायनशक्तिसिद्ध्यर्थं शब्दप्रयोगाभावात्।

न शक्तिसिद्धये शब्दः कथ्यते श्रूयतेऽपि वा।
अर्थगत्यर्थमेवामुं शृण्वन्ति च वदन्ति च॥

नाप्यर्थप्रतीतिविशिष्टतया शब्दः साध्य इति तृतीयः पक्षः, सिद्ध्यसिद्धिविकल्पानुपपत्तेः। अर्थप्रतीतौ सिद्धायामनुमानवैयर्थ्यम्। असिद्धायां तस्यां तद्विशिष्टता न साध्या। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्।

ननु धूमेऽग्निविशिष्टत्वसाधनेऽपि विकल्पोऽयं तुल्य इति चेत् — न हि अग्निवैशिष्ट्यं धूमे जन्यजनकभावसंबन्धेन। किं तु व्याप्यव्यापकभावेन। तादृशं च

---

[१] जातिरूपविशेषणज्ञानपूर्विका व्यक्तिरूपविशेष्यप्रतीतिः।
[२] व्याप्तिरूपः संबन्धः मतुबर्थः।
[३] श्लो.वा.अनु. ४८.

लिङ्गं गमकमिति न अन्योन्याश्रयस्य, न वा सिद्ध्यसिद्धिविकल्पस्य प्रसक्तिः। शब्दस्तु अर्थप्रतीतेर्जनक इति जन्यायाः अर्थप्रतीतेः वैशिष्ट्यं शब्दे साध्यते चेत् पूर्वोक्तविकल्पावसरः। अतो विषयभेदान्न शब्दोऽनुमानम्।

शब्दानुमानयोः सामग्रीभेदः

सामग्रीभेदात् खल्वपि न शब्दोऽनुमानम्। पक्षसत्त्वसपक्षसत्त्वादिरूपधर्मसापेक्षमनुमानम्, शब्दे तु न तानि रूपाणि सन्ति, न वा अपेक्षितानि।

अन्वयव्यतिरेकावपि शब्दार्थयोर्दुरुपपादौ, देशे काले च शब्दार्थयोरनुगमाभावात् (साहचर्याभावात्)। न हि यत्र देशे शब्दः, तत्रार्थः। कर्णदेशे हि शब्दमुपलभामहे, भूमावर्थम्। नापि यत्र काले शब्दः तत्रार्थः, इदानीं युधिष्ठिररूपार्थाभावेऽपि युधिष्ठिरशब्दसद्भावात्।

अथ शब्दार्थयोः अन्वयाभावेऽपि (साहचर्याभावेऽपि) शब्दार्थविषयकज्ञानयोः साहचर्यं गृह्यत इति चेत् — तत्र वक्तव्यम्, किम् अर्थबुद्धावुत्पन्नायामन्वयो गृह्यते, अनुत्पन्नायां वा? अनुत्पन्नायां तावत् बुद्धिस्वरूपासत्त्वात् कुतोऽन्वयग्रहणम्? उत्पन्नायां त्वर्थबुद्धौ किमन्वयग्रहणेन? इति अन्वयग्रहणस्य नैष्फल्यम्। एतेन व्यतिरेकग्रहणमपि व्याख्यातम्। शब्दाभावेऽप्यर्थसत्त्वात्, अर्थाभावेऽपि शब्दसत्त्वाच्च।

ननु आवापोद्वापद्वारेण शब्दार्थसंबन्धनिश्चये अन्वयव्यतिरेकयोरुपयोगोऽस्ति। यथोक्तं[1] —

"यत्र[2] योऽन्वेति यं शब्दमर्थस्तस्य भवेदसौ"

इति। आवापोद्वापाभ्यां शक्तिग्रह इति सिद्धान्तेऽपि संमतम्। शक्तिग्रहो नाम "अयं शब्दः एतदर्थवाचकः" इत्याकारकः वाच्यवाचकभावग्रहः। तत्र शब्दार्थयोरन्वयव्यतिरेकावुपयुज्येते इति। सत्यमेतत्। समयबलेन = शक्तिग्रहबलेन, अर्थबुद्धौ सिद्धायाम् 'अस्यैव शब्दस्यास्मिन्नेवार्थे शक्तिः' इति शक्तिनिश्चये अन्वयव्यतिरेकयोः उपयोगः 'यः शब्दः येनार्थेनान्वितः स तस्य वाचकः' इति। न तु शब्दादर्थप्रतीतावुपयोगः। धूमाग्न्योरन्वयव्यतिरेकौ तु धूमात् वह्निप्रतिपत्तावेव उपयुज्येते इति महत् वैलक्षण्यं शब्दलिङ्गयोः।

किं च शब्दस्य अर्थसंबन्धज्ञानसापेक्षप्रवृत्तिकत्वेऽपि नानुमानात् अविशेषः। लिङ्गलिङ्गिनोर्हि अविनाभावो नाम संबन्धः, शब्दार्थयोस्तु समयापरनामा वाच्य-

---

[1] श्लो.वा. वाक्य. १६०.

[2] "तत्र योऽन्वेति" इति इदानीमुपलभ्यमानः पाठः।

वाचकभावः संबन्धः प्रतीत्यङ्गम्। एवं च विषयभेदात् सामग्रीभेदाच्च प्रत्यक्षवत् अनुमानादन्यः शब्द इति सिद्धम्।

आप्तोक्तत्वहेतुजन्यत्वात् शाब्दस्यानुमानत्वमिति शङ्कायाः निरासः

यच्चोक्तम् —

"आप्तवादाविसंवादसामान्यादनुमानता" इति।

तत्रोच्यते। आप्तवादत्वेन हेतुना हि पूर्वजातायाः शब्दजन्यार्थबुद्धेः प्रामाण्यं ज्ञायते। न तु शब्दादर्थबुद्धिर्जायते। एवं च तेन शब्दादर्थज्ञानप्रामाण्यस्य अनुमेयत्वेऽपि न शब्दार्थोऽनुमीयते। तदुक्तं श्लोकवार्त्तिक[१] एव —

"अन्यदेव हि सत्यत्वमाप्तवादत्वहेतुकम्।
वाक्यार्थश्चान्य एवेह ज्ञातः पूर्वतरं च सः॥
ततश्चेदाप्तवादेन सत्यत्वमनुमीयते।
वाक्यार्थप्रत्ययस्यात्र कथं स्यादनुमानता॥
जन्म तुल्यं हि बुद्धीनामाप्तानाप्तगिरां श्रुतौ।
जन्माधिकोपयोगी च नानुमायां त्रिलक्षणः॥"

इति। तस्मात् शब्दगतेन आप्तोक्तत्वेन हेतुना यदि शब्दादर्थप्रतीतिः भवेत् तदैव शब्दस्यानुमानेऽन्तर्भावः स्यात्। परं तु जातायां शब्दादर्थप्रतीत्यां प्रामाण्यमेवाप्तोक्तत्वेन हेतुना ज्ञायत इति न शाब्दबोधस्यानुमितिरूपता, नापि शब्दस्यानुमानतेति तात्पर्यम्। 'त्रिलक्षणो[२] हेतुः अनुमायां जन्माधिकोपयोगी न' इत्यन्वयः।

शब्दः विवक्षायां प्रमाणं, न तु अर्थे इति मतस्य निरासः

एतेन शब्दः विवक्षायामेव प्रमाणं न त्वर्थे इति यदुक्तम्, तदपि प्रत्युक्तम्। न हि विवक्षा नाम शब्दस्य वाच्यो विषयः, किं तु अर्थ एव तदतिरिक्तः वाच्यः।

विवक्षायां हि शब्दस्य लिङ्गत्वमिह दृश्यते।
आकाश इव कार्यत्वात् न वाचकतया पुनः॥

शब्दस्य कार्यत्वात् स्वसमवायिकारणतया आकाशानुमाने यथा हेतुः भवति शब्दः, तथा इच्छामन्तरा शब्दप्रयोगासंभवात् इच्छामनुमापयेत् शब्दः, न त्वर्थम्। शब्दादर्थप्रतीतेरेवाभावे 'एतदर्थबोधेच्छयोच्चरितोऽयं शब्दः' इतीच्छाग्रहणं कथं भवेत्। नानार्थकस्थलेऽपि प्रथमं बोधाः जायन्त एव। 'एषु कः प्रयोक्तुः अभिमतः' इति संशये तात्पर्यापरनामिका इच्छा प्रकरणादिभिः निर्णेतव्या भवति। अतश्च

---

[१] श्लो.वा. वाक्य. २४४-२४६.

[२] त्रिलक्षणः = पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वरूपधर्मविशिष्टः॥

आप्तोक्तत्ववत् विवक्षापि न शाब्दबोधहेतुः। तथा च —

शब्दादुच्चरिताच्च वाच्यविषया तावत् समुत्पद्यते
संवित्तिस्तदनन्तरं तु गमयेत् कामं विवक्षामसौ।
अर्थोपग्रहवर्जितात्तु नियमात् सिद्धैवमाजीवता
तद्वाच्यार्थविशेषिता त्वविदिता नैषा तदर्थे भवेत्॥ इति[१]।

न्यायभूषणे शब्दस्यानुमानत्वनिरासः[२]

एतावता न्यायमञ्जर्युक्तरीत्या शब्दस्यानुमानत्वाक्षेपतत्परिहारौ प्रदर्शितौ। अथ न्यायभूषणे निरूपितान्, न्यायमञ्जर्युक्तविषयान् परित्यज्य तदनुक्तविषयान् परं प्रदर्शयामः।

यदुक्तं शब्दः वक्त्रभिप्रायसूचक इति। तदयुक्तम्। शब्दश्रवणानन्तरमर्थेष्व-प्रवृत्तिप्रसङ्गात्। न हि अन्यस्य प्रतीत्या अप्रतीतेऽन्यत्र प्रवृत्तिः संभवति। अति-प्रसङ्गात्। न च शब्दात् विवक्षाप्रतीतौ ततोऽर्थप्रतीतिरिति वाच्यम्। विवक्षाया अपि अर्थेन संबन्धाभावात्, असत्यप्यर्थे विवक्षोत्पत्तिदर्शनात्[३]।

का चेयं विवक्षा? किं शब्दोच्चारणेच्छामात्रम्? किं वा 'अनेन शब्देनामुमर्थं प्रतिपादयामि' इत्येषोऽभिप्रायः? आद्ये न कस्यापि शास्त्रादिश्रवणे वक्तुः श्रोतुर्वा शास्त्रादिकृतौ वा प्रवृत्तिः स्यात्। न हि कश्चिदनुन्मत्तः शब्दोच्चारणहेतुभूतेच्छा-मात्रप्रतिपत्त्यर्थं शास्त्रं वाक्यान्तरं च प्रणेतुं श्रोतुं वा प्रवर्तते। किं च कचटतपादि-दशदाडिमादिवाक्यैः सह सर्ववाक्यानामविशेषप्रसङ्गः, सर्वेषां स्वहेतुभूतेच्छामात्रानु-मापकत्वाविशेषात्।

अथ 'अनेन शब्देनामुमर्थं प्रतिपादयामि' इत्यभिप्रायो विवक्षा, तत्सूचकत्वेन शब्दानामनुमानत्वमुच्यते। तथापि व्यभिचारात् नानुमानं शब्दः, शुकसारि-कोन्मत्तादयो हि न तथाभिप्रायेण वाक्यमुच्चारयन्ति।

अपि च किं वाक्यं समयनिरपेक्षं सत् तादृशमभिप्रायं गमयति, उत समय-सापेक्षम्? प्रथमकल्पे सर्वेभ्यः शब्देभ्यः सर्वार्थप्रतिपत्तिः स्यात्, सर्वेषां पुरुषाणां च प्रतिपत्तिः स्यात्। भाषानभिज्ञश्च कोऽपि न स्यात्। समयसापक्षत्वे चार्थमेव कुतः साक्षान्न गमयति, अभिप्रायबोधद्वारा कुतः गमयति? नापि शब्दश्रवणा-नन्तरमभिप्रायप्रतीतिक्रमेणार्थप्रतीतिरनुभूयते।

---

१ न्या.मं, आ.३.भा.१. पृ. ४१२.

२ न्या.भू.पृ. ३७९-३९०.

३ न्या.भू.पृ.३८४.

किं च "नानुमानं शब्दः, पक्षधर्मत्वादिज्ञानानपेक्षत्वात्, प्रत्यक्षवत्" ।

किं च लिङ्गमनाप्तकृतमपि स्वसाध्यं न व्यभिचरति, शब्दस्तु अनाप्तकृतोऽसत्यार्थ एव स्यात्।

किं च लिङ्गस्य पक्षधर्मत्वादिनिश्चयेनैवाव्यभिचारित्वं निश्चीयते, शब्दस्य तु आप्तोत्वनिश्चयेन प्रवृत्तिसामर्थ्येन च, न तु पक्षधर्मत्वादिनिश्चयेनेति।

किं च लिङ्गमविनाभावबलेनार्थं प्रतिपादयति, शब्दस्तु संकेतमात्रेण। संकेत एवाविनाभाव इति न वाच्यम्। स्वाभाविकत्व-पुरुषायत्तत्वविशेषात्। स्वाभाविको ह्यविनाभावसंबन्धः, संकेतस्तु पुरुषेच्छानुविधायीति।

विरुद्धाविरुद्धार्थभेदाच्च नानुमानं शब्दः। गवादिशब्दो हि सास्नादिमदर्थ-विरुद्धेष्वपि वागादिषु तदन्येषु च व्युत्पादितसमयः प्रयुज्यमानः प्रतीतिं जनयति। धूमादिलिङ्गं तु नाग्न्यादिविरुद्धेषु जलादिष्वविनाभावेन प्रतीतिं कुतश्चित् प्रस्तावादपि जनयति। तस्मान्नानुमानं शब्दः इति।

कुसुमाञ्जलौ वैशेषिकमतनिरासः[१]

प्रत्यक्षमनुमानमुपमानं च नेश्वरबाधकमिति निरूप्य, "शब्दोऽपि न बाधकम् अनुमानानतिरेकादिति वैशेषिकादयः" इत्युपक्षिप्य वैशेषिकमतानुसारेण शब्द-सामान्यस्य, प्राभाकरमतानुसारेण लौकिकशब्दस्य चानुमानेऽन्तर्भावं पूर्वपक्षयित्वा शब्दस्यानुमानानन्तर्भूतत्वं महता परिकरेण कुसुमाञ्जलौ तृतीयस्तबके प्रसाधितम् उदयनाचार्यैः। तत्रत्या रीतिरत्र सरलप्रकारेणोपक्षिप्यते श्रीवीरराघवीयव्याख्यान-सहकारेण।

कुसुमाञ्जलौ अनूदितं वैशेषिकमतम्

पदानां प्रत्येकं शक्तिग्रहात् अर्थस्मृतिजनकत्वमस्तीति वैशेषिकादिसंमतम्। एवं स्मारितानां पदार्थानां यो मिथः संसर्गः स वाक्यार्थः। तद्विषयकज्ञानजनकत्वं वाक्यस्य किमनुमानविधया उत प्रकारान्तरेणेति विचारः। तत्र संसर्गस्यैव ज्ञाप्यत्वात् संसर्गवत्त्वं साध्यमिति निर्विवादम्। पक्षो हेतुश्च क इति विचार्यम्। तत्र पदार्थपक्षकं वा अनुमानं पदपक्षकं वा। आद्ये साध्यस्य संसर्गस्य पक्षगतत्वात् 'पदार्थाः संसर्गवन्तः' इति प्रतिज्ञा युक्तैव। हेतुश्च कः? वाक्यत्वं चेत् तत् साध्यव्यधिकरणम्। साध्यस्य संसर्गस्य पदार्थगतत्वात्, वाक्यत्वस्य पदनिष्ठत्वाच्च। न च पदार्थत्वं पदस्मारितत्वं वा हेतुः; "एते पदार्थाः मिथः संसर्गवन्तः,

---

[१] न्या.कु.३.१३, पृ.२०४.

पदार्थत्वात्, पदस्मारितत्वाद्वा" इत्यनुमानप्रयोग इति वाच्यम्। "गौरश्वः" इति पदस्मारिते अर्थे व्यभिचारात्।

एवं पदपक्षकम् "एतानि पदानि स्मारितार्थसंसर्गवन्ति, वाक्यत्वात्" इत्यनुमानमपि न। तत्र "वाक्यत्वात्" इति हेतुर्यद्यपि न साध्यव्यधिकरणः; तथापि किमिदं वाक्यत्वम्? संसर्गबोधकत्वमिति चेत् तदसिद्धम्। संसर्गस्य संप्रत्यनुमेयत्वात्। पदसमुदायत्वमिति चेत् — पदत्वं नामार्थशक्तत्वम् अर्थस्मारकत्वपर्यवसितमिति "एतानि पदानि स्मारितार्थसंसर्गवन्ति, तत्स्मारकत्वात्" इति प्रयोगो निष्पद्यते। तत्र संसर्गवत्त्वरूपं साध्यं पदेषु बाधितम्। संसर्गो हि संयोगः, समवायः, तादात्म्यं, विशेषणविशेष्यभावो वा यथायथं मिथः पदार्थ एवास्ति, न तु पदे।

अथ संसर्गवत्त्वं नाम संसर्गज्ञापकत्वम्, तच्च पदानामिति चेत् — तत् संसर्गज्ञापकत्वं पदानां किमनुमानविधया, प्रकारान्तरेण वा? पदसमुदायरूपवाक्यस्यानुमानान्तर्भाववादिभिः प्रकारान्तरेणेति वक्तुं न शक्यते। अतः संसर्गज्ञापकत्वं नाम संसर्गानुमापकहेतुत्वमेव। इदं च प्रथमतो हेतुना संसर्गेऽनुमिते सति तादृशानुमित्युत्पत्त्यनन्तरं हेतोः संसर्गानुमापकत्वमस्तीत्येवं ज्ञायते, न तु संसर्गानुमानावसर एव। अत्र कुसुमाञ्जलिपङ्क्तिस्तावत्[१] —

"न च लिङ्गतया ज्ञापकत्वं यत् लिङ्गस्य विषयः, तदेव तस्य, परस्पराश्रयप्रसङ्गात्। तदुपलम्भे हि व्याप्तिसिद्धिः, तत्सिद्धौ च तदनुमानमिति" इति ।

तस्याः अयमर्थः — लिङ्गविधया ज्ञापकत्वं लिङ्गस्य = लिङ्गनिष्ठं यत्, तदेव तस्य मतुपो विषयः = वाच्यम्, तदेव तस्य लिङ्गस्य विषयः साध्यम्, तदेव तस्य मतुपोऽर्थः, न तु संयोगादिकं किमपीति न भवति, अन्योन्याश्रयात्। संसर्गानुमित्युपलम्भे किल हेतोः संसर्गानुमापकत्वेन सह व्याप्तिग्रहः, एतद्व्याप्तिग्रहे सिद्धे किल संसर्गानुमितिः। तथा च पदपक्षकत्वे हेतुर्यथाकथंचिदस्तु। संसर्गवत्त्वं तु न सिध्यति। तथा च शब्दस्य कथमनुमानान्तर्भाव इति चेत् —

उच्यते। हेतुसाध्ययोरन्यथा परिष्कारेण पदार्थपक्षकस्य पदपक्षकस्य चानुमानस्य संभवात्। तथा हि — "एते पदार्थाः मिथः संसर्गवन्तः, आकाङ्क्षायोग्यतासंनिधिमत्पदस्मारितत्वात्, 'गामभ्याज' इतिपदार्थवत्" इति पदार्थपक्षकमनुमानम्। न चैवं संसर्गसामान्यसिद्धावपि विवक्षितसंबन्धविशेषो न सिध्यतीति वाच्यम्। संबन्धिविशेषाधीनो हि संबन्धे विशेषः। संबन्धिनश्च विशिष्यैव पदैरुक्ता इति तदीयत्वेन संबन्धसाधने संबन्धिविशेषादेव संबन्धस्यापि संबन्ध्यन्तरव्यावृत्तत्वान्न

---

[१] न्या.कु. पृ. २०५.

दोष इति। एवम् — "एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्पदत्वात्, 'गामभ्याज' इतिपदवत्" इति पदपक्षकमप्यनुमानम्। साध्यघटकं च संसर्गज्ञानम् 'अर्थं बुद्ध्वा शब्दरचना' इति न्यायसिद्धं रचनाहेतुभूतं वक्तृगतं ज्ञानम्। तथा च संसर्गज्ञानजन्यत्वं साध्यम्, न तु प्रागुक्तं ज्ञानजनकत्वम्। न चैवंरीत्या संसर्गज्ञानस्य सिद्धावपि संसर्गस्यासिद्ध्या इष्टासिद्धिरिति वाच्यम्। ज्ञानावच्छेदकतया तत्सिद्धेः। संसर्गविषयकत्वविशिष्टज्ञानसाधने संसर्गस्यापि साध्यकोटिप्रविष्टतया साध्यत्वात्। यद्वा ज्ञानज्ञानस्य ज्ञानविषयविषयकत्वनियमात् संसर्गज्ञानविषयकानुमितेः ज्ञानविषयसंसर्गविषयकत्वमिति संसर्गस्य अनुमेयत्वसिद्धिः। तत्रापि 'स्मारितार्थसंसर्ग' इत्यत्रार्थघटनेनैव संसर्गस्य साधनात् अर्थरूपसंबन्धिविशेषबलात् संसर्गविशेषसिद्धिः — इति वैशेषिकमतम्।

वैशेषिकमतनिरासः

पदार्थपक्षकानुमानखण्डनम्

अत्रोच्यते —

अनेकान्तः परिच्छेदे संभवे च न निश्चयः।
आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना॥

पदार्थपक्षकानुमानप्रयोगस्तावन्न युक्तः। परिच्छेदः = अवधारणम्। संभवः = योग्यता। तथा च संसर्गवत्त्वसाधने व्यभिचारः। तद्योग्यत्वसाधने च विवक्षितवाक्यार्थनिश्चयो नास्ति। किं च आकाङ्क्षा स्वरूपसती कारणम्, लिङ्गं तु ज्ञायमानतयेति सत्तया कारणस्य ज्ञायमानतया कारणीभूतलिङ्गकोटौ निवेशो न युक्तः। तदर्थं तदनिवेशे केवला योग्यनिष्ठा आसत्तिर्हेतौ प्रवेश्यमाना व्याप्तिनिर्वहणासमर्था, व्यभिचारात्।

तथा हि — परिच्छेदपक्षे 'एते पदार्थाः मिथः संसर्गवन्तः' इति, 'संसृष्टा एव' इति नियमो वा साध्यः। तत्र संसर्गरहितेषु "नद्यास्तीरे फलानि सन्ति" इत्यनाप्तोक्तपदार्थेषु व्यभिचारः। 'आप्तोक्ताकाङ्क्षादिमत्पदस्मारितत्वात्' इति हेतुशरीरे पदे आप्तोक्तत्वं विशेषणमिष्यत इति चेत् — किमिदमाप्तत्वम्? अविप्रलम्भकत्वं वा, प्रमात्मकानुभववत्त्वं वा? आद्ये अविप्रलम्भकेनापि भ्रान्तेनोक्तपदार्थेषु व्यभिचारः। द्वितीयमपि किं सार्वकालिकसर्वविषयकप्रमावत्त्वं, यद्वा किंचिद्विषयकप्रमावत्त्वम्, अथ वा पदार्थसंसर्गात्मकप्रकृतवाक्यार्थविषयकप्रमावत्त्वम्, पदार्थमात्रविषयकप्रमावत्त्वं वा। तत्राद्यमसर्वज्ञस्यासंभवि, भ्रान्तेः पुरुषधर्मत्वात्। द्वितीयम् अनाप्तस्याप्यस्तीति व्यर्थमाप्तोक्तत्वविशेषणम्। तृतीयमेव तु अव्यभिचरितम्।

तथापि तत् दुर्वचम्। वाक्यार्थप्रतीतेः प्राक् 'अयमेतद्विषयकप्रमावान्' इति निश्चयासिद्धेः हेतुज्ञानासंभवात्।

"अर्थेनैव विशेषो हि निराकारतया धियाम्"

इति नयेन[१] प्रकृतज्ञानं प्रकृतवाक्यार्थमादाय निरूप्यम्। वाक्यार्थश्च साध्यत्वाभिमतः संसर्गविशेष एव। तज्ज्ञानं च अनुमितिरूपत्वात् इतः पश्चात् भवेत्, न पूर्वम् इति। चतुर्थमपि न युक्तम्, अनाप्तोक्ते व्यभिचारादेव।

ननु 'एतस्मिन् संसर्गेऽयं प्रमावान्' इति विशिष्याज्ञानेऽपि, 'एतेषां संसर्गेऽयं प्रमावान्' इति सुग्रहमिति चेत् — तदपि दुर्ग्रहमेव। संसर्गस्य संबन्धिविशेषाधीन एव विशेष इति एतेषां मिथः संसर्गस्यैव साध्यत्वात्, तस्य चाननुभूतत्वात् तत्स्मरणपूर्वकं तत्र प्रमात्वनिश्चयायोगात्। तथा च ईदृशाप्तत्वरूपविशेषणस्य असिद्ध्या विशिष्टलिङ्गासिद्ध्या अनुमित्यनुपपत्तिरिति।

अतः संसर्गवत्त्वसाध्यत्वपक्षं परित्यज्य संसर्गयोग्यत्वस्य साध्यत्वरूपः द्वितीयपक्षः स्वीक्रियते चेत् — तावता योग्यत्वानुमितावपि वाक्यफलत्वेनाभिमतस्य संसर्गनिश्चयस्यासिद्धिः। सिद्धसाधनं च। हेतुकोटौ आकाङ्क्षादिवत् योग्यताया निवेशितत्वात् हेतुज्ञानकाल एव योग्यताज्ञानस्य सिद्धत्वात्। एतद्दोषभिया हेतुकोटौ योग्यताया अनिवेशे आकाङ्क्षासत्तिमत्पदस्मारितत्वमात्रं हेतुरिति "अग्निना सिञ्चति" इति पदस्मारितपदार्थेषु व्यभिचारः। तस्मात् पदार्थपक्षकमनुमानमयुक्तम्।

पदपक्षकानुमानखण्डनम्

अथोत्तरार्धेन पदपक्षकानुमानदूषणम्। "एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वात्, 'गामभ्याज' इतिपदवत्" इति पदपक्षकमनुमानम्।

हेतुघटकाकाङ्क्षाविचारः

विशेषणविशेष्यभावस्य आकाङ्क्षात्वनिरासः

तत्र हेतुशरीरे प्रविष्टा आकाङ्क्षा नाम का? न तावत् विशेषणविशेष्यभावः। स हि केनचित् संबन्धेन विशेष्यस्य विशेषणविशिष्टत्वम्, यथा "गाम्" इत्यत्र आधेयतासंबन्धेन कर्मत्वस्य गोविशिष्टत्वम्। स च संसर्गरूप इति वाक्यार्थरूपत्वात् साध्यः कथं हेतुघटको भवेत्? नापि विशेषणविशेष्यभावयोग्यता आकाङ्क्षा, योग्यतारूपविशेषणान्तरानतिरिक्ततया पौनरुक्त्यात्।

---

[१] न्या.कु.४.४.

अविनाभावस्य आकाङ्क्षात्वनिरासः

नापि पदार्थयोरविनाभावः आकाङ्क्षा। "नीलं सरोजम्" इत्यादौ तदभावेऽपि वाक्यार्थप्रत्ययात्। नीलरूपं विनापि हि पुण्डरीकं सरोजम्, सरोजभिन्नाप्यतसी नीला इति। ननु तत्र विशेषधर्मावच्छिन्नयोर्नीलसरोजयोर्विनाभूतत्वेऽपि तद्वृत्तिसामान्यधर्मरूपगुणत्वद्रव्यत्वाश्रययोर्गुणद्रव्ययोरविनाभावोऽस्त्येवेति चेन्न। तथा सति "अहो विमलं जलं नद्याः" इत्येतद्वाक्यानन्तरं "कच्छे महिषश्चरति" इति वाक्यप्रयोगे वाक्यभेदो न स्यात्। "साकाङ्क्षं चेदेकं वाक्यम्" इति हि वाक्यविदः[१]। अस्ति हि नदीकच्छयोरविनाभावरूपा आकाङ्क्षा।

जिज्ञासायाः आकाङ्क्षात्वनिरासः

अथ श्रोतृसमवेता जिज्ञासा आकाङ्क्षेति चेत् — तत्रापि आलोचनीयम्; "रक्तः पटो भवति" इत्यत्र पटे रूपजिज्ञासासद्भावात् तद्वाक्यैकदेशः "पटो भवति" इति भागः यथा अपूर्णः, तथा "पटो भवति" इति वाक्यमपि अनवसितमेव स्यात्, जिज्ञासायाः अविशिष्टत्वात्। तथा च सर्वमपि वाक्यमवाक्यमेव स्यात्, उपर्युपरि जिज्ञासायाः संभवेनापर्यवसानात्।

ननु न सर्वा जिज्ञासा आकाङ्क्षा। किं तु यत्र यावन्ति पदानि प्रयुक्तानि तत्र तावत्स्मारितार्थजिज्ञासैवाकाङ्क्षेति केवलं "पटो भवति" इत्यपि वाक्यमेवेति चेत् — अस्त्वेवम्। परं तु इहेदं विचार्यम्; किमस्यामाकाङ्क्षायां जातायां वाक्यार्थप्रत्ययः, उत ज्ञातायाम्। तत्र जननमात्रेणेति प्रथमपक्षे आत्ममनस्संयोगादिवत्सत्तयैवोपयोगात् ज्ञातहेतुकोटावाकाङ्क्षाविशेषणमनुचितम्। तत्परित्यागेन आसत्तियोग्यतामात्रनिवेशेन हेतूक्तौ "अयमेति पुत्रो राज्ञः" इति वाक्यानन्तरमेव "पुरुषोऽपसार्यताम्" इति वाक्यप्रयोगे राजपदार्थपुरुषपदार्थयोः आसत्तियोग्यतासद्भावात् तत्र संसर्गज्ञानपूर्वकत्वरूपसाध्यस्य, पुरुषस्य राजासंबन्धित्वेन संसर्गवत्त्वरूपसाध्यस्य चाभावात् व्यभिचारः।

जिज्ञासायोग्यतायाः आकाङ्क्षात्वम्

वस्तुतस्तु न जिज्ञासा आकाङ्क्षा। जिज्ञासारहितस्यापि पुरुषस्य वाक्यार्थबोधोत्पत्त्या व्यतिरेकव्यभिचारात्। अतो जिज्ञासायोग्यता आकाङ्क्षेति वक्तव्यम्। योग्यता च न तावत् स्मारिततदाक्षिप्तयोरविनाभावः। "अहो विमलं जलं नद्याः", "कच्छे महिषश्चरति" इत्यत्र वाक्यभेदो न स्यादित्युक्तत्वात्। अपि तु स्मारित-

---

[१] जै.सू. २.१.१४.४६.

तदाक्षिप्तयोरविनाभावे सति तदुत्पाद्यसंसर्गावगमप्रागभावः। तदर्थश्च — स्मारितस्य तदाक्षिप्तस्य वा अविनाभावस्थले, तेन = अविनाभावेन, तदभावे प्रकारान्तरेण यः उत्पादितः, यद्वा अविनाभावे जिज्ञासोपयोगितया वस्तुतो वर्तमाने, यः तेन = पूर्वं तदाक्षिप्तेति तच्छब्दगृहीतेन स्मारितार्थेनोत्पाद्यः संसर्गावगमः, तत्प्रागभावः आकाङ्क्षेति।

तथा हि — पदस्मारितमादायैव "गन्धवती पृथिवी" इत्यादौ साक्षादेव अविनाभावोऽक्षतः। "नीलं सरोजम्" इत्यादौ साक्षादविनाभावाभावेऽपि नीलस्य गुणत्वेन द्रव्यमन्तरा असंभवात्, सरोजस्य च नानावर्णस्य सर्वात्मना वर्णं विना असंभवात् आक्षिप्तमादायाविनाभावः। एवं "गामानय" इत्यादौ गोकर्मकत्वस्य क्रियामन्तरा, आनयनक्रियायाः मूर्तद्रव्यादिकारकमन्तरा असंभवात् आक्षिप्तमादाय अविनाभाव ऊह्यः। एवं च अविनाभाववशादेव तत्र तत्र जिज्ञासापि भवति। सा च स्मारकपदसद्भावे तदर्थान्वयेन शाम्यति। तदभावे चाकिंचित्करत्वेनानुत्पन्नेव अवतिष्ठते।

एतदुक्तं भवति — नाविनाभाव आकाङ्क्षाशरीरे प्रविष्टः। किंतु अविनाभावो न योग्यतेति सूचनार्थम् अविनाभावे सतीत्युक्तम्। तथा च "गामानय" इत्यादौ गोपदस्य धात्वन्वयात् प्राक् साकाङ्क्षत्वस्य, जातेऽन्वये निराकाङ्क्षत्वस्य च लोकानुभवसिद्धत्वात् उत्पाद्यसंसर्गावगमप्रागभाव एव आकाङ्क्षा। तत्पदस्य साकाङ्क्षत्वं नाम तत्पदस्मारितोत्पाद्यः पदान्तरस्मारितेन सह यः संसर्गावगमः तत्प्रागभावः। "जलं नद्याः", "पुत्रो राज्ञः" इत्यादौ षष्ठ्यन्तपदस्य यत्पदार्थेन सह संसर्गावगम उत्पाद्यः, तत्पदार्थेन = जलेन पुत्रेण च, सह तस्योत्पादितत्वात् संसर्गावगमप्रागभावाभावान्निराकाङ्क्षत्वमेव। न च कच्छेन पुरुषेण च सह उत्पाद्यस्य संसर्गावगमस्य प्रागभावोऽस्तीति शङ्क्यम्। तस्यानुत्पाद्यत्वात्। 'अयमेवावगम उत्पाद्यः' इति च सति संभवेऽविनाभावेन, अन्यत्र वक्तृतात्पर्येण, प्रथमश्रुतत्वेन वा केनापि प्रकारेणावसेयम्। तथा च तदुत्पाद्यसंसर्गावगमप्रागभाव एव तस्याकाङ्क्षेति सिद्धम्।

आकाङ्क्षायाः सत्तया शाब्दधीहेतुत्वम्

इयं च सत्तया शाब्दबोधकारणम्। ज्ञाततया कारणत्वं च दुर्वचम्। 'संसर्गावगमप्रागभावः' इत्यस्याभावस्य अवगमरूपप्रतियोगिज्ञानेन ज्ञेयत्वात् प्रतियोगिनश्चावगमस्य संसर्गरूपविषयग्रहणेनैव ग्राह्यत्वात्, शब्दस्यानुमानान्तर्भावपक्षे अनुमितेः प्राक् संसर्गस्यागृहीतत्वेन तदवगमप्रागभावस्य दुर्ग्रहतया हेतोरेव दुर्ग्रहत्वापत्तेः। हेतुग्रहणे च तद्घटकसंसर्गस्यापि प्रागेव सिद्धिस्वीकारप्रसङ्गात् अनु-

मानवैयर्थ्यम्। तत्सिद्धम् "आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना" इति। अतो द्विविधानुमानप्रयोगस्यापि दूषितत्वात् शब्दो नानुमानम्।

लौकिकशब्दस्यानुमानान्तर्भाववादिप्राभाकरमतनिरासः[१]

एवं सर्वस्य शब्दस्यानुमानान्तर्भाववादिनां वैशेषिकाणां मतं निरस्तम्। अथ वेदस्य पृथक् प्रमाणत्वं, लौकिकशब्दस्य अनुमानतां चातिष्ठमानानां प्राभाकराणामर्धजरतीयपक्षः उपन्यस्य निरस्यते।

प्राभाकरमतानुवादः

लोके व्यवहाराच्छक्तिग्रह इति पदानां कार्यान्विते शक्तिः। 'य एव लौकिकास्त एव वैदिकाः' इति न्यायेन वेदस्याप्यन्विताभिधायकत्वमतः सिद्धम्। तत्र लोके "एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्पदकदम्बत्वात्" इत्यनुमानत एव वक्तृज्ञानरूपसाध्यविशेषणतया संसर्गस्याप्यनुमितत्वात्, सत्यपि अन्विताभिधानशक्तिबलात् बोधे सोऽनुमितिगृहीतार्थग्रहरूप एवेति लौकिकः शब्दोऽनुवादभूतः। न त्वेवं वेदे; तस्य अपौरुषेयत्वेन वक्तुरभावेन तज्ज्ञानानुमानप्रसक्त्यभावात् संसर्गानुमित्यसंभवात् अन्विताभिधानशक्त्यधीनबोधस्यैव प्राथम्यादिति। किं च पदानामपूर्वाख्यकार्यतदन्वितान्यतराभिधायकत्वात् लौकिकवाक्यस्य च सर्वलाक्षणिकत्वात् 'लाक्षणिकं पदं नानुभावकम्' इति सिद्धान्तान्न शब्दविधया प्रामाण्यम्। वेदश्च कार्यपर एवेति।

इदं तेषामाकूतम्। भाष्यकारेण शबरस्वामिना[२] —

"शास्त्रं शब्दविज्ञानादसंनिकृष्टार्थविज्ञानम्"

इति शब्दप्रमाणलक्षणप्रसङ्गे शास्त्रपदप्रयोगात् शास्त्रात्मकस्य शब्दस्यैव पृथक्त्वमनुमन्यते। लौकिकशब्दस्य तु अनुमानता। तदुक्तं प्रकरणपञ्चिकायां[३] —

नन्वशास्त्रमपि शाब्दमस्ति लौकिकम्, तत् किमिति न लक्षितम्। उच्यते — न शास्त्रव्यतिरिक्तं शाब्दमस्ति। शब्दाद्धि यद्विज्ञानमसंनिकृष्टेऽर्थे तत् शास्त्रं स्यात्। न च वेदव्यतिरेकेण तत् संभवति। लौकिकं वाक्यं नार्थे स्वयं निश्चयमुत्पादयति। लौकिकवचसामनृतभूयिष्ठत्वात् अर्थव्यभिचारस्य शङ्कितत्वात्।

अथ वास्त्येव निश्चयोपायः। यो हि पुरुषः एवमवधारितः 'नायमशक्तो न प्रमादी संभवदेतदर्थविषयप्रमाणः सकलाशयदोषरहितश्च, नायमविज्ञाय अन्वय-

---

[१] न्या.कु.३. १४, पृ. २१२.
[२] शा.भा. १.१.५.
[३] प्र.पं.शास्त्रपरिच्छेदे, पृ. २४२-२४४.

मर्थानाम् अन्विातार्थानि प्रयुङ्क्ते' इति, तद्वाक्यप्रयोगस्यान्वयज्ञानपूर्वकत्वात् अन्वयज्ञानं तावत् अनुमीयते। अन्वयज्ञानाच्चान्वयोऽप्यनुमीयते। ज्ञानं हि ज्ञेयाविनाभावि ज्ञेयानुमाने भवत्येव लिङ्गम्। तदेवं लौकिकाद्वचसः लिङ्गभूतात् वक्तृज्ञानमनुमीयते। ततोऽर्थं निश्चित्य व्यवहारः प्रवर्तते। एवं च निश्चितेऽन्वये निवृत्तानन्वयाशङ्कात् वाक्यादप्यर्थनिश्चयो जायते। किं तु तस्यां तद्वाक्यस्यानुवादकतैव। अत एव लौकिकं वचनं न शाब्दं प्रमाणम्। अभिप्राये शब्दो लिङ्गम्, अभिप्रायोऽप्यर्थे लिङ्गम्, शब्दस्त्वर्थे पश्चात् निश्चयं जनयन्नपि अनुवादकत्वान्न प्रमाणम्।

— इति।

प्राभाकरमतखण्डनम्

तदेतत् प्राभाकरमतं वैशेषिकमतादपि स्थूलतरम्। व्यवहारात् अन्विताभिधानशक्तिर्वाक्यस्य निर्णीतेति आकाङ्क्षायोग्यतासत्तिमत्पदकदम्बज्ञानरूपसामग्री यथा वेदे तथा लोकेऽपि बोधं जनयेदेव। क्लृप्तसामग्रीसत्त्वेऽपेक्षणीयान्तराभावेन विलम्बायोगात्। अतो वाक्यजन्यबोध एव प्रथमः। अनुमितिरूपसंसर्गज्ञानं तु पश्चात्कालिकम्। अनुमितिहेतुः विशिष्टलिङ्गज्ञानं हि नाम बोधसामग्रीत्वेनोक्तमाकाङ्क्षादिर्विशिष्टपदकदम्बज्ञानमेव। तथा च ईदृशलिङ्गज्ञानानन्तरं साध्यहेत्वोर्व्याप्तिज्ञानादिकमधिकमनुमितावपेक्ष्यत इति। अतो वेदवल्लोकेऽपि पदार्थान्वयः प्रागेव प्रतीत इति विलम्बितेनानुमानेन किं निर्णेयमस्ति। सिद्धेऽनुमित्ययोगात्। पश्चात् अनुमितिसत्त्वेऽपि लिङ्गमेवानुवादरूपं ज्ञातज्ञापकत्वात्, न शब्दः।

आप्तोक्तत्वनिश्चयस्य शाब्दबोधं प्रत्यकारणत्वम्

अथ लोके शब्दजन्यबोधे "अयमाप्तः" इति निश्चयोऽपि कारणमिति चेत् — न। व्युत्पत्तिकाले वक्तुराप्तत्वनिश्चयाभावेऽपि पदानां बोधजनकत्वस्यावधारणात् बोधं प्रति आप्तत्वनिश्चयस्याहेतुत्वात्। अशक्यं चैतस्य कारणत्वकल्पनं वेदे लोके च। तथा हि — आप्तत्वनिश्चयस्य बोधसामान्येऽपेक्षितत्वे वेदात् बोधो न स्यात्। तत्र वक्तुरभावेन तस्य दुर्घटत्वात्। न च लौकिकपदघटितसामग्रीमात्रम् आप्तत्वनिश्चयसापेक्षमिति वाच्यम्। वैदिकलौकिकपदभेदे हि इदं शक्तिवैलक्षण्यं स्यात्। स एव न, लोकवेदाधिकरणविरोधात्।

ननु "नद्यास्तीरे फलानि सन्ति" इत्यनाप्तवाक्यजन्यबोधे विसंवादात् पौरुषेयवाक्ये प्रामाण्यव्यभिचारदर्शनात् वेदवत् इह सामग्री वर्तमानापि संदेहात् कार्याक्षमा भवतीति चेत् — न। सामग्र्यां सत्यामन्यादृशसंदेहस्य कार्यप्रतिबन्धकत्वायोगात्। चाक्षुषज्ञानस्य क्वचित् भ्रमत्वदर्शनेन चक्षुषः प्रामाण्यसंदेहे सत्यपि हि विष्फारितं चक्षुः वस्तु दर्शयत्येव।

ननु 'सति संदेहे निश्चायकं न भवति' इति यत्, अयं निर्बन्धः ज्ञायमानकरणस्य, लिङ्गं हि सति संदेहे न निश्चायकम्। चक्षुस्तु न ज्ञायमानतया करणमिति चेत् — न। यो हि संदेहः सामग्र्यामनुप्रविष्टं किमपि कारणं विघटयति, तस्मिन् सति कार्याभाव इति युक्तम्। इह च संदेहः कुत्र? किमाकाङ्क्षादिविशेषणविशिष्टवाक्यविषये, किं वा वाक्यजन्यबोधप्रामाण्यविषये, आहोस्वित् वाक्यप्रयोक्तुराप्तत्वविषये?। नाद्यः, तत्र सर्वस्याप्यंशस्य वेद इवासंदिग्धत्वात्। न द्वितीयः, बोधप्रामाण्यसंशयस्य बोधरूपधर्मिग्रहणाधीनत्वात् तदर्थं बोधोत्पत्तेरावश्यकत्वेन तदनुत्पत्तिवर्णनायोगात्। न तृतीयः, आप्तत्वनिश्चयस्य वेदे व्यभिचारात् अकारणत्वस्य कथ्यमानत्वात्, अनुपयुक्ताप्तत्वसंशयस्य अकिंचित्करत्वात्। न केवलं लोकवेदयोरैकशब्द्यात् वेदे व्यभिचारात् आप्तत्वनिश्चयस्याकारणत्वम्। किंतु लोके व्यभिचारादपि। भवति हि वेदानुकारेण उदात्तादिस्वरसमावेशेन पठ्यमाने मन्वादिवाक्ये अपौरुषेयत्वाभिमानिनः गौडस्यानधीतवेदस्य (पञ्चिकाकारस्य) मीमांसकस्यार्थनिश्चयः।

नन्वाप्तत्वनिश्चयो वाक्यार्थप्रमां प्रति कारणम्। अयं तु मन्वादिवाक्यतोऽर्थनिश्चयः भ्रान्तिरिति चेत् — न। मनुप्रणीतत्वनिश्चयात् पश्चाज्जायमानस्यार्थनिश्चयस्य अस्य च समानविषयकतया भ्रान्तित्वायोगात्। एवं चाप्तत्वनिश्चयः न शाब्दबोधं प्रति कारणम्, अपि तु उत्पन्नशाब्दबोधविशेष्यकप्रामाण्यप्रकारकज्ञानं प्रति कारणमिति सिद्धम्।

शाब्दबोधं प्रति अनाप्तोक्तत्वज्ञानाभावस्य अकारणत्वम्

ननु शाब्दबोधं प्रति आप्तोक्तत्वनिश्चयः कारणं मा भूत्। अनाप्तोक्तत्वज्ञानविरहः कारणमस्तु। मन्वादिवाक्येऽपौरुषेयत्वाभिमानिनोऽपि अनाप्तोक्तत्वज्ञानविरहसत्त्वात् न व्यभिचार इति चेत् — इदं कल्पनं किमर्थम्; अशक्यं चेदम्। तथा हि — किमस्यानाप्तोक्तत्वज्ञानविरहस्य लोकवेदसाधारण्येन कारणत्वं स्वीकृत्य, येन वेदापौरुषेयत्वमबुद्धं संदिग्धं वा, तस्यापौरुषेयत्वनिश्चयशून्यस्य व्युत्पत्तिमतः वेदवाक्यश्रवणेऽर्थप्रत्यय एव न जायत इत्युच्यते; किं वा लोकवाक्यमात्रे तस्य कारणत्वं स्वीकृत्य वेदे जायत एवार्थप्रत्ययः, किं तु जातोऽपि निश्चितप्रामाण्यो न भवतीति।

नाद्यः। साधकयुक्त्यभावात्, अनुभवविरुद्धत्वाच्च। न च संसर्गग्रहाभावेऽपि असंसर्गाग्रहमात्रे सति 'पीतः शङ्खः' इत्यादिसंसर्गव्यवहारस्यास्मदिष्टत्वात् वेदेऽप्येवम्, न तु अर्थप्रत्यय इति वाच्यम्। तत्र वस्तुतः शङ्खस्य पीतरूपसंसर्गबाधकसद्भावात् तथा त्वदिष्टत्वेऽपि, अत्र वेदवाक्यार्थस्य वस्तुतः संसृष्टत्वेन

तदयोगात्। स्थितस्य असंसर्गस्य अग्रहो हि असंसर्गाग्रहः। बाधकाभावेऽपि असंसर्गाग्रहाङ्गीकारे शब्दस्थले सर्वत्र संसर्गग्रहोच्छेदप्रसङ्गात्।

'जातोऽपि' इत्यादिद्वितीयपक्षे वेदजन्यबोधं प्रति अपौरुषेयत्वनिश्चयस्य अकारणत्वमेव सिद्धमिति तत्राप्रामाण्यज्ञानात्मकाश्रद्धानिवृत्तिः कथमिति चिन्त्यताम्। ज्ञायमानतया अकारणे चक्षुरादौ सति, शङ्कायां सत्यामपि प्रत्यक्षं भवत्येव किल। तत्र यथा पश्चादेव सफलप्रवृत्तिजनकत्वादिज्ञानात् अप्रामाण्यशङ्कानिवृत्तिः, तथा वेदजन्यबोधेऽपीति चेत्; लोकेऽपि सामग्रीवशात् जाते बोधे आप्तोक्तत्वावधारणादिना अप्रामाण्यशङ्कानिवृत्तिर्भविष्यति, न्यायस्य अविशेषात्।

लौकिकशब्दस्येव वेदस्याप्यनुवादकत्वापादनम्

अन्यथा एतदापत्तिपरिहाराय वेदेऽप्यपौरुषेयत्वनिश्चयापेक्षापक्षमेव परिगृह्य अनाप्तोक्तत्वशङ्कानिरासरूपकारणसापेक्षत्वात् लौकिकशब्दस्यानुवादकत्वस्वीकारे वेदेऽपि तत्कारणसापेक्षत्वस्य अविशिष्टत्वात् तस्याप्यनुवादकताप्रसङ्गः। तत्राप्यनुमानेन संसर्गनिश्चयसंभवात्।

ननु "एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि, आप्तोक्ताकाङ्क्षादिमत्पदकदम्बत्वात्" इति लोके शक्यमनुमातुम्; न तु वेदे, अपौरुषेये ज्ञानपूर्वकत्वाप्तोक्तत्वयोरयोगादिति चेत् — उच्यते। अनाप्तोक्तत्वशङ्कानिरासस्यैव लोकेऽपि प्रामाण्यकारणत्वात् हेतुशरीरे आप्तोक्तत्वं न निवेश्यम्। निरस्तानाप्तोक्तत्वशङ्कत्वमेव पदविशेषणमिति तत्र साम्यमेव।

इयांस्तु विशेषः — लोके पदपक्षीकारेण पदत्वहेतुना संसर्गज्ञानपूर्वकत्वं साध्यते। वेदे तु तदसंभवात् पदार्थपक्षीकारेण तादृशपदस्मारितत्वेन हेतुना संसर्ग एव साध्यते। तत्र च ज्ञानद्वारा संसर्गसाधनापेक्षया साक्षात् संसर्गसाधनं ज्याय एव। ज्ञानपूर्वकत्वं साध्यमिति पक्षेऽपि संसर्गसाधने एव तात्पर्यम्। किं च भवता किम् आप्तोक्तत्वनिश्चयादनन्तरमनुमानप्रवृत्तिः स्वीक्रियते? ततः पूर्वं वा? पूर्वं चेत्, हेतुकोटावाकाङ्क्षादिमत्त्वमात्रनिवेशात् अनाप्तवाक्ये हेतुसत्त्वात् व्यभिचारः। अतः प्रथमपक्षस्वीकारे आप्तोक्तवाक्येषु अर्थसंसर्गस्यावश्यकत्वेन व्यभिचाराभावात् लोकेऽपि साक्षात् संसर्गसाधनसौकर्याय पदार्थपक्षकानुमानस्वीकारो युक्ततरः।

तथा च "इमे पदार्थाः मिथः संसृष्टाः, विशेषेण निरस्तपुरुषदोषाशङ्कपदस्मारितत्वात्" इत्यनुमानेन लोके संसर्गनिश्चये वेदेऽप्येवं संभवात्, लोके प्रकारान्तराश्रयणेऽपि वेदे एवमनुमानसंभवाच्च अर्थेऽनुमानेन निर्णीते सति वेदस्याप्यनुवादकत्वं कुतो न भवति — इति।

इदं चानुवादकत्वापादनं पदानामन्विताभिधानशक्तिरस्तीत्यभ्युपगम्य। उक्तरीत्या अनुमानेन निर्वाहे तु तत्र प्रमाणमेव नास्ति। विशिष्टार्थप्रतीत्यन्यथानुपपत्त्यैव शब्दस्यान्विते शक्तिकल्पनात्, सा च प्रतीतिरनुमानेनैवोपपन्नेति वृथा अन्वित-शक्तिकल्पनप्रयासः।

यदि च आकाङ्क्षादिमत्पदकदम्बज्ञानमात्रेण व्याप्तिप्रतिसन्धानादेः प्रागेव अन्वयप्रतीतिरिति वेदेऽन्विताभिधानमिष्यते, तदा लोकेऽप्येवमेव। तस्माच्छब्द-स्यानुवादकतेति कल्पना विपरीतकल्पनैव, लिङ्गस्यैव शब्दप्रतीतार्थानुवादकत्वात्।

अथ शब्दतोऽर्थनिर्णयस्य जातत्वात्, सिद्धे अनुमितेर्नावकाश इति मन्यते; तर्हि शब्दस्थलेऽनुमानकथाया एव नावसरः। तस्मात् लौकिको वैदिको वा सर्वोऽपि शब्दः पृथगेव प्रमाणम्, नानुमानगतार्थः इति सिद्धम्।

एतावता कुसुमाञ्जल्यनुसारेण शब्दस्य अनुमानान्तर्भावं वदतः वैशेषिकस्य मतं निरस्तम्। अथ मणिग्रन्थानुसारेण तन्मतं निरस्यते।

तत्त्वचिन्तामण्यनुसारेण शब्दस्यानुमानगतार्थतानिरसनम्[१]

आदौ शब्दस्य प्रमितिकरणत्वस्थापनम्

ननु शब्दः न प्रमितिकरणम्। करणविशेषः प्रमाणम्, (प्रमितिकरणम्)। करणं च तत् यस्मिन् सति क्रिया भवत्येव। फलायोगव्यवच्छिन्नं कारणं करणम्, फलोपधायकमिति यावत्। न च शब्दे सति अवश्यं प्रमा भवति। आकाङ्क्षादि-ज्ञानविरहदशायां पदार्थस्मरणादिव्यापारविरहदशायां च शब्दात् प्रमानुत्पत्तेः अन्वय-व्यभिचारात्। तथा च ''शब्दो न प्रमाणम्, प्रमोपाधायकत्वात्यन्ताभावात्''। न च साध्याविशिष्टत्वं हेतोरिति शङ्कनीयम्। प्रमोपधायकान्यत्वस्य साध्यत्वात्, प्रमोप-धायकत्वात्यन्ताभावस्य हेतुत्वात्। अन्योन्यात्यन्ताभावभेदेन साध्यहेत्वोर्भेदात्।

न च ''शब्दो न प्रमाणम्'' इति प्रतिज्ञावाक्यस्य प्रमितिजनकत्वे प्रमोपधाय-कान्यत्वव्याघातः। प्रमित्यजनकत्वे प्रमाणाभावः। भवदुक्तवाक्यस्य अप्रामाण्य-प्रमित्युपधायकस्य सद्भावे शब्दमात्रस्य प्रमित्यनुपधायकतायाः निष्प्रमाणकत्वादिति यावत्; इति वाच्यम्। ''शब्दो न प्रमाणम्'' इति वाक्यस्य प्रमित्यनुपधायकत्वेऽपि एतज्जन्यपदार्थोपस्थिति-उपस्थितपदार्थासंसर्गाग्रहसहकृतस्य मानस्य = मनसः, अविसंवादात् = प्रमोपधायकान्यत्वविषयकप्रमाजनकत्वात्। तथा च मन एव

---

[१] त.चिं.म, च.भा.प्र.प.पृ. १४.

शब्दस्य प्रमोपधायकान्यत्वे प्रमाणम्, हेतुनिर्देशश्च अप्रामाण्यशङ्काव्युदासाय। इति चेत् — न।

आकाङ्क्षायोग्यतादिज्ञानविशिष्टस्य पदार्थस्मरणादिव्यापारवतः शब्दस्य प्रमित्युपधायकत्वेन तथाभूतात् शब्दात् प्रमित्युत्पत्तेरावश्यकत्वात्। अतथाभूतात् = आकाङ्क्षाज्ञानादिसहकारिरहितात्, शब्दात् प्रमित्यनुत्पत्तावपि न क्षतिः। स्वेतरयावत्कारणसत्त्वे स्वसत्त्वे यदि कार्यं न जायते तदैवान्वयव्यभिचारात्। अन्यथा आलोकाद्यभावे चक्षुरादेरपि प्रमित्यजनकत्वं वर्तत इति अप्रमाणत्वं स्यात्। तथा च "शब्दः न प्रमाणम्, स्वेतरकारणविरहदशायां प्रमित्यनुपधायकत्वात्" इत्यनुमाने चक्षुरादौ व्यभिचार इत्युक्तं भवति।

शाब्दत्वरूपविलक्षणजातिसाधनम्[१]

अत्र केचित् — शब्दः स्वविषयकश्रावणप्रत्यक्षं प्रति हेतुः, तथा स्वलिङ्गकानुमितिं प्रति च हेतुः। तदन्यप्रमां प्रति तु न हेतुः। न चैवं वाक्यश्रवणानन्तरं वाक्यार्थबोधः कथं स्यादिति वाच्यम्। वाक्यघटकीभूततत्तत्पदेभ्यः तत्तत्पदार्थोपस्थितौ मनसैव उपनीतभानात्मकवाक्यार्थज्ञानसंभवात्।

न च तथापि वाक्यश्रवणानन्तरं शाब्दत्वजातिविशिष्टः वाक्यार्थबोधः कथं स्यात्, तादृशजात्यवच्छिन्नबोधस्यापि पदार्थोपस्थितिसहकृतमनोमात्रहेतुकत्वे मानसत्वविशिष्टसाक्षात्कारमात्रस्यैव शाब्दत्वापत्तिरिति वाच्यम्। शाब्दत्वरूपातिरिक्तजातौ मानाभावात्। शाब्दत्वस्यातिरिक्तजातेरभ्युपगमे तदवच्छिन्नोत्पत्तिनियामकतया वृत्त्या पदजन्यपदार्थोपस्थित्यादेर्हेतुताया अवश्यकल्पनीयत्वेन गौरवप्रसङ्गाच्च इत्याहुः।

तदसत्। "अमुमर्थं शाब्दयामि", "अयमर्थः शाब्दितः" इत्याद्यनुभवसिद्धायाः शाब्दत्वजातेः अपह्नोतुमशक्यत्वात्। अत एव शाब्दत्वावच्छिन्नं प्रति वृत्त्या पदजन्यपदार्थोपस्थित्यादेः कारणत्वकल्पनायां गौरवमपि प्रामाणिकत्वान्न दोषाय।

वस्तुतस्तु "अमुमर्थं शृणोमि" "श्रुतमेवेदं पुराणादिभ्यः" इत्याकारकानुभवसिद्धैव शाब्दत्वजातिः। न च श्रुधातोः श्रावणप्रत्यक्ष एव शक्तेः शाब्दत्वजातिः कथं तादृशानुभवविषय इति वाच्यम्। श्रुधातोः नानार्थत्वात्। "आत्मा वा अरे श्रोतव्यो मन्तव्यः" इत्यादिश्रुतौ "अयमर्थो मया श्रुतः" इत्यादिलौकिकवाक्ये च शाब्दबोधेऽपि श्रुधातोः प्रयोगात्।

न च तत्र शाब्दे लक्षणेति वाच्यम्। श्रुवः प्रत्यक्षे लक्षणेत्यस्यापि सुवचत्वात्।

---

[१] त.चिं.म.व्या.माथुरी, च.भा.प्र.प. पृ. १९.

शाब्दत्वस्य मानसत्वव्याप्यत्वमिति शङ्का

अथास्तु शाब्दत्वं जातिः, अस्तु वा तदवच्छिन्नं प्रति पदज्ञानजन्यपदार्थोपस्थित्यादेर्हेतुत्वम्। तथापि सा जातिः मानसत्वव्याप्यैव। तथा च चक्षुरादिवत् शब्दोऽपि प्रत्यक्षप्रमाणान्तर्गत एव, न तु प्रमाणान्तरम्।

न च शाब्दत्वस्य मानसत्वव्याप्यत्वे यागादिविषयकशाब्दबोधानन्तरं ''यागं साक्षात्करोमि'' इत्यनुव्यवसायापत्तिः, तथा ''यागादिकं नानुमितं, न वा साक्षात्कृतम्, किं तु श्रुतमेवेदं पदेभ्यः'' इत्यनुव्यवसायानुपपत्तिश्चेति वाच्यम्। लौकिकविषयतात्मकसाक्षात्कारत्वावच्छिन्नविषयकत्वतदभावयोः उक्तानुव्यवसायविषयत्वात्। एतन्मते शाब्दस्य मानसोपनीतभानात्मकतया लौकिकविषयकत्वाभावात् यागादेः शाब्दबोधानन्तरं न ''यागं साक्षात्करोमि'' इत्यनुव्यवसायापत्तिः, न वा ''यागादि न साक्षात्कृतम्'' इत्यनुव्यवसायानुपपत्तिरिति। अन्यथा ''सुरभि चन्दनम्'' इत्युपनीतभानानन्तरं ''सौरभं साक्षात्करोमि'' इत्यनुव्यवसायापत्तेः, ''सौरभं न साक्षात्करोमि'' इत्यनुव्यवसायानुपपत्तेश्च।

न च शाब्दत्वस्य मानसत्वव्याप्यत्वे पदाजन्योपस्थितिविषयघटादीनामपि यागादिपदजन्यशाब्दबोधे उपनीतभानापत्तिः। तथा च ''यागादिकं शृणोमि'' इत्यनुव्यवसायवत् ''घटादिकं शृणोमि'' इत्यनुव्यवसायः स्यादिति वाच्यम्। शाब्दत्वावच्छिन्नविषयतायाः तत्राभावेन तादृशानुव्यवसायाभावात्। यदंशे वृत्त्या पदजन्यपदार्थोपस्थित्यादिजन्यत्वं तत्रैव शाब्दत्वावच्छिन्नविषयतायाः सत्त्वात्; इति चेत् —न।

शाब्दत्वस्य मानसत्वव्याप्यत्वखण्डनम्

शाब्दत्वजातेर्मानसत्वव्याप्यत्वे प्रमाणाभावात्। तथात्वेऽपि तदवच्छिन्नं प्रति वृत्त्या पदजन्यपदार्थोपस्थित्याकाङ्क्षाज्ञानादेर्हेतुत्वस्यावश्यकत्वेन लाघवगौरवानवकाशात्।

न च शाब्दसामग्रीदशायां मानससामग्र्याः आवश्यकत्वात् मानससामग्र्येव शाब्दत्वजातेर्मानसत्वव्याप्यत्वे प्रमाणमिति वाच्यम्। मानसज्ञानं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वाभावस्य असिद्धतया तदानीं मानससामग्र्या अपि संदिग्धत्वात्।

न च शाब्दत्वस्य मानसत्वविरुद्धत्वे मानसत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम्; मानसत्वव्याप्यत्वे च तदा मानसोत्पत्ताविष्टापत्त्या न कल्पनीयमिति लाघवज्ञानसहकृतं ''शाब्दत्वं मानसत्वव्याप्यत्वतदभावान्यतरवत्,

प्रमेयत्वात्'' इत्यनुमानमेव शाब्दत्वस्य मानसत्वव्याप्यत्वे प्रमाणमिति वाच्यम्। न हि ममापि मानसत्वावच्छिन्नं प्रति शाब्दसामग्रीत्वेन पृथक् प्रतिबन्धकत्वम्। अपि तु अनुमित्यादिसामग्रीसाधारणेन मानसेतरज्ञानसामग्रीत्वेन। तच्चानुमित्याद्युत्पत्ति-दशायां मानसोत्पत्तिवारणाय भवतामप्यावश्यकमिति कुतो लाघवम्।

परं तु विपरीतमेव गौरवम्। तथा हि — शाब्दत्वस्य मानसत्वविरुद्धत्वे मानसेतरज्ञानसामग्र्याः मानसत्वमेव प्रतिबध्यतावच्छेदकम्। मानसत्वव्याप्यत्वे तु शाब्देतरमानसत्वमेव प्रतिबध्यतावच्छेदकम्। अन्यथा स्मृतिसामग्रीसत्त्वे, भिन्न-विषयकलौकिकप्रत्यक्षसामग्रीसत्त्वे, चाक्षुषाद्युपनीतभानादिसामग्रीसत्त्वे च मान-सान्तरस्येव शाब्दात्मकमानसस्याप्यनुत्पत्त्यापत्तेः। तथा च मानसत्वव्याप्यत्वे प्रतिबध्यतावच्छेदकं गुरुशरीरम्।

किं च शाब्दत्वस्य मानसत्वव्याप्यत्वे यत्र पदजन्ययागाद्युपस्थितिः पदाजन्य-घटाद्युपस्थितिश्च समूहालम्बनोपस्थितिरूपा, ततः आकाङ्क्षायोग्यतादिविषयक-समूहालम्बनज्ञानं, ततो यागादेः शाब्दबोधः, तत्र शाब्दबोधसमये घटादेरपि मानसापत्तिः। न चेष्टापत्ति; शाब्दबोधानन्तरं ''घटं जानामि'' इत्यनुव्यवसायापत्तेः।

अपि च योग्यतासंशयदशायामपि शब्दश्रवणानन्तरं वाक्यार्थनिश्चयोऽनु-भवसिद्धः। स कथं स्यात्? योग्यतासंशये सति मानससंशयसामग्रीसत्त्वात् अर्थ-संशयोत्पत्त्यापत्तेः। एकपदार्थेऽपरपदार्थवत्त्वस्य योग्यतात्वात्। अतः शाब्दबोधः मानसातिरिक्तः इति मथुरानाथतर्कवागीशाः।

लीलावतीकारोक्तपदपक्षकानुमानोपन्यासः[१]

तथापि शब्दो न प्रमाणान्तरम्, पदार्थसंसर्गरूपस्य वाक्यार्थस्य अनुमानादेव सिद्धेः। तथा हि — '' 'गामभ्याज दण्डेन' इति पदानि, वैदिकपदानि वा तात्पर्य-विषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वात् 'घटमानय' इतिवत्''। तात्पर्यविषयीभूतो यः स्मारितपदार्थसंसर्गः तज्ज्ञानपूर्वकाणीत्यर्थः।

यत्तु लीलावतीकारेण 'योग्यतासत्तिमत्त्वे सति संसृष्टार्थपरत्वात्', 'तत्परसंनिधि-मत्त्वाद्वा' इति हेतुद्वयमुक्तं, तन्न सम्यक्। संसृष्टो हि योऽर्थः तत्परत्वं, तत्पर-संनिधिमत्त्वं वा असिद्धम्, संसर्गस्य अनुमानात् प्रागप्रतीतेः।

ननु एकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छया उच्चरितत्वं संसृष्टार्थपरत्वम्; एक-पदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छया उच्चरितत्वे सति संनिधिमत्त्वं तत्परसंनिधि-

---

[१] न्या.ली. पृ. ५२६-५३०; त.चिं.म, च.भा. प्र.प. पृ. २२.

मत्त्वम्, अतो न दोष इति चेन्न। अनाप्तोक्ते निराकाङ्क्षे च वाक्ये व्यभिचारात्। अनाप्तोक्तपदेन योग्यतारहितं वाक्यं "पयसा सिञ्चति" इत्यादिकं विवक्षितम्। अनाकाङ्क्षपदेन "घटः कर्मत्वमानयनं कृतिः" इत्यादि वाक्यं विवक्षितम्।

परं तु 'योग्यतावत्त्वे सति' इति हेतुविशेषणे निवेशिते, अनाप्तोक्ते अयोग्यवाक्ये न व्यभिचारः, साकाङ्क्षत्वनिवेशेन निराकाङ्क्षे न व्यभिचारः। तथापि यथाश्रुत-लीलावतीदूषणमेतत्।

अनुमानेन संसर्गज्ञानसाधने संसर्गस्यापि सिद्धिः

नन्वनेनानुमानेन संसर्गज्ञानस्य सिद्धावपि संसर्गस्य कथं सिद्धिरिति चेन्न। ज्ञानावच्छेदकतया तत्सिद्धेः। परामर्शे ज्ञानांशे संसर्गस्य विशेषणतया भानात् अनुमितौ विशेषणतावच्छेदकतया संसर्गस्य भानम्; वह्निज्ञानानुमितौ वह्नि-भानवत्।

किं च ज्ञानविषयकं ज्ञानं ज्ञानविषययावद्विषयकमिति व्याप्तेः, ज्ञानविषयकानु-मितौ ज्ञानविषयसंसर्गस्यापि विषयत्वमिति संसर्गसिद्धिः।

ननु नायं नियमः, "ज्ञानम्" इतिपदजन्ये शाब्दज्ञाने, "आत्मा ज्ञानवान्" इत्यनुमितौ च व्यभिचारात्। न च विषयविशिष्टतया तज्ज्ञानावगाहिज्ञानस्य तज्ज्ञानयावद्विषयविषयकत्वमिति नियम इति वाच्यम्। "घटः श्यामः" इति ज्ञानविषयके "घटज्ञानम्" इति शब्दजन्ये ज्ञाने व्यभिचारात्। ज्ञानविषयश्यामत्वा-विषयकत्वात्।

न च तज्ज्ञानविषयीभूतयावद्विषयविशिष्टतया तज्ज्ञानावगाहिज्ञानस्य तज्ज्ञा-नीययावद्विषयविषयकत्वमिति नियम इति वाच्यम्। उक्तसंसर्गज्ञानानुमितेः संसर्ग-ज्ञानविषयीभूतयावद्विषयविशिष्टतया संसर्गज्ञानावगाहित्वस्यैवाप्रसिद्धेः, तत्रैव विवा-दात्।

न च तज्ज्ञानयावद्विषयोपस्थित्यव्यवहितोत्तरवर्ति यत् तज्ज्ञानविषयकं ज्ञानं तत् तज्ज्ञानयावद्विषयविषयकमिति नियमः, अनुव्यवसायादौ तथा दर्शनात्। उक्तानुमित्यादौ च ज्ञानविषयस्य नोपस्थितत्वम्; अनुव्यवसायादौ च व्यवसा-यादित एव तद्विषयस्योपस्थितत्वम्। प्रकृते च पदार्थसंसर्गज्ञानानुमितिजनक-परामर्शेनैव पदार्थसंसर्गज्ञानयावद्विषयाणामुपस्थितत्वमिति वाच्यम्। तथापि "अयं घटः" इत्यादिज्ञानाव्यवहितोत्तरविषयानुल्लेखि"ज्ञानवान्"इत्यनुमित्यादौ व्यभिचारा-दिति।

ज्ञानज्ञानस्य ज्ञानविषयविषयकत्वम्

मैवम्। बाधकाभावे सति तज्ज्ञानविषयकं यत् ज्ञानं तत् तज्ज्ञानयावद्विषयविषयकमिति नियमात्। उक्तस्थले बाधकस्य कारणाभावादेः सत्त्वान्न व्यभिचारः।

ननूक्तरीत्या संसर्गस्यानुमितौ भानेऽपि संबन्धिनः पदार्थस्य कथं भानम् इति चेत् — उच्यते। यथानुमितौ ज्ञानभाने ज्ञानावच्छेदकतया संसर्गभानम्, तथा संसर्गभाने तदवच्छेदकतया पदार्थस्यापि भानं संभवति।

ननु तथापि गोत्वानयनत्वादिरूपेण गवानयनादिसंसर्गसिद्धिः कथम्? स्मारितपदार्थत्वरूपेणैव व्यापकताग्रहे गवानयनादिपदार्थभानात्। प्रवर्तकं च ज्ञानं गोत्वावच्छिन्नप्रतियोगिकानयनत्वावच्छिन्नानुयोगिकसंसर्गविषयकं, न तु सामान्यतः पदार्थसंसर्गविषयकमिति चेत् — न।

व्यापकताज्ञानात्मकपरामर्शेऽविषयस्यापि उपस्थितगोत्वानयनत्वावच्छिन्नयोः संसर्गस्य पक्षधर्मताबलादनुमितौ भानसंभवात्।

भ्रमविषयकज्ञानस्य भ्रमत्वशङ्कासमाधानम्

अथैवं ज्ञानज्ञानस्य ज्ञानविषयविषयकत्वे असद्विषयको यो भ्रमः तद्विषयकज्ञानस्यापि असद्विषयकतया भ्रमत्वं स्यात्। न चेष्टापत्तिः, ईश्वरस्यापि भ्रान्तत्वापत्तेः। तस्य सर्वज्ञत्वेन सर्वभ्रमविषयकज्ञानवत्त्वात्।

न च 'बाधकाभावे सति' इति विशेषणस्य नियमशरीरे दत्तत्वात् नेश्वरज्ञानस्य भ्रमत्वम्, तस्य धर्मिग्राहकप्रमाणेन सन्मात्रविषयकत्वेनैव सिद्धतया धर्मिग्राहकप्रमाणरूपबाधकसद्भावादिति वाच्यम्। एवमपि "इदं रजतम्" इति भ्रमात् यथा शुक्तौ प्रवृत्तिः, तथा "रजतज्ञानवान् अहम्" इति भ्रमानुव्यवसायादपि शुक्तौ प्रवृत्त्यापत्तेः। भ्रमविषयविषयकत्वात् अनुव्यवसायस्य।

मैवम्। न तावत् असद्विषयकत्वेन भ्रमत्वम्। भ्रमविषयाणां शुक्ति-रजतत्वतद्वैशिष्ट्यानां सर्वेषां पारमार्थिकत्वात्। किं तु विशेष्यताव्यधिकरणप्रकारकत्वं भ्रमत्वम्। न हि भ्रमविषयकज्ञाने विशेष्यताव्यधिकरणं प्रकारः। भ्रमविषयकज्ञानं हि भ्रमविशेष्यकं रजतत्वप्रकारकत्वप्रकारकं च। "रजतत्वप्रकारकज्ञानवानहम्" इति हि भ्रमानुव्यवसायः। रजतत्वप्रकारकत्वं तु विशेष्यभूतभ्रमवृत्ति इति न विशेष्यताव्यधिकरणम्। अतो विशेष्यताव्यधिकरणप्रकारकत्वविरहात् न भ्रान्तिज्ञानस्य भ्रमत्वम्।

अन्यथा असद्विषयकत्वेनैव भ्रमत्वे भ्रान्त्यसिद्धिः। भ्रान्तिग्राहकस्य सर्वस्यैव असद्विषयत्वापत्त्या भ्रमत्वापातात्।

मणौ लीलावतीकारोक्तपदपक्षकसंसर्गानुमानदूषणम्[१]

एवंरीत्या प्रयुक्तस्य पदपक्षकानुमानस्य दूषणमेवं व्यधायि मणौ — परप्रवृत्त्यर्थं किल वाक्यं प्रयुज्यते। प्रवृत्तिश्च अर्थज्ञानादेव भवति, न तु अर्थज्ञानज्ञानात्; अर्थज्ञानत्वापेक्षया अर्थज्ञानज्ञानत्वस्य गुरुत्वेन तदवच्छिन्नस्य प्रवृत्त्यजनकत्वात्। "इदं रजतम्" इति रजतज्ञानाज्जायमानायां प्रवृत्तौ रजतज्ञानज्ञानं विनापि जायमानायां व्यतिरेकव्यभिचाराच्च।

एतेन — इदंत्वावच्छिन्ने तादात्म्येन रजतप्रकारकज्ञानस्यैव तादात्म्येन रजतप्रकारकप्रवृत्तिजनकतया प्रकारान्तरेण संसर्गानुमानमपि निरस्तं वेदितव्यम्। तथा हि — शाब्दबोधं प्रति तात्पर्यज्ञानं हेतुरित्यवश्यं वाच्यम्। अन्यथा लक्षणास्थले नानार्थश्लिष्टस्थले च तात्पर्यग्रहस्याहेतुत्वे "यष्टीः प्रवेशय" इत्यादौ लाक्षणिकार्थस्य यष्टिधरस्यैवान्वयबोधः, न तु शक्यार्थस्य इति व्यवस्थानुपपत्तेः। एवं भोजनसमये "सैन्धवमानय" इत्युक्ते लवणस्यैवान्वयबोधः न तु "अश्वस्य" इति निर्णयानुपपत्तेः। तात्पर्यं च एकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छया उच्चरितत्वम्। तत्र तात्पर्यग्राहकानुमानादेव तात्पर्यघटकज्ञानावच्छेदकतया संसर्गसिद्धिः। तथा च " 'सैन्धवमानय' इत्यादिपदानि लवणपदार्थे आनयनसंसर्गप्रतीतीच्छया उच्चरितानि, भोजनप्रकरणे प्रयुक्तत्वात्" इत्यनुमानेन तात्पर्यग्रहवेलायां प्रतीत्यवच्छेदकतया संसर्गोऽप्यनुमीयत इति यदाहुः वैशेषिकादयः, तन्न युक्तम्। प्रवृत्तियोग्यस्य संसर्गज्ञानस्य अनेन असंभवात्।

किं च व्यापकतावच्छेदकत्वेन परामर्शगृहीतो यो धर्मः तत्प्रकारिकैवानुमितिः। तथा च पदार्थत्वेन रजताद्यवगाहिनी "स्मारितपदार्थसंसर्गज्ञानपूर्वकाणि" इत्येवानुमितिः स्यात्, न तु "रजतज्ञानपूर्वकाणि" इति। प्रवर्तकं तु ज्ञानं रजतत्वेन रजतविषयकम्। न तदनुमानात् जातम्, अपि तु शब्दादेवेति शब्दः प्रमाणान्तरम्।

एवं पदार्थपक्षकानुमानमपि कुसुमाञ्जलिच्छाययैव नूतनान् कांश्चित् विषयान् संयोज्य मणावनूद्य दूषितमिति तदप्यत्र प्रस्तूयते।

मणौ वैशेषिकोक्तपदार्थपक्षकसंसर्गानुमानोपन्यासः[२]

ननु "एते पदार्थाः तात्पर्यविषयमिथःसंसर्गवन्तः, आकाङ्क्षादिमत्पदस्मारितत्वात्; योग्यतासत्तिमत्त्वे सति संसर्गपरपदस्मारितत्वाद्वा" इत्यनुमानेन संसर्गसिद्धिः। 'तात्पर्यविषयीभूतो यः परस्परसंसर्गः तद्वन्तः' इति साध्यम्। अत्र 'इदन्त्वाश्रयरजतादयः तात्पर्यविषयसंसर्गवन्तः' इति साध्ये "इदं रजतं न वा"

---

[१] त.चिं.म, च.भा. प्र.प. पृ. ५१.
[२] त.चिं.म, च.भा. प्र.प. पृ. ५७.

इति संशयनिवर्तकज्ञानस्य न लाभः। "इदं रजतसंसर्गवत्" इत्याकारकनिश्चयस्यैव तादृशसंशयनिवर्तकत्वात्। अतः यत्र यस्य संसर्गबोधो वस्तुतः शब्दाज्ञायते तं पक्षयित्वा तात्पर्यविषयीभूततत्संसर्गः साधनीयः इति लाभाय मिथःपदम्। तथा च "इदं रजतम्" इत्यादौ 'इदं रजतसंसर्गवत्' इत्यादिक्रमेण साधनीयम्। "रजतमानय" इत्यादौ च 'कर्मत्वं रजतसंसर्गवत्', 'आनयनं रजतकर्मत्व-संसर्गवत्', 'कृतिः तात्पर्यविषयीभूतानयनसंसर्गवती' इत्यादिक्रमेण साध्यं नानैव। समूहालम्बनरूपा चानुमितिः। "आनय" इत्यत्र यदा आनयनकृत्योः अनु-कूलत्वसंसर्गे तात्पर्यं, तदा कृतिं पक्षीकृत्य आनयनसंसर्गसाधने कृतौ आनयनस्य यः विषयत्वरूपः संसर्गः तस्यापि सिद्धिर्मा भूदिति 'तात्पर्यविषय' इति संसर्गविशेषणम्।

न च तत्सिद्धौ क्षतिविरहः, उद्देश्यस्यानुकूलत्वसंसर्गज्ञानस्य वृत्तत्वात्, 'अधिकं तु प्रविष्टं चेन्न तद्धानिकरम्' इति न्यायादिति वाच्यम्। तर्हि तदानीं तन्मात्र-विषयकबुद्धेरनुभवसिद्धायाः अनुमानादवृत्तत्वात् तदनुरोधेनैव शब्दस्य प्रमा-णान्तरत्वापत्तेः।

तात्पर्यविषयत्वं च तत्पुरुषीया एतत्कालीना या एतदुभयपदजन्यसंसर्ग-प्रतीतीच्छा तद्विषयत्वम्। तेन संसर्गमात्रस्यैव पुरुषान्तरीयकालान्तरीयवाक्यान्तर-जन्यप्रतीतीच्छाविषयत्वात् अर्थान्तरमिति शङ्काया नावकाशः।

साध्ये आकाङ्क्षानिरूपकत्वमपि संसर्गविशेषणं देयम्। इतरथा यदा कृत्या-नयनयोरनुकूलत्वे समानकालीनत्वे च संसर्गे तात्पर्यं, तदा कृतौ आनयनस्य समानकालीनत्वसंसर्गस्यापि सिद्धिः स्यात्। आकाङ्क्षानिरूपकत्वं च एतत्पद-द्वयाकाङ्क्षानिरूपकत्वं वाच्यम्। अन्यथा तस्यापि कुत्रचिदाकाङ्क्षानिरूप-कत्वात्।

न च वैशेषिकैः शाब्दत्वजातेरनभ्युपगमात् आकाङ्क्षानिरूपकत्वं दुर्वचमिति वाच्यम्। तैरपि शाब्दत्वजातिः अभ्युपेयत एव। परं तु सा जातिः उक्तानु-मितिवृत्तिः अनुमितित्वव्याप्या इत्येव अभ्युपेयते। स्मारितत्वसंबन्धेन पदस्य हेतुत्वमभिप्रेतम्। अतः शब्दस्यानुमानता निर्वहति।

प्रथमहेतुशोधनम्

प्रथमहेतौ आकाङ्क्षादीत्यादिपदेन योग्यतापरिग्रहः। अत्र स्मारितत्वमात्रं घट-पटयोरपीति रजतपदयोग्यतावत्पदस्मारितत्वमुक्तम्। रजतपदयोग्यतावत्त्वं च रजतपदार्थाबाधितार्थकत्वम्[1]। "यत् रजतपदार्थाबाधितार्थकयत्पदस्मारितं भवति

[1] रजतपदार्थाबाधितार्थकत्वं नाम रजतपदार्थनिष्ठाभावाप्रतियोगित्वम्।

तत् तत्पदद्वयतात्पर्यविषयीभूततत्पदद्वयनिष्ठाकाङ्क्षानिरूपकरजतसंसर्गवत् भवति, 'रजतेन' इत्यादिवाक्यस्थटापदादिस्मारितरजतनिष्ठकरणत्वादिवत्'' इति सामान्यमुखी व्याप्तिः।

द्वितीयहेतुशोधनम्

''योग्यतासत्तिमत्त्वे सति संसर्गपरपदस्मारितत्वात्'' इति द्वितीयो हेतुः। 'एतद्रजतपदयोग्यतासत्तिमत्त्वे सति रजतसंसर्गपरैतदम्पदस्मारितत्वात्' इति तदर्थः। ''यत् यद्रजतपदयोग्यतासत्तिमत्त्वे सति रजतसंसर्गपरयत्पदस्मारितं भवति तत् तत्पदद्वयतात्पर्यविषयीभूतसंसर्गवत् भवति, 'रजतेन' इत्यादिवाक्यस्थटापदादिस्मारितरजतनिष्ठकरणत्वादिवत्'' इति सामान्यमुखी व्याप्तिः। अतो नान्वयदृष्टान्तासिद्धिः।

अत्र ''रजतमानय'' इत्यत्र अम्पदेन कर्मत्वत्वेन रूपेण स्मारिते घटनिष्ठकर्मत्वे व्यभिचारवारणाय 'रजतपदयोग्यतावत्त्वं' विशेषणम्। रजतपदयोग्यता च रजतपदजन्यस्मृतिविशेष्याबाधितत्वम्। (तादृशस्मृतिविशेष्यवृत्त्यभावाप्रतियोगित्वम्)।

तथापि वक्ता यत्र रजतसंसर्गप्रतीतीच्छया ''रजतमानय'' इति वाक्यं प्रयुक्तवान्, श्रोता च लक्षणया रजतपदेन घटं स्मृतवान्, अम्पदेन च घटनिष्ठकर्मत्वं स्मृतवान्, तत्र घटनिष्ठकर्मत्वे व्यभिचार इति 'रजतपदासत्तिमत्त्वं' विशेषणम्। तदर्थश्च रजतपदजन्यरजतमात्रविशेष्यकस्मृतिसमानकालीनस्मृतिविषयत्वम्। मात्रपदोपादानात् यत्र ''रजतमानय'' इत्यादिवाक्यस्थरजतपदेन रजतघटोभयविशेष्यकसमूहालम्बनस्मृतिर्जनिता तत्र घटनिष्ठकर्मत्वे न व्यभिचारः।

निस्तात्पर्यकेण घटादिसंसर्गतात्पर्यकेण वा रजतपदोत्तरामादिपदेन स्मारिते रजतकर्मत्वकरणत्वादौ व्यभिचारवारणाय रजतसंसर्गपरत्वप्रवेशः।

न चोक्तानुमानद्वयेऽपि अनाप्तेन करकाभिप्रायेण प्रयुक्ते ''पयसा सिञ्चति'' इति वाक्ये व्यभिचारः इति वाच्यम्। तत्र योग्यताविरहात्। योग्यता हि नाम बाधविरहः। तत्र च बाधसत्त्वात्।

न चैवं द्रवीभूतजलाभिप्रायेण प्रयुक्तं ''पयसा सिञ्चति'' इति वाक्यमपि प्रमाणं न स्यात्, करकरूपायोग्यार्थकत्वात्, न हि द्रवीभूतजलांशे योग्यार्थकत्वमादाय प्रामाण्यं तस्य वक्तुं शक्यम्; एकाकारवाक्ये योग्यत्वायोग्यत्वयोरसंभवादिति वाच्यम्। विषयबाधसत्त्वासत्त्वाभ्याम् एकाकारेऽपि वाक्ये योग्यत्वायोग्यत्वयोः अविरोधात्।

अवान्तरशङ्का, तत्परिहारश्च

अथ आकाङ्क्षा नाम न श्रोतुः जिज्ञासा, अजिज्ञासोरपि वाक्यार्थबोधात्। अपि तु जिज्ञासां प्रति योग्यता आकाङ्क्षा। जिज्ञासायोग्यता च श्रोतरि प्रकृत-वाक्योत्पाद्यस्य संसर्गावगमस्य प्रागभावः। एवं, बाधकप्रमाविरहः = एकपदार्थेऽ-परपदार्थसंसर्गाभावनिश्चयाभावः योग्यता। अव्यवहितसंसर्गप्रतियोगिज्ञानम् = एक-संसर्गप्रतियोगिविषयकज्ञानाव्यवहितापरसंसर्गप्रतियोगिविषयकोपस्थितिः आसत्तिः। एवंरूपाः आकाङ्क्षायोग्यतासत्तयः स्वरूपसत्य एव शाब्दधीहेतवः, न तु ज्ञाताः; गौरवात्, तासां ज्ञानाभावे अन्वयबोधाभावस्याभावाच्च। तासां तिसृणामपि संसर्ग-ज्ञानाधीनज्ञानतया पूर्वं ज्ञातुमशक्यत्वाच्च। एवं च स्वरूपसत्तया हेतूनां तासां ज्ञायमानलिङ्गविशेषणतया प्रवेशो न युक्त इति चेत् —

न। वस्तुतः योग्यतादिशून्यत्वेऽपि तद्भ्रमेण संसर्गप्रत्ययरूपः शाब्दबोधो जायते। अन्यथा = योग्यतादिभ्रमेण संसर्गप्रत्ययस्याभावे, निराकाङ्क्ष-अनासन्न-अयोग्यवाक्यात् शाब्दभ्रमो न स्यात्। अतः आकाङ्क्षादयः नोक्तस्वरूपाः। अपि तु "तात्पर्यविशेषः आकाङ्क्षा", "पदाव्यवधानमासत्तिः", "तदभावप्रमाविरहः, यत्र यस्य येन संबन्धेनान्वयः तत्र तेन संसर्गेण तद्वत्त्वं वा योग्यता"। एतादृशमेव आकाङ्क्षादिकं लिङ्गविशेषणम्। तज्ज्ञानं च शाब्दबोधहेतुरिति।

किं च "राजा पुत्रमाकाङ्क्षति, पुरुषं वा?" इति संशये, "राजा पुरुषं नाकाङ्क्षति" इति व्यतिरेकनिश्चये च "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इति वाक्यात् पुरुषे राजान्वयधीः प्रतिबध्यते = न जायते। तथा च 'यत्संशय-यद्व्यतिरेकनिश्चयौ यदुत्पत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुः' इति नियमबलेन आकाङ्क्षानिश्चयः कारणं शाब्दबोधं प्रति।

एवम् अव्यवधानसंशये तद्व्यतिरेकनिश्चये वा शाब्दबोधाभावात् तन्निर्णयोऽपि शाब्दबोधहेतुः। योग्यतायास्तु संशयनिश्चयसाधारणं ज्ञानसामान्यम् अन्वयबोधहेतुः, अनुमितिहेतुश्च।

न च संशयसाधारणमित्ययुक्तम्, योग्यतानिश्चयस्य क्वचिदप्यसंभवेन सर्वत्र तत्संशयस्यैव हेतुत्वादिति वाच्यम्। योग्यता हि बाधकप्रमाविरहः, तदभाव-विषयकप्रमाविरह इति यावत्। स च स्वगतः परगतश्च क्वचिन्निश्चीयते, यथा स्वस्य घटाभावनिश्चयः स्वगतयोग्यघटानुपलब्ध्या भवति, 'यद्यत्र घटः स्यात् तर्ह्युपलभ्येत, अनुपलब्ध्या तु घटो नास्ति' इति; ततः निश्चितेन घटाभावेन अन्यस्य घट-प्रमाविरहो निश्चीयते।

क्वचित् बाधकप्रमाविरहरूपयोग्यतासंशयेऽपि अन्वयबोधो भवत्येव। बाधसंशयस्य = तदभावसंशयस्य, अप्रतिबन्धकत्वात्[१]।

योग्यतादेः प्रामाण्यप्रयोजकत्वम्

किं च नैयायिकमतेऽपि योग्यतादिकं प्रामाण्ये प्रयोजकम्। आप्तोक्तत्वस्य = भ्रमप्रमादविप्रलिप्साकरणापाटवात्मकदोषचतुष्टयाभाववदुक्तत्वस्य, प्रामाण्यप्रयोजकत्वे गौरवात्। अनाप्तोक्तेऽपि संवादेन = विषयाबाधेन, प्रामाण्याच्च। एवं च = योग्यतायाः शाब्दप्रमाप्रयोजकत्वे च, ज्ञायमानकरणे प्रामाण्यप्रयोजकतया = ज्ञायमानकरणनिष्ठत्वे सति शाब्दप्रमाप्रयोजकतया, योग्यतादीनां ज्ञानमावश्यकं = योग्यतादौ शाब्दबोधकारणीभूतं ज्ञानं विषयतासंबन्धेनावश्यकम्, ज्ञाननिष्ठशाब्दज्ञानकारणतायां विषयतासंबन्धेनावच्छेदकत्वमावश्यकमिति फलितोऽर्थः। तथा च "योग्यतादिकं ज्ञाननिष्ठशाब्दज्ञानकारणतानिरूपितविषयतासंबन्धावच्छिन्नावच्छेदकतावत्, ज्ञायमानकरणनिष्ठत्वे सति शाब्दप्रमाप्रयोजकत्वात्"। "यत् ज्ञायमानकरणनिष्ठत्वे सति यज्जातीयप्रमाप्रयोजकं तत् ज्ञाननिष्ठतज्जातीयज्ञानकारणतायां विषयतासंबन्धेनावच्छेदकम्; यथा प्रमानुमितिप्रयोजकं व्याप्तिविशिष्टपक्षधर्मत्वम्" इति अनुमाने सामान्यमुखी व्याप्तिः। एवं च योग्यतादीनां ज्ञानं शाब्दप्रमां प्रति हेतुरिति सिद्धम्।

योग्यतादिज्ञानोपायश्च समभिव्याहारविशेषादिः। आदिपदेन श्रोत्रम्, आप्तोपदेशश्च गृह्यते। तत्र समभिव्याहारविशेषः आकाङ्क्षाग्राहकः। आसत्तियोग्यताग्राहकौ श्रोत्राप्तोपदेशौ।

मणौ वैशेषिकोक्तपदार्थपक्षकसंसर्गानुमानदूषणम्

मैवम्। यत्र "विमलं जलं नद्याः, कच्छे महिषश्चरति" इति वक्त्रा उक्तम्, श्रोता च "विमलं जलम्" इत्यश्रुत्वैव "नद्याः कच्छे महिषश्चरति" इति शृणोति, तत्र आकाङ्क्षादिकमस्ति, नदीकच्छयोस्तु तात्पर्यविषयः संसर्गो नास्ति। तथा च नदीकच्छयोः तात्पर्यविषयसंसर्गरूपसाध्याभावात् आकाङ्क्षादिमत्पदस्मारितत्वरूपहेतुसत्त्वाच्च व्यभिचारः।

---

[१] ननु तथापि तदभावप्रमाविरहरूपायाः योग्यतायाः संशयसाधारणं ज्ञानमनुमितिहेतुरित्ययुक्तम्, तदभावप्रमाविरहसंशयदशायां तत्संसर्गानुमितेरसंभवात्, तदभावप्रमाविरहसंशयसामग्रीदशायां तत्तदभावोभयकोट्युपस्थितिविशेषादर्शनादिसत्त्वेन तदभावसंशयसामग्र्या आवश्यकत्वात् तदभावप्रमाविरहसंशयस्य तदभावसंशयात्मकत्वात् तदभावज्ञानरूपप्रतिबन्धकस्य सत्त्वात् इत्यत आह — क्वचिदिति। प्रमेति। तदभावप्रमेत्यर्थः। अन्वयबोधः = तत्संसर्गानुमितिः। बाधसंशयस्येति। तदभावसंशयस्येत्यर्थः। तदभावनिश्चयत्वेनैव प्रतिबन्धकत्वात् इति भावः।

अत एव = उक्तस्थले आकाङ्क्षादिसत्त्वेऽपि संसर्गप्रमायाः अनुत्पादादेव, आकाङ्क्षादिमात्रं न प्रामाण्यप्रयोजकम्, अपि तु तात्पर्यमपि प्रयोजकम्।

अथ 'श्रूयमाणयावत्समभिव्याहृत' इति लिङ्गविशेषणं दीयते। तथा च 'यावन्ति पदानि सहोच्चारितानि श्रूयमाणतावत्पदस्मारितत्वं' हेतुः। अतो न व्यभिचारः। कतिपयपदस्मारितानां संसर्गप्रत्ययस्तु श्रूयमाणयावत्पदस्मारितत्वरूपलिङ्गभ्रमात् इति चेत् — न। श्रूयमाणसमभिव्याहृतयावत्पदस्मारितत्वसंदेहेऽपि वाक्यार्थानुमितेर्जायमानतया न तस्य लिङ्गविशेषणत्वं युक्तम्, लिङ्गविशेषणस्य निश्चितस्यैवानुमापकत्वात्।

न च तादृशसंदेहस्थले न संसर्गज्ञानं जायते, अपि तु असंसर्गाग्रहमात्रमिति वाच्यम्। संसर्गग्रहे बाधकाभावात्। न च कारणबाध एव बाधक इति वाच्यम्। तस्य कारणत्वे मानाभावात्।

अथ उक्तस्थले व्यभिचारवारणाय आप्तोक्तत्वं लिङ्गविशेषणं दीयते, तदेव वा (आप्तोक्तपदस्मारितत्वमेव वा) लिङ्गम्। आप्तोक्तत्वं च श्रूयमाणयावत्समभिव्याहृतपदकत्वे सति यथार्थज्ञानवदुक्तत्वम्। नदीकच्छयोः संसर्गे तु एतादृशाप्तोक्तपदस्मारितत्वविरहान्न व्यभिचारः। आप्तोक्तत्वज्ञानं च शाब्दबोधं प्रति हेतुः। आप्तोक्तत्ववत्तया ज्ञायमानस्य पदस्य शाब्दबोधहेतुत्वेन तवापि आप्तोक्तत्वज्ञानं शाब्दबोधात् पूर्वमावश्यकम्, यथा व्याप्तिमत्तया ज्ञायमानस्य लिङ्गस्यानुमितिहेतुत्वेन व्याप्तिज्ञानमनुमितेः पूर्वमावश्यकं तद्वत्। आप्तोक्तत्वावगमश्च लोके भ्रमाद्यमूलकत्वात्। आदिपदेन प्रमाद-विप्रलिप्सा-करणापाटवानां परिग्रहः। वेदे स्मृतौ च आप्तोक्तत्वावगमः महाजनपरिग्रहात् इति चेत् —

मैवम्। यत्र कुत्रचिद्विषये आप्तत्वं = यथार्थज्ञानवत्त्वम्, अनाप्तस्यापि = प्रकृतवाक्यार्थगोचरयथार्थज्ञानशून्यस्यापि अस्ति। तथा च तस्याव्यावर्तकतया आप्तोक्तत्वरूपे लिङ्गविशेषणे दत्तेऽपि व्यभिचारस्तदवस्थः। सर्वत्र आप्तत्वं = सकलवाक्यार्थविषयकयथार्थज्ञानवत्त्वम् अप्रसिद्धम्। भ्रान्तेः पुरुषधर्मत्वात्।

अतः प्रकृतवाक्यार्थविषयकयथार्थज्ञानवत्त्वरूपमाप्तत्वं विवक्षणीयम्। तच्च वाक्यार्थज्ञानात् पूर्वं निश्चेतुमशक्यम्। उक्ताप्तत्वग्राहकस्य भ्रमाद्यमूलकत्वप्रवृत्तिसाफल्यादेः पूर्वमज्ञानात्।

न च यदि प्रवृत्तेरुत्तरकालमेव प्रवृत्तिसाफल्यग्रहः, तदा सफलप्रवृत्तिहेतुत्वेन हेतुना प्रामाण्यनिश्चयेऽन्योन्याश्रयः, प्रामाण्यनिश्चयानन्तरमेव प्रवृत्तेरुत्पादसंभवादिति वाच्यम्। प्रामाण्यसंदेहादपि प्रवृत्तेरुत्पादात्।

किं च हेतुज्ञानवेलायां साध्यस्याज्ञाततयापि आप्तत्वं दुर्निश्चयम्। तथा हि —

"प्रकृतसंसर्गेऽयमभ्रान्तः, अथ वा यथार्थज्ञानवान्" इत्याकारकाप्तत्वज्ञानं संसर्गप्रतीतेः पूर्वं न भवितुमर्हति। संसर्गरूपस्य वाक्यार्थस्य पूर्वमज्ञातत्वात्। तथा चाप्तोक्तत्वगर्भहेतुना संसर्गानुमानं न संभवति।

वयं तु ब्रूमः। बाधकप्रमाणाभावरूपा योग्यता लिङ्गविशेषणं न भवितुमर्हति। बाधकप्रमाणसामान्याभावस्य सर्वत्र निश्चेतुमशक्यत्वात्। तन्निश्चयाभावे च लिङ्गतावच्छेदकप्रकारकलिङ्गनिश्चयाभावादनुमितिर्न स्यात्। किं च योग्यतासंशयेऽपि शब्दादन्वयबोधो जायते। योग्यतायाः लिङ्गविशेषणत्वे स कथं स्यात्। लिङ्गतावच्छेदकप्रकारकलिङ्गविशेष्यकनिश्चयस्यानुमितिहेतुत्वात्।

ननु भवन्मतेऽपि योग्यतासंशयदशायां कथं वाक्यार्थबोधः, तन्निश्चयस्य शाब्दहेतुत्वात् इति चेत् — न। शब्दस्यातिरिक्तप्रमाणतावादिनामस्माकं मते संशयनिश्चयसाधारणस्य योग्यताज्ञानस्यैव शाब्दबोधं प्रति हेतुत्वस्वीकारात्। अतः शब्दः प्रमाणान्तरम्।

न्यायकौस्तुभोक्तरीत्या शब्दस्यानुमानातिरिक्तत्वम्[१]

व्याप्त्यादिज्ञानविरहदशायामपि शाब्दबोधस्यानुभविकतया तदानीमनुमितिसामग्र्यभावेनानुमित्यसंभवात् शब्दस्य प्रमाणान्तरत्वमावश्यकम्।

यदि च शब्दस्य प्रमाणान्तरत्वे सर्वत्र शाब्दबोधजनकसामग्र्यन्तरकल्पने गौरवमिति सर्वत्र शाब्दबोधस्थले व्याप्त्यादिप्रतिसन्धानकल्पनमेव सम्यक्; तथा सति क्लृप्तसामग्र्यैवोपपत्तौ सामग्र्यन्तराकल्पनेन लाघवादिति विभाव्यते, तदापि न क्षतिः। 'चैत्रवाक्यादयमर्थः श्रुतः' इत्यादिव्यवहारविषयतया श्रुधात्वर्थशाब्दाख्यविलक्षणानुभवस्वीकरणस्यावश्यकतया तत्करणतया शब्दस्य प्रमाणान्तरत्वमावश्यकम्।

न च श्रुधातोरनुमित्यर्थकतया 'श्रुतः' इति व्यवहारमात्रेण न विलक्षणानुभवसिद्धिः। कुतस्तत्करणतया शब्दस्य प्रमाणान्तरत्वमिति वाच्यम्। तथा सति "पर्वतो वह्निमान्" इत्यनुमित्यनन्तरं "पर्वते वह्निरनुमितः" इत्यादिव्यवहारवत् "पर्वते वह्निः श्रुतः" इत्यादिव्यवहारापत्तेः।

न च शब्दहेतुकानुमितेः श्रुधात्वर्थत्वोपगमान्नोक्तापत्तिरिति वाच्यम्। तथापि यत्र शब्दहेतुना आकाशे आकाशपदशक्यत्वमनुमितम् "आकाशः आकाशपदशक्यः, शब्दवत्त्वात्" इति, तत्र "आकाशे आकाशपदशक्यत्वमनुमितम्" इति व्यवहारवत् "आकाशे आकाशपदशक्यत्वं श्रुतम्" इति व्यवहारस्य दुर्वारत्वात्।

---

[१] न्या.कौ. पृ. ३५.

न च स्मारितत्वसंबन्धेन शब्दहेतुकानुमितेः श्रुधात्वर्थत्वान्नोक्तदोषः, उक्तस्थले समवायेन शब्दस्य हेतुत्वात्; प्रकृते च "एते पदार्थाः मिथःसंसर्गवन्तः, स्मारितत्वसंबन्धेन पदकदम्बवत्त्वात्" इति स्मारितत्वसंबन्धेन शब्दस्य हेतुत्वात् श्रुतत्वव्यवहारोपपत्तिरिति वाच्यम्। एवमपि आकाङ्क्षादिज्ञानविरहदशायां यत्र स्मारितत्वसंबन्धेन शब्दहेतुकानुमितिः तत्र श्रुतत्वव्यवहारापत्तेर्दुर्वारत्वात्।

न च नैयायिकसिद्धशाब्दसामग्रीसमवधानाव्यवहितोत्तरानुमितेः श्रुधात्वर्थत्वान्न दोष इति वाच्यम्। तादृशसामग्र्याद्यप्रतिसन्धाने "श्रुतः" इति व्यवहारानुपपत्तेः। अनन्तायाः शब्दार्थभेदभिन्नसामग्र्याः अननुगमेन श्रुधातुशक्तिग्रहानुपपत्तेश्च।

तस्मात् "चैत्रवाक्यादयमर्थः श्रुतः" इति व्यवहारानुरोधेन शाब्दाख्यविलक्षण-प्रमितेः सिद्ध्या शब्दः प्रमाणान्तरम्।

वस्तुतस्तु शब्दात् अर्थज्ञानानन्तरं "न अनुमिनोमि" इत्यनुव्यवसायानुरोधेन शाब्दज्ञानस्यानुमितिरूपत्वं न संभवति।

नागेशोक्तरीत्या शब्दस्यानुमानातिरिक्तत्वम्[१]

लघुमञ्जूषायां नागेशेन शब्दस्यानुमानातिरिक्तत्वं प्रसङ्गवशादेवं साधितम्।

न च शब्दार्थयोस्तादात्म्यस्वीकारे समव्याप्ततया शब्दात् अनुमानमेव स्या-दर्थस्येति प्रमाणान्तरत्वभङ्गः इति वाच्यम्। पक्षधर्मताज्ञानाद्यनपेक्षतया तस्य प्रमाणान्तरत्वात्। सिद्धिसत्त्वे इच्छां विनापि बोधदर्शनाच्च। पर्वते वह्निनिश्चयोत्तरं "पर्वते वह्न्यनुमितिः जायताम्" इतीच्छयैवानुमितिर्भवति, शाब्दबोधस्तु निश्चय-सत्त्वेऽपि इच्छां विनैव भवतीति वैषम्यात्।

किं च व्याप्तिस्मरणादिकं विना पदमात्रात् पदार्थप्रत्ययस्य जायमानस्य अनुमितित्वं न संभवति। पदेभ्यः स्मृतिरेव इति तु न युक्तम्, तत्ताया अनुल्लेखात्। वाक्यादपि स्मृत्यापत्तेश्च।

किं च "शाब्दयामि" इत्यनुव्यवसायान्न स्मृतित्वमनुमितित्वं वा वाक्य-जन्यज्ञानस्य। किं च "शाब्दयामि" इत्यनुव्यवसायप्रयोजिकायाः शाब्दत्वजातेः तदवच्छिन्नं प्रति आकाङ्क्षादिज्ञानहेतुत्वस्य च कल्पनायाः आवश्यकत्वे तद्वति स्मृतित्वादिकल्पनायां गौरवम्।

किं च सिद्धिसत्त्वेऽपि शाब्दबोधोत्पत्त्या अनुमितेश्चानुत्पत्त्या सिद्धिप्रतिबध्यता-वच्छेदककोटौ शाब्दातिरिक्तत्वविशेषणेन गौरवम्। न च तत्र सिद्धिनाशानन्तर-

---

[१] ल. मं. पृ. ५७-६०.

मेवानुमितिरिति वाच्यम्। अनुभवविरोधात्। प्रतिबन्धकस्थले सर्वत्र प्रतिबन्धकनाशानन्तरं कार्यमित्यापत्तेश्च।

अपि च शाब्दबोधोत्तरं "नानुमिनोमि" इत्यनुव्यवसायात् न शाब्दत्वमनुमितित्वव्याप्यम्। न च तस्य व्याप्त्यादिज्ञानघटितसामग्रीजन्यानुमितित्वावच्छिन्नाभावविषयकत्वान्न दोष इति वाच्यम्। व्याप्त्यादिप्रतिसन्धानविरहदशायामपि तस्य उत्पत्त्या तद्विषयकत्वासंभवात् — इति।

नव्यनैयायिकरीत्या शाब्दप्रमितेः अनुमितिविलक्षणत्वं, शब्दस्य प्रमाणान्तरत्वं च[१]

शाब्दबोधस्तावत् "शब्दादमुमर्थं प्रत्येमि" इति प्रतीतिसिद्धानुभवत्वसाक्षाद्व्याप्यशाब्दत्वजात्याश्रयः प्रत्यक्षादिप्रमितिभ्यो विलक्षणः।

नन्वस्तु विदितपदपदार्थसंगतीनां समधिगतशाब्दन्यायतत्त्वानाम् आकाङ्क्षासंनिधियोग्यताद्यनुसन्धानवतां निष्प्रत्यूहं संसर्गबोधोदयः। सिध्यतु च पदज्ञानजन्यतावच्छेदकतया शाब्दत्वं जातिरपि। परं तु तत्र सविकल्पकत्वादाविव प्रत्यक्षत्वव्याप्यत्वम्, अनुमितित्वव्याप्यत्वं वा किमिति नाङ्गीक्रियते। तथा सति हि समानविषयकशाब्दबोधं प्रति प्रत्यक्षसामग्रीत्वेन प्रतिबन्धकत्वस्याकल्पनात् लाघवम्। समानविषयकानुमितित्वावच्छिन्नं प्रति प्रत्यक्षसामग्र्याः क्लृप्तया प्रतिबन्धकतयैव निर्वाहात्। सति चैवमेकस्यामेव व्यक्तौ शाब्दत्वानुमितित्वयोः व्याप्यव्यापकभावापन्नयोः समावेशात् समानविषयकशाब्दत्वावच्छिन्नं प्रति अनुमितिसामग्रीत्वेन प्रतिबन्धकत्वान्तरमपि न कल्पनीयमिति महल्लाघवम्।

अथ शाब्दबोधस्यानुमितित्वोपगमे व्याप्तिज्ञानाद्यखिलानुमितिकारणघटिता आकाङ्क्षाज्ञानादिघटिता च शाब्दसामग्री वाच्या। तथा च विभिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्रीत्वेन या प्रतिबन्धकता, तदवच्छेदककोटौ व्याप्तिज्ञानादीनामपि प्रवेशेन, सामग्रीत्वस्य च एककारणविशिष्टापरकारणरूपतया तेषां विशेष्यविशेषणभावे विनिगमनाविरहेण च विपरीतमेव गौरवमिति चेत् —

मैवम्। यथा हि अनुमितिसामग्र्याः लिङ्गभेदेन अन्वयव्यतिरेकव्याप्तिभेदेन च भिन्नतया तद्घटककारणानां व्याप्तिज्ञानादीनामेकरूपेण कारणताविरहेण परस्परजन्यानुमितौ व्यभिचारः। तद्वारणाय तत्तदव्यवहितोत्तरत्वमात्रस्य कार्यतावच्छेदककोटौ प्रवेशेऽपि, इष्टतावच्छेदकावच्छिन्नसाधनतादिज्ञानस्य प्रवृत्त्याद्युपयोगित्वेन, वह्निमत्पर्वतादिविषयकानुमितित्वेन प्रयोजनत्वादिप्रतिसन्धाने अनुमितित्वावच्छिन्न-

[१] व्युत्पत्तिवादव्याख्यानस्य प्रकाशस्य परिशिष्टे, पृ. ३१०-३१२.

निरूपितसाधनतादिज्ञानस्यैवापेक्षिततया, अनुमितित्वादीनां कार्यतानवच्छेदकत्वे उत्कृष्टसाधनतादिज्ञानासंभवात् तदर्थमवयववाक्यप्रयोगो नोपपद्येत। अतः कारण-वैजात्येऽपि सर्वेषु तथाविधज्ञानेषु अनुमितित्वमनुभवबलादास्थीयते; यथा वा अनुमितित्वावच्छिन्नं प्रति अभावज्ञानत्वेन सामान्यकार्यकारणभावम्, अतिप्रसङ्ग-भङ्गाय विशेषसामग्र्याः सहकारित्वं च उपेत्य व्याप्तिसामान्यस्याभावघटितत्वेन तज्ज्ञानस्यानुमितिस्थले सर्वत्र संभवात् सर्वास्वनुमितिव्यक्तिषु अनुमितित्वमूरी-क्रियते; तथा तत्तदाकाङ्क्षाज्ञानाद्यव्यवहितोत्तरत्वस्य कार्यतावच्छेदकतया प्रवेशे-ऽपि, प्रवृत्त्युपपत्तये विषयविशेषमनुमितित्वं च प्रवेश्य व्याप्तिज्ञानाद्यघटितया आकाङ्क्षाज्ञानादिघटितक्लृप्तसामग्र्यैव शाब्दात्मकानुमित्युत्पत्तिसंभवात्।

अपि चाकाङ्क्षाया एकपदाव्यवहितोत्तरापरपदत्वरूपतया, अव्यवहितोत्तरत्वस्य च तत्क्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति तत्क्षणध्वंसाधिकरणत्वरूप-तया अभावघटितत्वेन आकाङ्क्षाज्ञानस्याभावविषयकत्वेन, अनुमितिसामान्य-कारणस्यापि शाब्दस्थले सत्त्वेन तत्रैव चाकाङ्क्षाज्ञानादिविशेषसामग्रीसहकारि-त्वोपगमेन व्याप्तिज्ञानाद्यजन्यत्वेऽपि शाब्दबोधस्यानुमितित्वसंभवात्, प्रतिबन्ध-कतावच्छेदककोटौ व्याप्तिज्ञानादेरधिकस्य अप्रवेशेन लाघवस्यानपायादिति चेत् —

न। एवमेव विनिगमनाविरहेण अनुमितेरपि शाब्देऽन्तर्भावयितुं शक्यत्वात्। अनुमितेरपि शाब्दत्वोपगमे समानविषयकानुमितित्वावच्छिन्नं प्रति प्रत्यक्ष-सामग्रीत्वेन प्रतिबन्धकत्वं न कल्पनीयम्। समानविषयकशाब्दत्वावच्छिन्नं प्रति प्रत्यक्षसामग्रीत्वेन क्लृप्तप्रतिबन्धकतयैव निर्वाहात्।

नापि समानविषयकशाब्दत्वावच्छिन्नं प्रति अनुमितिसामग्रीत्वेन प्रतिबन्धकत्वं कल्पनीयम्। एकस्मिन्नेव ज्ञाने उभयधर्मवत्त्वस्य उभयसामग्रीजन्यत्वस्य चोप-गमेनानुपपत्तिविरहात्।

न च पदज्ञानादिकं विनानुमित्यनुपपत्तिः, विभिन्नविषयकप्रत्यक्षं प्रति या अनु-मितिसामग्रीनिष्ठप्रतिबन्धकता तदवच्छेदककोटौ आकाङ्क्षाज्ञानादेरपि प्रवेशेन महागौरवं च इति वाच्यम्। शाब्दसामान्ये ज्ञानत्वेन कारणतां विशेषसामग्र्याः सहकारितां चोपगम्य, आकाङ्क्षाज्ञानाद्यघटिता अनुमितिकारणत्वेन संप्रतिपन्न-व्याप्त्यादिज्ञानादिना घटितैव अनुमित्यात्मकशाब्दसामग्री वाच्या। केवलशाब्द-सामग्री च आकाङ्क्षाज्ञानादिघटितैव वाच्येत्यपि वक्तुं शक्यतया पूर्ववत् सर्व-दोषपरिहारस्य तुल्यत्वात्।

नन्वनुमितेः शाब्दत्वे "शाब्दयामि" इत्यनुभवापत्तिरिति चेत् — शाब्दस्यानु-मितित्वेऽपि "अनुमिनोमि" इत्यनुभवापत्तिस्तुल्यैव।

शाब्दान्यानुमितिरेव "अनुमिनोमि" इत्यनुव्यवसायहेतुरिति चेत् — अनुमित्यन्यशाब्दमेव "शाब्दयामि" इत्यनुव्यवसायहेतुरित्यपि तुल्यमेव।

व्याप्तिज्ञानादिकार्यतावच्छेदककोटौ शाब्दत्वाप्रवेशात् अनुमितौ शाब्दत्वासंभव इति चेत् — आकाङ्क्षाज्ञानादिकार्यतावच्छेदककोटावपि अनुमितित्वाप्रवेशात् शाब्दस्यानुमितित्वासंभव इत्यपि समानम्।

यदि च "न शाब्दयामि" इत्यनुभवान्नानुमितेः शाब्दत्वम्, तदा "न अनुमिनोमि" इत्यनुभवान्न शाब्दबुद्धेरनुमितित्वमित्यपि तुल्यम्।

तस्मान्न शाब्दमतिरनुमितिः, न वा अनुमितिः शाब्दमतिः, न वा शाब्दत्वानुमितित्वे व्याप्यव्यापकभावापन्ने इति सिद्धम्।

अथैवमपि प्रत्यक्षत्वमेव शाब्दे कुतो नोपेयते, लौकिकसंनिकर्षाभावेऽपि ज्ञानलक्षणप्रत्यासत्तेः संभवात्। शाब्दमात्रे पदार्थोपस्थितेः तदात्मिकायाः सत्त्वात्।

न च ज्ञानलक्षणा प्रत्यासत्तिः स्वविषयविषयमेव प्रत्यक्षं जनयतीति शाब्दमतौ अपूर्वव्यक्तिभानमनया अशक्यमिति वाच्यम्। नीलत्वादिज्ञानरूपया सामान्यलक्षणप्रत्यासत्त्या अपूर्वस्यापि भानोपपत्तेः।

सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारपक्षे न प्रत्यक्षत्वसंभव इति चेत् — संनिकर्षाजन्यत्वेऽपीश्वरज्ञानस्येव शाब्दबोधस्यापि प्रत्यक्षत्वसंभवात्।

ज्ञानाकरणकज्ञानत्वमीश्वरज्ञाने प्रत्यक्षत्वप्रयोजकम्, शाब्दमतौ तु पदज्ञानकरणकत्वान्न प्रत्यक्षत्वसंभव इति चेत् — ज्ञानसामान्ये मनसः करणत्वपक्षे पदज्ञानादेरकरणत्वात् शाब्दमतेरपि ज्ञानाकरणकत्वेन प्रत्यक्षत्वं दुरपह्नवम्।

शाब्दबुद्धौ प्रत्यक्षत्वोपगमे चाक्षुषत्वादिजात्या शाब्दत्वस्य सांकर्यप्रसङ्ग इति चेत् — चाक्षुषत्वादिव्यावृत्तव्यक्तिष्वेव शाब्दत्वस्वीकारे तदसंभवात्। मानसत्वेन सांकर्यमिति चेत् शाब्दत्वे मानसत्वव्याप्यत्वस्वीकारे तदसंभवात्, मानसत्वं विहाय शाब्दत्वस्य कुत्राप्यसत्त्वात्।

अत एव न "शाब्दयामि" इत्यनुभवानुपपत्तिः। शाब्दबोधस्य अतिरिक्तत्वपक्षे इव एतत्पक्षेऽपि तावतीष्वेव व्यक्तिषु शाब्दत्वजातेः स्वीकारात्।

न च "नीलो घटः" इत्यादिवाक्यजन्यबोधानन्तरं "नीलं घटं साक्षात्करोमि" इति अनुभवापत्तिः। यदंशे लौकिकः संनिकर्षः तदंशे एव "साक्षात्करोमि" इत्यनुभवस्य स्वीकृतत्वात्।

न च लौकिकसंनिकर्षाभावेऽपि मण्डूकवसाञ्जनरञ्जितनयनस्य पुंसः वंशोरगविभ्रमोत्तरम् "उरगं साक्षात्करोमि" इत्यनुभवानुपपत्तिः, तत्रोरगस्य अलौकिक्या

ज्ञानलक्षणप्रत्यासत्त्या भानादिति वाच्यम्। लौकिकसंनिकर्षस्थल इव दोषविशेष-जन्यविभ्रमस्थलेऽपि "साक्षात्करोमि" इत्यनुभवस्योपगतत्वादिति।

ननु शाब्दत्वजातिं, शाब्दबोधं, तत्कारणाकाङ्क्षाज्ञानादिकं चोपगच्छतः, शाब्दमतौ प्रत्यक्षत्वमभ्युपगच्छतस्तवैव किं लाघवम् इति चेत् — श्रूयताम्। विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वम् अवि-वादम्। तत्र अस्माभिर्लाघवान्वेषिभिः अनुमितेरप्युक्तयुक्तिनिवहेन अनुमितित्व-व्यापकं मानसत्वमेवाङ्गीकरणीयम्। तथा च विशिष्टवैशिष्ट्यावगाहिस्मृतेः विशे-षणतावच्छेदकप्रकारकज्ञानविरहेऽपि जायमानतया तत्साधारणं विशिष्टवैशिष्ट्या-वगाहिबुद्धित्वं न कार्यतावच्छेदकम्। किं तु तादृशप्रत्यक्षत्वमेव। तथा च शाब्दा-नुमित्योः प्रत्यक्षत्वानुपगमे तथाविधशाब्दत्वावच्छिन्नं प्रति विशेषणतावच्छेदक-प्रकारकज्ञानस्य पृथक् कारणत्वं कल्पनीयम्। एवं तथाविधानुमितित्वावच्छिन्नं प्रत्यपीति गौरवम्। स्मृत्यन्यत्वविशिष्टविशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य कार्यताव-च्छेदकत्वे तथाविधानेककार्यकारणभावाकल्पनेऽपि, स्मृत्यन्यत्वतथाविधज्ञानत्वयोः परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेण, स्मृत्यन्यत्वविशिष्टविशिष्ट-वैशिष्ट्यावगाहिज्ञानत्वस्य विशिष्टवैशिष्ट्यावगाहिज्ञानत्वविशिष्टस्मृत्यन्यत्वस्य च कार्यतावच्छेदकत्वं कल्पनीयमिति गुरुधर्मावच्छिन्नकार्यताद्वयापत्तिः।

यदि च विशिष्टवैशिष्ट्यावगाह्यनुभवत्वमेव कार्यतावच्छेदकम्। तावतैव स्मते-र्वारणं, शाब्दबोधादेः संग्रहश्चेत्युच्यते, तदापि प्रत्यक्षत्वातिरिक्तानुभवत्वजातौ प्रमाणाभावेनास्मदिष्टसिद्धिरिति चेत् —

अत्राहुः। विभिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्र्याः अनुमितिसामग्र्याश्च प्रति-बन्धकतया शाब्दबोधादेः प्रत्यक्षत्वोपगमे, "नीलो घटः" इति शाब्दसामग्र्यां "पीतः पटः" इति शाब्दसामग्र्यां च सत्यां समूहालम्बनशाब्दबोधानुपपत्तिः। नीलघट-विषयकशाब्दसामग्र्याः पीतपटात्मकविभिन्नविषयकशाब्दरूपप्रत्यक्षं प्रति प्रतिबन्ध-कत्वात्, पीतपटविषयकशाब्दसामग्र्याः नीलघटशाब्दात्मकप्रत्यक्षप्रतिबन्धकत्वा-च्चेति। एवमेव चानुमितेरपि समूहालम्बनत्वानुपपत्तिरूह्या।

यदि च शाब्दभिन्न-विभिन्नविषयकप्रत्यक्षत्वं प्रतिबध्यतावच्छेदकम्, एवमनु-मितिभिन्न-विभिन्नविषयकप्रत्यक्षत्वं प्रतिबध्यतावच्छेदकमित्युच्यते, तदा शाब्द-भिन्नत्वादेः विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुधर्मावच्छिन्नानेकप्रतिबध्य-तापत्तिः।

तस्मात् शाब्दमतिः न प्रत्यक्षं, न वा अनुमितिः, अपि तु तद्विलक्षणेति तत्करणं शब्दः प्रमाणान्तरमिति सिद्धम्।

निष्कर्षः

अत्रेदं तत्त्वम् — शाब्दबोधस्य प्रमान्तरत्वास्वीकारे शाब्दबोधानन्तरं जायमाने "अहमममुमर्थं शृणोमि", "शाब्दयामि" इति वा अनुव्यवसाये या विलक्षणा शाब्दबोधरूपा प्रमा भासते तस्याः अपलापः वैशेषिकैरपि कर्तुमशक्य एव। तथा च तादृशानुव्यवसायरूपानुभवबलात् शाब्दबोधरूपायाः प्रमायाः सिद्धौ सत्यां तत्कारणस्य शब्दस्य प्रमाणान्तरत्वमवश्यमेवाभ्युपेयम्। अन्यथा शाब्दप्रमायाः आकस्मिकत्वमापद्येत। अनुमितिसामग्र्याः शाब्दप्रयोजकत्वे च धूमादिलिङ्गकानुमितिस्थलेऽपि "शाब्दयामि" इत्यनुव्यवसायापत्तिः।

यदि च शाब्दत्वेऽनुमितित्वव्याप्यत्वं स्वीकृत्य आकाङ्क्षाज्ञानादिघटितानुमितिसामग्री "शाब्दयामि" इत्यनुव्यवसायप्रयोजिकेत्युच्यते, तदापि अनुमितिस्थले "न शाब्दयामि, किं त्वनुमिनोमि" इत्यनुभवबलात् यथा अनुमितौ न शाब्दत्वम्, अत एवानुमितित्वं न शाब्दत्वव्याप्यमित्युच्यते; तथैव शाब्दबोधस्थले "नानुमिनोमि, अपि तु शाब्दयामि" इत्यनुभवबलात् शाब्दत्वं नानुमितित्वव्याप्यम् इति स्वीकरणीयम् — इति।

शब्दस्य पृथक्प्रमाणत्वे शब्दशक्तिप्रकाशिकोक्तरीतिः[१]

शब्दशक्तिप्रकाशिकायां जगदीशतर्कालंकारास्तु एवमाहुः —

साकाङ्क्षशब्दैर्यो बोधः तदर्थान्वयगोचरः।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा॥३॥

आकाङ्क्षायोग्यतासत्तिविशिष्टपदप्रयोज्यः यः तत्तदर्थसंसर्गावगाही बोधः = अनुभवो, जायते सः नियन्त्रितार्थत्वात् = तादृशपदोपस्थाप्यस्यैवार्थस्य अवगाहित्वात्, न प्रत्यक्षं, न वा अनुमितिः। तथा हि — अस्ति तावत् "गौरस्ति", "गामानय" इत्यादिसाकाङ्क्षशब्देभ्यः स्वस्ववृत्त्या पदार्थानामुपस्थित्यनन्तरं गवादौ अस्तित्वादेः अन्वयावगाही विलक्षणो बोधः। तादृशबोधं प्रति आकाङ्क्षादिविशिष्टशब्दज्ञानं हेतुः, 'तादृशज्ञानसत्त्वे शाब्दबोधः', 'तदभावे तदभावः' इत्यन्वयव्यतिरेकवशात्। न तु असंसर्गाग्रहसहितं पदार्थानामुपस्थितिमात्रं हेतुः। अस्तित्वादिविशिष्टगवादिबुद्धेः "अस्तित्वेन गां जानामि" इत्याकारकानुव्यवसायसाक्षिकत्वात्। अन्यथा विशिष्टज्ञानानुभवस्य अस्वीकारे "पर्वतो वह्निमान्" इति विशिष्टमतिरूपानुमितेरप्यपलापापत्तेः। तत्रापि "पर्वतं वह्निमत्तयानुमिनोमि" इत्यनुव्यवसायस्यापह्नोतुं शक्यत्वात्।

---

[१] श.श.प्र. पृ. ७.

न च "गौरस्ति" इति वाक्यजन्या विशिष्टबुद्धिः स्मृतिरूपेति वाच्यम्। समानाकारकसंस्काराजन्यत्वात्। तद्धर्मिकतद्वत्तास्मरणं प्रति तद्धर्मिकतद्वत्तासंस्कारस्य हेतुत्वात्, तस्य च तादृशबोधात् पूर्वं नियमतः सत्त्वे प्रमाणाभावात्।

न च सा विशिष्टबुद्धिः उपस्थित्यात्मकज्ञानलक्षणप्रत्यासत्तिजन्यप्रत्यक्षरूपेति वाच्यम्। साकाङ्क्षपदेनेव अनुमानादिना उपस्थितस्याप्यर्थस्य उपनयमर्यादया तत्र भानापत्तेः। न चेष्टापत्तिः, अनुभवविरोधात्। पदोपस्थाप्यार्थावगाहिताया एवानुभवसिद्धत्वात्। तदुत्तरं प्रकारान्तरेणोपस्थितार्थविषयकतयानुव्यवसायापत्तेश्च। तत्तदर्थविषयकत्वेन शाब्दबोधविषयकानुव्यवसायं प्रति तत्तदर्थसाकाङ्क्षपदजन्यतद्गोचरशाब्दत्वेन विषयविधया हेतुत्वकल्पनेऽतिगौरवात्। "जलाहरणं न छिद्रघटकरणकम्" इत्येवमितरबाधदशायां "घटेन जलमाहरेत्" इति वाक्यजन्यस्य "छिद्रान्यघटेन जलमाहरेत्" इत्यन्वयबोधस्य पदाजन्यछिद्रेतरत्वविषयकत्वेन अनुव्यवसायोत्पत्त्या व्यतिरेकव्यभिचारात् पदजन्यतद्विषयकशाब्दत्वेन विषयविधया हेतुत्वकल्पनाया असंभवाच्च। अपि च शाब्दबोधस्योपनीतभानात्मकत्वाङ्गीकारे उपनीतयोः प्रत्यक्षे विशेषणविशेष्यभावस्य कामचारात् गवादावस्तित्वादेरिव अस्तित्वादावपि गवादेर्भानप्रसङ्गः।

अत एव = शाब्दमतेः पदोपस्थाप्यार्थमात्रविषयकत्वादेव, नानुमितित्वम्। पूर्वपरामृष्टवस्तुमात्रस्य असति बाधके शाब्दधीविषयत्वापत्तेः।

न च तत्तदर्थविषयकशाब्दबोधं प्रति साकाङ्क्षपदजन्यतत्तदर्थविषयकस्मृतेः कारणत्वकल्पनात् न पूर्वोक्तदोष इति वाच्यम्। एवमपि पदार्थानामन्वयधीदशायाम् अपदार्थानामपि प्रत्यक्षानुमितिसामग्रीबलेन प्रत्यक्षानुमित्योरन्यतरप्रसङ्गस्य दुर्वारत्वात्।

न च शाब्दबोधसामग्र्याः प्रत्यक्षानुमितित्वावच्छिन्नप्रतिबन्धकत्वाङ्गीकारान्न शाब्ददशायां प्रत्यक्षापत्तिरिति वाच्यम्। एवमपि शाब्दधियः प्रत्यक्षत्वाभ्युपगमे प्रत्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं न संभवति, स्वं प्रति स्वसामग्र्याः प्रतिबन्धकत्वायोगादिति शाब्दान्यप्रत्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमिति गौरवम्, प्रतिबध्यतावच्छेदके शाब्दान्यत्वप्रवेशात्। अतः शाब्दधियः प्रत्यक्षभिन्नत्वकल्पनमेव युक्तम्। उपनयोऽपि न प्रत्यक्षत्वावच्छिन्नहेतुः। अपि तु तत्प्रकारकानुभवत्वावच्छिन्नहेतुः।

लिङ्गजन्यत्वेन शाब्दबुद्धेरनुमितित्वमिति शङ्काया निरासः

योग्यतार्थगताकाङ्क्षा शब्दनिष्ठानुभाविका।
प्रत्येकं वा मिलित्वा वा नैते लिङ्गमसिद्धितः॥४॥

अर्थगता बाधाभावरूपा योग्यता, शब्दगता चानुपूर्वीरूपा आकाङ्क्षा शाब्दबोधरूपानुभवजनिका। ते उभे प्रत्येकं वा मिलित्वा वा शाब्दबोधे लिङ्गे न भवतः, असिद्धत्वात् इति कारिकार्थः।

एतदुक्तं भवति — बाधनिश्चयदशायां शाब्दबोधवारणाय योग्यतानिश्चयस्य हेतुत्वं स्वीक्रियते, योग्यतानिश्चयस्य बाधज्ञानप्रतिबन्धकत्वात् योग्यतानिश्चयसत्त्वे बाधनिश्चय एव न संभवति, बाधनिश्चयसत्त्वे च योग्यतानिश्चयरूपकारणाभावान्न शाब्दबोध इति योग्यतानिश्चयहेतुत्ववादिनामाशयः। स न संगच्छते; विशिष्टबुद्धिसामान्यं प्रति बाधनिश्चयस्य प्रतिबन्धकत्वात्, तदभावरूपकारणविरहादेव बाधनिश्चयकाले शाब्दबोधवारणसंभवात् योग्यतानिश्चयस्य शाब्दबोधहेतुताकल्पने प्रयोजनाभावात्। तथा च योग्यतारूपलिङ्गनिश्चयाधीना शाब्दबोधात्मिका अनुमितिरिति न वक्तुं शक्यते। किं च योग्यतामात्रलिङ्गकसंसर्गानुमितेः शाब्दबुद्धित्वस्वीकारे "घटः कर्मत्वमानयनं कृतिः" इत्यादिस्थलीयस्य संसर्गानुमानस्यापि शाब्दबुद्धित्वप्रसङ्गः। किं च योग्यतासंशयस्थलेऽप्यन्वयबुद्धेरानुभविकत्वेन संशयनिश्चयसाधारणयोग्यताज्ञानत्वेनैव शाब्दबोधं प्रति हेतुता। अनुमितौ तु हेतुमत्तानिश्चयस्यैव हेतुत्वात् योग्यतासंशयस्थलीयान्वयबुद्धौ अनुमितित्वकल्पनं न संभवति।

आकाङ्क्षा तु न लिङ्गम्। "गौः अस्तितावान्, आकाङ्क्षावत्त्वात्" इत्यनुमाने शब्दनिष्ठायाः आकाङ्क्षायाः गोरूपपक्षावृत्तितया स्वरूपासिद्धत्वात् इति।

नव्यवैशेषिकमतम्

अत्र नव्यवैशेषिकाः — "गौः अस्तितावान्, स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितत्वात्, घटवत्"। "यः स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितः सः अस्तितावान्" इति सामान्यमुखी व्याप्तिः। यद्वा "गौः अस्तितावान्, अस्तिपदसमभिव्याहतगौःपदस्मारितत्वात्, चक्षुर्वत्"। अत्र विशेषव्याप्तिः। "........दिङ्नेत्रघृणिभूजले" इति[1] कोशाच्चक्षुषोऽपि गोपदस्मारितत्वात्। न चात्रासिद्धिः शङ्कनीया। पदानामेकवाक्यतापन्नत्वरूपसमभिव्याहतत्वनिश्चयं विना न्यायमतेऽप्यन्वयबोधस्यानुत्पत्त्या, पूर्वं तन्निश्चयस्यावश्यकत्वात् इत्याहुः।

तन्मतखण्डनम्

तन्न। गवादौ पदस्मारितत्वाज्ञानकाले उत्पन्नस्य "गौरस्तितावान्" इत्यन्वयबोधस्य अनुमितित्वदौर्घट्यात्। अनुमितौ हि पदस्मारितत्वरूपहेतुज्ञानमपेक्षितम्।

---

[1] अ.को. ३.३.२५.

पदस्मारितत्वाज्ञानकाले पदस्मारितत्वज्ञानं हि दुर्लभम्। न हि पदजन्या पदार्थ-स्मृतिः ज्ञाता सती शाब्दबोधहेतुः, येन पदस्मारितत्वाज्ञानदशायां शाब्दबोध एव न जायते इति वक्तुं शक्येत। किं तु स्वरूपसती पदार्थस्मृतिः शाब्दबोधहेतुः।

किं च पदैरस्मारितस्यापि पदार्थस्य पदस्मारितत्वभ्रमदशायाम् अन्वयबोध-प्रसङ्गः, हेतुज्ञानसद्भावात्।

एतेन "गौःपदमस्तित्ववद्गोविषयकज्ञानपूर्वकम्, अस्तिपदसाकाङ्क्षगौःपद-त्वात्, यन्नैवं तन्नैवम्" इति पदपक्षकानुमानमपि कणादमतानुसारिभिरुक्तं निरस्तं वेदितव्यम्। उक्तज्ञानपूर्वकत्वाभावनिश्चयदशायामुत्पन्नस्य "गौरस्तितावान्" इत्य-न्वयबोधस्योक्तानुमानतोऽनिर्वाहात्। अनुमितौ हि साध्यहेतुविषयकपरामर्शोऽ-पेक्षितः।

अपि च वाक्यार्थस्यापूर्वत्वेन तद्गर्भसाध्यस्य पूर्वमनुपस्थित्या अनुमानं न संभवति।

वाक्यार्थज्ञानस्यानुमितित्वाभावसमर्थनम्

वस्तुतस्तु — वाक्यार्थस्यानुमितित्वे सत्येव साकाङ्क्षपदत्वादिलिङ्गकत्वं कल्पनीयम्। तदेव त्वसिद्धम्, प्रमाणाभावात्। "अस्तित्वेन गामनुमिनोमि" इत्यनुव्यवसायस्य तत्रासत्त्वात्। प्रत्युत "गौरस्तीति वाक्यात् अस्तित्वेन गौः श्रुतः, न त्वनुमितः" इत्यनुभवात् अनुमितित्वविलक्षणशाब्दत्वावच्छिन्नं ज्ञानं सिध्यति। "श्रोतव्यो मन्तव्यः" इति श्रुत्या अनुमितित्वासमानाधिकरणशाब्दत्व-जात्यवच्छिन्नज्ञाने श्रुधातोः शक्त्यवधारणात्।

न च "अस्तित्वेन गौः श्रुतः, न त्वनुमितः" इत्यनुभवो भ्रम इति वाच्यम्। बाधकाभावात्।

किं च शाब्दबोधस्य यया रीत्या अनुमितित्वं कल्प्यते तयैव रीत्या अनुमितेः शाब्दत्वमपि कल्पयितुं शक्यम्। न चानुमितौ समानविषयकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वात्, तदभावजन्यतया हेतुना शाब्दान्यत्वं साधनीयमिति वाच्यम्। शाब्दबोधेऽपि समानविषयकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वात्, तदभावजन्यत्वेन हेतुना अनुमित्यन्यत्वस्यापि साधयितुं शक्यत्वात्।

ननु अनुमितेः पदज्ञानजन्यत्वं प्रकल्प्य तेन हेतुना शाब्दत्वसाधने, निरा-काङ्क्षवाक्यस्थलीयपदार्थोपस्थितिमूलकोपनीतभाने साध्याभाववति हेतुसत्त्वात् व्यभिचारः। अतः आकाङ्क्षादिमत्पदज्ञानजन्यत्वमेव हेतुर्वाच्यः। वह्न्याद्यनुमितौ तु पूर्वमाकाङ्क्षाज्ञानासंभवात् तद्घटितहेतुना तत्र शाब्दत्वसाधनासंभव इति

चेत् — न। तत्रापि पूर्वमाकाङ्क्षाज्ञानस्य संपादयितुं शक्यत्वात्। यथा हि पटादिपदैरेकसम्बन्धिज्ञानमपरसंबन्धिस्मारकमिति रीत्या पटादेरर्थस्य स्मरणे सति तन्निरूपितव्याप्तेः ज्ञानं भवति, तथा वह्न्याद्यर्थैः तद्वाचकवह्न्यादिपदस्मरणोत्तरं तदीयाकाङ्क्षाज्ञानस्य सुलभत्वात्। वाच्यतावत् वाचकत्वस्यापि स्मारकतायाम-विशेषात्, उभयोः संबन्धरूपत्वात्।

न च "ह्रदे धूमाभावः" इत्याद्यप्रसिद्धसाध्यकस्थले पूर्वं साध्यस्यानुपस्थित्या साध्यवाचकपदस्य स्मरणासंभव इति वाच्यम्। तत्र साध्यज्ञानाभावेऽपि उद्बोध-कान्तरात् साध्यवाचकपदस्मरणसंभवात्।

किं च "घटात् अन्यः" इति वाक्यात् "घटप्रतियोगिकान्यत्ववान्" इत्या-कारकः निरवच्छिन्नविशेष्यताकः घटान्यत्वप्रकारको बोधो जायत इति सर्व-सिद्धम्। स च अस्मन्मते तादृशानुपूर्वीकपदज्ञानत्वेन तथाविधान्वयबोधं प्रति हेतुत्वादुपपद्यते। परमते तु निर्धर्मितावच्छेदककानुमितेरसंभवात् अन्यपक्षकानु-मितिर्दुर्घटा। अतः "भेदः घटप्रतियोगिताकः, घटपदसाकाङ्क्षान्यपदस्मारितत्वात्" इत्यनुमितिः वक्तव्या। सा न शाब्दबोधसमानाकारा। पक्षविधया अन्यत्वस्य भाने-ऽपि अन्यत्वप्रकारेणान्यस्यानुमितावभानात्। अतस्तत्रत्यशाब्दबोधस्यानुमितित्वं दुर्घटम्।

न च "घटादन्यः" इत्यत्र अन्यपदं घटान्यत्ववति लाक्षणिकम्, अतस्तत्र घटपदार्थान्यपदार्थयोरन्वयबोध एव न जायत इति वाच्यम्। "घटात्" इत्यस्य वैयर्थ्यात्। न च लक्षणातात्पर्यग्राहकतया तत्सार्थक्यमिति वाच्यम्। तथा सति "घटोऽस्ति" इत्यादावपि घटादिपदस्यैव अस्तित्वादिविशिष्टघटादिलक्षकत्वसंभ-वात् तत्रापि अस्तित्वघटयोरन्वयबोधापलापापत्तेः।

जरन्मीमांसककृतं वैशेषिकमतदूषणम्

जरन्मीमांसकाः प्रकारान्तरेण वैशेषिकमतं दूषयन्ति। तथा हि — यथा शाब्दबोधं प्रति साकाङ्क्षत्वादिज्ञानं कारणम्, तथा आप्तोक्तत्वनिश्चयोऽपि कारणम्। आप्तोक्तत्वं नाम प्रकृतवाक्यार्थविषयकयथार्थज्ञानवदुक्तत्वम्। तादृशाप्तो-क्तत्वनिश्चयसत्त्वे तद्घटकज्ञानावच्छेदकतया वाक्यार्थस्यापि निश्चयोऽस्तीति निश्चि-तार्थविषयक एव शाब्दबोध इति वक्तव्यम्। एतादृशस्तु शाब्दबोधः अनुमितिरूपो न भवितुमर्हति। निश्चिते विषये अनुमित्सां विना अनुमित्यसंभवात्। शाब्दबोधस्य तु निश्चितविषयकस्यापीच्छां विना जायमानत्वात्। परं तु अनुमित्यन्योऽयं शाब्दबोधः ज्ञातार्थविषयकत्वात् प्रमा न भवति, अनधिगतार्थविषयकज्ञानस्यैव प्रमात्वात्।

नन्वगृहीतार्थग्राहिज्ञानस्यैव प्रमात्वे धारावाहिकद्वितीयादिज्ञानानां प्रमात्वं न स्यात्, प्रथमादिज्ञानगृहीतार्थग्राहित्वात् इति चेत् — न। यज्जातीयविशिष्टज्ञानत्वव्यापकं समानाकारकनिश्चयोत्तरत्वं तज्जातीयान्ययथार्थज्ञानमेव अगृहीतग्राहीत्युच्यते। यज्जातिपदेन तद्विशेष्यकतत्प्रकारकज्ञानत्वं ग्राह्यम्। धारावाहिकज्ञानेषु वर्तमानं यत् घटविशेष्यकघटत्वप्रकारकज्ञानत्वं, तद्व्यापकं न भवति समानाकारकनिश्चयोत्तरत्वं; तादृशज्ञानत्ववति प्रथमज्ञाने समानाकारकनिश्चयोत्तरत्वविरहात्। अपि तु स्मृतिगतं घटविशेष्यकघटत्वप्रकारकज्ञानत्वं गृह्यते चेत् तद्व्यापकं भवति समानाकारकनिश्चयोत्तरत्वम्, स्मृतीनां समानाकारकानुभवजन्यत्वात्। तज्जातीयान्ययथार्थज्ञानं स्मृतिभिन्नं यथार्थज्ञानमगृहीतग्राहित्वात् प्रमा। आप्तोक्तत्वनिश्चयोत्तरं जायमाने शाब्दबोधे समानाकारकनिश्चयोत्तरत्वसत्त्वेन तज्जातीयान्यत्वविरहात् नोक्तमगृहीतग्राहित्वमिति न प्रमात्वम् इति।

जरन्मीमांसकमतदूषणम्

तत् जरन्मीमांसकमतं दूषयति —

नाप्तोक्तता तु वाक्यार्थगर्भा ज्ञातोपयुज्यते।
वाक्यार्थानामपूर्वत्वात् संशयेऽप्यन्वयोदयात्॥ ५॥

एकपदार्थसंसृष्टापरपदार्थपर्यवसितो यो वाक्यार्थः, तद्विषयकज्ञानवता उक्तत्वरूपस्य आप्तोक्तत्वस्य निश्चयः यदि शाब्दमतेः कारणं स्यात्, तदा आप्तोक्तत्वनिश्चयरूपेण साध्यनिश्चयेन प्रतिबन्धात् एकपदार्थपक्षकापरपदार्थप्रकारकानुमितेरनुत्पादः स्यादपि। न चैवम्। शाब्दबोधात् पूर्वं वाक्यार्थस्य नियतोपस्थित्यभावात् वाक्यार्थगर्भस्याप्तोक्तत्वस्य मतेरप्यनावश्यकत्वात्। अन्यथा = शाब्दबोधात् पूर्वं वाक्यार्थगर्भाप्तोक्तत्वमतेरावश्यकत्वे, वेदस्यापि ज्ञातार्थज्ञानजनकत्वेन अनुवादकतया अप्रामाण्यापत्तेः।

न च लौकिकवाक्यजन्यशाब्दबोधे एव निरुक्ताप्तोक्तत्वनिश्चयः कारणम्, अतो न वेदस्यानुवादकत्वमिति वाच्यम्। एवमपि लोकेऽपि आप्तोक्तत्वसंशयेऽपि शाब्दबोधोत्पत्त्या व्यतिरेकव्यभिचारात् आप्तोक्तत्वनिश्चयस्य शाब्दबोधं प्रति अहेतुत्वात्।

अत एव = आप्तोक्तत्वसंशयोत्तरं शाब्दमतेरुत्पादादेव, इदमपि निरस्तम् — यत् आप्तोक्तत्वस्य संशये आप्तोक्तत्वव्यतिरेकनिश्चये वा अन्वयबुद्धेरनुत्पादात् अवश्यमाप्तोक्तत्वनिश्चयः अन्वयबुद्धिहेतुः, 'यत्संशययद्व्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयः तद्धेतुः' इति व्याप्तेः — इति। आप्तोक्तत्वसंशयादपि शाब्दोत्पादेन व्यभिचारात् आप्तोक्तत्वनिश्चयस्य हेतुत्वासिद्धेः।

तात्पर्यनिश्चयाधीनसिद्धसाधनशङ्कायाः परिहारः

ननु आप्तोक्तत्वनिश्चयानुरोधेन सिद्धसाधनस्य भवदुक्तरीत्या परिहारेऽपि तात्पर्यनिश्चयाधीनं सिद्धसाधनं परिहर्तुमशक्यम्। तथा हि — अन्वयबोधं प्रति तात्पर्यनिश्चयो हेतुरित्यवश्यमङ्गीकरणीयम्। अन्यथा " 'घटम्' इति वाक्यं घटनिष्ठकर्मतापरत्वाभाववत् (कर्मत्वधर्मिकघटप्रकारकान्वयबोधेच्छयानुच्चरितम्)" इति निश्चयकाले, "घटनिष्ठकर्मत्वान्यपरं ('कर्मत्वं घटविशिष्टान्यत्' इति बोधेच्छया उच्चरितम्)" इति निश्चयकाले च, "घटम्" इति वाक्यात् "कर्मत्वं घटीयम्" इत्यन्वयबोधापत्तिः। तात्पर्यनिश्चयस्य हेतुत्वे तु, "घटीयं कर्मत्वम्" इति बोधं प्रति " 'घटम्' इति वाक्यं घटकर्मत्वपरम्" इति निश्चयस्य हेतुतया, उक्तविपरीतनिश्चयकाले उक्ततात्पर्यनिश्चयरूपहेतुविरहात् न घटनिष्ठकर्मत्वशाब्दबोधापत्तिः। एवं च तात्पर्यनिश्चयकाले तात्पर्यघटकतया एकपदार्थविशिष्टापरपदार्थरूपवाक्यार्थनिश्चयोऽपि जात इति तादृशनिश्चयात्मकसिद्धिरूपप्रतिबन्धकसत्त्वात् वाक्यार्थानुमितिर्न संभवतीति चेत् — न। तात्पर्यज्ञानस्य शाब्दबोधं प्रति हेतुत्वस्वीकारेऽपि तस्य एकपदार्थविशिष्टापरपदार्थरूपवाक्यार्थविषयकत्वेन न हेतुत्वम्। अपि तु निरूप्यनिरूपकभावापन्नविषयताघटितेन कर्मतात्वावच्छिन्नविशेष्यतानिरूपितघटत्वावच्छिन्नप्रकारताकबोधविषयकत्वेनैव हेतुत्वम्। तथा च तात्पर्यनिश्चयकाले वाक्यार्थस्यानिश्चयेन सिद्ध्यभावात् वाक्यार्थानुमितिर्भवत्येव।

वाक्यार्थविषयकत्वेन तात्पर्यज्ञानस्य हेतुत्वे, "प्रमेयत्वेन कर्मत्वावगाही 'प्रमेयं घटीयम्' इति यो बोधः, यश्च प्रमेयत्वेन घटावगाही 'कर्मत्वं प्रमेयविशिष्टम्' इति बोधः, तदिच्छया उच्चरितम्" इति निश्चयकालेऽपि, कर्मत्वत्वेन कर्मत्वं घटत्वेन घटं चावगाहमानः "कर्मत्वं घटीयम्" इति शाब्दबोधः स्यात्, पूर्वं "घटविशिष्टकर्मत्वबोधेच्छया उच्चरितम्" इति तात्पर्यज्ञानस्य सत्त्वात्। अतः पूर्वोक्तरूपेणैव हेतुत्वं वाच्यम् इति।

तात्पर्यज्ञानस्य शाब्दबोधं प्रति अहेतुत्वम्

ननु " 'घटम्' इति वाक्यं कर्मत्वत्वेन कर्मत्वधर्मिक-आधेयतासंसर्गक-घटत्वेन घटप्रकारकबोधेच्छया उच्चरितम्" इति तात्पर्यज्ञानस्य हेतुत्वं वाच्यम्; अन्यथा तादृशतात्पर्याभावनिश्चयदशायां "कर्मत्वम् आधेयतासंबन्धेन घटविशिष्टम्" इति बोधप्रसङ्गात्। तत्र च वाक्यार्थस्य प्रवेशात् सिद्धिसत्त्वेनानुमितित्वस्वीकारो न संभवतीति शाब्दबोधस्य ज्ञातार्थविषयकतया शब्दोऽनुवादकः स्यात् इति न तस्य प्रमात्वमिति चेत् — न। समानानुपूर्वीकस्य अश्रूयमाणवाक्यस्य घटविशिष्टकर्मत्वपरत्वनिश्चयेऽपि, श्रूयमाणवाक्यव्यक्तौ तत्परत्वानिश्चये "घटीयं कर्मत्वम्"

इति शाब्दबोधो न जायते। तदापत्तिवारणाय, "कालान्तरीयं 'घटम्' इति वाक्यं घटीयघटीयकर्मतापरम्" इति निश्चयेऽपि, "इदानींतनं 'घटम्' इति वाक्यं घटीयकर्मतापरम्" इति निश्चयाभावकाले, "इदानीं 'घटम्' इति वाक्यं घटीयकर्मतापरत्वाभाववद्" इति निश्चये वा "घटीयं कर्मत्वम्" इति बोधापत्तिवारणाय च तत्तत्कालीनतत्तद्वाक्यधर्मिकघटीयकर्मत्वादिपरत्वनिश्चयस्य तत्तत्कालीनतत्तद्वाक्यजन्यतत्तदर्थविषयकशाब्दबुद्धौ विशिष्य हेतुत्वं वक्तव्यम्। तदपेक्षया च तात्पर्यज्ञानहेतुभूतानां प्रकरणज्ञानात्मकानां विलक्षणज्ञानव्यक्तीनामेव अन्वयबोधं प्रति हेतुत्वमुचितम्। अवश्यक्लृप्तनियतपूर्ववर्तिताकत्वात्। 'तद्धेतोरेव तत्सिद्धौ मध्ये किं तेन' इति न्यायोऽप्यत्रानुसन्धेयः।

अत एव "सैन्धवमानय" इत्यादावपि लवणपरत्वधीर्न लवणान्वयबुद्धौ हेतुः, अपि तु लवणपरत्वानुमापकत्वेनाभिमतं भोजनादिप्रकरणज्ञानमेवेति न्यायसिद्धान्तः। तथा च शाब्दबोधं प्रति तात्पर्यज्ञानस्याहेतुतया 'तात्पर्यावच्छेदकतया वाक्यार्थसिद्धेः शब्दस्यानुवादकत्वम्' इति प्राभाकरमतमयुक्तम् इति।

एतेनेदमपि निरस्तम् — वाक्यार्थप्रतीतिजनकतया अभिप्रेतत्वलक्षणस्य तात्पर्यस्य ज्ञानमवश्यं शाब्दबोधे हेतुः, तात्पर्यसंशये तात्पर्याभावनिश्चये वा शाब्दबोधानुत्पत्तेः। अपि च नानार्थकहर्यादिपदस्थले युगपदनेकार्थोपस्थितौ एकार्थमात्रान्वयबोधे तात्पर्यनिश्चयस्यैव विनिगमकत्वं वाच्यम्। लक्षणाकल्पकतयापि तात्पर्यनिश्चयः कारणमिति वाच्यम्। "यष्टीः प्रवेशय" इत्यादौ मुख्यार्थबाधविरहेण मुख्यार्थबाधस्य सर्वत्र लक्षणायां हेतुत्वासंभवात्। तथा च तात्पर्यनिश्चयस्य हेतुत्वात् तात्पर्यावच्छेदकतया वाक्यार्थसिद्धिः — इति। तात्पर्यनिर्णयहेतुभूतप्रकरणादिज्ञानेनैव सर्वोपपत्तेः।

अपि च कविः केनचित्तात्पर्येण वाक्यानि प्रयुङ्क्ते। श्रोतुस्तु अन्यार्थपरत्वनिश्चयेऽपि शाब्दबोधो जायते। किं च शुकाद्युच्चरितवाक्यानां स्वार्थपरत्वाभावनिश्चयेऽपि श्रोतॄणामन्वयबोधो जायते। तथा च व्यतिरेकव्यभिचारात् न तात्पर्यनिश्चयस्य शाब्दबोधहेतुत्वमिति।

मथुरानाथोक्तरीत्या अतिनव्यवैशेषिकमतनिरसनम्[१]

अतिनव्यवैशेषिकमतानुवादः

अत्रातिनव्यवैशेषिकाः — लिङ्गतावच्छेदकप्रकारकलिङ्गनिश्चयो नानुमितिहेतुः। "पर्वतवृत्तिरयमालोको धूमो वा, उभयथापि वह्निव्याप्यः" इत्यत्र, "वह्नि-

[१] तत्त्वचिन्तामणिव्याख्यायां रहस्ये च.भा. प्र.प. पृ. ६७.

व्याप्यवानयम्'' इत्यादिपरामर्शस्थले च लिङ्गतावच्छेदकप्रकारकनिश्चयं विनाप्यनुमितेरुत्पत्त्या व्यतिरेकव्यभिचारात्। किं तु व्याप्यत्वप्रकारकलिङ्गनिश्चय एवानुमितिहेतुः। स च प्रकृते लिङ्गतावच्छेदकयोग्यतायाः संशयेऽपि संभवत्येव। किं च योग्यतायाः संशयदशायामुक्तहेतौ व्यभिचारज्ञानदशायां च व्यभिचारिणोऽव्यभिचारिणो वा पक्षवृत्तेः अपक्षवृत्तेर्वा हेत्वन्तरस्य ज्ञानादेवानुमितिः स्यात्, किं शब्दस्य प्रमाणान्तरत्वेन?

ननु पदपदार्थपक्षकानुमानात् संसर्गसिद्धावपि ''घटमानय'' इत्यादिशब्दश्रवणानन्तरं ''घटकर्मकानयनानुकूलकृतिमान्'' इत्यादिविशेषणविशेष्यभावेन प्रतीतेरनुभवसिद्धायाः असंभवः। अनुमाने पदार्थसंसर्गस्यैव विशेषणतया भानात्। अतः शब्दोऽवश्यं मानान्तरमङ्गीकार्यम्। न चानुमानानन्तरं मनसा तादृशप्रतीतिसंभव इति वाच्यम्। तथा कल्पने गौरवात्, मानाभावात्, शब्दश्रवणानन्तरं प्रथमत एव तदाकारज्ञानस्यानुभवसिद्धत्वाच्चेति चेत् —

कर्मत्वादिकं पक्षयित्वा, वस्तुगत्या कर्मत्वादौ घटादेः यादृशः संसर्गः प्रतीयते तत्संसर्गेण घटादिकं साध्यम्। एवमानयनादिकं पक्षीकृत्य कर्मत्वादिकं साध्यम्। समूहालम्बनपरामर्शात् 'विशेष्ये विशेषणम्' इत्यादिन्यायेन अर्थसमाजग्रस्ता तादृशी अनुमितिरिति न कोऽपि दोषः।

न चैवं ''घटः कर्मत्वमानयनं कृतिः'' इत्यादिनिराकाङ्क्षस्थलेऽपि ''घटकर्मकानयनानुकूलकृतिमान्'' इत्यादिबोधापत्तिः, अनुमितौ आकाङ्क्षायाः कारणत्वाभावादिति वाच्यम्। व्याप्त्यादिज्ञानसत्त्वे तत्रानुमित्यात्मकतादृशबोधस्य नैयायिकेनापि दुर्वारत्वात्।

अथ ''न पचति'' इत्यादौ कथं नञर्थाभावे कृत्यादेरन्वयबोधः? तादात्म्यस्य आधाराधेयभावस्य च संबन्धस्य बाधात् तेन संबन्धेनानुमातुमशक्यत्वात्।

न च प्रतियोग्यनुयोगिभावसंबन्धेनानुमातव्यम्, नैयायिकमतेऽपि तेनैव संबन्धेनान्वयबोधादिति वाच्यम्। तस्य व्याप्त्यनिरूपकत्वात्, तादात्म्यातिरिक्तस्य वृत्त्यनियामकसंबन्धस्य व्याप्तिनिरूपकत्वानङ्गीकारात्। एवं ''घटमानय'' इत्यादौ कृत्यादावानयनादेः कथमन्वयबोधः, अनुकूलत्वादेः वृत्त्यनियामकत्वादिति चेत् — न। वृत्त्यनियामकसंबन्धस्यापि व्याप्तिनिरूपकत्वात्। न च तथापि व्याप्त्याद्यज्ञानदशायामपि वाक्यात् बोधः अनुभवसिद्धः, स कथं स्यात्, कारणाभावेनानुमित्यसंभवात् इति वाच्यम्। तादृशानुभवस्यैवासिद्धेः, व्याप्त्यादिज्ञानानन्तरमेव वाक्यार्थबोधस्वीकारात्।

न चानन्तव्याप्त्यादिज्ञानकल्पने गौरवात् लाघवेन शब्दस्यैव प्रमाणान्तरत्वं

कल्प्यतामिति वाच्यम्। वाक्यार्थानुभवात् पूर्वं सर्ववादिसिद्धायाः पदार्थोपस्थितेरेव नियमतो व्याप्त्यादिविषयकत्वस्वीकारात् अतिरिक्तज्ञानकल्पनाभावेन गौरवाभावात्।

वस्तुतस्तु साध्यसाधनभेदेन बहुविधान्वयव्यतिरेकव्याप्तिबुद्धीनां परस्परव्यभिचारेण विशेषत एव कार्यकारणभावः, न तु सामान्यतः। एवं च शाब्दबोधस्थलाभिषिक्तायामनुमितौ आकाङ्क्षादिज्ञानमेव हेतुः, न तु व्याप्तिपक्षधर्मतादिज्ञानम्, अतो व्याप्त्यादिज्ञानविरहेऽपि न क्षतिः — इति प्राहुः।

उक्तातिनव्यवैशेषिकमतखण्डनम्

तदयुक्तम्। शब्दश्रवणानन्तरं जायमाने वाक्यार्थबोधे शाब्दत्वजातिविशेषस्य "अमुमर्थं शृणोमि" "श्रुतमेवेदं पुराणादिभ्यः" इत्याद्यनुभवसिद्धत्वेन अपलपितुमशक्यत्वात्।

न चैवम् "अर्थापयामि" इत्यनुव्यवसायबलात् अर्थापत्तेरप्याधिक्यापत्तिरिति वाच्यम्। तादृशानुव्यवसायसत्त्वे इष्टापत्तेः।

न च तादृशानुव्यवसायसिद्धः शाब्दत्वजातिविशेषः अनुमितित्वव्याप्य एवास्तु, चाक्षुषत्वादिकमिव प्रत्यक्षत्वव्याप्यमिति वाच्यम्। वाक्यश्रवणानन्तरं जायमानस्य वाक्यार्थबोधस्यानुमितित्वे मानाभावात्, प्रत्यक्षभिन्नानुभवत्वस्याप्रयोजकत्वात्। अनुमितित्वं विनाप्युपमितेरिव प्रत्यक्षभिन्नत्वसंभवात्।

न चानुमितिसामग्र्येव वाक्यार्थबोधस्यानुमितित्वे मानमिति वाच्यम्। तस्या एव तदानीमसिद्धेः। अनुमितित्वसत्त्वे "अनुमिनोमि" इत्यनुव्यवसायापत्तेश्च।

अथ तस्यानुमितिभिन्नत्वे एव किं मानम्। न चानुमितित्वे प्रमाणाभाव एव मानमिति वाच्यम्। अनुमितिभिन्नत्वे प्रमाणाभाव एवानुमितित्वे प्रमाणमित्यस्यापि सुवचत्वादिति चेत् — मास्तूभयम्। तथापि भवतो नाभिमतसिद्धिः। वस्तुतस्तु "नानुमितम्, न साक्षात्कृतम्, श्रुतमेवेदम्" इति सर्वानुभवसिद्धा प्रतीतिरेव वाक्यार्थबोधस्य अनुमितिभिन्नत्वे प्रत्यक्षभिन्नत्वे च प्रमाणम्।

केचित्तु — शब्दश्रवणानन्तरं जायमानस्य वाक्यार्थबोधस्यानुमितिरूपत्वे, साध्यनिश्चयदशायां सिषाधयिषामन्तरेण वाक्यार्थबोधरूपानुमितिर्न स्यात्। सिषाधयिषाविरहविशिष्टसिद्धेरेव तदानीं सत्त्वेन तदभावरूपपक्षताविरहात्।

न च सिषाधयिषाविरहवत् शाब्दसामग्रीविरहोऽपि पक्षताकुक्षौ प्रवेशनीयः, तथा च शाब्दसामग्रीदशायां साध्यनिश्चयसत्त्वे शाब्दसामग्रीविरहविशिष्टसाध्यनिश्चयाभाव-

सत्त्वात् न पक्षताहानिः इति वाच्यम्। तथा सति सिषाधयिषाशाब्दसामग्री-विरहविशिष्टसिद्ध्यभावत्वेन पक्षताया अनुमितिहेतुत्वे गौरवापत्तेः।

न च विशिष्टान्तं न कारणतावच्छेदके प्रविष्टम्, अपि तु अभावविशेष-परिचायकम्, कारणत्वं तु तदभावव्यक्तित्वेनेति न गौरवमिति वाच्यम्। अभावस्य तद्व्यक्तित्वेन कारणत्वे बहुतरकार्यकारणभावविलोपप्रसङ्गात्। तथा हि —

बाधनिश्चयाभावस्य, सत्प्रतिपक्षनिश्चयाभावस्य, अवच्छेदकधर्मदर्शनाभावस्य च तादृशतादृशाभावत्वेन पृथक् पृथक् कारणत्वं सर्वानुभवसिद्धम्। यदि तत्त-द्व्यक्तित्वेनाभावकारणत्वं स्वीक्रियते, तदा बाधनिश्चयसत्प्रतिपक्षनिश्चय-अवच्छेद-कधर्मदर्शनैतत्त्रितयान्यतमत्वावच्छिन्नाभावस्य तद्व्यक्तित्वेन कारणत्वसंभवात् तादृशकारणत्वं विलीयेत। विलीयेत च समानविषये शाब्दत्वावच्छिन्नं प्रति प्रत्यक्षसामग्र्यभावस्य अनुमितिसामग्र्यभावस्य च पृथक् कारणत्वम्। तत्रापि तादृशसामग्रीद्वयान्यतरत्वावच्छिन्नाभावस्य तद्व्यक्तित्वेन कारणत्वसंभवात्।

तत्तद्व्यक्तित्वेनाभावकारणत्वं यदि न स्वीक्रियते, तदा तादृशान्यतमत्वा-वच्छिन्नाभावस्य तादृशान्यतमत्वावच्छिन्नाभावत्वेनैव कारणत्वम् अङ्गीकार्यम्। तथा च तादृशान्यतमत्वस्य गुरुशरीरतया तदपेक्षया प्रत्येकरूपावच्छिन्नाभावस्य प्रत्येकरूपावच्छिन्नाभावत्वेन कारणत्वे लाघवात् न तादृशकारणत्वविलयप्रसङ्गः। स्पष्टं चेदं पक्षतादीधित्यादौ इत्याहुः।

तदसत्। वैशेषिकमते अनुमितिं प्रति पक्षताया हेतुत्वे मानाभावात्। अतः पूर्वोक्तरीत्यैव वैशेषिकमतं दूषणीयम् — इति प्राहुः।

वाक्यार्थबोधस्यानुमितिरूपत्ववादिजरन्मीमांसकमतम्[१]

वाक्यार्थबोधस्यानुमितिरूपत्वं वदतां जरन्मीमांसकानां मतं मणावित्थमनूदितम् —

"घटमानय" इत्यादौ सर्वत्र लौकिकवाक्ये शाब्दबोधात् पूर्वम् "अयं वक्ता आधेयतादिसंसर्गककर्मत्वादिविषयकघटादिविशिष्टज्ञानवान्, आधेयतादिसंसर्गेण कर्मत्वादिसाकाङ्क्षं यत् घटादि तस्य यत् ज्ञानं तज्जन्यं भ्रमाद्यजन्यं च यद्वाक्यं तत्प्रयोक्तृत्वात्; यो यत्संसर्गक-यत्साकाङ्क्ष-यज्ज्ञानजन्य-भ्रमाद्यजन्यवाक्यस्य प्रयोक्ता स तत्संसर्गक-तद्विषयक-तद्विशिष्टज्ञानवान्, 'घटेन' इति वाक्यप्रयोक्ता आधेयतासंसर्गक-करणत्वविषयक-घटविशिष्टज्ञानवानहमिव" इत्यनुमानस्य, "कर्म-त्वादिकम् आधेयतादिसंसर्गेण घटादिमत्, तेन संसर्गेण स्वविषयकघटादि-

[१] त.चिं.म, च.भा. प्र.प. पृ. ८३.

विशिष्टज्ञानवदुक्तपदस्मारितत्वात्, घटादिकरणत्वादिवत्'' इत्यनुमानस्य वा सामग्र्यास्संभवेन तादृशानुमित्यनन्तरमेव शाब्दबोध इति लौकिकशब्दोऽनुवादक एव, न तु प्रमाणम्, अज्ञातविषयकानुभवकरणत्वस्यैव प्रामाण्यपदार्थत्वात्। वेदे तु वक्तुरभावेन तादृशानुमानासंभवात् प्रामाण्यम् — इति।

तन्मतखण्डनम्

तत्खण्डनप्रकारस्तु — वेदस्थले क्लृप्ता या शाब्दसामग्री तस्याः लोकेऽपि सत्त्वेन वेद इव वक्तृगतज्ञानाद्यनुमानात् प्रागेव संसर्गशाब्दबोधात् न शब्दस्यानुवादकता। अन्यथा = वेदस्थले क्लृप्तायाः शाब्दसामग्र्याः लौकिकस्थलेऽभावे, लौकिकशब्दस्यानुवादकतापि न स्यात्, सामग्र्यभावात्। अनुवादकत्वं हि गृहीतार्थविषयकशाब्दधीजनकत्वम्।

ननु वक्तृज्ञानानुमानात्प्रागेव संसर्गप्रत्ययो भवतीत्युक्तमयुक्तम्, सर्वत्र शाब्दसामग्रीदशायां हेतुज्ञानसत्त्वेनानुमितिसामग्र्याः सत्त्वात् अनुमितेरेव प्रथममुत्पादात्, शाब्दसामग्र्यपेक्षया अनुमितिसामग्र्याः बलवत्त्वादिति चेत् — न। पूर्वं लिङ्गज्ञानसत्त्वेऽपि व्याप्तिस्मृतिविलम्बेनानुमितिविलम्बात्। शाब्दबोधस्य तु व्याप्तिस्मृतिविलम्बेन विलम्बाभावात्। लौकिकवाक्ये क्वचिदनुवादकत्वं त्विष्टमेव, न तु सर्वत्र, उक्तयुक्तेः।

ननु अनाप्तोक्ते लौकिकवाक्ये भ्रमजनकत्वदर्शनात् लौकिकवाक्यस्थले वेदतुल्यसामग्रीमात्रं न निश्चायकम्, किं तु आप्तोक्तत्वनिश्चयोऽपि। तथा च क्वचिल्लौकिकवाक्ये भ्रमजनकत्वदर्शनात् लौकिकवाक्यत्वरूपसाधारणधर्मदर्शनेन सर्वत्र लौकिकवाक्ये भ्रमजनकत्वसंशयसंभवात् तस्य संशयस्यैव प्रतिबन्धकत्वात् आप्तोक्तत्वनिश्चयोऽपि हेतुः वक्तव्यः। आप्तोक्तत्वनिश्चये तु सति न भ्रमजनकत्वसंशयः। आप्तोक्तत्वं च तत्पदार्थविशिष्टतत्पदार्थज्ञानवता उक्तत्वम्। ततश्च तन्निश्चयादेव तद्घटकवाक्यार्थस्य सिद्ध्या शब्दस्य अनुवादकत्वमेवेति चेत् — न। चक्षुरादेः क्वचित् भ्रमजनकत्वेन चक्षुष्ट्वरूपसाधारणधर्मदर्शनेन भ्रमजनकत्वशङ्कायामपि चक्षुषा प्रमाया उत्पत्त्या व्यभिचारेण, भ्रमजनकत्वसंशयस्य प्रमां प्रत्यप्रतिबन्धकत्वात्।

ननु अज्ञायमानकरणस्य चक्षुरादेः भ्रमजनकत्वसंशये सत्यपि प्रमाजनकत्वेऽपि, ज्ञायमानं करणं संशये सति न निश्चायकम्, ज्ञायमानस्य लिङ्गस्य व्याप्तिपक्षधर्मतासंशयदशायामनुमित्यजनकत्वात्। तथा च भ्रमजनकत्वसंशये सति लौकिकवाक्येन कथं निश्चयो जायेत। तदर्थमाप्तोक्तत्वनिश्चयोऽप्यपेक्षित इति चेत् —

कीदृशः संशयः शाब्दधीप्रतिबन्धकः इति पृच्छामः। न तावत् भ्रमजनकत्व-संशयः, तस्य विरोध्यविषयकत्वेन अप्रतिबन्धकत्वात्। नापि वाक्यविषयक-संशयः, वाक्यस्य निश्चयात्। नापि वाक्यजन्यज्ञानप्रामाण्यसंदेहः, तस्य वाक्यजन्य-ज्ञानोत्तरकालिकत्वेन पूर्वतनज्ञानं प्रत्यप्रतिबन्धकत्वात्। नाप्याप्तोक्तत्वसंशयः, आप्तोक्तत्वनिश्चयस्य शाब्दबोधहेतुत्वे प्रमाणाभावात्। यदि हि आप्तोक्तत्वनिश्चयः हेतुः स्यात् तदैव तन्निश्चयविघटनद्वारा तत्संशयः प्रतिबन्धकः स्यात्, न त्वेवम्, इति आप्तोक्तत्वसंशयोऽपि न प्रतिबन्धकः।

ननु लोके आप्तोक्तत्वसंदेहे आप्तोक्तत्वव्यतिरेकनिश्चये वा सति वाक्यार्थधीर्न जायते। तथा च 'यत्संशयो यद्व्यतिरेकनिश्चयश्च यत्र प्रतिबन्धकः तन्निश्चयः तत्र हेतुः' इति व्याप्तिबलात् आप्तोक्तत्वनिश्चयः शाब्दधीहेतुः। आप्तोक्तत्वं च प्रकृत-वाक्यार्थविषयकयथार्थज्ञानजन्यत्वम्। तन्निश्चयं प्रति तद्घटकप्रकृतवाक्यार्थज्ञानं हेतुः; तच्चानुमानिकम्। तथा च आप्तोक्तत्वनिश्चयोपजीव्यात् अनुमानादेव सर्वत्र शाब्दबोधात् पूर्वं वाक्यार्थधीरिति शब्दः अनुमानसिद्धार्थानुवादक इति चेत् —

न। वेदे आप्तोक्तत्वज्ञानाविषयस्यापि शब्दस्य शाब्दबोधजनकत्वदर्शनात् आप्तोक्तत्वनिश्चयस्याहेतुत्वात्।

न च आप्तोक्तत्वनिश्चयः शाब्दप्रमासामान्ये न हेतुः, येनोक्तदोषः स्यात्। अपि तु लौकिकवाक्यजन्यशाब्दबोधं प्रत्येव सहकारीति वाच्यम्। आप्तोक्तत्वनिश्चया-भावेऽपि वेदानुकारेण पठ्यमानात् मन्वादिवाक्यात् तत्रापौरुषेयत्वभ्रमवतः गौडमीमांसकस्य[1] वाक्यार्थनिश्चयोत्पत्त्या व्यभिचारेण तस्य लौकिकवाक्य-जन्यबोधेऽप्यहेतुत्वात्।

न च गौडस्य वाक्यार्थनिश्चयः भ्रान्तिः, प्रमायामेव चाप्तोक्तत्वनिश्चयः सहकारीति वाच्यम्। विषयाबाधात्। पौरुषेयत्वनिश्चयदशायामपि मन्वादिवाक्य-जन्यशाब्दबोधस्य भ्रमत्वापत्तेश्च, विषयकृतवैलक्षण्याभावात्।

न च मन्वादिवाक्यात् न संसर्गधीः, अपि तु असंसर्गाग्रहमात्रमिति वाच्यम्। वेदवाक्यार्थस्य मन्वादिवाक्यार्थस्य च वस्तुतः संसृष्टत्वेन असंसर्गाग्रहायोगात्। स्थितस्य असंसर्गस्याग्रहो हि असंसर्गाग्रहः। संसर्गरूपस्यार्थस्य सत्त्वेऽपि असं-सर्गाग्रहाङ्गीकारे शब्दस्थले सर्वत्र संसर्गग्रहोच्छेदप्रसङ्गात्। यद्वा लोके वेदे च संसर्गग्रहस्यानुभवसिद्धत्वेऽपि असंसर्गाग्रहस्वीकारे संसर्गग्रहोच्छेदप्रसङ्गात्।

न चाप्तोक्तत्वनिश्चयरूपकारणबाधात् संसर्गज्ञानस्य बाधः, अतः असंसर्गाग्रह-मात्रमिति वाच्यम्। वेदानुकारेण पठ्यमानमन्वादिवाक्ये व्यभिचारेण आप्तोक्तत्व-निश्चयस्य अहेतुत्वात्।

---

[1] गौडमीमांसकः पञ्चिकाकारः। गौडो हि वेदाध्ययनाभावात् अवेदत्वं मन्वादिस्मृतेर्न जानाति।

न च लौकिकत्वेन ज्ञातवाक्यात् यत्र शाब्दबोधः तत्र आप्तोक्तत्वनिश्चयः सहकारी। अतो न व्यभिचारः, मन्वादिवाक्ये अपौरुषेयत्वभ्रमेण लौकिकत्वज्ञानविरहादिति वाच्यम्। आप्तोक्तत्वनिश्चयस्य शाब्दधीहेतुत्वे मानाभावात्।

न च 'यत्संशययद्व्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ' इत्यादिव्याप्तिरेव तत्र मानमिति वाच्यम्। तादृशव्याप्तेरभावात्।

किं च वाक्यार्थस्यान्वयबोधात् प्रागज्ञातत्वेन तद्घटिताप्तोक्तत्वरूपसाध्याप्रसिद्ध्या, साध्यव्याप्यत्वेन गृहीतस्य कस्यचित् लिङ्गस्याभावेन आप्तोक्तत्वग्रहासंभवात्।

ननु आप्तोक्तत्वनिश्चयस्य शाब्दबोधाहेतुत्वेऽपि अनाप्तोक्तत्वशङ्काविरहो हेतुरस्तु। स च वेदेऽपौरुषेयत्वनिश्चयात्, लोके च आप्तोक्तत्वनिश्चयात् इति चेन्न। लोके शाब्दबोधात्पूर्वम् आप्तोक्तत्वनिश्चयोऽशक्यः इत्युक्तत्वात्।

किं च वेदेऽपौरुषेयत्वनिश्चये सत्येव अनाप्तोक्तत्वशङ्कानिरासद्वारा अर्थप्रत्यय इति स्वीकारे "इमे पदार्थाः संसर्गवन्तः, दोषवत्पुरुषाप्रणीतत्वे सति आकाङ्क्षादिमत्पदस्मारितत्वात्" इत्यनुमानादेव पदार्थसंसर्गस्य सिद्धेः वेदोऽप्यनुवादकः स्यात्। तदुक्तमाचार्यैः[१] —

"व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी।
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः॥" इति।

व्यस्ता = विगता, पुंदूषणाशङ्का = वक्तृदोषाशङ्का येषां पदानां, तैः पदैः स्मारितत्वात् अमी = पदार्थाः, अन्विताः = मिथः संसर्गवन्तः, इति निर्णीते = इत्यनुमानेन वेदस्थलेऽपि शाब्दबोधात् प्रागर्थे निर्णीते सति, वेदस्यापि तत् = अनुवादकत्वं, कुतो नेत्यर्थः। तथा च अनधिगतार्थबोधकत्वाभावेन वेदाख्यशब्दस्य प्रमाणत्वं न सिध्येत् इति।

मणौ प्रकारान्तरेण प्राभाकरमतोपन्यासः[२]

प्राभाकरास्तु — व्यभिचारिशब्दव्यावृत्तं = प्रमितिस्वरूपायोग्यशब्दावृत्ति, अथ वा विसंवादिप्रवृत्तिहेतुज्ञानजनकशब्दावृत्ति, अव्यभिचार्यनुगतं = निखिलप्रमाजनकवाक्यवृत्ति = किंचित् प्रमाप्रयोजकमङ्गीकरणीयम्, यदभावात् अनाप्तोक्तवाक्यात् प्रमाविरहः। अन्यथा क्वचित् प्रमा क्वचित् तदभाव इत्येवंरूपं कार्यवैचित्र्यं न स्यात्। तच्च शब्दवृत्ति प्रमाप्रयोजकं ज्ञातं सत् शाब्दबोधोपयोगि। ज्ञानवृत्ति-

---

[१] न्या.कु.३.१५.
[२] त.चिं.म, च.भा. प्र.प. पृ.९२.

शाब्दबोधकारणतायां विषयतया अवच्छेदकमिति यावत्। तत्र हेतुः — 'ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारिवैलक्षण्यत्वात्' इति। 'ज्ञायमानकरणे' इत्यत्र सप्तम्याः निष्ठत्वमर्थः। तस्य वैलक्षण्येऽन्वयः। 'ज्ञायमानकरणनिष्ठं यत् व्यभिचारिवैलक्षण्यं तत्त्वात्' इति हेत्वर्थः। तच्च प्रमेतरज्ञानजनकावृत्तित्वम्। प्रमात्वमनुभवत्वमात्रम्। स्मृतिजनकावृत्तित्वं पर्यवसितोऽर्थः। यथाश्रुते तन्मते प्रमेतरज्ञानाप्रसिद्ध्यापत्तेः।

तथा च 'यत् ज्ञायमानकरणनिष्ठत्वे सति यज्ज्ञानोपयोगि(यच्छाब्दबोधोपयोगि)-प्रमेतरज्ञानजनकावृत्तित्वरूपव्यभिचारिवैलक्षण्यवत् भवति, तत् तज्ज्ञानवृत्ति-तज्ज्ञानकारणतायां विषयतयावच्छेदकं भवति' इति सामान्यमुखी व्याप्तिः। 'व्याप्तिवत्, शब्दशक्तिवच्च' इति दृष्टान्तः। व्याप्तिस्तावत् ज्ञायमानकरणलिङ्गनिष्ठा, अनुमित्युपयोगिप्रमेतरज्ञानजनकावृत्तित्वरूपव्यभिचारिवैलक्षण्यवती च भवति। अत एव लिङ्गज्ञानवृत्त्यनुमितिकारणतायां विषयतयावच्छेदिका भवति। एवं शब्दशक्तिरपि ज्ञायमानकरणशब्दनिष्ठा, शाब्दबोधोपयोगिव्यभिचारिवैलक्षण्यवती च। अत एव शब्दज्ञाननिष्ठायां शाब्दबोधकारणतायां विषयतासंबन्धेनावच्छेदिका च भवतीति दृष्टान्ते साध्यहेत्वोः सत्त्वम्। पक्षे शब्दवृत्तिप्रमात्वप्रयोजके वक्ष्यमाणे तात्पर्ये च ज्ञायमानशब्दनिष्ठत्वे सति प्रमेतरज्ञानजनकावृत्तित्वं वर्तते, तथा तात्पर्यवच्छब्दज्ञाननिष्ठशाब्दज्ञानकारणतायां विषयतयावच्छेदकत्वं च अस्तीति साध्यहेत्वोरुपपत्तिः।

अत्रायमनुमानप्रयोगो विवक्षितः — "शब्दनिष्ठमनुगतप्रमाप्रयोजकं (तात्पर्यं) ज्ञानवृत्तिज्ञानकारणतायां विषयतया अवच्छेदकम्, ज्ञायमानकरणनिष्ठत्वे सति ज्ञानोपयोगिव्यभिचारिवैलक्षण्यवत्त्वात्, व्याप्तिवत् शब्दशक्तिवच्च" इति। 'प्रमाहेतुत्वाद्वा' इति द्वितीयहेतुः। हेतुत्वं च कारणकारणतावच्छेदकसाधारणम्। प्रमापदं शाब्दज्ञानपरम्। 'यत् यज्ज्ञानहेतुर्भवति तत् तज्ज्ञानवृत्तिज्ञानकारणतायां विषयतया अवच्छेदकं भवति' इति सामान्यमुखी व्याप्तिः।

अत्रानुकूलतर्क उक्तः — अन्यथा शब्दाभासोच्छेदप्रसङ्ग इति। यदि स्वरूपसदेव तात्पर्यं हेतुः न तु तन्निश्चयः, तदा तात्पर्यसन्देहदशायां सतात्पर्यकशब्दात् शाब्दबोधानुत्पत्त्युच्छेदप्रसङ्ग इत्यर्थः। वस्तुगत्या तात्पर्यस्य तत्र सत्त्वेन तदर्थान्वयबोधसंभवात्। यद्वा "घटोऽस्ति" इति वाक्यात् घटाभावतात्पर्यभ्रमे घटाभावबोधो न स्यात्, स्वरूपसतः घटाभावतात्पर्यस्याभावात् इत्यर्थः।

तात्पर्यमेव शाब्दप्रमाप्रयोजकं, न तु आप्तोक्तत्वम्

इदानीमव्यभिचारिशब्दानुगतं प्रमाप्रयोजकं तात्पर्यमेवेति इतरपरिशेषपूर्वकं निरूप्यते।

तत्र न तावदाप्तोक्तत्वं प्रयोजकम्। आप्तोक्तत्वं नाम प्रकृतवाक्यार्थविषयकयथार्थज्ञानवदुक्तत्वम्। संवादिप्रवृत्तिजनकत्वात् अबाधितविषयकबोधजनकत्वाद्वा प्रमाणभूते शुकोच्चारिते शब्दे आप्तोक्तत्वविरहात्। भ्रान्तेन प्रतारकेण चोक्ते संवादिवाक्ये वेदवाक्ये च आप्तोक्तत्वाभावेऽपि प्रमाजनकत्वसद्भावात्। आप्तोक्तत्वानुमापकस्य व्यभिचारिभिन्नस्य लिङ्गस्याभावेन आप्तोक्तत्वं ज्ञातुमशक्यं च।

ननु दोषाजन्यानुपूर्वीकत्वे सति अर्थज्ञानजन्यत्वमेव आप्तोक्तत्वानुमापकं लिङ्गम् इति चेन्न। तथा सति तादृशलिङ्गवत एव शब्दस्य अर्थप्रत्यायकत्वप्रसङ्गात्। न चेष्टापत्तिः, संवादिशुकादिवाक्ये अर्थज्ञानजन्यत्वाभावात्, मौनिश्लोके आनुपूर्व्यभावाच्च अर्थप्रत्यायकत्वानुपपत्तेः।

अपि च आप्तोक्तत्वस्य प्रकृतवाक्यार्थविषयकयथार्थज्ञानवदुक्तत्वरूपत्वे, तस्य च शाब्दधीप्रयोजकत्वे, नानावाक्यार्थगोचरयथार्थज्ञानानन्तरोक्तस्य एकार्थमात्रतात्पर्यकनानार्थकशब्दस्य तात्पर्याविषयेऽप्यर्थे शाब्दबोधजनकत्वापत्तिः। यदि चाप्तोक्तत्वं प्रकृतवाक्यार्थगोचरयथार्थज्ञानजन्यानुपूर्वीकत्वं, तदा वेदमौनिश्लोकयोस्तदभावेन शाब्दबोधजनकत्वानुपपत्तिः, वेदानुपूर्व्या नित्यत्वात् इति।

भ्रमजनकदोषाभावः प्रमाप्रयोजक इति मतनिरासः

केचित्तु — भ्रमजनकदोषाभावः प्रमायां हेतुः। भ्रमजनकदोषश्च न भ्रमप्रमादविप्रलिप्साकरणापाटवादिः। परस्परं व्यभिचारात्। एतदुक्तं भवति — भ्रमो नाम उच्चारणीयवाक्यार्थविषयको वक्तुर्भ्रमः। प्रमादः = अनवधानता। सा च वाक्यार्थज्ञानस्वरूपयोग्यस्य वक्तुः उच्चारणीयवाक्यार्थविषयकनिश्चयाभावः। विप्रलिप्सा = प्रतारणा। सा च एकरूपेणावगतस्यान्यरूपेण बुबोधयिषा। करणापाटवं = करणस्य कण्ठादेः अपटुत्वम् (इच्छाविषयीभूतवर्णानुकूलकरणसंयोगानुत्पादकालीनतदननुकूलकरणसंयोगः)। एतेषां प्रत्येकं भ्रमहेतुत्वे एकसत्त्वेऽप्यन्याभावेन भ्रमोत्पत्त्या व्यतिरेकव्यभिचारः। मिलितस्य च हेतुत्वं न संभवति, अव्यापकत्वात्, प्रत्येकसत्त्वेऽपि शाब्दभ्रमदर्शनात् इति। किं तु आप्तोक्तत्वाभावः शाब्दभ्रमहेतुः, तदभावरूपमाप्तोक्तत्वं प्रमाहेतुः — इत्याहुः।

तन्न। लिङ्गाभावेन शाब्दबोधात् पूर्वं ज्ञातुमशक्यत्वात्।

अन्ये तु — व्यभिचारशङ्काविरहः = बाधितार्थकत्वशङ्काविरहः शाब्दबोधे हेतुः। सा च शङ्का लौकिकवाक्ये वक्तुः भ्रमादिशङ्कामूलेति आप्तोक्तत्वनिश्चयात् निवर्तते, नोत्पद्यते वा। वेदे चापौरुषेयत्वनिश्चयेन निवर्तते। तथा च बाधितार्थकत्वशङ्काविरोधित्वेन आप्तोक्तत्वनिश्चयः शाब्दधीहेतुः — इत्याहुः।

तदपि न। आप्तोक्तत्वस्य प्रथमं ज्ञातुमशक्यत्वादेव।

अपि च प्रकृतवाक्यार्थस्य अपूर्वत्वेन = अन्वयबोधात् पूर्वमज्ञातत्वेन, आप्तोक्तत्वरूपसाध्यस्याप्रसिद्धिः।

अपि च वेदे "एते पदार्था मिथः संसर्गवन्तः, सदोषपुरुषाप्रणीतपदस्मारितत्वात्" इत्यनुमानेन संसर्गसिद्धेः अनुमानगृहीतार्थबोधकतयानुवादकत्वापत्तिः। बाधितार्थकत्वशङ्कोच्छेदार्थमपौरुषेयत्वनिश्चयस्यावश्यकत्वेन तत एव सदोषपुरुषाप्रणीतत्वग्रहसंभवात्।

दोषाभावस्य शाब्दप्रमाप्रयोजकत्वनिरासः

एतावता आप्तोक्तत्वं शाब्दप्रमाप्रयोजकमित्येतत् निरस्तम्। अथ दोषाभावस्य तत्प्रयोजकत्वं निरस्यते। (दोषाः भ्रमप्रमादविप्रलिप्साकरणापाटवरूपाः)। भ्रान्तप्रतारकोक्तवाक्यजन्यज्ञाने प्रत्यक्षेणागृहीतसंवादे प्रमाजनके प्रतारणरूपदोषसत्त्वेन दोषाभावस्य व्यभिचारात्।

ननु दोषाभावस्य शाब्दप्रमायां हेतुत्वात् उक्तस्थले दोषसत्त्वेन वाक्यं मूक मेव = प्रमित्यजनकमेव। प्रवृत्त्यादिरूपो व्यवहारस्तु प्रत्यक्षात् असंसर्गाग्रहाद्वा इति चेन्न। तद्वाक्यश्रवणानन्तरम् "इदं शाब्दयामि" इति शाब्दबोधानुभवस्य अपलापप्रसङ्गात्।

किं च केवलदोषाभावस्य शाब्दप्रमाहेतुत्वं सविवादम्। दोषाभावज्ञाने सति सदोषपुरुषाप्रणीतपदस्मारितत्वेन लिङ्गेन संसर्गसिद्धेः संभवात् वेदेऽप्यनुवादकतापत्तिश्च।

किं च दोषाभावस्य प्रमाहेतुत्वे, अप्रमायां दोषः कारणमिति वक्तव्यम्। तत्र भ्रमविप्रलिप्सादेः दोषस्य प्रत्येकं हेतुत्वे व्यभिचारः, मिलितस्य हेतुत्वे एकस्मात् अप्रमा न स्यात् इति पूर्वमेवोक्तम्।

यथार्थतात्पर्यकत्वस्य शाब्दप्रमाप्रयोजकत्वम्

तस्मात् लाघवाच्च यथार्थतात्पर्यकत्वं शाब्दप्रमाप्रयोजकम्। यथार्थतात्पर्यकत्वं = यथार्थवाक्यार्थप्रतीतिप्रयोजनकत्वम्। तदपि यथार्थवाक्यार्थप्रतीतीच्छया उच्चरितत्वम्। उच्चरितत्वमपि न जन्यत्वम्, वर्णानां नित्यत्वात्, मौनिश्लोकादावव्याप्तेश्च। अपि तु ज्ञापितत्वम्। इदं तु वेदेऽप्यस्ति। यथार्थप्रतीतीच्छया अध्यापकेन ज्ञापितत्वात्। उक्तयथार्थतात्पर्यकत्वज्ञानाभावादप्रमा भवति। स एव च दोषः। न हि दोषत्वजातिमान् दोषव्यवहारविषयः। न च यथार्थतात्पर्यकत्वाभावस्य दोषत्वे,

भ्रमविप्रलिप्सादीनां दोषत्वव्यवहारः कथमिति वाच्यम्। यथार्थतात्पर्यकत्व-विरोधित्वेन तेषां दोषव्यवहारविषयत्वात्।

अत एव = यथार्थतात्पर्यस्य शाब्दप्रमाप्रयोजकत्वादेव, भ्रान्तस्य प्रतारकस्य च वाक्यं प्रमाणम्, तत्रापि प्रतारणानुसारेण प्रकृतवाक्यार्थगोचरयथार्थप्रतीतीच्छायाः सत्त्वात्।

अत एव अन्यघटाभिप्रायेण = नीलघटाभिप्रायेण, "गेहे घटोऽस्ति" इत्युक्ते, यत्र पीतघटं दृष्ट्वा तमानयति, तत्र अन्यपरत्वात् = नीलघटतात्पर्यकत्वात्, तद्वाक्यं न पीतघटे प्रमाणं = पीतघटविषयकप्रतीतिजनकम्। पीतघटविषयकः व्यवहारस्तु (प्रवृत्त्यादिः) प्रत्यक्षादेव।

अत एव = यथार्थतात्पर्यकत्वस्य शाब्दप्रमाप्रयोजकत्वादेव, "यष्टीः प्रवेशय" इति वाक्यं यष्टिकर्मकप्रवेशाख्यमुख्यार्थबोधे न प्रमाणं = न मुख्यार्थविषयक-प्रमितिजनकम्। 'यत्परः शब्दः स शब्दार्थः' इति न्यायात्। 'शब्दः यदर्थतात्पर्यकः सः शब्दजन्यप्रमितिविषयः' इति तदर्थः।

तात्पर्यस्य ज्ञातस्य शाब्दप्रमाप्रयोजकत्वम्

एतावता शब्दनिष्ठं यथार्थवाक्यार्थविषयकप्रतीतीच्छया उच्चरितत्वरूपं तात्पर्य-मेव शाब्दप्रमाप्रयोजकमिति सिद्धम्। तच्च तात्पर्यं ज्ञातं सदेव शाब्दप्रमाहेतुः इति साध्यते। तत्र हेतुः — 'ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारिवैलक्षण्यात्' इति। 'व्याप्तिवत्, शक्तिवच्च' इति दृष्टान्तः। उपपादितमेतत् पूर्वमेव।

तत्रानुकूलतर्कः "अन्यथा अन्यपरादन्वयबोधो न स्यादिति शब्दाभासोच्छेद-प्रसङ्गात्" इति। अस्यायमर्थः — यदि स्वरूपसदेव यथार्थतात्पर्यं हेतुः, न तु तन्निश्चयः, तदा यत्र एकस्यैव शब्दस्य वस्तुतः अर्थद्वये तात्पर्यमस्ति, श्रोता तु एकत्रार्थे तात्पर्यनिश्चयवान्, अर्थान्तरे तात्पर्यसंदेहवांश्च, तत्र यस्मिन्नर्थे तात्पर्यसंदेहः तस्याप्यर्थस्य शाब्दबोधः स्यात्, स्वरूपतस्तात्पर्यस्य तत्रापि सत्त्वात्। तथा च तात्पर्यसंदेहदशायां शाब्दबोधाजनकशब्दोच्छेदप्रसङ्गः इति।

तात्पर्यभ्रमस्य शाब्दभ्रमहेतुत्वम्

तात्पर्यभ्रमाच्च शाब्दभ्रमः। तात्पर्यनिश्चयस्य शाब्दधीहेतुत्वादेव शक्यलक्ष्योभय-तात्पर्यके "यष्टीः प्रवेशय" इत्यत्र कदाचित् लक्ष्यार्थस्यैवान्वयबोधः। अन्यथा स्वरूपसतो यथार्थतात्पर्यस्य अविशिष्टत्वात् तत्र सर्वदैवोभयोरन्वयबोधः स्यात्। नानार्थकशब्दप्रयोगस्थले कदाचित् कंचिदर्थमादायैवान्वयबोधः इत्येवंरूपा विनि-गमना च तात्पर्यनिश्चयस्य हेतुत्वादेव निर्वहति।

वास्तवस्य तात्पर्यस्य शाब्दधीहेतुत्वाभावः

अपि च वास्तवस्य तात्पर्यस्य शाब्दधीहेतुत्वे लाक्षणिकार्थबोधे मुख्यार्थान्वयानुपपत्तिज्ञानस्योपयोगो न स्यात्। मुख्यार्थान्वयानुपपत्तिज्ञानेन मुख्यार्थे तात्पर्याभावग्रहे सतात्पर्यकत्वानुमानेन एकविशेषबाधसहकृतेन लक्ष्यार्थे तात्पर्यग्रह इति लक्ष्यार्थतात्पर्यग्रहद्वारा मुख्यार्थान्वयानुपपत्तिज्ञानस्य लक्ष्यार्थबोधोपयोगित्वात्। अतस्तात्पर्यनिश्चयो हेतुः।

अपि च तात्पर्यनिश्चयस्य हेतुत्वादेव "पचति" इत्युक्ते, अन्योक्तेन स्वयं स्मृतेन वा कलायपदेन कलाये उपस्थितेऽपि "कलायं पचति" इति अन्वयबोधो न भवति, तात्पर्यनिश्चयाभावात्।

तात्पर्यग्राहकस्य प्रकरणादेः शाब्दधीहेतुत्वाभावः

न च तात्पर्यग्राहकस्य प्रकरणादेः तात्पर्यग्रहापेक्षया प्राथमिकत्वात् अवश्यक्लृप्तनियतपूर्ववृत्तिकत्वाच्च प्रकरणादीनां ग्रह एव शाब्दधीहेतुः, न तु तात्पर्यग्रह इति वाच्यम्। प्रकरणादीनामननुगतत्वेन तज्ज्ञानस्य परस्परं व्यभिचारेणाहेतुत्वात्।

न चाननुगतप्रकरणादिज्ञानस्य कथं तात्पर्यग्रहहेतुत्वम् इति वाच्यम्। अननुगतानामपि तेषां तात्पर्यव्याप्यतया तात्पर्यग्राहकत्वात्; अननुगतानां धूमादीनां वह्निव्याप्यतया वह्निग्राहकत्ववत्।

न्यायगम्यस्य तात्पर्यस्य वेदजन्यशाब्दधीहेतुत्वम्

तच्च तात्पर्यं वेदे = वेदजन्यशाब्दबोधे, न्यायगम्यं सत् कारणम्। न्यायगम्यत्वं च न्यायप्रयोज्यज्ञानविषयत्वम्। न्यायः = अनादिमीमांसकपरम्परासिद्धा युक्तिः। युक्तिश्च लाघव-गौरव-तर्क-लघ्वर्थपदसमभिव्याहारादिरूपा। यत्र न्यायात् तात्पर्यमवसीयते स एव वेदार्थः।

पुरुषेच्छानियन्त्रितस्य तात्पर्यस्य लोके शाब्दधीहेतुत्वम्

लोके च न न्यायानुसारि तात्पर्यमिति न न्यायगम्यं सदेव शाब्दधीप्रयोजकम्। किं तु पुरुषेच्छानियन्त्रितं = न्यायतदितरगम्यसाधारणवक्तृतात्पर्यमात्राधीनं, शाब्दज्ञानम्। पुरुषवचसां न्यायाविषयेऽपि पुरुषेच्छाविषयेऽर्थे प्रतीतिजनकत्वात्। वक्ता च परस्य वाक्यार्थज्ञानोत्पादनेच्छया वाक्यमुच्चारयति। सा चेच्छा वक्तृगतं यत् यथार्थवाक्यार्थज्ञानं तज्जन्या यदि भवति, तदैव तदुच्चारितवाक्यस्य पुरुषाभिप्रेतयथार्थवाक्यार्थप्रतीतीच्छया उच्चरितत्वरूपं यथार्थतात्पर्यं तादृशप्रतीतीच्छाव्याप्यं निर्वहति। तथा च वक्तुर्यथार्थवाक्यार्थज्ञानवत्तामविज्ञाय यथार्थप्रतीतीच्छ-

योच्चरितत्वरूपं तात्पर्यं न ज्ञातुं शक्यत इति प्रथममाप्तवाक्यात् वक्तृज्ञानानुमानपूर्वकमर्थतथात्वमनुसन्धाय यथार्थतात्पर्यनिश्चयः।

यथार्थतात्पर्यनिश्चयानुमानप्रकारः

अनुमानं च — "इदं वाक्यं भ्रमादि-विशिष्टज्ञानयोरन्यतरजन्यम् आप्तवाक्यत्वात्" इति। तदनन्तरं वक्तुर्भ्रमाद्यभावनिश्चये सति, वाक्यार्थज्ञानानुमानम्। तदाकारस्तु — "अयं स्वप्रयुक्तवाक्यार्थविषयकयथार्थज्ञानवान्, भ्रमाद्यजन्यवाक्यप्रयोक्तृत्वात्, अहमिव" इति। न तु 'आप्तत्वात्' इति हेतुः, साध्याविशिष्टत्वात्। ततः उक्तानुमानेन कर्मत्वे घटविशिष्टज्ञानविषयत्वे सिद्धे, तेन हेतुना कर्मत्वे घटवत्त्वम् अनुमीयते। अनुमानाकारस्तु — "कर्मत्वादिकम् आधाराधेयभावादिसंबन्धेन घटादिमत्, तेन संबन्धेन घटादिविशिष्टज्ञानविषयत्वात्" इति। 'आप्तोक्तपदस्मारितत्वाद्वा मदुक्तपदार्थवत्' इति।

ननु घटादिविशिष्टज्ञानस्य प्रथममप्रसिद्ध्या साध्यप्रसिद्धिविरहात् कथं व्याप्तिग्रहः। तत्प्रसिद्ध्युपगमे च व्यर्थं तदनुमानम्। तथा हि — 'इदं वाक्यं भ्रमादिविशिष्टज्ञानयोरन्यतरजन्यम्' इत्यनेन वक्तुर्विशिष्टज्ञानविशेषोऽनुमेयः। ज्ञाने च विशेषः अर्थः = विषयः एव, न तु विषयजन्यः आकाराख्यः अन्यः वैयाकरणाभ्युपगतपदार्थविशेषः।

"अर्थेनैव विशेषो हि निराकारतया धियाम्"

इत्यत्र[1] तृतीयाविभक्तिरप्यभेदार्थिका, न तु जन्यत्वार्थिका। "धान्येन धनवान्" इत्यादाविव। तथा च विशेषरूपस्यार्थस्याप्रसिद्ध्या न व्याप्तिग्रहः। अत एव "अस्मिन्नर्थेऽयमभ्रान्तः, आप्तो वा" इति ज्ञातुमशक्यमिति हेत्वप्रसिद्धिरपि। अतः शब्दः स्वतन्त्रतयार्थबोधकः, न त्वनुमानविधयेति चेत् —

मैवम्। तात्पर्यनिश्चयार्थं त्वयापि अशाब्द्या एव संसर्गविशेषप्रतीतेरङ्गीकरणीयत्वात्। तात्पर्यस्य संसर्गप्रतीतिघटितत्वात्।

यद्वा "इदं वाक्यं साकाङ्क्ष-एतदर्थविषयकैकज्ञानहेतुकम्, आप्तोक्तत्वे सति एतदर्थप्रतिपादकत्वात्, मद्वाक्यवत्"। ततः "एते पदार्थाः परस्परसंसर्गवन्तः, साकाङ्क्षत्वे सति एकज्ञानविषयत्वात्, सत्यरजतज्ञानविषयवत्"।

एवंरीत्या वक्तुर्यथार्थवाक्यार्थज्ञानेऽनुमिते प्रकरणादिना वक्त्रभिप्रेतयथार्थप्रतीतिज्ञानम्, ततो वेदतुल्यतया शब्दादर्थप्रत्यय इति अनुवादकः शब्दः। वक्तृज्ञानावच्छेदकतया संसर्गज्ञानानुमानात् वाक्यार्थस्य प्रागेव सिद्धत्वात्।

---

[1] न्या.कु.४.४.

उक्तप्राभाकरमतनिरासः

अत्रोच्यते। यथार्थवाक्यार्थधीपरत्वरूपं तात्पर्यं न ज्ञातं सत् प्रमोत्पादकम्। उक्ततात्पर्यस्य वाक्यार्थघटितत्वेन, वाक्यार्थनिश्चयाधीननिश्चयकतया वाक्यार्थस्य पूर्वमनिश्चितत्वात्।

यत्तु लोके भ्रमादिनिरासानन्तरं वक्तृज्ञानावच्छेदकतया, तदनन्तरं स्वातन्त्र्येण वा पुरुषाभिप्रेतवाक्यार्थज्ञाने सति, यथार्थवाक्यार्थप्रतीतिपरत्वं प्रकरणादिना ज्ञायत इत्युक्तम्; तन्न। वाक्यार्थमज्ञात्वा "अस्मिन्नर्थेऽयमभ्रान्तः" इति ज्ञातुमशक्यत्वात्। पुरुषस्य भ्रमप्रमादसंभवात्।

न च मा भूत् पुरुषवाक्यत्वेन भ्रमाद्यजन्यत्वग्रहः, तथापि संवादिप्रवृत्तिप्रयोजकवाक्यत्वेन लिङ्गेन तद्ग्रहः स्यात् इति वाच्यम्। संवादिप्रवृत्त्यादेः शाब्दज्ञानोत्तरकालीनत्वेन शाब्दधीपूर्वं संवादिप्रवृत्तिप्रयोजकत्वग्रहासंभवात्।

न च प्रमाणशब्दे भ्रमादिजन्यशब्दव्यावृत्तं किंचित् वैलक्षण्यमस्ति, तेनैव भ्रमाजन्यत्वमनुमेयमिति वाच्यम्। तादृशवैलक्षण्यस्यैव शाब्दधीहेतुत्वसंभवेन यथार्थतात्पर्यस्य अहेतुत्वात्। तथा च शब्दस्य नानुवादकत्वमित्यायातम्।

वेदे न्यायगम्यस्य तात्पर्यस्य शाब्दधीहेतुत्वनिरासः

एवं वेदेऽपि वाक्यार्थमविज्ञाय वाक्यार्थविषयकयथार्थप्रतीतिपरत्वं न्यायेनापि ज्ञातुमशक्यम्। विषयनिरूप्यत्वात् प्रतीतेः। विषयनिश्चयाधीननिश्चयकत्वादित्यर्थः। भवद्भिरपि तात्पर्यज्ञानार्थं प्रथमम् अशाब्दवाक्यार्थप्रतीतेः स्वीकारात्। तात्पर्यघटकप्रतीतेः विषयनिरूप्यत्वाभावे भवतां तदभ्युपगमो व्यर्थः स्यात्। किं च तात्पर्यघटकप्रतीतिविषयकप्रतीतेः विषयनिश्चयहेतुकत्वाभावे वक्तृज्ञानानुमानं व्यर्थं स्यात्। तादृशप्रतीत्युपपादनायैव तदभ्युगमात्।

न च लोकवत् वेदे मानान्तरात् = अनुमानात्, एकपदार्थे अपरपदार्थवत्त्वरूपवाक्यार्थावगम इति वाच्यम्। वेदार्थस्य शाब्दधीपूर्वं प्रमाणान्तराविषयत्वात्। तथात्वे वेदस्यानुवादकतापत्तेः, अप्रमाणतापत्तेर्वा। लोकवेदयोरुभयत्रैव प्रमाणान्तरात् वाक्यार्थबोधस्य आवश्यकत्वे शब्दस्य स्वार्थानुभवजनकत्वाभ्युपगमे प्रयोजनाभावात्।

तर्कसंशययोः तात्पर्यनिर्णये उपयोगाभावः

ननु तर्कसंशयान्यतरोपस्थिते वेदार्थे तात्पर्यनिरूपणमस्तु। तथा च वेदस्य नानुवादकता। तर्कसंशयेतरज्ञानगृहीतग्राहिज्ञानमात्रजनकत्वस्यैवानुवादकतापदार्थत्वाभ्युपगमात् इति चेत् — न। अज्ञाते वाक्यार्थे तर्कसंशययोरप्यसंभवात्।

"अयं पुरुषः यद्येतत्पदार्थवदेतत्पदार्थज्ञानवान्न स्यात्, तदा एतद्वेदवाक्यप्रयोक्ता न स्यात्" इति तर्कस्य, "अयमेतत्पदार्थवदेतत्पदार्थज्ञानवान्न वा" इति संशयस्य च वेदवाक्यार्थनिश्चयाधीनत्वात्। विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारक-निश्चयस्य हेतुत्वात्। अन्यथा लोकेऽपि तर्कसंशयाभ्यामेव वाक्यार्थोपस्थितिसंभवेन किं वक्तृज्ञानानुमानेन।

वस्तुतस्तु यदि यथार्थतात्पर्यकत्वं ज्ञातं सत् शाब्दप्रमोत्पादकं स्यात्, तदा तात्पर्यविशिष्टपदस्मारितत्वेन हेतुना पदार्थसंसर्गानुमितिसंभवात् न शब्दः अनु-मित्यतिरिक्तानुभवकरणं स्यात्।

वेदतुल्यं लौकिकवाक्यस्य प्रामाण्यम्

अपि च पुंवाक्यस्य = लौकिकवाक्यस्य, दोष-विशिष्टज्ञानान्यतरजन्यत्वेऽनुमिते परिशेषात् = भ्रमाद्यभाववदुक्तत्वेन, दोषाजन्यत्वनिश्चयदशायां वेदतुल्या सामग्री = तात्पर्यग्रहापेक्षया प्राथमिकत्वात् तात्पर्यग्रहार्थमावश्यकत्वाच्च वेदसाधारणशाब्दा-नुभवसामान्यं प्रति हेतुत्वेन क्लृप्ता, दोषाजन्यत्वे सति दोष-विशिष्टज्ञानान्य-तरजन्यत्वनिश्चयरूपा सामग्री, पुंवाक्येऽपि वृत्तेति तत एव = तादृशान्य-तरजन्यत्वनिश्चयादेव, वाक्यार्थतात्पर्यग्रहात् पूर्वं लौकिकवाक्यार्थनिश्चयात् वेद-वत्तस्यापि प्रामाण्यम्।

ननु तादृशान्यतरजन्यत्वनिश्चयस्य प्राथमिकत्वे आवश्यकत्वेऽपि गौरवान्न तस्य शाब्दधीहेतुत्वम्। किं तु यथार्थतात्पर्यनिश्चये एव हेतुत्वम्। अतः यथार्थ-तात्पर्यनिश्चयात् पूर्वं न तस्माच्छाब्दबोधसंभव इति चेत् — न। परम्परया दोषाजन्यत्वानुमानाधीनस्य यथार्थतात्पर्यनिश्चयानुमानस्य व्याप्तिस्मृत्यादिविलम्बि-तत्वात्। तथा च यथार्थतात्पर्यनिश्चयस्य लघुत्वेऽपि व्यभिचारान्न हेतुत्वमिति।

अन्ये तु — अबाधितार्थपरत्वं = तत्पदार्थवत्तत्पदार्थप्रतीतिजनकत्वं, लोके वेदे च प्रमाजनकम्। लौकिकवाक्ये वाक्यार्थो बाधितोऽपि दृष्ट इति श्रोतुः विशेषतो "घटवत्कर्मत्वप्रतीतिजनकमिदम्" इति अबाधितार्थकत्वज्ञानं विना न बाधा-भावनिश्चयः = कर्मत्वादौ घटादिमत्त्वशाब्दबोधः। लोके विशिष्य अबाधितार्थ-कत्वनिश्चय एव शाब्दधीहेतुर्न तु सामान्यतस्तन्निश्चयः। "घटवदेतदम्पदार्थ-प्रतीतिजनकमिदम्" इति सामान्यतो निश्चयस्य तत्र हेतुत्वे, सामान्य-तस्तादृशनिश्चयसत्त्वे "कर्मत्वं घटवन्न वा" इति विशेषतः संशयेऽपि शाब्द-बोधापत्तेः। कर्मत्वातिरिक्तस्याप्येतदम्पदार्थतया, सामान्यतस्तन्निश्चयस्य विशेष-तस्तादृशसंशयं प्रति अविरोधित्वात्। विशेषतो निश्चयस्य हेतुत्वे च, तत्सत्त्वे तादृशसंशयस्यैवासंभवान्नातिप्रसङ्गः।

न च शाब्दबोधात् पूर्वं विशेषतो "घटवत् कर्मत्वम्" इत्यादिनिश्चयः कथं स्यादिति वाच्यम्। इन्द्रियेण वाक्यश्रवणे सति वाक्यपक्षकानुमानेन क्वचिदाप्तोक्तत्वानुमानेन च तत्संभवात्। वेदे तु न्यायात् = " 'कपिञ्जलानालभेत' इति वाक्यं त्रित्ववदेतत्कपिञ्जलपदार्थप्रतीतिजनकम्" इत्यादिक्रमेण, सामान्यतः अबाधितार्थकत्वनिश्चयः।

न च वेदे सामान्यतः पूर्वोक्तनिश्चयस्य हेतुत्वे, तत्सत्त्वे "रक्तच्छागस्त्रित्ववान्न वा" इति संशयदशायामपि शाब्दबोधापत्तिरिति वाच्यम्। वेदस्थकपिञ्जलादिपदार्थस्य प्रमाणान्तराविषयत्वात्, रक्तच्छागाद्यतिरिक्ते प्रमाणाविषयत्वात् (रक्तच्छागाद्यतिरिक्तेऽदृष्टत्वात्) जात्वपि कपिञ्जलादिपदेन रक्तच्छागाद्यतिरिक्तार्थाप्रतिपादनात् न तत्र संशयस्य प्रसक्तिः। तथा च लोकवेदयोः सामग्रीभेदः स्पष्टः — इत्याहुः।

तदपि न। शाब्दबोधात् पूर्वं भ्रमाद्यजन्यत्वस्य आप्तत्वस्य वा निश्चेतुमशक्यत्वात्। पुंवाक्यत्वस्य व्यभिचारितया, संवादिप्रवृत्त्यादेश्च शाब्दज्ञानोत्तरकालीनतया भ्रमाद्यजन्यत्वानुमाने लिङ्गज्ञानाभावात्, भ्रमाद्यजन्यत्वानुमानाभावे च तादृशविशिष्टज्ञानवत्त्वरूपस्य आप्तत्वस्यानुमानासंभवात्। भ्रमाद्यजन्यत्वघटितहेतुनैव पूर्वोक्तक्रमेण वक्तुस्तादृशविशिष्टज्ञानस्यानुमेयत्वात्।

किं च समानप्रकारकज्ञानस्यैव प्रतिबन्धकतया "त्रित्ववदेतत्कपिञ्जलपदार्थप्रतीतिजनकमिदम्" इति सामान्यतो निश्चयसत्त्वेऽपि "रक्तच्छागस्त्रित्ववान्न वा" इति विशेषतः संशयसंभवात्, लोकवत् वेदेऽपि अगत्या विशेषतोऽबाधितार्थकत्वनिश्चयस्यैव हेतुताया वक्तव्यतया, तन्निश्चये सति वाक्यार्थस्य निश्चितत्वेन वेदस्यानुवादकतापत्तिः।

स्वरूपसतामेव भ्रमाद्यजन्यत्वादीनां शाब्दप्रमाहेतुत्वम्

तस्मात् भ्रमाद्यजन्यत्वम्, तत्पदार्थवत्तत्पदार्थप्रतीतिमदुक्तत्वरूपम् आप्तोक्तत्वम्, तत्पदार्थवत्तत्पदार्थप्रतीतिजनकत्वरूपमबाधितार्थकत्वम्, तत्पदार्थवत्तत्पदार्थप्रतीतीच्छया उच्चरितत्वरूपं यथार्थतात्पर्यकत्वम्, निरस्तव्यभिचारशङ्कत्वं = तद्वद्विशेष्यकतत्प्रकारकप्रतीतिरूपप्रमाजनकत्वम्, अन्यद्वा दोषाभावादिकं यत् प्रमोत्पादकतया पराभिमतं तत् सर्वं स्वरूपसदेव शाब्दप्रमाया उत्पादकं, न ज्ञातं सत्। अन्यथा उक्तस्य सर्वस्यापि तत्पदार्थे तत्पदार्थवत्त्वरूपवाक्यार्थव्याप्यतया आप्तोक्तादिपदस्मारितत्वरूपात् लिङ्गादेव संसर्गसिद्धिः स्यादिति शब्दस्यानुमानान्तर्भावात् वैशेषिकाः विजयेरन्।

अथ व्यवहारानुमिते = "घटमानय" इत्यादिवाक्याधीनप्रयोज्यवृद्धप्रवृत्त्या अनु-

मिते, व्यवहर्तृकार्यान्वितज्ञाने = प्रयोज्यवृद्धगते "घटानयनविषयकं[१] कार्यम्" इत्याकारककार्यविशेष्यकज्ञाने, तादृशज्ञानं प्रति उपस्थितत्वेन पदानां = प्रयोजक-वृद्धोक्तानां "घटमानय" इत्यादिपदानां हेतुत्वं जानाति व्युत्पित्सुर्बालकः। तेन च शब्दस्य स्वातन्त्र्येण पदार्थद्वयसंसर्गज्ञानजनकत्वं गृहीतम्। न तु लिङ्गतया शब्दस्य हेतुत्वं गृहीतम्। तदानीं शब्दस्य लिङ्गत्वेन = व्याप्तिविशिष्टपक्षधर्मत्वेन, अनुपस्थितेः। तथा च न शब्दस्यानुमानान्तर्भाव इति चेत् — न। लिङ्गभावेनैव शब्दादन्वितज्ञानोपपत्तेः न आकाङ्क्षादिमच्छब्दत्वेन कारणता गौरवात्। न च शब्दस्य लिङ्गत्वं संभवदपि बालेन न ज्ञातमिति वाच्यम्। सोऽयं बालस्य दोषः, न तु लिङ्गस्य। बालेन न गृहीतमित्येतावता शब्दस्य लिङ्गतया जनकतायां हान्यभावात्।

किं च ज्ञायमानस्य आप्तोक्तत्वादेः शाब्दधीहेतुत्वे, वेदेऽपि आप्तोक्तत्वादि-घटकतया तत्पदार्थे तत्पदार्थवत्त्वस्य प्रथमं सिद्धेः अनुवादकता स्यात्।

वैशेषिकैकदेशिमतम्[२]

वैशेषिकैकदेशिनस्तु — वाक्यार्थतात्पर्यग्राहकानुमानात् तात्पर्यावच्छेदकतया = तात्पर्यघटकतया, वाक्यार्थः सिध्यति। एवं तात्पर्यग्राहकानुमानमुपजीव्य प्रवृत्तात् "कर्मत्वं घटवत्, स्वविशेष्यकघटप्रकारकयथार्थप्रतीतीच्छयोच्चरितपदस्मारितत्वात्, घटवत्" इत्यनुमानात् स्वातन्त्र्येण = तात्पर्याघटकतया, वाक्यार्थः सिध्यति। शाब्दसामग्र्यपेक्षया अनुमितिसामग्र्याः बलवत्त्वात्, सिद्धेश्चानुमितिप्रतिबन्धकत्वे मानाभावात्। तथा च लोकवेदसाधारणं शब्दमात्रं न प्रमाणम् — इत्याहुः।

तन्मतखण्डनम्

तदपि न। यथार्थतात्पर्यग्रहस्य वाक्यार्थबोधाहेतुत्वात्। वाक्यार्थबोधात् पूर्वं वाक्यार्थघटितस्य तात्पर्यस्य ज्ञातुमशक्यत्वात्।

यत्तु ज्ञायमानकरणे इत्याद्युक्तम्। तन्न। यथार्थतात्पर्यकत्वादेः प्रथमं ज्ञातुम-शक्यत्वेनानुमानस्य बाधितत्वात्। ज्ञायमानत्वघटितधर्मावच्छिन्नशाब्दबोधकारण-ताश्रयत्वरूपस्य ज्ञातोपयोगित्वस्य साध्यस्य पक्षेऽभावात्। भवदुक्तानुमाने व्याप्त्यभावाच्च। यद्यपि सामान्यमुखी व्याप्तिः प्रदर्शिता, तथापि तत्र दृष्टान्तो दुर्लभः। यत्तु 'व्याप्तिवत्, शब्दशक्तिवच्च' इति दृष्टान्तकथनम्। तन्न। व्याप्तिशब्दशक्त्योः कारणत्वाभावात्, साध्यहेतुघटकज्ञानोपयोगीत्यनेन ज्ञानकारणतायाः विवक्षि-

---

[१] प्राभाकरमते लिङर्थे कार्ये धात्वर्थस्य विषयतासम्बन्धेन अन्वयः इति स्वीक्रियते।

[२] त.चिं.म, च.भा. प्र.प. पृ. १५०.

तत्वात्। व्याप्तिशक्तिज्ञानयोरेव अनुमितिशाब्दबोधकारणत्वात्। व्याप्तेः शक्तेश्च कारणत्वे अतीतलिङ्गादनुमितिः अपभ्रंशादौ शक्तिभ्रमाच्छाब्दबोधो न स्यात्।

न च प्रकृतवाक्यार्थयथार्थप्रतीतिपरतारूपे तात्पर्ये पक्षे ज्ञाननिष्ठज्ञाननिरूपितकारणतानिरूपितविषयतासंबन्धावच्छिन्नावच्छेदकत्वं साध्यम्। हेतावपि ज्ञानोपयोगित्वं कारणकारणतावच्छेकसाधारणम्। तथा च न दृष्टान्ते साध्यवैकल्यं साधनवैकल्यं चेति वाच्यम्। शाब्दबोधात् पूर्वं यथार्थतात्पर्यज्ञानासंभवेन ज्ञानघटितहेतुसाध्यकरणेऽपि पक्षे बाधासिद्धयोः दुर्वारत्वात्।

वैशेषिकैकदेश्युक्तेऽनुमाने उपाधिप्रदर्शनम्

किं च भवदुक्तानुमाने उपाधिरपि वर्तते। तथा हि — "तात्पर्यं ज्ञानवृत्तिज्ञानकारणतायां विषयतया अवच्छेदकं, ज्ञायमानकरणनिष्ठत्वे सति ज्ञानोपयोगिव्यभिचारिवैलक्षण्यत्वात्" इति भवदुक्तमनुमानम्। तत्र ज्ञानविषयतया व्याप्तिज्ञानजन्यतत्प्रमितिजनकतावच्छेदकत्वमुपाधिः। "यत्र ज्ञाननिष्ठयज्ज्ञानकारणतायां विषयतया अवच्छेदकत्वं, तत्र तज्ज्ञानविषयतया व्याप्तिज्ञानजन्यतत्प्रमितिजनकतावच्छेदकत्वं, यथा व्याप्तौ" इति साध्यव्यापकत्वमुपाधेः। पक्षे च तात्पर्ये व्याप्तिज्ञानजन्यप्रमितिजनकतावच्छेदकत्वविरहात् पक्षान्तर्भावेण साधनाव्यापकत्वम्।

न च शक्तौ, पदे, योग्यतायाम्, आकाङ्क्षायां च ज्ञानवृत्तिशाब्दबोधकारणतायां विषयतयावच्छेदकत्वरूपसाध्यमस्ति, व्याप्तिज्ञानजन्यतत्प्रमितिजनकतावच्छेदकत्वरूपोपाधिर्नास्तीति कथमुपाधेः साध्यव्यापकत्वमिति वाच्यम्। व्याप्तितात्पर्यान्यतरत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वमस्तीत्याशयात्।

न च शब्दस्यापि व्याप्यत्वेन ज्ञायमानस्यैव शाब्दधीजनकतया, पक्षेऽपि ज्ञानविषयतया व्याप्तिज्ञानजन्यशाब्दधीकारणतावच्छेदकत्वसत्त्वात् न तस्य साधनाव्यापकत्वमिति वाच्यम्। शब्दस्यापि अर्थव्याप्यतया ज्ञातस्य शाब्दधीजनकत्वे तस्यानुमानान्तर्गतत्वापत्तेः।

अत्र मणिग्रन्थस्तावत् अयं[१] —

"तस्मात् यत् अर्थाव्यभिचारित्वेन ज्ञातं करणं, तत्र व्यभिचारिवैलक्षण्यज्ञानमुपयुज्यते" इति।

तस्यायमर्थः — यत् = व्यभिचारिवैलक्षण्यं, यत्र प्रमिताविति शेषः। अर्थाव्यभिचारित्वेन = अर्थाव्यभिचारित्वज्ञानसहकारेण (व्याप्तिज्ञानसहकारेण), ज्ञातं सत् करणं, तत्र प्रमितौ व्यभिचारिवैलक्षण्यज्ञानमुपयुज्यते। व्यभिचारि-

[१] त.चिं.म, च.भा. प्र.प. पृ. १५३.

वैलक्षण्यमिति स्वरूपकथनं, तस्यैव ज्ञानमुपयुज्यत इत्येव प्रकृतम्। तथा च यत् व्याप्तिज्ञानसहकारेण प्रमितौ ज्ञातं सत् करणं तदेव तत्प्रमितौ ज्ञातमुपयुज्यते = ज्ञाननिष्ठतत्प्रमितिजनकतायां विषयतयावच्छेदकम्। अनेन उपाधेः प्रकृतानुमाने यत् साध्यं तत्प्रयोजकत्वमुक्तम्। एतादृशोपाधिर्नास्ति चेत् साध्यमपि न भवतीति यावत्। तेन साध्यव्यापकत्वमुपाधेः प्रदर्शितं भवति अनेन ग्रन्थेन।

शब्दस्यानुवादकत्वमिति मतस्य निराकरणम्

अत्र केचित् — अनाप्तोक्तवाक्ये = जलकरणकपाकाभिप्रायेण प्रयुक्ते "जलेन सिञ्चति" इति वाक्ये, बाधकेन = सेकविशेष्यकजलकरणकत्वप्रकारकशाब्द-बोधजनकसामग्रीविरहेण (तात्पर्यविरहेण), अर्थाभावदर्शनात् = जलकरणकत्व-वत्सेकादिप्रतीतिजनकत्वाभावदर्शनात्, अन्यत्रापि सदर्थकत्व-बाधितार्थकत्वरूप-कोटिद्वयसहचरितत्वेन गृहीतो यो धर्मः = आकाङ्क्षादिमद्वाक्यत्वं, तेन "सदर्थकं बाधितार्थकं वा (जलकरणकत्ववत्सेकप्रतीतिजनकं तादृशप्रतीत्यजनकं वा)" इति संशयात् तावन्मात्रात् = आकाङ्क्षादिमत्त्वज्ञानमात्रात्, न अर्थनिश्चयात्मकः शाब्द-बोधः। न हि संशायकमेव निश्चायकम्। तस्मात् तादृशसंशयरूपप्रतिबन्धनिरसनाय अधिकं कारणान्तरमपेक्षणीयम्। तच्च जलकरणकत्ववत्सेकादिप्रतीतिजनकत्व-रूपाबाधितार्थकत्वनिश्चयरूपम्। एवं च तादृशनिश्चयवेलायामेव वाक्यार्थस्य निश्चि-तत्वात् शब्दः अनुवादकः — इत्याहुः।

तन्न। यत्र संशयो जातः तत्र तन्निरसनार्थमबाधितार्थकत्वनिश्चयस्यापेक्षितत्वेऽपि यत्र संशयो न जातः तत्र तस्यानपेक्षिततया तत्र शब्दस्यानुवादकत्वाभावेन प्रमा-णत्वात्।

अपि च अर्थसंशयस्य तद्बाधसंशयस्य वा ग्राह्यसंशयरूपतया न प्रमां प्रति प्रतिबन्धकत्वम्। वह्नि-तदभावयोः संशयदशायां प्रत्यक्षानुमानादिनार्थनिश्चयात्। अन्यथा प्रमाणमात्रोच्छेदप्रसङ्गः। प्रमाणप्रवृत्तेः पूर्वमर्थतद्बाधसंशयात्।

निगमनम्[१]

तस्मात् आप्तोक्तत्वं, भ्रमाद्यजन्यत्वं, यथार्थवाक्यार्थप्रतीतिपरत्वं वा अनुगतमपि ज्ञातं सत् न हेतुः। शाब्दबोधात् पूर्वं ज्ञातुमशक्यत्वात्। किं तु तात्पर्य-ग्राहकत्वेनाभिमतानां न्यायजन्यज्ञानप्रकरणादिज्ञानानामन्यतरत् तात्पर्यव्याप्यविषय-कत्वेनानुगतं, तथा आकाङ्क्षासत्त्योर्निश्चयश्च शाब्दबोधहेतुः। आकाङ्क्षासत्त्योर-भावनिश्चये, आकाङ्क्षासत्त्योः संशये च शाब्दबोधाभावात्। तथा च 'यस्य संशये

१ त.चिं.म, च.भा. प्र.प. पृ. १७०.

यद्व्यतिरेकनिश्चये च यस्यानुत्पादः तन्निश्चयः तत्र कारणम्' इति व्याप्तिबलात् आकाङ्क्षासत्त्योर्निश्चयः शाब्दबोधकारणम्। योग्यतायाश्च ज्ञानमात्रं हेतुः। योग्यतायाः संशये, योग्यताभ्रमे, योग्यताप्रमायां च सत्यां वाक्यार्थज्ञानोत्पत्तेः। तथा विभक्त्यादिपदज्ञानम् (आदिपदेन नामधात्वात्मकपदानि), पदानां संभूयोच्चारणं च शाब्दज्ञानसामान्ये कारणानि।

नानार्थकहर्यादिपदे, श्लिष्टे च "श्वेतो धावति" इत्यादौ अनेकार्थोपस्थितावपि प्रकरणादिवशात् एकमर्थमादाय अन्वयबोधः। लक्षणा च न तात्पर्यानुपपत्त्या, किं तु अन्वयानुपपत्त्यैव। न च "यष्टीः प्रवेशय" इत्यत्र शक्यार्थयष्टेरपि प्रवेशनसंभवात् अन्वयानुपपत्त्यभावात् कथं यष्टिधरे लक्षणेति वाच्यम्। प्रकरणवशात् भोजनानुकूलत्वेन अवगते प्रवेशने कर्मतया यष्टेरन्वयानुपपत्तिसद्भावात्। "छत्रिणो यान्ति" इत्यादावजहत्स्वार्थायां लक्षणायामपि प्रकरणादेव छत्रितदितरसमूहस्य गमनकर्तृत्वमवगतम्, तदन्वयानुपपत्तिश्च केवलच्छत्रिणि।

एवं चैत्रोक्तस्य "पचति" इत्यस्य न अन्योक्तेन "कलायम्" इत्यनेन सममर्थप्रत्यायकत्वम्, समभिव्याहाराभावात् = परस्परसहकारेण एकान्वयबुद्धिजनकत्वज्ञानाभावात्, न तु यथार्थतात्पर्यग्रहाभावात्।

न च तत्र परस्परसहकारेण एकान्वयबुद्धिजनकत्वज्ञानसत्त्वेऽपि नान्वयबोध इष्ट इति तदापत्तिरिति वाच्यम्। तव मतेऽपि परस्परसहकारेण एकान्वयबुद्धिजनकत्वज्ञानस्य तात्पर्यग्रहहेतुत्वस्वीकारात्, तादृशज्ञानसत्त्वे तात्पर्यग्रहस्यापि सत्त्वात् शाब्दबोधस्य दुर्वारत्वात्। संभूय एकान्वयबुद्धिजनकत्वेन ज्ञातानामेव पदानां परस्परसहकारेणान्वयबोधजनकतायाः 'यत्संशय' इत्यादिव्याप्तिसिद्धत्वात्। तथा च तात्पर्यस्य प्रकरणादेर्वा ज्ञानकालेऽपि "एतानि पदानि न संभूय एकान्वयबुद्धिजनकानि" इति ज्ञाने, "एतानि पदानि संभूयैकान्वयबोधजनकानि, न वा" इति संशये च शाब्दबोधाभावात् 'यत्संशयव्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयः तद्धेतुः' इति नियमबलेन संभूयैकान्वयबुद्धिजनकत्वज्ञानस्य अन्वयबोधहेतुत्वमिति नोक्तदोषः।

पदार्थतात्पर्यग्रहस्यैव शाब्दधीहेतुत्वं, न तु वाक्यार्थतात्पर्यग्रहस्येति मतोपन्यासः[१]

अन्ये तु — गृहीतनानार्थवृत्तिकपदे = गृहीतनानार्थशक्तिकपदे, गृहीतनानार्थलक्षणाकपदे, गृहीतनानार्थशक्तिलक्षणाकपदे च, वृत्तिज्ञानस्याविशिष्टत्वेऽपि कस्य-

---

[१] त.चिं.म, च.भा. प्र.प. पृ. १७७.

चिदेवार्थस्य उपस्थित्यर्थं पदार्थे तात्पर्यग्रहस्य हेतुत्वम्; पदार्थे तात्पर्यग्रहं विना नियतोपस्थितेरसंभवात्। वृत्त्या गृहीतनानार्थवृत्तिकपदजन्यतदर्थस्मृतिं प्रति तदर्थ-प्रतीतीच्छयोच्चरितत्वग्रहो हेतुरिति कार्यकारणभावः।

न च तात्पर्यग्रहात् पूर्वं तत्पदार्थानुपस्थितौ कथं तात्पर्यग्रहः, तात्पर्य-स्यार्थघटितत्वादिति वाच्यम्। वृत्त्या तादृशपदजन्यतदुपस्थितेरसंभवेऽपि शक्त्या इव प्रकारान्तरेण तदुपस्थितिसंभवात्। एवं च वाक्यार्थबोधे न वाक्यार्थ-तात्पर्यग्रहापेक्षा। वाक्यार्थतात्पर्याज्ञानेऽपि प्रकरणादिना ''सैन्धवपदं तुरगपरम्'' ''काकपदम् उपघातकपरम्'' इति पदार्थतात्पर्यं जानन्ति हि। ततः वाक्यार्थं प्रति-यन्ति च।

अन्यत्र = गृहीतनानार्थवृत्तिकपदभिन्नपदे, अन्वयप्रतियोगिपदार्थोपस्थितिः तात्पर्यग्रहं विनापि भवतीति न तात्पर्यग्रहापेक्षा।

[१]वस्तुतस्तु — एकपदस्य अपरपदार्थसंसर्गज्ञानपरत्वं तात्पर्यम्। तत् शाब्दबोधप्रयोजकम्। तत्संसर्गेण तद्विशेष्यकतत्प्रकारकशाब्दबोधं प्रति तत्संसर्गक-तद्विशेष्यकतत्प्रकारकशाब्दबोधेच्छयोच्चरितत्वं प्रयोजकमिति फलितम्। उक्ततात्पर्यं वेदे न्यायादवधार्यते, लोके तु न्यायात् प्रकरणादेर्वा अवधार्यते। अत एव = एतादृशतात्पर्यस्य शाब्दधीप्रयोजकत्वादेव, शाब्दबोधस्य नानियतहेतुकत्वम्। प्रकरणादेः प्रयोजकत्वे चानियतहेतुकत्वापत्तिः। तच्च अपरपदार्थसंसर्गज्ञानं वाक्यार्थज्ञानमेवेति सामान्याकारेण तत्परत्वग्रहः हेतुः। ''घटपदमम्पदं च आधे-यत्वसंसर्गककर्मत्वविशेष्यकघटप्रकारकप्रतीतिपरम्'' इत्याकारेण हेतुरिति यावत्। न तु विशिष्य तत्परत्वग्रहो हेतुः। ''घटवत्कर्मत्वप्रतीतिपरम्'' इत्याकारेण न हेतुरिति यावत्। यदि विशिष्य हेतुः स्यात् तदा शाब्दबोधात् पूर्वं संसर्गानुभवेन भाव्यम्। तथा च कर्मत्वादौ घटादिमत्त्वानुभवोत्पत्तिं विना घटवत्कर्मत्व-प्रतीतित्वेन घटवत्कर्मत्वप्रतीतिपरत्वज्ञानस्यासंभवात् शाब्दबोधात् पूर्वं तादृशानु-भवाभावात् न विशिष्य हेतुः इत्युक्तं भवति।

अत एव = उक्तरीत्या तात्पर्यज्ञानस्य हेतुत्वादेव, नानार्थस्थले विनिगमना = कदाचिदेकमर्थमादायैव अन्वयबोध इति व्यवस्था। तात्पर्यानुपपत्तिरेव च लक्षणा-बीजम्। तात्पर्याभावादेव च ''पचति'' इति पदे प्रयुक्ते अन्योक्तकलायपदात्

---

[१] नन्विदमयुक्तम् — पदार्थस्मृतिं प्रति तात्पर्यग्रहस्य हेतुत्वे मानाभावात्। गृहीतनानावृत्तिकस्थले नियतो-पस्थितेरेवासिद्धत्वात्। गृहीतवृत्तिकानां सर्वेषामेवार्थानां तत्र स्मरणस्यानुभवसिद्धत्वात्। सर्वेषां शाब्द-बोधाभावस्तु शाब्दानुभवं प्रति तात्पर्यग्रहस्य तात्पर्यग्राहकप्रकरणादिविशेषस्य वा हेतुतया तदभावात्। अन्यथा गृहीतनानार्थवृत्तिकपदजन्यत्वांशमपहाय लाघवात् वृत्त्या पदजन्यपदार्थस्मृतिमात्रं प्रत्येव पदार्थ-तात्पर्यग्रहस्य हेतुत्वं कुतो नोपेयते। पदार्थतात्पर्यग्रहं विनाप्यन्यत्र वृत्त्या पदार्थस्मरणस्यानुभवसिद्धत्वात् तत्परित्यागे प्रकृतेऽपि तुल्यत्वात् इत्यस्वरसादाह- वस्तुतस्त्विति।

स्मृतस्यान्वयबोधो न भवति। तथा च सिद्धं शब्दस्य प्रमाणान्तरत्वम् = अनुमान-भिन्नत्वे सति अगृहीतग्राहिस्वार्थानुभवजनकत्वम् — इत्याहुः।

नन्वेतादृशतात्पर्यनिश्चयस्य शाब्दधीहेतुत्वे किम् आकाङ्क्षायोग्यतासत्तिज्ञानस्य हेतुत्वेनेत्याशङ्कायामुक्तं मणौ —

"तस्य च निराकाङ्क्षादौ संसर्गज्ञानाजनकत्वात् आकाङ्क्षादिकं सहकारि"

इति। तस्य = निरुक्ततात्पर्यनिश्चयस्य, निराकाङ्क्षादौ = आकाङ्क्षाद्यभाववत्तया निश्चिते, संसर्गज्ञानाजनकत्वात् = शाब्दबोधाजनकत्वात्, आकाङ्क्षादिकं = आकाङ्क्षादिज्ञानं, सहकारि।

अनेनैतत् सिद्धं वाक्यघटकपदानां ज्ञानेन पदार्थोपस्थितिद्वारा शाब्दबोधे जननीये तात्पर्यनिश्चयः सहकारी। तात्पर्यनिश्चयस्य च आकाङ्क्षादिज्ञानं सहकारीति।

मथुरानाथीये प्रदर्शितः अभिनववैशेषिकैकदेशिमतनिरासः[१]

एतन्मणिग्रन्थोपरि मथुरानाथतर्कवागीशैरपरोऽपि विषयो विचारितः। प्रकृतोपयोगित्वात् स विचारोऽत्र प्रस्तूयते।

अभिनववैशेषिकैकदेशिमतानुवादः

अत्राभिनववैशेषिकैकदेशिनः —

लाघवात् तत्तत्पदार्थवत्तत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यस्य घटत्वकर्मत्वत्वादिना विशेषतो धीरेव लोकवेदसाधारणशाब्दधीसामान्यहेतुः। "वह्निना सिञ्चति" इत्यादौ वह्निकरणकत्ववत्सेकप्रतीतेरप्रसिद्धावपि खण्डशः प्रसिद्ध्या "वह्निकरणकत्ववत्सेकप्रतीतिपरम्" इति भ्रमरूपतात्पर्यज्ञानसंभवात्।

तद्विशेष्यकतत्प्रकारकप्रतीतीच्छयोच्चरितत्वधीस्तु न कारणम्। विशेष्यतादितत्तत्संबन्धावच्छिन्नप्रकारितादिप्रवेशे गौरवात्।

नापि वेदस्थले "त्रित्ववत्कपिञ्जलपदार्थपरम्" इत्यादिक्रमेण सामान्यतस्तन्निश्चयो हेतुः, लोके च "घटवत्कर्मत्वपरम्" इत्यादिक्रमेण विशेषतस्तन्निश्चयो हेतुरिति मीमांसकाभिमतकार्यकारणभेदः युक्तः। कार्यकारणभावद्वयकल्पने गौरवात्, लोकस्थले विशेषतस्तादृशनिश्चयहेतुत्वसाधकपूर्वोक्तयुक्तेः[२] उक्तक्रमेण वेदस्थलेऽप्यविशेषाच्च। तथा च लोकवेदसाधारणं शब्दमात्रमेवानुवादकम्। तात्पर्यावच्छेदकतया वाक्यार्थस्य पूर्वमेव गृहीतत्वात्।

---

[१] तत्त्वचिन्तामणिव्याख्यायां रहस्ये, च.भा. प्र.प. पृ. १८२-१८३.

[२] "वेदतुल्यं लौकिकवाक्यस्य प्रामाण्यम्" इति शीर्षके मणिस्थप्राभाकरमतनिरासावसरे निरूपितयुक्तेः इत्यर्थः।

न चैवं वेदस्यानुवादकत्वादप्रामाण्यापत्तिरिति वाच्यम्। अगृहीतग्राह्यनुभवजनकत्वरूपप्रामाण्याभावेऽपि क्षतिविरहात्। तावतापि यथार्थानुभवजनकत्वरूपस्य प्रामाण्यस्यानपायात्।

न च शाब्दधीतः पूर्वं तत्पदार्थे तत्पदार्थवत्त्वज्ञानाभावात् तादृशतात्पर्यं दुर्ग्रहमिति वाच्यम्। लाघवात् तादृशतात्पर्यज्ञानस्य हेतुत्वे सिद्धे; अनायत्या, व्यभिचारिणा अव्यभिचारिणा वा पक्षधर्मेण अपक्षधर्मेण वा येन केनापि लिङ्गेन, जन्मान्तरीयोद्बुद्धसंस्कारेण मनसा वा येन केनापि प्रकारान्तरेण च तत्पदार्थे तत्पदार्थवत्त्वज्ञानस्यापि अवश्यं कल्पनीयत्वात्। तादृशज्ञानविरहदशायां तात्पर्यज्ञानवैकल्येन शाब्दानुभवः असिद्धः।

अन्यथा तवापि सर्वत्र प्रथमं तद्विशेष्यकतत्प्रकारकप्रतीतेरज्ञानात् कथं तद्घटिततात्पर्यनिर्णयः इत्याक्षेपः दुस्समाधेयः — इति प्राहुः।

तन्मतनिराकरणम्

तदसत्। तत्तत्संबन्धावच्छिन्नप्रकारितादिव्यक्तीनां स्वरूपतः संसर्गविधया प्रवेशेन गौरवाभावात्। भवदुक्ततत्पदार्थवत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यग्रहस्यैव हेतुत्वे "कर्मत्वविशेष्यकघटप्रकारकप्रतीतीच्छया उच्चरितं न वा" इत्यादिसंशये "तादृशप्रतीतीच्छयोच्चरितं न" इत्यादिव्यतिरेकनिश्चये वा "घटवत् कर्मत्वम्" इत्यादिशाब्दबोधप्रसङ्गाच्च।

किं च तात्पर्यज्ञानं न शाब्दबोधहेतुः, इति तात्पर्यवादे निरूपयिष्यते[1]। शुकादिवाक्यात् तात्पर्याभावनिश्चयेऽपि शाब्दबोधोत्पत्तेः। न चेश्वरतात्पर्यज्ञानं तत्र हेतुरिति वाच्यम्। ईश्वराभावनिश्चयेऽपि वेदेऽन्वयबोधात् — इति संक्षेपः।

तत्सिद्धं शब्दः प्रमाणान्तरमिति।

शब्दप्रामाण्यविषये चित्सुखाचार्यकृतः आक्षेपः[2]

अद्वैततत्त्वप्रदीपिकायां चित्सुखाचार्येण पदस्वरूपं वाक्यस्वरूपं च दुर्निरूपमिति निरूप्य शब्दप्रामाण्यविषये केचन आक्षेपाः प्रादर्शिषत। तथा हि —

अस्तु वा यत्किंचिदविचारितरमणीयं पदं तत्समूहश्च वाक्यम्। तथापि कुत्र प्रमाणमिति विवेचनीयम्।

शब्दो मानं विवक्षायां ज्ञानेऽर्थे वा भवन् भवेत्।
नाद्यौ तद्व्यभिचारित्वान्नान्त्यः संगत्ययोगतः॥

---

[1] अस्मिन्नेव ग्रन्थे उत्तरत्र "तात्पर्यविचारः" इति अन्तिमे प्रकरणे निरूपयिष्यते।

[2] तत्त्वप्रदीपिकायां द्वितीयपरिच्छेदे, पृ. २६२-२६४.

प्रमाणं भवन् शब्दः पदार्थसंसर्गविषयिण्यां विवक्षायां लिङ्गतया प्रमाणं भवेत्, यथाहुः सौगताः — "वक्त्रभिप्रायं तु सूचयेयुः" इति। किं वा प्रयोगहेतुभूते वक्तृगते ज्ञाने लिङ्गतया, यथा वैशेषिकादिमते। किं वा वाक्यार्थे स्वभावत एव, यथा मीमांसकादिमते। न तावदाद्यौ, व्यभिचारित्वात्, भ्रान्तस्य पिपासोः पानीयविवक्षायां "कुकुदं देहि" इति प्रयोगदर्शनात्, अन्यथाजानतोऽपि विप्रलम्भकस्यान्यथाप्रयोगदर्शनाच्च। तदुक्तं भट्टपादैः[१] —

"अन्यथा संविदानोऽपि विवक्षत्यन्यथा यतः।
तस्मादेकान्ततो नास्ति पुंवाक्यात् तद्धियां गतिः॥" इति।

ननु नास्माभिः शब्दमात्रं विवक्षाज्ञानयोः प्रमाणमित्युच्यते, अपि तु आप्तवाक्यम्। तस्य च न विवक्षाज्ञानाभ्यां व्यभिचार इति चेत् — न। अस्तु तर्हि आप्तवाक्यमर्थस्यैव ज्ञापकम्, न विवक्षाज्ञानयोः। अनाप्तवाक्येष्वर्थव्यभिचारदर्शनेन खलु शब्दस्य विवक्षाज्ञानयोः प्रामाण्यमाश्रीयते। तत्रापि चेत् आप्तवाक्यत्वविशेषित एव चेच्छब्दः प्रमाणम्, स तर्हि अर्थ एव प्रमाणं भवतु। आप्तवाक्यस्यार्थाव्यभिचारित्वात्।

अपि च वाक्यं किं वाक्यार्थाविशेषितयोः ज्ञानविवक्षयोः प्रमाणम्, उत तद्विशेषितयोः। नाद्यः, व्यवहाराभावप्रसङ्गात्। न हि ज्ञानमात्रविवक्षामात्रप्रतिपत्त्या गवानयनादौ प्रवृत्तिः संभवति।

द्वितीये तु विशेषभूतोऽर्थः केन प्रमाणेन ज्ञातः। किमन्यतः, उत शब्दतः। न तावदन्यतः। तथा हि — न तावत् प्रत्यक्षेण ज्ञातः। "नद्यास्तीरे फलानि सन्ति" इति वाक्यार्थस्य नदीतीरे फलसत्त्वस्य श्रोतुरिन्द्रियासंनिकृष्टत्वात्। नाप्यनुमानेन, तद्व्याप्यलिङ्गाभावात्। नाप्येतदर्थावगतिः स्मृतिः, पूर्वमननुभूतत्वात्। नाप्युत्प्रेक्षा, सा हि न स्मृतिः, उक्तदोषात्। नानुभवः, प्रमात्मकत्वे प्रत्यक्षानुमानयोरनन्तर्भावात्। भ्रमत्वे न तावत् संशयः, कोटिद्वयानवगाहित्वात्। नापि विपर्ययः, तत्र प्रवृत्तस्य तत्प्राप्त्यभावप्रसङ्गात्।

अतः शब्दादेव विशेषणीभूतोऽर्थोऽवगम्यत इति स्वीकारे अन्योन्याश्रयः। यदा शब्दतोऽर्थं ज्ञात्वा तद्विशिष्टा विवक्षा वा ज्ञानं वा शब्देन लिङ्गभूतेनानुमीयते, ताभ्यां चार्थानुमानं, तदा अर्थज्ञाने विवक्षाज्ञानं, विवक्षाज्ञाने चार्थज्ञानमिति परस्पराश्रयता। किं च प्रथमत एवार्थप्रतीतौ तद्विवक्षया पुनस्तदनुमानं व्यर्थम्। यद्वा प्रथमतः शब्दतोऽर्थप्रतीतौ तत एव व्यवहारसिद्धेः, विवक्षानुमानं, ततोऽर्थानुमानं च व्यर्थम्।

[१] श्लो.वा.चोदना. १६०.

एतद्दोषपरिहाराय यदि अज्ञात एवार्थो विवक्षाज्ञानयोर्विशेषणमित्युच्यते; तदा अर्थविशिष्टयोः विवक्षाज्ञानयोः अनुमानं न संभवति, विशेषणमज्ञात्वा विशिष्ट-ज्ञानासंभवात्। 'नागृहीतविशेषणा विशिष्टे बुद्धिः' इति न्यायात्।

एतावता विवक्षायां ज्ञाने च शब्दः प्रमाणमिति पक्षद्वयं दूषितम्। अथ अर्थे शब्दः प्रमाणमिति तृतीयपक्षः दूष्यते, "नान्त्यः संगत्ययोगतः" इति। अर्थेन सह संगत्यभावात् शब्दो नार्थे प्रमाणम् इति तदर्थः।

चित्सुखाचार्यकृताक्षेपस्य समाधानम्

अर्थेन सह संकेताख्यस्य संबन्धस्य सद्भावात् शब्दोऽर्थे प्रमाणमेव। तस्मात् चित्सुखाचार्यकृताक्षेपः न शब्दाप्रामाण्यसाधकः[१]।

गुरुमतसारः

वैदिकमेव शाब्दं प्रमात्मकं ज्ञानम्। पुरुषवचनानि तु वक्त्रभिप्रायानुमापकान्येव, न स्वयमेव वाक्यार्थं बोधयन्ति, शङ्काकुण्ठितशक्तिकत्वात्। व्युत्पत्ति-समयसिद्धापि हि शब्दानां बोधकशक्तिः व्यभिचारबहुलेषु पौरुषेयवचनेषु तदा-शङ्कया कुण्ठिता भवति। तत्र च "अनेन वक्त्रा अमुमर्थमवबुध्यैव वाक्यं प्रयुक्तम्" इति यावन्नानुमीयते, तावदन्यथात्वशङ्का न निवर्तत इति वाक्यमुदास्त एव। तथा तात्पर्यमपि नरगिरां तद्बुद्ध्यधीनमिति वक्तृबुद्ध्यनुमानं विना तात्पर्या-निश्चयादपि वाक्यमुदास्त एव। तत्र वक्तृधीस्तावदनुमातव्या। तत्र "नद्यास्तीरे फलानि सन्ति" इति वाक्ये श्रुते पदार्थेषु च पृथक् पृथक् स्मृतेष्वनुमिनोति "एतानि पदानि एतेषां पदार्थानां संसर्गमवबुद्ध्यैव प्रयुक्तानि, आप्तप्रणीतपदत्वात्, 'गामानय' इति पदवत्" इति। एवं च वक्तुः पदार्थसंसर्गज्ञानमवगन्तुं परिश्रान्तः श्रोता पदार्थसंसर्गरूपं वाक्यार्थमपि बलाल्लभत इति अनुमेय एव नरवचस्सु वाक्यार्थः।

एवं व्यभिचारभये गलिते वाक्यार्थनिर्णये जाते।
पुनरभिधत्ते शब्दोऽप्यनुवादतयेति तस्य राद्धान्तः॥

तन्मतनिरासः

अर्थव्यभिचारशङ्कायां सत्यामपि तामनादृत्य इन्द्रियादिवत् शब्दोऽपि स्वार्थमभिधातुं कुतो न शक्नोति? एवं तात्पर्यमपि वक्तृज्ञानानुमानं विनैव सुज्ञानमेव, वेदवत्, यथा चानालोचितकर्तृकेषु वाक्येषु। यदि च वक्तृज्ञाना-

---

[१] अयमेव विषयः अग्रिमप्रकरणे विस्तरेण निरूपितः।

नुमानमावश्यकमिति प्रत्याशा, तदा तदशक्यत्वनिरूपणेन सा प्रत्याशा भञ्जनीया। तथा हि — आप्तप्रणीतत्वं खलु वक्तृज्ञानानुमापको हेतुः। आप्तत्वं च भ्रान्त्याद्यभावः। भ्रान्तिश्चास्य पुरुषस्य नास्त्येवेति न क्वचिदपि निरूपयितुं शक्यते। ऋषीणामपि भ्रान्तिराशङ्क्यते, किमङ्ग पुनरर्वाचीनानाम्। एवमस्मिन् देशे काले वास्य भ्रान्तिर्नास्तीत्यपि दुर्निरूपमेव। तस्मात् अन्ततः "अस्मिन् वाक्यार्थेऽस्य भ्रमो नास्ति" इति वाक्यार्थज्ञानपुरस्सरमेव भ्रान्तिर्निवारणीया। अतो वाक्यार्थावगमात् पूर्वमाप्तत्वमसिद्धमेवेति कथं तेनानुमीयत इति हतं गुरुमतम्।

कणादमतनिरासससारः

एवं लौकिकशब्दानामनुमानत्ववारणात्।
सर्वशब्दानुमानत्ववादिनोऽपि हि खेदिताः॥

प्रत्यक्षमनुमानं चेति द्वे एव प्रमाणे इति वादिनो हि काणादादयः गुरूक्तप्रकारेणैव सर्ववाक्यार्थानामनुमेयत्वमाहुः। तेऽप्यनेनैव निरसनीयाः। तैरपि हि निर्दोषवाक्यत्वादिभिरेव वाक्यार्थोऽनुमातव्यः। निर्दोषत्वं च भ्रान्त्यादिराहित्यम्। तच्च वाक्यार्थनिरूपणपुरस्सरमेव निरूपणीयमिति पूर्वोक्तप्रकारेण तेषामपि हेत्वसिद्धिरेव। तदेवं लौकिकं वैदिकमुभयमपि शाब्दं प्रमाणमेव। तत्र —

दुष्टवक्तृप्रणीतत्वदोषः शब्दे यदा भवेत्।
तदा स्यात् व्यभिचारोऽपि पौरुषेयगिरां क्वचित्॥
अपौरुषेये वेदे तु पुरुषस्पर्शसंगतः।
कलङ्को न विशङ्क्येत तत्कुतो व्यभिचारिता॥

तस्मात् शब्दस्य पृथक् प्रामाण्यं सिद्धम्।

इति शब्दप्रामाण्यविचारः

अथ शब्दलक्षणविचारः

शब्दजन्या प्रमितिः शाब्दबोध इत्युच्यते। तत्करणतया शब्दः प्रमाणम्। तत्र शब्दस्य प्रामाण्यविषये मतभेदाः पूर्वं निरूपिताः। अथ शब्दलक्षणं विचार्यते।

न्यायसूत्रानुसारेण शब्दलक्षणम्

तत्रभवान् सूत्रकारः "आप्तोपदेशः शब्दः" इति सूत्रेण[१] शब्दस्य लक्षणं प्रोवाच। अत्र 'शब्दः' इति लक्ष्यनिर्देशः। 'आप्तोपदेशः' इति लक्षणम्। 'उपदिश्यतेऽनेनेत्युपदेशः' इति व्युत्पत्त्या आप्तोपदेशशब्देन वाक्यज्ञानं वा तदर्थज्ञानं वा अभिधीयते। आकाङ्क्षायोग्यतासत्तिमत्पदकदम्बकं वाक्यम्, तस्य ज्ञानं, ज्ञायमानं तदित्यर्थः। तत्र वाक्यं ज्ञायमानं प्रमाणमिति पक्षे वाक्यार्थज्ञानं फलम्, पदार्थस्मृत्यादयस्तु आन्तरालिका इतिकर्तव्यताः। तदर्थज्ञानं प्रमाणमिति पक्षे तु हानादिबुद्धिः फलम्। यद्यपि विधिः, उपदेशः, प्रवर्तनमिति पर्यायाः; तथापि अप्रवर्तकभूतार्थपरोपनिषदादिव्यापकत्वात् (तत्राव्याप्तिवारकतया) उत्कृष्टप्रयोजनवद्वचनमात्रम् अत्र उपदेशशब्देन विवक्षितम्। यद्यपि "सदेव सोम्येदमग्र आसीत्" इत्यादिवाक्यं न क्वचित् प्रवर्तयति, कुतश्चिद्वा निवर्तयति पुरुषम्; तथापि पुरुषश्रेयोऽभिधत्ते इति उपदेशशब्देन तद्वाक्यं संगृहीतं भवति। तथापि "चैत्यं वन्देत" इत्यादिवाक्येष्वतिव्याप्तिः, तेषामप्युक्तोपदेशरूपत्वात्। तद्वारणायोक्तम् — आप्तेति। आप्तानाम् = ऋष्यार्यम्लेच्छानाम्, उपदेशः शब्दः; न तु अनाप्तानां मायामोहनिर्मिताः बुद्धर्षभादीनां प्रमाणविरुद्धक्षणिकनैरात्म्यादिवादिनामिति। तथा च भाष्यम्[२] "ऋष्यार्यम्लेच्छानां समानं लक्षणम्" इति। वार्त्तिककारोऽप्याह "आप्तोपदेशः शब्दः, न शब्दमात्रमिति सूत्रार्थः" इति[३]। सूत्रस्थाप्तलक्षणपरं भाष्यम्[४] —

"आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्य आप्तिः, तया प्रवर्तत इत्याप्तः" इति। सुदृढेन प्रमाणेनावधारिताः साक्षात्कृताः धर्माः = हिताहितप्राप्तिपरिहारप्रयोजनाः पदार्थाः, येन स तथोक्तः। तथापि पदार्थतत्त्वं विद्वान् अकारुणिकतया वा अलसतया वा अनुपदिशन्, मत्सरितया वा विपरीतमुपदिशन् आप्तः स्यादित्यत आह — यथादृष्टस्यार्थस्य

---

[१] न्या.सू. १.१.७.
[२] न्या.भा.१.१.७, पृ. ३६५.
[३] न्या.वा.१.१.७, पृ. ३६५.
[४] न्या.भा. पृ. ३६५.

चिख्यापयिषया प्रयुक्त इति। 'यथादृष्टस्य' इत्यनेन मत्सरितया विपरीतोपदेष्टुर्व्युदासः। 'चिख्यापयिषया' इत्यनेन अकृपास्वार्थकामत्वयोर्निरासः। 'प्रयुक्तः' इत्यस्य उत्पादितप्रयत्न इत्यर्थः। अनेनालसत्वनिरासः। तथापि स्थानकरणपाटवाभावेन वर्णनिष्पादनासमर्थस्य आप्तत्वं स्यात्, अत- उपदेष्टेति। स्थानकरणपाटववानित्यर्थः।

"मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्" इति सूत्रस्थं[1] "किं पुनराप्तानां प्रामाण्यम्? साक्षात्कृतधर्मता भूतदया यथाभूतार्थचिख्यापयिषेति" इति भाष्यमप्यत्रानुसन्धेयम्। "दर्शनात् ऋषिः, करतलामलकफलवत् साक्षात्कृतत्रैकाल्यवर्तिसकलप्रमेयः। आरात् = दूरात्, यातः पातकेभ्यः इत्यार्यः मध्यमो लोकः। म्लेच्छः प्रसिद्धः। म्लेच्छा अपि हि परिपथमवस्थिताः पान्थानामपहृतसर्वस्वानां मार्गाख्याने हेतुदर्शनशून्याः[2] भवन्त्याप्ताः" इति तात्पर्यटीकाकाराः[3]।

म्लेच्छानामाप्तत्वोपपादकोक्तटीकाव्याख्यानरूपा औदयनी परिशुद्धिः[4] इयम् —

अयमाशयः। द्विविधो हि पुरुषः सर्वज्ञः असर्वज्ञश्चेति। तत्र पूर्वस्य तावत् सत्त्वसाधकात् प्रमाणादेव रागद्वेषमोहविरहसिद्धावनाप्तत्वं निरस्तम्। उत्तरस्यापि ज्ञानेच्छाप्रयत्नस्थानकरणपाटवानि तावदुपदेशमात्रेणैव निश्चीयन्त इति तत्र सर्वेषामविवाद एव। ज्ञानं तु तस्य यथार्थमयथार्थं वा स्यात्। इच्छापि प्रतिपिपादयिषा विप्रलिप्सा वा स्यादिति संदेहोऽवशिष्यते। तत्र "अभ्यासदशापन्नोऽयमर्थोऽस्य" इति सामान्यतो निश्चये भवत्येव तज्ज्ञानस्य यथार्थत्वनिश्चयः, यथा "अभ्यासदशापन्नमिदमरण्यममीषां म्लेच्छानाम्, अतः अस्मिन्नेते मार्गामार्गविभागज्ञाः" इति पान्थानामेवं निश्चयः। विप्रलिप्सा च हेतुदर्शनेन व्याप्ता हेतौ सति स्यात्। स च विप्रलिप्साहेतुः द्विरूपः; स्वोपकारः, परापकारो वा। तत्र तावत् पान्थेषु विमार्गेण प्रतिष्ठमानेषु म्लेच्छादीनां न कश्चित् स्वोपकारः। नापि द्वितीयः, न ह्यनुन्मत्ता अनपकारिणमपकुर्वते। न वा परापकारमात्रं पुरुषार्थः। तथा हि सति सर्वः सर्वमपकुर्यादिति विप्रलिप्सापि निवार्यते। अनभ्यासदशापन्नविषये तु प्रवृत्तिसामर्थ्यात् प्रमाणान्तरसंवादाद्वा मोहविप्रलिप्सयोर्निवृत्तिः।

म्लेच्छा अप्याप्ता भवन्ति यतः (आप्तत्वेन) प्रतीतिगोचराः, ततः कः संदेहो महाधियामार्याणां च तत्त्वावधारण इति अपिशब्दार्थः — इति।

---

[1] न्या.सू. २.१.६८.
[2] हेतुदर्शनशून्याः = अनाप्तत्वहेतुशून्या इत्यर्थः।
[3] ता.टी.१.१.७, पृ. ३६८.
[4] ता.टी.प.१.१.७, पृ. ३७५.

एतावता हिताहितप्राप्तिपरिहारप्रयोजनकपदार्थतत्त्वनिश्चयवन्तः कारुणिकाः अनलसाः अमत्सरिणः स्थानकरणपाटववन्तः आप्ताः इत्याप्तलक्षणमुक्तं भवति। ते च ऋषयः आर्याः म्लेच्छा वा भवितुमर्हन्ति। तेषामुपदेशः = तैः उच्चरितम् आकाङ्क्षायोग्यतासत्तियुक्तपदसमूहात्मकं वाक्यं शब्दः इति शब्दलक्षणमुक्तं भवति।

न्यायमञ्जर्युक्तं शब्दलक्षणम्[१]

"आप्तोपदेशः शब्दः" इति[२] शब्दलक्षणम्। 'उपदेशः शब्दः' इत्युच्यमाने पर्यायमात्रोच्चारणात् अकारके = बोधाजनके, शब्दमात्रे प्रामाण्यप्रसङ्ग इति तन्निवृत्त्यर्थं पूर्वसूत्रात् साध्यसाधनपदमाकृष्यते। 'साध्यसाधनम्' इत्यस्य करणम् इत्यर्थात् अकारके शब्दे नातिव्याप्तिः। तदुपादानेऽपि वीचीतरङ्गन्यायेन शब्दान्तरजनके पूर्वशब्देऽतिव्याप्तिः। अतः प्रत्यक्षसूत्रात् ज्ञानपदस्य, स्मृतिजनकेऽतिप्रसङ्गवारणाय अर्थग्रहणस्य, (अनधिगतार्थपरस्यार्थशब्दस्य), संशयविपर्ययजनकनिराकरणाय च व्यवसायात्मकाव्यभिचारिपदयोरनुवृत्तिः इत्येवम् "अव्यभिचारि व्यवसायात्मकम् अर्थविषयकं च ज्ञानं यतः भवति, स उपदेशः शब्दः" इति फलति। वस्तुतस्तु 'उपदिश्यतेऽनेनेत्युपदेशः' इति उपदेशशब्देनैव अव्यभिचारादिविशेषणकार्थप्रतीतिजनकत्वं लभ्यत इति अनुवृत्त्यादिक्लेशो न कार्यः। अपि च प्रमाणसामान्यलक्षणे अव्यभिचारादिविशेषणसद्भावात् प्रमाणविशेषलक्षणे तद्विशेषणमनावश्यकम्। सामान्यलक्षणविरहिते विशेषलक्षणप्रसक्त्यभावात्। अनाप्तोपदेशेऽतिव्याप्तिवारणाय तु आप्तपदमावश्यकमेव। न चैतिह्यस्य अज्ञातप्रवक्तृकत्वेन आप्तोपदेशरूपत्वाभावात् शब्देऽनन्तर्भावापत्तिरिति वाच्यम्। तत्रापि यथार्थप्रतीतिहेतुत्वेन आप्तोपदेशत्वस्यानुमानात्।

उपदेशशब्दार्थविचारः[३]

'उपदिश्यतेऽनेनेत्युपदेशः' इत्युक्तम्। तत्र उपदिश्यते इत्यस्य कोऽर्थः? अभिधानक्रिया क्रियते इत्यर्थ इति चेत्? केयमभिधानक्रिया नाम? प्रतीतिरिति चेत् — तर्हि प्रतीतिकरणमुपदेशः। तथा च चक्षुरादेरपि प्रतीतिकरणत्वात् उपदेशत्वप्रसङ्गः। न च स्वज्ञानपूर्वकं प्रतीतिकरणमुपदेशः, चक्षुरादिकम् अज्ञायमानं सत् प्रतीतिकरणमिति नातिप्रसङ्गः, शब्दस्तु ज्ञातः सन् प्रतीतिकरणमिति समन्वय इति वाच्यम्। एवमपि धूमादेरपि उपदेशताप्रसङ्गात्। तस्य ज्ञातस्य सतः वह्न्यादिप्रतीतिकरणत्वात्।

---

[१] न्या.मं, आ.३.भा.१. पृ. ३९६.
[२] न्या.सू. १.१.७.
[३] न्या.मं, आ.३.भा.१. पृ. ३९८.

अत्रोच्यते। श्रोत्रग्राह्यवस्तुकरणिका तदर्थप्रतीतिरभिधानक्रिया, तत्करणभूतं श्रोत्रग्राह्यं वस्तु शब्दप्रमाणम्। लोके तथैव व्यवहारात्। "उक्तः" "अभिहितः" इति च स एवार्थो लोके व्यपदिश्यते, यः श्रोत्रग्राह्यवस्तुकरणकप्रतीतिविषयतां प्राप्तः। श्रोत्रग्राह्यस्य वर्णराशेरेवार्थप्रतीतिकरणत्वात्। न तु श्रोत्रजन्यज्ञानाविषयः स्फोटात्मा शब्दः। श्रोत्रग्रहणे ह्यर्थे शब्दशब्दः प्रसिद्धः। "यतोऽर्थप्रतीतिः स शब्दः" इति तूच्यमाने धूमादिरपि शब्दः स्यात्। अगृहीतसंबन्धे शब्दे च शब्दत्वं न स्यात्, अर्थप्रतीतेरकरणात्। वस्तुतस्तु अर्थप्रतीतिकरणस्वरूपयोग्यताविवक्षणे नायं पश्चिमो दोषः। श्रोत्रग्राह्यवस्तुकरणकार्थप्रतीतिकरणत्वस्य शब्दलक्षणत्वेऽपि अगृहीतसंबन्धे शब्दे स्वरूपयोग्यताघटनयैव लक्षणस्य संगमनीयत्वात्।

आप्तलक्षणपरभाष्यमित्थं व्याख्यातं जयन्तभट्टेन —

धर्म इत्युपदेष्टव्यः कश्चिदर्थो विवक्षितः।
साक्षात्करणमेतस्य यथार्थमुपलम्भनम्॥

न तु प्रत्यक्षेणैव ग्रहणमिति नियमः, अनुमानादिनिश्चितार्थोपदेशिनोऽप्याप्तत्वानपायात्।

चिख्यापयिषया युक्त इत्युक्ता वीतरागता।
उपदेष्टेत्यनेनोक्तं प्रतिपादनकौशलम्॥
तस्य च प्रतिपाद्येऽर्थे वीतरागत्वमिष्यते।
सर्वथा वीतरागस्तु पुरुषः कुत्र लभ्यते॥
ऋष्यार्यम्लेच्छसामान्यं वक्तव्यं चाप्तलक्षणम्।
एवं हि लोकेऽप्याप्तोक्त्या व्यवहारो न नङ्क्ष्यति॥ इति[१]।

येऽप्याप्तिं दोषक्षयमाचक्षते तैरपि दोषक्षयः प्रतिपाद्यार्थेष्वेव वर्णनीयः। अन्यथा लोके दृश्यमानस्य "अयमाप्तोक्तः" इति व्यवहारस्य निह्नवः स्यात्।

अथ वा वेदप्रामाण्यसिद्ध्यर्थत्वाच्छास्त्रस्य, तत्प्रणेतुः आप्तस्य ईश्वरस्य यथाश्रुतमेवेदं लक्षणम्। स हि साक्षात्कृतधर्मा, धर्मस्येश्वरप्रत्यक्षगोचरत्वात्। चिख्यापयिषाप्रयुक्त इति। कारुणिक एव भगवान्, उपदेष्टा च, वेदाद्यागमानां तत्प्रणीतत्वात्। वीतरागता = स्वार्थकामनाराहित्यम्। प्रतिपादनकौशलं = करणादिपाटवम्। वीतरागोऽपि मूकादिरुपदेष्टुमशक्तः किं कुर्यात्? वक्तुं शक्तोऽपि साक्षात्कृतधर्मापि अवीतरागो न वक्ति, तूष्णीमास्त इति। वीतरागः = प्रतिपाद्यार्थविषयकपक्षपातरहित इत्यप्याहुः।

---

[१] न्या.मं, आ.३.भा.१. पृ. ४००.

न्यायभूषणोक्तं शब्दलक्षणम्[१]

न्यायसारे भासर्वज्ञः "समयबलेन सम्यक्परोक्षानुभवसाधनमागमः" इति शब्दलक्षणं प्रोवाच। "समयबलेन" इत्यस्य संकेतज्ञानसहकारेणेत्यर्थः। तेन अविनाभावबलेन परोक्षानुभवसाधनेऽनुमाने नातिव्याप्तिः। समयबलेन संशय-विपर्ययसाधने शब्दप्रमाणलक्षणातिव्याप्तिवारणाय सम्यक्पदम्। "सविकल्पक-प्रत्यक्षव्यवच्छेदार्थं परोक्षग्रहणम्" इति न्यायभूषणम्। परं तु सविकल्पक-प्रत्यक्षसाधने संकेतग्रहसहकारविरहादेव अतिव्याप्तिवारणसंभवादिदं चिन्त्यम्। वस्तुतस्तु चेष्टादिना संकेतपूर्वकं यत्र प्रत्यक्षं, तत्रातिप्रसङ्गवारणाय तदिति उपरि स्पष्टं भविष्यति।

ननु "आप्तोपदेशः शब्दः" इति हि सूत्रोक्तं[२] शब्दलक्षणम्, कथं तद्विरुद्धतया "समयबलेन" इत्यादिलक्षणमुच्यत इति चेत् — न। तत्सूत्रस्याप्यस्मिन्नेव लक्षणे तात्पर्यात्। तथा हि — 'उपदिश्यतेऽनेनेत्युपदेशः' इति समयापेक्षमर्थप्रतीतिसाधन-मुच्यते। न हि प्रत्यक्षादनुमानाद्वा अवगतोऽर्थः "उपदेशतः प्रतिपन्नः" इत्युच्यते। नापि संदिग्धो वा विपर्यस्तो वार्थः "उपदिष्टः" इत्युच्यते।

अथ वा प्रत्यक्षसूत्रात् अव्यभिचारिव्यवसायात्मकपदयोः इहाप्यनुवृत्तिर्द्रष्टव्या। ततो न संशयविपर्ययसाधनयोरतिव्याप्तिः। एवं चाप्तग्रहणं न लक्षणघटकम्, तद्व्यवच्छेद्याभावात्। किं तु अदृष्टार्थानां वाक्यानां प्रामाण्यसिद्धौ आप्तोक्तत्वं हेतुरिति सूचनार्थं तत्। "अदृष्टार्थानि वाक्यानि प्रमाणानि, आप्तोक्तत्वात्, दृष्टार्थ-वाक्यवत्" इति।

अस्तु वा लक्षणघटकम्। यदा अव्यभिचारिव्यवसायात्मकपदयोरिहानुवृत्ति-र्नेष्यते, उपदेशशब्दश्च मिथ्योपदेशेऽपि दृष्टः, तदा आप्तपदं सार्थकमिति। आप्तो हि अज्ञानरागादिदोषरहित उपदेष्टा गण्यते। तदुपदेशः प्रमाणमेव। तथा चोक्तम्[३] —

"आगमो ह्याप्तवचनमाप्तिं दोषक्षयं विदुः।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसंभवात्॥"

हेत्वसंभवादिति। अज्ञानरागादिरूपहेत्वसंभवादित्यर्थः। म्लेच्छादिवाक्ये अव्याप्त-मिदमिति चेन्न। परापरभेदेन दोषक्षयस्यापि द्विविधत्वात्। तत्रापरस्याप्तस्य आर्य-म्लेच्छादेरपरो दोषक्षयः। प्रतिनियतविषयत्वादज्ञानादिनिवृत्तेः। न्यायमञ्जर्यामप्ययं पक्ष उपन्यस्तः[४] —

---

[१] न्या.भू. पृ. ३७९.
[२] न्या.सू. १.१.७.
[३] मूलं मृग्यमस्य।
[४] न्या.मं, आ.३.भा.१. पृ. ४००.

"येऽप्याप्तिं दोषक्षयमाचक्षते, तैरपि दोषक्षयः प्रतिपाद्यार्थेष्वेव वर्णनीयः। अन्यथा लोके दृश्यमानस्य व्यवहारस्य निह्नवः स्यात्" इति।

परासस्य त्वीश्वरादेः परो दोषक्षयः, तेषां सर्वेष्वप्यर्थेषु अज्ञानादेरत्यन्तविरहात् इति।

अनेन "आप्तत्वं दोषराहित्यम्" इति पक्षसमर्थकेन भूषणेन, "तदनेन 'आप्तिं दोषक्षयं विदुः' इति परेषामाप्तलक्षणमव्यापकमित्युक्तं भवति" इति तात्पर्यटीका-ग्रन्थः[1] खण्डितो भवति। वाचस्पत्यनन्तरकालिकः भूषणकार इत्यत्रेदं प्रमाणम्।

अथ वा आप्तश्चासावुपदेशः आप्तोपदेशः। यथा वक्ता ज्ञानमकुर्वन् संशयं विपर्ययं वा कुर्वन् न लोकेऽप्याप्त उच्यते, किं त्वविपरीतमर्थं निश्चाययन्नेव आप्तः प्रसिद्धः, तथा शब्दोऽप्यविपरीतमर्थनिश्चयं कुर्वन् "आप्तः" इत्युच्यते। नन्वेवम् "आप्तवाक्" इति लघु लक्षणं कर्तव्यम्। न। अशब्दात्मकस्य चेष्टादेर-संग्रहप्रसङ्गात्। उपदेशग्रहणे तु संकेतपूर्वकेण अङ्गुलिचेष्टादिनापि येनार्थ उप-दिश्यते तत्सर्वं शब्दाख्यं प्रमाणं लभ्यते। स्मृतिप्रत्यक्षव्यवच्छेदोऽप्यत एव लभ्यते। न हि शब्दश्रवणानन्तरं स्मृतोऽर्थः सविकल्पकप्रत्यक्षोपलब्धो वा क्वचिदाप्तेनोपदिष्ट इति प्रसिद्धिरस्ति। तस्मात् "समयबलेन सम्यक्परोक्षानु-भवसाधनमागमः" इत्ययमेव सूत्रस्यार्थ इति न्यायभूषणकारः।

तात्पर्यटीकापरिशुद्धौ भूषणोक्तलक्षणदूषणम्

तदेतत् भूषणकारोक्तं लक्षणमनूद्य तात्पर्यटीकापरिशुद्धावुदयनाचार्यैः दूषितम्[2]। तत्तथैव यथासंभवं शब्दतोऽर्थतश्चानूद्यते।

तत्र "समयबलेन सम्यक्परोक्षानुभवसाधनं शब्दः" इत्येके[3]। 'समयबलेन' इत्यनेन अनुमानम्, 'सम्यक्' इत्यनेन शब्दाभासः, 'परोक्ष' इत्यनेन सविकल्पक-प्रत्यक्षम्, 'अनुभव' इत्यनेन पदार्थस्मरणं निरस्यते, साधनपदेन कर्तृकर्मणी निरस्येते। अपरे तु चेष्टायामपि गतमेतदित्यतिव्यापकं मत्वा 'शब्दत्वसमवाये सति' इति विशेषणान्तरं प्रक्षिपन्ति।

अत्र प्राच्यानां भूषणकाराणामयमाशयः — यदि चेष्टा न प्रमाणम्, तर्हि तत्रातिव्याप्त्यप्रसङ्गात् किं 'शब्दत्वसमवाये सति' इत्यनेन। प्रमाणं चेत्, तस्याः प्रत्यक्षादिषु अनन्तर्भावे पञ्चमप्रमाणस्वीकारप्रसङ्गः। तस्मात् शब्दे एव चेष्टायाः

---

[1] ता.टी.१.१.७, पृ. ३६१.

[2] ता.टी.प. १.१.७, पृ. ३७२-३७३.

[3] न्यायभूषणकाराः।

प्रवेशः, समयबलादस्य प्रवृत्तेः। चेष्टापि हि शब्दवत् संकेतबलेनैवार्थं बोधयति। शब्दे एव शब्दशब्दप्रयोगः प्राचुर्यात्, चाक्षुषे ज्ञाने दर्शनव्यवहारवत् — इति।

एतत् भूषणमतं न युक्तम्। चेष्टा हि अभिप्रायस्थशब्दस्मरणमात्रोपयोगिनी लिपिवत्, नार्थबोधिका। चेष्टया स्मृतः शब्द एवार्थबोधकः सन् प्रमाणम्। न च शब्दस्मरणमस्याः अर्थबोधनेऽवान्तरव्यापारः, शब्दस्यार्थस्मृतिवत् इति वाच्यम्। यदि चेष्टामन्तरेणावगतोऽपि शब्दो नार्थं गमयेत्, तदैवं वक्तुं शक्येत। न चैवमस्ति।

नन्वेवं सति चेष्टया मूकबधिरादीनामर्थबोधानुपपत्तिः, तेषां संकेतग्रहाभावेन शब्दस्मृत्यभावात् इति चेत् — तान् प्रति शब्द इवार्थेऽपि चेष्टायाः कुण्ठत्वमेव। अन्धबधिरादीनां चेष्टया प्रवृत्तिनिवृत्ती तु अभिप्रायानुमानादेव। अतश्चेष्टा न प्रमाणम्। अत एव सूत्रकारः संभावितप्रामाण्यमैतिह्यादिकं यथायथं चतुर्षु अन्तर्भावयन् चेष्टा-अपभ्रंश-लिपि-पदैकदेश-ध्वनीन् सांव्यवहारिकानप्यकीर्तयन् तेषां प्रामाण्यं नानुमन्यते। अतस्तस्य शब्दप्रमाणेऽन्तर्भावकथनं न योयुज्यते इति।

मण्युक्तं शब्दप्रमाणलक्षणम्[१]

मणिकारास्तु शब्दखण्डारम्भे — "अथ शब्दो निरूप्यते। प्रयोगहेतुभूतार्थ-तत्त्वज्ञानजन्यः शब्दः प्रमाणम्" इति शब्दप्रमाणस्य निरूपणीयतया प्रतिज्ञातस्य लक्षणमाहुः। प्रयोगहेतुभूतं = प्रयोगकारणीभूतं, यत् अर्थतत्त्वज्ञानम् = अर्थविषय-कतत्त्वज्ञानम्, तज्जन्यः प्रमाणं शब्दः इत्यन्वयः। 'प्रमाणं शब्दः' इति लक्ष्यनिर्देशः। अन्यथा शब्दशब्दस्य लक्षणान्तर्गतत्वे प्रमाणसामान्यस्य लक्ष्यत्वापत्तौ अर्थान्त-राव्याप्ती प्रसज्येयाताम्। अर्थान्तरम् = अनाकाङ्क्षिताभिधानम्। प्रमाणसामान्यस्य लक्ष्यत्वे अनाकाङ्क्षितस्य शब्दातिरिक्तप्रमाणस्य अभिधानापत्तिः। एवं प्रमाण-सामान्यान्तर्गतप्रत्यक्षादौ प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यशब्दत्वाभावात् अव्याप्तिः। 'प्रमाणम्' इति लक्ष्यविशेषणानुपादाने शब्दसामान्यस्य लक्ष्यत्वे ध्वन्यात्मकशब्दे अव्याप्तिः। अत्रायं क्रमोऽभिप्रेतः — प्रथमतो येन केनापि प्रमाणेन वक्तु-र्वाक्यार्थज्ञानम्, ततो वाक्यार्थज्ञानज्ञानम्, ततः "परस्य वाक्यार्थज्ञानं भवतु" इति वाक्यार्थबुबोधयिषा, ततो वाक्यार्थज्ञानरूपेष्टसाधनताज्ञानात्[२] वाक्ये इच्छा, ततो वाक्यरूपेष्टसाधनताज्ञानात्[३] कृतिसाध्यताज्ञानसहकृतात् कण्ठाभिघातादौ चिकीर्षा, ततः कण्ठाभिघातादिसाधिका कण्ठाद्युपादानकप्रवृत्तिः, ततः कण्ठादिचेष्टा-विभागादिक्रमेण कण्ठाभिघाताद्युत्पत्तिः, ततो वाक्योत्पत्तिरिति। अनया च

---

१ त.चिं.म, च.भा.प्र.प. पृ. १.

२ "वाक्यार्थज्ञानरूपं यदिष्टं तत्साधनं वाक्यम्" इत्याकारकज्ञानात् इत्यर्थः।

३ "वाक्यरूपं यदिष्टं तत्साधनं कण्ठाभिघातादिः" इत्याकारकज्ञानात् इत्यर्थः।

प्रणाल्या प्राचां नये परंपरया वक्तृगतवाक्यार्थबुबोधयिषापूर्वकवाक्यत्वावच्छिन्नं प्रति वक्तृवाक्यार्थज्ञानस्य हेतुतया सर्वेषु प्रमाणभूतेषु वाक्येषु लक्षणं संगमनीयम्।

"वह्निना सिञ्चति" इत्यप्रमाणशब्देऽतिव्याप्तिवारणाय 'तत्त्व' इति। यथार्थेत्यर्थः।

'प्रयोगहेतुभूत' इति विशेषणस्य प्रयोजनम्

ननु 'प्रयोगहेतुभूत' इति ज्ञाने विशेषणं व्यर्थम्। न हि प्रयोगाहेतुभूतेनापि ज्ञानेन शब्दो जन्यते, यदिदं व्यावर्तयेत्। 'शब्दाहेतुभूतम्, अथ च शब्दं जनयति' इति वदतो व्याघातात्। किं च अर्थपदमपि व्यर्थम्, अर्थत्वस्य ज्ञानविषयत्वरूपस्य केवलान्वयितया ज्ञानमात्रस्यैवार्थविषयकत्वेनाव्यावर्तकत्वात्। उच्यते। इदं हि न प्रमाणशब्दसामान्यलक्षणम्। शब्दमात्रस्यैव प्रमाणत्वेन साकाङ्क्षशब्दत्वस्य शब्दत्वस्य वा तल्लक्षणत्वात्। "वह्निना सिञ्चति" इत्यस्यापि किंचिदर्थे प्रमाणत्वेन 'अर्थतत्त्व' इत्यादेर्व्यर्थत्वापत्तेश्च। किं तु यस्मिन्नर्थे यद्वाक्यं प्रमाणं तस्यैव तत् लक्षणम्। तथा च 'तद्विशेष्यकतत्संसर्गकतत्प्रकारकयथार्थज्ञानजन्यो यः, सः तद्विशेष्यकतत्संसर्गकतत्प्रकारकप्रमाजनकः शब्दः' इत्यर्थः। एतल्लाभायैवार्थपदम्। "वह्निना सिञ्चति" इत्याद्ययोग्यवाक्यस्य सेके वह्निकरणकत्वांशे प्रमाणत्ववारणाय 'यथार्थ' इति। तादृशज्ञानजन्यसंस्कारेच्छादावतिव्याप्तिवारणाय 'प्रयोगहेतुभूत' इति जन्यविशेषणम्। प्रयोगहेतुभूतत्वं च वर्णसामग्रीजन्यत्वम्। 'प्रयोगस्य = वर्णस्य, हेतुः = सामग्री, ततो भूतः = उत्पन्नः' इति व्युत्पत्तेः। तथा च वर्णसामग्रीजन्यत्वे सति निरुक्ततत्त्वज्ञानजन्यत्वं निरुक्तप्रमाणशब्दत्वमिति लक्षणं फलितम्। संस्कारेच्छादिश्च न वर्णसामग्रीजन्यः, इतरसामग्र्याः इतरत्राजनकत्वात् इति नातिव्याप्तिः। ध्वनिवारणाय शब्दत्वमपहाय वर्णत्वोपादानम्।

शब्दलक्षणस्य न्यायसूत्राल्लाभप्रकारः

'प्रयोगहेतुभूत' इत्यादिमणिकृदुक्तशब्दप्रमाणलक्षणस्य न्यायसूत्राल्लाभप्रकारः न्यायकौस्तुभे[१] प्रदर्शितः —

तत्र आप्तोपदेशः शब्दः। तत्र आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान्, तस्योपदेशः तज्जन्योपदेशः। विशिष्टजन्यत्वं च विशेष्यस्याव्यावर्तकतया विशेषणजन्यत्वपर्यवसन्नम्। तथा च प्रकृतवाक्यार्थयथार्थज्ञानजन्यशब्दत्वं लक्षणं फलितम्। अत एव तदनुसारिणा मणिकृतापि "प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्" इत्युक्तम्। अस्यार्थः — प्रयोगहेतुभूतं यत् अर्थतत्त्वज्ञानं = प्रमारूपमर्थज्ञानं, तज्जन्यत्वम्। तथा चोक्त एवार्थः — इति।

---

[१] न्या.कौ. पृ. ७.

माथुर्यां 'प्रयोगहेतुभूत' इत्यस्य व्याख्यानम्[१]

केचित्तु — 'प्रयोगो हेतुभूतो यस्य' इति व्युत्पत्त्या 'प्रयोगाद्धेतोरुत्पन्नम्' इति व्युत्पत्त्या वा प्रयोगहेतुभूतपदं शाब्दत्वरूपजातिविशेषविशिष्टपरम्। 'तादृशं यत् अर्थतत्त्वज्ञानं तदेव जन्यं यस्य' इति रीत्या शाब्दप्रमाकरणत्वं लक्षणं पर्यवसितम्। अर्थपदं च स्वरूपकथनम्। न चैवं लक्ष्यतावच्छेदकलक्षणयोरभेद इति वाच्यम्। लक्ष्यप्रविष्टस्य विलक्षणप्रमाकरणत्वस्य लक्षणेऽनिवेशात्, लक्ष्यप्रविष्टं प्रमाकरणत्वं सामान्यभूतम्, लक्षणप्रविष्टं तु शाब्दप्रमाकरणत्वरूपविशेषात्मकम् इति भेदः। तयोरभेदेऽपि क्षतिविरहाच्च। प्रमात्वं च पूर्ववत् तत्तत्संसर्गकतत्तत्पदार्थघटितं बोध्यम् — इति प्राहुः।

शब्दलक्षणस्य मौनिश्लोकेऽव्याप्तिवारणम्

ननु मौनिश्लोकेऽव्याप्तिः। यदा कदाचित् येन केनचित् क्रमव्युत्क्रमोच्चरितानामेव तत्तत्पदानां मौनिनार्थक्रमेणानुसन्धीयमानानां मौनिश्लोकत्वम्। तत्र च यस्मिन्नर्थे यदर्थांशे प्रमाणशब्दत्वं तदर्थविशेष्यकतदर्थप्रकारकयथार्थज्ञानजन्यत्वं नास्ति। तादृशज्ञानवता मौनिना अनुच्चरितत्वात्, उच्चारकस्य च तादृशज्ञानाभावात् इति। एवं यत्र वक्त्रा यदर्थबुबोधयिषया वाक्यमुच्चरितं, श्रोत्रा तात्पर्यभ्रमेण लक्षणादिना वा तदितरयोग्यार्थोऽवगतः, तत्र श्रोतुरवगतार्थे तद्वाक्यस्याप्रामाण्यापत्तिः, तद्विशेष्यकतत्प्रकारकज्ञानजन्यत्वाभावात्। एवं शुकाद्युच्चरिते "पयसा सिञ्चति" इत्यादिवाक्येऽव्याप्तिः। शुकादेः प्रकृतवाक्यार्थानभिज्ञतया, "इदं वाक्यं सुखसाधनम्" इति सुखसाधनताज्ञानादेव तेन तद्वाक्यप्रयोगादिति चेत् — न। तेषामपि ईश्वरीयतादृशज्ञानजन्यतया लक्षणसमन्वयात्।

रुचिदत्तीयं शब्दलक्षणस्य व्याख्यानम्[२]

'प्रयोगहेतुभूत' इत्यादिशब्दप्रमाणलक्षणव्याख्यानावसरे रुचिदत्तमिश्राः प्राहुः —

अत्रार्थतत्त्वज्ञानं वाक्यार्थतत्त्वज्ञानम्। तथा चान्यवाक्यार्थतत्त्वज्ञानरूपपरमेश्वरज्ञानजन्यतया अयोग्ये शब्देऽतिव्याप्तिवारणाय 'प्रयोगहेतुभूत' इति विशेषणम्। तदर्थस्तु प्रयोगहेतुतावच्छेदकावच्छिन्नत्वम्। तथा च स्वसमानविषयकवाक्यार्थज्ञानत्वेन तद्धेतुत्वात्, वाक्यार्थज्ञानत्वं यत्र जनकतावच्छेदककोटिप्रविष्टम्, तादृशतत्त्वज्ञानजन्यत्वं पर्यवस्यति। एवं च नोक्तातिप्रसङ्गः। ईश्वरज्ञानस्य तेन रूपेण तत्राजनकत्वात्।

---

[१] त.चिं.म.व्या.माथुरी. च.भा.प्र.प. पृ. १३.
[२] तत्त्वचिन्तामणिव्याख्या प्रकाशः. पृ. १.

यद्वा स्वार्थज्ञानत्वेन प्रयोगहेतुत्वात् स्वार्थतत्त्वज्ञानजन्यत्वमेव विवक्षितमिति नोक्तदोषः।

स्वार्थत्वं च स्वप्रतिपाद्यवाक्यार्थत्वम्। तेन "घटः कर्मत्वमानयनं कृतिः" इति निराकाङ्क्षे, अत एव वाक्यार्थज्ञानजननस्वरूपयोग्यतारहिते नातिव्याप्तिः। स्वरूपयोग्यस्य च तस्य संग्राह्यत्वमेव। प्रमाणशब्दत्वेन प्रमाजननस्वरूपयोग्यस्यैव लक्ष्यत्वात्। एवमनासन्नादेरपि स्वरूपयोग्यत्वात्संग्राह्यत्वमेव।

केचित्तु — काकाक्षिगोलकन्यायेन लक्षणेऽपि शब्दपदं ज्ञानजननस्वरूपयोग्यशब्दपरम्। तेन स्वरूपायोग्यनिरासः। तावन्मात्रं चायोग्येऽपीति पूर्वदलम्। न च तथापि तत्त्वपदमफलम्, स्वार्थाभावादेव तत्राप्रसङ्गादिति वाच्यम्। स्वज्ञाप्यस्यैव स्वार्थत्वात्, तस्य च तत्रापि सत्त्वात् — इत्याहुः।

केचित्तु — प्रयोगो हेतुभूतो ज्ञापको यस्यार्थस्य, तत्तत्त्वज्ञानजन्यत्वं तत् — इत्याहुः।

नव्यास्तु — प्रमाणशब्दव्यवहारार्थमिदं लक्षणम्। योग्येऽप्याकाङ्क्षारहिते प्रमाजनके शब्दे तान्त्रिकाणां तदव्यवहारात् तस्यासंग्राह्यत्वमेव। एवं चाकाङ्क्षासत्त्याद्युपेतपदकदम्बकात्मकवाक्यरचना प्रयोगः, तद्धेतुभूतं तज्जननानुकूलसहकारिविशिष्टं, यत् स्वार्थतत्त्वज्ञानं तज्जन्यशब्दत्वं लक्षणम्। अत एवाकाङ्क्षायोग्यतासत्तिमान् शब्दः प्रमाणमित्याहुः — इति।

तर्कभाषायां शब्दलक्षणम्[१]

आप्तवाक्यं शब्दः। आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा पुरुषः। वाक्यं तु आकाङ्क्षायोग्यतासंनिधिमतां पदानां समूहः। अतो "गौरश्वः पुरुषो हस्ती" इति पदानि न वाक्यम्, परस्पराकाङ्क्षाविरहात्। "अग्निना सिञ्चेत्" इत्यपि न वाक्यम्, योग्यताविरहात्। न ह्यग्निसेकयोः परस्परमन्वययोग्यतास्ति। तथा हि — "अग्निना" इति तृतीयया सेकरूपं कार्यं प्रति करणत्वमग्नेः प्रतिपादितम्। न चाग्निः सेके करणीभवितुं योग्यः। तेन कार्यकारणभावलक्षणसंबन्धेऽग्निसेकयोरयोग्यत्वात्। अतः "अग्निना सिञ्चेत्" इति न वाक्यम्। एवमेकैकशः प्रहरे प्रहरेऽसहोच्चारितानि "गामानय" इत्यादिपदानि न वाक्यम्। सत्यामपि परस्पराकाङ्क्षायां, सत्यामपि परस्परान्वययोग्यतायां परस्परसांनिध्याभावात्। यानि तु साकाङ्क्षाणि योग्यतावन्ति संनिहितानि पदानि तान्येव वाक्यम्। यथा "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादि। यथा च "नदीतीरे पञ्च फलानि सन्ति" इति। यथा च तान्येव "गामानय" इत्यादिपदानि अविलम्बितोच्चारितानि।

---

[१] त.भा. पृ. ४७.

नन्वत्रापि न पदानि साकाङ्क्षाणि, किं तु अर्थाः। फलादीनामाधेयानां तीराद्याधाराकाङ्क्षित्वात्। न च विचार्यमाणेऽर्था अपि साकाङ्क्षाः। आकाङ्क्षायाः इच्छात्मकत्वेन चेतनधर्मत्वात्।

सत्यम्। अर्थास्तावत् स्वपदश्रोतरि अन्योन्यविषयाकाङ्क्षाजनकत्वेन साकाङ्क्षा इत्युच्यन्ते। तद्द्वारेण तत्प्रतिपादकानि पदान्यपि साकाङ्क्षाणीत्युपचर्यन्ते। यद्वा पदान्येवार्थान् प्रतिपाद्य अर्थान्तरविषयाकाङ्क्षाजनकानीत्युपचारात् साकाङ्क्षाणि। एवमर्थाः साकाङ्क्षाः परस्परान्वययोग्याः तद्द्वारेण पदान्यपि परस्परान्वययोग्यानीत्युच्यन्ते। संनिहितत्वं तु पदानामेकेनैव पुंसा अविलम्बेनोच्चरितत्वम्। तच्च साक्षादेव पदेषु संभवति, न अर्थद्वारा।

तेनायमर्थः सम्पन्नः — अर्थप्रतिपादनद्वारा श्रोतुः पदान्तरविषयाम् अर्थान्तरविषयां वा आकाङ्क्षां जनयतां प्रतीयमानपरस्परान्वययोग्यार्थप्रतिपादकानां संनिहितानां पदानां समूहो वाक्यम्।

पदं च वर्णसमूहः। समूहश्चात्र एकज्ञानविषयीभावः। एवं च वर्णानां क्रमवतामाशुतरविनाशित्वेन एकदा अनेकवर्णानुभवासंभवात् पूर्वपूर्ववर्णाननुभूय अन्त्यवर्णश्रवणकाले पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतेनान्त्यवर्णसंबन्धेन पदव्युत्पादनसमयग्रहानुगृहीतेन श्रोत्रेण एकदैव सदसदनेकवर्णावगाहिनी पदप्रतीतिर्जन्यते, सहकारिदार्ढ्यात्, प्रत्यभिज्ञानवत्। प्रत्यभिज्ञानप्रत्यक्षे ह्यतीतापि पूर्वावस्था स्फुरत्येव। ततः पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेन अन्त्यपदविषयेण श्रोत्रेन्द्रियेण पदार्थप्रत्ययानुगृहीतेन अनेकपदावगाहिनी वाक्यप्रतीतिः क्रियते।

तदिदं वाक्यमाप्तपुरुषेण प्रयुक्तं सत् शब्दनामकं प्रमाणम्। फलं त्वस्य वाक्यार्थज्ञानम्। तच्चैतच्छब्दलक्षणं प्रमाणं लोके वेदे च समानम्। लोके त्वयं विशेषः यःकश्चिदेवाप्तो भवति, न सर्वः। अतः किंचिदेव लौकिकं वाक्यं प्रमाणम्, यत् आप्तवक्तृकम्। वेदे तु परमाप्तश्रीमहेश्वरेण कृतं सर्वमेव वाक्यं प्रमाणं सर्वस्यैवाप्तवाक्यत्वात्।

तर्कसंग्रह-तद्व्याख्यानेषु शब्दलक्षणम्

तर्कसंग्रहे[1] तु — "आप्तवाक्यं शब्दः" इत्युक्तम्। आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम्। प्रमाणशब्दत्वं लक्ष्यतावच्छेदकम्। वाक्यत्वमात्रोक्तावनाप्तोच्चरितवाक्येऽतिव्याप्तिः। अत आप्तोच्चरितत्वनिवेशः। तावन्मात्रोक्तौ निरर्थकजबगडदशादावतिव्याप्तिः, अतो वाक्यत्वं निवेशितम्। आप्तत्वं च प्रयोगहेतुभूतयथार्थ-

[1] त.सं, शब्दपरिच्छेदे, पृ. ६५.

ज्ञानवत्त्वम्। तथा च प्रयोगहेतुभूतयथार्थज्ञानजन्यशब्दत्वमिति पर्यवसन्नार्थः इति न्यायबोधिनी[१]। इयं मणिच्छायामनुकरोति।

तर्कसंग्रहव्याख्यायां वाक्यवृत्तौ[२] तावत् — यथार्थवक्तेति। प्रकृतवाक्यार्थविषयकयथार्थशाब्दबोधविषयकतात्पर्यवानित्यर्थः। तथा चैतादृशतात्पर्यजन्यवाक्यत्वं प्रमाणशब्दत्वं पर्यवसितम्। वाक्यं प्रति वाक्यार्थबुबोधयिषायाः कारणत्वात् — इत्युक्तम्।

तर्कसंग्रहदीपिकाव्याख्यायां नीलकण्ठप्रकाशिकायाम्[३] — मूले आप्तवाक्यं शब्दः इति। शब्द इति लक्ष्यनिर्देशः। प्रमाणशब्द इति तदर्थः। आप्तवाक्यमिति लक्षणम्। भवति हि "पयसा सिञ्चति" इत्यादिशब्दः आप्तोक्तवाक्यम्। न तु "वह्निना सिञ्चति" इत्यादिशब्दः, तदुच्चारणकर्तुः यथार्थवक्तृत्वरूपाप्तत्वाभावात्। प्रकृतवाक्यार्थगोचरयथार्थज्ञानजन्यवाक्यं प्रमाणशब्दः इति तु निष्कर्षः। वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात् लक्षणसंगतिः। स्फुटमेतत् शब्दमणौ — इत्युक्तम्।

तर्कसंग्रहदीपिकाव्याख्यायां नृसिंहप्रकाशिकायां[४] तु — आप्तवाक्यम् इति। आप्तोच्चरितवाक्यमित्यर्थः। शब्द इति। शब्दप्रमाणमित्यर्थः। इदं च ज्ञायमानशब्दस्य प्रमाणत्ववाद्याचार्यमतानुसारेण। सिद्धान्ते तु वाक्यज्ञानं शब्दप्रमाणम्। एतेन वाक्याभावेऽपि मौनिकर्तृकलिप्यादिज्ञानजन्यवाक्यज्ञानात् शाब्दबोधोत्पत्त्या व्यतिरेकव्यभिचारेण वाक्यस्य शब्दप्रमाणत्वं न संगच्छत इति दूषणमपास्तम्। यथार्थवक्तेति। प्रकृतार्थप्रमातैवेत्यर्थः। तादृशप्रमातृकर्तृकवाक्यत्वं शब्दप्रमाणलक्षणमिति भावः। अत्र तादृशप्रमातृकर्तृकवाक्यत्वापेक्षया प्रकृतवाक्यार्थविषयकप्रमाजन्यवाक्यत्वस्य लघुतया तस्यैव शब्दप्रमाणलक्षणत्वमुचितम्। वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वाल्लक्षणसंगतिः — इत्युक्तम्।

तर्कसंग्रहदीपिकाव्याख्याने रामरुद्रीये[५] — आप्तवाक्यम् इति। वाक्यज्ञानमित्यर्थः। तेन मौनिश्लोकादौ वाक्यविरहेऽपि शाब्दबोधोत्पत्त्या वाक्यस्य शाब्दबोधकारणत्वासंभवेऽपि न क्षतिः, तत्रापि वाक्यानुमानेन वाक्यज्ञानसत्त्वात्। अनाप्तोच्चरितत्वप्रकारकवाक्यज्ञानेऽतिव्याप्तिवारणाय आप्तपदनिवेशनम्। तथा च "इदमाप्तोच्चरितम्" इत्याकारकम् आप्तोच्चरितत्वप्रकारकवाक्यविशेष्यकज्ञानं शब्द-

---

[१] न्या.बो. पृ. ६५.
[२] वा.वृ,शब्दपरिच्छेदे, पृ. ६५.
[३] नी.प्र, शब्दखण्डे. पृ. ३१३.
[४] नृ.प्र, शब्दखण्डे, पृ. ३१३.
[५] रा.रु, शब्दखण्डे, पृ. ३१३.

प्रमाणमित्यर्थः। आप्तश्च यथार्थवक्ता = प्रकृतवाक्यार्थविषयकयथार्थज्ञानप्रयोज्यशब्दोच्चारणकर्ता। तद्वाक्यं = तदुच्चरितवाक्यम्। अत्र च प्रकृतवाक्यार्थज्ञाने यथार्थत्वं च सर्वांशे भ्रमभिन्नत्वम्। तेन "वह्निना सिञ्चति" इति वाक्यजन्यज्ञानस्य किंचिदंशे प्रमात्वेऽपि न क्षतिः — इत्याद्युक्तम्।

शब्दशक्तिप्रकाशिकोक्तं शब्दलक्षणम्

मङ्गलश्लोकव्याजेन शब्दप्रमाणलक्षणमपि सूचितं जगदीशतर्कालंकारैः शब्दशक्तिप्रकाशिकायाम्[1] —

"अनुभवहेतुः सकले सद्यः समुपासिता मनुजे।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी॥"

इति। अनेन अनुभवजनकसाकाङ्क्षासन्नयोग्यपदसमूहात्मकं ज्ञायमानं वाक्यं शब्दप्रमाणमिति लक्षणं सूचितं भवति।

मीमांसाशास्त्रोक्तं शब्दप्रमाणलक्षणम्

"औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः..." इति सूत्रे[2] प्रत्यक्षादिषट्प्रमाणानां लक्षणं वदन् भाष्यकारः शब्दप्रमाणलक्षणकथनावसरे शब्दविशेषस्य शास्त्रस्य लक्षणमुक्तवान्[3] —

"शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानम्" इति। शास्त्रशब्देनात्र पंकजादिपदवत् योगरूढ्या धर्माधर्मोपदेशीनि चतुर्दश अष्टादश वा विद्यास्थानान्युच्यन्ते। 'शब्दविज्ञानात्' इत्यत्र शब्दशब्देन सामान्यवाचिना प्रकृतत्वात् चोदना अभिधीयते। अर्थशब्देन धर्माधर्मावभिधीयेते। ततश्चायमर्थः — 'चोदनात्मकशब्दविज्ञानात् प्रमाणान्तरागम्यधर्माधर्मविषयकज्ञानजनकं शास्त्रम्' इति। प्रमाणान्तरागम्यधर्माधर्मविषयकज्ञानजनकज्ञानविषयत्वे सति चोदनात्वं शास्त्रलक्षणमिति फलितम्। शास्त्रपदम् अपनीय शब्दपदनिक्षेपे शास्त्रतदितरशब्दसामान्यलक्षणमपि लभ्यते भाष्यात्। तथा हि —

"असंनिकृष्टवाचा च द्वयमत्र जिहासितम्॥
ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वा।"

इति वार्त्तिकोक्तरीत्या[1] भाष्यस्थेन असंनिकृष्टपदेन प्रमाणान्तराप्राप्तत्वमबाधितत्वं चोच्यते। एवं च यः शब्दः स्वविषयकज्ञानेन मानान्तराप्राप्ताबाधितार्थज्ञानं जनयति

[1] श.श.प्र.२.
[2] जै.सू.१.१.५.
[3] शा.भा.१.१.५, भा.१.पृ. ४४.

स शब्दप्रमाणमित्युक्तं भवति। मानान्तराप्राप्ताबाधितार्थविषयकज्ञानजनकज्ञान-विषयत्वे सति शब्दत्वं शब्दप्रमाणलक्षणमिति फलितम्।

शास्त्रदीपिकायां शब्दलक्षणस्य विवरणम्[२]

अत एव शास्त्रदीपिकायां "शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानमिति। विज्ञातात् शब्दात् पदार्थाभिधानद्वारेण यद्वाक्यार्थविज्ञानं तच्छाब्दं नाम प्रमाणम्। तल्लोकसिद्धत्वान्न परीक्षितव्यम्। तच्च द्विविधम्, पौरुषेयमपौरुषेयं चेति। तत्र पौरुषेयमाप्तवाक्यम्। अपौरुषेयं च वेदवाक्यम्। उभयमप्यनाप्तप्रणीतत्वदोषविरहात् स्वतश्च शब्दस्यादुष्टत्वात् प्रमाणम्" इत्युपपादितम्।

अनेन पदार्थाभिधानद्वारा वाक्यार्थज्ञानजनकज्ञानविषयत्वं शब्दप्रमाणलक्षण-मित्युक्तं भवति।

श्लोकवार्त्तिके — भाष्यकारेण[३] "शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानम्" इति शब्दविशेषस्य शास्त्रस्यैव लक्षणमुक्तम्, कुतः शब्दसामान्यस्य लक्षणं नोक्तम् इत्याशङ्क्य; लौकिकवाक्यलक्षणस्य वेदव्याख्याने नातीव उपयोगः। अपि च सामान्यमन्तरेण विशेषाभावात् विशेषलक्षणे कथिते, ततः सामान्यलक्षणं सुख-ग्राह्यमित्याशयेन भाष्यकारः शब्दप्रमाणसामान्यलक्षणं नोक्तवान् इति समाधाय —

"......................तस्माच्छब्देन या मतिः।
तस्याः स्वतः प्रमाणत्वं न चेत् स्याद्दोषदर्शनम्॥"

इति ग्रन्थेन[४] दोषदर्शनरहितशब्दविज्ञानात् असंनिकृष्टे = अनधिगतेऽबाधिते च, वाक्यार्थे यत् ज्ञानं, तत्साधनं शब्दप्रमाणमिति प्रदर्शितम्। "आप्तोपदेशः शब्दः" इति लक्षणं तु अपौरुषेये वेदेऽव्याप्तमिति च न्यरूपि।

वेदान्तपरिभाषोक्तं शब्दप्रमाणलक्षणम्[५]

वेदान्तपरिभाषायां "यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते, तद्वाक्यं प्रमाणम्" इति शब्दप्रमाणलक्षणमुक्तम्। मानान्तराबाधित-तात्पर्यविषयीभूतपदार्थसंसर्गबोधकवाक्यत्वं शब्दप्रमाणलक्षणमिति निष्कर्षः। शब्दसमानार्थके प्रमाणान्तरेऽतिव्याप्तिवारणाय वाक्यत्वनिवेशः। पदार्थसंसर्ग-

---

[१] श्लो.वा.अनुमान. ५५cd, ५६ ab.
[२] शा.दी. १.१.५, पृ. ७२.
[३] शा.भा.१.१.५, भा.१.पृ. ४४.
[४] श्लो.वा.शब्द. ५३.
[५] वे.प, आगमपरिच्छेदे, पृ. २०८.

बोधकवाक्यत्वस्य "अग्निना सिञ्चेत्" इत्ययोग्यवाक्येऽपि सत्त्वात् तत्रातिव्याप्तिवारणाय 'अबाधित' इति संसर्गविशेषणम्। ब्रह्मपरवाक्यातिरिक्तसकलवाक्येषु स्वार्थसंसर्गस्य "नेह नानास्ति किंचन" इत्यादिना बाधितत्वात् अव्याप्तिरित्यत उक्तं - मानान्तराबाधितेति। सजातीयमानान्तराबाधितेत्यर्थः। तथा च पारमार्थिकतत्त्वावेदकैर्वेदान्तैः घटानयनादिसंसर्गस्य यागस्वर्गादिसाध्यसाधनभावस्य च बाधेऽपि सजातीयैर्व्यावहारिकतत्त्वावेदकैः प्रमाणान्तरैर्बाधाभावान्नाव्याप्तिः। अर्थवादवाक्ये "स प्रजापतिरात्मनो वपामुदखिदत्" इत्यादौ श्रूयमाणपदार्थसंसर्गस्य व्यवहारदशायामपि बाधात् 'तात्पर्यविषय' इत्युक्तम्।

द्वैतवाद्युक्तं शब्दलक्षणम्[१]

तर्कताण्डवकाराः — प्रमाणपद्धतौ "निर्दोषशब्दत्वं, निर्दोषवाक्यत्वं वा आगमलक्षणम्" इत्युक्तम्। अत्र आद्यं "निर्दोषः शब्द आगमः" इति प्रमाणलक्षणानुसारि। निष्प्रयोजनत्वादिदोषनिरासार्थमावश्यकेन निर्दोषत्वविशेषणेनैव निरभिधेये अनन्विते चाप्यतिव्याप्तिनिरासेन, वाक्यग्रहणस्य अनपेक्षिततत्वात्। द्वितीयं तु "आगमोऽदुष्टवाक्यं च" इति ब्रह्मतर्कानुसारि। अत्र वाक्यग्रहणम्, शिष्याणां पदवाक्यादिस्वरूपज्ञापनार्थकम्। अत एव पद्धतौ "द्वितीयपक्षे विभक्त्यन्ताः वर्णाः पदम्। आकाङ्क्षायोग्यतासंनिधिमन्ति पदानि वा वाक्यम्" इत्यादिना पदादीनां लक्षणमुक्तम् — इति निरूपयन्ति। "आप्तवाक्यं शब्दः" इति तु अपौरुषेयवेदाव्यापनादयुक्तमिति तैरेवोक्तम्।

न्यायपरिशुद्ध्युक्तं शब्दलक्षणम्

"अनाप्तानुक्तवाक्यं शब्दः" इति शब्दाध्यायारम्भे न्यायपरिशुद्धौ वेदान्तदेशिकैः लक्षणमभिहितम्। इदं च पौरुषेयापौरुषेयप्रमाणशब्दसामान्यलक्षणम्। वेदे आप्तोक्तत्वमिव अनाप्तोक्तत्वमपि नास्तीति अनाप्तानुक्तवाक्यत्वसत्त्वात् समन्वयः। आप्तोक्ते पौरुषेयवाक्ये अनाप्तानुक्तत्वसत्त्वात् समन्वयः। अनाप्तोक्ते शब्दाभासे च अनाप्तानुक्तत्वविरहान्नातिव्याप्तिरिति तदाशयः।

सांख्यदर्शनोक्तं शब्दलक्षणम्

सांख्यकारिकायां "दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टम्" इति[१] प्रमाणत्रैविध्यमुक्त्वा, "आप्तश्रुतिराप्तवचनं तु" इति[२] आप्तवचनस्य लक्षणमुक्तम्।

---

[१] त. तां, आगमपरिच्छेदे.द्वि.भा. पृ. २.

"आप्ता = प्राप्ता, युक्तेति यावत्। आप्ता चासौ श्रुतिश्चेत्याप्तश्रुतिः। श्रुतिः = वाक्यजनितं वाक्यार्थज्ञानम्" इति तद्व्याख्यायां कौमुद्याम्[३] उक्तम्।

श्रुतिशब्दः जहदजहल्लक्षणया शब्दसामान्यपरः। आप्तपदस्य युक्ता = सत्यार्थ-बोधनसामर्थ्येन समीचीना, दोषविहीनेति वा अर्थः। बुद्धिवृत्तेरेव सांख्यमते प्रमाणशब्देन व्यवह्रियमाणत्वात् वाक्यजनितं वाक्यार्थज्ञानमित्युक्तम्। तथा च निर्दोषवाक्यजन्यं वाक्यार्थज्ञानम् आगमप्रमाणमित्युक्तं भवति। शब्दस्य प्रमाणत्वे तु निर्दोषवाक्यं शब्द इति फलति।

नागेशोक्तं शब्दप्रमाणलक्षणम्[४]

तत्तद्वाक्यव्यङ्ग्यस्फोटस्यैवार्थबोधकत्वेन वस्तुतः प्रमाणत्वेऽपि लोकव्यवहार-दृष्ट्या व्यञ्जकशब्देऽपि प्रमाणत्वमस्तीति समालोच्य नागेशेन —

तत्राप्तोपदेशरूपः शब्दः प्रमाणम्। "आप्तो नाम अनुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान्, रागादिवशादपि नान्यथावादी यः सः" इति चरके पतञ्जलिः —इत्युक्तम्। 'आप्तोपदेशः' इत्यस्य 'आप्तश्चासावुपदेशः', 'आप्तस्योपदेशः' इति द्वेधा विग्रहात् आप्तत्व-आप्तोक्तत्वान्यतरवानुपदेश इत्यर्थः। अपौरुषेयस्य वेदस्य स्वत एवाप्तत्वम्, पौरुषेयस्य वाक्यस्य तु आप्तोक्तत्वमिति उभयानुयायीदं लक्षणम्।

खण्डनखण्डखाद्योक्तशब्दलक्षणदूषणपरामर्शः[५]

खण्डनोक्तशब्दलक्षणदूषणानि

आप्तवाक्यं शब्दः प्रमाणमिति न युक्तम्। विकल्पानुपपत्तेः। तथा हि — कोऽयमाप्तो नाम? यथादृष्टवादीति चेत् न। भ्रान्तिप्रतिपन्नवादिवाक्येऽतिव्याप्तेः। देहात्मनोरैक्यं भ्रान्त्या प्रतिपद्य यो वक्ति "देह एवात्मा" इति, सोऽप्याप्तः स्यात्, यथादृष्टवादित्वात्, तद्वाक्यं चाप्तवाक्यतया प्रमाणं स्यादिति यावत्। प्रमाण-दृष्टार्थवादी आप्त इत्युक्ते उक्तदोषवारणेऽपि, प्रमाणेनार्थमुपलभ्य तस्यैवान्यथात्वं यो वक्ति स आप्तः स्यात्, तद्वाक्यं च प्रमाणं स्यात्। यथाप्रमाणदृष्टार्थवादी आप्त इत्युक्ते, येन प्रकारेण प्रमाणतोऽर्थो दृष्टः तस्य तथावादी आप्तः इति पर्यवसानात्

---

[१] सां.का.४.
[२] सां.का.५.
[३] सां.त.कौ, का.४. पृ. १५३.
[४] ल.मं. शब्दप्रमाणनिरूपणे, पृ. ११.
[५] खं.खं.खा, प्रथमपरिच्छेदे शब्दलक्षणखण्डने, पृ. ४३७.

पूर्वोक्तदोषवारणेऽपि, अंशे तथाभूतवादिवाक्यस्यायथार्थस्यापि प्रमाणत्वं स्यात्। "ते ग्रावाणः प्लवन्ते" इति यो वक्ति स आप्तः स्यात्, तद्वाक्यं प्रमाणं स्यात्। "ते ग्रावाणः" इत्यंशे यथाप्रमाणदृष्टार्थवादित्वात्। ननु यथाप्रमाणदृष्टार्थवादीत्यस्य नायमर्थः प्रमाणदृष्टयत्किंचिदर्थवादीति, येनोक्तदोषः स्यात्। अपि तु यावद्यथा-प्रमाणदृष्टवादीत्यर्थः। प्रमाणतो येन प्रकारेण यावत् दृष्टं, तावत् एव तथा वादीति यावत्। अतो नोक्तदोषः, प्रमाणतोऽदृष्टस्यापि प्लवनस्य कथनात् इति चेन्न। आप्तत्वेन संमतेष्वव्याप्तेः। न ह्याप्ताः प्रमाणदृष्टं सर्वं वदन्ति। ननु यथाप्रमितस्यैव वक्ता आप्तः इत्युक्तौ नोक्तदोषः[१]। नापि "ग्रावाणः प्लवन्ते" इति वक्तर्यतिव्याप्तिः, अप्रमितस्यापि प्लवनस्य कथनेन 'प्रमितस्यैव' इति विशेषणाभावात् इति चेत् — न। युधिष्ठिरवाक्येऽव्याप्त्यापत्तेः। युधिष्ठिरः खलु सत्यवादित्वेन सर्वलोकप्रसिद्धः। तस्यापि क्वचिदनृतवादित्वं भारते स्मर्यते, यथा "अश्वत्थामा हतः" इति। अतो युधिष्ठिरः अनाप्तः स्यात्।

ननु यं विषयं यथा प्रमिनोति तं विषयं तथा वक्ता आप्तः, तद्वाक्यं तस्मिन् विषये प्रमाणमिति विषयविशेषनियन्त्रितलक्षणकथने न दोष इति चेत् — लक्षण-स्याननुगतत्वापातात्। तथा चाव्याप्तिः।

निर्दोषः (अज्ञानसंशयविपर्ययरागद्वेषादिहीनः) आप्तः, तद्वाक्यं शब्दः इत्यपि न। सदोषस्य "नास्ति घटः" इत्यभिधातुमिच्छतः पुरुषस्य मुखात् दैववशनिर्गते "अस्ति घटः" इति यथार्थवाक्येऽव्याप्तेः।

किं च निर्दोषपदेन किं सकलदोषराहित्यं विवक्षितम्? उत किंचिद्दोषराहित्यम्। आद्येऽसंभवः, युधिष्ठिरस्यापि किंचिद्दोषदर्शनेन निर्दोषत्वस्य कुत्राप्यभावात्। द्वितीये लक्षणाननुगमः।

यथार्थवाक्यं शब्द इत्यपि न। आंशिकयथार्थवाक्येऽतिव्याप्तेः। दैवान्निर्गत-वाक्येऽव्याप्तेश्च।

श्रीहर्षोक्तशब्दलक्षणदूषणविमर्शः

एतेषां दूषणानां परिहारः पूर्वमेवोक्तप्रायः — विषयभेदेनैव विशिष्यैव तत्त-द्वाक्यस्य लक्षणमिष्टम्। अतोऽननुगमो न दोषाय। तद्विशेष्यकतत्संसर्गक-तत्प्रकारकप्रमाजनकः शब्दः लक्ष्यः, तद्विशेष्यकतत्संसर्गकतत्प्रकारकयथार्थ-ज्ञानजन्यत्वं लक्षणमिति मणिकृता निष्कृष्टत्वान्न कोऽपि दोषः प्रसजतीति।

---

[१] आप्तत्वेन संमतेषु पुरुषेषु प्रमितस्यैव वक्तृत्वस्य सत्त्वात् नाव्याप्तिरित्यर्थः।

शब्दप्रामाण्यविषये चित्सुखोक्तदूषण-तत्परिहारौ

एतेन — यत् चित्सुखमुनिना तत्त्वप्रदीपिकायां दूषितम्[१] —

तथा आप्तवाक्यं शब्दप्रमाणमिति नैयायिकोक्तं लक्षणमप्यलक्षणम्।

आप्तोदीरितवाक्येषु मालतीमाधवादिषु।
व्यभिचारान्न तद्युक्तमाप्तत्वस्यानिरुक्तितः॥

स्वकपोलकल्पितमालतीमाधवादिवाक्येषु प्रामाण्याभावादतिव्याप्तिः। न हि पुरा आप्त एव सन् नाटकनाटिकादिप्रबन्धविरचनमात्रेणानाप्तो भवति भवभूतिः। उक्तं चैतदुम्बेकेन "यदाप्तोऽपि कस्मैचिदुपदिशति 'न त्वयाननुभूतार्थविषयं वाक्यं प्रयोक्तव्यं, यथाङ्गुल्यग्रे हस्तियूथशतमास्ते' इति, तत्रार्थव्यभिचारः स्फुटः" इति।

कश्चायमाप्तो नाम? यथादृष्टार्थवादीति चेन्न। भ्रान्तवाक्येऽपि प्रसङ्गात्। 'प्रमाण-दृष्ट' इति विशेषणेऽपि, प्रमाणदृष्टस्य प्रमादादिना अन्यथाकथनेऽपि प्रसङ्गात्।

प्रमाणेन यथा दृष्टं तथा वादीति चेत्, मैवम्। एकदेशे तथाभूतवादित्वेऽप्यं-शान्तरेऽन्यथाभूतवादिन्यपि प्रसङ्गात्।

यावत् प्रमाणदृष्टं तावत एव वक्ता आप्त इति चेन्न। अज्ञातसंदिग्धानुवादादि-वाक्यप्रयोक्तुरनाप्तत्वप्रसङ्गात्।

अथ निर्दोष आप्त इति चेत्, मैवम्। आप्तानामपि क्वचित् रागादिदोषसंभवात्। यत्र विषये यो निर्दोषः स तत्र आप्त इति चेन्न। यत्तच्छब्दयोर्विशेषविषयत्वेन असाधारण्यादव्याप्तेः। तस्मात् आप्तवाक्यमागम इत्यप्यलक्षणम्।

यथार्थवाक्यं शब्दप्रमाणमित्यपि न। यथार्थत्वस्य प्रमितिखण्डनावसर एव खण्डितत्वात्।

एतेन समयबलेन सम्यक्परोक्षानुभवसाधनम् आगमः इति भूषणोक्तलक्षण-मप्यपास्तम्। उर्ध्वीकृततर्जन्या दशसंख्यानुमाने, शङ्खध्वनौ चानुविधेयपुरुषाभि-प्रायानुमापके व्यभिचारात्। यत्र हि वणिजां समयबलेन ऊर्ध्वीकृता तर्जन्यङ्गुलिः दशसंख्यामनुमापयति, तत्रानुमाने त्वदुक्तलक्षणमतिव्याप्तम्। अनुविधेयः = प्रभुः। प्रभोः सेनोद्योगपरावृत्त्याद्यभिप्रायं समयबलेन शङ्खध्वनिः सैनिकानामनुमापयति। तत्र चातिव्याप्तमित्यर्थः। समयसम्यक्त्वयोश्च पूर्वमेव निरासात्। — इति, तदपि प्रत्युक्तम्।

इति शब्दलक्षणविचारः

---

[१] त.प्र, द्वि.प. पृ. २६५.

वाक्यवाक्यार्थस्वरूपविचारः

वाक्यविचारः

इह खलु लौकिकाः परीक्षकाश्च बुभुत्सितं श्रोतृपुरुषानवगतमर्थं बोधयितुमिच्छन्तः वाक्यमुच्चारयन्ति। बुभुत्सितं च प्रमेयं पृच्छन्ति बोद्धारः। एवं लोकयात्रां निर्वहति शब्दः। अत एव शब्दः सर्वार्थप्रकाशकत्वात् ज्योतिरित्यभिधीयते। यदाह आचार्यदण्डी[१] —

"इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥" इति।

न हि भूयो भूयः समधिगतं पदार्थमात्रं बुभुत्सन्ते बोद्धारः, न वा प्रतिपादयन्ति प्रेक्षावन्तः। तथा सति अबुभुत्सितावबोधने अनवधेयवचनतया ते न लौकिकाः, नापि परीक्षकाः इति उन्मत्तवत् उपेक्षणीया भवेयुः। अतः अनधिगतं वाक्यार्थमेव बुभुत्सन्ते बोधयन्ति च। वाक्यार्थश्च पदार्थानां संसर्गः अनेकगुणभूतपदार्थविशिष्टः एकः प्रधानपदार्थो वा, पदार्थानामन्वितावस्था वा। तद्बोधः वाक्यार्थबोधः, अन्वयबोधः, शाब्दबोध इति चाख्यायते।

तत्र वाक्यरूपस्य शब्दस्य प्रामाण्यं लक्षणं च पूर्वं परीक्षितम्। अथ वाक्यं, वाक्यार्थः, तयोः संबन्धः, वाक्यार्थबोधनिमित्तमिति चत्वारो विषयाः अत्र प्रबन्धे परीक्ष्यन्ते।

तत्र वाक्यविषये अष्टौ पक्षानुद्दिशति तत्रभवान् भर्तृहरिः[२] —

"आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहतिः॥
पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम्॥"

इति कारिकाद्वयेन। अत्रैव वाक्यार्थोऽपि गर्भितः।

अयमर्थः — न्यायदर्शिनां विदुषां वाक्यं प्रति = वाक्यविषये, बहुधा = अष्टधा, मतिर्भिन्ना। अत्र न्यायो वाक्यविषयकस्तर्कः। ते चाष्टौ पक्षभेदा इमे।

१. आख्यातशब्दः वाक्यम्
२. संघातः (पदसंघातः) वाक्यम्

---

[१] का.आ. १.४.
[२] वा.प.२.१,२.

३. संघातवर्तिनी जातिः वाक्यम्
४. एकोऽनवयवः शब्दः वाक्यम्
५. क्रमः वाक्यम्
६. बुद्ध्यनुसंहृतिः वाक्यम्
७. आद्यं पदं वाक्यम्
८. पृथक् सर्वं पदं साकाङ्क्षं वाक्यम् इति।

१. आख्यातशब्दो वाक्यम्

तत्र "आख्यातशब्दो वाक्यम्" इति वादिनाम् 'आख्यातशब्द एव वाक्यम्' इति नाभिप्रायः, "देवदत्त गामभ्याज दण्डेन" इत्यादौ सुप्तिङन्तचये वाक्यत्वव्यवहारस्य सर्वजनीनस्यापलापप्रसङ्गात्। किं तु क्वचित् आख्यातशब्दोऽपि वाक्यम्, यत्र कारकशब्दप्रयोगं विना केवलाख्यातशब्दप्रयोगेऽपि वाक्यार्थावगतिः, यथा "पिधेहि" इति। तदिदं शब्दार्थनिर्णयप्रकरणे दर्शयिष्यति[१] —

"आख्यातशब्दे नियतं साधनं यत्र गम्यते।
तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते॥" इति।

अस्यार्थः — आख्यातशब्दे = तिङन्ते "वर्षति" इत्यादौ, केवले प्रयुक्ते, नियतम् = अव्यभिचारि, साधनं = कर्त्रादिकारकं, यत्र गम्यते = अनुमीयते, समाप्तार्थं = परिपूर्णार्थं (निराकाङ्क्षतायै इति यावत्), तदप्येकम् आख्यातपदं वाक्यमित्युच्यत इति।

अत्र "तदप्येकं वाक्यम्" इत्युक्त्या अन्यदपि वाक्यमस्तीति गम्यते।

२. पदसंघातो वाक्यम्

"पदसंघातो वाक्यम्" इति वादिनस्तु "पिधेहि" इत्यादौ न केवलाख्यातस्य वाक्यत्वम्। किं तु "द्वारम्" इति कर्माध्याहृत्य तत्संहतस्यैवेति। केवलाख्यात-शब्दस्य यथा न वाक्यत्वं, तथा केवलसुबन्तस्य "द्वारम्" इत्यादेः न वाक्यत्वम्, तत्र नियमेन पिधानक्रियायाः अनुपस्थितेः। तदाह[२] —

"गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते॥" इति।

अस्यार्थः — नाम = कारकपदं, क्रियायां गुणभावेन स्थितं स्वार्थं बोधयति। क्रियापदं प्रधानभावेन स्थितं कारकपदानि अपेक्षते।

---

[१] वा.प.२.३२६.
[२] वा.प.२.४८.

३. संघातवर्तिनी जातिः वाक्यम्

"सुप्तिङन्तपदसंघातवर्तिनी जातिर्वाक्यम्" इति वादिनामभिसन्धिस्तु अयम् —

"देवदत्त गामभ्याज दण्डेन" इत्यादिपदसंघातरूपेषु वाक्येषु अस्ति कश्चन प्रतिवाक्यं भिद्यमानो जातिविशेषः, येन प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं भिद्यमानेऽपि "देवदत्त गामभ्याज दण्डेन" इति वाक्ये एकत्वप्रत्यभिज्ञा भवति।

तत्र प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं च भिद्यमाने पदसंघाते वाचकत्वं न संभवति, शक्तेरानन्त्यव्यभिचारदोषप्रसङ्गात्। अतः पदसंघातगताया जातेरेकस्या एव वाचकत्वमिति तस्या एव वाक्यत्वम् — इति।

तदाह[१] —

"यथा क्षेपविशेषेऽपि कर्मभेदो न गृह्यते।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः॥" इति।

यथा कर्मभेदहेतौ क्षेपविशेषे सत्यपि भ्रमणादिकर्मणामुत्क्षेपणादिकर्मभ्यः भेदः न ज्ञायते, भ्रमणादीनामावृत्तौ तु = पौनःपुन्येन जन्मनि तु, भ्रमणादिभिः स्वगता जातिर्व्यज्यते।

४. एकोऽनवयवः शब्दो वाक्यम्

"एकोऽनवयवः शब्दो वाक्यम्" इति केषांचिन्मतम्। एतन्मते वाक्यस्फोटोऽखण्डः। तत्र वर्णपदावापोद्धारकल्पनायामपि वस्तुतो वर्णाः पदानि वा तत्र न सन्तीति। तदाह[२] —

"यथैक एव सर्वार्थप्रत्ययः प्रविभज्यते।
दृश्यभेदानुकारेण वाक्यार्थानुगमस्तथा॥" इति।

यथा चित्ररूपविषयकमेकं ज्ञानं दृश्यभेदसमाश्रयेण नीलपीताद्यनेकाकारमेव विज्ञानमुपजातमिति व्यवह्रियते, तथा वाक्यवाक्यार्थयोरखण्डयोरपि पदभेदार्थभेदयोः व्यवहारः।

५. क्रमः वाक्यम्

"पदानां क्रमः पौर्वापर्यं, पूर्वापरीभूतानि पदान्येव वा वाक्यम्" इत्यपरे। एतन्मते वाक्यस्फोटस्य सखण्डत्वं पदसमुदायारब्धत्वं चेति। तदाह[३] —

---

[१] वा.प.२.२०.
[२] वा.प.२.७.
[३] वा.प.२.४९.

"सन्त एव विशेषा ये पदार्थेषु व्यवस्थिताः।
ते क्रमादनुगम्यन्ते न वाक्यमभिधायकम्॥" इति।

वाक्यार्थीभावात् प्रागपि पदार्थेषु सन्त एव कर्तृत्वादयो विशेषाः अनभिव्यक्ताः। क्रमं प्राप्य प्रतिपत्तृभिरनुभूयन्ते। अतः क्रमव्यतिरिक्तं वाक्यं न वाक्यार्थाभिधायकम्।

६. बुद्ध्यनुसंहतिः वाक्यम्

"बुद्ध्यनुसंहतिः वाक्यम्" इत्यन्ये। एतस्मिन् मते वाक्यम् अखण्डम्। तत्र पदानि न सन्ति। किं तु पदानि पदबुद्धयश्च कल्पितानि। तत्र पदबुद्धीनां कल्पितानाम् अनु = क्रमेण, संहारः = उपसंहार इति पदसमुदायरूपत्वं बुद्ध्या प्रकल्प्य वाक्यत्वव्यवहारः। तदाह[१] —

"यदन्तःशब्दतत्त्वं तु नादैरेकं प्रकाशितम्।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता॥" इति।

यत् = हृदयान्तरवस्थितं बोधरूपं शब्दतत्त्वम्, एकम् = अक्रममपि, अतथाभूतैः क्रमवद्भिः नादैः प्रकाशितं तदेवापरे शब्दमाहुः। तस्य नित्यत्वे वाक्येऽपि सा एकता भवति।

७. आद्यं पदं वाक्यम्

"आद्यं पदं वाक्यम्" इत्यपि केषांचिन्मतम्। अस्मिन् मते अनेकपदारब्धं सखण्डं वाक्यम्। अस्मिन् पक्षे प्रथमोपस्थितत्वात् शक्ततावच्छेदकानुपूर्वीकल्पनायां लाघवाच्च आद्यं पदमेव वाचकम्। इतरपदानि तु तत्सहकारीणि = तच्छक्तिद्योतकानि। यथा — "साक्षात्क्रियते" इत्यत्र साक्षात्पदमेव साक्षात्कारवाचकम्। 'क्रियते' इति तु पूर्वपदस्य तदर्थे शक्तिद्योतकमिति आद्यपदस्यैव वाक्यत्वमिति। तदाह[२] —

"विशेषशब्दाः केषांचित् सामान्यप्रतिरूपकाः।
शब्दान्तराभिसंबन्धात् व्यज्यन्ते प्रतिपत्तृषु॥" इति।

८. पृथक् सर्वं पदं साकाङ्क्षम्

"पृथक् सर्वं पदं साकाङ्क्षं वाक्यम्" इति वादिनामयं भावः — पृथक् = वाक्यात् पृथक्कारे, साकाङ्क्षं = पदान्तरसाकाङ्क्षं, सर्वं पदम् = आद्यं मध्यममन्त्यं च समुदितं वाक्यम् — इति। तदुक्तं जैमिनिना "अर्थैकत्वादेकं वाक्यं

---

[१] वा.प.२.३०.
[२] वा.प.२.१७.

साकाङ्क्षं चेत् विभागे स्यात्" इति[१]। वार्तिककाराश्च "आख्यातं साव्ययकारकविशेषणं वाक्यम्" इत्येकम्,[२] "एकतिङ् वाक्यम्" इत्यपरं[३] च वाक्यलक्षणं वदन्ति। एषां संघातपक्षेऽन्तर्भावः।

सखण्डवाक्यपक्षः अखण्डवाक्यपक्षश्च

एषु वाक्यविकल्पेषु पक्षद्वयमस्ति सखण्डवाक्यपक्षः, अखण्डवाक्यपक्षश्चेति। तत्र 'जातिः संघातवर्तिनी', 'एकोऽनवयवः शब्दः', 'बुद्ध्यनुसंहृतिः' इति त्रीणि लक्षणान्यखण्डवाक्यपक्षे। 'आख्यातशब्दः', 'क्रमः', 'संघातः', 'आद्यं पदम्', 'पृथक् सर्वं पदं साकाङ्क्षम्' इति पञ्च लक्षणानि सखण्डपक्षे।

तत्राखण्डपक्षे त्रिष्वपि लक्षणेषु प्रतिभा वाक्यार्थः। सखण्डपक्षे 'संघातः', 'क्रमो वाक्यम्' इत्यनयोः पक्षयोः अभिहितान्वयवादः, संसर्गश्च वाक्यार्थः। 'आख्यातशब्दः' इति पक्षेऽन्विताभिधानवादः, क्रिया च वाक्यार्थः। 'पदमाद्यम्', 'पृथक् सर्वं पदं साकाङ्क्षम्' इति पक्षद्वये संसृष्ट एवार्थो वाक्यार्थः, अन्विताभिधानवादश्च।

तथा हि — पदमेव शक्तं, न तु वाक्यम्। वाक्यार्थभूतस्तु पदार्थानां संसर्गः आकाङ्क्षाभास्यः। आकाङ्क्षा च तत्तच्छाब्दबोधं प्रति नियतः पदानां समभिव्याहारविशेषः। 'अभिहितयोः = शक्त्या उपस्थापितयोः, पदार्थयोरन्वय आकाङ्क्षाभास्यः' इति ये वदन्ति, तेऽभिहितान्वयवादिनः। तथा च 'पदानां संघातो वाक्यम्', 'पदानां पौर्वापर्यरूपः क्रमो वाक्यम्' इति पक्षद्वयेऽभिहितान्वयवाद आपतति। पदानामेव शक्तत्वात्, पदसंघातरूपे वाक्ये शक्त्यनभ्युपगमात्। एष चाभिहितान्वयवादो नैयायिकानाम्। तत्र च संसर्गस्य आकाङ्क्षाभास्यत्वं व्युत्पत्तिवादादौ प्रपञ्चितम्।

'आख्यातशब्दः', 'पदमाद्यम्', 'पृथक् सर्वं पदं साकाङ्क्षम्' इति वाक्यस्य लक्षणत्रयं तु अन्विताभिधानपक्षे बोध्यम्। तथा हि — कार्यान्विते इतरपदार्थान्विते वा स्वार्थे पदानां शक्तिः इति अन्वयरूपः संसर्गोऽपि शक्तिभास्य एव। 'तत्तदर्थविषयकशाब्दबोधं प्रति वृत्त्या तत्तत्पदजन्यतत्तदर्थविषयकोपस्थितिः कारणम्' इति कार्यकारणभावः स्वीकर्तव्यः। अन्यथा "घटमानय" इत्यादौ घटपदसंबन्धितया उपस्थितस्य आकाशस्यापि शाब्दबोधे भानापत्तिः। अत एतादृशकार्यकारणभावस्वीकारेऽन्वयांशेऽपि शक्तिरभ्युपेतव्यैव। अत्र पक्षे 'आख्यातशब्दः इतर-

[१] जै.सू.२.१.४६.
[२] वार्तिक.९, म.भा. २.१.१.भा.२. पृ.३३६.
[३] वार्तिक.१०, म.भा. २.१.१.भा.२. पृ.३३७.

पदार्थान्वितस्वार्थबोधकः', 'आद्यं पदमितरपदार्थान्वितस्वार्थबोधकम्', 'पृथक् साकाङ्क्षं सर्वं पदम् इतरतत्तत्पदार्थान्विततत्तत्स्वार्थबोधकम्' इति रीत्या अस्मिन् वाक्यलक्षणत्रयेऽन्विताभिधानवादसंभवः।

संघातपक्षे अन्विताभिधानवादः, संसर्गवशात् निराकाङ्क्षो विशेषावस्थितः पदार्थ एव वाक्यार्थः।

एवं सर्ववाक्यलक्षणसाधारणं प्रयोजनं वाक्यार्थ इत्ययमपि केषांचन पक्षः। अत्राभिहितान्वयपक्षः। तदाह[1] —

"अभिधेयः पदस्यार्थो वाक्यस्यार्थः प्रयोजनम्।
तस्य तस्य न संबन्धो वाक्यानामुपजायते॥
तत्र क्रियापदान्येव व्यपेक्षन्ते परस्परम्।
क्रियापदानुषक्तस्तु संबन्धोऽतः प्रतीयते॥" इति।

तदुक्तं पुण्यराजेन सर्वं संकलय्य[2] —

"तदेवं प्रतिभा, संसर्गः, संसर्गवशान्निराकाङ्क्षो विशेषावस्थितः पदार्थ एव, संसृष्ट एवार्थः, क्रिया, प्रयोजनं चेति षड् वाक्यार्थाः इहोपदर्शिताः। संसर्गे, संसर्गवशात् विशेषावस्थिते पदार्थे च वाक्यार्थे अभिहितान्वयः। संसृष्टे, क्रियायां चान्विताभिधानम्। प्रतिभायां तु एकरसैव प्रतिपत्तिरिति न तत्र काचित् अभिहितान्वयान्विताभिधानवादचर्चा। प्रयोजने तु अभिहितान्वय एव" इति।

प्रतिभालक्षणम्

तत्र प्रतिभायाः स्वरूपम् —

"विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्॥" इत्यनेनोक्तम्[3]।

अस्यार्थः — अखण्डात् वाक्यात् बुद्ध्या अपोद्धृतेभ्यः देवदत्तादिपदेभ्यः स्वार्थानां विच्छेदेन ग्रहणकाले एव देवदत्तादिपदार्थमतिव्यतिरिक्तैव काचन अखण्डवाक्यार्थविषया असत्यैरेवोपाधिभूतैः देवदत्तादिपदार्थैः उपपादिता = अभिव्यञ्जिता, प्रतिभा जायते। तां वैयाकरणाः वाक्यार्थविषयकत्वात् वाक्यार्थ इत्याहुः।

[1] वा.प.२.११३, ११४.
[2] वा.प.व्या.अ.क. २.३, पृ. १२.
[3] वा.प.२.१४३.

क्रियायाः वाक्यार्थत्वम्

क्रियायाः वाक्यार्थत्वविषये भर्तृहरिणा[१] —

"क्रिया क्रियान्तराद्भिन्ना नियताधारसाधना।
प्रक्रान्ता प्रतिपत्तॄणां भेदाः संबोधहेतवः॥"

"प्रतिभा यत्प्रभूतार्था यामनुष्ठानमाश्रितम्।
फलं प्रसूयेत यतः सा क्रिया वाक्यगोचरः॥" इत्युक्तम्[२]।

अस्यार्थः — क्रियावाचकपदमात्रश्रवणे सति नियताधारा नियतसाधना च क्रिया, अत एव च क्रियान्तराद्भिन्ना, प्रथमतरमेव प्रतिपत्तॄणां बुद्धौ प्रक्रान्ता। वाक्ये साधनभेदाः आधारभेदाश्च प्रयुज्यमानाः प्रतिपत्तॄणां संबोधहेतवः = प्रतिपत्तॄणां या क्रियाविशेषप्रतिपत्तिः तत्संवादिबोधहेतवः। तेन प्रतिपत्तॄणां प्रक्रमोपजातक्रियाविशेषप्रतिपत्तिसंवादमात्रं फलं भवतीति यावत्। "प्रतिभा" इत्यस्यां कारिकायां क्रियायाः वाक्यार्थभूतायाः विशेषणत्रयमुद्दिष्टम्। तत्राद्यं — प्रतिभा यत्प्रभूतार्था इति। 'यस्याः = नियताधारनियतसाधनविशिष्टायाः क्रियायाः, प्रभूतः = प्रसूतः, अर्थः = अखण्डवाक्यार्थरूपो विषयो यस्याः सा यत्प्रभूतार्था' इति बहुव्रीहिः। अत्र प्रतिभाविषयेऽर्थे तादृशक्रियाप्रसूतत्वं च तादृशक्रियाज्ञाप्यत्वरूपं बोध्यम्। द्वितीयं तु — यामनुष्ठानमाश्रितमिति। अत्र अनुष्ठानं = पुरुषस्य क्रियायां प्रवृत्तिः। नियताधारां नियतसाधनां च क्रियामुद्दिश्य लोकस्य प्रवृत्तिरिति। तृतीयं तु — फलं प्रसूयेत यत इति। नियताधारनियतसाधनक्रियात एव हि फलं प्रसूयते। सा तादृशी क्रिया वाक्यगोचरो वाक्यार्थः। अत्र विशेषणत्रयेण नियताधारनियतसाधनक्रियायाः स्वरूपं प्रतिभाहेतुत्वेन प्रवृत्तिहेतुत्वेन च विशदीकृत्य, तस्या एव वाक्यार्थत्वं विधीयते, न तु केवलायाः।

पदार्थानां संसर्गस्य वाक्यार्थत्वम्

'पदानां संघातो वाक्यम्' इति, 'पदानां पौर्वापर्यरूपः क्रमो वाक्यम्' इति च पक्षद्वये पदार्थानां संसर्गो वाक्यार्थः। स च —

"संबन्धे सति यत्त्वन्यदाधिक्यमुपजायते।
वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम्॥" इत्यत्रोक्तः[३]।

पदस्य साकाङ्क्षस्य पदान्तरेण संबन्धे सति, यत्तु पदार्थापेक्षया अन्यत् अर्थेषु = वाक्यार्थेषु, आधिक्यमुपजायते, यथा "वीरः पुरुषः" इति वीरत्वपुरुषत्वयोः

[१] वा.प.२.४१४.
[२] इयं कारिका अन्वेषणीया इति अम्बाकर्त्र्यां व्याख्यायाम् (वा.प.व्या.अ.क. भा.२. पृ. ८)।
[३] वा.प.२.४२.

गुणविशेषजातिविशेषयोः एकार्थसमवायप्रतिपत्तिपूर्वकं सामानाधिकरण्यं वाक्यार्थः पदार्थापेक्षया अधिक उपजायमानो दृश्यते; अनेकपदसंश्रयम् = अनेकपदाश्रितम्, अनेकपदनिमित्तकं (पदार्थोपस्थितिद्वारा अनेकपदज्ञाप्यमिति यावत्), अनेकपदज्ञाप्यत्वादेव, तं पदार्थयोः संसर्गरूपं वाक्यार्थमेव प्राहुः, न तु पदार्थमिति।

विशेषरूपापन्नपदार्थस्यैव वाक्यार्थत्वम्

तथा पदसंघातपक्ष एव —

"सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः।
तदर्थान्तरसंसर्गात् भजते भेदरूपताम्॥" इत्यत्रोक्तः[१]।

अस्यार्थः — अपरे केचन, पदार्थान्तरसंसर्गं विना, यत्तु कस्यचित् पदार्थस्य सर्वभेदानुगुण्यं = सर्वेषां भेदानां पदार्थविशेषाणामानुगुण्यम्, अन्वयानुकूलत्वम्, अन्वययोग्यत्वं तदेव पदार्थस्य सामान्यं रूपं विदुः, तत्तु पदार्थस्य सामान्यं रूपम्, अर्थान्तरसंसर्गात् = पदार्थान्तरसंबन्धात्, भेदरूपतां = पदार्थविशेषरूपतां भजते। पदात् सामान्येन प्रतीयमानः पदार्थ एव पदान्तरसंबन्धे तदुपस्थाप्यपदार्थान्तरसंसर्गितया प्रतीयमानः विशेषरूपतामापन्नो वाक्यार्थः। पदार्थयोः संसर्गो वाक्यार्थ इति यावत्। अत्र च प्रकारान्तरेणाभिहितान्वयवाद एव प्रतिपाद्यते। तथा हि — अभिहितयोः = शक्त्या उपस्थापितयोः, पदार्थयोरन्वयः पदयोः समभिव्याहारविशेषरूपाकाङ्क्षाभास्य इति अभिहितान्वयवादस्वरूपम्। अस्मिंश्च पक्षे पदार्थयोरन्वयस्य पदसमभिव्याहारविशेषरूपवाक्यार्थत्वं स्फुटमेवोक्तम्।

अन्विताभिधानमाश्रित्य तु 'पदमाद्यम्' इति, 'पृथक् सर्वं पदं साकाङ्क्षम्' इति चास्मिन् पक्षद्वये पदस्यैकस्य पदान्तरसंसर्गात्, एकस्य पदार्थस्य पदार्थान्तरसंसर्गाद्वा प्रथमतरमेव एकपदार्थसंसृष्टापरपदार्थरूप एव वाक्यार्थः प्रतिपत्तृबुद्ध्युपारूढो भवति। यथा निरूपयिष्यति[२] —

"तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते।
व्यक्तोपव्यञ्जना सिद्धिरर्थस्य प्रतिपत्तृष॥" इति।

अस्यार्थः — तेषाम् एकपदार्थविशिष्टापरपदार्थविशेषरूपे एकस्मिन् वाक्यार्थे आद्यं पदं बहून् शब्दान् वा प्रत्येकं वाचकत्वेन अभ्युपगच्छतामन्विताभिधानवादिनां तु कृत्स्नो वाक्यार्थः प्रतिभेदं = प्रतिपदं प्रतिवर्णं वा, समाप्यते। एकेनैव पदेन आद्येन इतरेण वा कृत्स्नो वाक्यार्थो निराकाङ्क्षो बोध्यत इति

---

[१] वा.प.२.४४.
[२] वा.प.२.१८.

यावत्। न चैवं सति इतरवर्णपदवैयर्थ्यम्, अत उत्तरार्धेन उत्तरमाह — व्यक्तोपव्यञ्जनेति। व्यक्तैः = स्फुटतया श्रावणप्रत्यक्षगोचरैः इतरपदैः उपव्यञ्जनम् = अभिव्यक्तिः, यस्याः सा तथाभूता। अतो नेतरपदोदीरणवैयर्थ्यमिति। किं च[१] —

> "पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः।
> संसर्ग एव प्रक्रान्तस्तथाद्येष्वर्थवस्तुषु॥"

अस्यार्थः — अभिहितान्वयवादे यथा पूर्वपूर्वपदार्थानुगतः तत्संसृष्टः परः परः पदार्थो वाक्यार्थः, पदार्थयोः संसर्गस्य पदयोः समभिव्याहारविशेषरूपाकाङ्क्षालभ्यत्वेन प्रथमं पूर्वपदश्रवणकालेऽप्रतीयमानत्वात्; तथा अन्विताभिधानवादे आद्येषु = पूर्वेषु, अर्थवस्तुषु प्रतीयमानेषु परस्य परस्य पदार्थस्य संसर्गः प्रक्रान्त एव = प्रथमतरमेव प्रतीतो भवति। इतरपदार्थान्वितस्यैव पदार्थत्वात्। तदेवमभिहितान्वयवादे —

> "कार्यानुमेयः संबन्धः रूपं तस्य न दृश्यते।
> असत्त्वभूतमत्यन्तमतस्तं प्रतिजानते॥"

इति श्लोकेन[२] विशेषविश्रान्तः पदानामेवार्थो वाक्यार्थ इति लभ्यते। अस्य श्लोकस्यार्थः — पदार्थव्यतिरेकेण वाक्यार्थत्वेन कल्पितः पदार्थानां परस्परं संबन्धः पदार्थव्यतिरेकेणासन्नेव = नियमेनानुमेय एव, न तु पदसमुदायवाच्यः। किं तर्हि? अन्वययोग्यसर्वपदार्थान्तरान्वयानुगुणसामान्यरूपो यः पदार्थः स एव पदार्थान्तरसंनिधानात् विशेषविश्रान्तो वाक्यार्थः। स च कार्यानुमेयः। कार्येण = पदार्थानां विशेषविश्रान्तिलक्षणेन अनुमीयत इति कार्यानुमेयः। तस्य संबन्धस्य रूपम् = इदं तदिति न दृश्यते = न ज्ञायते। अत एवात्यन्तमसत्त्वभूतं = पदार्थव्यतिरेकेण नास्ति सत्त्वं यस्य तमेवंभूतम्, आचार्याः प्रतिजानते = प्रतिज्ञया निर्दिशन्तीति। तदेवमनेन श्लोकेन पदानामेवार्थो यः सर्वपदार्थान्वययोग्यः सामान्यरूपः, स एव पदार्थान्तरसंनिधानात् विशेषविश्रान्तो वाक्यार्थ इति लभ्यते। अस्मिंश्च अभिहितान्वयवादस्यैव मतविशेषे, वाक्यार्थत्वेन अभिमतस्य संबन्धस्य प्रागुक्तरीत्या कार्यानुमेयत्वमेव, न त्वाकाङ्क्षाभास्यत्वमित्यनेन श्लोकेनावगम्यते।

अन्विताभिधानवादे तु "पदमाद्यम्" इति, "पृथक् सर्वं पदं साकाङ्क्षम्" इति च पक्षद्वये प्रथमतरमेव संसृष्टो वाक्यार्थोऽव्यक्तं प्रतीयते, पदान्तरसंनिधानकाले तु व्यज्यमानो व्यक्तं प्रतीयत इति निर्धारितम्।

---

[१] वा.प.२.४११.
[२] वा.प.२.४६.

प्रयोजनं वाक्यार्थः

केषांचित्तु मते न वाक्यार्थः आकाङ्क्षाभास्यः, कार्यानुमेयो वा अभिहितान्वयवादिनामिव, नाप्यन्विताभिधानवादिनामिव शक्तिभास्यः। किं तु पदार्थः पदाभिधेयः। वाक्यार्थस्तु वाक्यस्य प्रयोजनमिति। तदेतत् आह[१] —

"अभिधेयः पदस्यार्थः वाक्यस्यार्थः प्रयोजनम्।" इति।

अयं भावः — पदस्यार्थः = पदस्याभिधेयः। वाक्यश्रवणे देशकालाव्यवधानरूपया आसत्त्या पदैरुपस्थापिताः पदार्थाः योग्यतया परस्परं संबध्य प्रतीयन्त इति न पदस्य वाक्यस्य वा वाक्यार्थे शक्तिः। किं तु वाक्यश्रवणे प्रतीयमानो वाक्यार्थो वाक्यप्रयोजनम्। तद्भावे भावात्, तदभावेऽभावात्। यथा गङ्गापदस्य तीरे लक्षणया प्रयोगे तीरे शैत्यपावनत्वादिप्रतीतिः प्रयोजनम्, न तु शैत्यपावनत्वादौ गङ्गापदस्य शक्तिः लक्षणा वा, तथा। न चैवं सति गङ्गापदस्य यथा शैत्यपावनत्वादौ व्यञ्जनावृत्तिः स्वीक्रियते, तथा वाक्यस्यापि वाक्यार्थे व्यञ्जनावृत्तिः स्वीक्रियताम् इति वाच्यम्। व्यञ्जनायाः अनुमानेन गतार्थत्वात्। तथा च न वाक्यस्य वाक्यार्थे वृत्तिः इति। तदेतन्मतं दूषितम् अस्यैव श्लोकस्योत्तरार्धेन[२] —

"यस्य तस्य न संबन्धो वाक्यानामुपपद्यते॥" इति।

अयमर्थः — यस्य वादिनो वाक्यप्रयोजनं वाक्यार्थो न वाक्याभिधेय इति, तस्य वादिनो मते वाक्यानां परस्परं संबन्धो महावाक्येषु दृश्यमानो नोपपद्यते। अभिधेयद्वारको हि शब्दानां संबन्धो भवति। अभिधेयं च वाक्यानां नास्तीति असंबन्धानि वाक्यानि प्राप्नुवन्तीति।

तदेतत् वाक्यप्रयोजनं वाक्यार्थ इति केषांचिन्मतं सर्वेषु वाक्यलक्षणेषु सत्सु संभवतीति वाक्यलक्षणेषु पृथक् कथितेषु न पृथक् कथ्यते। अस्मिन् वाक्यलक्षणे वाक्यार्थो वाक्यप्रयोजनमिति।

तदेवं[३] षड् वाक्यार्थाः इह द्वितीयकाण्डे ग्रन्थकृता उपदर्शिताः—

१) प्रतिभा

२) पदार्थानां संसर्गः

३) पदार्थान्तरसंसर्गात् पूर्वं सामान्यरूपः पदार्थान्तरसाकाङ्क्षः, पश्चात्तु पदार्थान्तरसंसर्गवशात् निराकाङ्क्षो विशेषरूपेणाऽवस्थितः पदार्थान्तरसंसर्गोपलक्षितः पदार्थ एव वाक्यार्थः

---

[१] वा.प.२.११३ ab.

[२] वा.प.२.११३ cd.

[३] वा.प.व्याख्या पुण्यराजीया, वाक्यकाण्डे, पृ. १२.

४) पदार्थान्तरसंसर्गविशिष्टः पदार्थ एव वाक्यार्थः

५) क्रिया वाक्यार्थः

६) वाक्यस्य प्रयोजनं वाक्यार्थः इति।

तत्र संसर्गे, संसर्गवशात् विशेषावस्थिते पदार्थे च वाक्यार्थे स्वीक्रियमाणेऽभिहितान्वयवाद एवापतति। उभयत्रापि पक्षे संसर्गभानस्य पदसमभिव्याहारविशेषरूपाकाङ्क्षाप्रयोज्यत्वात्।

'पदार्थान्तरसंसृष्टः पदार्थो वाक्यार्थः' इति, 'तत्तद्विशेषणविशिष्टसाधनान्विता क्रियैव वाक्यार्थः' इति पक्षे चान्विताभिधानवादः स्पष्ट एव। पक्षद्वयेऽप्यन्वयस्य पदशक्त्या प्रतीयमानत्वात्।

प्रतिभायां तु अखण्डस्य वाक्यार्थस्य विषयत्वात् पदार्थान्वयशून्या एकरसैव प्रतिपत्तिरिति न अभिहितान्वयान्विताभिधानचर्चा।

प्रयोजने तु वाक्यार्थे स्वीक्रियमाणेऽभिहितान्वयवाद एव। तत्र प्रतीयमानस्य पदार्थद्वयसंसर्गरूपस्य प्रयोजनस्याकाङ्क्षामात्रलभ्यत्वात् इत्यवधेयम्।

विध्यादीनां वाक्यार्थत्वपक्षाः

यद्यपि विधिर्वाक्यार्थ इति, नियोगो वाक्यार्थ इति, भावना वाक्यार्थ इति पक्षत्रितयमपि शास्त्रेषु दृश्यते।

विधिर्वाक्यार्थः

तथा हि — इष्टसाधनत्वाख्यो विधिः लिङ्लोट्तव्याद्यन्तधातुप्रयोगे प्रतीयमानो लिङाद्यर्थोऽपि तत्तत्साधनान्वितक्रियान्वितो वाक्यात् प्रतीयमानो वाक्यार्थ इति मण्डनमुरारिमिश्रादयः। तथा च लोके "गामानय" इत्यादौ "गोकर्मकमानयनमिष्टसाधनम्" इति बोधः। वेदे तु "स्वर्गकामो यजेत" इत्यादौ "यागः स्वर्गसाधनम्" इति बोधः। स्वर्गस्यैव फलत्वेनेष्टत्वात् इति।

नियोगो वाक्यार्थः

नियोगो लिङाद्यर्थः। स च 'कार्यम्' 'अपूर्वं' 'विधिः' इति पदैरप्यभिधीयते। तल्लक्षणं तु —

"कृतिसाध्यं प्रधानं यत् तत् कार्यमभिधीयते" इति[१] ।

---

[१] प्र.पं. पृ.४३१.

स च कार्यरूपो नियोगः लोके क्रियारूप एव। तथा च "गामानय" इत्यादौ "गोकर्मकमानयनं कार्यम्" इति बोधः। वेदे तु "स्वर्गकामो यजेत" इत्यादौ यागादिक्रियातिरिक्तः यागादिक्रियाविषयकः यागादिक्रियाकरणकः तत्तत्फलकाम-नियोज्यकश्च। तदुक्तं —

"कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः।
कार्येऽसंघटिताकारे विषयत्वेन संमतः॥" इति।

नियोज्यलक्षणं तु —

"नियोज्यः स च कार्यं यः स्वकीयत्वेन बुध्यते" इति[1]।

"ममेदं कार्यम्" इति यस्य प्रत्ययः स नियोज्यः। स च तत्तत्फलकामः तत्तत्फलभोक्ता। यद्यपि कृतिसाध्यस्य नियोगस्य न सविषयकत्वम्, तस्य यागादिक्रियाजन्यापूर्वरूपत्वात्। तथापि कृतेः सविषयकत्वात् कृतिघटितस्य तस्य सविषयकत्वम्। तथा च "स्वर्गकामो यजेत" इत्यस्मात् "स्वर्गकामनियोज्यकं यागादिविषयकं कार्यम्" इति बोधः। इदं च प्राभाकरमतं गुरुमतमिति च शास्त्रेष्वाख्यायते।

भावना वाक्यार्थः

भावना वाक्यार्थ इति तु भट्टमतम्। सा च द्विविधा शाब्दी भावना आर्थी भावना चेति। तत्र लोके प्रयोक्तुरभिप्रायविशेषो लिङाद्यर्थः। तद्यथा "गामानय" इत्यत्र "गोकर्मकमानयनं वक्तुरभिप्रेतम्" इति बोधः। वेदे तु कर्तुः पुरुषस्याभावात् लिङादिशब्दनिष्ठा प्रेरणात्मकव्यापारविशेषरूपा भावनैव लिङाद्यर्थः। "स्वर्गकामो यजेत" इत्यादौ लिङ्श्रवणे सति "अयं लिङ् मां प्रवर्तयति" इति प्रत्ययात्। 'मत्समवेतप्रवृत्त्यनुकूलव्यापारवानयं लिङ्' इति तदर्थः। सा च लिङादिशब्द-निष्ठत्वात् शाब्दी इत्यभिधीयते। सा च "यजेत" इत्यादौ लिङ्त्वांशेनाभिधीयते। आर्थी भावना तु पुरुषप्रवृत्तिरूपा यागाद्यनुकूला पुरुषरूपार्थनिष्ठत्वादार्थी। सा च "यजेत" इत्यादावाख्यातत्वांशेनाभिधीयते। तथा च "स्वर्गकामो यजेत" इत्यतः "यागेन स्वर्गं भावयेत्" इति वाक्यार्थबोधः। "स्वर्गकामकर्तृका यागादिकरणिका स्वर्गसाध्यिका भावना" इति।

सर्वत्रैव चार्थभावनायां धात्वर्थस्य प्रायेण करणत्वेनान्वयः। गुणविधौ तु साध्यत्वेनान्वयः। यथा "दध्ना जुहोति" इति। "दध्ना होमं भावयेत्" = "दधि-करणिका होमसाध्यिका भावना" इति। क्वचित्तु आश्रयत्वेनापि धात्वर्थस्य

[1] प्र.पं. पृ. ४३३.

भावनायामन्वयः। यथा "दध्नेन्द्रियकामस्य जुहुयात्" इति। अत्र हि "निरूपकत्वसंबन्धेन होमनिष्ठेन दधिकरणत्वेनेन्द्रियं भावयेत्" इति बोधः = "होमाश्रितदधिकरणताका इन्द्रियसाध्यिका भावना" इति। शाब्दभावनायां तु पुरुषप्रवृत्तिरूपा आर्थी भावना साध्यत्वेनान्वेति, लक्षणया अर्थवादवाक्यजन्यं प्राशस्त्यज्ञानमितिकर्तव्यतात्वेन, लिङादिज्ञानं करणत्वेन। तथा च "स्वर्गकामो यजेत" इत्यादौ "अर्थवादज्ञाप्यप्राशस्त्यज्ञानेनोपकृत्य लिङादिज्ञानेन आर्थभावनां भावयेत्" = "प्राशस्त्यज्ञानेतिकर्तव्यताका अर्थभावनासाध्यिका लिङादिज्ञानकरणिका भावना" इति बोधः। वैयाकरणानां मते तु भावना धात्वर्थः।

तदेवं विधिनियोगभावनासंज्ञास्तु वाक्यार्थाः मतभेदेनाभिप्रेतास्तु अत्र न निरूपिताः। तथा हि — भावनाक्रिययोः पर्यायता प्रायशो लक्ष्यते। क्रिया वाक्यार्थ इति तु निरूपितमेवात्रेति तेन गतार्थत्वात्। भावना धात्वर्थ इति वैयाकरणाः, आख्यातार्थ इति मीमांसका इत्येतावानेव विशेषः।

किं च भावना सकर्मिकैव भवति, भावस्य फलस्य तत्र कर्मत्वात्। क्रिया तु क्वचित् "पचति" इत्यादौ सकर्मकत्वेऽपि, "नदी एधते" इत्यादौ नदीवृद्ध्यादिरूपा अकर्मिकापि भवति। एवं भावनाक्रिययोः सकर्मकत्वनैयत्यानैयत्यरूपभेदसत्त्वेऽपि साध्यत्वस्य भावनाक्रिययोरविशिष्टत्वात् अभेद एव।

किं च धात्वर्थभूता यागादिक्रिया साध्यरूपैव। तदुक्तं[१] —

"यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥" इति।

कृदभिहिता यागादिक्रिया तु सिद्धत्वेन प्रतीयते। तदुक्तं "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति[२]। तथा भावनापि प्रकृत्यर्थः प्रत्ययार्थो वा भवतु साध्यरूपैव प्रतीयत इति कथमनयोः सकर्मकत्वनैयत्यानैयत्याभ्याम् अवान्तरभेदमादाय भेदो भवेत्।

विधिनियोगौ तु लिङ्लोट्कृत्यान्तेष्वेव वाक्येष्वर्थौ इति सर्ववाक्याविषयत्वात् इह वाक्यार्थनिरूपणे ग्रन्थकृता अनादृतताविति तयोर्वाक्यार्थत्वेन प्रदर्शनं न कृतम्।

विज्ञानवादिनां वाक्यार्थः

यस्तु विज्ञानवादिनां शाक्यानां वाक्यार्थः — यत् स्वलक्षणमात्रविषयकं व्यक्तिमात्रविषयकं ज्ञानं तत् निर्विकल्पकम्। तच्चाभ्रान्तम्। यत्तु धर्मधर्मि-

---

[१] वा.प.३. १.
[२] म.भा.२.२.१९.

संसर्गविषयकं पदार्थद्वयसंसर्गविषयकं वा ज्ञानं तत् सर्वं सविकल्पकम्, भ्रान्तं च। एतच्च विकल्पपदेनाप्याख्यायते। तथा चानादिर्यः पूर्वः पूर्वो वाक्यार्थविषयो विकल्पः उत्तरोत्तरवाक्यार्थविकल्पस्य हेतुभूतः, तेनोत्तरोत्तरविकल्पे स्वकार्ये आहिता या वाक्यार्थविषया वासना, तस्या यो वाक्यश्रवणेन प्रबोधः (वाक्यार्थ-विकल्पे वाक्यार्थाकारोल्लेखस्याभिमुख्यं), तज्जन्यः कश्चन विज्ञानस्य आकारविशेषो वाक्यार्थः। स च आन्तरोऽपि बहीरूपतया अध्यस्तः, निर्विभागोऽपि अक्रमोप-जातप्रत्ययगोचरैरपि क्रमोपजातप्रत्ययगोचरैरिव, आन्तरैरपि बहीरूपतया अध्यस्तैः पदार्थैश्चित्रीकृत इव = समन्वित इव, विकल्पविशेषेण शाब्दबोधनाम्ना उल्लिख्यते।

यद्यप्यस्मिन्मते वाक्यार्थस्य निर्विभागत्वेन तद्विषयकबोधस्य विकल्परूपत्वं न युज्यते, संसर्गानवगाहित्वात्। तथापि तद्विषयस्य वाक्यार्थस्य पदार्थैः चित्री-कृतत्वेनेव लक्ष्यमाणत्वेन पदार्थसंसर्गावभासरूपत्वेन विकल्पविशेषरूपत्वं युज्यते। स च प्रायशः प्रतिभासोदर एव मन्तव्यः, प्रतिभायाः विज्ञानाकारस्य तादृशवाक्यार्थस्य चाखण्डत्वसाम्यात्।

अयं तु विशेषः — प्रतिभायाः गोचरो वाक्यार्थो बहिरस्ति वस्तुभूतः, विज्ञानाकारविशेषस्तु वाक्यार्थो नास्ति बहिर्वस्तुभूत इति। अत एव प्रतिभा-सोदरत्वमुक्तं, न तु प्रतिभात्वमेवेति।

तथा चैतस्य शाक्यपक्षस्य 'प्रतिभा वाक्यार्थः' इति पक्षे एव यथाकथंचित् अन्तर्भावः अवान्तरभेदसत्त्वेऽपीति।

किं च विज्ञानवादिमते वाक्यमपि, पूर्वपूर्वेणानादिना वाक्यविषयकेण विकल्पेन उत्तरोत्तरस्मिन् वाक्यविकल्पे स्वकार्ये आहिता या वाक्यविषया वासना, तस्याः यः प्रबोधः स्वविषयविषयकज्ञानजननरूपकार्यजननाभिमुख्यरूपः, तज्जन्यो निर्वि-भागोऽप्यक्रमोपजातप्रत्ययगोचरैरपि क्रमोपजातप्रत्ययगोचरैरिव पदैश्चित्रीकृत इव = विविधजातीयैः पदैर्घटित इव, विज्ञानपरिणामतया आन्तरोऽपि बहीरूपतयाध्य-स्यमानः, पदानां संसर्गावगाहिना विकल्पविशेषेण गोचरीक्रियमाण आकारविशेष एव। तथा च 'अन्तरोऽपि बहीरूपतयाध्यस्तो विज्ञानाकारविशेष एव वाक्यम्' इति विज्ञानवादिमतं प्रायशो 'बुद्ध्यनुसंहतिर्वाक्यम्' इत्यस्य सोदरमेव।

अत्र सादृश्यमूलको विज्ञानवाद्यभिमते विज्ञानाकारविशेषे वाक्ये बुद्ध्यनु-संहतिसोदरत्वारोपः। तच्च सादृश्यम् आन्तरत्वेन एकबुद्धिविषयत्वेन च। भेदस्तु — विज्ञानवादिनां 'विज्ञानाकारविशेषो वाक्यम्'; 'बुद्ध्यनुसंहतिर्वाक्यम्' इति वादिनां तु एकस्यां बुद्धावनुसंहतानि क्रमवन्ति पदान्येव वाक्यमिति। तथा च शाक्याभिमतस्य वाक्यार्थस्य प्रतिभायां, तदभिमतस्य वाक्यस्य च बुद्ध्यनु-संहतावन्तर्भावेण न तदभिमतयोस्तयोरसंग्रहोऽत्र वेदितव्यः।

नैयायिकमते वाक्यार्थः

नैयायिकानां तु मते, पूर्वपूर्वे ये वर्णाः तद्विषया या समूहालम्बनात्मिका स्मृतिः, तत्सहकृतो योऽन्त्यो वर्णः, नश्यदवस्थेन श्रावणप्रत्यक्षरूपेणानुभवेन विषयीक्रियमाणः स एव पदम्; एवं पूर्वपूर्वाणि यानि पदानि तावद्विषया या समूहालम्बनात्मिका स्मृतिः, तत्सहकृतमन्त्यमेव पदं नश्यदवस्थेन श्रावणप्रत्यक्षरूपेणानुभवेन विषयीक्रियमाणं वाक्यमिति। इदं प्रायशः 'पदसंघातो वाक्यम्' इति पक्ष एव अन्तर्भवति।

वर्णानां पदानां च उच्चरितप्रध्वंसिनां युगपत् अवस्थानाभावेन वस्तुभूतबाह्यसंघातासंभवेऽपि, पूर्वोक्तरीत्या स्मृत्यनुभवरूपाभ्यां बुद्धिभ्यां युगपत् उल्लेखात् यौगपद्योपपत्त्या बौद्धसंघातः संभवति। विभुविशेषगुणद्वयस्य युगपत् अवस्थितिर्विरुद्धेति उत्पद्यमानावस्थया स्मृत्या विनश्यदवस्थस्यानुभवस्य न विरोधः।

एवं पूर्वपूर्वपदानां येऽर्थाः तद्विषयकं यदेकं स्मरणं समूहालम्बनात्मकं, तत्सहकृतेन अन्त्येन पदेनोत्पद्यमाना या परस्परसंसृष्टपदार्थविषया प्रतीतिः सैव वाक्यार्थविषयकत्वात् वाक्यार्थ इति।

इदमपि मतं प्रायशः संसर्गपक्ष एवान्तर्भवति। परस्परसंसृष्टपूर्वपूर्वपदार्थसंसृष्टस्य चरमपदार्थस्यैव वाक्यार्थत्वे पदार्थानां पदशक्यत्वेनान्ततो वाक्यार्थत्वं संसर्गस्यैव। एवं च न नैयायिकसंमतवाक्यार्थासंग्रहेणात्र वाक्यार्थलक्षणानामव्याप्तिर्वक्तव्येति।

वाक्यवाक्यार्थयोः सम्बन्धः

अथ पूर्वोक्तेषु अष्टसु वाक्येषु, अनवयवे एकस्मिन् स्फोटात्मके वाक्ये, षट्सु च वाक्यार्थेषु, प्रतिभारूपे वाक्यार्थे वैयाकरणानां संमते वाक्यवाक्यार्थयोरध्यासरूपः संबन्धः। अत्र 'अध्यस्यते इति अध्यासः' इति कर्मणि घञन्तेन अध्यस्यमानं वाक्यवाक्यार्थयोस्तादात्म्यमेव संबन्ध इति ज्ञेयम्। यद्वक्ष्यति[१] —

"वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्षया।" इति।

अयमर्थः — वाक्यरूपस्य = 'एकोऽनवयवः शब्दः' इत्येवंलक्षणलक्षितस्य, वाक्यार्थे वृत्तिः = वाक्यार्थबोधनाय प्रवृत्तिः, अन्यानपेक्षया = अन्यत् वाक्यस्वरूपातिरिक्तं प्रवृत्तिनिमित्तं, तदनपेक्षया। वाक्यस्वरूपमात्रप्रवृत्तिनिमित्तापेक्षयेति यावत्।

[१] वा.प.२.२६२.

तथा च वाक्यार्थे यदि वाक्यस्वरूपस्य तादात्म्याध्यासो न स्यात्, तदा वाक्यस्वरूपस्य वाक्यार्थधर्मत्वाभावात्, वाक्यस्वरूपं वाक्यस्य वाक्यार्थबोधाय प्रवृत्तौ निमित्तं न स्यात्। घटपदस्य घटबोधाय प्रवृत्तौ हि घटधर्मो घटत्वं प्रवृत्तिनिमित्तं भवतीति।

'एकोऽनवयवः शब्दः' इति पक्षातिरिक्तेषु सप्तसु पक्षेषु वाच्यवाचकभावलक्षणा योग्यता एव संबन्धो मीमांसकदृष्ट्या। वाक्ये हि वाचकत्वयोग्यता वाचकतावच्छेदकानुपूर्वीविशेषरूपा। वाक्यार्थे च वाच्यत्वयोग्यता वाच्यतावच्छेदकधर्मविशेषरूपा। वाक्यात् वाक्यार्थबोधदर्शनेन तयोः वाच्यवाचकभावरूपः संबन्धः कल्प्यते, असंबद्धस्य बोध्यत्वे बोधकत्वे चातिप्रसङ्गात्। वाच्यवाचकभावरूपसंबन्धेन च तयोः वाच्यत्वयोग्यता वाचकत्वयोग्यता च कल्प्यते। सा च तयोः स्वरूपं धर्मविशेषो वा भवतु अन्यदेतदिति।

शाक्यदर्शनानुसारेण तु विज्ञानवादनयेन बौद्धे पदार्थे वाक्यार्थे वा बौद्धस्य पदस्य वाक्यस्य वा कार्यकारणभाव एव संबन्धः। विज्ञानाकारविशेषस्य पदस्य वाक्यस्य वा विज्ञानाकारविशेषे पदार्थे वाक्यार्थे वा तत्तद्विषयके ज्ञाने च कारणत्वात्।

विशेष्यविशेषणभावादिरूपः संबन्धो वाक्यार्थः इत्यर्थवत्सूत्रभाष्यादिपर्यालोचनेन[१] वैयाकरणमते संसर्गरूपे वाक्यार्थे वाक्यस्य संकेतलक्षणः शक्तिरूप एव संबन्धः।

अन्विताभिधानवादेऽपि पदात् सामान्यरूपेण प्रतीयमानोऽपि संसर्गो विशेषरूपेण वाक्यादेव प्रतीयत इति वाक्यस्य तत्र संकेत एव।

अभिहितान्वयवादिनैयायिकाद्यनुसारेण च पदद्वयसमभिव्याहारविशेषरूपाकाङ्क्षाभास्योऽपि संसर्गः तत्तत्पदानां तत्तदर्थे शक्त्यभावे न प्रतीयेतेति परम्परया संकेतलक्षणः शक्तिज्ञाप्य एव इत्येवमत्र वाक्यवाक्यार्थसंबन्धानां संक्षेपतः स्वरूपं बोध्यम्।

अत्र प्रागुक्तेषु अध्यास-वाच्यवाचकभाव-कार्यकारणभाव-संकेतलक्षणेषु वाक्यवाक्यार्थयोः संबन्धेषु अत्र वाक्यकाण्डे अध्यासमेव वाक्यवाक्यार्थयोः संबन्धं दर्शयामास। पदकाण्डे तु सर्वं स्पष्टतया प्रतिपादितम्।

तत्र वैयाकरणानां मते 'अखण्ड एवैकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्, प्रतिभैव वाक्यार्थः, अध्यास एव च संबन्धः' इति, 'पदं शब्दः, पदानां संघातो

---

[१] भाष्यपङ्क्तिस्तु "एतेषां पदानां सामान्ये वर्तमानानां यद्विशेषेऽवस्थानं स वाक्यार्थः" इत्याकारा (म.भा.१.२.४५)।

वाक्यम्' इति पक्षं दूषयित्वा 'अखण्डं वाक्यं शब्दः' इति पक्षव्यवस्थापनपरः टीकाकारो भर्तृहरिः व्यवस्थापयति स्म।

मीमांसकमते वाक्यस्वरूपम्

जैमिनीयाः — श्रोत्रग्राह्या वर्णा एव शब्दः। तेषामेव वाचकत्वम् = अर्थप्रत्यायकत्वम्। ते कण्ठताल्वाद्यभिघातव्यङ्ग्याः नित्या विभवश्च। त एव च वर्णाः समुदिताः पदवाक्यव्यपदेशभाजोऽर्थप्रत्यायकाः — इत्याहुः।

नैयायिकमते वाक्यस्वरूपम्

नैयायिकाः — वर्णा एव समुदिताः पदवाक्यभावमापन्नाः अर्थप्रत्यायकाः इत्याहुः। तथा च भाष्यं[१] —

"वाक्यस्थेषु खलु वर्णेषूच्चरत्सु[२] प्रतिवर्णं तावत् श्रवणं भवति। श्रुतं वर्णमेकमनेकं वा पदभावेन प्रतिसन्धत्ते। प्रतिसन्धाय पदं व्यवस्यति। पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते। पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति। संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते" इति।

न्यायलीलावत्यां[३] च —

"किं तर्हि प्रातिपदिकम्? क्रमवद्वर्णसंहतिरिति ब्रूमः।" इत्युक्तम्।

न्यायमञ्जर्यामपि[४] —

"किं पुनरिदं पदं नाम? किं च वाक्यमिति। वर्णसमूहः पदम्। पदसमूहो वाक्यम्" इत्युक्तम्। एतन्मते वर्णा अनित्याः।

वेदान्तिमते वाक्यस्वरूपम्

वेदान्तिनः "प्रत्येकवर्णानुभवभावितभावनानिचयलब्धजन्मस्मृतिदर्पणारूढवर्णमाला (वाक्यम्)" इति वदन्ति।

यदुक्तं शाब्दनिर्णये[५] —

"वर्णाः स्वज्ञानसंस्कारैः संभूय स्मृतिकारिभिः।
क्रमेणैकस्मृतौ बुद्धा बोधयन्त्यर्थमञ्जसा॥" इति।

---

[१] न्या.भा. ३.२.५९.
[२] उच्चार्यमाणेषु इत्यर्थः।
[३] न्या.ली.पृ.६७१.
[४] न्या.मं, आ.६.भा.२. पृ. १४३.
[५] शा.नि.श्लो. पृ. १२.

शांकरभाष्ये[१] च —

"सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्य एव पिपीलिकाः पङ्क्ति-बुद्धिमारोहन्ति, एवं क्रमानुरोधिन एव वर्णाः पदबुद्धिमारोक्ष्यन्ति। तत्र वर्णा-नामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतीतिर्न विरुध्यते। वृद्धव्यवहारे चेमे वर्णाः क्रमाद्यनुगृहीताः गृहीतार्थविशेषसंबन्धाश्च सन्तः स्वव्यवहारेऽप्येकैकवर्ण-ग्रहणानन्तरं समस्तप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्यवभासमानाः तं तमर्थम-व्यभिचारेण प्रत्याययिष्यन्ति।" इति निरूपितम्।

श्रीभाष्ये[२] —

"शब्दस्यैकरूपत्वमपि न साधीयः, गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात्।" इत्युक्तम्।

पदार्थतत्त्वनिर्णये[३] —

"उक्तशक्तिज्ञानजन्यं ज्ञानमागमः। तत्साधनत्वात् वर्णात्मकः शब्दोऽप्यागम इति गीयते।" इत्युक्तम्।

सांख्यमते वाक्यस्वरूपम्

सांख्याः कार्याणां वर्णानामेव वाचकत्वमिच्छन्तः वैयाकरणाभिमतं स्फोटवादं, भाट्टाभिमतं वर्णनित्यत्वं च निराहुः। तथा च सांख्यसूत्रे[४] —

"प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः"

"न शब्दनित्यत्वं कार्यताप्रतीतेः" इति।

योगमते वाक्यस्वरूपम्

पातञ्जला यौगास्तु वैयाकरणवत् आहुः। यथा योगसूत्रे[५] —

"शब्दार्थप्रत्ययानामितरेतराध्यासात् संकरः तत्प्रविभागसंयमात् सर्वभूतरुत-ज्ञानम्" इति।

अत्रत्यभाष्ये[१] "तदेकं पदमेकबुद्धिविषयमेकप्रयत्नाक्षिप्तमभागमक्रमवर्णं बौद्ध-मन्त्यवर्णप्रत्ययव्यापारोपस्थापितं परत्र प्रतिपिपादयिषया वर्णैरेवाभिधीयमानैरुच्चार्य-

---

[१] ब्र.सू.शां.भा.१.३.२८.
[२] श्रीभा.१.१.१, भा.१.पृ. १८०.
[३] पत्रम् ५०, अडयार् मातृका.
[४] सां.सू.५.५७,५८.
[५] यो.सू.३.१७.

माणैः श्रूयमाणैश्च श्रोतृभिरनादिवाग्व्यवहारवासनानुविद्धया लोकबुद्ध्या सिद्धवत्संप्रतिपत्त्या प्रतीयते। तस्य संकेतबुद्धितः प्रविभागः" इति।

तद्व्याख्यायां वाचस्पतिमिश्राः[२] एवमाहुः —

अयमभिसन्धिः — अर्थप्रत्ययो हि वर्णैर्नियतक्रमतया परस्परमसंभवद्भिरशक्यः कर्तुम्। न च संस्कारद्वारा आग्नेयादीनामिव परमापूर्वे स्वर्गे वा जनयितव्ये नियतक्रमाणामपि साहित्यमर्थबुद्ध्युपजनने च वर्णानामिति सांप्रतम्। विकल्पासहत्वात्। स खल्वयं वर्णानुभवजन्यः संस्कारः स्मृतिप्रसवहेतुः? अन्यो वा आग्नेयादिजन्य इवापूर्वाभिधानः? न तावदनन्तरः, कल्पनागौरवापत्तेः। स एव तावददृष्टपूर्वः कल्पनीयः। तस्य च क्रमवद्भिः वर्णानुभवैरेकस्य जन्यत्वं न संभवतीति तज्जातीयानेकावान्तरसंस्कारकल्पनेति गौरवम्। स्मृतिफलप्रसवानुमितस्तु संस्कारः स्वकारणानुभवविषयविषयकः न विषयान्तरे ज्ञानमुपजनयितुं शक्नोति। अन्यथा यत्किंचिदेव एकैकमनुभूय सर्वः सर्वं जानीयात्। न च प्रत्येकवर्णानुभवजनितसंस्कारपिण्डलब्धजन्मस्मृतिदर्पणसमारोहिणो वर्णाः समधिगतसहभावाः वाचका इति सांप्रतम्। क्रमाक्रमविपरीतक्रमानुभूतानां तत्राविशेषेणैकार्थधीजननप्रसङ्गात्। न चैतत्स्मरणज्ञानं पूर्वानुभववर्ति पौर्वापर्यमपि गोचरयितुमर्हति। तस्मात् वर्णेभ्योऽसंभवन्नर्थप्रत्ययः एकपदानुभवमेव स्वनिमित्तमुपकल्पयति।

वर्णानां पदरूपतापत्तौ पदानां वाक्यरूपताप्राप्तौ च न्यायमञ्जरीप्रदर्शिताः विविधा मार्गाः[३]

अथ कया पुनः कल्पनया पदवाक्यभावमुपगता वर्णाः पदार्थवाक्यार्थप्रतीतिमादध्युः।

अत्र केचित् — प्रथमं प्रथमवर्णज्ञानम्। ततः संस्कारः। ततो द्वितीयवर्णज्ञानम्। तेन प्रथमवर्णज्ञानजनितेन च संस्कारेण पटुतरः संस्कारः। ततः तृतीयवर्णज्ञानम्। तेन, प्राक्तनेन संस्कारेण च पटुतरः संस्कारः। एवं यावदन्त्यवर्णज्ञानम्। अन्त्यवर्णज्ञानानन्तरं तु पूर्वसंस्कारात् सकलपूर्ववर्णविषयकमेकं स्मरणम्। तेनान्त्यवर्णज्ञानस्य विनश्यत्ता। एवं च विनश्यदवस्थग्रहणस्मरणविषयीकृतो वर्णसमूहः पदमिति ज्ञायते।

---

[१] यो.भा..३.१७, पृ. ३१८.
[२] तत्त्ववैशारदी.३.१७, पृ. ३२०.
[३] न्या.मं, आ.६.भा.२. पृ. १९२.

तस्मात् पदज्ञानात् संस्कारः। ततः पूर्वोक्तरीत्या वर्णक्रमेण द्वितीयपदज्ञानम्। तेन, प्रथमपदज्ञानजन्येन संस्कारेण च पटुतरसंस्कारो जन्यते। पुनस्तेनैव क्रमेण तृतीयपदज्ञानम्। तेन, प्राक्तनेन संस्कारेण च पीवरतरः संस्कारो जायते। एवं यावदन्त्यपदज्ञानम्। तदनन्तरं स्थवीयसा संस्कारेण सर्वपदविषयकमेकं स्मरण-मुपजन्यते। सोऽयं स्मरणानुभवविषयीकृतवर्णसमूह एव पदं 'पदसमूहो वाक्यम्' इत्युच्यते। ततो वाक्यार्थप्रतीतिः। संस्कारस्य च संस्कारान्तरजनकत्वमवश्य-मेषितव्यम्। अन्यथा सर्वत्र क्रियाभ्यासोऽनर्थकः स्यात् इति।

एतत्पक्षे दोषाः[१]

अत्र वदन्ति — नेयं प्रक्रिया साध्वी, ज्ञानयौगपद्यप्रसङ्गात्। तथा हि — अन्तिमपदज्ञानानन्तरं यथा पूर्वपदस्मरणं तथा तदैव संकेतस्मरणेनापि भवि-तव्यम्। संकेतस्मरणं विना पदार्थोपस्थित्यसंभवात्। तदभावे च वाक्यार्थ-प्रतीत्यनुपपत्तेः। तथा च अन्त्यपदज्ञानानन्तरं पूर्वपदस्मरणसंकेतस्मरणयोः युगपत् उत्पादात् ज्ञानयौगपद्यप्रसङ्गः।

अथ संकेतस्मरणानन्तरं पूर्वपदस्मरणमुपेयते, तथापि तत्स्मरणकाले पदार्थ-ज्ञानोत्पादात् पुनरपि ज्ञानयौगपद्यं प्रसजति। पदार्थज्ञानोत्तरकालं पूर्वपदस्मरण-स्वीकारे च तत्काले अन्त्यपदज्ञाननाशात् अन्तिमपदरहितं वाक्यं भवेत्।

पक्षान्तरोपन्यासः

अत्रान्ये आचक्षते — वर्णक्रमेण प्रथमपदज्ञानं जायते। ततः संकेतस्मरणम्, ततः तत्पदावच्छिन्नतदर्थज्ञानम्। ततः संस्कारः। ततः तथैव क्रमेण द्वितीय-पदज्ञानम्। तदनु संकेतस्मरणम्, ततः तत्पदावच्छिन्नतदर्थज्ञानम्। ततः तेन प्रथमपदार्थज्ञानजन्यसंस्कारेण च दृढतरः संस्कारः। पुनर्वर्णक्रमेण तृतीयपद-ज्ञानम्। पुनः संकेतस्मरणम्। तृतीयपदार्थज्ञानम्। तेन च प्राच्येन संस्कारेण च दृढतरः संस्कारः। एवं तावत् यावदन्त्यपदज्ञानात् तदर्थावगतिः। तदनन्तरं पूर्वोपचितात् महतः संस्कारात् तत्तत्पदविशिष्टसर्वार्थविषयकमेकं स्मरणम्, यस्मिन् स्ववाचकशब्दावच्छिन्नाः सर्वे पूर्वे पदार्थाः विषयाः भवन्ति। तस्मिन् स्मरणे अन्त्यपदार्थज्ञाने च तत्तदर्थावच्छेदकत्वेन भासमानानां पदानां समूहो वाक्यम्। अवच्छेद्यत्वेन भासमानार्थसमूहो वाक्यार्थः। एवं रीत्या स्मर्यमाणानुभूयमानौ पदपदार्थसमूहौ वाक्यवाक्यार्थौ इति।

---

[१] न्या.मं, आ.६.भा.२. पृ. १९३.

तन्निराकरणम्[1]

एतदपि न विचारक्षमम्। अन्त्यपदार्थप्रतीतिसमये तदवच्छेदकतया प्रतिभासमानं पदं तत्प्रतीतौ कारणमिति अविवादम्। स्वयं तस्यां प्रतिभासमानत्वात् कर्मापि भवत्येव। तस्येदानीं कर्मत्वे करणमन्यत् चिन्त्यम्। एकस्यामेव क्रियायां स्वस्य कर्मत्वकरणत्वयोरनुपपत्तेः। न तावत् श्रोत्रं तत्र करणम्। अन्त्यपदप्रतीत्यनन्तरमेव तद्व्यापारस्य विरतत्वात्। विरम्य च पुनर्व्याप्रियमाणत्वानुपपत्तेः। नापि मनः करणम्, तस्य बाह्ये विषये स्वातन्त्र्येण प्रवर्तितुमसमर्थत्वात्। तत्प्रवृत्तौ सर्वाण्येव प्रथमपदात् प्रभृति पदानि मानसव्यवसायविषया भवन्तु, किं स्मर्यमाणत्वमन्येषामुच्यते।

पक्षान्तरम्[2]

अपरे त्वाहुः — प्रथमं पदज्ञानम्, ततः संकेतस्मरणम्, ततः पदार्थज्ञानम्। पदार्थज्ञानात् पदज्ञानस्य विनश्यत्ता। विनश्यदवस्थपदज्ञानसापेक्षं श्रोत्रं प्रथमपदावच्छिन्नद्वितीयपदज्ञानं जनयति। द्वितीयपदज्ञानानन्तरं पुनः संकेतस्मरणम्। ततो द्वितीयपदार्थज्ञानम्। तेन द्वितीयपदज्ञानस्य विनश्यत्ता। विनश्यदवस्थद्वितीयपदज्ञानसहायात् श्रोत्रात् द्वितीयपदावच्छिन्नतृतीयपदज्ञानमिति क्रमेण अन्तिमपदज्ञानमुत्पद्यते। तदनन्तरं प्राक्तनप्रक्रियावत् नात्र पूर्वपदस्मरणमुपयुज्यते। तत्फलस्य विनाशदशापतितपदज्ञानकृतावच्छेदमहिम्नैव सिद्धत्वात्। तस्य हि फलमन्त्यपदावगमसमये सकलपूर्वपदोपस्थापनम्। तच्च विनश्यदवस्थपूर्वपदज्ञानकृतोत्तरोत्तरपदावच्छेदबलादेव लब्धमिति किं तत्स्मरणेन। तदभावाच्च नात्र ज्ञानयौगपद्यादिचोद्यावसरोऽस्ति।

तन्निराकृतिः

नेदमपि निर्दोषं कल्पनम्। प्रथमपदोपरागपूर्वकद्वितीयपदज्ञानोपजननानुपपत्तेः। प्रथमपदज्ञानानन्तरं हि संकेतस्मरणम्। तेनैव तस्य विनश्यत्ता। पदार्थज्ञानकाले पदज्ञानं नष्टमेव। नाशावस्थं ज्ञानं कथं ज्ञानान्तरं जनयेत्। अपि च पदज्ञानं संस्कार इव संकेतस्मृतेरेव कारणम्, संस्कारेणेव तेन विना तदनुत्पादात्। तदिह पदज्ञानं संकेतस्मरणं पदार्थज्ञानमिति त्रीणि ज्ञानानि युगपदवतिष्ठन्त इति वक्तव्यं स्यात् इति महान् प्रमादः।

---

[1] न्या.मं, आ.६.भा.२. पृ. १९५.

[2] न्या.मं, आ.६.भा.२. पृ. १९६.

किं च द्वितीयपदं यदा क्वचित् प्रथमं प्रयुक्तमासीत् तदा तस्य शुद्धस्यैव स्वार्थे संकेतग्रहणं वृत्तम्। अधुना तु तत् पदं पदान्तरोपरक्तं जातमिति तादृशस्य अगृहीतसंबन्धत्वात् अर्थप्रतिपत्तिहेतुत्वं न स्यात्।

नैयायिकमते वर्णैः वाक्यार्थबोधक्रमनिरूपणम्[1]

अत्रोच्यते। चिरातिक्रान्तत्वम् अचिरातिक्रान्तत्वं वा न स्मृतिकारणम्। संस्कारकरणकं हि स्मरणम्। तच्च सद्यः प्रलीने चिरप्रलीने वा विषये न विशिष्यत इत्येवं पूर्वेषां पदानां चिरतिरोहितानां व्यवहितोच्चारितानां च संस्कारात् स्मरणं भविष्यति। अन्त्यपदस्य चानुभूयमानत्वोपगमे ज्ञानयौगपद्यादिप्रमादप्रसङ्ग इति वरमन्त्यपदमपि स्मर्यमाणमस्तु। स्मृत्यारूढान्येव सर्वपदानि वाक्यार्थमवगमयन्ति। तत्र चेयं कल्पना — वर्णक्रमेण तावत् प्रथमपदज्ञानम्, ततः संकेतस्मरणं संस्कारश्च युगपत् भवतः। ज्ञानयोर्हि यौगपद्यं शास्त्रे प्रतिषिद्धं, न संस्कारज्ञानयोः। ततः पदार्थज्ञानं, तेनापि संस्कारः। पुनर्वर्णक्रमेण द्वितीयपदज्ञानम्। ततः संकेतस्मरणम्, पूर्वसंस्कारसहितेन च तेन पटुतरः संस्कारः। पुनः पूर्ववर्णक्रमेण तृतीयपदज्ञानम्, संकेतस्मरणम्, पूर्वसंस्कारापेक्षः पटुतरः संस्कार इत्येवं पदज्ञानजनिते पीवरे संस्कारे, पदार्थज्ञानजनिते च तादृशे संस्कारे स्थिते, अन्त्यपदार्थज्ञानानन्तरं पदसंस्कारात् सर्वपदविषयस्मृतिः, पदार्थसंस्काराच्च सकलपदार्थविषयकस्मृतिरिति क्रमेण द्वे स्मृती भवतः। तत्रैकस्यां स्मृतावुपारूढः पदसमूहो वाक्यम्, इतरस्यां स्मृतावुपारूढः पदार्थसमूहो वाक्यार्थः।

अथ वा कृतं स्मरणकल्पनया। अन्त्यपदार्थज्ञानानन्तरं सकलपदपदार्थविषयको मानसोऽनुव्यवसायः शतादिप्रत्ययस्थानीयः[2] भविष्यति। तदुपारूढानि पदानि वाक्यम्, तदुपारूढाश्च पदार्था वाक्यार्थः। तथाविधश्च मानसोऽनुव्यवसायः सकललोकसाक्षिकत्वात् अप्रत्याख्येयः।

ननु असंसृष्टाः "गौरश्वः पुरुषो हस्ती" इति पदार्थाः न वाक्यार्थभावमधिरोहन्ति। अन्त्यपदार्थज्ञानानन्तरभाविना स्मरणेन अनुव्यवसायेन वा विषयीक्रियमाणास्तु यथावगमम् असंसृष्टा एव विषयीक्रियन्ते। संसर्गरूपवाक्यार्थावगमस्तु कुतस्त्य इति चेत् —

---

[1] न्या.मं, आ.६.भा.२. पृ. १९८.

[2] निरूपितमेतत् पूर्वं — "दृश्यते च विनश्वरेष्वपि पदार्थान्तरेषु क्रमानुभूतेषु युगपदनुव्यवसायो मानसः 'शतमाम्राणि भक्षितवान् देवदत्तः' इति" इति ग्रन्थे (न्या.मं, आ.६.भा.१. पृ. १६२)।

अत्र सन्ति वादिनां प्रक्रियाभेदाः।

केचित् आचक्षते — अन्विता एव पदार्थाः पदैरभिधीयन्ते। अन्यथा पदानां वाक्यत्वायोगात् इति।

अन्ये तु मन्यन्ते — शुद्धानामेव पदार्थानां पदैरभिधानम्, पदैरभिहिताः पदार्थाः वाक्यार्थं संसर्गं लक्षयन्तीति।

सिद्धान्ते तु — शुद्धा एव पदार्थाः पदैरभिधीयन्ते। पदाभिहितास्ते परस्परमाकाङ्क्षासंनिधियोग्यत्वपर्यालोचनया संसर्गमवगमयन्तीति।

नैयायिकमतेन वाक्यार्थस्वरूपविचारः

वाक्यार्थविषये सप्तपक्षाणामनुवादः

न्यायमञ्जर्यां[१] जयन्तभट्टैः वाक्यार्थो नाम कः इत्यस्मिन् विषये बहवः पक्षा उपक्षिप्ताः। तथा हि —

एवं पदार्थे निर्णीते वाक्यार्थश्चिन्त्यतेऽधुना।
तत्र विप्रतिपत्तिश्च बहुरूपा विपश्चिताम्॥

(१) केचित् आचक्षते — बाह्यस्य वाक्यार्थस्यासंभवात् पदार्थसंसर्गनिर्भासं ज्ञानमेव वाक्यार्थ इति।

(२) अन्ये तु — वास्तवः पदार्थानां परस्परसंसर्गो बाह्य एव वाक्यार्थ इत्याहुः।

(३) अन्यव्यवच्छेदो वाक्यार्थ इत्यपरे। शुक्लादिपदान्तरोच्चारणे कृष्णादिनिवृत्तेरवगमात्।

(४) अपरे संगिरन्ते — संसर्गस्य दुरपह्नवत्वात् तस्य च गुणप्रधानभावगर्भत्वात् गुणीभूतकारकनिकरनिर्वर्त्या प्रधानभूता क्रिया वाक्यार्थ इति।

(५) अन्ये मन्यन्ते — भाव्यनिष्ठः पुरुषव्यापारः करोत्यर्थः भावनाशब्दवाच्यो वाक्यार्थः। लिङादिशब्दव्यापारवाच्यस्तु शब्दभावनाख्यः पुरुषस्यार्थभावनानुष्ठाने प्रवर्तकः स विधिरुच्यत इति।

(६) अन्ये ब्रुवते — द्वयाभिधाने लिङादेः प्रत्ययस्य भारगौरवात् विधिरेव वाक्यार्थः। स एवानुष्ठेयः प्रवर्तकश्चेति।

तत्रापि द्वयी विमतिः — कैश्चित् प्रेषणात्मकत्वं शब्दस्याभ्युपगतम्, लिङादिशब्देभ्यस्तथा तदवगमात्, कार्यान्तरानवगमात्, भावार्थमात्रकार्यत्वपक्षस्य चातिदौर्बल्यात् विधिरेवानुष्ठेय इत्यर्थात् तस्य कार्यत्वम्।

[१] न्या.मं, आ.५.भा.२. पृ. ६९-७०.

अन्यैस्तु कार्यत्वेन नियोगप्रतीतेः अर्थात् तस्य प्रेरकत्वमिति संश्रितम्। कार्यमवगतं स्वसिद्धये पुरुषं नियुङ्क्ते। "ममेदं कार्यम्" इत्यवगते हि तत्सिद्धये पुरुषः प्रवर्तत इति।

(७) अपरे पुनः अभिनवं वाक्यार्थमुद्योगं नाम वर्णयाम्बभूवुः

इत्यनेकशाखा विप्रतिपत्तिः — इति।

वाक्यार्थविषये नैयायिकमतम्

एतान् पक्षान् विस्तरेणानूद्य खण्डयित्वा स्वपक्ष एवमुपन्यस्तः[१] —

परपक्षान् प्रतिक्षिप्य प्रेरकं कथितं फलम्।
एवं परमतद्विष्टैः वाक्यार्थः स्वयमुच्यताम्॥

उच्यते — "यमर्थमधिकृत्य पुरुषः प्रवर्तते तत् प्रयोजनम्" इति वदता सूत्रकृता[२] फलं प्रवर्तकमिति प्रदर्शितम्।

"प्रमाणेन खल्वयं ज्ञाता अर्थमुपलभ्य तमीप्सति जिहासति वा। तस्येप्सा-जिहासाप्रयुक्तस्य समीहा प्रवृत्तिरुच्यते। सामर्थ्यं पुनरस्याः फलेनाभिसंबन्धः"

इति च ब्रुवाणो भाष्यकारोऽपि[३] फलेप्सां प्रवर्तिकां प्रादीदृशदिति तदीयां सरणिमनुसरद्भिरस्माभिरपि तथैव कथितम्।

वाक्यार्थस्य सूत्रभाष्यकाराभ्यामनुक्तौ कारणम्[४]

वाक्यार्थस्तु न क्वचिदपि सूत्रकारभाष्यकाराभ्यां सूचित इति कुतः शिक्षित्वा वाक्यार्थस्वरूपं वयमाचक्ष्महे। किमिति ताभ्यामसौ न सूचित इति चेत् — पृथक्प्रस्थाना हीमा विद्याः। प्रमाणविद्या चेयमान्वीक्षिकी, न वाक्यार्थविद्येति।

यद्येवं पदार्थोऽपि कस्मादिह दर्शितः "व्यक्त्याकृतिजातयस्तु पदार्थः" इति[५]। स्थाने प्रश्नः। स तु शब्दानामर्थासंस्पर्शितां वदन्तं रुदन्तं च शमयितुं शब्दप्रामाण्यसिद्धये सूत्रकृता यत्नः कृतः।

यद्येवं वाक्यार्थमपि बाह्यं वास्तवमन्तरेण शास्त्रस्य प्रमाणता न प्रतिष्ठां लभत इति तत्रापि प्रयत्नः कर्तव्य एव। सत्यम्। पदार्थप्रतिपादनयत्नेन तु कृतेन वाक्यार्थे यत्नं कृतं मन्यते सूत्रकारः, यदयं पृथक् पदार्थेभ्यो न वाक्यार्थमुपदिशति स्म,

---

[१] न्या.मं, आ.५.भा.२. पृ. १३५-१४२.
[२] न्या.सू. १.१.२४.
[३] न्या.भा.१.१.१.
[४] न्या.मं, आ.५.भा.२. पृ. १३५.
[५] न्या.सू.२.२.६५.

तस्मादयमस्याशयः पदार्थ एव वाक्यार्थ इति। तत् किममुमेव पक्षमनुमोदामहे पदार्थ एव वाक्यार्थ इति। बाढमिति ब्रूमः। किं तु नैकः पदार्थो वाक्यार्थः, अनेकस्तु पदार्थो वाक्यार्थः।

पदार्थस्य वाक्यार्थत्वे आक्षेपः

नन्वनेकोऽपि भवन् पदार्थ एवासौ। न च पदार्थो वाक्यार्थो भवितुमर्हति। सामान्ये हि पदं वर्तते, विशेषे वाक्यम् (गोसामान्ये गोपदम्, आनयनान्वित-गोव्यक्तिविशेषे "गामानय" इति वाक्यम्)। अन्यच्च सामान्यम्, अन्यो विशेषः। अन्यत्राप्युक्तं "यदत्राधिक्यं स वाक्यार्थः" इति[1]। तस्मात् अन्यः पदार्थः, अन्यश्च वाक्यार्थः।

अनेकः पदार्थो वाक्यार्थ इति समाधानम्

उच्यते। यदेतदुक्तमस्माभिः, अनेकः पदार्थो वाक्यार्थः न पुनरेक इति; तन्न गृहीतं भवता। एतदुक्तं भवति — परस्परसंसृष्टपदार्थसमुदायो वाक्यार्थ इति संसर्ग एवाधिक इति "यदत्राधिक्यम्" इत्युच्यते। व्यक्तिविशेषाक्षेपं विना संसर्गो नोपपद्यते, संसर्गस्य व्यक्तिविशेषगतत्वादिति विशेषो वाक्यार्थ इत्युच्यते। संसर्गस्तु स्वरूपतो न वाक्यार्थः, अपदार्थत्वात्, "गौः शुक्ल आनीयताम्" इति पदसमुदाये संसर्गवाचकस्य पदस्याश्रवणात्। श्रवणेऽपि सुतरामनन्वयात्। न हि "गौः शुक्ल आनीयतां संसर्गः" इति वाक्यमन्वितं भवति। तदुक्तं[2] "व्यतिषक्ततोऽवगतेर्व्यतिषङ्गस्य" इति। न च तन्तुभिरिव पटः, वीरणैरिव कटः, तदतिरिक्तोऽवयविस्थानीयः वाक्यार्थः पदार्थैः निर्वर्त्यमानः उपलभ्यते। नापि पदार्थावयवको वाक्यार्थः। जातिगुणक्रियावगमेऽपि अवयविबुद्धेरभावात्। तेन पृथक् वाक्यार्थं नोपदिष्टवानाचार्यः।

ननु[3] गुणप्रधानभावमन्तरेण न संसर्गोऽवकल्पते। न चैकस्मिन् वाक्ये बहूनि प्रधानानि भवन्ति। प्राधान्यमेव हि तथा सति न स्यात्। गुणास्तु बहवो भवन्ति। यदिदमनेकगुणोपरक्तमेकं किंचित् प्रधानं स वाक्यार्थ इति तद्विषयेयमेकस्वभावा बुद्धिः। सत्यम्। तर्हि त एव संसृष्टाः पदार्था अवभासन्ते, न तदारब्धः कश्चिदेकः। संसर्गसिद्धिकृतस्तु गुणप्रधानभावोऽभ्युपगम्यते।

---

[1] म.भा.२.३.४६.

[2] बृहती.१.१.७, भा.१.पृ. ३८६.

[3] न्या.मं, आ.५.भा.२. पृ. १३७.

पदार्थानां गुणप्रधानभावानियमः

स च गुणप्रधानभावो न नियतः, येन एकमेवेदं प्रधानमिति व्यवस्थाप्येत। क्वचित् कारकं प्रधानम्, क्रिया गुणः। द्रव्यस्य चिकीर्षितत्वेनावगमात् "व्रीहीन् प्रोक्षति" इत्यादौ।

सिद्धतन्त्रं क्वचित् साध्यं, तत्तन्त्रमितरत् क्वचित्।
शब्दप्रयोगतात्पर्यपर्यालोचनया भवेत॥

तस्मात् गुणप्रधानभावानियमात् अन्योन्यसंसृष्टः पदार्थसमुदायो वाक्यार्थ इति एतावदेव श्रेयः। संसर्गावगमे च सर्वेषामविवादः।

वाक्यार्थं मन्वते येऽपि नियोगं भावनां क्रियाम्।
तैरप्यन्योन्यसंसृष्टः पदार्थग्राम इष्यते॥

प्रधानभूतपदार्थो वाक्यार्थः[१]

अथ वा गुणीभूतेतरपदार्थानुगृहीतः एक एव प्रधानभूतः पदार्थो वाक्यार्थ इति एकाकारप्रतीतिबलात् उपेयताम्। एकस्त्वयमसावर्थ इति न निर्णेतुं शक्यते। यदि तु अवश्यमेकस्य कस्यचित् अभिषेककलशो दातव्यः, तत् फलस्यैव दीयताम्। न हि निष्प्रयोजनं किंचित् वाक्यमुच्चार्यते।

क्वचित् साक्षात् पदोपात्तं क्वचित् प्रकरणागतम्।
क्वचिदालोचनालभ्यं फलं सर्वत्र गम्यते॥

सकलेन च कारककलापेन क्रिया निर्वर्त्यते। क्रियया च फलम्। न तु फलेनान्यत् किमपि निर्वर्त्यत इति प्रधानत्वात् फलमेव वाक्यार्थः।

बौद्धमतपरामर्शः[२]

यत्तु बाह्यस्य वाक्यार्थस्य सर्वप्रकारेणासंभवात् पदार्थसंसर्गनिर्भासं ज्ञानमेव वाक्यार्थः, तेनैव लोकव्यवहार इत्युक्तं, तन्न। बाह्यार्थसद्भावस्य विस्तरेणान्यत्र साधितत्वात्। अतः कोऽवसरो विज्ञानमात्रवाक्यार्थत्ववर्णनस्य।

न च पदार्थव्यतिरिक्तो नास्ति वाक्यार्थः। इदं तावद् भवान् पृष्टो व्याचष्टाम्, किं "गौः" इति पदात् यादृशी प्रतिपत्तिः तादृश्येव "गौः शुक्ल आनीयताम्" इति वाक्यात्? उत भिन्ने एते प्रतिपत्ती? इति।

---

[१] न्या.मं, आ.५.भा.२. पृ. १३९.
[२] न्या.मं, आ.५.भा.२. पृ. ७२.

तत्र तुल्यत्वं तावत् प्रतीत्योरनुभवविरुद्धम्। प्रतीत्योः वैलक्षण्ये तु विषय-वैलक्षण्यमपि बलात् उपनतम्। असति विषयभेदे प्रतीतिभेदानुपपत्तेः। यश्च तदतिरिक्तो विषयः स वाक्यार्थः। एवं केवलगुणक्रियापदोच्चारणेऽपि योजनीयम्। तदुक्तं — "यदत्राधिक्यं स वाक्यार्थः" इति[१]।

संसर्गोऽपि पदार्थानां प्रतीयत एव। न हि "गौरश्वः पुरुषो हस्ती" इत्य-संसृष्टपदार्थप्रतीतिवत् "गौः शुक्ल आनीयताम्" इति प्रतीतिः। यथा च संसर्गः प्रतीयते, यश्च प्रतीत्युपायः तत् सर्वं निर्णेष्यते[२]।

व्यवच्छेदस्य वाक्यार्थत्वनिरासः[३]

बाह्य एव भवन् व्यवच्छेदो न वाक्यार्थः, विधिरूपत्वेनावगमात्। संसर्गमन्तरेण चान्यव्यवच्छेदस्यापि दुरुपपादत्वात्। न हि शुक्लपदार्थेनासंसृष्टः गोपदार्थः कृष्णा-दिभ्यो व्यावृत्त इत्यवगम्यते।

ननु गोशब्दात् सर्वगवीषु बुद्धिरुपसर्पन्ती शुक्लपदसंनिधानात् अन्यतः कृष्णा-देरपसर्पतीति व्यवच्छेदो वाक्यार्थ इति चेत् — मैवम्। तत्संबन्धावगमपूर्वकत्वात् (शुक्लसंबन्धज्ञानपूर्वकत्वात्) तदितरकृष्णादिव्यावृत्तेः। तत्संबन्धावबोधेनैव सिद्धे वाक्यस्यार्थवत्त्वे, पश्चात् कृष्णादिव्यवच्छेदावगमो यदि भवति, भवतु कामं, न त्वसौ वाक्यार्थ इति।

क्रियायाः वाक्यार्थत्वपक्षः[४]

क्रियैव वाक्यार्थ इति केचित् वर्णयन्ति। अयमेषामाशयः —

पदार्थाः किल वाक्यार्थभावमायान्ति संहताः।
अपेक्षानुगुणान्योन्यव्यतिषङ्गविशेषतः॥

न च गुणप्रधानभावमन्तरेण संसर्गः पदार्थानामवकल्पते। न चाख्यातरहितं वाक्यं किंचित् प्रयोगयोग्यम्। अनुच्चरिते तस्मिन् आकाङ्क्षाया अनिवृत्तेः। श्रोतुराकाङ्क्षानिवृत्तये च लोके वाक्यानां प्रयोगः। लोकवच्च वेदादप्यर्थोऽवसीयते। आख्याताच्च पूर्वापरीभूतः साध्यरूपोऽर्थोऽवगम्यते न सिद्धरूपः। सिद्धसाध्य-समुच्चारणे कस्य किमधीनतेति चिन्तायां साध्यसिद्धये सिद्धमुपात्तमिति प्रतीयते।

साध्यं च साध्यमानत्वात् प्रधानमवगम्यते।
तस्मात्तदेव वाक्यार्थः क्रियातो नापरं च यत्॥

---

[१] म.भा.२.३.४६.
[२] अस्मिन्नेव ग्रन्थे उत्तरत्र अन्विताभिधान-अभिहितान्वयवादनिरूपणप्रसङ्गे निरूपयिष्यते।
[३] न्या.मं, आ.५.भा.२. पृ. ७३.
[४] न्या.मं, आ.५.भा.२. पृ. ७३.

क्रिया हि प्रतीयमाना स्वनिष्पत्तये साधनान्याक्षिपति, तैश्च योग्यैः संबध्यते। तानि च कानिचित् पदान्तरोपात्तानि भवन्ति, कानिचन वाक्यान्तरोपनीतानि। कानिचित् प्रकरणान्तरपाठलभ्यानि। कानिचिदारादुपकारकाणि, कानिचित् संनिपत्योपकारकाणि। कानिचित् अन्तिकोपनिपतितान्यपि योग्यताविरहात् परिहरति। कानिचित् अतिदूरवर्तीन्यपि स्वसम्पत्त्यर्थमाहरति। इत्येवं दृष्टादृष्टोपकारकानेककारककलापसम्पाद्यमानस्वरूपा क्रियैव वाक्यार्थः।

यजेत दद्याज्जुहुयात् अधीयीतेति चोदितः।
क्रियां साध्यतया वेत्ति तां च लोकोऽनुतिष्ठति॥

कर्तुरपि क्रियाशेषत्वमेव[१]

अधिकारिपदमपि क्रियापेक्षितकर्तृसमर्पणेन तदुपयोगितामेवावलम्बते 'अस्यां क्रियायामयं कर्ता', 'अनेनेयं क्रिया सम्पद्यते' इति। तत्र च न क्रिया स्वप्राधान्यमुज्झति। न हि क्रिया कर्त्रर्था, कर्ता तु क्रियार्थः। स हि तां निर्वर्तयन्नुपलभ्यते। शब्दोऽपि तथैवोपदिशति "एष इदं कुर्यात्" इति।

कर्तुरप्राधान्येऽपि प्रवृत्त्युपपत्तिः

किमर्थं पुनरसौ क्रियामनुतिष्ठतीति चेत् — शब्दप्रामाण्यादेवेति ब्रूमः। शब्देन हि चोदितः "त्वयेदं कर्तव्यम्" इति। स चेन्नियुक्तो नानुतिष्ठन् चोदनामतिक्रामेत्। शास्त्रप्रत्ययाच्च क्रियामनुतिष्ठति। विरतफलाभिलाषः कर्मसंस्कारादेव परिपक्वकषायः स्तोकस्तोकप्रपञ्चप्रविलापनद्वारेणोत्तमाधिकारमारूढः तत एव ज्ञातस्वरूपसुखः तमेव परमपुरुषार्थमासादयतीति दीर्घा सा कथा, तिष्ठतु, किमनया। सर्वथा क्रियाप्राधान्यात् सैव वाक्यार्थ इति। तदुक्तं[२] — "द्रव्यगुणसंस्कारेषु बादरिः" इति। एतदुक्तं भवति — 'द्रव्यादीनामेव क्रियां प्रति शेषत्वमनुगम्यते, न क्रियाया अन्यशेषत्वम्' इति।

क्रियाप्राधान्यखण्डनम्[३]

अत्रोच्यते — कुत इदं क्रियायाः प्राधान्यमुपेयते, वस्तुवृत्तेन वा? शाब्दप्रत्ययमहिम्ना वा?

---

[१] न्या.मं, आ.५.भा.२. पृ. ७५.
[२] जै.सू. ३.१.३.
[३] न्या.मं, आ.५.भा.२. पृ. ७६.

फलस्य वस्तुतस्तावत् प्राधान्यमवगम्यते।
न सचेताः क्रियां कांचिदनुतिष्ठति निष्फलाम्॥
वेदात् गुरुनियोगाद्वा शासनाद्वा महीभुजः।
न वै फलमपश्यन्तः क्रियां विदधते जनाः॥
बालो माणवकोऽप्येष चपेटामात्रहानये।
मोदकाद्याप्तये वापि करोति गुरुशासनम्॥

फलस्य वाक्यार्थत्वम्[१]

भावनायाः वाक्यार्थत्वं भाट्टाः वदन्ति, नियोगस्य वाक्यार्थत्वं प्राभाकराः। तदुभयं विस्तरेणानूद्य दूषयित्वा फलस्य वाक्यार्थत्वं न्यायमञ्जरीकारः निगमयति 'क्रियाया अपि फलशेषत्वात्' इति। तथा हि —

ननु फलस्य स्वर्गादेः निसर्गतः सिद्धरूपत्वात् कारकैः सह संबन्धो न प्राप्नोति। सिद्धस्य च कः संबन्धः? क्रियागर्भ इति चेत् तर्हि फलं कारकाणि च क्रियया संबध्यन्ते, को विशेषः फलस्य? सत्यम् — परं तु कारकाणि साधनत्वेन क्रियया संबध्यन्ते, फलं तु साध्यत्वेन। क्रियया हि फलं साध्यते, न फलेन क्रिया इत्यतः फलस्यैव प्राधान्यमिति सिद्धम्।

अन्योन्यसंगतिविशेषित एव यस्माद्वाक्यार्थभावमुपयाति पदार्थपुञ्जः।
एतच्च चेतसि निधाय ततो न भिन्नं वाक्यार्थमप्यकथयच्च न सूत्रकारः॥
प्राधान्ययोगादथ वा फलस्य वाक्यार्थता तत्र सतां हि यत्नः।
प्रयोजनं सूत्रकृता तदेव प्रवर्तकत्वेन किलोपदिष्टम॥

उद्योगस्य वाक्यार्थत्वपक्षः[२]

अपरे पुनः लिङादिशब्दश्रवणे सति समुपजायमानम् आत्मस्पन्दविशेषम् उद्योगं नाम वाक्यार्थमाचक्षते। तत्स्वरूपं तु वयं न जानीमः, 'कोऽयमात्मस्पन्दो नाम' इति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा हि नव आत्मनो विशेषगुणा भवन्ति, नान्ये। तत्रायमात्मस्पन्दः बुद्धिर्वा स्यात्, प्रयत्नो वा, इच्छाद्वेषयोरन्यतरो वा? अन्ये तु विकल्पयितुमपि न युक्ताः। तत्र यदि बुद्धिः आत्मस्पन्द उच्यते, तर्हि प्रतिभा वाक्यार्थ इत्युक्तं भवति; न नूतनं किंचित् उत्प्रेक्षितमेतत्। अथ प्रयत्न आत्मस्पन्दः, तर्हि भावनायाः नामान्तरकरणम् उद्योग इति।

---

[१] न्या.मं, आ.५.भा.२. पृ. १४०.
[२] न्या.मं, आ.५.भा.२. पृ. १४०.

अथ इच्छाद्वेषयोरन्यतरोऽसौ, तर्हि सुखेच्छा दुःखजिहासा वा वाक्यार्थ इति अक्षपादपक्ष एवायं नापूर्वं किंचित्।

अथापि भाट्टपरिकल्पितो व्यापार आत्मस्पन्दः, सोऽपि भावनैव, नार्थान्तरम्।

अथानुष्ठेयः प्रेरकः कश्चिदर्थ उद्योगः, स तर्हि नियोग एव। उपसर्गान्यत्वमिदम्, (उत् नि इत्युपसर्गभेदमात्रं) न वस्त्वन्यत्।

तस्मादश्रुतपूर्वेण कृतमुद्योगपर्वणा।
स भारतमनुष्याणां गोचरो न तु मादृशाम्॥

प्रतिभायाः वाक्यार्थत्वपक्षः

अन्यैस्तु (भर्तृहर्यनुसारिभिः) प्रतिभा वाक्यार्थ इष्यते। तत्पक्षस्तु संसर्गनिर्भासज्ञाननिराकरणेन प्रागेव प्रतिक्षिप्तः।

प्रतिभा खलु विज्ञानं तच्च शब्देन जन्यते।
न तु शब्दस्य विषयः रूपधीरिव चक्षुषः॥

बाह्यस्य विषयस्याभावात् धीरेव विषय इति चेत् — न। तस्य (बाह्यार्थस्य) समर्थितत्वात्।

योऽपि "व्याघ्र आयातः" इत्युक्ते शूरकातरनराधिकरणनानाप्रकारकार्योत्पादः, स बाह्येऽर्थे व्याघ्रागमनादौ प्रतिपन्ने वासनानुसारेण भवन् न प्रतिभामात्रहेतुको भवति। तस्य हि ज्ञायमानोऽर्थः करणम्, न तज्ज्ञानमात्रम्। अर्थस्तदानीं नास्तीति चेत् — विप्रलम्भकवाक्यमिदमसत्यार्थं भविष्यति, न त्वबाह्यविषयं तत्। यथा अवस्थिते वनितात्मनि बाह्येऽर्थे वासनानुसारेण कुणप इति, कामिनीति, भक्ष्यमिति प्रतिभाः भवन्ति, तथा शब्दार्थेऽपि व्याघ्रागमनेऽवगते शूराणामुत्साहः, कातराणां भयम् इत्यादि कार्यं भवति। न तु एतावता प्रतिभा शब्दार्थो भवितुमर्हति।

तस्मात् वाक्यप्रयोजनत्वेन यदि प्रतिभा वाक्यार्थः कथ्यते, कथ्यतां नाम, न त्वसौ शब्दस्याभिधेया। अनभिधेयापि संसर्गवत् वाक्यार्थ इति चेत् — तत्राप्युक्तं "संसृष्टा वाक्यार्थः, न संसर्गः। एवमिहापि प्रतिभावन्तोऽर्था वाक्यार्थः, न प्रतिभा" इति।

शब्दस्य च प्रत्यक्षवत् वर्तमानार्थनिष्ठत्वाभावात् अनागताद्यर्थाभिधायिनः अर्थासंनिधानेन प्रतिभापरत्वं यदुच्यते, तदप्ययुक्तम्। अनागतादिविषयत्वेऽपि तस्यार्थविषयत्वमेवेति कृतं विस्तरेण।

लघुमञ्जूषायां वाक्यशक्तिविचारः

यथा पदस्य पदार्थे शक्तिः, तथा वाक्यस्य वाक्यार्थे शक्तिरिति वैयाकरणाः। तथा चोक्तं लघुमञ्जूषायां[१] —

संबन्धः पदे वाक्ये च। तदाह न्यायभाष्यकारः[२] "समयज्ञानार्थं चेदं पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणम्, वाक्यलक्षणाया वाचोऽर्थो लक्षणम्" इति। अनेन हि पदेष्विव वाक्येष्वपि ऐश्वरः संकेत इति स्पष्टमेवोक्तम्। वाक्यविषये समयग्राहकमाकाङ्क्षाद्यपि। समयग्राहकमित्यस्य साधूनामित्यादिः इति।

तथा वाक्ये तु न शक्तिः, आकाङ्क्षादिवशादेव वाक्यार्थप्रतीतिसिद्धेः इति नैयायिकाः। वैयाकरणानां मते वाक्यस्फोटो मुख्यः। लोके तस्यैवार्थबोधकत्वात्। शक्तिग्राहकशिरोमणिना वृद्धव्यवहारेण प्रथमं वाक्य एव शक्तिग्रहात्। वाक्येनैव निराकाङ्क्षस्य वाक्यार्थस्य ज्ञानेन, वाक्येनैव वाक्यार्थस्य पूर्णत्वात्। तत्र प्रतिवाक्यं संकेतग्रहासंभवात् तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च, कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्म आचार्याः — इति[३]।

वैयाकरणमतेन वाक्यशक्तिः इति मतस्यानुवादः

व्याकरणाधिकरणे मीमांसाकौस्तुभे[४] वाक्यशक्तिविषयको विचार ईषद्विस्तरेण प्रस्तुतः। स तथैव लिख्यते —

न्यायविरोधश्च वाक्यस्य वाक्यार्थे शक्त्यङ्गीकारे प्रसज्यते। तथा हि वैयाकरणास्तावदेवं प्रतिपादयन्ति। वक्तृवाक्यप्रयोगानन्तरं श्रोतृप्रवृत्तिं दृष्ट्वा व्युत्पित्सुः तावत् संपूर्णे वाक्ये विशिष्टवाक्यार्थविषयिणीं शक्तिं प्रथमतो निश्चिनोतीत्यविवादम्। पश्चात् आवापोद्वापाभ्यां प्रत्येकपदनिष्ठैव शक्तिः, न तु तत्पदघटितवाक्यनिष्ठा, तत्पदघटितानां वाक्यानामनन्तत्वेनानन्तशक्तिकल्पनापत्तेः इत्येवं प्रत्येति। अतश्च पश्चात् लाघवतर्कसहकृततत्पदनिष्ठशक्तिग्रहेण वाक्यशक्तिग्रहो यद्यपि मिथ्येत्याभाति, तथापि तस्य प्रथमोत्पन्नत्वेन असंजातविरोधित्वात् उपजीव्यत्वाच्च प्रमात्वमेवावधारयति। तत्र च द्वयी गतिः —

१) अखण्डमेव वाक्यं वर्णव्यङ्ग्यम्, एकः पटः इतिवत् एकं वाक्यमित्यबाधितप्रतीतेः सत्त्वात्। तदेव च विशिष्टार्थे शक्तम्। तत्र च पदवर्णादीनामसतामेव

---

[१] ल.मं.पृ. ३४.
[२] न्या.भा.२.१.५५.
[३] ल.मं. पृ. १-५.
[४] मी.कौ.१.३.२४, पृ. ११८.

वाक्यान्तरावयवसारूप्यमात्रेण अवभासः, न तु वस्तुतोऽवस्थानम्। प्रकृतिप्रत्ययादिरूपेण व्याकरणव्याख्यानमपि कल्पितरूपस्यैव पदादेः पारमार्थिकत्वाभावेऽपि न विरुध्यते।

२) अथ वा आनुपूर्वीविशेषविशिष्टानि पदान्येव वाक्यम्। तस्यैव वाक्यार्थे शक्तिः, न तु लाघवतर्कसहकृतापि पदार्थे एव पदानाम्। अन्यथा "दधीदम्" इत्यादौ ह्रस्वेकारयुक्तस्यैव इदंदधिपदद्वयस्य प्रत्येकं पदार्थे शक्तिग्रहात्, सन्धियुक्तप्रयोगे च ह्रस्वेकारप्रयोगाभावेन पदार्थानुपस्थितौ तत्संसर्गबोधकत्वानुपपत्तेः। एवं "विष्णो अव" इत्यत्र प्रत्येकशक्तिग्रहे "विष्णोऽव" इत्यत्र अकारलोपे सति पदार्थानुपस्थितौ तत्संसर्गबोधानुपपत्तिर्द्रष्टव्या।

न च तत्रादेशेन स्थानिनमनुमाय तेन पदार्थोपस्थितिरिति वाच्यम्। स्थानिनां व्याकरणभेदेनाननुगतत्वात् व्यभिचारेण ह्रस्वेकारान्तपदद्वयस्यैव नियमेनानुपपत्तेः। अतस्तत्र तावदवश्यं वाक्यस्यैव वाक्यार्थे शक्तिः कल्प्येति सर्वत्र तथैव स्वीकर्तव्यम्। वाक्यशक्तिग्रहश्च, प्रत्येकपदशक्तिग्रहाभावे "गामानय" इत्यतो वाक्यार्थबोधस्य अजायमानत्वात्, पदशक्तिग्रहसत्त्वे च अपूर्ववाक्यश्रवणेऽपि झटिति वाक्यार्थबोधस्य जायमानत्वात् अन्वयव्यतिरेकाभ्यां पदशक्तिग्रहजन्यः इत्यध्यवसीयते। अतश्च 'भू सत्तायाम्' इत्यादिपदार्थान्वाख्यानमपि कारणीभूतपदशक्तिविषयत्वान्न विरुध्यत इति।

वाक्यशक्तिखण्डनम्[१]

तदेतत् न्यायमूलत्वात्, न्यायस्य चाभाससमानरूपतया मूलत्वासंभवान्निराकर्तव्यम्। तथा हि — न तावदखण्डं वाक्यं वर्णव्यङ्ग्यम्। तद्धि शुद्धवर्णव्यङ्ग्यम् आनुपूर्वीविशिष्टवर्णव्यङ्ग्यं वा? नाद्यः, "सरः" "रसः" इत्यादौ वर्णभेदाभावेनार्थविशेषप्रतीत्यनुपपत्तेः। नान्त्यः, आनुपूर्वीविशेषविशिष्टानामेव वर्णपदादीनां वाक्यत्वोपपत्तौ अखण्डवाक्यस्वीकारे प्रमाणाभावात्।

अत एव च पदवर्णादिप्रतीतेः सकलजनानुभवसिद्धायाः भ्रान्तित्वकल्पनया अविद्यमानविषयकत्वकल्पनमन्याय्यमेव। न च वाक्यान्तरावयवसारूप्येणासौ भ्रम इत्यपि सुवचम्। वाक्यान्तरावयवस्याप्यसत्यत्वेन तत्सारूप्यानुपपत्तेः।

न च लेख्यगवयाद्यवयवानां मुखादिरूपेणासत्यानामपि मुख्यगवयाद्यवयवमुखादिसारूप्यवत् प्रकृतेऽप्युपपद्यते इति वाच्यम्। लेख्यगवयाद्यवयवानां मुखादिरूपेणासत्यानामपि स्वरूपेण सत्यत्वात् सादृश्योपपत्तेः। प्रकृते तु वर्णपदादीनां

[१] मी.कौ. पृ. ११९.

स्वरूपेणाप्यसत्यत्वान्न तदुपपत्तिरिति वैषम्यम्। अत एव वैयाकरणैरपि नायं पक्षः पारमार्थिक इत्युक्तम्।

किं च पक्षद्वयेऽपि वाक्यशक्त्यङ्गीकारे उक्तयुक्त्या पदशक्तिग्रहस्य कारणत्वमवश्यं वक्तव्यम्। अतश्चावश्यकत्वेन पदशक्तिस्मरणादेव पदार्थोपस्थितिद्वारा वाक्यार्थबोधोपपत्तौ वाक्यशक्तिकल्पनं निष्प्रमाणकम्।

न च "दधीदं" "विष्णोऽव" इत्यादौ वाक्यार्थानुपपत्तिरेव वाक्यशक्तिकल्पने प्रमाणमिति वाच्यम्। तवापि तत्र वाक्यार्थबोधानुपपत्तेस्तुल्यत्वात्। तत्रापि हि वाक्यशक्तिग्रहं प्रति अवयवशक्तिग्रहस्य कारणत्वमङ्गीक्रियते न वा? अन्त्येऽवयवशक्तिग्रहाभावेऽपि वाक्यश्रवणात् तदर्थबोधापत्तिः। आद्ये ह्रस्वेकाराद्यन्तपदद्वयश्रवणाभावेन तद्गतशक्तिग्रहणाभावात् वाक्यशक्तिग्रहानुपपत्तेः। यथाकथंचित् शक्तिस्मरणाङ्गीकारे वा तदाश्रयपदस्मरणस्याप्युपपत्तेः, अवयवशक्तिमात्रेण वाक्यशक्तिं विनैव वाक्यार्थबोधोपपत्तिः।

अत उभाभ्यामेवं परिहर्तव्यम् — आदेश एवैतादृशविषये स्थानिनः उपस्थापकः। अत एवानधीतव्याकरणस्य स्थानिमत्त्वाज्ञाने दधिशब्दव्युत्पत्तिमतोऽपि "दधीदम्" इति वाक्यात् शाब्दबोधो न जायते। न च व्याकरणभेदेन स्थानिनामननुगतत्वात् व्यभिचारः शङ्क्यः। व्यापकाननुगमस्य दोषरूपत्वेऽपि स्मारकाननुगमस्यादोषत्वात्। न ह्येकसंबन्धिदर्शनेनापरसंबन्धिस्मरणे प्रतिसंबन्धी अनुगन्तुं शक्यते। अपि त्वननुगमेऽपि यद्विषय एव संस्कारोद्बोधः, तस्यैव स्मरणं नान्यस्य। अतश्च यस्य यद्व्याकरणज्ञानं, यद्विषय एव संस्कारोद्बोधः, तस्य तद्विषय एव स्मरणसंभवात् नातिप्रसङ्ग इति सर्वमनवद्यम्। विस्तरेणैतन्निरूपितं तद्भूताधिकरणे वार्त्तिककृता[१]।

अतश्च पदानामेव पदार्थेषु शक्तिकल्पनात् वाक्यार्थस्य च समभिव्याहारादेव (लक्षणया) भानोपपत्तेर्न तत्र वाक्यस्य शक्तिर्युक्ता।

वाक्यार्थो लक्षणया भासत इति मतं लक्षणालक्षणविरहान्न संगच्छते। अतः पदानि पदार्थानेव शक्त्या लक्षणया वा प्रतिपादयन्ति, न तु वाक्यार्थम्। स तु पदजन्यपदार्थज्ञानेनैव आकाङ्क्षायोग्यतासंनिधिज्ञानसहकृतेन ज्ञाप्यते, न तु तत्र शक्तिलक्षणान्यतरवृत्तिरूपपदव्यापारकल्पना, अन्यलभ्यत्वात् —

इति कौस्तुभे निरूपितम्।

---

[१] श्लो. वा. १.१.७.२५.

शब्दवृत्त्यगम्यस्य वाक्यार्थस्य कथं शाब्दत्वम्? इति शङ्कासमाधाने

नन्वेवं पदानां पदार्थावबोधमात्रेण व्यापारपर्यवसाने वाक्यार्थबोधस्य शब्दजन्यत्वाभावात् वाक्यार्थस्य अशाब्दत्वापत्तिरिति चेत् —

अत्राहुर्न्यायरत्नाकरे पार्थसारथिमिश्राः[१] —

पदार्थेषु पदानां पदार्थबोधजनकीभूतवृत्तिरूपव्यापारपर्यवसानेऽपि पदार्थबोधमात्रस्य प्रमाणान्तरसिद्धत्वेन निष्फलस्यानुद्देश्यत्वात्, वाक्यार्थबोधस्यातज्जन्यत्वेऽपि शब्दप्रयोगोद्देश्यत्वावगतेः शब्दस्य वाक्यार्थे तात्पर्यावगमात् तात्पर्यविषयत्वेन वाक्यार्थस्य शाब्दत्वोपपत्तिः इति।

न चैतादृशतात्पर्यविषयत्वस्य शाब्दत्वप्रयोजकत्वे पदार्थानामनुद्देश्यत्वेन (तात्पर्याविषयत्वेन) अशाब्दत्वापत्तिरिति वाच्यम्। तेषामपि शक्तिलक्षणान्यतरवृत्तिविषयत्वेन शाब्दत्वोपपत्तेः।

न चैवं तात्पर्यस्य अवृत्तिरूपत्वेन शाब्दत्वप्रयोजकाननुगमः शङ्कनीयः। तात्पर्यस्यापि वृत्तित्वाङ्गीकारात्।

अत एव न्यायसुधाकृतापि भावार्थाधिकरणादौ[२] "कृदन्तशब्दस्थले अवाच्यत्वेऽपि भावनायास्तात्पर्यवृत्त्या शाब्दत्वम्" इत्यादिग्रन्थेन तात्पर्यस्यापि वृत्तित्वमङ्गीकृतम्।

खण्डदेवमतम्

खण्डदेवभट्टास्तु[३] —

उद्देश्यताख्यतात्पर्यस्वीकारे शुकादिवाक्यस्थले वेदे च उद्देश्यताख्यतात्पर्यासंभवेन वाक्यार्थस्य शाब्दत्वानुपपत्तिः स्यात्।

अथ उद्देश्यताख्यतात्पर्यानङ्गीकारेऽपि शब्दनिष्ठस्य तात्पर्याख्यधर्मविशेषस्यैव शब्दत्वानुमेयस्य स्वीकारात् तद्विषयत्वमेव शाब्दत्वप्रयोजकमिति चेत् — एवमपि अक्लृप्तधर्मान्तरस्वीकारे प्रमाणाभावात् वाक्यशक्तिवादिवैयाकरणमततुल्यमेव गौरवम्। अतो यथाश्रुतवार्त्तिकानुसारेण एवं परिहर्तव्यम् —

वाक्यार्थस्य पदजन्यपदार्थोपस्थितिजन्यज्ञानविषयत्वेन स्वतोऽशाब्दत्वेऽपि पदार्थानां शक्तिलक्षणागौण्यन्यतमरूपवृत्तिगम्यत्वेन स्वतः शाब्दत्वोपपत्तिः। अत एवोक्तं वार्त्तिककृता[१] —

---

[१] न्या.र.वाक्य.२३०. पृ.६४१.

[२] वा.न्या.सु.२.१.१, भा.२. पृ. ३०६.

[३] मी.कौ.१.१.२४, पृ. १२२.

"तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते॥
अशाब्देऽपि च वाक्यार्थे न पदार्थेष्वशाब्दता।
वाक्यार्थस्येव नैतेषां निमित्तान्तरसंभवः॥" इति।[1]

एवं "संसर्गं शाब्दयामि" इत्यनुव्यवसायोऽपि शब्दप्रयोज्यत्वात् शब्दानुपूर्वीज्ञानकारणकत्वात् वाक्यार्थबोधस्य नानुपपन्नः।

अत्र च संसर्गबोधः शक्यपदार्थसंबन्धज्ञानमन्तरेणैव जायत इति न तत्र लक्षणा अङ्गीकृता। तथा हि — वाक्यार्थः संसर्गः। न तत्र लक्षणा संभवति। स्वबोध्यसंबन्धो हि लक्षणा। सा च ज्ञातैव कारणम्, न स्वरूपसती। "गङ्गायां घोषः" इत्यादौ प्रवाहसंबन्धज्ञानाभावे तीरानुपस्थितेः। तदत्र "घटः शुक्लः" इत्यादौ जातिगुणयोः तत्तत्पदबोध्ययोः लक्ष्येण एकार्थसमवायेन सह यः संबन्धः स्वरूपसंबन्धरूपः स किं ज्ञातो न वा? आद्ये संबन्धज्ञानं प्रति संबन्धिज्ञानस्य कारणत्वात्, लक्षणाज्ञानात् पूर्वं संबन्धिनः एकार्थसमवायस्य ज्ञातत्वाङ्गीकारे तस्यानधिगतत्वाभावात् तत्र शब्दस्य प्रामाण्यानुपपत्तिः। अन्त्ये लक्षणाज्ञानाभावात् न तज्जन्यत्वं संसर्गरूपवाक्यार्थबोधस्य युक्तमिति। तीरादिबोधस्य तु शक्यसंबन्धज्ञानं विना अजायमानत्वात् लाक्षणिकत्वव्यवहारः आनुपूर्वीज्ञानाजन्यत्वाद्वा इति वैषम्यम्। तदेवं वाक्यार्थस्य पदजन्यपदार्थोपस्थितिलभ्यत्वेन तत्र न वाक्यस्य शक्तिः। 'अनन्यलभ्यः शब्दार्थः' इति न्यायात्। शाब्दत्वमपि तस्य पदप्रयोज्यत्वात् = पदजन्यपदार्थोपस्थितिजन्यज्ञानविषयत्वात्, उपपद्यते — इति निरूपयन्ति।

तदयं निष्कर्षः — संसर्गरूपो वाक्यार्थः पदनिष्ठया आनुभाविकशक्त्या भासत इति अन्विताभिधानवादिनः प्राभाकराः। पदार्थनिष्ठया शक्त्या लक्षणापर्यायया भासत इति भाट्टाः। आकाङ्क्षया भासत इति तार्किकाः। खण्डदेवोऽपि तार्किकसरणिमेव स्वीकरोति। तात्पर्यवृत्त्या[2] भासत इति न्यायसुधाकार-पार्थसारथिमिश्रादयः, आलंकारिकाश्चेति।

इति वाक्यवाक्यार्थस्वरूपविचारः

[1] श्लो.वा.वाक्य.२२९ cd, २३०.
[2] विशेषतश्चात्र विषये तात्पर्यविचारप्रकरणे द्रष्टव्यम्।

स्फोटविचारः

वाक्यार्थबोधनिमित्तानि

तत्त्वबिन्दौ[1] वाचस्पतिमिश्राः "इह खलु पदकदम्बकश्रवणसमनन्तरमविवादं विदितसंगतीनामनधिगतार्थविषया धीरुदयमासादयति पुंसाम्। अस्याः निमित्तं प्रति विवदन्ते वादिनः" इत्युपक्रम्य —

"(१) अनवयवमेव वाक्यमनाद्यविद्योपदर्शितालीकवर्णपदविभागमस्याः निमित्त-मिति केचित्।

(२) पारमार्थिकपूर्वपूर्वपदपदार्थानुभवजनितसंस्कारसहितमन्त्यवर्णविज्ञानमित्येके।

(३) प्रत्येकवर्णपदपदार्थानुभवभावितभावनानिचयलब्धजन्मस्मृतिदर्पणारूढा वर्णमाला इत्यन्ये।

(४) पदान्येवाकाङ्क्षितयोग्यसंनिहितपदार्थान्तरान्वितस्वार्थाभिधायीनीत्यपरे।

(५) पदैरेव समभिव्याहारवद्भिरभिहिताः स्वार्थाः आकाङ्क्षा-योग्यता-आसत्ति-सध्रीचीनाः वाक्यार्थधीहेतवः इत्याचार्याः"

इति पञ्च पक्षानुपन्यस्य इतरपक्षचतुष्टयखण्डनपूर्वकम् अन्तिमं पञ्चमं पक्षं प्रतिष्ठापयाम्बभूवुः।

प्राभाकरमते वाक्यार्थबोधनिमित्तम्

प्रकरणपञ्चिकायां वाक्यार्थमातृकायां[2] —

तत्र कार्यवाक्यार्थवादिन एव भावं, भावनाम्, अपूर्वं च वाक्यार्थान् प्रति-जानते। तत्रापूर्वमेव वाक्यार्थ इति साधनीयम्। तस्य मूलं पदानामन्विताभि-धायितेति तामेव तावदादौ परिशोधयति।

अत्र ये प्रत्यस्तमितपदविभागं वाक्यमेव वाक्यार्थस्य वाचकमित्याचक्षते (वैयाकरणाः), ये च वाक्यान्त्यवर्ण एवेति (मीमांसाभाष्यकाराः, नैयायिकाश्च), ये च पदैरनन्विताः पदार्था अभिहिताः परस्परान्वयमात्मनोऽवगमयन्तीति (वार्त्तिक-काराः कुमारिलभट्टाः), तन्निरासाय प्रतिजानीते —

पदेभ्य एव वाक्यार्थप्रत्ययो जायते यथा।
तथा वयं निबध्नीमः प्रभाकरगुरोर्मतम्॥ इति[1]।

---

[1] त.बिं.पृ. ४-५.
[2] प्र.पं.पृ. ३७६.

पदेभ्य एव न वाक्यात्, नाप्यन्त्यवर्णात्, नापि पदार्थेभ्य इत्यर्थः। तं प्रकारं वक्तुमुपक्रमते —

पदैरेवान्वितस्वार्थमात्रोपक्षीणशक्तिभिः।
स्वार्थाश्चेत् बोधिता बुद्धो वाक्यार्थोऽपि तथा सति॥

— इति[२] पदानामन्विताभिधायित्वाश्रयणेन वाक्यार्थबोधकता प्रदर्शिता।

भाट्टमते वाक्यार्थबोधनिमित्तम्

न्यायरत्नमालायां[३] वाक्यार्थनिर्णये पार्थसारथिमिश्राः —

"वाक्यार्थसंविदो मूलं बहुधा वादिनो विदुः।
तत्र वार्त्तिककारीयैर्न्यायैर्मार्गः प्रदर्श्यते॥"

इत्युपक्रम्य —

"(१) तत्र केचित् तावत् अविभागमेव वाक्यं व्यञ्जकध्वनिभेदात् तेन तेन वर्ण-पदविपर्यासात्मनावगम्यमानं तस्य तस्य वाक्यार्थस्य प्रतिपादकमिति मन्यन्ते।

(२) अन्ये तु एवंविधमेव ज्ञानं वाक्यम्, तदनन्तरं चानेकजातिगुणद्रव्यक्रिया-संसर्गावभासं जायमानं विज्ञानमेव वाक्यार्थः। कार्यकारणभाव एव च वाक्य-वाक्यार्थयोः संबन्ध इति प्रतिजानते। उभयस्मिन्नपि पक्षे काल्पनिकपदपदार्थ-संबन्धव्युत्पत्तिरभ्युपायः।

(३) अपरे तु पदवत् वाक्यमपि पूर्वपूर्ववर्णसंस्कारसचिवोऽन्त्यो वर्णो वाचकः इत्यादिना मार्गेण सावयवमेव प्रतिलब्धसंबन्धावयवभूतपदजनितपदार्थसंविदुपाय-सहायं वाक्यार्थस्य वाचकं संगिरन्ते।

(४) पदान्येव पदार्थान्तरान्वितं स्वार्थमभिदधतीति टीकाकारपादाः।

(५) पदैरभिहिताः पदार्था एव वाक्यार्थं प्रतिपादयन्तीत्याचार्याः।"

इति पञ्च पक्षान् उपन्यस्यान्तिमं पक्षं समर्थयाम्बभूवुः।

तत्र वैयाकरणसंमतस्य स्फोटस्य वाक्यार्थबोधकत्वविषयः संगृह्यते।

न्यायमञ्जर्यां स्फोटवादः

नैयायिकमते अर्थबोधकत्वेनाभिमतस्य पदस्य वाक्यस्य च स्वरूपं कीदृशमिति निरूप्यते। जयन्तभट्टाः न्यायमञ्जर्याम् इत्थं विवेचयन्ति[४] —

---

[१] प्र.पं.पृ. ३७७.
[२] प्र.पं.पृ. ३७७.
[३] न्या.र.मा.पृ.९२-९३.
[४] न्या.मं, आ.६.भा.२. पृ. १४३.

ननु नाद्यापि शब्दस्य निरणायि प्रमाणता।
बीजं पदार्थवाक्यार्थबुद्धेर्न हि निरूपितम्॥

उच्यते — किमत्र निरूपणीयम्? यदनन्तरं हि यद्भवति तत् तस्य निमित्तम्। पदवाक्ययोः श्रवणे सति पदार्थवाक्यार्थयोः प्रतीतिर्भवतीति पदवाक्ये एव पदार्थवाक्यार्थबोधयोर्निमित्ते।

किं पुनरिदं पदं नाम, किं च वाक्यमिति? उक्तमत्र वर्णसमूहः पदम्, पदसमूहो वाक्यम् इति।

स्फोटवादोपक्षेपः

नन्वेतदेव न युज्यते। न हि वर्णानां समूहः कश्चिदस्ति वास्तवः। तेन कुतस्तत्समूहः पदं भविष्यति?। तदभावाच्च न तरां पदसमूहो वाक्यमवकल्पते। वर्णानां व्यस्तानां वाचकत्वं वा, समस्तानां वेति विकल्पोपहतत्वेन वाचकत्वं नोपपद्यते। तस्मात् अन्य एव स्फोटात्मकः शब्दोऽर्थप्रत्यायक इति वदन्ति वैयाकरणाः।

स्फोटवादनिराकरणस्य उद्देश्यम्

ननु एवमस्तु। वर्णातिरिक्तः स्फोट एवार्थप्रतिपादको भवतु। का क्षतिर्नैयायिकानाम्? कथं न क्षतिः। आप्तप्रणीतत्वेन हि शब्दस्य प्रामाण्यमुक्तं नैयायिकैः। स्फोटस्य च नित्यत्वेन नाप्तप्रणीतत्वम्। अतश्च यस्यानित्यत्वं वर्णात्मनः शब्दस्य साधितम्, नासावर्थप्रतीतिहेतुः। अतो न प्रमाणम्। यश्चार्थप्रतीतिहेतुः स्फोटात्मा शब्दः, तस्य नानित्यत्वम्, नाप्याप्तप्रणीतत्वमिति अस्थाने नैयायिकाः क्लिष्टा भवेयुः। तस्मात् अनित्यानां वर्णानामेव वाचकत्वं प्रतिष्ठापनीयम्, पराकरणीयश्च स्फोटवादः।

वर्णा एवार्थप्रत्यायका इति प्रतिज्ञा

तदुच्यते। गकारादिवर्णज्ञाने सति अर्थप्रतीतेर्भावात्, तदभावे च तदभावात् वर्णानामेव अर्थप्रत्यायनसामर्थ्यम्। त एव च श्रोत्रग्राह्यतया शब्दव्यपदेशभाज इति न प्रतीत्यनुपारूढः स्फोटो नाम कश्चित् प्रत्यक्षानुमानातीतः कल्पनीयः।

अनित्यानां वर्णानामर्थप्रत्यायकत्वाक्षेपः

आह — कथमेवं भविष्यति? दूरापेता इमे मनोरथाः। कुतो वर्णानामर्थप्रत्यायकत्वम्? ते हि वर्णाः समस्ताः वा अर्थं प्रतिपादयेयुः? व्यस्ता वा? न

तावत् व्यस्ताः, एकैकवर्णश्रवणे सति अर्थप्रतीतेरनुत्पादात्। सामस्त्यं तु वर्णानां नास्त्येव। तद्धि सत्तामात्रेण वा स्यात्, प्रतीयमानत्वेन वा। नैयायिकमते तावत् सत्तया यौगपद्यं न भवति वर्णानाम्, आशुविनाशित्वात्। मीमांसकमते वर्णानां नित्यत्वात् सत्तया यौगपद्यस्य सकलवर्णसाधारणत्वात् केन वर्णसमुदायेन कोऽर्थः प्रत्याय्येतेति नावधार्यते।

अथोच्येत — न चक्षुरादीनामिव वर्णानामज्ञातानामर्थप्रतीतिहेतुत्वम्, अपि तु ज्ञातानाम्। एवं युगपत् ज्ञानविषयभूतानां वर्णानामर्थप्रत्यायकत्वमिति।

एतदप्यघटमानम्। प्रतीतिसामस्त्यं हि किमेकवक्तृप्रयुक्तानां वर्णानाम्, उत नानापुरुषोच्चरितानाम्। तत्र एकदा अनेकपुरुषोच्चरितानां कोलाहलस्वभावत्वेन स्वरूपभेद एव ज्ञातुमशक्य इति कस्य सामस्त्यमसामस्त्यं वा चिन्त्यते।

एकवक्तृप्रयुक्तानां तु प्रयत्नस्थानकरणक्रमानुसारात् वर्णानां क्रमोऽवश्यंभावी। क्रमे च सति एकैकस्मादपि वर्णात् अर्थप्रतीतिः प्रसज्यते। न चासौ दृश्यत इति व्यस्तसमस्तविकल्पानुपपत्तेः न वर्णाः वाचकाः।

वर्णविषयकबुद्धीनामर्थप्रत्यायकत्वासंभवः

वर्णविषया बुद्धयोऽपि तथैव विकल्पनीयाः, समस्ताः व्यस्ता वा अर्थप्रत्यायका इति। ता अपि न युगपत् संभवन्ति। क्रमे सति एकैकवर्णबुद्धेरपि अर्थप्रतीतिः प्रसज्यते।

अन्तिमवर्णस्याप्यर्थप्रत्यायकत्वासंभवः

यदप्युच्यते — पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यवर्णः प्रत्यायक इति, तदप्ययुक्तम्। संस्कारो हि नाम यद्विषयकानुभवजनितः तद्विषयकमेव स्मरणमुपजनयति। तथा च वर्णविषयकानुभवजनितः संस्कारः कथमर्थविषयकं ज्ञानं जनयेत्। न च संस्कारोऽसौ वर्णस्मरणद्वारा अर्थज्ञानं जनयतीति वाच्यम्। ज्ञानयौगपद्यप्रसङ्गात्। अन्त्यवर्णज्ञानानन्तरं हि पूर्ववर्णस्मरणमिव समयस्मरणमपि तदैव आपतति। ततश्च ज्ञानयौगपद्यं प्रसज्यते। न च वर्णस्मरणसमयस्मरणयोः क्रमेणोत्पादे किंचित्कारणमस्ति। क्रमेणोत्पत्तावपि समयस्मरणकालेऽन्त्यवर्णज्ञानं नष्टमिति कस्य साहाय्यकं पूर्ववर्णस्मृतिर्विधास्यति?

एतच्चानेकपूर्ववर्णविषयकैकस्मृतिमभ्युपगम्योक्तम्। वस्तुतस्तु सर्ववर्णगोचरा एका स्मृतिर्न संभवति। तत्तद्वर्णविषयकैः क्रमेण जातैः भिन्नैरनुभवैः जाताः संस्काराः भिन्ना एव स्मृतीः जनयेयुः। न त्वेकामनेकवर्णविषयकस्मृतिम्।

अथ नष्टानष्टसर्ववर्णविषयकं संकलनापर्यायसमूहालम्बनात्मकं ज्ञानं भविष्यति। तद्विषयीकृताश्च वर्णाः अर्थं बोधयन्तीति चेत् — मैवम्। तथाविध-ज्ञानोत्पत्तौ कारणाभावात्। तस्मिन् ज्ञाने हि अतीतवर्णाः वर्तमानोऽन्त्यवर्णश्च विषयः। इन्द्रियं वर्तमानवर्णमात्रग्रहणसमर्थम्। संस्कारास्तु अतीतवर्णमात्रग्रहण-समर्थाः। उभयग्रहणसामर्थ्यं तयोः कस्यापि नास्तीति। न च इन्द्रियं संस्कारश्च मिलित्वा उक्तज्ञानं जनयत इति वाच्यम्। सहचारदर्शनाद्युद्बुद्धस्मरणमात्रसमर्थत्वेन ज्ञातस्य संस्कारस्य इन्द्रियेण सह ज्ञानान्तरे व्यापृत्यभावात्।

किं च वर्णानां वाचकत्वे विपरीतक्रमेणोच्चारणेऽपि "सरो" "रस" इत्यादौ सरःपदस्य रसवाचकत्वं रसपदस्य सरोवाचकत्वं च स्यात्। समूहालम्बनात्मक-ज्ञाने तद्घटकसर्ववर्णानां विषयत्वात्।

अथ क्रमविशिष्टाः वर्णाः अर्थवाचका इति चेत् — क्रमः किं वर्णातिरिक्तः उत तदनतिरिक्तः। अन्त्ये "सरो" "रस" इत्युभयत्र त एव वर्णा इति कथं न बोधकाः। आद्ये वर्णातिरिक्तं किमपि अधिकं वाचकमभ्युपगतं भवतीति स्फोटपक्ष एव।

व्युत्पत्तेरर्थप्रत्यायकत्वमित्याक्षेपः

ननु व्युत्पत्तिवशेन शब्दः अर्थप्रत्यायकतामुपयाति। व्युत्पत्तौ सत्यां यावन्तो यत्क्रमा वर्णाः यमर्थमभिवदन्तो दृष्टाः, ते तावन्तः तत्क्रमकाः तमर्थमभिव-दिष्यन्ति। तदुक्तं[१] —

"यावन्तो यादृशा ये च यदर्थप्रतिपादने।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः॥" इति चेत् —

तस्य समाधानम्

उच्यते। व्युत्पत्तिरेवेयं विचारणीया वर्तते। परावगतिपूर्विका हि शब्दात् स्वय-मवगतिः। प्रयोज्यवृद्धस्य प्रवृत्तिं पश्यन् बालः तस्य प्रवृत्तिं प्रयोजकवृद्धोक्त-वाक्यार्थज्ञानमूलिकां जानन् हि व्युत्पद्यते। परावगतौ च के कियन्तः कथं कमर्थं प्रतिपादयन्तोऽनेन दृष्टाः, येभ्यस्तथैव तमर्थं प्रतीयात्। अतो दुरधिगमेयं वर्ण-वर्तनी।

यावन्तो यादृशा ये चेत्येवं तावत् प्रभाषसे।
कियन्तः कीदृशाः के चेत्येवं यावन्न पृच्छ्यसे॥

तस्मात् सर्वप्रकारमवाचका वर्णाः।

---

[१] श्लो. वा. स्फोट. ६९.

स्फोटवादः[१]

अस्ति चेयं शब्दात् उच्चरितात् अर्थावगतिः। न चेयमर्थावगतिः अकरणिका भवितुमर्हति। तदस्याः करणं स्फोट इति कार्यानुमानमिदमस्तु, अर्थावगतिरूपात् कार्यात् तत्करणस्य स्फोटस्यानुमानम्। स च स्फोटः निरवयवः नित्यः निष्क्रमकश्चेति न वर्णपक्षोक्तदूषणानामवकाशः। किं च वर्णातिरिक्तः स्फोट एवार्थप्रतिपादकः, "शब्दादर्थं प्रतिपद्यामहे" इति व्यवहारात्। भवन्मते हि वर्णजनितस्य संस्कारस्यार्थप्रतिपादकत्वे शब्दादिति प्रातिपदिकार्थोऽनुपपन्नः। संस्कारस्य शब्दशब्दावाच्यत्वात्। संस्कारसहितस्यान्त्यवर्णस्य वाचकत्वे पूर्वोक्ता दोषाः। वर्णानां वाचकत्वे शब्दात् इत्येकवचनानुपपत्तिः। स्फोटात्मकशब्दस्य तु वाचकत्वे "शब्दात्" इति प्रातिपदिकार्थः विभक्त्यर्थश्च द्वयमप्युपपन्नम्।

स्फोटस्य शब्दात्मकत्वम्

ननु न स्फोटः शब्दशब्देनोच्यते। किं तु वर्णा एव। श्रोत्रग्राह्यस्यैव शब्दत्वात् इति चेन्मैवम्। निर्झरझाङ्काररवप्रभृतीनां सत्यपि श्रोत्रग्राह्यत्वेऽर्थप्रत्यायकत्वाभावात्। तस्मात् यतोऽर्थप्रतिपत्तिः स शब्दः। अर्थप्रतिपत्तिश्च स्फोटादेव, न वर्णेभ्य इति स्फोट एव शब्दः।

नन्वेवं सति धूमादीनामप्यर्थप्रतीतिहेतुत्वात् शब्दत्वं प्राप्नोति। मैवं वादीः। "अथ 'गौः' इत्यत्र श्रोत्रजप्रतिभासे बहवोऽर्थाः प्रतिभासन्ते तत्र कस्तेषां शब्द इत्युपक्रम्य यतोऽर्थप्रतिपत्तिः स शब्दः" इत्युक्ते कुतो धूमादीनां शब्दत्वशङ्कावकाशः, तेषां श्रोत्रजप्रतिभासाविषयत्वात्।

ननु चेयमर्थप्रतीतिः वर्णेषु भवत्सु भवन्ती, तेष्वभवत्सु चाभवन्ती तानुत्सृज्य कथं स्फोटकार्यतामुपयायात्। उच्यते। अनन्यथासिद्धं तद्भावभावित्वं तत्कार्यतामवगमयति, नान्यथासिद्धम्। वर्णानामर्थप्रत्यायकत्वं तु अन्यथासिद्धम्। स्फोटव्यञ्जकत्वात् वर्णानां, तद्धेतुकत्वमर्थप्रतीतेरनुपपन्नम्। वर्णाभिव्यक्तः स्फोटोऽर्थप्रतीतिं जनयति, वर्णैरर्थप्रतीतिरुत्पादितेति तु भ्राम्यति जनः।

वर्णानां स्फोटव्यञ्जकत्वपक्षः

ननु वर्णानां स्फोटाभिव्यञ्जकत्वेऽपि किं व्यस्तानां व्यञ्जकत्वम्, उत समस्तानामिति विकल्पः कथं परिहार्य इति चेत् — अत्र केचिदाहुः — प्रथमवर्णश्रवणवेलायामेव स्फोटोऽभिव्यक्तः। न च द्वितीयादिवर्णवैफल्यम्। अभिव्यक्तौ तैः

---

[१] न्या.मं, आ.६.भा.२, पृ. १४८.

अतिशयकरणात्। यथा रत्नपरीक्षकाणां प्रथमदर्शने रत्नरूपममलम् अप्रकाशमानमपि पुनः पुनः परीक्षमाणानां निरवद्यं रत्नतत्त्वं चकास्ति, एवमिहापि प्रथमवर्णश्रवणेन व्यक्तेऽपि स्फोटे स्फुटतरप्रतीत्यै वर्णान्तराणि प्रयोक्ष्यन्त इति न वैयर्थ्यमिति।

ध्वनीनां स्फोटव्यञ्जकत्वमिति पक्षः[१]

अपरे तु वदन्ति — ध्वनय एव स्फोटस्य वर्णस्य च व्यञ्जकाः। तैश्च मरुद्भिः अनवयव एव एष स्फोटोऽभिव्यज्यमानः ताल्वादिस्थानकरणसंयोगरूपोपाधिवशात् नानाकारगकारादिभागिव प्रतिभासते। मरुतां चञ्चलत्वात् उच्चरितप्रध्वंसिनस्ते तं काल्पनिकाकारमवभासयन्ते। दृष्टं चोपाधिवशात् असत्यमपि रूपमवभासमानम्। यथा कृपाणमणिदर्पणादिव्यञ्जकभेदेन श्यामदीर्घादिरूपं मुखस्य भासते। तस्मान्न पारमार्थिकाः वर्णाः, नापि स्फोटस्य व्यञ्जका इति क्व व्यस्तसमस्तविकल्पाः प्रभवेयुः।

स्फोटस्य प्रत्यक्षत्वसाधनम्

अपि च तार्किकाणामनुमानप्रियत्वात् तत्परितोषाय स्फोटस्यानुमानिकत्वमुक्तम्, न परमार्थतः। परमार्थतस्तु श्रौत्रे प्रत्यये प्रतिभासमानः प्रत्यक्ष एव स्फोटः।

यद्यपि वर्णा अपि प्रत्यक्षाः, तथापि ते वर्णाः असन्तोऽपि उपाधिवशात् वदनदैर्घ्यादिवत् अवभासन्ते। स्फोटात्मकः शब्दस्त्वेको निरवयवः प्रतीयते। तथा च "एकं पदम्", "एकं वाक्यम्" इति एकाकारा प्रतीतिरस्ति। न हि भिन्ना वर्णाः तस्यां विषयीभवन्ति। न च सेनावनादिबुद्धिवत् अयथार्थेयं पदवाक्यबुद्धिः, बाधकाभावात्।

अथ भिन्नानामपि वर्णानामेकार्थप्रतीतिजनकत्वोपाधिकृतेयमेकाकारा बुद्धिरिति चेत् — एकार्थप्रतीतिरियं केन हेतुना जाता? पदार्थवाक्यार्थज्ञानाख्यकार्यैक्यात् एकाकारा पदवाक्यबुद्धिः इत्युक्ते, पदवाक्यज्ञानपूर्वकं हि पदार्थवाक्यार्थज्ञानम्। पदार्थवाक्यार्थज्ञानाख्यकार्यैक्यात् एकाकारा पदवाक्यबुद्धिः इति अन्योन्याश्रयो दुर्वारः।

तस्मात् "पदम्" इति बुद्धेः पदस्फोटः, "वाक्यम्" इति बुद्धेः वाक्यस्फोटो विषय इति प्रत्यक्ष एव स्फोटः। तत्र पदस्फोटात् पदार्थप्रतीतिः, वाक्यस्फोटाच्च वाक्यार्थप्रतीतिः।

---

[१] न्या.मं, आ.६.भा.२.पृ. १५१.

वाक्यस्याखण्डता

अथ यदि निरवयवः पदस्फोटः शब्दः, तदा वाक्यमपि शब्द एव। तस्यापि पदात्मका अवयवा न स्युः। वाक्यस्य पदावयवकत्वे, पदस्य वर्णावयवकत्वं भवतु इति चेत् — उच्यते। परमार्थतः वाक्यावयवभूतः पदस्फोटो नास्त्येव। निरवयवमेव वाक्यं निरवयवस्यैव वाक्यार्थस्य बोधकम्। अवयवकल्पनायां हि यथा वाक्यस्यावयवाः पदानि, पदानामवयवा वर्णाः, तथा वर्णानामप्यवयवैर्भवितव्यम्। तथा चानवस्था स्यात्।

किं च वृद्धव्यवहाराद्धि शब्दार्थे व्युत्पद्यन्ते व्यवहर्तारः। तत्र केवलस्य पदस्य व्यवहार एव न दृश्यते। वाक्यं तु प्रयोगार्हमिति तत्रैव व्युत्पत्तिः। तत एवार्थसंप्रत्ययः। पदाद्यवयवप्रतिभासस्तु भ्रममात्रम्।

अर्थोऽपि वाक्यस्यैक एव नरसिंहाकारः। जात्यन्तरं हि नरसिंहः। तत्र न नरार्थः, नापि सिंहार्थः।

वाक्यार्थस्याखण्डता[१]

एवं पदार्थेभ्योऽन्य एव वाक्यार्थः पानकादिवत्। यथा पानकः शर्करानागकेसरमरीच्यादिभ्योऽर्थान्तरमेव, यथा च सिन्धूरहरिताललाक्षादिभ्यः अर्थान्तरमेव चित्रम्, यथा वा षड्जर्षभगान्धारधैवतादिभ्योऽर्थान्तरमेव ग्रामरागः, तथा पदेभ्यो भिन्नं वाक्यं, पदार्थेभ्यो भिन्नः वाक्यार्थः। तदंशावगमस्तु कल्पनामात्रम्। न च तच्छब्दानुगमे तदर्थानुगमदर्शनात् पारमार्थिकत्वं भागानामिति वाच्यम्। कूपसूपयूपानामेकाक्षरानुगमेऽप्यर्थानुगमाभावात्। तस्मात् प्रकृतिप्रत्ययांशवत् असतः पदार्थस्य कल्पनं वाक्यार्थावगमोपायतया आश्रीयते। न त्वर्थस्तदीयः अश्वकर्णादिवत् उपलभ्यते।

असत्यस्यापि सत्योपायत्वम् अलीकसर्पदंशादेः सत्यमरणकारणत्ववत्, लिप्यक्षराणां सत्यार्थप्रतिपत्तिजनकत्ववत् च उपपद्यते।

प्रकृतिप्रत्ययविभागस्य काल्पनिकत्वम्

ननु प्रकृतिप्रत्ययाद्यंशा अपि परमार्थसन्त एव, तथा प्रतिभानात्, अर्थप्रतीतिहेतुत्वाच्चेति चेत् — न। व्याकरणभेदेन तेषां स्वरूपेणेयत्तानिश्चयानुपपत्तेः। "भवति" इत्यत्र भूशब्दः प्रकृतिरिति क्वचित् व्याकरणेऽन्वाख्यायते, क्वचित्

---

[१] न्या.मं, आ.६.भा.२. पृ. १५४.

भवशब्दः प्रकृतिरिति। एवं प्रत्ययः, आदेशः, आगमः, गुणः, वृद्धिः, वर्णलोपः इत्यादिविषयेऽपि अन्वाख्यानेषु नास्ति संवादः। तदुक्तं महाभाष्यकारेणापि —

अतः "इयं प्रकृतिः", "एष प्रत्ययः" इत्यादिकं कल्पनामात्रम्। पदानां स्वरूपमपि न पारमार्थिकम्, नियतरूपेणाप्रतीतेः। तथा हि —"कालेनदन्तिनागाः" इत्यत्र कीदृशः पदविभागः? अर्थद्वयसंभवात्। उभयत्र च वर्णानां तुल्यत्वात्। किं, कालेन = कृष्णेन, दन्तिना = हस्तिना, अगाः = त्वं गतः, इति विभागः, अथ वा काले = समये, नदन्ति = शब्दायन्ते, नागाः = करिणः फणिनो वेति। तस्मादनियमात् न पदतदर्थविभागः पारमार्थिकः।

अथ प्रथमप्रतिपन्नवाक्यार्थानुसारेण पदतदर्थविभागो व्यवस्थाप्यते, तर्हि किं तेन तदानीं व्यवस्थापितेन? वाक्यार्थस्य प्रथममेव प्रतिपन्नत्वात्।

किं च "दध्यत्र" "मध्वत्र" इति दधिमधुपदयोरिकारोकारयोः अदर्शनेऽपि तदर्थप्रत्ययो दृश्यते। तस्मादपि न पारमार्थिकः पदवर्णविभागः इति निरवयवं वाक्यं निरवयवस्य वाक्यार्थस्य वाचकमिति सिद्धम्।

ननु यथा पदेषु वर्णा न सन्ति, वाक्येषु पदानि न सन्ति, तथा महावाक्येषु अवान्तरवाक्यान्यपि न स्युः। तथा महावाक्यान्यपि प्रकरणेषु न स्युः। प्रकरणान्यपि शास्त्रे न स्युः। तथा च एकमेव शास्त्रं निरवयवमद्वयमापतति इति चेत् —

सत्यम्। शब्दब्रह्मैवेदमद्वयमनादि अविद्यावशात् कल्पितभेदमर्थरूपेण विवर्तते। (विविधं प्रतीयते परिणमते वा)। न तु वाचकाद्विभक्तं वाच्यमपि नाम किंचिदस्ति। तस्मात् काल्पनिक एव वाच्यवाचकविभागः। वाग्रूपतैव तत्त्वम्। सर्वत्र प्रत्यये तदनपायात्।

वाक्तत्त्वविभागः

सा चेयं वाक् त्रिविधा — वैखरी मध्यमा पश्यन्तीति। तत्र स्थानकरणक्रमव्यज्यमानगकारादिवर्णसमुदायात्मिका वाक् वैखरीत्युच्यते। विखरः = देहेन्द्रियसंघातः, तत्र भवा वैखरी। तदुक्तं —

"स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना॥" इति।

या पुनरन्तःसंकल्प्यमानक्रमवती श्रोत्रग्राह्यवर्णरूपाभिव्यक्तिरहिता वाक् सा मध्यमोच्यते। तदुक्तं —

"केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते॥" इति।

या तु ग्राह्यभेदक्रमादिरहिता स्वप्रकाशसंविद्रूपा वाक् सा पश्यन्ती इत्युच्यते। तदुक्तं —

"अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी॥" इति।

स्फोटवादनिगमनम्

तथा चेदं सिद्धम्। लोके वर्णपदपूर्वको व्यवहारो न भवति, वाक्येन व्यवहारात्। वाक्यस्य चायमवयवः अयमवयवीति व्यवस्थानुपपत्तेः निर्भागमेव तद्वाचकम्, निर्भागश्च तस्य वाच्योऽर्थः। अवान्तरवाक्यमपि प्रयोगयोग्यं व्यवहार-कारणमिति तन्न निह्नूयते। अविद्यावस्थेयं वर्तते। तत्रेयं व्यवहारवर्तनी यथादृश्य-मानैवास्तु। विद्यायां सर्वमेवेदमसारम्। पदस्य वर्णस्य वा केवलस्याप्रयोगात् तत्स्वरूपमविद्यावस्थायामपि न वास्तवमिष्यत इति।

स्फोटवादनिराकरणम्[१]

अत्राभिधीयते — किमयमनुमानमहिम्ना स्फोटाभ्युपगमः प्रत्यक्षमहिम्ना वा। नाद्यः, परिदृश्यमानविशिष्टानुपूर्वीकवर्णसमूहरूपेण करणेनार्थप्रतीतेरुपपन्नतया स्फोटानुमानानवसरात्।

वर्णानामर्थप्रत्यायकत्वोपपादनम्

यत्तु व्यस्तसमस्तविकल्पैरुत्सारितं वर्णानां वाचकत्वमिति। तत्रोच्यते। क्रम-भाविनामेव क्रमोपलब्धानामेव च वर्णानां मानसानुव्यवसायरूपसंकलनात्मक-ज्ञानविषयीकृतानामर्थप्रतीतिकरणत्वं भविष्यति। दृश्यते च विनश्वरेष्वपि पदार्था-न्तरेषु क्रमानुभूतेषु युगपत् मानसोऽनुव्यवसायः "शतमाम्राणि भक्षितवान् देव-दत्तः" इति। न चायं प्रत्ययो नास्ति, संदिग्धो, वा बाधितो वा। अनभ्युपगम्यमाने चेदृशि समुच्चयज्ञाने तन्निबन्धना भूयांसो व्यवहारा उत्सीदेयुः।

स चायं संकलनात्मकः प्रत्ययः, स्मर्यमाणाः ये पूर्वपूर्ववर्णाः अनुभूयमानश्च योऽन्तिमो वर्णः तत्सकलविषयकतया सदसद्वर्णगोचरश्चित्ररूपः अङ्गीक्रियते। एत-दुक्तं भवति — अन्तिमवर्णानुभवः अतीतवर्णानपि विषयीकुर्वन् संकलनात्मक इति। यद्वा अन्तिमवर्णश्रवणानन्तरं सर्ववर्णविषयकं संकलनात्मकं ज्ञानं भवति। तदेवार्थप्रतीतिहेतुरिति न काप्यनुपपत्तिः।

---

[१] न्या.मं, आ.६.भा.२. पृ. १५९.

तत्र यदुक्तं, "सरः" "रसः" इत्यादौ संकलनज्ञानस्य सर्ववर्णविषयकत्वेन विशेषाभावात् उभयत्रार्थद्वयप्रतीत्यापत्तिरिति। तत्रेदं समाधानम् — विशिष्टानुपूर्वीकवर्णमालानुभवसमनन्तरभावी संकलनाप्रत्ययः तत्तदर्थप्रत्ययहेतुरिति स्वीकारे दोषाभाव इति। सकारप्रत्ययोत्तराकारप्रत्ययोत्तररेफप्रत्ययोत्तराकारप्रत्ययोत्तरविसर्गप्रत्ययोत्तरतावद्वर्णविषयकसमूहालम्बनज्ञानं सरोरूपार्थप्रतीतिहेतुः। रेफज्ञानोत्तराकारज्ञानोत्तरसकारज्ञानोत्तराकारज्ञानोत्तरविसर्गज्ञानोत्तरतावद्वर्णविषयकसमूहालम्बनज्ञानं रसरूपार्थप्रतीतिहेतुः। अतो नोक्तदोष इति।

अथ वा "पूर्ववर्णजनितसंस्कारसहितोऽन्त्यवर्णो वाचकः" इति शबरस्वाम्युक्तरीत्या[1] वर्णानामर्थप्रत्यायकत्वमस्तु।

वर्णसंस्कारस्यार्थप्रतीतिहेतुत्वोपपादनम्

यत्त्वत्रोक्तं न संस्कारस्यार्थप्रतीतिहेतुत्वम्, स्मृतावेव तस्य सामर्थ्यादिति। तदपि न। 'स्मृतिरेव संस्कारेण कर्तव्या, नान्या प्रतीतिः' इति राजाज्ञाविरहात्। अथ वा संस्कारः वर्णस्मृतिद्वारेणार्थप्रतीतिं जनयतीति। पूर्ववर्णेषु संस्कारात् स्मरणम्, अन्त्यवर्णे श्रोत्रेन्द्रियादनुभवः। क्रमभाविनामपि संस्काराणां युगपत्स्मरणहेतुत्वमनुभवबलात् स्वीकरणीयम्। अन्यथा स्फोटवादे वर्णानां स्फोटव्यञ्जनविषये इमे दोषा अपरिहार्याः स्युः। स्फोटवादेऽतिरिक्तस्फोटकल्पनं गौरवावहम्। तदुक्तं भाष्यकारेण शबरस्वामिना — "शब्दकल्पनायां सा च, शब्दकल्पना च" इति[2]।

वर्णैः स्फोटाभिव्यक्तिरिति मतनिरासः

यदत्रोक्तं — प्रथमवर्णबुद्धिवेलायामेव व्यक्तं स्फोटतत्त्वम् उत्तरोत्तरवर्णबुद्धिभिः अतिशयिततरप्रतीतिविषयतां नीयते रत्नतत्त्ववदिति।

स एष विषमो दृष्टान्तः। रत्नस्य हि सावयवत्वात् प्रथमप्रतीत्यविषयीकृतसूक्ष्मतरावयवविशेषग्राहिणीनामुत्तरोत्तरप्रतीतीनामस्ति तत्र अवकाशः। स्फोटस्तु वर्णवत् अनवयव इति तत्स्वरूपसर्वस्वमाद्येनैव व्यक्तम्, किम् इदानीमन्ये वर्णाः करिष्यन्ति।

स्फोटस्य ध्वनिव्यङ्ग्यत्वनिरासः[3]

यदपि चोक्तं ध्वनिव्यङ्ग्यत्वात् स्फोटस्य, न तत्र वर्णविकल्पावसर इति। तदपि

---

[1] शा.भा.१.१.५, भा.१.पृ. ५५.

[2] शा.भा.१.१.५, भा.१.पृ. ५८.

[3] न्या.मं, आ.६.भा.२. पृ. १६८.

न। वर्णप्रतीतिं परित्यज्य ध्वनिभ्यः शब्दप्रतीतेरनुत्पादात्। वर्णविभागोपलम्भ-रहितशब्दादर्थप्रतीतेः अनुदयाच्च।

अथ ध्वनयः शब्दाभिव्यक्तिं कुर्वाणाः स्थानकरणानुरोधेन असत्यमेव वर्ण-विभागमुपदर्शयन्ति, खड्गादय इव मुखस्य श्यामादिरूपमिति चेन्न। वर्ण-विभागस्यासत्यत्वे निमित्ताभावात्। प्रतीयन्ते हि निर्बाधया बुद्ध्या वर्णाः। वर्णातिरिक्तस्तु शब्दो न प्रतीयते। यो न प्रतीयते सोऽस्ति, ये च प्रतीयन्ते ते न सन्तीत्युच्यमाने शशो नास्ति, विषाणमस्तीति स्यात्। तस्मादयमपि, न आपा-दितस्य कल्पनागौरवस्य परिहारक्षमो मार्गः। तस्मात् सुष्ठूक्तं "शब्दकल्पनायां सा च, शब्दकल्पना च" इति। अतः स्फोटाभिव्यक्तौ यः क्रम आस्थेयः स एवार्थ-प्रतीतावास्थीयतां, किं तेन स्फोटेन।

यच्चोक्तं कियन्तः कीदृशा वर्णा अर्थप्रत्यायका इत्यादि, तदपि यावन्तो यादृशा वर्णाः प्रतीयन्ते तावन्तस्तादृशाः प्रत्यायका इति प्रतीत्यनुसारेण समाधेयम्।

वर्णक्रमस्य स्फोटत्वनिरासः

यत्पुनरभ्यधायि क्रमव्यत्यासेन प्रयुक्ता अपि वर्णाः प्रत्यायका भवेयुः क्रम एव वा स्फोटः स्यादिति। तदपि न। क्रमो हि नाम कालविशेषः। न च स्फोटो भवितुमर्हति। तस्मात् ये यत्क्रमकाः यमर्थं प्रत्याययन्तो दृष्टाः वर्णाः ते तत्क्रमकाः वर्णाः तमर्थं प्रत्याययिष्यन्तीति न तदतिरिक्तस्फोटादर्थसिद्धिः इति न कार्य-लिङ्गकानुमानात् स्फोटसिद्धिः।

"शब्दादर्थं प्रतिपद्यामहे" इति व्यवहारस्योपपत्तिः

"शब्दादर्थं प्रतिपद्यामहे" इति व्यवहारोऽपि न स्फोटसाधकः। पूर्वपूर्ववर्ण-जनितसंस्कारसहितान्त्यवर्णस्य वाचकत्वात् तस्यैव शब्दत्वात्, एकत्वाच्च।

अर्थप्रतीतिहेतुत्वस्य शब्दलक्षणत्वखण्डनम्

अर्थप्रतीतिहेतुत्वं शब्दलक्षणमित्यसाधु, धूमादिष्वतिव्याप्तेः। श्रोत्रग्राह्यत्वे सति अर्थप्रतीतिहेतुत्वमपि न लक्षणम्। स्फोटे तस्याभावात्। विशेष्यवैयर्थ्याच्च। न च श्रोत्रग्राह्यत्वस्य शब्दत्वेऽतिव्याप्तिरिति वाच्यम्। जातिमत्त्वे सतीति विशेषणी-यत्वात्। न च स्तनयित्नुनादादावतिव्याप्तिरिति वाच्यम्। तस्य लक्ष्यत्वात्। तदुक्तं भाष्यकृता[१] "द्विविधश्चायं शब्दः वर्णात्मा ध्वनिमात्रश्च" इति।

---

[१] न्या.भा. २.२.४०.

अन्योन्याश्रयपरिहारः

यत्तु एककार्यकारित्वनिमित्तिकायामेकत्वबुद्धौ इतरेतराश्रयदोषः प्रसजतीति। तन्न। एकार्थप्रतीतिपूर्विका पदवाक्यबुद्धिः, पदवाक्यबुद्धिपूर्विका चैकार्थप्रतीतिः इत्यनङ्गीकारात्। स्मर्यमाणानुभूयमानवर्णजनितेयमर्थप्रतीतिः, नाभिन्नपदज्ञानपूर्विकेति स्वीकारेण कुत इतरेतराश्रयत्वम्?

पदवाक्ययोः सावयवत्वम्[१]

वाक्ये पदे चावयवप्रतीतेः भ्रान्तित्वं बाधकाभावात् न युक्तम्।

नरसिंह-चित्र-पानक-ग्रामरागेष्वपि पृथगवयवाः प्रतिभासन्त इति न ते निरवयवस्फोटदृष्टान्ताः। चित्रादिबुद्धयस्तर्हि दृष्टान्ता इति चेत् — बाढम्। वाक्यार्थबुद्धिरपि निर्भागा इष्यत एवास्माभिः। बुद्धिविषयीकृतस्त्वर्थः दृष्टान्तदार्ष्टान्तिकयोः सावयव एव। तस्मान्न निर्भागौ वाक्यवाक्यार्थौ।

वाक्यजन्यव्युत्पत्तेः पदार्थपर्यन्तत्वम्

वृद्धव्यवहारतः वाक्यात् भवन्ती व्युत्पत्तिः पदार्थपर्यन्ता भवति।

पदस्य सत्यता

यत्तु केवलं पदं न प्रयुज्यत इति तदसत्यमिति। तदसत्। महावाक्यस्थानेऽवान्तरवाक्यं न प्रयुज्यत इति तदप्यसत्यं स्यात्। स्वार्थे तत् प्रयुज्यत इति चेत् — पदमपि स्वार्थे क्वचित् प्रयुज्यत एव, यत्र पदान्तराणामर्थोऽर्थप्रकरणादिना लभ्यते, तत्र यावदप्राप्तं तावत् पदमेव केवलम् उच्चारयन्ति। ग्रन्थग्रहणावसरेषु वर्णानां पदानां च स्वरूपावधारणं भवति। मा वा भूत् फलवत्त्वं पदानाम्, रथावयववत् रथकार्यैकदेशं वाक्यकार्यैकदेशं पदान्यपि कुर्वन्त्येव। वर्णा अपि केचिदर्थवन्तो भवन्त्येव। तस्मान्नासत्त्वं पदानां वर्णानां च।

वर्णानां सावयवत्वप्रसङ्गनिरासः

यत्पुनरवादि — वाक्यस्येव पदानि, पदानामिव वर्णाः, वर्णानामप्यवयवान्तराणि स्युरित्यनवस्थेति। तन्न। न हि घटाः सावयवाः इति परमाणुभिरपि सावयवैर्भवितव्यम्। न वा परमाणवो निरवयवा इति घटैरपि निरवयवैर्भवितव्यम्। उपलब्ध्यनुपलब्धी हि वस्तूनां व्यवस्थापिके। यद्यथोपलभ्यते तत्तथा

---

[१] न्या.मं, आ.६.भा.२. पृ. १७७.

भवति। यद्यथा नोपलभ्यते तत्तथा न भवति। वाक्यपदयोश्च भागाः वर्णा उपलभ्यन्ते, न वर्णानाम्। तस्मात् बालिशचोद्यमिदं — वर्णस्याप्यवयवा भवन्तु, पदवाक्ययोरपि वा मा भूवन्निति।

वाक्यवाक्यार्थयोः सावयवत्वम्

अपि च पदोपजननापायाभ्यां (पदान्वयव्यतिरेकाभ्यां) तदर्थोपजननापाय-दर्शनात् वाक्यवाक्यार्थौ सावयवौ। अनयैव युक्त्या पदभागा अपि प्रकृति-प्रत्ययादयः तात्त्विका इति अवगन्तव्याः। "वृक्षं" "वृक्षेण" इत्यत्र प्रकृत्यर्थैक्येऽपि प्रत्ययार्थो भिद्यते। "वृक्षं" "घटम्" इति प्रत्ययार्थैक्येऽपि प्रकृत्यर्थो भिद्यते। तत्र योऽर्थो यं शब्दमनुगच्छति स तस्यार्थ इत्यवसीयते। तत् कथमसत्याः भागाः।

कूपयूपसूपादौ बहुवर्णानुगमेऽपि एकवर्णभेदात् अर्थभेदो नानुपपन्नः।

अश्वकर्णदृष्टान्तपरिशीलनम्

ओषधिविशेषे प्रसिद्धेऽश्वकर्णशब्देऽवयवार्थलोपात् अन्यत्राप्येवमिति यदुक्तं, तदपि न। अश्वकर्णशब्दो हि ओषधिविशेषेऽर्थे तिरोभवदवयवशक्तिकतया अतिरस्कृतावयवार्थार्थान्तरव्यक्तौ न सर्वात्मना अवयवार्थाभावः। व्यस्ततया समस्ततया वा पुनः प्रयोगान्तरे तदर्थप्रतीतिदर्शनात्।

"अश्वमारोह" "कर्णे कुण्डलम्" इति व्यस्तयोः अश्वशब्दकर्णशब्दयोः प्रयोगः, तुरगस्य श्रोत्रे तु प्रतिपादयितुमिष्टे "अश्वकर्णः" इति समस्तप्रयोगोऽपि तदर्था-परित्यागी दृश्यत इति न सर्वात्मना निरर्थका भागाः।

पाणिनिव्याकरणस्यानुसरणीयता

यत्तु व्याकरणवैविध्यात् प्रकृतिप्रत्ययविभागनियमो नावकल्पत इति — एत-दपि न युक्तम्। आप्ततरोक्तीनां प्रामाण्यात्। पाणिन्यादिमुनित्रयसंमतः प्रकृतिप्रत्यय-विभागः अवितथ इति निर्णेष्यामः। बहुष्वंशेषु प्रायेण सर्वेषां व्याकरण-कर्तॄणामविवाद एव। विकरणादिविसंवादनं तु अकिंचित्करम्।

यदप्यवर्णि "कालेनदन्तिनागाः" इत्यादौ पदविभागज्ञानमशक्यं, वर्णसामान्या-दिति। तदप्यसारम्। स्वरादिभिरुपायैः पदविभागस्य सुज्ञानत्वात्। यथा "सरामः" इति पदे सृधातोः लटि उत्तमपुरुषवचने अन्तोदात्तत्वम्। रामेण सह" इति बहुव्रीहौ आद्युदात्तत्वम्। "सः रामः" इति पदद्वये तु अन्यः स्वरः। अतो नाशक्यः पदविभागनिर्णयः।

यदपि "दध्यत्र" "मध्वत्र" इत्यत्र 'दधि' 'मधु' इति रूपादर्शनेऽपि तदर्थप्रत्यय इत्युक्तं — सोऽपि न दोषः। यतस्ते एवैते पदे ईषत् विकृते, तत्प्रत्यभिज्ञानात्।

अथ वा इगन्तदधिमधुपदवत् यणन्तयोरपि साधुत्वात् यणन्ते अपि पदे अर्थप्रतिपादके इति।

असत्यात् सत्यप्रतिपत्तिनिराकरणम्[१]

अपि च पदानामसत्यत्वे किमर्थ एष तद्व्युत्पत्तौ इयान् प्रयत्नो वृद्धैराधीयते? असत्यमपि सत्योपाय इति चेन्न। अदृष्टत्वात्। अलीकसर्पदंशादयः सत्यमूर्च्छाहेतवो येऽत्रोदाहृताः ते तथा न भवन्ति। विषाशङ्काया अपि मूर्च्छामरणहेतुत्वात्। शङ्का च बुद्धिः। सा च सत्या।

यदपि लिप्यक्षराणामसत्यानां सत्यार्थप्रतिपादकत्वमुक्तम्, तदपि चिन्त्यम्। रेखाः स्वरूपतः सत्याः। ता उपाध्यायोपदेशसंस्कृतमतेः वर्णानुमापिका भवन्ति। तथा च संबन्धग्रहणात् रेखानुमितेभ्यः वर्णेभ्योऽर्थप्रतिपत्तिः इति नासत्यात् सत्यप्रतिपत्तिः।

तस्मात् पारमार्थिकत्वात् पदतदर्थानां न निरवयवौ वाक्यवाक्यार्थाविति स्थितम्।

तत्त्वबिन्दुग्रन्थात् स्फोटवादसंग्रहः

तत्त्वबिन्दौ[२] वाचस्पतिमिश्रैः "अनवयवमेव वाक्यमनाद्यविद्योपदर्शितवर्णपदविभागमस्या निमित्तमिति केचित्" इति वैयाकरणमतमनूद्य तस्य विस्तरेण खण्डनं कृतम्। तदत्र उपक्षिप्यते।

[३]सोऽयमनवयवः एकः वाक्यात्मा स्फोटः वाक्यार्थधीहेतुः इति अनुभवबलात् व्यवस्थाप्यते वा? वाक्यार्थधियः अन्यथानुपपत्तिरूपार्थापत्त्या व्यवस्थाप्यते वा?

अनुभवबलात् स्फोटस्य वाक्यार्थधीहेतुत्वमिति पक्षस्य निरासः

आद्ये अनुभवः वाक्यस्वरूपमेकमवयविनमनेकवर्णपदव्यासक्तं करचरणाद्यङ्गकूर्परादिप्रत्यङ्गवर्तिनमिव देवदत्तमनुभावयेत्? वर्णपदविभागरहितं वा अनुभावयेत्? तत्रापि आद्ये वर्णाः पदानि च सत्तामात्रेणास्यावयवा भवेयुः? अनुभूयमानतया वा? इति विकल्पाः।

---

[१] न्या.मं, भा.२. पृ. १८२.
[२] त.बिं. पृ. ६.
[३] त.बिं. पृ. ९.

तत्र न तावत् पूर्वः कल्पः। अवयवानामवयव्यपेक्षया न्यूनपरिमाणवत्तायाः लोके दर्शनात्, विभूनां परममहतां वर्णानां कुतश्चित् न्यूनपरिमाणासंभवेन स्फोटावयवत्वानुपपत्तेः। वर्णानां गगनगुणत्वमते च अद्रव्यतया समवायिकारणत्वाभावेन अवयवत्वानुपपत्तेः। अवयवत्वस्य समवायिकारणत्वनियतत्वात्।

ननु वायवीयपरमाण्वारब्धा वर्णा इति केचित् वदन्ति। तन्मते वर्णानां द्रव्यत्वात् परममहत्त्वाभावाच्च अवयवत्वं संभवतीति चेत् — न। तन्मते वर्णानामाशुतरविनाशितया युगपदसतां शब्दाख्यावयव्यारम्भकत्वासंभवात्। एकदेशकालवर्तिनो हि तन्तवः पटं बिभ्रति संयोगविशेषात्मकव्यतिषङ्गं वा बिभ्रति। वर्णाश्च क्रमभाविनः एककाले असन्तः कथमिवावयविनं तदसमवायिकारणं व्यतिषङ्गं वा बिभृयुः? अबिभ्राणाश्च कथमवयवाः व्यतिषक्ता वा?

ननु मा भूवन्ननेकेऽवयवभूता वर्णाः एकस्य अवयविनः आरम्भकाः, एक एव वर्णः एकं पदावयविनं वाक्यावयविनं वा आरभतामिति चेत् — न। कार्यद्रव्यस्य एकद्रव्यसमवायिकारणकत्वानुपपत्तेः। तथा सति कार्यस्य द्रव्यस्य नाश एव न स्यात्। असमवायिकारणस्य अवयवद्वयसंयोगस्य नाशाद्धि कार्यद्रव्यस्य नाशः। कारणस्य एकत्वे च संयोगनाशरूपविश्लेषायोगात् नाशो न स्यात्। तथा च कार्यं कृतकनित्यमिति स्यात्।

एतावता वर्णानामवयवानां सत्तापक्षः दूषितः। अथ वर्णाः पदानि वा अनुभूयमानाः सन्तः अवयवाः इति पक्षः दूष्यते। वर्णानां तदनुभवानां च क्रमभावित्वेन असहभावित्वादेव अयमपि पक्षः परास्तः।

अनुभवः वर्णपदविभागरहितं वाक्यात्मकं स्फोटं विषयीकरोतीति पक्षोऽपि न युक्तः।

एवं हि तस्य पक्षस्य स्थितिः[१] — अनवयवमेव वाक्यं वाक्यार्थस्य वाचकम्। न च वर्णा एवानुभूयन्ते न तु तदतिरिक्तं पदमिति वाच्यम्। "पदम्" इति वा "वाक्यम्" इति वा अनुसंहारबुद्धौ (साहित्यावगाहिज्ञाने) वर्णातिरिक्तस्य भानात्। न चेयमेकवस्त्ववगाहिनी बुद्धिः अनेकान् वर्णान् गोचरयितुमर्हति। एकत्वनानात्वयोरेकत्रासमवायात्।

ननु यदनुसंहारबुद्धिबोध्यमभिन्नं वस्तु, तद्वर्णेभ्यः भिन्नमभिन्नं वा। भिन्नत्वेऽपि वर्णेषु समवेतमसमवेतं वा। न तावदभिन्नम्, एकत्वनानात्वयोः विरोधात्। भिन्नं चेत् कथं तद्वर्णोपरागवती तस्मिन् प्रख्योपपद्यते। न हि भिन्नं वस्तु भिन्न-

---

[१] त.बिं. पृ. १४.

रूपेणापरेणोपरज्यते, घट इव पटेन। न च समवायादुपपद्यते। तदसंभवात्, समवायनिराकरणात्। इति चेन्न।

अतिरिक्तस्फोटसाधनम्

वाक्यातिरिक्तमूर्तीनां परमार्थसतां वर्णानामभावात्। वाक्यमेव हि मानसज्ञानविषयप्रयत्नभेदेन जनितैः भिन्नैः नानाध्वनिभिः प्रत्येकमभिव्यङ्ग्यं स्फोटरूपं परमार्थसत्। ध्वनयस्तु तुल्यस्थानकरणजन्यतया परस्परविसदृशतत्तत्पदवाक्यव्यञ्जकानेकविधध्वनिसादृश्येनान्योन्यविसदृशतत्तत्पदवाक्यसादृश्यान्यापादयन्तः सादृश्योपधानभेदात् एकमपि नानावर्णात्मकमिव अनवयवमपि सावयवमिव चावभासयन्ति, मुखमिव मणिकृपाणदर्पणादयः नियतस्थानम् अनुपप्लवम् एकम्, अनेकमिव अनेकविधस्थानमिव वर्णपरिमाणसंस्थानभेदोपप्लवमिव दर्शयन्ति।

न च ध्वनीनां प्रत्येकं व्यञ्जकत्वे प्रथमादेव ध्वनेः वाक्यस्य प्रतीतेरुपपत्तेः, तन्मात्रनिमित्तकत्वाच्च अर्थप्रत्ययोत्पादस्य द्वितीयादीनां ध्वनीनामानर्थक्यमिति वाच्यम्। व्यञ्जयन्तोऽपि हि प्रत्येकमिमे ध्वनयः न द्राक् स्फोटस्वरूपं स्फुटतरमवभासयितुमीशते। अपि तु आरूपम् = ईषद्रूपम्, अस्फुटम् अवभासयन्ति। पूर्वपूर्वाभिव्यक्तिजनितसंस्कारसचिवोत्तरोत्तराभिव्यक्तिक्रमेण तु अन्त्यो ध्वनिः स्फुटतरं विशिष्टस्फोटविज्ञानमाधत्त इति न वैयर्थ्यं द्वितीयादिध्वनीनाम्। नापि पूर्वेषां ध्वनीनां वैयर्थ्यम्। तदभावे तदभिव्यक्तिजनितसंस्काराभावेन अन्तिमस्य ध्वनेः असहायतया, स्फोटस्य ततः स्फुटतरव्यक्त्यभावेन वाक्यधीहेतुत्वानुपपत्तेः। तद्यथा रत्नपरीक्षकस्य पुनः पुनः रत्नस्वरूपमीक्षमाणस्य रत्नदर्शनानि प्रत्येकं रत्नस्वरूपमवगाहमानान्यपि सहसैव समानासमानजातीयव्यावृत्तं रत्नतत्त्वं नावभासयन्ति, किं तु पञ्चषदर्शनजनितभावनासचिवचेतोलब्धजन्मनि चरमे चेतसि चकास्ति रत्नतत्त्वम्।

न च वर्णावभासा मिथ्याप्रत्ययरूपाः तत्संस्कारा वा कथं व्यक्ततया स्फोटपरिच्छित्तिहेतव इति वाच्यम्। दूरस्थवृक्षे हरिततृणसमूहज्ञानधारायाः व्यक्ततरं वनस्पतितत्त्वप्रतीतिहेतुत्वदर्शनात्।

वर्णाच्च समारोपितदीर्घत्वादिधर्मभाजः पारमार्थिकार्थधीभेदोपलम्भात्। तथा हि — लौकिका "नग" इति गिरिमपदिशन्ति, "नाग" इति दन्तिनम्, "अजिनम्" इति चर्म, "अजीनम्" इति ज्यानिहीनम्, "शुन" इति कर्मभूतान् सारमेयान्, "शून" इति वृद्धिमापन्नम्। न च ते प्रत्यया भ्रान्तयः। व्यवहाराविसंवादात्।

अर्थापत्त्या स्फोटस्यार्थधीहेतुत्वमिति पक्षः[१]

यस्तु स्वतन्त्रसिद्धान्ताभ्यासाहितव्यामोहापस्मारः सार्वजनीनमपि "पदम्" इति "वाक्यम्" इति चैकवस्तुविषयकमनुभवमवजानीते स इत्थं शिक्षणीयः। शब्दादर्थधीरुदीयत इति भवतोऽपि संमतम्। इयमर्थधीः वर्णातिरिक्तैकपदवाक्यानुभवमन्तरेण नोदेतुमर्हति। वर्णास्तावदिमामर्थधियमुत्पादयितुं न शक्नुवन्ति। विकल्पासहत्वात्। प्रत्येकं वा वर्णा अर्थधीजनकाः मिलिता वा? नाद्यः; अनुपलम्भविरोधात्, वर्णान्तरोच्चारणवैयर्थ्यप्रसङ्गाच्च। नापि मिलिताः, मेलनासंभवात्। तथा हि — वास्तवो वा समूह एषामाश्रीयते अनुभवोपाधिको वा? तत्र सर्वेषामेव वर्णानां नित्यतया विभुतया च वास्तवी संगतिरतिप्रसङ्गिनी केषांचिदेव पदवाक्यभावं नापादयितुमर्हति। अनुभूयमानानां तु अनुभवानुसारिणी तत्पर्यायेण पर्यायवती न समूहभाक् भवति। न खल्वेकदेशकालानवच्छिन्नाः समूहवन्तो भवन्ति भावाः, अतिप्रसङ्गात्।

ननु पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायकोऽर्थस्य। तेन तथैवैकानुभवकल्पनेति चेत् — न। विचारासहत्वात्। को नु खल्वयं संस्कारोऽभिमतः भवतः? किं स्मृतिहेतुः, अन्यो वा प्रोक्षणादिभ्य इव व्रीह्यादेः? न तावदन्त्यः, न ह्यसावसहभुवां वर्णानां जन्य एकः संभवति, उक्तादेव प्रकारात्।

ननु वर्णैर्यथास्वं क्रमविशेषशालिभिरन्येऽन्ये जन्यन्ते संस्काराः, तेषां च स्थिरत्वात् अन्त्यवर्णसाचिव्यं संभवति। तत्सचिवश्चान्त्यवर्णः अर्थप्रत्यायक इति चेत् —

अहो बतास्य स्वपक्षदृष्टिपक्षपातः यत् बहुतरादृष्टसंभारकल्पनाक्लेशमपि न चेतयते, संस्कार एवानुपलब्धपूर्वस्तस्य च नानात्वमिति।

आग्नेयादिष्विवानेकापूर्वकल्पनम्, अनेकसंस्कारकल्पनं न गौरवमावहतीति चेत् — न। वैषम्यात्। आग्नेयादयो हि नश्वराः "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति चिरभाविने फलाय विहिताः असहभाविनः, तदङ्गानि समिद्यागादीनि प्रोक्षणादीनि च असहभावीनि इति बह्वपूर्वकल्पनां विना नोपपद्यत इति प्रमाणमार्गागता नासौ कल्पना दोषमावहति। इह पुनरेकपदवाक्यगोचरानुभवमात्रात् अभिधेयार्थप्रत्ययोपपत्तेः अनेकाप्रामाणिकसंस्कारकल्पना दोषमावहत्येव।

ननु वासनापरपर्यायः स्मृतिहेतुभूतः संस्कारः अन्त्यवर्णसहकारी क्लृप्त एव, तस्य अर्थधीसहकारितामात्रं कल्पनीयम्। अतो न गौरवमिति चेत् — न। स्व-

---

[१] त.बिं. पृ. २३.

भावविपर्यासानुपपत्तेः, अदृष्टान्तरकल्पनाप्रसङ्गाच्च। तथा हि — यो यद्विषयकानुभवजन्यः संस्कारः स तद्विषयकधियमेव जनयतीति संस्कारस्य स्वभावः। वर्णविषयकानुभवजन्यस्तु संस्कारः कथमर्थविषयकधियं जनयेत्? अन्यविषयकधीजनकत्वे सर्वोऽपि किंचिदेकमनुभूय तत्संस्कारात् सर्वमर्थं विजानीयात्। अपि च संस्कारः, वासना, भावना इति शब्दैः प्राचीनानुभवजनितमात्मनिष्ठं स्मृतिजनकं सामर्थ्यविशेषमाचक्षते। न चास्यैव सामर्थ्यस्य अर्थधीजननसामर्थ्यं कल्पयितुं शक्यम्। तद्धि अभिधेयार्थधीप्रसवोन्नेयम् अर्थधीरूपफलवति आत्मन्येव कल्पयितुं शक्यम्। न तु तादृशफलरहिते स्मृतिजनकसंस्काराख्यसामर्थ्ये। तथा च स्मृतिहेतोरदृष्टात् अर्थधीहेतुभूतमदृष्टान्तरमात्मनि कल्पनीयमिति गौरवम्।

वर्णवादिनां सिद्धान्तान्तरस्य दूषणम्

ननु एकस्मृतिगोचराः वर्णाः वाचकाः, अतो न गौरवम् इति चेत् — न। क्रम-अक्रम-विपरीतक्रमाणामेकस्मृतिगोचराणां वर्णानामविशेषेणार्थधीजनकत्वप्रसङ्गात्। तथा च "जरा" "राज", "नदी" "दीन" इत्यादिषु अर्थभेदप्रतीतिः न स्यात्। उभयत्र तेषामेव वर्णानामेकस्मृतिविषयत्वात्। तस्मात् स्वसिद्धान्तव्यामोहमपहाय एकपदवाक्यगोचरबुद्धिबलात् पदवाक्यस्फोटावभ्युपेयौ। न चास्याः गोचर इव प्रत्येकध्वनिव्यञ्जनीयः, तदर्थोऽपि प्रत्येकवर्णव्यञ्जनीयः इति सांप्रतम्। प्रथमादेव वर्णादभिधेयधीसमुत्पादात् द्वितीयादीनां वर्णानामानर्थक्यमित्युक्तत्वात्। न चैतत् पदेऽपि तुल्यम्। तस्य हि प्रत्यक्षस्य प्रतिध्वनिव्यञ्जनीयस्य अभिव्यक्तितारतम्यं नानाध्वन्यधीनमिति नानर्थक्यमुत्तरेषाम्। न चेयमप्रत्यक्षेऽभिधेये विधा संभविनी। उक्तं हि मण्डनमिश्रैः[१] —

"अथ कस्मादेष स्फोटोपलब्धिक्रमोऽर्थोपलब्धावेव नाश्रीयते। यतः —

प्रत्यक्षज्ञाननियता व्यक्ताव्यक्तावभासिता।
मानान्तरेषु ग्रहणमथ वा नैव हि ग्रहः॥

इन्द्रियं हि व्यक्तावभासिनोऽव्यक्तावभासिनश्चार्थप्रत्ययस्य हेतुः। यथा दूराद्ग्रहणे सूक्ष्मार्थनिरूपणायां च।

लिङ्गशब्दादयस्तु निश्चितात्मानं प्रत्ययमुपजनयन्त्येकरूपं, नैव वा। न तत्र व्यक्ताव्यक्तग्रहणबुद्धिभेदः।

अर्थश्च शब्दप्रत्ययादवसेयः, स्फोटात्मा तु प्रत्यक्षवेदनीय इति निरवद्यम्" इति।

---

[१] स्फो.सि. पृ. ९४.

स्फोटखण्डनम्[१]

तदिदमसमञ्जसम्। तथा हि — निरूपयतु अत्रभवान् एकैकवर्णगोचराः पूर्वा बुद्धीः, विशदपदवाक्यावगाहिनीः उत्तराश्च बुद्धीः। नन्वेतादृशीरुभयीरपि बुद्धीः निरूप्यैव अस्माभिरेवमुच्यते, भवतस्तु किं तत्र प्रष्टव्यं तत् पृच्छ्यताम्। पृच्छामः। किमेताः गकारादिबुद्धयः गकारादिमात्रनिर्भासाः? आहोस्वित् गकाराद्याकारं किंचिदेकमनाकारम् आसु भासते? मुखमिवैकं मणिकृपाणदर्पणादिषु विभिन्न-वर्णपरिमाणम्। इतरथा हि तत्र "मुखम्" इति बुद्धिव्यपदेशौ अभिन्नवस्त्ववगाहिनौ न स्याताम्। न भासते चेत्, गादय एव परस्परं नानात्मानः प्रकाशन्ते, न पुनस्तदाकारं पदतत्त्वमेकं प्रकाशत इति सिध्यति। तथा च गकारौकारविसर्ज-नीयाः नैकस्य पदतत्त्वस्य विवर्ताः। एकपदात्मना प्रत्येकमप्रतिभानात्। न खलु गजगवयकरभरुरवः परस्परभिन्नरूपा भासमानाः रासभादिविवर्ता भवन्ति। भासते चेत् अस्ति तर्हि गकारादिषु भिन्नेषु अभिन्नवस्तुनिर्भासा 'शब्दः' 'शब्दः' इति प्रख्या लौकिकपरीक्षकाणाम्। तावता किं शब्दत्वमर्थवाचकमभिमतम्? तथा सति शब्दत्वस्य सर्वेषु शब्देषु विद्यमानत्वात् सर्वेऽर्थाः सर्वेभ्यः शब्देभ्यः प्रतीयेरन्। न खलु कारणानियमे कार्यभेदनियमो भवितुमर्हति। तस्य कार्यभेदनियमस्य आकस्मिकत्व(अकारणकत्व)प्रसङ्गात्। गकाराद्याकारभेदरूपविवर्तविशिष्टं शब्द-त्वमर्थभेदाभिधायकम्, अतो नातिप्रसङ्ग इति चेत् — प्राप्ताप्राप्तविवेकेन[२] गादीना-मेवाभिधेयधीहेतुत्वात्। केवलस्य शब्दत्वस्य अभिधायकत्वे उक्तदोषात्। विशिष्टस्य वाचकत्वे स्वीकृतेऽपि विशेषणे गकारादौ एव वाचकत्वस्य पर्यवसानात्। एतावता पूर्वबुद्धीनां निरूपणम्।

अथ[३] उत्तरबुद्धीनां विशदपदवाक्यावगाहिनीनां निरूपणम्। परस्परव्यावृत्तवर्ण-मात्रविषयका अनुभवाः अनेकानि स्मरणानि वा एकं स्मरणं वा जनयन्तः स्वविषयकस्मरणमेव जनयेयुः, नान्यविषयकं, नाप्यविषयकम्। अतः अनुसंहार-बुद्धिः = समुदायात्मकपदस्वरूपज्ञानम् अपि परस्परव्यावृत्तवर्णमात्रविषयकं न तु वर्णानुविद्धैकपदविषयकमिति अनुभवबलादायातम्। तथा हि " 'गौः' इत्येकमिदं पदम्" इत्येकपदावभासिनी धीः अस्ति लौकिकपरीक्षकाणाम्। न चेयमनालम्बना, सर्वेषां ज्ञानानां सालम्बनत्वात्। निरालम्बनज्ञानवादस्य दूषितत्वात्। नापि वर्णा-लम्बना, वर्णानां नानात्वेन एकमिति बुद्धिग्राह्यत्वायोगात्।

---

[१] त.बिं. पृ. ३६.

[२] विशिष्टे कस्य वाचकत्वं प्राप्तं, कस्य तत् अप्राप्तम् इति विवेचनम् प्राप्ताप्राप्तविवेकः।

[३] त.बिं. पृ. ४९.

ननु यथा भिन्नेष्वेव हस्त्यश्वरथपादातेष्वेककार्यवत्त्वोपाधिनिबन्धना "सेनेयमेका" इति बुद्धिः, यथा वा धवखदिरादिषु नानाभूतेषु "वनमिदमेकम्" इति धीः औपाधिकी, तथा नानावर्णेषु "एकमिदम्" इति धीरौपाधिकी इति चेत् — न। उपाधिर्हि अत्र एकज्ञानविषयता वा स्यात्, एकार्थप्रतीतिहेतुता वा। नाद्यः, यः उक्तमुपाधिं न ज्ञातवान् तस्य "एकं पदम्" इति प्रतीत्यनुपपत्तेः। ये तावत् ज्ञानं स्वयंप्रकाशमिति नाभ्युपगच्छन्ति, तन्मते ज्ञानेन स्वस्याविषयीकरणात् स्वविषयत्वरूपोपाध्यविषयीकरणात् तदात्मकैकत्वविषयीकरणं कथं स्यात्।

नापि द्वितीयः,[१] अन्योन्याश्रयापत्तेः। तथा हि — पदस्वरूपं यो न जानाति तस्यार्थप्रतीतिर्न भवति। अर्थप्रतीतावसत्यां च तज्जनकत्वरूपपदस्वरूपज्ञानं न संभवति इति।

अत्र ब्रूमः। न वयम् "इदमेकं पदम्" इति प्रतीतिः एकवस्तुसिद्धौ प्रमाणमिति ब्रूमः। किं तु "इदमेकं पदम्" इति व्यपदेशम्। भवति हि करितुरगरथपदातिषु चम्पकाशोककिंशुकादिषु च नानात्वेऽपि कंचिदुपाधिमाश्रित्य "सेना" इति "वनम्" इति च व्यपदेशो लौकिकानाम्। न चैतावता सेना वनं वा करिचम्पकाद्यवयवसमवायि एकमवयवि प्रसिध्यति। तथैव गकारादयोऽपि पूर्वोपलब्धिगृहीतात् रूपात् अन्यूनानधिकाः एकस्यामेव स्मृतौ विषयभूताः, सत्यपि "पदम्" इति ऐक्यव्यपदेशे एकानुव्याधवन्तो न भवितुमर्हन्ति।

न चोपाधिविरहात् एकत्वव्यपदेशः एकानुव्याधं कल्पयतीति वाच्यम्। व्यपदेशात् एकानुव्याधबुद्धिः, तया च व्यपदेशः इति उत्पत्तावन्योन्याश्रयात्।

वस्तुतस्त्वत्र उपाधिविरहो नास्ति। गकारौकारविसर्गेषु त्रिष्वपि वर्णेषु एकार्थधीहेतुत्वरूपोपाधेः सद्भावात्। तद्वशादेव च "पदम्" इति व्यपदेशः। न चैवमन्योन्याश्रय इति वाच्यम्। न खलु पदज्ञानाधीनः एकार्थसंबन्धबोधः। अपि तु एकार्थसंबन्धज्ञानाधीनं पदज्ञानम्। पद्यतेऽनेनेति व्युत्पत्त्या पदशब्दः ज्ञानकरणवाची।

अपि[२] चानंशस्य पदस्य वाक्यस्य वा वैशद्यावैशद्ये न युज्येते। सामान्यविशेषतद्वतामनुभूयमानता हि वैशद्यम्। (सामान्यशब्देन साधारणावयवाः गवाश्वादीनां पादादयो गृह्यन्ते। विशेषशब्देन सास्नादयः, तद्वच्छब्देन तदाधारा इति)। सामान्यमात्रस्य विशेषमात्रस्य वा वेदनमवैशद्यम्। न च निखिलसामान्यविशेषविरहिणः स्फोटस्य अस्फुटस्य दर्शनमुपपद्यते। स खलूपलभ्येत, न वोपलभ्येत। न ह्यस्य दृश्यमानस्यास्ति किंचित् अदृश्यमानम्। अत एव न समारोपः।

---

[१] त.बिं. पृ. ५१.
[२] त.बिं. पृ. ५७.

सर्वथाननुभूते तदयोगात्। कथंचित् अनुभवे निरंशत्वानुपपत्तेः अपसिद्धान्त-प्रसङ्गात्।

तस्मादनवयवमेव एकं पदतत्त्वमनुभूयत इति रिक्तं वचः।

"शब्दादर्थं प्रतिपद्यामहे" इत्यनुभवोऽपि न स्फोटाख्यशब्दविषयकः। शब्दत्व-जातिवाचकशब्दशब्देन लक्षितानां वर्णव्यक्तीनामेकस्मृतिसमारूढानामेकार्थप्रति-पत्तिजनकानामेकवचनान्तशब्दशब्देन ग्रहणे विरोधाभावात्।

न च "धवखदिरपलाशा वृक्षः" इति लोके न दृश्यत इति दृश्यमानमेतत् "शब्दादर्थं प्रतिपद्यामहे" इत्यपह्नवमर्हति।

न चार्थधीरूपकार्येण अप्रत्यक्षमपि स्फोटतत्त्वमनुमेयमिति वाच्यम्। शब्दस्य सत्तामात्रेणार्थप्रतीतिहेतुत्वे सर्वदा अर्थप्रतीतिः स्यादिति ज्ञातस्यैवार्थप्रतीतिहेतुत्वं वाच्यम्। तथा चान्योन्याश्रयात्। अर्थप्रतीतौ जातायां तया शब्दस्यानुमानम्। शब्दे ज्ञातेऽर्थधीरूपं कार्यमिति।

अपि चैकस्मृत्युपारूढेभ्यो वर्णेभ्यः एव अर्थप्रतीतेरुपपत्तेः न तदतिरिक्तशब्द-कल्पनावसरः।

न चास्यां स्मृतौ क्रमाक्रमविपरीतक्रमानुभूतानामविशेषो वर्णानामिति "नदी" "दीन" इत्यादावर्थविशेषप्रतीत्यनुपपत्तिरिति वाच्यम्। येन क्रमेण वर्णा अनुभूताः तत्क्रमविशिष्टानुभवविषयत्वेनैव एकस्यां स्मृतौ वर्णानां भानात्।

[१]न च निरन्तरम् अतिसदृशस्वरबहुवक्तृप्रयुक्तेषु आनुपूर्व्यवत्सु समानस्मृति-बुद्धिसमारोहिषु अर्थप्रत्ययादर्शनात् व्यभिचार इति वाच्यम्। एकवक्तृप्रयुक्तत्वेन विशेषणात्। एकवक्तृप्रयुक्तानामेव वर्णानामर्थप्रत्यायकत्वमिति यावत्। यथाहुः[२] —

"यावन्तो यादृशा ये च यदर्थप्रतिपादने।
वर्णाः प्रज्ञातसामर्थ्याः ते तथैवावबोधकाः॥
तेषां च गुणभूतानामर्थप्रत्यायनं प्रति।
साहित्यमेकवक्त्रादिक्रमश्चापि विवक्षितः॥" इति।

तदिह दृश्यमानेभ्यः दृश्यमानप्रकारानुपातिभ्यः अर्थप्रत्ययः उपपद्यमानः नैवा-ज्ञातावयवमत्यन्ताननुभूतं पदतत्त्वमुपकल्पयति।

न चापि समभिव्याहृतपदाभिहितपदार्थप्रत्ययादेव उपपद्यमाना वाक्यार्थधीः अनुभूयमानपरस्परव्यावृत्तपदानि अपह्नुत्य अत्यन्तापरिदृष्टं वाक्यमेकमवगमयति।

---

[१] त.बिं. पृ. ६८.
[२] श्लो.वा.स्फोट. ६९,७०.

अन्त्यवर्णविज्ञानं वाक्यार्थधीहेतुः इति मतस्य निरासः[1]

पारमार्थिकपूर्वपूर्वपदपदार्थानुभवजनितसंस्कारसहितमन्त्यवर्णविज्ञानं वाक्यार्थधीहेतुः इति मतमपि न युक्तम्। तथा हि — पूर्वपूर्ववर्णानुभवेभ्यः जायमानाः संस्काराः श्रोत्रेन्द्रियं च मिलित्वा पूर्ववर्णविषयस्मरणात्मकम् अन्त्यवर्णविषयकानुभवात्मकं चैकं ज्ञानमुत्पादयन्ति। तत् पदार्थधीहेतुः। तथा पूर्वपूर्वपदानुभवजनितसंस्कारसहितं श्रोत्रेन्द्रियं पूर्वपदविषये स्मरणात्मकमन्त्यपदविषये ग्रहणात्मकं चैकं ज्ञानमुत्पादयति। तत् वाक्यार्थधीहेतुः इति तन्मतम्। तदुक्तं[2] —

"चित्ररूपां च तां बुद्धिं सदसद्वर्णगोचराम्।
केचिदाहुर्यया वर्णो गृह्यतेऽन्त्यः पदे पदे॥" इति।

तत्र पृच्छामः। सोऽन्त्यवर्णः किं चरमपदतदर्थयोर्यः संबन्धः तत्स्मरणमुत्पाद्य वाक्यार्थबुद्धिमुत्पादयति, उत अनुत्पाद्य वा।

नाद्यः। तथा हि — सः अन्त्यवर्णः चरमपदतदर्थसंबन्धस्मरणमुत्पाद्य यदि वाक्यार्थधियमुत्पादयेत्, तर्हि तत्स्मृतिहेतुर्या भावना संस्कारः तदुद्बोधः अवश्यं पूर्वमनुत्पन्नः तदानीमेव कुतश्चित् कारणात् उत्पन्न इत्यङ्गीकरणीयम्। कारणं च संबन्धिनोः अन्यतरस्य पदस्य श्रवणम्। अन्वयव्यतिरेकानुसारात्। अतः श्रवणानन्तरक्षणे तदुद्बोधः। तदैव चान्त्यवर्णानुभवेन संस्कारान्तरमुत्पादितम्। सर्ववर्णानामनन्तरक्षणे संस्कारोत्पादनियमात्। संस्कारश्च जन्यः स्वजनकस्यानुभवस्य विनाशे कारणम्। फलं हि कृत्वैव क्रिया विनश्यति। फलविनाश्यं कर्मेति वदन्ति। ततश्च स्वजन्यसंस्कारकारणकेन विनाशेनाघ्राता = स्वीकृता, श्रुतिः = श्रवणं यस्य, तादृशो वर्णः संबन्धस्मृतिसमये अश्रूयमाणः कथं तया सह स्वकार्यं वाक्यार्थबोधं कर्तुं शीलवान् भवेत्?

न द्वितीयः। तथा हि — अन्त्यवर्णश्रुतिः चरमपदतदर्थसंबन्धस्मरणरहिता वाक्यार्थधियं जनयतीति द्वितीयपक्षोऽपि न युक्तः। चरमपदतदर्थसंबन्धस्यास्मरणे तस्य संबन्धस्यानुभवो व्यर्थः। स्मरणं हि अनुभवस्य प्रयोजनम्। तथा च अगृहीतसंगतेरपि प्रथमश्राविणोऽपि "भिन्धि प्रासेन सिन्धुरम्" इति वाक्यादर्थप्रत्ययप्रसङ्गात्।

न चान्त्यवर्णोद्बोधितसंस्कारा स्मृतिः अनुभवेन सह युगपत् उत्पत्तुमर्हति। ज्ञानानां क्रमिकत्वेन युगपत् उत्पादायोगात्। कारणक्रमेण हि ज्ञानक्रमः। अन्यथा समानविषयकबुद्धिधाराया अनुपपत्तेः।

---

[1] त.बिं. पृ. ७६.
[2] श्लो. वा. स्फोट. १११.

न च ज्ञानानां पर्यायेणोत्पत्तावपि प्रथमं चरमं पदं श्रोत्रेण गृहीत्वा पुनश्चरमपदतदर्थज्ञानाद्यनन्तरं श्रोत्रेणैव गृह्यमाणोऽन्त्यो वर्णो वाक्यार्थस्य वाचक इति स्वीकारात् न दोष इति वाच्यम्। तावत्पर्यन्तं प्रथमोत्पन्नधीजनितसंस्कारस्य अनवस्थानात्। अयमाशयः — श्रोत्रं हि दिगात्मकमाकाशात्मकं वाभ्युपेयते। तच्च नित्यत्वात् ग्रहणावस्थापूर्वावस्थमेव कथं कादाचित्कस्य ग्रहणस्य कारणं स्यात्। तस्मात् पूर्वमनुत्पन्नः, तदानीमेवोत्पद्यमानः कश्चिदतिशय एषितव्यः। स च "अभिघातेन हि प्रेरिता वायवः" इत्यादिना मार्गेण[१] वायुसंयोगविभागजन्यः संस्कारः। स च क्षणिक एव। उत्तरकालमग्रहणात्, संस्कारान्तरापेक्षणाच्च। तथा च यावति काले स्मृत्युत्पत्त्यनन्तरक्षणे भूयश्चरमवर्णविषयं ग्रहणमुपपादयितव्यं न तावन्तं कालं प्रथमोत्पन्ना चरमपदविषया या श्रोत्रधीः तस्याः पुनरुत्पादनार्थं तदनन्तरमेवाविनष्टश्रोत्रसंस्कारविशेषोऽस्ति, यतः पुनरपि चरमपदविषयं विज्ञानं जनयेत् इति।

शाबरभाष्यानुसारेण पदवाक्यस्वरूपं, स्फोटपरामर्शश्च

भगवता भाष्यकारेण शबरस्वामिना "औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः..." इति सूत्रस्य[२] वृत्तिकारमतानुसारेण व्याख्यानकरणवेलायां वर्णातिरिक्तशब्दनिराकरणपूर्वकं वर्णानां शब्दत्वं साधितम्। तत्रत्याः[३] उपपादनप्रकाराः लिख्यन्ते —

अथ "गौः" इत्यत्र कः शब्दः? गकारौकारविसर्जनीया इति भगवानुपवर्षः। लोके श्रोत्रेन्द्रियग्राह्ये वस्तुनि "शब्दः" इति शब्दः प्रसिद्धः। वर्णा एव च श्रोत्रेन्द्रियग्राह्याः, न तदतिरिक्तः कश्चित्। ननु वर्णानामेव शब्दत्वेऽभ्युपगम्यमाने शब्दश्रवणानन्तरं जायमानोऽर्थप्रत्ययो नोपपद्येत। तथा हि — वर्णानामर्थप्रत्यायकत्वं वदता वक्तव्यं, किं प्रत्येकं वर्णाः अर्थं प्रत्याययेयुः? उत तदतिरिक्तः समुदायः? उत संहताः वर्णा इति? नाद्यः, एकैकवर्णविज्ञानेन अर्थप्रतीतेरदर्शनात्। न द्वितीयः, समुदायासंभवात्। वर्णैरारभ्यः समुदायः युगपदवस्थितैरेव वर्णैरारब्धव्यः। न च वर्णानां प्रतीतितः यौगपद्यं संभवति। विच्छिन्नयत्नव्यङ्ग्यत्वात्। सत्तायौगपद्येन त्वारम्भे नित्यत्वात् विभुत्वाच्च वर्णानां सर्वे सर्वदा सर्वमारभेरन् इत्यादिदोषप्रसङ्गात्। न तृतीयः, क्रमवर्तिनां वर्णानां साहित्यासंभवात्। यदा गकारो न तदा ओकारविसर्जनीयौ, यदा ओकारविसर्जनीयौ न तदा गकार इति। अतो गकारादिव्यतिरिक्तोऽन्यः शब्दोऽस्ति, तत एवार्थप्रतीतिरुपपद्यते।

---

[१] शा.भा. १.१.५.

[२] जै.सू. १.१.५.

[३] शा.भा.१.१.५, भा.१.पृ. ५४-५८.

न च क्रमवर्तिनां वर्णानां स्वरूपतः साहित्यासंभवेऽपि तत्तत्स्मरणद्वारा अर्थप्रतीतिरुपपद्यत इति अनर्थिका वर्णातिरिक्तशब्दकल्पनेति वाच्यम्। स्मृतेरपि क्षणिकतया वर्णवत् तत्स्मृतीनामपि यौगपद्यस्य दुर्घटत्वात् इति चेत् —

मैवम्। पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायक इत्यदोषात्। अस्य चायमाशयः — यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यत्र दर्श-पूर्णमाससंज्ञकानामाग्नेयादीनां षण्णां यागानां स्वरूपतः क्रमवर्तिनामपि सहिता-नामेव तेषां श्रुतस्य फलसाधनत्वस्यान्यथानुपपत्त्या स्वरूपतः साहित्यासंभवेऽपि तत्तज्जन्यावान्तरापूर्वद्वारा साहित्यं परिकल्प्य सहितानां फलसाधनत्वं श्रूयमाण-मुपपद्यत एवेत्यङ्गीक्रियते; तथा वर्णानामप्येकैकशोऽर्थाभिधानादर्शनात् सकलो-च्चारणे च तदवगमात् संहत्यकारित्वे निश्चिते स्वरूपेण च वर्णानां साहित्या-संभवात् संस्कारनामकमवान्तरव्यापारं परिकल्प्य तद्द्वारा साहित्यमभ्युपगम्य अर्थप्रत्यायकत्वं सहितानां वर्णानामेवोपपद्यत इति अर्थप्रतीत्यन्यथानुपपत्तिरूपाया अर्थापत्तेः अत्रैव क्षीणत्वान्न सा स्फोटकल्पनाय प्रभवतीति।

नन्वेवं पूर्वपूर्ववर्णजनितसंस्कारसहितान्तिमवर्णस्यैव अर्थप्रत्यायकत्वं न तु तदतिरिक्तशब्दस्येत्यभ्युपगमे "शब्दादर्थं प्रतिपद्यामहे" "गोशब्दात् सास्नादिमन्तं प्रतिपद्यामहे" इत्यादिको लौकिको व्यवहारः, अव्यवधानेन शब्दस्यैव निमित्तत्व-बोधकोऽनुपपन्नः स्यात् इति चेत् — न। लौकिकव्यवहारोऽनुपपन्नश्चेत् अनुपपन्न एवास्तु। न हि तावता अप्रामाणिकोऽर्थः कल्पयितुं शक्यते। लौकिकानि हि वचनानि कानिचिदुपपन्नार्थानि "देवदत्त गामभ्याज" इत्यादीनि, कानिचिदनुप-पन्नार्थानि "दश दाडिमानि षडपूपाः" इत्येवमादीनि।

ननु लौकिकव्यवहारस्य प्रकृतविषयेऽप्रमाणत्वेऽपि शास्त्रकारव्यवहारः कथम-प्रमाणं भवितुमर्हति। यास्को[१] हि भगवान् —

"पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीति उपक्रमप्रभृति अपवर्ग-पर्यन्तम्"

इत्याह। "व्रजति" "पचति" इत्येवमाख्यातान्तपदेन आद्यक्रियाप्रभृति अन्तिम-क्रियापर्यन्तं पूर्वापरभावेन विद्यमानक्रियासमूहात्मकं भावं धात्वर्थभूतमाचष्टे इति कथनेन शब्दस्यैवाव्यवधानेन अर्थप्रत्यायकत्वमिति सूचनात् इति चेत् — न। शास्त्रकारवचनस्यापि न्यायविरुद्धत्वेनाप्रमाणतया इष्टत्वात्।

वस्तुतस्तु तत्तद्वर्णानुभवजनितसंस्काराणां व्यापारमात्रत्वेन व्यवधायकत्वा-भावात् नानुपपन्नार्थं लौकिकवचनं शास्त्रकारवचनं वा। अक्षरेभ्यः संस्काराः, संस्कारादर्थप्रतिपत्तिरिति संभवत्यर्थप्रतिपत्तावक्षराणि निमित्तम्।

---

[१] नि. १.१.

ननु "शब्दादर्थं प्रतिपद्यामहे" इत्यादिव्यवहारेषु शब्दशब्दः वर्णात्मकशब्दे गौण एव स्यात्। अव्यवधानेनार्थप्रत्यायक एव शब्दशब्दस्य मुख्यत्वात् इति चेत् — न गौणः। अक्षरेषु सत्सु अर्थप्रतिपत्तिः, तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्याम् अक्षरेष्वपि अर्थप्रतीतिनिमित्तत्वसद्भावात्। अर्थप्रत्ययहेतुः एव शब्दशब्दस्य मुख्यार्थः। न तत्र 'अव्यवधानेन' इत्यस्य प्रवेशः। अथापि कथंचित् गौणः स्यात् तथापि वर्णानामेवार्थप्रत्यायकत्वं युक्तं न तदतिरिक्तस्य (स्फोटस्य)। वर्णानां प्रत्यक्षादिभिरवगम्यमानत्वात्, स्फोटस्य प्रत्यक्षादिभिरनवगम्यमानत्वाच्च। यथा "अग्निर्माणवकः" इत्यादौ प्रयुज्यमानोऽग्निशब्दः गौणो मा भूदिति ज्वलनपरो नेष्यते, माणवके ज्वलनाभेदस्य प्रत्यक्षबाधितत्वात्। तथा "शब्दादर्थं प्रतिपद्यामहे" इत्यादौ प्रत्यक्षादिभिरनवगम्यमानस्य स्फोटस्य न शब्दशब्दवाच्यत्वमङ्गीकृत्यार्थ-प्रत्यायकत्वं कल्पयितुमुचितम्। अपि तु प्रत्यक्षगम्यानां गकारादीनामेव गौणत्व-मप्यङ्गीकृत्य तत्कल्पनमुचितमिति।

तस्मात् "गौः" इति गकारादिविसर्जनीयान्तं पदमक्षराण्येव। अतो न तेभ्यो व्यतिरिक्तमन्यत् पदं नाम।

ननु यथा स्फोटवादे स्फोटस्यार्थप्रतीतिहेतुत्वे स्वीक्रियमाणेऽदृष्टकल्पना, तद्वत् भवन्मतेऽपि तत्तद्वर्णानुभवजनितसंस्कारस्य तत्तत्स्मृतिहेतोः अर्थप्रतीतिरूप-कार्यान्तरे सामर्थ्यमदृष्टमेव कल्पनीयं भवतीति कथं स्फोटवादो निराक्रियत इति चेत् —

उच्यते। स्फोटशब्दपक्षे हि अवश्यं तत्तद्वर्णानुभवजनितं संस्कारान्तरं स्फो-टाभिव्यक्तिसमर्थम्, स्मृतिहेतोरेव वा तदभिव्यक्तिसामर्थ्यं, कर्मणः संयोगविभाग-योरिव अदृष्टमेव कल्पनीयम्। तच्चास्माभिरर्थप्रतीतावेव कल्प्यते। भवन्मते तु पूर्वोक्तरीत्या अदृष्टकल्पना, अप्रसिद्धस्फोटात्मकशब्दकल्पना चेति अधिको दोषः।

एतावानेव शब्दस्वरूपविचारः भाष्ये दृश्यते। भाष्यकारैः "स्फोटः" इति शब्दो यद्यपि न प्रयुक्तः, तथापि वर्णातिरिक्तशब्दनिराकरणात् स्फोट एव वर्णातिरिक्त इति व्याख्याकाराः मन्यन्ते।

श्लोकवार्त्तिकानुसारेण स्फोटवादनिरासः

श्लोकवार्त्तिके[१] भट्टपादाः भाष्योक्तमेव विवृण्वन्ति स्म। तत्र भाष्यानुक्तः विशेषः प्रदर्श्यते।

"औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः..." इति[१] संबन्धनित्यत्वसाधनावसरे शब्दस्वरूपनिरूपणं किमित्यसंगतं भाष्यकारेण कृतमिति शङ्कायाः उत्तरम् —

---

[१] श्लो.वा. स्फोट. पृ. ३६१-३८४.

"आधारात्मनि विज्ञाते सुखमाधेयबोधनम्।
तस्यैव तावत् प्रस्तावादथ गौरित्यतोऽब्रवीत्॥" इति[2]।

संबन्धिद्वयाधारो हि संबन्धः नानिरूपितयोस्तयोर्निरूपयितुं शक्यते। न हि वर्णातिरिक्तस्य शब्दस्य शशविषाणायमानस्य संबन्ध एव संभवति, न तरां नित्यत्वम्। अतः प्रयोजनवत् वर्णानां शब्दत्वम्।

तत्र वैयाकरणाः अर्थप्रत्यायकत्वं शब्दलक्षणं वदन्तः वर्णानामर्थप्रत्यायकत्वासंभवात् वर्णातिरिक्तं स्फोटं समसाधयन्। भाष्यकारास्तु श्रोत्रग्राह्यत्वं शब्दलक्षणं वदन्तः श्रोत्राग्राह्यं स्फोटं निराकुर्वन्ति। किमत्र युक्तम्? भाष्योक्तमेव युक्तम्। लोकप्रसिद्ध्यनुसारात्। लोकप्रसिद्धस्य अर्थप्रत्यायकत्वासंभवे हि अन्यस्य कल्पनम्। अर्थप्रत्यायकत्वं तु न शब्दलक्षणम्। वह्न्यादिप्रत्यायके धूमादावतिव्याप्तेः। प्रत्येकवर्णेष्वव्याप्तेश्च। "ते च श्रोत्रग्रहणाः" इति भाष्ये[3] गकारादीनामेव श्रौत्रत्ववचनात् पूर्वापरवस्तुनोः श्रौत्रत्वं निराकृतम्। पूर्वशब्देन वर्णकारणभूताः तदवयवा निराकृताः; अपरशब्देन गत्वम्, ओत्वम्, अवयवी, गोशब्दत्वं, समुदायः, स्फोटश्चेति। अतः प्रथमं वर्णावयवनिरसनं कृतं वार्त्तिके। ततः गत्वादिजातिनिरासः। ततः गोशब्दाख्यावयविनिरासः। ततः गोशब्दत्वनिरासः। ततः श्रोत्रग्राह्यानां वर्णानामेवार्थप्रत्यायकत्वं समसाधि — संस्कारव्यापारकाणां वर्णानामर्थधीहेतुत्वमिति। प्रत्येकं वा समुदायस्य वा समुदितानां वर्णानां प्रत्यायकत्वमित्यादिविकल्पास्तु स्फोटव्यङ्ग्यतापक्षेऽपि प्रसजन्ति। तत्र यः परिहारः स एवार्थप्रत्यायकत्वेऽपीत्युक्तं[4] —

"यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः।
सोऽपि पर्यनुयोगेन नैवैतेन विमुच्यते॥
तत्रापि प्रतिवर्णं हि पदस्फोटो न गम्यते।
न चावयवशो व्यक्तिस्तदभावान्न चात्र धीः॥
प्रत्येकं चाप्यशक्तानां समुदायेऽप्यशक्तता।
तत्र यः परिहारस्ते स नोऽत्रापि भविष्यति॥" इति।

पूर्वपूर्ववर्णसंस्कारसहितस्यान्त्यवर्णस्य प्रत्यायकत्वे वर्णविषयकसंस्कारस्य वर्णस्मृतिहेतुत्वसंभवेऽप्यर्थधीहेतुत्वं कथमिति शङ्कायाः समाधानं वार्त्तिके एवमुक्तं[5] —

---

[1] जै.सू.१.१.५.
[2] श्लो.वा. स्फोट. १.
[3] शा.भा.१.१.५, भा.१.पृ. ५४.
[4] श्लो.वा.स्फोट. ९१-९३.
[5] श्लो.वा.स्फोट. १०२.

"यद्यपि स्मृतिहेतुत्वं संस्कारस्य व्यवस्थितम्।
कार्यान्तरेषु सामर्थ्यं न तस्य प्रतिषिध्यते॥" इति।

अत्र पक्षे स्मृतिहेतोः संस्कारस्य कार्यान्तरेऽपि सामर्थ्यमदृष्टं प्रकृतकार्यानुसारेण कल्पनीयं भवतीति आलोच्य भाष्यानुक्तं पक्षान्तरमुक्तं वार्त्तिककृता[१] —

"यद्वा प्रत्यक्षतः पूर्वं क्रमज्ञातेषु यत् परम्।
समस्तवर्णविज्ञानं तदर्थज्ञानकारणम्॥
तत्र ज्ञाने च वर्णानां यौगपद्यं प्रतीयते।
नावश्यं यौगपद्येन प्रत्यक्षस्थेन तद्भवेत्॥
चित्ररूपां च तां बुद्धिं सदसद्वर्णगोचराम्।
केचिदाहुर्यथा वर्णो गृह्यतेऽन्त्यः पदे पदे॥" इति।

उत्तरोत्तरवर्णोपलब्धिवेलायामपि पूर्वपूर्ववर्णाः स्मृत्या अनुसन्धीयन्ते। तेनान्त्यवर्णोपलब्धावपि पूर्वे स्मर्यन्ते। तेन येयं सद्रूपान्त्यवर्णविषये प्रत्यक्षा, पूर्वेषु चातीतेषु स्मृतिरूपा चित्ररूपा बुद्धिः सैवार्थप्रतीतिहेतुः इति।

'संस्कारो न भावना अपि तु अव्यवहितोत्तरत्वम्' इति पक्षान्तरमपि वार्त्तिके उक्तं, तत्र न तावानादरः।

अथ अन्त्यवर्णप्रत्यक्षानन्तरं समस्तवर्णविषया स्मृतिः, ततोऽर्थप्रतीतिः इति पक्षान्तरमाह[२] —

"केचिदाहुर्यथा वर्णो गृह्यतेऽन्त्यः पदे पदे॥
अन्त्यवर्णेऽपि विज्ञाते पूर्वसंस्कारकारितम्।
स्मरणं यौगपद्येन सर्वेष्वन्ये प्रचक्षते॥" इति।

किं क्रमगृहीतानां युगपत् स्मरणं भवति, सत्यम्, अन्यत्रापि दर्शनात् इत्याह[३] —

"सर्वेषु चैवमर्थेषु मानसं सर्ववादिनाम्।
इष्टं समुच्चयज्ञानं क्रमज्ञानेषु सत्स्वपि॥
न चेत्तथाभ्युपेयेत क्रमदृष्टेषु नैव हि।
शतादिरूपं जायेत तत्समुच्चयदर्शनम्॥" इति।

क्रमेणोच्चारिता वर्णाः स्वयमक्रमा अपि उपलब्धिक्रमारोपेण क्रमवन्त इव प्रतीयन्ते। ततः पश्चाच्च युगपत् स्मर्यमाणा अपि तत्क्रमतः स्मर्यमाणाः अर्थ-

---

१ श्लो.वा.स्फोट. १०९-१११.
२ श्लो.वा.स्फोट. १११ cd, ११२.
३ श्लो.वा.स्फोट. ११३, ११४.

प्रत्यायका इति न व्युत्क्रमोच्चारणे अर्थप्रतीतिप्रसङ्गः। अस्मिंश्च पक्षे "शब्दादर्थं प्रतिपद्यामहे" इति लौकिकं वचनमुपपन्नतरम्, स्मृत्यारूढानां शब्दानामव्यवधाने-नैवार्थप्रतीतिहेतुत्वात् इत्याह[१] —

"तेन श्रोत्रमनोभ्यां स्यात् क्रमाद्वर्णेषु यद्यपि।
पूर्वज्ञानं परस्ताच्च युगपत् स्मरणं भवेत्॥
तदारूढास्ततो वर्णाः न दूरेऽर्थावबोधनात्।
शब्दादर्थमतिस्तेन लौकिकैरभिधीयते॥" इति।

वैयाकरणास्तु "गौः" इत्येवं गकारादिविलक्षणं शब्दान्तरं प्रत्यक्षमवगम्यत इत्याहुः। तेषां च भ्रान्तिरेव। भ्रान्तौ चेयमेव चित्रा बुद्धिर्निमित्तम्। एकैकज्ञानात् विलक्षणेयमन्त्यवर्णांशे प्रत्यक्षा च (पूर्ववर्णांशे स्मृतिः)। तावतैव "प्रत्यक्षः स्फोटः" इति विभ्रम इत्याह[२] —

"चित्रबुद्ध्यानया भ्रान्त्या वर्णेभ्यो व्यतिरेकतः।
पश्चात् गौरिति विज्ञानं प्रत्यक्षं कैश्चिदिष्यते॥
वैलक्षण्यं तु तस्येष्टमेकैकज्ञानतः स्फुटम्।
वर्णरूपावबोधात्तु न तदर्थान्तरं भवेत्॥
यदि चार्थान्तरत्वं स्यादेकैकस्मात् त्रयस्य तत्।
वर्णत्रयपरित्यागे बुद्धिर्नान्यत्र जायते॥" इति।

तुष्यतु भवान्। अस्त्यर्थान्तरम्, तत्तु वर्णत्रयमेकैकस्मादर्थान्तरम्, तत्परित्यागेन तु अर्थान्तरमनुपलब्धिनिरस्तमिति। कथं पुनरसति शब्दान्तरे नानाभूतेषु वर्णेषु एकशब्दत्वप्रत्ययः इति शङ्कायां समाधानमुक्तं[३] —

"गौरित्येकमतित्वं तु नैवास्माभिर्निवार्यते।
तद्ग्राह्यैकार्थतायां च शब्दे स्यादेकतामतिः॥" इति।

गकारौकारविसर्गाणामेकबुद्धिविषयत्वात् एकार्थकत्वाद्वा एकत्वव्यपदेश इति। "पूर्ववर्णसंस्कारसहितोऽन्त्यो वर्णो वाचकः" इति भाष्येऽन्त्यवर्णस्य साक्षादर्थ-बोधकत्वम्, इतरवर्णानां संस्कारद्वारेति कथनात् अन्त्यवर्णस्य शब्दत्वात् तद्गत-मव्यवधानेनार्थबोधकत्वमादाय "शब्दादर्थं प्रतिपद्यामहे" इति व्यवहारसामञ्जस्य-मित्यपि कथितं वार्त्तिककारैः[४] —

"वर्णोऽन्त्यो गमकस्तस्य शब्दत्वान्मुख्यता भवेत्।" इति।

---

[१] श्लो.वा.स्फोट. ११५, ११६.
[२] श्लो.वा.स्फोट. ११७-११९.
[३] श्लो.वा.स्फोट. १२०
[४] श्लो.वा.स्फोट. १३० cd.

स्फोटनिराकरणस्य प्रयोजनम्

प्रश्नः —

वर्णातिरिक्तः प्रतिषिध्यमानः पदेषु मन्दं फलमादधाति।

समाधानम् —

कार्याणि वाक्यावयवाश्रयाणि सत्यानि कर्तुं कृत एष यत्नः॥ इति[१]।

स्फोटपक्षे हि निरवयवं वाक्यं निरवयवस्य वाक्यार्थस्य वाचकम्। अवयवास्तु पदात्मका वर्णात्मकाश्च मृषाभूताः। ततश्च पदतदवयवाश्रितस्य ऊहादेः महावाक्यावयवावान्तरवाक्यार्थप्रयाजाद्याश्रितस्य प्रसङ्गतन्त्रादेः कार्यस्य मृषात्वं स्यात्। अतस्तत्सत्यतासिद्ध्यर्थं स्फोटनिराकरणं न निष्फलमिति।

प्रकरणपञ्चिकायां स्फोटवादः[२]

"शास्त्रं शब्दविज्ञानात् यदसंनिकृष्टार्थविज्ञानम्" इति भाष्यम्[३] । शब्दविज्ञानापेक्षात् आत्ममनस्संनिकर्षात् यत् अदृष्टार्थविषयं विज्ञानं तच्छास्त्रम्।

वर्णानामेव शब्दत्वम्

को नाम शब्दः? वर्णाः, तेषामेव श्रोत्रग्राह्यत्वात्। श्रोत्रग्राह्ये हि वस्तुनि शब्दशब्दो वर्तते। न च शब्दगतसत्ताशब्दत्वयोः श्रोत्रग्राह्यत्वसत्त्वात् तयोः अतिव्याप्तिः इति वाच्यम्। सत्ताशब्दत्वादिजात्यभावात्। अनुवृत्ताकारावभासिनी हि बुद्धिः सामान्यसिद्धौ प्रमाणम्। न हि द्रव्यगुणादिषु अनुवृत्तमाकारं परामृशन्ती बुद्धिरुदेति, यया सत्ताख्यं महासामान्यं सिध्येत्। नापि ककारखकारादिषु एक आकारोऽवभासते, यतः शब्दत्वाख्यां जातिमभ्युपगच्छेम। तस्मात् सच्छब्दः प्रमाणग्राह्यत्वरूपं धर्मं निमित्तीकृत्य द्रव्यगुणादिषु वर्तते। "शब्दः" इति शब्दः श्रोत्रग्राह्यत्वरूपं धर्मं निमित्तीकृत्य ककारादिषु वर्तते। अतः औपाधिकोऽयं सच्छब्दः शब्दशब्दश्च।

वर्णातिरिक्तं पदमित्याक्षेपः

ननु वर्णातिरिक्तं पदमपि श्रोत्रग्राह्यमेव। तथा हि — "वन" "नव", "नदी" "दीन" इत्यादिषु वर्णाभेदे सत्यपि पदान्यत्वं प्रतीयते। न च वर्णा एव पदम्, "वन" "नव", "नदी" "दीन" इत्यादिषु क्रमभेदात् पदभेदबुद्धिरिति वाच्यम्।

---

[१] श्लो.वा. स्फोट. १३७.

[२] प्र.पं.शास्त्रपरिच्छेदे, पृ. २२९.

[३] शा.भा.१.१.५.

वर्णानामक्रमिकत्वात्। देशनिबन्धनो वा क्रमो भवेत् कालनिबन्धनो वा। उभयविधोऽपि न वर्णेषु संभवेत्। तेषां सर्वगतत्वात्, नित्यत्वाच्च। बुद्धिस्तु तेषां क्रमवती। तदनुरोधेन वर्णा अपि क्रमवन्तः अवभासन्ते। एकक्षणवर्तिन्यां तु एकस्यां पदबुद्धौ बुद्धिभेदनिबन्धनोऽपि क्रमो नोपपद्यत इति कथं तद्भेदेनापि क्रमभेदप्रतिभासोपपत्तिः ?

किं च वर्णा बहवः, एकविषया च पदबुद्धिः "इदमेकं पदम्" इत्याकारेति वर्णेभ्यो भिन्नं पदम्।

किं च यदि वर्णेभ्यो भिन्नं पदं नावभासते, ततः तेभ्यः अर्थप्रत्यय एव नोपपद्यते। एकैकवर्णप्रतिपत्तौ तावत् अर्थो नावगम्यते। न च युगपत् सकलवर्णोपलम्भः संभवति। वर्णानां क्रमेणोच्चारणात्, उच्चारणानुसारित्वाच्च उपलब्धेः।

वर्णानां वाचकत्वेऽनुपपत्तिः

किं च वर्णानां वाचकत्वे "वन" "नव" इत्यादिषु क्रमभेदेऽपि अर्थप्रत्ययः स्यात्। एवं वक्तृभेदे = निरन्तरम् अतिसदृशस्वरबहुवक्तृप्रयुक्तेषु, आनुपूर्व्यवत्सु समानस्मृतिबुद्धिसमारोहिषु अर्थप्रतीतिः स्यात्। न च तत्र अर्थप्रतीतिरस्ति। तस्मात् वर्णेभ्यः असंभवन्नर्थप्रत्ययः वर्णातिरिक्तपदप्रतीतिं स्वनिमित्ततया साधयति।

स्फोटनिरासः[१]

उच्यते। "वन" "नव", "नदी" "दीन" इत्यत्रापि वर्णातिरिक्तवस्त्वन्तरावभासो नास्ति, नकारादय एव हि प्रतीयन्ते। अर्थप्रतीतिभेदस्तु (भिन्नार्थप्रतीतिस्तु) क्रमभेदनिमित्तकः। न च सकलवर्णविषयकबुद्धेरेकत्वात् अक्रमिकेषु वर्णेषु बुद्धिभेदनिबन्धनो भेदः कथमिति वाच्यम्। प्रतिवर्णं बुद्धिभेदात्। तथा हि — वर्णोच्चारणानुबन्धिन्यः श्रवणेन्द्रियनिबन्धनाः बुद्धयः उच्चारणभेदेन भिद्यन्ते। एवं स्मृतिरपि प्रत्येकवर्णोपलम्भजनितसंस्कारवशेन भवन्ती न सर्ववर्णविषया एका संभवति। संस्काराणां भेदात्। "एकं पदम्" इति प्रत्ययस्तु एकार्थप्रतिपादकत्वनिमित्तकः। तस्मात् पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्तिमो वर्णो वाचकः इति स्वीक्रियमाणे नानुपपत्तिः कापि।

अयं च संस्कारः स्मृतिहेतोः संस्कारात् भिन्नः। स्मृतिहेतुर्हि संस्कारः यद्विषयकानुभवजनितः तद्विषये एव ज्ञानान्तरं जनयितुं समर्थः नान्यस्मिन्, इति प्रतीतिः ततोऽनुपपन्नेति स्मृतिहेतुसंस्कारातिरिक्तस्य संस्कारस्य आश्रयणम्। तस्य

[१] प्र.पं. पृ. २३१.

च कार्यकल्प्यत्वात् यथाभावेऽर्थप्रतीतिरूपकार्यदर्शनं तथाभाव एवोत्पत्तिरनुमीयते। तेन क्रमविपर्यये वक्तृभेदे व्यवधाने च कार्यादर्शनात् तत्र संस्कारस्यादर्शनात् अर्थप्रत्ययाभावः।

यस्य यस्य चार्थस्य प्रतीतौ यस्य वर्णस्य निमित्तत्वं तस्य तदर्थप्रतीत्यनुगुणसंस्काराधायकत्वं स्वाभाविकम्। सहायविरहात्तु कार्यानुदयः, सहायावाप्तेश्च कार्योत्पत्तिरिति तेभ्य एवार्थप्रत्ययः।

तस्मान्न प्रत्यक्षतः नाप्यनुमानतो वा वर्णव्यतिरिक्तपदोपपत्तिरिति वर्णात्मकमेव पदम्।

न्यायरत्नमालायां स्फोटवादः[१]

वैयाकरणाः — अविभागमेव वाक्यं व्यञ्जकध्वनिभेदात् तेन तेन वर्णपदविपर्यासात्मनावगम्यमानं तस्य तस्य वाक्यार्थस्य प्रतिपादकमिति मन्यन्ते।

अयमाशयः — क्रमिकैराशुतरविनाशिभिः वर्णैः प्रत्येकं यौगपद्येन च वाक्यार्थप्रतीतेरसंभवात् तत्तद्वर्णाभिव्यङ्ग्यमखण्डं स्फोटाख्यं शब्दतत्त्वं तन्मूलभूतमेषितव्यम्। अविभागम् = अखण्डम्। व्यञ्जकध्वनिभेदात् = व्यञ्जकवर्णभेदात्। वर्णपदविपर्यासात्मना अवगम्यमानं = वर्णविपर्यासे सति पदं पदान्तरात्मना, पदविपर्यासे सति वाक्यं वाक्यान्तरात्मना अभिव्यज्यमानम्। विपर्यासो नाम तत्स्थाने वर्णान्तरपदान्तरसंनिवेशः। तस्य तस्य = नानारूपस्य।

अयं निर्भागवाक्यवादः भागावगमादेवापास्तः।

स्फोटवादानुवादः

स्यादेतत् — यथैव हि वर्णात्मकभागावगमे सत्यपि एकपदावभासात् अर्थप्रतीतेश्च वर्णेभ्योऽनुपपत्तेः भागावगमस्य मिथ्यात्वान्निरवयवमेव पदं पदार्थस्य वाचकमाश्रितम्, तथा वाक्यमपि। तत्रापि हि "एकमिदं वाक्यम्" इति परामर्शोऽस्तीति स एव सभागत्वं प्रतिक्षिपति। वाक्यार्थप्रतिपत्तिश्चानन्योपाया वाक्यमेव निर्भागं कल्पयतीति।

तत्रोच्यते। दृष्टान्तस्तावदसिद्धः। न हि वर्णातिरिक्तमनवयवं पदमस्ति। यस्तु "एकं पदम्" इति परामर्शः, स बहूनामपि एकार्थप्रतिपादकत्वनिमित्तकः। भवति हि बहूनामपि एककार्यनिमित्तकमेकत्वं, यथा "सेना" इति, यथा वा "राजसूय" इति। इष्टिपशुसोमात्मकः अनेककरणसंघातो हि राजसूयः। स हि स्वाराज्यरूप-

---

[१] न्या.र.मा. पृ. ९२-९८.

फलैक्यादेकत्वमुपगच्छति। अत एवार्थैकत्वमजानतां नास्ति "एकं पदम्" इत्यवमर्शः।

यदि स्फोटाख्यं तत्त्वं प्रत्यक्षं तर्हि शब्दप्रयोगानन्तरं व्युत्पन्नाव्युत्पन्नसाधारण्येन तत्प्रतीयेत। न च प्रतीयते। तस्मात् तदसंभवः।

प्रत्युत योग्यानुपलब्ध्या स्फोटस्याभाव एव निश्चीयते। नाप्यर्थापत्त्या स्फोट-सिद्धिः। यदा वर्णा एवेन्द्रियजन्यधीगोचरा नान्यदिति स्थितम्, तदा वर्णानन्तर-जायमाना अर्थप्रतिपत्तिः तन्निमित्तिकैव विज्ञायते।

एवं च वर्णानामेवाविलम्बेनोच्चारितानाम् उदात्तादिस्वरविशेषभाजां संहतानां = संस्कारद्वारा समूहीभूतानाम्, एकस्मृत्यारूढानां वा नियतक्रमाणामनन्तरम् अर्थाव-गमदर्शनात् तादृशानामेवार्थाभिधायकत्वं निश्चीयते।

कथं पुनः क्रमवर्तिनां साहित्यम्। अवान्तरव्यापारवशादिति ब्रूमः। पूर्वपूर्वो हि वर्ण उपलभ्यमानः संस्काराख्यमवान्तरव्यापारं जनयति। तत्सहितश्चान्त्यो वर्णो-ऽर्थप्रतिपत्तिं जनयति।

न च विलक्षणबहुसंस्कारकल्पनापेक्षया एकशब्दतत्त्वकल्पनमेव युक्तमिति वाच्यम्। शब्दतत्त्वस्य योग्यानुपलम्भनिरस्तत्वात्। संस्काराणां तु प्रत्यक्षा-गोचरत्वात् तत्कल्पने प्रत्यक्षविरोधाभावात्, शब्दतत्त्वकल्पनात् संस्कारकल्पनस्य युक्तत्वात्। अनेकमपि दृष्टोपपादकं कल्पनीयम्। दृष्टविरुद्धं तु न किंचिदपि।

यद्वा नात्र अक्लृप्तसंस्कारान्तरकल्पना। क्लृप्ता एव स्मृतिहेतवः संस्काराः। त एव चैतेऽपि। परं तु स्मृतिहेतवः संस्काराः अनुभूतार्थमात्रविषयकस्मृतिजनकाः। इमे तु वर्णसंस्काराः वर्णस्मृतिं जनयन्तः अर्थप्रतीतावप्युपायीभवन्ति। स्मृतानामेव वर्णानां वाचकत्वात्।

वर्णस्मरणानाम् अर्थावगतिहेतुत्वे आक्षेपः[१]

ननु क्रमेण स्मृतानां वर्णानां वाक्यार्थप्रतीतावुपयोगो वा? युगपत् स्मृतानां वा? नाद्यः, क्रमेणानुभूतानामिव क्रमेण स्मृतानामपि वाचकत्वायोगात्। न द्वितीयः, युगपत् स्मरणं नाम क्रमानादरेण स्मरणम्। तथा च जराशब्दोच्चारणे राजशब्दार्थप्रतीतिः स्यात्। तथा वनशब्दोच्चारणे नवशब्दार्थप्रतीतिः स्यात्। तत्रापि स्मृतिहेतुसंस्कारजननात्।

न च व्युत्क्रमोच्चारितानां जरादिशब्दानां न राजादिवाचकत्वम्, उच्चारण-क्रमस्यापि अर्थप्रतीतावङ्गत्वात् इति वाच्यम्। तस्य स्मृतियौगपद्येऽनुपयोगात्

---

[१] न्या.र.मा. पृ. ९५.

दृष्टाङ्गत्वानुपपत्तेः। अदृष्टविधया अङ्गत्वे चादृष्टाङ्गकल्पनासाम्यम्। संस्कारोऽपि हि स्मृतिहेतुः क्रमान्तरेऽपि जायत एव, तन्निमित्तकं स्मरणं च जायत एव। तत्र किमपरमुच्चारणक्रमविशेषेण नः प्रयोजनम्। उच्चारणक्रमस्य क्रमरहितयुगपत्स्मरणस्य च न दृष्टद्वारकमुपयोगं पश्यामः। लौकिकेषु कार्यकारणस्थलेषु अदृष्टद्वारेण उपयोगस्तु अकिंचित्कर इति। किं च क्वचित् असत्यप्युच्चारणे तत्क्रमे च केवलं स्मृत्यारूढवर्णैरर्थप्रतीतिदर्शनात् उच्चारणक्रमस्यादृष्टाङ्गत्वमप्यनुपपन्नम्। तथा हि — यदा जराशब्दः राजशब्दश्च नोच्चारितः, परं तु स्मृतः, तदार्थभेदः अवगम्यत एव। नामरूपेण जराशब्देन जीर्णतायाः, आख्यातेन राजशब्देन भ्राजस्व इत्यर्थस्य चावगमात्। यदि वर्णा एव पदं तदा जराराजशब्दयोः वर्णभेदाभावात्, अनुच्चरितावस्थायां च उच्चारणतज्जन्यानुभवक्रमयोः अविद्यमानत्वात्, स्मरणस्य चैकस्य युगपदनेकवर्णगोचरस्य उत्पद्यमानस्य क्रमरहितत्वात् कुतः पदभेदनिश्चयः? कुतस्तरां चार्थभेदावगमः? किं च वर्णानां क्रम एव न संभवति। तेषां विभुत्वेन देशक्रमस्य, नित्यत्वेन कालक्रमस्य चाभावात्।

अतोऽन्यदेव पदतत्त्वं विलक्षणपदावभासविषय इति वैयाकरणाः प्रतिपन्नाः।

पूर्वोक्ताक्षेपसमाधानपूर्वकं स्फोटनिरासः

अत्रोच्यते। वर्णास्तावत् द्रव्यं, न गुणः। ते व्यापकाः नित्याश्च। ध्वनयस्तु तद्व्यञ्जकाः प्रतिवर्णं विलक्षणाः। ध्वनिक्रमस्तावत् दीर्घत्वादिवत् वर्णेष्वारोपितः। तत्क्रमविशिष्टा वर्णाः पदम्। तत्क्रमभेदात् पदभेदः। पदभेदात् वाक्यभेदः। तद्भेदात् अर्थभेदसिद्धिः। क्रमेणानुभूतानामपि वर्णानां तेनैव क्रमेण युगपत् स्मरणम्। यथा, "पञ्च प्रयाजा मयानुष्ठिताः", "गोदावर्यां महानद्यां शतवारं समाप्लुतम्", "शतं पिपीलिकानां मया हतम्" इत्यादिषु।

एवमनुच्चरितावस्थायामपि स्मृत्यारूढेनैव क्रमविशेषेण जराराजशब्दयोर्भिन्नपदत्वसिद्धिः। तेन ध्वनिधर्माणामेव दीर्घत्वोदात्तादिस्वरक्रमादीनां वर्णेषु समारोपितानां स्मृत्यारूढानामर्थाभिधानाङ्गत्वमिति न किंचिदनुपपन्नम्। तदाहुः भट्टपादाः[१] —

> "तद्वशेन च वर्णानां व्यापित्वेऽपि क्रमग्रहः॥
> एवं ध्वनिगुणान् सर्वान् नित्यत्वेन व्यवस्थिताः।
> वर्णा अनुपतन्तः स्युरर्थभेदावबोधकाः॥" इति।

तत्सिद्धं न वर्णातिरिक्तं पदमनवयवमस्तीति। भागावगमादेव वाक्यमपि नानवयवं सिध्यति।

---

[१] श्लो.वा. १.१.६, ३०० cd, ३०१.

वाक्यार्थावगतिप्रकारः

कथं तर्हि वाक्यार्थावगतिः। पदार्थवत् इति ब्रूमः। यथा वर्णेभ्य एव सहितेभ्यः पदार्थोऽवगम्यते, तथा तेभ्य एव वाक्यार्थोऽपि। वाक्यार्थप्रतीतिरूपैककार्य-कर्तृत्वाच्च बहवोऽपि वर्णा एव "एकं वाक्यम्" इत्युच्यन्ते इति केचित्।

अत्राहुः —

यदि तावत् अगृहीतसंबन्धमेव वाक्यं वाक्यार्थमभिदध्यात्, ततः सर्वेषामपि वाक्यश्रोतॄणां पदार्थविदां तदविदां च वाक्यार्थबोधः स्यात्। न च अगृहीतपद-तदर्थसंगतीनां वाक्यार्थबोधो जायते।

अथ तु पदवत् वाक्यमपि स्वार्थेन संबन्धज्ञानमपेक्षते, तदा अपूर्ववाक्यश्रवणे न कस्यचिदपि वाक्यार्थावगतिः स्यात्।

अथ पदपदार्थसंगतिज्ञानं वाक्याद्वाक्यार्थप्रतीतावप्यङ्गमिति चेत् — न। यदि हि पूर्वपूर्ववर्णजनितसंस्कारसहितः वाक्यान्त्यवर्णः, स्मृत्यारूढा वा वर्णाः पदार्थातिरिक्तं वाक्यार्थमभिदधति, तदा पदपदार्थसंगतिज्ञानं तत्र कमिव उपकारं कुर्यात्? पदार्थज्ञानमिति चेन्न। तेनाप्युपकारादर्शनात्। न हि वाक्यात् वाक्यार्थप्रतीतौ पदजनितपदार्थज्ञानेन कश्चित् उपकारः। कोऽपि नाम कल्प्यत इति चेत् — तर्हि अदृष्टकल्पनैव दोषः।

किं चाल्पैरपि पदैः बहूनि वाक्यानि रच्यन्ते। "गामानय", "गां बधान", "गां मुञ्च", "अश्वमानय", "अश्वं बधान", "अश्वं मुञ्च" इत्यादिषु अल्पैरेव पदैः बहुवाक्यविरचनात्। वाक्यस्यैव वाचकत्वेऽनेकवाक्यबाहुल्यात् वाचकशक्तयो बह्व्यः कल्पनीयाः स्युः।

न च वाक्यार्थप्रतिपत्तेरन्यथानुपपत्तिः। लोकसिद्धार्थाभिधायिभिः पदैरेव तदुपपत्तेः। तत्र पक्षद्वयम् — अन्विताभिधानम् अभिहितान्वयः इति। एतत्तत्त्वं पृथक् विवेचयिष्यते[1]।

शांकरब्रह्मसूत्रभाष्ये स्फोटवादः[2]

स्फोटवादोपक्षेपः

किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते भूरादिलोकानां देवादि-व्यक्तीनां च। स्फोटमित्याह। वर्णपक्षे हि तेषामुत्पन्नप्रध्वंसित्वात् नित्येभ्यः

---

[1] अन्विताभिधानाभिहितान्वयवादप्रकरणे।

[2] ब्र.सू.शां.भा. १.३.२८, पृ. ३२२.

शब्देभ्यो देवादीनां प्रभव इति अनुपपन्नं स्यात्। उत्पन्नप्रध्वंसिनश्च वर्णाः। प्रत्युच्चारणमन्यथा चान्यथा च प्रतीयमानत्वात्। तथा हि — अदृश्यमानोऽपि पुरुषविशेषः अध्ययनध्वनिश्रवणादेव विशेषतो निर्धार्यते, "देवदत्तोऽयमधीते" "यज्ञदत्तोऽयमधीते" इति। न चायं वर्णविषयोऽन्यथात्वप्रत्ययः मिथ्याज्ञानं (भ्रमः) इति वाच्यम्। उत्तरकाले बाधकप्रत्ययाभावात्। नापि वर्णेभ्योऽर्थावगतिर्युक्ता। तेषां प्रत्येकमर्थावगतिहेतुत्वे एकवर्णोच्चारणानन्तरमर्थप्रतीतिप्रसङ्गः, वर्णान्तरोच्चारणानर्थक्यप्रसङ्गश्च। नापि मिलितानां तेषामर्थावगतिहेतुत्वम्। क्रमवतां तेषां मेलनासंभवात्। नापि पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णः अर्थप्रत्यायक इति युक्तम्। संबन्धग्रहणापेक्षो हि शब्दः स्वयं प्रतीयमानोऽर्थं प्रत्याययेत्, धूमादिवत्। न च पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितस्यान्त्यवर्णस्य प्रतीतिरस्ति। अप्रत्यक्षत्वात् संस्काराणाम्। कार्येण अनुमितैः संस्कारैः सहितोऽन्त्यो वर्णः अर्थं प्रत्याययिष्यतीति चेत्। संस्कारकार्यस्य स्मरणस्यापि क्रमिकत्वात्। तस्मात् स्फोट एव शब्दः। स चैकैकवर्णप्रत्ययाहितसंस्कारबीजेऽन्त्यवर्णप्रत्ययजनितपरिपाके प्रत्ययिनि एकप्रत्ययविषयतया झटिति प्रत्यवभासते। न चायमेकप्रत्ययो वर्णविषया स्मृतिः। वर्णानामनेकत्वात् एकप्रत्ययविषयत्वानुपपत्तेः। तस्य च स्फोटस्य प्रत्युच्चारणं "स एवायं गकारः" इति प्रत्यभिज्ञायमानत्वात् नित्यत्वम्। भेदप्रत्ययस्तु वर्णविषयकः।

तस्मात् नित्यात् शब्दात् स्फोटरूपात् अभिधायकात् क्रियाकारकफललक्षणं जगत् अभिधेयभूतं प्रभवतीति।

स्फोटवादनिरासः

"वर्णा एव तु शब्दः" इति भगवानुपवर्षः। यत्तु उत्पन्नप्रध्वंसित्वं वर्णानामुक्तं; तन्न। "स एवायं गकारः" इति प्रत्यभिज्ञानेन स्थिरत्वसिद्धेः। न चेयं प्रत्यभिज्ञा सादृश्यविषयिणी, न त्वैक्यविषयिणीति वाच्यम्। ऐक्यविषयकत्वे बाधकाभावात्। नापि प्रत्यभिज्ञानमिदम् आकृतिविषयकं, न व्यक्तिविषयकमिति वाच्यम्। व्यक्तेरेव प्रत्यभिज्ञानात्। यदि हि प्रत्युच्चारणं गवादिव्यक्तिवत् अन्या अन्या वर्णव्यक्तयः प्रतीयेरन् ततः आकृतिनिमित्तकं प्रत्यभिज्ञानं स्यात्। न त्वेतदस्ति। वर्णव्यक्तय एव हि प्रत्युच्चारणं प्रत्यभिज्ञायन्ते। "द्विः गोशब्दः उच्चारितः" इति हि प्रतीतिः, न तु "द्वौ गोशब्दौ" इति।

ननु वर्णा अप्युच्चारणभेदेन भिन्नाः प्रतीयन्ते। देवदत्तयज्ञदत्तयोरध्ययनध्वनिश्रवणादेव भेदप्रतीतेः इत्युक्तम्। अत्राभिधीयते। सति वर्णविषये निश्चिते प्रत्यभि-

ज्ञाने संयोगविभागाभिव्यङ्ग्यत्वात् वर्णानाम्, अभिव्यञ्जकवैचित्र्यविषयोऽयं वर्णविषयो विचित्रः प्रत्ययः न स्वरूपनिमित्तः।

अपि च वर्णव्यक्तिभेदवादिनापि प्रत्यभिज्ञानसिद्धये वर्णाकृतयः कल्पनीयाः। तासु च परोपाधिको भेदप्रत्ययः इत्यभ्युपगन्तव्यम्। तद्वरं वर्णव्यक्तिष्वेव परोपाधिको भेदप्रत्ययः, स्वरूपनिमित्तकं च प्रत्यभिज्ञानमिति कल्पनालाघवम्। एष एव च वर्णविषयस्य भेदप्रत्ययस्य बाधकः प्रत्ययः, यत् प्रत्यभिज्ञानम्।

कथं हि एकस्मिन् काले बहूनामुच्चारयतामेक एव सन् गकारो युगपत् अनेकरूपः स्यात्? उदात्तः, अनुदात्तः, स्वरितः, सानुनासिकः, निरनुनासिकः इति।

अथ वा ध्वनिकृतोऽयं प्रत्ययभेदः, न वर्णकृतः इत्यदोषः। कः पुनरयं ध्वनिर्नाम? यो दूरादाकर्णयतः वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति। प्रत्यासीदतश्च पटुमृदुत्वादिभेदं वर्णेष्वासञ्जयति। तन्निबन्धनाश्चोदात्तादयो विशेषा न स्वरूपनिबन्धनाः। वर्णानां प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वात्। एवं च सति सालम्बना एव उदात्तादिप्रत्यया भविष्यन्ति।

अपि च नैवैतदभिनिवेष्टव्यम्, उदात्तादिभेदेन वर्णानां प्रत्यभिज्ञायमानानां भेदो भवेत् इति। न ह्यन्यस्य भेदेनान्यस्य अभिद्यमानस्य भेदो भवितुमर्हति। न हि व्यक्तिभेदेन जातिं भिन्नां मन्यन्ते।

[१]वर्णेभ्य एवार्थप्रतीतेः संभवात् स्फोटकल्पनानर्थिका। ननु न कल्पयाम्यहं स्फोटम्, प्रत्यक्षमेव त्वेनमवगच्छामि, एकैकवर्णग्रहणाहितसंस्कारायां बुद्धौ झटिति प्रतिभासनादिति चेत् — न। अस्या अपि बुद्धेर्वर्णविषयकत्वात् एकैकवर्णग्रहणोत्तरकाला हीयमेका बुद्धिः "गौः" इति समस्तवर्णविषया, नार्थान्तरविषया।

कथमेतदवगम्यते? यतोऽस्यामपि बुद्धौ गकारादयो वर्णा अनुवर्तन्ते, न तु दकारादयः। यदि ह्यस्याः बुद्धेः गकारादिभ्योऽर्थान्तरं स्फोटो विषयः स्यात् ततो दकारादय इव गकारादयोऽप्यस्या बुद्धेर्व्यावर्तेरन्। न तु तथास्ति। तस्मादियमेकबुद्धिः वर्णविषयैव स्मृतिः।

नन्वनेकत्वात् वर्णानाम् एकबुद्धिविषयता कथम्?

[२]संभवत्यनेकस्याप्येकबुद्धिविषयत्वम्। "पङ्क्तिः" "वनं" "सेना" "शतं" "सहस्रम्" इत्यादिदर्शनात्। या तु " 'गौः' इत्येकोऽयं शब्दः" इति बुद्धिः सा बहुष्वेव वर्णेषु एकार्थावच्छेदनिबन्धना (एकार्थवत्त्वनिमित्तिका) औपचारिकी वनसेनादिबुद्धिवत्।

---

[१] एतावता प्रबन्धेन क्षणिकत्वेन वर्णानामशक्यसंगतिग्रहतया यदवाचकत्वमापादितं तदपाकृतम्। अथ व्यस्तसमस्तप्रकारद्वयासंभवेन यदापादितं तन्निराक्रियते।

[२] ब्र.सू.शां.भा.पृ. ३२७.

अत्राह — यदि वर्णा एव सामस्त्येन एकबुद्धिविषयतामापद्यमानाः पदं स्युः, ततो "जारा" "राजा", "कपिः" "पिकः" इत्यादिषु पदविशेषप्रतिपत्तिर्न स्यात्। त एव हि वर्णा इतरत्रेतरत्र च प्रत्यवभासन्त इति।

अत्र वदामः — सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्य एव पिपीलिकाः पङ्क्तिबुद्धिमारोहन्ति, एवं क्रमानुरोधिन एव हि वर्णाः पदबुद्धिमारोक्ष्यन्ति। तत्र वर्णानामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतिपत्तिर्न विरुध्यते।

वृद्धव्यवहारे च इमे वर्णाः क्रमाद्यनुगृहीताः गृहीतार्थविशेषसंबन्धाः सन्तः तं तमर्थमव्यभिचारेण प्रत्याययिष्यन्तीति वर्णवादिनो लघीयसी कल्पना। स्फोटवादिनस्तु दृष्टहानिः अदृष्टकल्पना च, वर्णाश्चेमे क्रमेण गृह्यमाणाः स्फोटं व्यञ्जयन्ति, स स्फोटोऽर्थं व्यनक्तीति गरीयसी कल्पना स्यात्।

अथापि नाम प्रत्युच्चारणमन्येऽन्ये वर्णाः स्युः, तथापि प्रत्यभिज्ञालम्बनभावेन वर्णसामान्यानामवश्याभ्युपगन्तव्यत्वात् या वर्णेष्वर्थप्रतिपादनप्रक्रिया रचिता सा सामान्येषु संचारयितव्या। ततश्च नित्येभ्यः शब्देभ्यः देवादिव्यक्तीनां प्रभवः इत्यविरुद्धम्।

भामतीस्था स्फोटवादरीतिः[१]

स्फोटवादोपक्षेपः

वाचकशब्दप्रभवत्वं हि देवानामभ्युपेतव्यम्। अवाचकेन तेषां बुद्धावनालेखनात्। तत्र न तावत् वस्वादीनां वकारादयो वर्णाः वाचकाः। तेषां प्रत्युच्चारणमन्यत्वेन संगतिग्रहणस्याशक्यत्वात्। अगृहीतसंगतेर्वर्णस्य वाचकत्वेऽतिप्रसङ्गात्। अपि चैते वर्णाः प्रत्येकं वा वाक्यार्थमभिदधीरन्? मिलिता वा? न तावत् प्रत्येकम्, एकवर्णोच्चारणानन्तरमर्थप्रतीत्यदर्शनात्, वर्णान्तरोच्चारणानर्थक्यप्रसङ्गाच्च। नापि मिलिताः, तेषामेकवक्तृप्रयुज्यमानानां रूपतो व्यक्तितो वा प्रतिक्षणमपवर्गिणां (नश्यतां) मिथः साहित्यासंभवात्। न च प्रत्येकसमुदायाभ्यामन्यः प्रकारः संभवति।

न च स्वरूपसाहित्याभावेऽपि वर्णानां संस्कारद्वारा साहित्यमस्ति, आग्नेयादिषड्यागानामपूर्वद्वारा साहित्यवत् इति वाच्यम्। विकल्पासहत्वात्। को नु खल्वयं संस्कारोऽभिमतः? किमपूर्वमाग्नेयादिजन्यमिव? किं वा भावनापरनामा स्मृतिप्रसवबीजम्?

---

[१] ब्र.सू.शां.भा.व्या.भामती. पृ. ३२२-३३०.

न तावत् प्रथमः कल्पः। न हि शब्दः स्वरूपतः अङ्गतो वा अविदितः अविदितसंगतिः अर्थधीहेतुः इन्द्रियवत्। उच्चरितस्य बधिरेणागृहीतस्य, गृहीतस्य वा अगृहीतसंगतेः अप्रत्यायकत्वात्। तस्मात् विदितः, विदितसंगतिः, विदित-समस्तज्ञापनाङ्गश्च शब्दो धूमवत् प्रत्यायक इत्यभ्युपगन्तव्यम्। तथा चापूर्वाभि-धानोऽस्य संस्कारः प्रत्यायनाङ्गमिति अर्थप्रत्ययात् प्रागवगन्तव्यः। न च तदा तस्यावगमोपायोऽस्ति। अर्थप्रत्ययात्तु तदवगमं समर्थयमानो दुरुत्तरमितरेतराश्रयम् आविशति, संस्कारावभासात् अर्थप्रत्ययः, अर्थप्रत्ययाच्च संस्कारावभास इति।

भावनाभिधानस्तु संस्कारः स्मृतिप्रसवसामर्थ्यमात्मनः (वर्णस्य स्वस्यैव)। न च तदेवार्थप्रत्ययप्रसवसामर्थ्यमपि भवितुमर्हति। नापि तस्यैव सामर्थ्यस्य सामर्थ्यान्तरम्। न हि यैव वह्नेः दहनशक्तिः सैव तस्य प्रकाशनशक्तिः। नापि दहनशक्तेः प्रकाशनशक्तिः।

अपि च व्युत्क्रमेणोच्चरितेभ्यो वर्णेभ्यः सैवास्ति स्मृतिबीजं वासनेति अर्थ-प्रत्ययः प्रसज्येत। न चास्ति। तस्मान्न कथंचिदपि वर्णा अर्थधीहेतवः।

नापि तदतिरिक्तः स्फोटात्मा। तस्यानुभवानारोहात्। अर्थधीरूपात् कार्यात् तदवगमे परस्पराश्रयप्रसङ्ग इत्युक्तप्रायम्। सत्तामात्रेण तु तस्य नित्यस्यार्थधीहेतुत्वे सर्वदा अर्थप्रत्ययोत्पादप्रसङ्गः। निरपेक्षस्य हेतोः सदातनत्वात्। तस्मात् वाचकात् शब्दात् वाच्योत्पाद इत्यनुपपन्नम्।

अत्राचार्यदेशीयं मतमाह — स्फोटमित्याहेति।

मृष्यामहे न वर्णाः प्रत्यायका इति। न स्फोट इति तु न मृष्यामः। तदनुभवा-नन्तरं विदितसंगतेरर्थधीसमुत्पादात्। न च वर्णातिरिक्तस्य तस्यानुभवो नास्ति। " 'गौः' इत्येकं पदम्", " 'गामानय शुक्लाम्' इत्येकं वाक्यम्" इति नानावर्णपदातिरिक्तैक-पदवाक्यावगतेः सर्वजनीनत्वात्। न चायमसति बाधके एकपदवाक्यानुभवः शक्यो मिथ्येति वक्तुम्।

नाप्यौपाधिकः। उपाधिः खलु एकधीग्राह्यता वा स्यात् एकार्थधीहेतुता वा। न तावदेकधीगोचराणां धवखदिरपलाशानामेकनिर्भासः प्रत्ययः समस्ति। तथा सति "धवखदिरपलाशाः" इति न जातु ज्ञानं स्यात्। नाप्येकार्थधीहेतुता। तद्धेतुत्वस्य वर्णेषु पूर्वमेव निषेधात्। तद्धेतुत्वेन तु एकत्वकल्पनेऽन्योन्याश्रयप्रसङ्गः। एकत्वात् तद्धेतुत्वं, तद्धेतुत्वाच्च एकत्वमिति।

तस्मादयमबाधितोऽनुपाधिश्च पदवाक्यगोचर एकनिर्भासोऽनुभवः वर्णातिरिक्तं वाचकमेकमवलम्बते। स स्फोट इति। तं च ध्वनयः प्रत्येकं व्यञ्जयन्तोऽपि न द्रागेव विशदयन्ति, येन द्रागर्थधीः स्यात्। अपि तु रत्नतत्त्वज्ञानवत् यथास्वं

द्वित्रिचतुष्पञ्चषड्दर्शनजनितसंस्कारपरिपाकसचिवचेतोलब्धजन्मनि चरमे चेतसि विशदं चकास्ति पदवाक्यतत्त्वमिति प्रागुत्पन्नायास्तदनन्तरमर्थधिय उदय इति नोत्तरेषामानर्थक्यं ध्वनीनाम्। नापि प्राचाम्। तदभावे तज्जनितसंस्कारतत्परिपाकाभावेन अनुग्रहाभावात्। अन्त्यस्य चेतसः केवलस्याजनकत्वात्।

न च पदप्रत्ययवत् प्रत्येकमव्यक्तामर्थधियमाधास्यन्ति प्राञ्चो वर्णाः। चरमस्तु तत्सचिवः स्फुटतरमिति युक्तम्। व्यक्ताव्यक्तावभासिताया: प्रत्यक्षज्ञाननियमात्। स्फोटज्ञानस्य च प्रत्यक्षत्वात्। अर्थधियस्तु अप्रत्यक्षायाः मानान्तरजन्मनः व्यक्त एवोपजनो, न वा स्यात्, न पुनरस्फुट इति न समः समाधिः। तस्मान्नित्यः स्फोट एव वाचको न वर्णाः इति।

स्फोटनिरासः

तदेतदाचार्यदेशीयं मतं, स्वमतमुपपादयन्नपाकरोति — वर्णा एव तु शब्द इति।

एवं हि वर्णातिरिक्तः स्फोटोऽभ्युपेयेत, यदि वर्णानां वाचकत्वं न संभवेत्, स चानुभवपद्धतिमध्यासीत। द्विधा चावाचकत्वं वर्णानां क्षणिकत्वेन अशक्यसंगतिग्रहाद्वा, व्यस्तसमस्तप्रकारद्वयाभावाद्वा आस्थीयते।

[१]न तावत् प्रथमः कल्पः। वर्णानां क्षणिकत्वे मानाभावात्। ननु वर्णानां प्रत्युच्चारणमन्यत्वं सर्वजनप्रसिद्धम्। न। प्रत्यभिज्ञानुभवविरोधात्। न चासत्यप्येकत्वे ज्वालादिवत् सादृश्यनिबन्धनमेतत् प्रत्यभिज्ञानमिति वाच्यम्। सादृश्यनिबन्धनत्वमस्य बलवद्बाधकोपनिपाताद्वा आस्थीयेत, क्वचित् ज्वालादौ व्यभिचारदर्शनाद्वा। तत्र क्वचित् व्यभिचारदर्शनेन तदुत्प्रेक्षायामुच्यते स्वतःप्रामाण्यवादिभिः वृद्धैः —

"उत्प्रेक्षेत हि यो मोहात् अजातमपि बाधनम्।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत्॥" इति।

न चेदं प्रत्यभिज्ञानं गत्वादिजातिविषयं, न गवादिव्यक्तिविषयम्, तासां प्रतिनरं भेदोपलम्भात्। अत एव शब्दभेदोपलम्भात् वक्तृभेद उन्नीयते "सोमशर्मा अधीते, न विष्णुशर्मा" इति युक्तम्। यतो बहुषु गकारमुच्चारयत्सु निपुणमनुभवः परीक्ष्यताम्।

यथा कालाक्षीं स्वस्तिमतीं च ईक्षमाणस्य व्यक्तिभेदप्रथायां सत्यामेव तदनुगतमेकं सामान्यं प्रथते, तथा किं गकारादिषु भेदेन प्रथमानेष्वेव गत्वमेकं तदनुगतं चकास्ति, किं वा यथा गोत्वमाजानत एकं भिन्नदेशपरिमाणसंस्थानव्यक्त्युपधानभेदात् भिन्नदेशमिव अल्पमिव महदिव दीर्घमिव वामनमिव, तथा गव्यक्ति-

---
[१] ब्र.सू.शां.भा.व्या.भामती. पृ. ३२५.

राजानतः एकापि व्यञ्जकभेदात् तद्धर्मानुपातिनीव प्रथत इति भवन्त एव विदां-कुर्वन्तु इति।

तत्र गकारव्यक्तिभेदमङ्गीकृत्यापि यो गत्वस्यैकस्य परोपधानभेदकल्पनाप्रयासः, स वरं गव्यक्तावेवास्तु किमन्तर्गडुना गत्वेनाभ्युपेतेन। यथाहुः[1] —

"तेन यत् प्रार्थ्यते जातेस्तद्वर्णादेव लप्स्यते।
व्यक्तिलभ्यं तु नादेभ्य इति गत्वादिधीर्वृथा॥" इति।

न च स्वस्तिमत्यादिवत् प्रत्युच्चारणं गव्यक्तिभेदप्रत्ययः स्फुटः अस्ति। तथा सति "दश गकारानुदचारयत् चैत्रः" इति हि प्रत्ययः स्यात्। न स्यात् "दशकृत्व उदचारयत् गकारम्" इति। न चैष जात्यभिप्रायोऽभ्यासः, यथा "शतकृत्वः तित्तिरीमुपायुङ्क्त देवदत्तः" इति। अत्र हि सोरस्ताडं (साविष्कारं) क्रन्दतोऽपि गकारादिव्यक्तौ लोकस्योच्चारणाभ्यासप्रत्ययस्याविनिवृत्तेः।

चोदकः प्रत्यभिज्ञानबाधकमुत्थापयति — कथं ह्येकस्मिन् काले बहूनामुच्चारय-तामिति।

यत् युगपत् विरुद्धधर्मसंसर्गवत् तत् नाना, यथा गवाश्वादिः द्विशफैकशफकेश-रगलकम्बलादिमान्। युगपत् उदात्तानुदात्तादिविरुद्धधर्मसंसर्गवांश्चायं वर्णः। तस्मा-न्नाना भवितुमर्हति।

न च उदात्तादयः व्यञ्जकधर्माः न वर्णधर्माः इति सांप्रतम्। व्यञ्जका ह्यस्य वायवः। तेषामश्रावणत्वेन कथं तद्धर्माः श्रावणाः स्युः।

इदं तावदत्र वक्तव्यम्। न हि गुणगोचरमिन्द्रियं गुणिनमपि गोचरयति, मा भूवन् घ्राणरसनश्रोत्राणां गन्धरसशब्दगोचराणां तद्वन्तः पृथिव्युदकाकाशा गोचराः। एवं च मा नाम भूत् वायुगोचरं श्रोत्रम्। तद्गुणांस्तूदात्तादीन् गोचरयिष्यति। ते च शब्दासंसर्गाग्रहात् शब्दधर्मत्वेनाध्यवसीयन्ते। शब्दस्य तु प्रत्यभिज्ञावशात् एकत्वे-नावधृतस्य स्वरूपा उदात्तादयो धर्माः परस्परविरोधिनो न संभवन्ति स्वरूपतः। तस्मात् यथा मुखस्यैकस्य मणिकृपाणदर्पणाद्युपधानवशात् नानादेशपरिमाण-संस्थानभेदविभ्रमः, न तु स्वाभाविको नानाधर्मसंसर्गः इति स्थिते; अभ्युपेत्य परिहारमाह भाष्यकारः — अथ वा ध्वनिकृत इति। 'अथ वा' इति पूर्वपक्षं व्यावर्तयति। भवेतां नाम गुणगुणिनावेकेन्द्रियग्राह्यौ। तथाप्यदोषः। ध्वनीनामपि शब्दवत् श्रावणत्वात्। तस्मादवर्णात्मको वैष शब्दः, शब्दातिरिक्तो वा ध्वनिः शब्दव्यञ्जकः श्रावणोऽभ्युपेयः। उभयथापि च अक्षु व्यञ्जनेषु च तत्तद्ध्वनि-भेदोपधानेन अनुनासिकत्वादयोऽवगम्यमानाः तद्धर्मा एव शब्दे प्रतीयन्ते, न तु

[1] श्लो.वा.स्फोट. २८.

स्वतः शब्दस्य धर्माः। तथा च येषामनुनासिकत्वादयो धर्माः परस्परविरुद्धा भासन्ते, भवतु तेषां ध्वनीनामनित्यता। न हि तेषु प्रत्यभिज्ञानमस्ति। येषु तु वर्णेषु प्रत्यभिज्ञानं, न तेषामनुनासिकत्वादयो धर्मा इति नानित्याः।

एवं च सति सालम्बना इति। यद्येष परस्याग्रहो धर्मिण्यगृह्यमाणे तद्धर्मा न शक्या ग्रहीतुमिति। एवं नामास्तु तथा तुष्यतु परः, तथाप्यदोष इत्यर्थः।

तदनेन प्रबन्धेन क्षणिकत्वेन वर्णानामशक्यसंगतिग्रहतया यत् अवाचकत्वमापादितं वर्णानां तदपाकृतम्। व्यस्तसमस्तप्रकारद्वयासंभवेन तु यदासञ्जितं तत् निराचिकीर्षुराह — वर्णेभ्यश्चार्थप्रतीतेरिति। कल्पनाममृष्यमाण एकदेश्याह — न कल्पयामीति। निराकरोति — नास्या अपि बुद्धेरिति। निरूपयतु तावत् " 'गौः' इत्येकं पदम्" इति धियमायुष्मान्। किमियं पूर्वानुभूतान् गकारादीनेव सामस्त्येनावगाहते, किं वा गकाराद्यतिरिक्तं, गवयमिव वराहादिभ्यो विलक्षणम्। यदि गकारादिविलक्षणम् अवभासयेत्, गकारादिरूषितः प्रत्ययो न स्यात्। न हि वराहधीर्महिषरूषितं वराहमवगाहते। पदतत्त्वमेकं प्रत्येकमभिव्यञ्जयन्तो ध्वनयः प्रयत्नभेदभिन्नाः तुल्यस्थानकरणनिष्पाद्यतयान्योन्यविसदृशतत्तत्पदव्यञ्जकध्वनिसादृश्येन स्वव्यञ्जनीयस्य एकस्य पदतत्त्वस्य मिथो विसदृशानेकपदसादृश्यान्यापादयन्तः सादृश्योपधानभेदात् एकमपि अभागमपि नानेव भागवदिव भासयन्ति, मुखमिवैकं नियतवर्णपरिमाणस्थानसंस्थानभेदमपि मणिकृपाणादयः अनेकमनेकवर्णपरिमाणस्थानसंस्थानभेदम्। एवं च कल्पिता एवास्य भागा वर्णा इति चेत् — तत् किमिदानीं वर्णभेदान् असत्यपि बाधके मिथ्येति वक्तुमध्यवसितोऽसि। एकधीरेव नानात्वस्य बाधिकेति चेत् — हन्तास्यां नाना अपि वर्णाः प्रथन्त इति नानात्वावभास एव एकत्वं कस्मान्न बाधते?

अथ वा वनसेनादिबुद्धिवत् एकत्वनानात्वे न विरुद्धे। नो खलु सेनावनबुद्धी गजपदातितुरगादीनां चम्पकाशोककिंशुकादीनां च भेदमपबाधमाने उदीयेते। अपि तु भिन्नानामेव सतां केनचित् एकेनोपाधिना अवच्छिन्नानामेकत्वमापादयतः। न चौपाधिकेन एकत्वेन स्वाभाविकं नानात्वं विरुध्यते। न हि औपचारिकमग्नित्वं माणवकस्य स्वाभाविकनरत्वविरोधि।

तस्मात् प्रत्येकवर्णानुभवजनितभावनानिचयबललब्धजन्मनि निखिलवर्णावगाहिनि स्मृतिज्ञाने एकस्मिन् भासमानानां वर्णानां तदेकविज्ञानविषयतया वा एकार्थधीहेतुतया वा एकत्वमौपचारिकमवगन्तव्यम्।

न चैकस्मृतिसमारोहिणां क्रमाक्रमविपरीतक्रमप्रयुक्तानामभेदो वर्णानामिति यथाकथंचित् प्रयुक्तेभ्य एतेभ्योऽर्थप्रत्ययप्रसङ्ग इति वाच्यम्। उक्तं[१] हि —

"यावन्तो यादृशा ये च पदार्थप्रतिपादने।
वर्णाः प्रज्ञातसामर्थ्याः ते तथैवावबोधकाः॥" इति।

श्रीभाष्यरीत्या स्फोटवादपर्यालोचनम्

श्रीभाष्ये जिज्ञासाधिकरणे असत्यात् सत्योत्पत्तिनिरासावसरे, व्यञ्जकगत-कत्वखत्वादिभेदः शब्दे आरोपितः अर्थविशेषप्रतिपत्तिहेतुर्भवति, तत्रासत्यात् सत्योत्पत्तिः इत्याशङ्क्य, तत्रापि कत्वखत्वादिविशेषान्विततत्तन्नादकृतः अभि-व्यक्तिविशेषः सत्यः, तद्विशिष्टः सत्यशब्दोऽर्थप्रतिपत्तिहेतुः। यद्यपि कत्वखत्वा-दिवैशिष्ट्यं शब्दस्य आरोपितम्, तथापि तज्ज्ञानं सत्यमेवार्थप्रतीतिहेतुः इति परिहृत्य वस्तुतः "शब्दस्यैकरूपत्वमपि न साधीयः, गकारादेः बोधकस्यैव श्रोत्र-ग्राह्यत्वेन शब्दत्वात्" इति भाष्यकारैरुक्तम्[२]। तत्र श्रुतप्रकाशिकायां स्फोटवादः विस्तरेणानूद्य खण्डितः। सः प्रकारः अत्र निरूप्यते।

श्रुतप्रकाशिकायां स्फोटवादः[३]

स्फोटवादानुवादः

वर्णातिरिक्त एकरूपः शब्दः किं स्फुटप्रतिपन्नत्वात् अभ्युपगम्यते, उत कल्पनावशात्। न प्रथमः, गकारादिव्यतिरिक्तस्य कस्यचित् अनुपलम्भात्। न द्वितीयः, कल्पकाभावात्।

ननु वर्णानां वाचकत्वानुपपत्तेः, "एकं पदम्" इत्यादिप्रतीतेः वर्णेष्वनुपपत्तेः, भिन्नेषु वर्णेषु "शब्दः" "शब्दः" इत्यनुवृत्तिबुद्धिवशाच्च वर्णातिरिक्तपदस्फोटः सिध्यति। तस्मादेव न्यायात् पदसंघातातिरिक्तवाक्यस्फोटश्च सिध्यतीत्यत्राह — गकारादेरिति। गकारादिवर्णा एव समुदिता वाचकाः। "एकं पदम्" "एकं वाक्यम्" इति प्रतीतिश्च वर्णसमुदायविषयिणी। "शब्दः" "शब्दः" इत्यनुवृत्ति-बुद्धिश्च श्रोत्रग्राह्यत्वरूपोपाधिनिमित्तिका। अतः कल्पकानामन्यथासिद्धत्वात् नैक-रूपशब्दसिद्धिरित्यर्थः।

ननु न कल्पकानामन्यथासिद्धिः। तथा हि — न तावत् एकैकस्य वर्णस्य वाचकत्वम्, वर्णान्तरवैयर्थ्यात्। गकारमात्रेण गोगवयगजाद्यप्रतीतेश्च। नापि वर्ण-

---

[१] श्लो.वा.स्फोट. ६९.
[२] श्रीभा.१.१.१, भा.१.पृ. १८०.
[३] श्रु.प्र.१.१.१, भा.१.पृ. १८१-१८२.

समुदायो वाचकः, क्रमोच्चरितश्रुतानां वर्णानां यौगपद्याभावेन वृक्षादीनामिव समुदायभावानुपपत्तेः।

न च पूर्वपूर्ववर्णश्रवणजनितसंस्कारसहितोऽन्त्यो वर्णोऽर्थवाचक इति युक्तम्। वर्णानुभवजनितसंस्काराणामनुभूतवर्णविषयकस्मरणहेतुत्वेऽप्यननुभूतार्थान्तरप्रतीतिहेतुत्वाभावेनाकिंचित्करत्वात्। पूर्ववर्णसंस्कारासहकृतस्य चान्त्यवर्णस्य अर्थप्रत्यायकत्वायोगात्।

तथा, वर्णानां भिन्नत्वात् "एकं पदम्" इति प्रत्ययः वर्णातिरिक्तस्फोटविषयको भवितुमर्हति। न च वनसेनादिप्रतीतिवत् समुदायविषयकत्वमेकत्वप्रत्ययस्य युक्तम्। एकप्रदेशसंबन्धित्वं हि बहुषु वृक्षेषु "वनम्" इत्येकत्वप्रत्ययस्य निमित्तम्। तादृशश्चोपाधिः नास्ति वर्णेषु। एकस्मृतिविषयत्वमेकत्वप्रत्ययनिमित्तमिति तु न शङ्कनीयम्। "द्वे पदे" "त्रीणि पदानि" "बहूनि वाक्यानि" इत्यनेकेषामेकप्रत्ययविषयत्वदर्शनात्।

न चैकार्थप्रतिपादकवर्णसमूहः एकं पदमिति वाच्यम्। वर्णानां वाचकत्वानुपपत्तेः एकार्थप्रतिपादकत्वाभावात्।

किं च बहुषु वर्णेषु "अयं शब्दः" "अयं शब्दः" इत्यनुवृत्तः शब्दशब्दः वर्णातिरिक्तशब्दविषयको युक्तः। न च श्रोत्रग्राह्यत्वोपाधिना शब्दशब्दानुवृत्तिरिति वाच्यम्। श्रोत्रस्य श्रोत्रग्राह्यत्वायोगेन श्रोत्रग्राह्यताया अपि श्रोत्रेण ग्रहीतुमशक्यत्वात्। प्रमाणान्तरेण श्रोत्रग्राह्यताप्रतीतौ अविलम्बितशब्दसाक्षात्कारानुपपत्तिः।

तस्मात् कल्पकानामन्यथासिद्ध्यभावात् वर्णातिरिक्तः शब्दः स्फोटः इति।

स्फोटवादनिरासः

अत्रोच्यते। न तावत् वर्णानामर्थप्रतिपादकत्वानुपपत्त्या स्फोटसिद्धिः। वर्णानां स्फोटाभिव्यञ्जकत्वमिति भवन्मतेऽपि चोद्यपरिहारयोस्तुल्यत्वात्, लाघवन्यायेन वर्णानामेवार्थप्रतिपादकत्वाश्रयणस्य न्याय्यत्वात्।

तथा हि — न तावदेकैकवर्णः स्फोटव्यञ्जकः, द्वितीयवर्णवैयर्थ्यात्। गकारमात्रेण गवयादिपदस्फोटाभिव्यक्तिप्रसङ्गाच्च। नापि वर्णसमुदायो व्यञ्जकः। क्रमोच्चरितश्रुतानां वर्णानां यौगपद्याभावेन समुदायभावानुपपत्तेः। न च पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णो व्यञ्जकः। वर्णानुभवजनितसंस्काराणामनुभूतवर्णमात्रस्मृतिहेतुतया अननुभूतस्फोटप्रतीतिहेतुत्वायोगात्। तत्संस्कारानुपकृतस्यान्त्यवर्णस्य च स्फोटाभिव्यञ्जकत्वायोगात्।

ननु पदं तावत् प्रतीयते। अतस्तत्प्रतीत्यनुरूपं कारणं कल्पनीयम्। क्रमभाविनामपि संस्काराणां युगपत् कार्यकरत्वं युक्तम्। क्रमदृष्टयोरपि घटयोः "तौ घटौ" इति स्मरणदर्शनात्। अतो युगपद्भाविपूर्ववर्णस्मरणसहितोऽन्त्यवर्णः वा, युगपत्स्मर्यमाणसर्ववर्णसमुदायो वा स्फोटाभिव्यञ्जक इति चेत् — एवं तर्हि स्फोटाभिव्यञ्जकतया अभ्युपेतायाः सामग्र्याः अर्थाभिव्यञ्जकत्वमास्थीयताम्, चोद्यपरिहारयोः तुल्यत्वात्। अन्यथासिद्धस्यार्थान्तरकल्पकत्वायोगात्। वर्णानामेवार्थवाचकत्वसम्भवे तदतिरिक्तस्फोटकल्पनानुपपत्तेः। लाघवतर्कस्य बलीयस्त्वाच्च।

वर्णानां भिन्नत्वेऽपि युगपत् बुद्धिस्थैकविभक्त्यन्तानेकवर्णसमुदायविषयकतया पदैकत्वबुद्धिरुपपद्यमाना नार्थान्तरं कल्पयितुं प्रभवति।

न चार्थैकत्वात् पदैकत्वम्, पदैकत्वादर्थैकत्वम् इत्यन्योन्याश्रय इति वाच्यम्। एकविभक्त्यन्तवर्णसमुदायस्य एकपदत्वनिश्चयात्। "सुप्तिङन्तं पदम्" इति[१] हि पदनिष्कर्षः।

अथ वा एकव्युत्पत्तिसिद्धैकार्थप्रतीत्युपयुक्तवर्णसमुदायः पदम्।

बहुषु वर्णेषु "अयं शब्दः", "अयं शब्दः" इति प्रत्ययोऽपि श्रोत्रग्राह्यत्वरूपोपाधिनिमित्तकत्वात् अन्यथासिद्ध इति ततः नातिरिक्तस्य स्फोटस्य सिद्धिः।

न च श्रोत्रग्राह्यताया अपि श्रोत्रेण ग्रहणापेक्षा। यथा चाक्षुषाणां धवलिमनीलिमपीतिम्नां चाक्षुषत्वज्ञाने न चक्षुषः अपेक्षा।

"इदं चाक्षुषम्" "इदं चाक्षुषम्" इत्यनुगतव्यवहारश्च चाक्षुषत्वज्ञाननिबन्धन एव। प्रमाणान्तरावगते ये चक्षुःश्रोत्रे तज्जन्यज्ञानविषयत्वेन निमित्तेन "इदं चाक्षुषम्" "इदं श्रावणम्" इति चाक्षुषत्वश्रावणत्वादिज्ञानम्। न हि सहसैव "शब्दोऽयम्" इति जानन्ति। प्रथमं गकारादिरूपेणैव शब्देऽवसिते ग्रहीतशक्तिकशब्दस्मरणपूर्वकमेव "शब्दः" इत्यवगम्यते। अतः शब्देन स्मरणकृतविलम्बवत् श्रोत्रानुमानविलम्बोऽपि अभ्यासपाटवकृतात् शैघ्र्यात् न विविच्यते।

तस्मात् वर्णसमुदाय एव पदम्, पदसमुदाय एव वाक्यम् इति सिद्धम्।

द्वैतवेदान्तानुसारेण स्फोटखण्डनम्

अनुव्याख्यानव्याख्यायां न्यायसुधायां स्फोटवाद एवमनूदितः खण्डितश्च[२]।

"अतोऽन्विताभिधायित्वं गौरवं कल्पनेऽन्यथा।"[१]

---

[१] पा.सू. १.४.१४.

[२] अ.व्या.व्या.न्या.सु.१.१.१, पृ. ९७५.

गौरवमिति। अन्यथा कल्पने = निरवयवं वाक्यं वाक्यार्थस्य बोधकमिति कल्पने, गौरवं स्यात्। वाक्यमेव खल्वेवंविधं विना प्रमाणेन कल्पनीयम्, तस्य च वाक्यार्थप्रत्यायनशक्तिरपि कल्पनीयेति।

पूर्वपक्षः

ननु कथं स्फोटस्याप्रामाणिकत्वम्, पदार्थवाक्यार्थप्रतीतेः अन्यथानुपपत्त्या पद-वाक्यस्फोटयोः ज्ञातत्वात्। यदि हि न पदातिरिक्तं वाक्यम्, पदं च न वर्णातिरिक्तं, तदा अर्थप्रतीतिरेव न स्यात्। वर्णा हि न प्रत्येकमर्थप्रत्ययं जनयन्ति, तथा अननुभवात्, इतरवर्णवैयर्थ्यप्रसङ्गाच्च। समुदायश्च वर्णानां न संभवति, एक-वर्णसमयेऽन्यस्याभावात्। वर्णानां नित्यत्वेऽपि तेषां प्रतीतिः नानुवर्तते। अप्रतीय-मानानां तेषां प्रत्यायकत्वे सर्वपदार्थप्रतीतिप्रसङ्गः। न च पूर्वानुभूताः वर्णाः स्मृत्यारूढाः अर्थप्रतीतिहेतव इति वाच्यम्। स्मृतीनामप्यनुभवानुसारेण क्रमि-कत्वात्, ज्ञानयौगपद्यप्रतिषेधाच्च।

अथ पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोत्तरोत्तरानुभवैराहितोऽतिपटीयान् संस्कारो निखिलवर्णविषयामेकां स्मृतिं जनयतीति मतम्। तदा क्रमो न स्यात्। पौर्वापर्यरूपः क्रमो हि प्रतीत्यङ्गम्। स च क्रमः देशतः कालतो वा विभुषु नित्येषु च वर्णेषु न संभवति। अतो बुद्धीनां क्रमो वाच्यः। स च एकस्मृतिसमारूढानां वर्णानां नास्तीति अर्थप्रतीत्यनुपपत्तिः। क्रमस्यानङ्गत्वे च "सरः" "रसः" "नवं" "वनं" "राजा" "जारा" "नदी" "दीन" इत्यादावर्थभेदप्रतीतिर्न स्यात्।

अतो वर्णेभ्योऽनुपपद्यमानोऽर्थप्रत्ययः तदतिरिक्तं स्फोटमवस्थापयति। स च स्वरूपग्राहकेण प्रमाणेनार्थप्रत्यायनशक्तिमानखण्ड एवावगत इति कथं कल्पना-गौरवमिति।

सिद्धान्तः

तत्र ब्रूमः। किमयं स्फोटः स्वयं ज्ञातः सन् वाक्यार्थपदार्थज्ञानजनकः, उत स्वरूपसन्? आद्ये किमनया अर्थापत्त्यैव तज्ज्ञानम्, उत प्रमाणान्तरेण? नाद्यः, इतरेतराश्रयप्रसङ्गात्। ज्ञाते हि स्फोटेऽर्थज्ञानम्, अर्थज्ञाने च सति तदन्यथानुप-पत्त्या स्फोटज्ञानमिति। न द्वितीयः, प्रमाणान्तराभावात्।

ननु "एकं पदम्" "एकं वाक्यम्" "शब्दादर्थं प्रत्येमि" इति एकार्थविषयिणी प्रत्यक्षप्रतीतिस्तत्र प्रमाणमिति चेत् — इयमेव विचार्यताम्, किमेषा वर्णपद-

---

[१] अ.व्या. १.१.१.

विभागरहितमेकं शब्दतत्त्वमवगाहते, किं वा वर्णादिभेदमपि। आद्यस्तु प्रतीतौ बहुमानवता नाङ्गीकर्तुमुचितः। द्वितीयेऽपि किं वर्णादयः तस्य स्फोटस्यारम्भकाः उत व्यञ्जकाः। नाद्यः, स्फोटस्य नित्यत्वाङ्गीकारात्। द्वितीये किं ते प्रत्येकं तस्य व्यञ्जकाः, किं वा समुदिता इति पूर्ववत् दोषाः। यस्त्वत्र प्रतीकारः सोऽर्थ-प्रतीतावेव कल्प्यतामिति पुनर्गौरवमेव।

ननु पूर्वपूर्ववर्णाभिव्यक्तं स्फोटतत्त्वमुत्तरोत्तरैः विशदं व्यज्यते, नैवमर्थे कल्पना युक्तेति चेत् — न। एकरूपे वैशद्यावैशद्ययोरर्थगतयोरयोगात्। ज्ञानगतयोश्चाननु-भवात्।

अथ वर्णादयस्तत्र कल्पिताः प्रतिभान्तीति मतम्, तदिदमायातम् — अप्रतीतं शशविषाणं तत्त्वं, गवादिविषाणानि तु तत्र कल्पितानि प्रतिभान्तीति। ऐक्य-प्रतीतिबलात् इत्थमास्थीयत इति चेत् — न। भेदप्रत्ययबलात् वनादिप्रत्ययस्येव ऐक्यप्रत्ययस्य औपाधिकत्वोपपत्तेः। उपाधिश्चैकार्थप्रत्यायकत्वम्।

न चैकार्थप्रत्यायकत्वेन एकत्वप्रत्ययः। ततश्च एकार्थप्रत्यय इत्यन्योन्याश्रय इति वाच्यम्। एकार्थप्रत्यायनस्य समयग्राहकप्रमाणादेव सिद्धत्वात्, एकत्वप्रत्यय-सापेक्षत्वाभावात्। एकार्थप्रत्यायनं च नानुपपन्नम्, एकस्मृतिसमारूढानां वर्णानां तदुपपत्तेः।

न च "रसः" "सरः" इत्यादौ क्रमव्युत्क्रमयोरविशेषापत्तिः इति वाच्यम्। अनुभवक्रमोपहितानामेव (विशिष्टानामेव) वर्णानां स्मृत्यावगाहनात्।

अत एवार्थापत्तिरपि परास्ता वेदितव्या। अन्यथोपपत्तेः उक्तत्वात्। स्फोटा-भावेऽपि एकस्मृतिविषयेभ्यो वर्णेभ्य एवार्थप्रतीतेः उपपत्तेः।

अप्रतीतस्य तु स्फोटस्यार्थप्रत्यायकत्वे सर्वार्थप्रतीतिप्रसङ्गः। तस्मात् सुष्ठूक्तं — गौरवं कल्पनेऽन्यथेति।

वर्णमालायाः वाक्यार्थवाचकत्वनिरासः[१]

अन्ये त्वाहुः — स्मर्यमाणा वर्णमालैव वाक्यार्थबोधजननीति। तदप्यसत्। सा हि व्युत्पत्तिसहाया वा तथा स्यात्, अन्यथा वा। अन्यथा चेत् अतिप्रसङ्गः। आद्ये पदतदर्थावबोधस्य आश्रितत्वात् किं तयेति गौरवमेव। किं च क्रमोपेतानां द्वित्राणां पञ्चषाणां वा वर्णानां स्मरणमुपपद्यते। महावाक्यस्थानां शतसहस्रसंख्याकानां तु स्मरणं दुःशकमेव। किमभ्यासस्य दुष्करमिति चेत् — न। गत्यन्तराभावे तु एवमेतत्। सति तु सुखोपाये न प्रयासगौरवकल्पना युक्तेति।

---

[१] अ.व्या.व्या.न्या.सु. पृ. ९८३.

वाक्यान्त्यवर्णस्य वाचकत्वनिरासः

अपरे तु वाक्यान्त्यवर्णं वाक्यार्थस्य प्रतिपादकमाचक्षते। तदप्ययुक्तम्। स हि केवलो वा तथा स्यात्, पूर्ववर्णसंबन्धस्मरणेनानुगृहीतो वा। आद्ये पूर्ववर्णोच्चारणवैयर्थ्यम्, अतिप्रसङ्गश्च। द्वितीये अनुभूयमानः स्मर्यमाणो वा। नाद्यः, संबन्धस्मृतिव्यवहितस्यानुभवस्यानवस्थानात्। द्वितीये तु किमनेन प्रयत्नगौरवेण। स्मृतिस्था वर्णाः पदत्वेनानुसंहिताः वाक्यार्थमवगमयन्तीत्येव वक्तव्यम्। पूर्ववर्णसंस्कार एवोपयोगी न स्मृतिरिति चेत् — न। तथा सति पदानुसन्धानासंभवेन संबन्धस्य स्मरणाभावप्रसङ्गात्।

नागेशरीत्या अष्टविधस्फोटनिरूपणम्

पूर्वं स्फोटविषये वाक्यविषये च अष्टौ पक्षाः वाक्यपदीयमनुसृत्य संगृहीताः। इदानीं भूषणसारमञ्जूषादिनव्यव्याकरणग्रन्थोक्तरीत्या अष्टौ पक्षाः संगृह्यन्ते।

नागेशकृतस्फोटवादाख्यग्रन्थस्य अडयार्पुस्तकालयद्वारा प्रकाशितस्य उपोद्धाते यत् पण्डितकृष्णमाचार्यैः लिखितं[१] तदेव साररूपं सुगमं चास्तीति अत्रोपस्थाप्यते।

व्यस्ताव्यस्तविकल्पेन वर्णानामर्थप्रत्यायकत्वाभावः

वैयाकरणास्तावत् वर्णानां वाचकत्वासंभवात् तेभ्योऽन्यत् स्फोटाख्यं शब्दतत्त्वमर्थप्रतीतिजनकं प्रतिजानते। तथा हि, वर्णानामेव वाचकत्ववादिनः एवं प्रष्टव्याः — वर्णाः किं व्यस्ताः अर्थं प्रत्याययन्ति? उत समस्ताः? इति। न तावत् व्यस्ताः। एकैकवर्णश्रवणेऽप्यर्थप्रतीतिप्रसङ्गात्, द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेश्च।

ननु प्रथमवर्णश्रवणेऽस्पष्टं प्रतीयमानोऽपि पदार्थो द्वितीयादिवर्णश्रवणे स्पष्टं स्पष्टतरं च प्रतीयते; यथा रत्नपरीक्षकाणां प्रथमदर्शने रत्नरूपममलमप्रकाशमानमपि पुनः पुनः परीक्षकाणां चरमे दर्शने चकास्ति निरवद्यं रत्नतत्त्वम्; एवमिहापि प्रथमवर्णश्रुतावव्यक्तगम्येऽर्थे व्यक्ततरप्रतीत्यर्थं वर्णान्तराणि प्रयुज्यन्त इति चेत् — न।

एवं सति कूपयूपसूपादावर्थान्तरप्रतीत्यनापत्तेः। तथा हि — "कूपः" इत्यत्र ककारेण प्रतीयमानोऽप्यन्धुः ऊकारेण पकारेण च यदि स्पष्टतरं प्रत्याय्यत इत्युच्यते, तर्हि ऊकारपकारयोरप्यन्धुबोधकत्वमुक्तं स्यात्। तदा "यूपः" इत्यत्रापि ऊकारपकाराभ्यामन्धुप्रतीतिः स्यात्। एवं "सूपः" इत्यत्रापीति महत् दौर्घट्यमापद्येत।

---

[१] स्फो.वा.उपोद्धातः. पृ. १२-३०.

नापि समस्ता इति द्वितीयः पक्षः। वर्णानां हि सामस्त्यमेवासंभवि, कुतस्तस्य प्रत्यायकत्वम्। नैयायिकानां मते वर्णानामाशुतरविनाशितया उत्पन्नविनष्टानां सामस्त्यं दुर्घटम्। मीमांसकानां मते यद्यपि नित्या वर्णाः, तथापि तैः सर्वदा सर्वत्र अर्थप्रतीत्यापत्त्या चक्षुरादीनामिव न तेषां केवलं सत्तया अर्थप्रत्यायकत्वम्। किं तु धूमादीनामिव ज्ञातानामेव तथात्वमिति वक्तव्यम्। ज्ञानं च तेषां श्रोत्राधीनं प्रयत्न-स्थानकरणैः क्रमेणोच्चरितानामेवेति वक्तव्यम्। तथा च द्वितीयवर्णोच्चारणे प्रथम-वर्णोच्चारणहेतुप्रयत्नादीनां विनाशात् तदुच्चारणस्यापि नाश इति कुतः समस्तग्रहणं भविष्यति। तदाह[1] —

"यावद् गकारे वाग्वर्तते न तावदौकार इति येनैव यत्नेनैको वर्ण उच्चार्यते तेनैव विच्छिन्ने तस्मिन् वर्णे उपसंहृत्य तं यत्नम् अन्यं यत्नमुपादाय द्वितीयः प्रयुज्यते, तथा तृतीयः, तथा चतुर्थः" इति।

पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितस्य अन्त्यवर्णस्यार्थप्रत्यायकत्वमिति पक्षस्य निरासः

यत्तूच्यते — उच्चारणस्य नष्टत्वेऽपि पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णग्रहः प्रत्यायक इति। तदपि दुर्वचम्। संस्कारो हि यद्विषयकानुभवजनितः तद्विषयकमेव स्मरणं जनयेत्, न पुनरर्थप्रतीतिमपि।

नन्वत्र समाधिः पूर्वमेवोक्तः[2] —

"यद्यपि स्मृतिहेतुत्वं संस्कारस्य व्यवस्थितम्।
अर्थान्तरेषु सामर्थ्यं न तस्य प्रतिषिध्यते॥"

इतीति चेत् — मैवम्। न ह्येवं प्रतिज्ञामात्रेण वस्तुशक्तिः अन्यथाकर्तुं शक्यते। न हि 'अग्नौ शैत्यं न प्रतिषिध्यते' इति प्रतिज्ञामात्रेणाग्निः शीतो भवितुमर्हति।

नन्वेवमपि पूर्ववर्णस्मृत्या सहितस्यान्तिमवर्णग्रहस्य अर्थप्रत्यायकत्वं भविष्यतीति चेत् — तदपि न। पूर्ववर्णसंस्कारैः तत्स्मृतिजननसमयेऽन्त्यवर्णग्रह उपरत इति कस्य साहायकं पूर्ववर्णस्मृतिराचरेत्?

न च सदसद्वर्णविषयकमेकं ज्ञानं भविष्यतीति वाच्यम्। विचारासहत्वात्। न हीन्द्रियमतीतवर्णग्रहणसमर्थम्, न वा संस्कारो वर्तमानवर्णग्राहीति न युगपत् इन्द्रियं संस्कारश्चैकां बुद्धिं जनयितुं प्रभवेताम्।

ननु मास्तु नामान्त्यवर्णप्रत्यक्षेण पूर्ववर्णस्मृत्या सहितेनार्थप्रत्ययः, तथाप्यन्त्य-वर्णानुभवनाशानन्तरं तद्विषयकसंस्कारेण पूर्ववर्णसंस्कारेण च स्मृतिरेका

[1] म.भा. १.४.१०८.
[2] श्लो.वा.स्फोट. १०२.

भवितुमर्हति। तस्यां च सर्वे वर्णाः प्रतिभान्तीति तैः वर्णैरेवार्थप्रतीतिः संभवतीति चेत् — न। प्रतीतिविरोधात्। "गौः" इति समग्रपदश्रवणसमनन्तरक्षण एव हि गोपदार्थावगमो जायते। स तु मध्ये संस्कारस्मृतिजननविलम्बं न क्षमते। तस्मात् सर्वथा वर्णानां वाचकत्वं न संभवति।

अन्यथानुपपत्त्या स्फोटस्यार्थप्रत्यायकत्वम्

किं च "शब्दादर्थं प्रतिपद्यामहे", "एकं पदम्", "एकं वाक्यम्" इति चाबाधिता प्रतिपत्तिर्दृश्यते। तत्र 'शब्दात्' इत्येकत्वं न स्फोटाभ्युपगममन्तरेणोपपादयितुं शक्यम्। वर्णानां वाचकत्वे हि 'शब्दैः' इति बहुवचनेन भाव्यम्। एवम् "एकं पदम्" "एकं वाक्यम्" इत्यपि स्फोटमन्तरा नोपपादयितुं शक्यते।

ननु वर्णश्रवणे सत्यर्थप्रतीतिः, तदश्रवणे तु नेत्यन्वयव्यतिरेकाभ्यां वर्णानामेवार्थप्रत्यायकत्वमिति चेत् — अत्राहुः। सत्यं, वर्णेषु सत्स्वेव अर्थप्रतीतिर्नान्यदेति। न तावता वर्णानामर्थप्रत्यायकत्वसिद्धिः। वर्णानां स्फोटव्यञ्जकत्वेनाप्युक्तान्वयव्यतिरेकोपपत्तेः।

कण्ठताल्वाद्यभिघातजन्या हि वर्णाः स्फोटं व्यञ्जयन्ति। व्यञ्जकवर्णभेदादविभक्तेऽपि स्फोटे भेदप्रतीतिः। यथा मणिकृपाणादिव्यञ्जकभेदात् एकस्मिन्नपि मुखे भेदप्रतीतिः। तथा च स्फोटशब्दस्य द्विधा व्युत्पत्तिः संप्रदायसिद्धा। स्फुटत्यर्थोऽस्मादिति स्फोटः, स्फुट्यते वर्णैः इति स्फोट इति च। प्रथमव्युत्पत्तौ वाचक इत्यर्थः। द्वितीयव्युत्पत्तौ तु व्यङ्ग्य इत्यर्थः।

स्फोटसद्भावे महाभाष्यप्रामाण्यम्

अयं च स्फोटो महाभाष्यकारेण भगवता पतञ्जलिना[१] कण्ठरवेणोपवर्णितः —

"एवं तर्हि स्फोटः शब्दः। ध्वनिः शब्दगुणः। कथम्? भेर्याघातवत्। तद्यथा भेर्याघातो भेरीमाहत्य कश्चित् विंशतिपदानि गच्छति। कश्चित् त्रिंशत्। कश्चित् चत्वारिंशत्। स्फोटश्च तावानेव भवति। ध्वनिकृता वृद्धिः।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषांचित् उभयं तत्स्वभावतः॥" इति।

अत्र स्फोटपदेन व्यक्तिस्फोटो विवक्षित इति कैयटः। तथान्यत्र च प्रत्याहाराह्निके चतुर्थसूत्रे[२] —

[१] म.भा.१.१.७०.
[२] म.भा.१.१.२.३, भाग.१. पृ. १२०.

"अथ वा उभयतः स्फोटमात्रं निर्दिश्यते, रश्रुतेर्लश्रुतिर्भवतीति"।

अत्र जातिस्फोटो विवक्षित इति कैयटः।

नागेशस्तु स्फोटवादमिमं स्फोटायनमुन्युपज्ञमाचख्यौ स्फोटवादान्ते —

"वैयाकरणनागेशः स्फोटायनऋषेर्मतम्।
परिष्कृत्योक्तवांस्तेन प्रीयतां परमेश्वरः॥" इति।

स्फोटस्य प्रणवब्रह्मरूपता

अयं च स्फोटः सर्ववागर्थप्रपञ्चोपादानभूतप्रणवरूपः, यः किलेत्थमाम्नायते "ओंकार एव सर्वा वाक्। सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" इति। बह्वी = पदवाक्यरूपा। नानारूपा = घटपटादिरूपा चेत्यर्थः।

अयमेव स्फोटो वाक्यपदीये भर्तृहरिणा[1] वर्णितः —

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥" इति।

तथा आन्तरस्फोटात् बाह्यस्फोटस्योदयोऽन्यत्र पठ्यते। प्रथममान्तरस्फोटमाह —

"समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते॥" इति[2]।

यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधात् अस्माभिरपि श्रूयते स इत्यर्थः।

"ततोऽभूत् त्रिवृदोंकारः योऽव्यक्तप्रभवः स्वराट्।
यत्तल्लिङ्गं भगवतः ब्रह्मणः परमात्मनः॥
शृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक्।
येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः॥
स्वधाम्नो ब्रह्मणः साक्षात् वाचकः परमात्मनः।
स सर्वबीजमन्त्रोपनिषद्बीजं सनातनम्॥"

विवर्तवादावलम्बनेन स्फोटप्रक्रिया

अत्रेत्थं नव्यैः स्फोटवादिभिः मायावादबद्धश्रद्धैः विवर्तवादमवलम्ब्य परिष्कृता प्रक्रिया — मूलाधारस्था सूक्ष्मतमा वाक् त्रीणि पर्वाणि व्यतीत्य तुरीये पर्वणि स्थूलरूपमापद्यमाना श्रोत्रग्राह्या भवति। तेषु च पर्वसु सा क्रमात् परा, पश्यन्ती,

---

[1] वा.प. १.१.

[2] भागवतम् १२.६.३७.

मध्यमा, वैखरीति व्यपदेशं लभते। तृतीयं पर्व समारूढा मध्यमाभिधाना वागेव आन्तरः स्फोट इति व्यवह्रियते।

तथा हि — आदौ परस्य ब्रह्मणः अविद्यासंवलिततया ईश्वरपदवाच्यस्य "बहु स्यां प्रजायेय" इति स्वयं बहुभवनेच्छारूपा सिसृक्षापरनामधेया काचन माया-वृत्तिर्जायते। ततो बिन्दुशक्तिराविर्भवति। तत्रास्त्यंशत्रयं — चिदंशः, अचिदंशः, चिदचिन्मिश्रांशश्चेति। तत्र चिदंशो मायाशबलितं ब्रह्म बिन्दुरिति कथ्यते। एवं च चिदचिन्मिश्ररूपं ब्रह्मैव बिन्दुरिति, बीजमिति, नाद इति च कथ्यमानं नाम-रूपप्रपञ्चसृष्ट्युपादानं निमित्तं च भवतीति। अस्याः बिन्दुशक्तेः अतिसूक्ष्मं शब्द-ब्रह्मापरनामधेयं वर्णादिविशेषरहितं नादमात्रमुत्पद्यते। एतदेव शब्दब्रह्म सर्वगतमपि प्राणिनां मूलाधारे कुण्डलिन्यां, ज्ञातमर्थं विवक्षोः पुंसः इच्छया प्रयत्नपूर्वकं कृतावतरणेन पवनेन संयुज्यमानमभिव्यज्यते। अस्मिन्नेव प्रथमपर्वणि निःस्पन्दं तच्छब्दब्रह्म परा वाक् इत्युच्यते। तथोक्तं संगीतरत्नाकरे[१] —

"गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम्।
अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपंकजे।
आधाराद् द्व्यङ्गुलादूर्ध्वं मेहनाद् द्व्यङ्गुलादधः॥
एकाङ्गुलं देहमध्यं तप्तजाम्बूनदप्रभम्।
देहेऽपि मूलाधारेऽस्मिन् समुद्यति समीरणः।" इति।

परापश्यन्त्यादिविभागः

अस्मिन्नेव पर्वणि वाक् निष्पन्दा सूक्ष्मतमा भवति। अनन्तरेषु त्रिष्वपि सस्पन्दा क्रमात् सूक्ष्मतरा सूक्ष्मा स्थूला च भवति। इमामेव दशामभिप्रयन् भर्तृहरिः[२] —

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥"

इति शब्दतत्त्वं वर्णयति। अत्र पराया वाचः ब्रह्मत्वं प्रतिपादितम्। अत एव हरिणा[३] —

"वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायाः त्रय्या वाचः परं पदम्॥"

इति पश्यन्त्या [illegible]करणविषयत्वमुक्तम्। व्याख्यातं चेदं व्याख्यातृभिः —

---

[१] सं.र.१.२.१२० ab, १२१ ab, १४५ cd, १४६ ab, अन्तिमपादद्वयं कुत्रेति न ज्ञायते।
[२] वा.प. १.१.
[३] वा.प. १.१४४.

"तत्र स्वपरश्रोत्रविषया वैखरी। मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्त्या व्यवहारकारणम्। पश्यन्ती तु लोकव्यवहारातीता। योगिनां तु तत्रापि प्रकृतिप्रत्ययविभागावगतिरस्ति। परायां तु न" इति।

अत्र शब्दतत्त्वस्यार्थरूपेण विवर्ताङ्गीकारान्न तत्र परिणामप्रयुक्तदोषाणाम् अवसरः।

एकस्य तत्त्वात् अप्रच्युतस्य भेदानुकारेणासत्याविभक्तान्यरूपोपग्राहिता हि विवर्तः। स्वाप्नप्रतिभासवत्।

सैषा परा वाक् नाभिपर्यन्तमागच्छता तेनैव वायुना नाभिदेशेऽभिव्यक्तिं प्रापिता पश्यन्ती इत्युच्यते। एतद् द्वयमपि सूक्ष्मतमसूक्ष्मतररूपमीश्वराधिदैवतं योगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषयश्चोच्यते। ततो हृदयपर्यन्तमागच्छता तेनैव वायुना हृदयदेशेऽभिव्यक्ता तत्तदर्थविशेषतत्तच्छब्दविशेषावगाहिन्या बुद्ध्या विषयीकृता हिरण्यगर्भदैवता परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्यमा वागुच्यते। स्वयं तु कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन सूक्ष्मं श्रूयमाणा भवति। अस्या एव नादरूपोंऽशः आन्तरः स्फोट इति कथ्यते। सैव आस्यपर्यन्तं गच्छता तेनैव वायुना व्यानोदानसंज्ञकेन कण्ठदेशं गत्वा मूर्धानमाहत्य प्रतिनिवृत्य तत्तत्स्थानेषु अभिव्यञ्जिता परकीयश्रोत्रेणापि ग्रहणयोग्या विराडधिदैवता वैखरीत्युच्यते।

स्फोटस्य विभुत्वं नित्यत्वं च

अयं च स्फोट एक एव, लाघवात्। तथा विभुः नित्यश्च। तत्र च कत्वादिविशेषाः न सन्ति। कत्वादिप्रतीतिस्तु व्यञ्जकभूतैः वर्णैः ध्वनिभिर्वा कृता। अयमेव

"श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः शब्दः"

इति भाष्योक्तः[१]। तत्र श्रोत्रोपलब्धित्वं कत्वादिना अभिव्यक्तत्वम्। बुद्धिनिर्ग्राह्यत्वं पदादिरूपेण। प्रयोगेण वैखरीरूपेण अभिव्यक्तत्वं तत्स्वरूपरूषितत्वम्।

एवं च मध्यमायाः नादांश एव आन्तरः स्फोटः। स च मनोमात्रगोचरः। कचटतपादिवर्णप्रतिभासरहितः।

स्फोटस्य अष्टविधत्वम्

अयं च स्फोटो द्विधा — व्यक्तिस्फोटः, जातिस्फोटश्च। तत्र व्यक्तिस्फोटः सखण्डाखण्डभेदेन पुनर्द्विधा। तत्र सखण्डस्फोटो वर्णपदवाक्यभेदेन त्रिधा। अखण्डस्फोटश्च पदवाक्यभेदेन द्विविधः। आहत्येत्थमष्टौ स्फोटाः संपन्नाः —

---

[१] म.भा. १.१.१, जातिपक्षाधिकरणे, भाग.१. पृ. ९७.

१) सखण्डवर्णस्फोटः
२) सखण्डपदस्फोटः,
३) सखण्डवाक्यस्फोटः,
४) अखण्डपदस्फोटः,
५) अखण्डवाक्यस्फोटः,
६) वर्णजातिस्फोटः,
७) पदजातिस्फोटः,
८) वाक्यजातिस्फोटश्चेति।

स्फोटः

व्यक्तिस्फोटः

सखण्ड			अखण्ड	
सखण्डवर्ण	सखण्डपद	सखण्डवाक्य	अखण्डपद	अखण्डवाक्य

जातिस्फोटः

वर्णजाति	पदजाति	वाक्यजाति

तत्राखण्डवाक्यस्फोट एव मुख्य इति नव्याः। तदुक्तं[१] "तत्र वाक्यस्फोट एव मुख्यः" इति। तत्र वाक्यस्फोटपदेनाखण्डवाक्यस्फोटो गृह्यते। वाक्यजातिस्फोटो मुख्य इति तु प्राञ्चः। तदुक्तं शब्दकौस्तुभे[२] — "यद्यपीहाष्टौ पक्षा उक्ताः, तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रन्थकृताम्। तत्रापि जातिस्फोट इत्यवधेयम्" इति।

वर्णस्फोटस्वरूपम्

तत्र वर्णस्फोट इत्यत्र वर्णपदं न प्रत्येकवर्णपरम्, तेषां वाचकत्वस्य सर्वथा निरस्तत्वेन तदभ्युपगमे अपसिद्धान्तप्रसङ्गात्। किं तु प्रकृतिप्रत्ययपरम्। तथा च 'वर्णस्फोटः' इत्यस्य प्रकृतिप्रत्ययौ वाचकावित्यर्थः। शास्त्रप्रक्रियानिर्वाहार्थं तयोरर्थः कल्पितः। अयं च पक्षः "दाधा घ्वदाप्" इति सूत्रे भाष्ये[३] उक्तः —

"आदेशास्तर्हीमे भविष्यन्ति। अनागमकानां सागमका आदेशाः। तत्कथम्?

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥ " इति।

---

[१] ल.मं.पृ.१.
[२] श.कौ.पृ. ११.
[३] म.भा.१.१.२०.

तत्र कैयटः —

"सर्व इति। आगमा अपीत्यर्थः। सर्वपदादेशा इति। पदशब्देन न सुबन्तं गृह्यते। अपि तु कार्यं प्रतिपद्यमानं प्रकृतिप्रत्ययादि"

इति। एवं सति "रामेण" "रामेषु" इत्यादौ प्रकृतिप्रत्ययविवेकस्य दुरधिगमतया तयोर्वाचकत्वं दुर्वचमिति विशिष्टस्य पदस्यैव वाचकत्वमिति पदस्फोटः। अत्र पदं सुप्तिङन्तम्।

वाक्यस्फोटस्वरूपम्

एवं "हरेऽव", "विष्णोऽव" इत्यादौ पदविभागस्य दुरधिगमतया पदस्फोटपक्षो न संभवतीति विशिष्टं वाक्यमेव वाचकमिति वाक्यस्फोटः।

एतत्पक्षद्वयमपि महाभाष्यकारैरप्यभिसंहितम्। यथा —

"अथ 'गौः' इत्यत्र कः शब्दः" इत्युपक्षिप्य, व्यक्तिक्रियादीनां शब्दत्वं निराकृत्य "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः" इति भाष्ये[१] उक्तम्।

तत्र कैयटः — "वैयाकरणाः वर्णातिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति" इति व्याचख्यौ। तत्र 'येनोच्चारितेन' इत्येकवचनेन "गौः" इत्यस्य एकपदत्वं सूचितम्। अत्रैव "वर्णातिरिक्तस्य पदस्य वाक्यस्य वा" इति ब्रुवता अखण्डपदवाक्यस्फोटौ प्रतिपादितौ।

तथा "पदप्रकृतिः संहिता" इति ऋग्वेदप्रातिशाख्यमत्र प्रमाणम्। तत्र हि पदानां प्रकृतिः इति षष्ठीतत्पुरुषे अखण्डवाक्यस्फोटपक्षः। पदानि प्रकृतिर्यस्या इति षष्ठीबहुव्रीहौ सखण्डवाक्यस्फोटः। तथा च भर्तृहरिः[२] —

"पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते।
पदानां संहिता योनिः संहिता वा पदाश्रया॥" इति।

जातिस्फोटस्वरूपम्

अनन्तानां वर्णानां पदानां वाक्यानां वा वाचकत्वकल्पनापेक्षया तन्निष्ठाया जातेरेव वाचकत्वकल्पने लाघवमिति जातिस्फोटपक्षः। यथा अनन्तासु गोव्यक्तिषु शक्तिकल्पनापेक्षया लाघवेन गोपदस्य गोत्वे शक्तिकल्पनम् इति प्राञ्चः। यथाहुः[३] —

---

[१] म.भा.१.१.१, भा.१.पृ.१७.
[२] वा.प. २.५८.
[३] वै.सि.का.७१, वैयाकरणभूषणे, स्फोटनिर्णयप्रकरणे. पृ. ३२६.

"शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्" इति।

ननु स्फोटवादिनां मते स्फोटस्य वर्णरहितत्वात् गकारौकारविसर्जनीयरूपं "गौः" इति पदमेव नास्ति। कुतः तन्निष्ठा जातिः? कुतस्तरां तस्याः वाचकत्वम्?

अथ वर्णानां स्फोटव्यञ्जकतया तद्धर्मप्रतिभासः स्फोट उपपद्यते, मणि-कृपाणदर्पणधर्मा इव मुख इत्युच्यते। नैतदेवम्। व्यञ्जका हि वर्णा आशु विनाशिनः। न द्वितीयादिवर्णोत्पत्तिक्षणे पूर्वे स्वयमवतिष्ठन्त इति गकारौकारविसर्जनीयानां संभूयावस्थानमेव नेति तद्व्यङ्ग्ये स्फोटे कथं तेषां युगपत् प्रतिभासः स्यात्? तदुच्यते[1] —

"अनारब्धे तु गोशब्दे गोशब्दत्वं कथं भवेत्?" इति।

किं च स्फोटस्य एकत्वात् "गौः" इति पदस्फोट एक एवेति कथं तत्र जातिः सिध्येत्? आश्रयैकत्वस्य जातिबाधकत्वात् इति चेत् —

अत्र वदन्ति — व्यञ्जकानां वर्णानां संभूयावस्थानासंभवेऽपि पूर्वपूर्ववर्णजनित-संस्कारसचिवोऽन्त्यो वर्णो वाचक इति परेषां मत इव तादृशोऽन्त्यवर्णोऽस्माकं मते स्फोटव्यञ्जको भविष्यतीति न दोषः कोऽपि। अथ वा वर्णानां नश्वरत्वे-नानुभवेन तेषां यौगपद्यासंभवेऽपि स्मरणे यौगपद्यमापन्नानां (युगपत् स्मर्यमाणानां) तेषां व्यञ्जकत्वं भविष्यति। यदाह हेलाराजः[2] —

"अनुभवपूर्वकत्वं हि स्मरणस्य नियतम्, न तु क्रमेणोपलब्धं युगपन्न स्मर्यते, शतादिप्रत्ययाभावप्रसङ्गात्" इति।

यत्तु एकव्यक्तिवृत्तित्वात् गोशब्दत्वं न जातिरिति। सत्यमेतत् परमार्थतः। प्रतिपुरुषकण्ठताल्वादिव्यञ्जकभेदभिन्नवर्णनिबन्धना तु "गौः" इति पदस्फोटे अने-कत्वप्रतीतिर्दुर्वारा। अतो गोशब्दत्वजातिकल्पने न किमपि दौःस्थ्यम्। सा च जातिः महासत्तारूपा ब्रह्मणो न भिद्यत इति सर्वत्र ब्रह्मण एव वाचकत्वम्, वाच्यत्वं च। तस्या एव च महासत्तायाः गोत्वाश्वत्वादिर्विशेषसत्ता विवर्त इति तस्या आविद्यकं वाचकत्वं वाच्यत्वं चेति जातिस्फोटवादस्य निष्कर्षः।

तदाह[3] —

"संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः॥
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः।" इति।

---

[1] श्लो.वा.स्फोट. ६६.
[2] वा.प. काल. श्लो. ८९.
[3] वा.प.जाति. ३३, ३४ ab.

कैयटोऽपि[१] "तत्तदाकारं तत्तद्व्यङ्ग्यजातिरूपं वा असत्य ु।धिमाश्रित्य तत्तदवच्छिन्नं ब्रह्मैव द्रव्यम्" इति।

नव्यास्तु जातिस्फोटं नेच्छन्ति। तथा हि — वर्णानामानन्त्यात् उत्पादविनाशशालित्वाच्च तत्समूहे पदे वाक्ये च शक्तिग्रहासंभवेन हि अनुभवविसंवादिन्यपि जातिशक्तिः कल्प्यते। तत्तु कल्पनं वृथा। ब्रह्मण एकस्यैव परमार्थसत्त्वेन तद्भिन्नानां पदवाक्यरूपाणां शब्दव्यक्तीनामाविद्यकत्वात् तन्निष्ठायाः जातेरपि आविद्यकत्वाविशेषात् अनित्यत्वं तुल्यम्। अत एव "अपागादग्नेरग्नित्वम्" इति श्रुतौ अग्नित्वस्य नाश उक्तः। तथा च तत्तदुपाध्यवच्छिन्नः स्फोटः व्यक्तिपदेनोच्यते। तत्तदुपाध्युपलक्षितो जातिपदेनोच्यते। परं तु जात्यङ्गीकारे सा पदार्थान्तरम्। उपाध्यङ्गीकारे तु नेति तत्तदुपाध्यवच्छिन्नव्यक्तावेव शक्तत्वकल्पने लाघवम्। अतो जातिस्फोटो नाङ्गीकरणीय इति वदन्ति।

इति स्फोटविचारः

---

[१] प्रदीपः.१.१.१. धर्मनियमाधिकरणे, भाग.१. पृ. ६३.

वाक्यार्थबोधनिमित्तविचारः

स्मृतिदर्पणारूढा वर्णमालैव वाक्यार्थधीहेतुरिति मतम्, तन्निरासश्च[१]

एतावता स्फोटवादः परिशीलितः। अथ स्मृतिदर्पणारूढा वर्णमाला अर्थप्रतीतिहेतुरिति मतं निरस्यते।

अस्तु तर्हि स्मृतिदर्पणारूढा वर्णमालैव वाक्यार्थधीहेतुः। वृद्धप्रयोगाधीनो हि शब्दार्थसंबन्धनिर्णयः। न च पदमात्रं व्यवहाराङ्गं प्रयुञ्जते वृद्धाः, किं तु वाक्यमेव। तच्चानवयवं न्यषेधीति स्मृतिसमारूढा वर्णमाला परिशिष्यते। सा च नैमित्तिकं वाक्यार्थबोधं जनयति। वाक्यघटकस्मर्यमाणसकलवर्णमालाया एव वाक्यार्थबोधहेतुत्वम्। पदज्ञान — पदार्थोपस्थित्योस्तु तत्र सहकारितामात्रम् इति।

तदयुक्तम्।

> गौरवाद्विषयाभावात् तद्बुद्धेरेव भावतः।
> वाक्यार्थधियमाधत्ते स्मृतिस्था नाक्षरावलिः॥

गौरवादिति। यदि हि वर्णमालैव स्मृतिस्था वाक्यार्थं बोधयेत् ततः "अर्भक! गामानय", "अर्भक! गां बधान", "शिशो! गामानय", "शिशो! गां बधान", "बाल! गामानय", "बाल! गां बधान", "डिम्भ! गामानय", "डिम्भ! गां बधान" इत्यष्टानां वाक्यानामष्टौ शक्तयः[२] कल्पनीयाः तवेति कल्पनागौरवम्। पदवादिनस्तु सप्तानां सप्तैव शक्तयः इति कल्पनालाघवम्। "शुक्लम्" इति पदप्रक्षेपेण पुनः पदवादिनोऽष्टानां पदानामष्टौ शक्तयः। तव तु षोडशानां षोडशापराः शक्तयः इति महत् गौरवमापन्नम्।

विषयाभावादिति। अपि चेयमक्षरमाला पदार्थावगमपूर्वकं वाक्यार्थविज्ञानं जनयेत्, अतत्पूर्वकं वा। न तावदतत्पूर्वकम्। पदार्थसंबन्धरूपस्य वाक्यार्थस्य संबन्धिभूतपदार्थज्ञानं विना ज्ञातुमशक्यत्वात्, संबन्धावगमस्य संबन्धिविषयकज्ञानपूर्वकत्वात्। पदार्थज्ञानपूर्वकं चेत्[३] — तदप्ययुक्तम्। एवं सति अलमनया

---

[१] त.बिं. पृ. ८३.

[२] "अर्भक-गाम्-आनय-बधान-शिशो-बाल-डिम्भ" इत्येतैः सप्तभिः पदैः रचितानि पूर्वोक्तानि अष्टौ वाक्यानि। तत्र वाक्यानामष्टसंख्याकत्वात् वर्णमालावादिनाम् अष्टौ शक्तयः कल्पनीयाः। सप्तानामेव पदानाम् अष्टसु वाक्येषु घटकत्वात् सप्तैव शक्तयः पदवाक्यवादिमते कल्पनीया इति लाघवम्। पुनः तत्रैव "शुक्लाम्" इति पदप्रक्षेपे षोडशवाक्यानि संपद्यन्ते इति वर्णमालावादिनां मते षोडशशक्तयः कल्पनीयाः। पदवाक्यवादिनां तु एकस्यैव पदस्याधिकत्वात् अष्टैव शक्तयः कल्पनीयाः इति लाघवम्।

[३] एतदुक्तं भवति। यथा यथा पदानि प्रतिस्वमुच्चारणेषु श्रूयन्ते तथा तथा प्रातिस्विकेषु श्रवणेषु पदार्था अपि प्रत्येकमेकैकशः प्रतीयन्त एव। तदेवं सति सर्वा एवैताः पदधियः पदार्थधियश्च यथास्वं संस्कारान् उत्पादयन्त्यो भावनानिचयमादधति। तदाधानद्वारेण च स्वगोचरे वर्तमानामेकामेव स्मृतिरूपामेव धियं श्रोतुः

वर्णमालया। संबन्धिज्ञानविधया अपेक्षितेभ्यः पदार्थज्ञानेभ्य एव वाक्यार्थज्ञानस्य सिद्धेः।

अपि च त्रिचतुरपञ्चषपदवाक्यवर्तिनी पदार्थप्रत्ययव्यवहितापि क्लेशेन वर्णमाला स्मर्येतापि। तदभ्यधिकपदवति तु वाक्ये सातिदुष्करा। एतदुक्तं भवति। त्रिचतुराणि पञ्चषाणि वा पदानि येषु वाक्येषु तद्वर्तिनी वर्णमालापि तावन्न स्मर्यते। पदार्थप्रत्ययव्यवहितत्वात्। न हि विलक्षणपदार्थप्रत्ययावरुद्धे चेतसि अनुभूताया अपि वर्णमालायाः स्मरणं संभवति, पदार्थप्रत्ययव्यवहितत्वात्। तदनन्तरं च पदार्थेष्वेव अन्योन्याकाङ्क्षोत्थानात् तद्द्वारेण च वाक्यार्थे प्रतीतिसिद्धेः इति नास्त्येव वर्णमालायाः स्मृतिः वाक्यार्थोपयोगिनी। न हि पदार्थाकाङ्क्षायामुदयमासादयन्त्यां पदस्मृतिरेव तावदुपजायते, सुतरां पदेभ्योऽवरुह्य वर्णमालामात्रस्मृतिः।

अथ तु कथंचित् क्लेशेन तदानीं वर्णमालामात्रस्मृतिरप्यस्तीत्युच्यते तथापि त्रिचतुरपञ्चषाभ्यधिकपदवत्सु वाक्येषु सातिदुष्करा वर्णावली स्मर्यमाणतामापादयितुम् इति।

तस्मादिदमपि दर्शनमापातसुन्दरं नाद्रियन्ते बुधाः।

शाबरभाष्ये वाक्यार्थबोधे निमित्तविचारः[१]

आक्षेपः

यद्यपि पदसंबन्धयोः नित्यत्वं प्रसाधितम्। तथापि "चोदनालक्षणोऽर्थो धर्मः" इति सूत्रे[२] वाक्यार्थे धर्मे वेदवाक्यानां प्रामाण्यं यत् प्रतिज्ञातम्, तन्न सिध्यति; वक्ष्यमाणरीत्या वाक्यार्थप्रतिपत्तौ मूलाभावात् इत्याशयेन "उत्पत्तौ वावचनाः स्युः अर्थस्यातन्निमित्तत्वात्" इति सूत्रकारः[३] आक्षेपमुत्थापितवान्। तथा हि —

(१) किं प्रत्येकं पदानि वाक्यार्थमवगमयेयुः

(२) अथ वा श्रूयमाणपदसंघातव्यतिरिक्तमन्यत् किंचित्

(३) आहोस्वित् पदसंघातरूपं वाक्यम्

(४) उत पदार्थाः —इति चत्वारो विकल्पाः।

उत्पादयन्ति। एकैकानुभवेऽपि युगपत् स्मृतिसंभवः उक्त एव। एवं च तस्यामारूढानि पूर्वं श्रवणावस्थायामेव प्रतिस्वमर्थान् प्रतिपादितवन्ति पदानि सपदार्थानि अनतिदूरवर्तीनि सन्ति वाक्यार्थबुद्धिं जनयन्तीति चेत् इति।

[१] शा.भा.१.१.७.२४, भा.१.पृ. ११०.

[२] जै.सू. १.१.२

[३] जै.सू. १.१.७.२४.

तत्र प्रथमः पक्षः —

"चोदना हि वाक्यम्। न हि 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यतो वाक्यात् अन्यतमात् पदात् अग्निहोत्रात् स्वर्गो भवतीति गम्यते। गम्यते तु पदत्रय उच्चरिते" इति भाष्येण निराकृतः।

द्वितीयः पक्षः —

"न चात्र चतुर्थः शब्दोऽस्ति, अन्यदतः पदत्रयसमुदायात्" इति भाष्येण निराकृतः। तृतीयः पक्षः —

"न चायं समुदायोऽस्ति लोके, यतोऽस्य व्यवहारात् अर्थोऽवगम्यते। पदान्यमूनि प्रयुक्तानि, तेषां नित्योऽर्थः। अप्रयुक्तश्च समुदायः। तस्मात् समुदायस्यार्थः कृत्रिमो व्यामोहो वा" इति भाष्येण निराकृतः।

तस्यायमाशयः[१] — इदं भाष्यं न वैदिकपदसमुदायमात्राभिप्रायम्। सर्ववाक्यानां वाक्यार्थमूलत्वनिराकरणपरत्वात्। लोके पदसमुदाय एव कश्चिन्नास्ति। न च लोके "गामानय" इत्यादिसमुदायस्य विद्यमानत्वात् कथं नास्तीत्युक्तिरिति वाच्यम्। अर्थसंबन्धाधीना हि पदानां समुदायापत्तिः। अन्यथा "गौरश्वः पुरुषो हस्ती" इत्यादावपि समुदायप्रसङ्गात् = पदसमूहरूपवाक्यत्वप्रसङ्गात्। अतः न समुदायमात्रं वाक्यं वाक्यार्थो वा। किं तु संबद्धानि पदानि, पदानां संबन्धो वा वाक्यम्। संबद्धाश्च पदार्थाः पदार्थसंबन्धो वा वाक्यार्थः। संबन्धश्च तेषां न संभवतीति वार्त्तिके सयुक्तिकं निरूपितम्।

ततः पदार्था एव वाक्यार्थमवगमयन्तीति चतुर्थः पक्षोऽपि —

"न च पदार्थात् वाक्यार्थावगतिः। असंबन्धात्। असति चेत् संबन्धे कस्मिंश्चित् पदार्थेऽवगतेऽर्थान्तरमवगम्येत, एकस्मिन्नवगते सर्वमवगतं स्यात्। न चैतदेवं भवति। तस्मादन्यो वाक्यार्थः" इति भाष्येण[२] निराकृतः। वाक्यार्थः संभावितसन्मूलकः = प्रमाणमूलकः, न भवति इत्यर्थः। अतश्च विचार्यमाणे मूलविशेषानिश्चयात् नदीवृद्ध्यादिपदार्थप्रत्ययवत् वाक्यार्थप्रत्ययोऽपि सामयिकः। यद्वा निर्मूलोऽपि सन् वाक्यार्थः याज्ञिकपरिभाषासिद्धः न तु सन्मूलक इत्याशयेनोपसंहृतं —

"तस्मात् कृत्रिमो वाक्यार्थप्रत्ययो व्यामोहो वा। न पदार्थद्वारेण संभवति वाक्यार्थज्ञानम्" इति।

---

[१] शा.भा.वैद्यनाथीयव्याख्या. १.१.७.२४, भा.१.पृ. १११.

[२] शा.भा. १.१.७.२४,भा.१. पृ.११२.

समाधानम्

उक्ताक्षेपे समाधानमुक्तं सूत्रकारेण[१] — "तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्" इति। लोकसिद्धेषु पदार्थेषु वर्तमानानामेव पदानां विशिष्ट-क्रियारूपवाक्यार्थज्ञानोपायत्वान्न पृथग्वाक्यस्य वाचकत्वम्। वाक्यार्थस्य पदार्थ-निमित्तकत्वात् इति सूत्रार्थः। लोके "गामानय" इत्यादिवाक्यं प्रतीयमानग-वादिपदार्थान् विहाय पदार्थेभ्योऽत्यन्तभिन्ने वाक्यार्थे न प्रसिद्धमस्ति। प्रमाणा-भावात्।

वाक्यशक्त्या वाक्यार्थबोध इति शङ्कायाः निरासः

नन्वर्थापत्तिरेव प्रमाणम्। लोके हि वाक्योच्चारणानन्तरं तत्तत्पदार्थव्यतिरिक्तं विशिष्टमर्थमवगच्छामः। स चायमर्थावगमः असत्यां तस्मिन् वाक्ये शक्तौ नाव-कल्पेत इति चेन्न। वाक्ये शक्तिं विनापि पदार्थावगमेनैव प्रमाणान्तरेण वाक्यार्था-वगमोपपत्त्या अन्यथानुपपत्तिरूपार्थापत्तेरत्राप्रसरात्। तथा च भाष्यं[२] —

"पदानि हि स्वं स्वं पदार्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्था अवगताः सन्तः वाक्यार्थं गमयन्ति। कथम्? यत्र हि 'शुक्लः' इति वा 'कृष्णः' इति वा गुणः प्रतीतो भवति, भवति खल्वसावलं गुणवति प्रत्ययमाधातुम्। तेन गुणवति प्रत्ययमिच्छन्तः केवलं गुणवचनमुच्चारयन्ति। संपत्स्यत एषां यथा-संकल्पितोऽभिप्रायः। भविष्यति विशिष्टार्थसंप्रत्ययः। विशिष्टार्थसंप्रत्ययश्च वाक्यार्थः। एवं चेदवगम्यतेऽन्यत एव वाक्यार्थः को जातुचिदद्दृष्टा पदसमुदायस्य शक्तिरर्थात् अवगम्यत इति वदिष्यति" इति।

अयं भाष्यस्याभिप्रेतोऽर्थः — यद्यपि प्रयुज्यमानानि तानि तानि पदानि स्व-स्वार्थमात्रप्रतिपादकानि न विशिष्टरूपं वाक्यार्थमवबोधयितुं पारयन्ति, तथापि तेषां पदानां न पदार्थमात्रप्रतिपादने तात्पर्यम्। तेषां प्रमाणान्तरसिद्धत्वात्। अतोऽभिधा-व्यापारः परं पदार्थेष्वेव पर्यवस्येत्। तात्पर्यव्यापृतेरपर्यवसिततया वाक्यार्थ-पर्यन्तत्वात् उक्तरीत्या पदैः प्रतीताः पदार्था एव सामान्यविशेषभावादिना परस्परं संबद्धं वाक्यार्थं गमयन्तीति सिद्धं शब्दप्रमेयतया वाक्यार्थस्य शाब्दत्वम् — इति वैद्यनाथशास्त्रिभिः[३] व्याख्यातम्।

परं तु भाष्यग्रन्थादयमर्थः कथं लभ्यते इति न जानीमः। इदं हि भाष्यं वाक्यार्थे वाक्यशक्तिनिराकरणं कुर्वत् पदार्थावगममूलकत्वं वाक्यार्थावगमस्य बोधयति। न

---

[१] जै.सू. १.१.७.२५.

[२] शा.भा.१.१.७.२५, भा.१.पृ. ११६.

[३] शा.भा.व्या.वैद्यनाथीया.भा.१.पृ. ११६.

तु वाक्यार्थबोधस्य पदशक्तिमूलकत्वम्। खण्डदेवभट्टाचार्याणामिदं व्याख्यानं न संमतमिति पश्चात्[१] निरूपयिष्यामः।

श्लोकवार्त्तिके वाक्यार्थबोधनिमित्तविचारः

अथ श्लोकवार्त्तिकस्थान्[२] विषयान् स्ववाचा लिखामः।

पूर्वपक्षः

"उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्निमित्तत्वात्" इति पूर्वपक्षसूत्रम्[३]। तस्यायमर्थः — प्रकृतानां शब्दार्थसंबन्धानामौत्पत्तिकत्वेऽपि वेदवाक्यार्थस्य धर्मस्य अवचनाः = अप्रतिपादकाः, वेदाः। अप्रमाणमिति यावत्। वर्णपदादीनां प्रत्येकसमुदायविकल्पितानां वाक्यार्थप्रत्ययं प्रति हेतुत्वानुपपत्तेः। तथा हि —

१) किं प्रत्येकं पदानि वाक्यार्थं गमयन्ति,

२) अथ वा संहतानि,

३) अथ वा अन्यः शब्दः,

४) अथ वा पदार्था एव गमयन्ति — इति चत्वारो विकल्पाः।

एते चत्वारोऽपि कल्पाः न कल्पन्ते, संगतिग्रहणाभावेन तेषां वाक्यार्थबोधं प्रत्यनिमित्तत्वात्।

न च चक्षुरादेः संबन्धग्रहणाभावेऽपि रूपादिबोधकत्वं दृश्यते। तद्वत् पदादीनां संबन्धग्रहणं विनैव वाक्यार्थबोधकत्वमस्तु इति वाच्यम्। वैषम्यात्। चक्षुरादिर्हि सत्तामात्रेण रूपादेर्बोधक इति संबन्धग्रहणं नापेक्षते। ज्ञायमानतया ज्ञानजनकानां धूमादीनां तु संबन्धग्रहणपूर्वकमेव वह्न्यादिज्ञापकत्वं दृश्यते। तस्मात् ज्ञायमानस्य सतः बोधकस्य शब्दादेः बोध्येनार्थेन सह संबन्धग्रहोऽपेक्षितः। न च वाक्यार्थेन पदादीनां संबन्धोऽस्त्येवेति वाच्यम्। अप्रतीतेः। अप्रतीतस्य हि सत्ता दुरुपपादा।

न च "चोदनालक्षणोऽर्थो धर्मः" इत्युक्तम्[४]। चोदना च वाक्यमेव। अतो वाक्यमेव वाक्यार्थप्रतीतेर्मूलमिति वाच्यम्। ज्ञायमानतया बोधकस्य वाक्यस्यापि अज्ञातवाक्यार्थसंबन्धस्य वाक्यार्थबोधकत्वायोगात्। बोधकत्वेऽपि वा वाक्यतदर्थस्वरूपस्यैव निर्वक्तुमशक्यत्वात्। किं वाक्यं पदादन्यद्वा? अनन्यद्वा? एवं वाक्यार्थः किं पदार्थादन्यः? अनन्यो वा? अनन्यत्वपक्षे पदतदर्थमात्र-

---

[१] तात्पर्यनिरूपणावसरे अस्मिन्नेव ग्रन्थे निरूप्यते। दृश्यतां मीमांसाकौस्तुभः (१.३.२४)।
[२] श्लो.वा.वाक्याधिकरणे. पृ. ५९८ तः आरभ्य ६६४ पृ.पर्यन्तम्।
[३] जै.सू. १.१.७.२४.
[४] जै. सू. १.१.२.

परिशेषापत्तिः। अन्यत्वपक्षोऽपि न युक्तः। पदपदार्थातिरिक्ततया वाक्यवाक्यार्थयोरनुपलम्भात्। एवं च मूलाभावात् प्रमेयाभावाच्च वाक्यार्थावगतेः प्रामाण्यं दूरापास्तम्।

न च पदतदर्थातिरिक्तौ वाक्यवाक्यार्थौ स्त एव। पदसमुदायो हि वाक्यम्, पदार्थसमुदायश्च वाक्यार्थ इति वाच्यम्। पदानां युगपद् ग्रहणाभावेन तत्समुदायस्यासिद्धेः। युगपद्भाविनां वृक्षादीनामेव समुदायस्य दर्शनात्।

न च ग्रहणयौगपद्याभावेऽपि सत्तायौगपद्यादेव समुदायो भविष्यतीति वाच्यम्। पदानां पदार्थानां च युगपत्सत्तायाः तेषां नित्यत्वमन्तरेण दुर्घटतया, सर्वेषां पदानां समूहस्य वाक्यत्वं, सर्वेषां पदार्थानां समूहस्य वाक्यार्थत्वं च प्रसज्येत। ज्ञानानां क्रमवर्तित्वात् एककालिकज्ञानविषयत्वरूपं ज्ञानयौगपद्यं च दुर्घटम्। तस्मात् न समुदायमात्रं वाक्यं वाक्यार्थो वा। "गौरश्वः पुरुषो हस्ती" इत्यत्रापि प्रसङ्गात्। किं तु संबद्धानि पदानि, पदानां संबन्धो वा वाक्यम्। संबद्धाः पदार्थाः पदार्थानां संबन्धो वा वाक्यार्थः। न च संबन्धः संभवति, तेषां परस्परमनपेक्षत्वात्। अर्थप्रतीतिनिमित्तिका हि पदानामपेक्षा। सा चानर्थकेषु वर्णेष्विव प्रथमश्रवणादावप्रतिपादितार्थेषु पदेषु नास्तीति।

किं चानुच्चारितानाम् उच्चार्य तिरोहितानां च पदानां नास्त्येवापेक्षा। एककालवर्तिनां तु भवेत्परस्परापेक्षा। एककालवर्तिता तु क्रमिकाणां दुर्घटेत्यावेदितम्।

किं च परस्परापेक्षायां सत्यामपि तन्मूलकः कोऽपि संबन्धः पदानां न दृश्यते। कार्यकारणभाव-संयोग-समवायादिरूपस्य संबन्धस्याप्रतीतेः।

न च आकाशरूपैकार्थसमवायरूपः संबन्धः पदानां सुवच इति वाच्यम्। तस्य संबन्धस्य सर्वपदसाधारणत्वात्।

ननु तर्हि एककार्यकरत्वं पदानां संबन्धोऽस्तु इति चेत् — किमिदमेककार्यकरत्वम्, एककार्यव्यञ्जकत्वं वा? एककार्यजनकत्वं वा? आद्ये व्यङ्ग्यानां पदार्थानां पदभेदेन भिन्नत्वात् एकव्यञ्जकत्वं पदेषु दुर्घटम्। द्वितीये पदजन्यां बुद्धिं गृहीत्वा एकबुद्धिजनकत्वं पदानां वक्तव्यम्। तदापि तत्तत्पदेन तत्तत्पदार्थविषयकबुद्धेः भिन्नभिन्नाया एव जायमानतया एकबुद्धिजनकत्वं वाक्यस्थपदानां दुर्घटमेव। पदविषयकबुद्धेर्ग्रहणे तस्या अपि पदभेदेन भिन्नतया दुर्घटमेकबुद्धिजनकत्वम्।

ननु यद्यपि पदार्थज्ञानानि शब्दज्ञानानि च प्रतिपदार्थं प्रतिशब्दं च भिन्नानि। तथापि एकं वाक्यज्ञानं वाक्यार्थज्ञानं वा गृहीत्वा तज्जनकतया एककार्यकरत्वमुपपादनीयमिति चेत् — न। क्रमवर्तिभिः भिन्नैः पदैः एकज्ञानजननासंभवात्। युगपद्भाविनामेव एककार्यजनकतायाः लोके दर्शनात्।

ननु प्रत्यस्तमितपदवर्णविभागमेकरूपमेव वाक्यम्। किमत्र पदानां संबन्धेन? तथा वाक्यार्थोऽपि निर्भाग एवेति चेन्न। वाक्ये वाक्यार्थे चावयवभेदानां दर्शनात्। यस्तु दृश्यमानानपि अवयवान् अपह्नुत्य निर्भागत्वमङ्गीकरोति, तस्य जायमानानामवयवबुद्धीनाम् अबाधितानां भ्रान्तित्वम्, बाधितायाश्च "निर्भागमिदमेकं वाक्यम्" इति बुद्धेः प्रमात्वमङ्गीकर्तव्यं स्यात्। न चैतद्युक्तम्।

एतावता, असंबन्धात् पदानां वाक्यत्वं निराकृतम्। इदानीमसंबन्धादेव वाक्यार्थोऽपि निराक्रियते।

परस्परानुरागः[१] (संबन्धः), व्यवच्छेदो (इतरव्यवच्छेदः) वा संबन्धः स्यात्; सोऽपि पदानां पदार्थानां वा। न तावत् बुद्धीनाम्, क्षणिकत्वात्। तथा हि — "गौः शुक्ला" इत्यत्र गोशब्दजनिता बुद्धिः शुक्लकृष्णादिषु सर्वगवीषु प्रसृता यदि शुक्लशब्दजनितशुक्लबुद्धिजननं यावत् तिष्ठेत्, ततस्तया संसृज्येत, अन्याभ्यो वा कृष्णादिव्यक्तिबुद्धिभ्यो व्यवच्छिद्येत; न तु सा तिष्ठति, क्षणिकत्वात्। तिष्ठतु वा, तथापि को नाम बुद्ध्योः संसर्गः। न तावत् संयोगः, तस्य द्रव्यधर्मत्वात्। नापि समवायः, द्वयोरपि बुद्ध्योरात्मसमवायित्वात् परस्परसमवायित्वाभावात्। नाप्येकार्थसमवायः, घटहस्त्यादिबुद्धीनामेकात्मसमवायितया एकवाक्यार्थताप्रसङ्गात्। न च निरन्तरोत्पत्तिरेव बुद्धीनां संबन्ध इति वाच्यम्। घटहस्त्यादिबुद्धिषु तुल्यत्वात्। निराकाङ्क्षत्वाच्च न बुद्धीनां संबन्धः। बुद्धीनां क्षणिकत्वेन युगपद्भावविरहात् का बुद्धिः कामपेक्षेतेति। न च सर्वाभिः पदार्थबुद्धिभिरन्ते परस्परविशिष्टसमस्तपदार्थविषया बुद्धिरेका जनयितव्यास्ति। तज्जननमेवासां मिथः संसर्गः। तज्जननाय चाकाङ्क्षापि भवत्येवेति वाच्यम्। क्षणिकत्वेन यौगपद्याभावादेव। संसर्गविच्छेदप्रतिभासस्तु बुद्धिषु कल्पितत्वात् स्वप्नवन्न प्रमाणम्। एवं च बुद्ध्योर्नास्ति संबन्धः।

नापि पदानां संबन्धः सुवचः। विशेषानाधायकत्वात्। नापि पदार्थानां विशेषणविशेष्यभावरूपः संबन्धः। जातिः पदार्थ इति पक्षे गोशब्देन गोत्वमात्रमभिहितम्। शुक्लपदं तु तदेकवाक्यभूतं तस्यैव शुक्लगुणानुरागं प्रतिपादयतीति संसर्गो वाक्यार्थः। तदेकत्वाच्च पदानामेकवाक्यता। व्यक्तिपदार्थपक्षे तु गोशब्देनैव शुक्लकृष्णादिव्यक्तिषु सर्वास्वभिहितासु शुक्लपदं शुक्लसंसर्गं प्रतिपादयदपि तत्परत्वे सति वैयर्थ्यात् कृष्णादिव्यवच्छेदेनैव विशेषणं भवतीति भेदो वा वाक्यार्थः। प्रथमपक्षे तु आर्थिकः कृष्णादिव्यवच्छेदः। तदिदं द्विविधमपि विशेषणविशेष्यत्वं पदाभिधेययोर्जातिगुणयोः परस्परानुरागव्यवच्छेदाभावादनुपपन्नम्। न हि गोत्वे शुक्लत्वसंबन्धोऽस्ति, शुक्लत्वे वा गोत्वसंबन्धः। उभयोरपि व्यक्तिनिष्ठत्वात्। न चासत्यपि

---

[१] श्लो.वा.वाक्य.१९, पृ. ६०१.

तयोः परस्परानुरागे व्यक्तिरेका ताभ्यामनुरज्यमाना वाक्यार्थो भविष्यतीति वाच्यम्। व्यक्तेः शब्देनाप्रतिपाद्यमानायाः वाक्यार्थत्वासंभवात्। तदसंभवादेव शब्दयोरपि नैकवाक्यता सिध्यतीति। पृथिवीस्थगवाश्ववत्।

न च आश्रयमात्रं न वाक्यार्थः; किं तु यत्र शब्दाभिधेययोः समवायः, स वाक्यार्थः। तदेकत्वाच्च वाक्यैकत्वमिति वाच्यम्। रूपरसयोरेकार्थसमवायेऽपि "रूपं" "रसः" इत्यनयोर्नास्त्यैकार्थ्यम्, न वा एकवाक्यत्वमिति। किं च गोत्व-शुक्लत्वयोरेकव्यक्तिवृत्तित्वे नास्ति प्रमाणम्। पदयोः संबन्धात् एकव्यक्तिवृत्ति-त्वमिति कल्पनायां तु अन्योन्याश्रयः। पदयोः संबन्धात् तदभिधेययोरेकव्यक्ति-वृत्तित्वम्। अभिधेययोरेकव्यक्तिवृत्तित्वात् पदयोः संबन्ध इति।

किं च[१] "गौः शुक्लः" इत्यत्र व्यक्तिवाचकं शाबलेयादिपदं न श्रूयते। तथा च कथं ताभ्यां पदाभ्यामेकव्यक्तिप्रतिपादनम्। एवं व्यवच्छेदोऽपि न संभवति। न हि शुक्लश्रुत्या गोत्वादिः कृष्णादिभ्यो व्यवच्छिद्यते। श्रुतेऽपि शुक्लपदे कृष्णादिषु गोत्वदर्शनात्। न च नार्थस्य निवृत्तिं ब्रूमः, किं तु बुद्धेरिति वाच्यम्। बुद्धेरप्यर्थ-स्वभावानुसारिण्याः अनिवृत्तेऽर्थे निवृत्त्यभावात्। श्रुतेऽपि शुक्लपदे भवत्येव कृष्णादिषु गोबुद्धिरिति।

किं च शुक्लशब्दस्य कृष्णादिव्यवच्छेदार्थकत्वेऽपि तस्य गोगतत्वे न प्रमाणं किंचित्। संनिधिनानुमाने च तस्याशाब्दत्वमापद्यते। शुक्लशब्दार्थे गोसंबन्धबोधिका षष्ठी च न श्रूयते। वस्तुतस्तु श्रौतयोर्जातिगुणयोर्वा अपोहयोर्वा संबन्धो नास्तीति पूर्वमेवोक्तम्।

किं च संसर्गापोहयोर्वाक्यार्थत्वे कल्पितेऽपि तयोः पदार्थानतिरिक्ततया न वाक्यार्थत्वसंभवः। तयोः पदार्थात् भेदश्च दुर्वचः।

केचित्तु[२] — पदाभिधेयानां जातिगुणानामेव मिथः संसर्गाः साक्षात् संभवन्ति, न व्यक्तिद्वारा। तेऽपि संसर्गविशेषाः प्रागपि सन्त एव प्रमाणान्तरेणाप्रतिपन्नाः पदसंनिधिरूपात् वाक्यात् अभिव्यक्ता वाक्यार्थतयोच्यन्त इति वदन्ति। तन्मतेऽपि बहुपदेषु वाक्येषु वाक्यार्थानेकत्वं स्यादेव, प्रत्येकं पदार्थानां पदार्थान्तरसंसर्गात्।

किं च संसर्गविशेषाणां प्राक्सत्त्वं निष्प्रमाणकम्। ननु वाक्यमेव प्रमाणम्, न ह्यसतां वाक्यात् प्रतीतिः संभवति। न हि वाक्यं तेषां जनकमिति चेत् — अस्तु तर्हि तेषां सत्त्वम्। तथापि अप्रतीतेषु तेषु न वस्तुसत्तामात्रेण प्रयोगः संभवति। ततश्च वाक्यार्थप्रतिपत्तौ मूलं नास्तीति पूर्वपक्षः।

---

[१] श्लो.वा.वाक्य.३५, पृ. ६०५

[२] श्लो.वा.वाक्य.४७, पृ. ६०७.

सिद्धान्तः[१]

पदार्था एव वाक्यार्थप्रतिपत्तौ मूलम्। यद्यपि प्रत्येकं पदानि संहतानि वा न मूलम्, तथा जातिः संबन्धज्ञानं सावयवनिरवयववाक्यानि च न मूलभूतानि। तथापि पदार्थाः पदैः बोधिताः आसत्त्याकाङ्क्षायोग्यतासहकृताः मूलं भविष्यन्ति, तादृशपदार्थसद्भावे वाक्यार्थबोधसद्भावादिति।

यद्यपि वाक्यं वाक्यार्थस्य वाचकं परैः कल्पितम्, वाक्यान्त्यवर्णस्य पूर्ववर्णजनितसंस्कारसहितस्य, स्मृत्यारूढानां वर्णानां वा वाक्यार्थे शक्तिरिति, तथापि अन्यथाप्युपपत्त्या = वाक्यार्थप्रतिपत्तेः पदार्थेभ्योऽप्युपपत्त्या, वाक्यस्य वाक्यार्थवाचकत्वकल्पनमयुक्तम्। पदवर्तिनां वर्णानां नष्टानां क्लेशेन युगपत् स्मरणमाश्रित्य शक्तिः कल्पिता। वाक्ये तु बहूनां वर्णानाम् अतिक्लेशेन स्मरणं कल्पनीयं स्यात् इत्यपि दोषः।

अपि च पदार्थप्रतिपादने व्यापृतानां वर्णानां पुनः वाक्यार्थेऽपि व्यापृतिकल्पनायां गौरवम्। न केवलमदृष्टकल्पना, दृष्टहानिश्च। पदार्थानां वाक्यार्थबोधनसामर्थ्यस्य अनुगम्यमानस्य अपह्नवात्। कुतः पदार्थानां सामर्थ्यमित्यत्र आह[२] —

"आनन्तर्याद्धि वाक्यार्थस्तद्धेतुत्वं न मुञ्चति" इति।

वर्णेभ्यो हि पदार्थेषु प्रतीतेषु वाक्यार्थः प्रतीयते। अतः वाक्यार्थप्रतीत्यव्यवहितपूर्ववृत्तित्वात् पदार्थप्रतीतेः, सैव मूलं वाक्यार्थप्रतीतौ।

किं च पूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णो वाचक इत्ययं प्रकारः पदेष्वाश्रितः। स वाक्येषु न संभवति। एकस्य संस्कारस्य कार्यद्वयजनकत्वायोगात्। पदार्थबोधनोपक्षीणः संस्कारः कथं वाक्यार्थं बोधयेत्। न च कार्यद्वयदर्शनात् एकस्यैव शक्त्यन्तरं संस्कारान्तरं वा कल्पनीयमिति वाच्यम्। गौरवात्। वाक्यार्थप्रतीतेरन्यथाप्युपपत्तेः।

किं च पदे विद्यमानानां वर्णानां विजातीयव्यवधानाभावात् अन्त्यवर्णप्रत्यक्षवेलायामतीतानां वर्णानां स्मरणं युज्यते। वाक्ये तु अन्त्यवर्णप्रत्यक्षवेलायां न केवलं सजातीयवर्णबुद्धिभिः व्यवधानम्, किं तु आन्तरालिकैः पदज्ञानपदपदार्थसंबन्धज्ञानपदार्थज्ञानैश्च व्यवधानात् अतीतवर्णानां स्मरणं दुर्घटम्। स्मृत्यारूढानां सर्वेषां वर्णानां वाचकत्वपक्षेऽपि समानोऽयं दोषः। अशक्यं च दीर्घतमेषु वाक्येषु सर्वेषां वर्णानां पदानां वा स्मरणम्। असत्यपि सर्ववर्णस्मरणे पदार्थस्मरणमात्रेण वाक्यार्थप्रतीतिरुत्पद्यत इति सर्वजनीनम्। अतो न वाक्यं साक्षात् वाक्यार्थस्य

---

[१] श्लो.वा.वाक्य.११०, पृ. ६१९.
[२] श्लो.वा.वाक्य.११५ ab, पृ. ६२०.

वाचकम्। नापि पदानि, यथैकदेशिनो मन्यन्ते; पदार्था वाक्यार्थस्य प्रतिपादकाः, तद्द्वारेण पदानामपि संहतानां लब्धवाक्यव्यपदेशानां तन्मूलत्वमनुमन्यामहे इति।

निर्भागौ वाक्यवाक्यार्थाविति मतस्य निरासः

केचित्तु — वर्णपदातिरिक्तस्य बहिर्भूतस्य वाक्यस्याभावात् वाक्याकारा बुद्धिरेव वाक्यम्। तदनन्तरं चानेकजातिगुणद्रव्यक्रियासंसर्गाभासाज्जायमाना बुद्धिरेव वाक्यार्थो न बाह्यः, पदार्थातिरिक्ततया तदनतिरिक्ततया वा निरूपणासंभवात् इति वदन्ति। तदपि न युक्तम्। वाक्याकारबुद्धेरभावात्। तदाह[१] —

"तस्माच्च वाक्यनिर्भासा वाक्यं सा धीर्न कल्पते।
वाक्यमित्यनया बुद्ध्या न चात्मांशः प्रतीयते॥
न च वाक्यार्थबुद्ध्येदं शून्यवादे निरूपितम्।" इति।

येऽपि वैयाकरणाः बाह्यमेव निर्भागं वाक्यं वाक्यार्थं च मन्यन्ते, येऽपि पूर्वोक्तबुद्ध्याकारवादिनः, तेषामपि वर्ण-पद-तदर्थाभासा विभिन्नबुद्धिर्भागबुद्धिश्च विनैव प्रमाणेन मृषेति कल्पिता स्यात्। कल्प्यमानेऽपि मृषात्वे भागेषु सत्त्वबुद्धिः कदापि कस्यापि न निवर्तत इति।

किं च निर्भागस्य वाक्यस्य वाचकत्वे कल्पनागौरवम्। तथा हि — स्तोकैरेव पदैस्तदर्थैश्चानन्तानि वाक्यानि तदर्थाश्च आरभ्यन्त इति दृष्टम्। तत्र निर्भागवाक्यवादिना यावन्तो वाक्यार्थाः तावन्ति वाक्यानि, तच्छक्तयश्चानन्ताः कल्पनीयाः। तच्चानुपपन्नम्। स्तोकैरेव पदैः क्लृप्तस्तोकार्थशक्तिकैरनन्तानां वाक्यार्थानां प्रतीत्युपपत्तेरिति।

वैयाकरणैः वाक्यानां निरवयवत्वेऽपि अवयवप्रतिभानेऽवयवप्रत्यभिज्ञायां च सादृश्यं कारणमुक्तं —

"ध्वनयः सदृशात्मानः विपर्यासस्य कारणम्" इति।

नानाजातीयैरनेकैः ध्वनिभिः व्यङ्ग्यं हि वाक्यम्। ते च ध्वनयः प्रत्येकं वाक्यान्तरव्यञ्जकध्वनिसदृशाः, निर्भागस्यापि वाक्यस्य तत्तद्वाक्यसादृश्यं नरसिंहस्येव केनचित् भागेन नरसादृश्यं केनचिच्च सिंहसादृश्यं भागशः सम्पादयन्तः, सादृश्योपाधिभेदात् अवयवभेदमिव वाक्ये दर्शयन्ति। ध्वनिसादृश्यादेवावयवानामपि सादृश्यात् प्रत्यभिज्ञापि भवतीति। तन्न शोभनम्। यदा हि सर्वेषां वाक्यानां निर्भागत्वम्, पदवर्णात्मकास्तु भागाः पृथग्भूताः वाक्यानुस्यूताः वा न सन्ति, तदा न कस्यापि वाक्यस्य भागशः सादृश्यम्, येन बह्ववयवमिव वाक्यं प्रतीयेत,

[१] श्लो.वा.वाक्य. ११८, ११९ ab.

अवयवाश्च प्रत्यभिज्ञायेरन्। सतां हि अवयवानां सद्भिरवयवैः सादृश्यमसादृश्यं वेति। नरसिंहदृष्टान्तश्च विषमः। अस्ति हि तत्र नरजातिः सिंहजातिश्च। प्रसिद्धाश्च तयोर्जात्योः पाण्यादयोऽवयवाः संयुक्ताश्च वियुक्ताश्च। सत्सु च तेष्ववयवेषु सतां नरसिंहाख्यजात्यन्तरावयवानां प्रत्येकनरसिंहजात्यवयवसादृश्यमूलकभ्रमाद्वा तत्सजातीयत्वात् परमार्थतो वा प्रत्यभिज्ञा युक्ता। तद्वदिहापि यदि वाक्यावयवानां सादृश्यं स्यात् तदा तेषां सत्यत्वापत्तेः निर्भागत्वानुपपत्तिः। न च कथं सादृश्यात् सत्यत्वापत्तिः, असतोऽप्यसता सादृश्यसंभवादिति वाच्यम्। तर्हि शशविषाणस्य खरशृङ्गेन सादृश्यापत्तेः। न च तत्रापि असत्त्वेन रूपेण सादृश्यमस्त्येवेति वाच्यम्। तदा सर्ववाक्यानामसदवयववत्त्वात् सर्वं सर्वेण सदृशावयवं स्यात्।

ननु चित्रे प्रतीयमानानामवयवानां पाण्यादीनामसतामेव मिथः सादृश्यं दृश्यते। न हि तत्र पाण्यादयोऽवयवाः सन्ति। पारिणामिकत्वात् इति चेत् — उच्यते। यद्यपि चित्रे न मुख्याः पाण्यादयः सन्ति। तथापि पाण्यादिसंनिवेशाः सन्त्येव चित्रस्य भागाः प्रत्यक्षदृष्टाः। तेष्वपि युक्तं यत् कृष्णादिवर्णसामान्यं मिथः सदृशतया भवतीति।

मदिरायां तर्हि मधुरैकरसायामविद्यमानस्यैव तिक्तरसस्य कथं द्रव्यान्तरगतेन तिक्तरसेन सादृश्यम्। द्रव्यान्तरगततिक्तरसस्य वा कथं मदिरायामसता तिक्तरसेन सादृश्यमिति चेत् — न। मदिरायामपि तिक्तमधुररसद्वयसद्भावात्।

यदपि दर्शितं यथा चित्रबुद्धिर्निर्भागापि सभागा प्रतीयते, तथा वाक्येऽपि युक्तं भागानां सादृश्यमिति। तदपि न। चित्रबुद्धेः सभागतया प्रतीत्यभावात्। चित्रत्वं सभागत्वं चार्थस्य, न तु बुद्धेः।

तस्मात् वैयाकरणमते वाक्यावयवानां पदवर्णानामविद्यमानत्वात् न मिथः सादृश्यम्। अत एव वाक्यानामपि नावयवशः सादृश्यम्, अवयवाभावात्। यद्यपि निर्भागस्यापि कथंचित् सादृश्यं स्यात्, तथापि वर्णपदनिष्कर्षस्तावन्न युज्यते। दृश्यते च निष्कर्षः "अस्मिन् वाक्ये इदं पदमाद्यम्, इदं मध्यम्, इदमन्त्यम्, इदं द्विपदं सूत्रम्, अमुष्मात् सूत्रादिदं पदमनुवर्तते" इत्यादिः।

यदपि वाचकानां वाक्यानामनन्तानामनित्यानां च स्वरूपेणान्वाख्यानासंभवात् अवयवभूतपदावापोद्धाराभ्यां व्याकरणप्रक्रियेत्युक्तम्, तदपि अवयवाभावादेवायुक्तम्। न हि आवाप्यमुद्धार्यं च आलम्बनमन्तरेण आवापः उद्धारश्च संभवति।

किं च[१] वाक्यस्य निरवयवत्वे एकमेव वाक्यं सकलम् अन्यदपेक्ष्य न्यूनमित्येतदनुपपन्नं स्यात्। यथा "पटो भवति" इति संपूर्णं वाक्यम्, रक्तपदापेक्षया तु

---

[१] श्लो.वा.वाक्य.१३९, पृ. ६२४.

तदेव न्यूनं भवति। तदिदम् एकावयवसंयोजनवियोजनाभ्यां पूर्णत्वन्यूनत्वे वाक्यस्य निर्भागत्वे नोपपद्येयाताम्।

किं च[1] पदानां वर्णानां च वाक्येष्वभावमिच्छता त्रिपदस्य वाक्यस्य "गामानय शुक्लाम्" इत्यादेः, चतुष्पदे "देवदत्त गामानय शुक्लाम्" इत्यस्मिन् वाक्येऽभावोऽभ्युपगन्तव्यः। तथा सति वृक्षस्यापि वनेऽभावः स्यात्। न च चतुष्पदेऽपि वाक्ये त्रिपदं वाक्यमस्त्येव, तस्य पृथक्प्रयोगवेलायामस्तित्वावगमात् इति वाच्यम्। तथा सति तेनैव न्यायेन पदवर्णयोरप्यस्तित्वसिद्धेः। तस्मान्महावाक्ये लघूनां वाक्यानां यथा निराकरणमशक्यम्, तथैव पदवर्णानामपि।

ननु पदस्य वर्णस्य वा केवलस्य प्रयोगो नास्ति, येन वाक्येऽवान्तरवाक्यवत् तत्सद्भावः स्यात्। तथा चानुमानप्रयोगः — "पदवर्णविभागो मृषा, केवलाप्रयोगात्, प्रकृतिप्रत्ययविभागवत्" इति चेत् — न। विकल्पासहत्वात्। योऽयमवयवस्य केवलस्याप्रयोगः स यदि समुदायापेक्षया, तदा व्यभिचारः। महदर्थे सतो लघोरप्यप्रयोगात्। स्वार्थापेक्षया तत्प्रयोगे पदवर्णयोरपि स्वार्थापेक्षया प्रयोगसद्भावात् हेत्वसिद्धिः। यद्यपि त्र्यंशभावनाज्ञानरूपं व्यवहाराङ्गं न पदवर्णयोः पूर्णं लभ्यते, तथापि अस्त्येव कदाचित् प्रयोगः यदा तन्मात्रमेव प्रयोक्तुमिष्टम्। यथा "कोऽत्र स्थितः" इति पृष्टे "गौः" इत्येतावत् प्रयुज्यते, तथा "का परा देवता" इति पृष्टे वर्णमेव केवलमकारं विष्ण्वर्थकं प्रयुज्यत इति।

किं च[2] प्रयोगमात्रमेव सद्भावेऽपेक्षितम्। अस्ति च पदवर्णानामध्ययनवेलायां वाक्याद्विच्छिद्य समुच्चारणम्। यद्यपि केवलानामेषां वाक्यार्थबोधोपयोगिता नास्ति, तथापि कार्याशक्तरथचक्रवत् तत्सद्भावोऽविरुद्धः।

[3]यत्पुनरुक्तं — यदि वाक्ये पदे च पदात्मको वर्णात्मकश्च भेदः स्यात् ततो वर्णानामप्यवयवशो भेदः स्यात्। न हि निरवयवस्य अन्यावयवत्वं संभवति, तन्त्वादीनां सावयवानामेव पटाद्यवयवत्वदर्शनात्। ततश्च पदवर्णभागानामपि भागान्तरापत्त्या अनवस्थानात् सर्वाभावः स्यादिति। तत्रोच्यते। यथा हि परमाणुषु सत्स्वपि तेषां परैरापादितमंशभेदं परिहृत्य तन्त्वादीनि कार्यद्रव्याणि स्थापितानि, तथा सत्स्वपि वर्णेषु तेषां भागभेदं विनापि वर्णादिस्थापनान्नानुपपत्तिः कापि। न हि किंचित् सावयवं दृष्ट्वा सर्वं सावयवमिति प्रसज्यते। घटस्य सावयवत्वेऽपि परमाणूनां निरवयवत्वात्।

---

[1] श्लो.वा.वाक्य.१४०, पृ. ६२५.
[2] श्लो.वा.वाक्य.१४६, पृ. ६२६.
[3] श्लो.वा.वाक्य.१५०, पृ. ६२७.

तस्मात् तन्त्वादिवत् प्रत्यक्षसिद्धो वर्णपदाद्यवयवभेदो न वर्णांशानुपपत्त्या बाधितुं शक्यते।

ननु[1] भवन्त्वर्थवन्ति पदानि, तानि तु पदार्थमात्रप्रतिपादकानि न विशिष्टरूपमलं वाक्यार्थमवबोधयितुमिति तत्प्रतिपादनाय स्वतन्त्रं पदानपेक्षं निर्भागं वाक्यं वाचकं कल्प्यत इति चेन्न। पदार्थान्वयरूपेणैव वाक्यार्थस्यावगम्यमानतया स्वतन्त्र-वाक्यासिद्धेः।

सभागस्य वाक्यस्य वाक्यार्थवाचकत्वमिति मतस्य निरासः

ननु मा भून्निर्भागं वाक्यम्, सभागमेव तु भागप्रतिपादितपदार्थज्ञानसहकृतं तदन्वयरूपस्य वाक्यार्थस्य वाचकमस्तु इति चेन्न। पदानामेव वाक्यार्थे सामर्थ्यान्न वाक्यस्य सामर्थ्यं कल्प्यम्। पदार्थोपक्षीणेष्वपि पदेषु पदबोध्यैः पदार्थैः वाक्यार्थ-बोधनात्। न चैवमवसितव्यापारेषु पदेषु पश्चात् पदार्थेभ्यो गम्यमानः वाक्यार्थः अशाब्दः स्यादिति वाच्यम्। वाक्यार्थस्य अशाब्दत्वेऽपि पदार्थानां नाशाब्दत्वम्। वाक्यार्थबोधे निमित्तान्तरसत्त्वेऽपि पदार्थबोधे पदातिरिक्तनिमित्ताभावात्। तथा च पदार्थानां शाब्दत्वद्वारेण तद्बोध्यस्य वाक्यार्थस्यापि शाब्दत्वं सिध्यति। वाक्यार्थ-तात्पर्यकत्वाच्च शब्दानां वाक्यार्थस्य शाब्दत्वं सिध्यति।

वाक्यार्थस्य तात्पर्यवृत्त्या पदार्थगम्यत्वम्

सर्वमिदमभिप्रेत्योक्तं[2] —

"पदार्थानुगतश्चैष वाक्यार्थो गम्यते सदा।
न विशिष्टार्थता तस्मात् वाक्यस्वातन्त्र्यसाधिनी॥
न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेषु पदानि नः।
तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते॥
अशाब्दे चापि वाक्यार्थे न पदार्थेष्वशाब्दता।
वाक्यार्थस्येव नैतेषां निमित्तान्तरसंभवः॥" इति।

न्यायरत्नाकरे च तद्व्याख्याने —

"वाक्यार्थे हि शब्दानां तात्पर्यं न पदार्थेषु। तेषां प्रमाणान्तरसिद्धत्वात्। अतो यद्यप्यभिधाव्यापारः पदार्थेषु पर्यवसितः। तथापि तात्पर्यव्यापृतेरपर्यवसितायाः वाक्यार्थपर्यन्तत्वात्, तात्पर्ये शब्दस्य प्रामाण्यात्, सिध्यति शब्दप्रमेयतया वाक्यार्थस्य शाब्दत्वमिति" इति तत्तात्पर्यं निरूपितम्।

---

[1] श्लो.वा.वाक्य.२२७.

[2] श्लो.वा.वाक्य. २२८-२३०.

न च प्रतीतस्य पदार्थस्य स्वासंबद्धवाक्यार्थबोधकत्वं कथम्, ज्ञातस्य धूमादेः स्वसंबद्धवह्न्यादिबोधकत्वस्यैव दर्शनात् इति वाच्यम्। पदार्थस्य वाक्यार्थेन सहाविनाभावसंबन्धात्। पदार्थो हि सामान्यम्, वाक्यार्थश्च विशेषः। न हि सामान्यं विशेषेण विना उपपद्यते।

नन्वविनाभावसंबन्धपुरस्कारेण पदार्थानां वाक्यार्थबोधकत्वे वाक्यार्थस्यानुमानिकत्वं स्यात् इति चेत् — न। पदार्थानां वाक्यार्थप्रत्यायकानां लिङ्गत्वाभावात्। "पदार्थाः वाक्यविशिष्टाः (वाक्यार्थवन्तः), पदार्थत्वात्" इत्यनुमानप्रयोगविवक्षायां हेतोः प्रतिज्ञार्थैकदेशतया = पक्षतया, पक्षाविशेषापत्तिः। न च यथा धूमविशेषे पक्षे धूमसामान्यस्य हेतुत्वं तथेह संभवतीति वाच्यम्। वैषम्यात्। तत्र धूमसामान्यम् आत्मनः पृथग्भूतेनैव विशेषेणान्वितम् अग्निं गमयति, पदार्थास्तु सामान्यरूपाः स्वात्मानमेव विशेषरूपवाक्यार्थान्वितं गमयन्तीति अस्त्येव प्रतिज्ञार्थैकदेशता।

यदि तु वाक्यार्थस्य पक्षत्वम्, पदार्थानां हेतुत्वमुच्यते, तदा हेतोः पक्षधर्मत्वस्यावश्यकतया वाक्यार्थस्य च पूर्वमसिद्धतया तद्धर्मतया पदार्थावगमस्याशक्यतया पदार्थहेतुकवाक्यार्थपक्षकानुमानं न संभवति। प्रागेव वाक्यार्थेऽवगते तु अनुमानावसेयस्य प्रमेयस्याभावात् नानुमानस्य प्रसरः। किं च विनापि संबन्धं पदार्थेभ्यो वाक्यार्थस्य प्रतीतिसंभवात् नानुमानावकाशः।

तस्मात् पदार्थाः एव आकाङ्क्षादिसहकृताः वाक्यार्थमवगमयन्ति। भावनैव च वाक्यार्थः। सा च भावना साध्यं, साधनम्, इतिकर्तव्यतां चापेक्षत इति साध्यसाधनादिपदार्थविशिष्टभावना वाक्यार्थः।

वाक्यवाक्यार्थयोर्निर्भागत्वनिरासस्य फलम्

यत्तु निर्भागमेव वाक्यं, तद्विवर्तात्मा अर्थोऽपि निर्भाग इति, तन्नेत्याह[१] —

"प्रासङ्गिकादि यत्कार्यं पदार्थोपनिबन्धनम्॥
आकाङ्क्षाविदितप्रश्नौ यौ च दृष्टौ पिकादिषु।
असत्यं तदपोद्धृत्य न चैवं कल्पयिष्यति॥
शशशृङ्गाद्यपोद्धृत्य वाक्यार्थो न हि दृश्यते।
असत्यैर्गम्यमानेऽर्थे सत्यता नेत्युदाहृतम्॥" इति।

पाशुकानां प्रयाजादीनां पुरोडाशेषु प्रसङ्गः, आग्नेयादिषु तन्त्रमङ्गानि, कृष्णलादिषु चावघातादीनां बाधः इत्यादिर्योऽयं वेदव्यवहारः, या च लोके "द्वारं"

---

[१] श्लो.वा.वाक्य. ३३७cd -३३९.

"द्वारम्" इत्युक्तेऽर्थान्तराकाङ्क्षा, "पिकमानय" इत्यादौ "कः पिकः" इत्यविदितादिप्रश्नः, तत्सर्वमसति पदार्थविभागेऽनुपपन्नं स्यात्।

ये हि वाक्यमेव सभागं निर्भागं वा वाक्यार्थस्य वाचकमिति मन्यन्ते, ये च निर्मूलमेव वाक्यार्थज्ञानम्, तदुभयेषामपि निराकरणपरं सूत्रं[1] —

"तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्" इति।

लोकसिद्धेषु पदार्थेषु वर्तमानानां पदानामेव वाक्यार्थज्ञानोपायत्वान्न वाक्यस्य वाचकत्वम्। अर्थस्य = पदार्थानाम्, एव वाक्यार्थज्ञाननिमित्तत्वोपपत्तेः।

ननु यदि पदार्थेषु पदानि वर्तन्ते, पदार्थाश्च वाक्यार्थस्य विशिष्टभावनात्मकक्रियारूपस्य निमित्तम्, ततः कथं पदानां क्रियार्थेन समाम्नाय इत्यत्राह[2] —

"साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥" इति।

पदार्थस्वरूपस्य प्रमाणान्तरसिद्धत्वात् तन्मात्रप्रतिपादनं निष्फलम्, अतः पदार्थावसिताभिधाव्यापाराणामपि पदानां तत्रानवसिततात्पर्याणां वाक्यार्थावगतावेव तात्पर्यमिति युक्तं तेषां क्रियार्थेन समाम्नायः।

"वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥"[3]

पदार्थमूलकत्वेऽपि वाक्यार्थस्य पदार्थे पदव्यापारसत्त्वात् पदार्थद्वारा शाब्दत्वं वाक्यार्थस्येति वार्त्तिककाराशयः।

एवं च पदैरभिहिताः पदार्थाः वाक्यार्थमवगमयन्तीति सिद्ध्या अभिहितान्वयवादः वार्त्तिकाभिमत इति ज्ञायते।

एतावता वाक्यार्थप्रतीतौ निमित्तं किमिति निरूपितम्। अभिहितान्वयवादश्च प्रस्तुतः। अथ वाक्यार्थविषये वादद्वयं विस्तरेण विचार्यते ।

इति वाक्यार्थबोधनिमित्तविचारः

---

[1] जै.सू. १.१.७.२५.

[2] श्लो.वा.वाक्य.३४२.

[3] श्लो.वा.वाक्य.३४३.

अन्विताभिधानवाद-अभिहितान्वयवादौ

वाक्यार्थप्रक्रियायाम् अभिहितान्वयवादः अन्विताभिधानवादः इति प्रक्रिया-द्वयमिदानीं प्रश्न्ते। प्रायः सर्वेऽपि दार्शनिकाः एतदन्यतरमार्गमवलम्बन्त इति निश्चितम्। तत्र वाचस्पतिमिश्रस्य तत्त्वबिन्दुः अन्विताभिधानवादखण्डनपूर्वकम् अभिहितान्वयवादसमर्थकः। शालिकनाथस्य प्रकरणपञ्चिका प्राचीना अन्विताभि-धानवादसमर्थिका। जयन्तभट्टस्य न्यायमञ्जरी अभिहितान्वयवादसमर्थिका। पार्थ-सारथिमिश्रस्य न्यायरत्नमाला विस्तरेण वादद्वयं प्रस्तुत्य अभिहितान्वयपक्षं समर्थयते। कुसुमाञ्जलावुदयनाचार्यैः तत्त्वचिन्तामणौ गङ्गेशोपाध्यायैश्च वादद्वयं विमृश्य ईषत् भाट्टात् भिन्नः अभिहितान्वयवादः प्रस्तुतः। प्रकरणपञ्चिकायां[1] वाक्यार्थमातृकाख्ये प्रकरणे द्वयोरपि वादयोः गुणदोषचिन्तनपूर्वकमन्विताभि-धानवादः स्थापितः। तथा हि —

प्रकरणपञ्चिकानुसारेण अन्विताभिधानवादाभिहितान्वयवादसमीक्षा

तत्र कार्यवाक्यार्थवादिन एव भावं, भावनाम्, अपूर्वं च वाक्यार्थान् प्रति-जानते। तत्रापूर्वमेव वाक्यार्थ इति साधनीयम्। तस्य मूलं पदानामन्विताभि-धायितेति तामेव तावदादौ परिशोधयति। अत्र ये[2] प्रत्यस्तमितवर्णपदविभागं वाक्यमेव वाक्यार्थस्य वाचकमित्याचक्षते, ये[3] च वाक्यान्त्यवर्ण एवेति, ये[4] च पदैरनन्विताः पदार्था अभिहिताः परस्परान्वयमात्मनोऽवगमयन्ति इति, तन्निरसनाय प्रतिजानीते[5] —

पदेभ्य एव वाक्यार्थप्रत्ययो जायते यथा।
तथा वयं निबध्नीमः प्रभाकरगुरोर्मतम्॥

पदेभ्य एव, न वाक्यात्, नाप्यन्त्यवर्णात्, नापि पदार्थेभ्य इत्यर्थः। तं प्रकारं वक्तुमुपक्रमते[6] —

पदैरेवान्वितस्वार्थमात्रोपक्षीणशक्तिभिः।
स्वार्थाश्चेत् बोधिता बुद्धो वाक्यार्थोऽपि तथा सति॥

---

[1] प्र.पं.पृ.३७६-४१४.
[2] ये = वैयाकरणाः।
[3] मीमांसाभाष्यकाराः नैयायिकाश्च।
[4] वार्त्तिककाराः कुमारिलभट्टाः।
[5] प्र.पं.पृ.३३७.
[6] प्र.पं.पृ.३३७.

कथं पुनः पदानामन्वितस्वार्थमात्रबोधकत्वे वाक्यार्थावगतिः सिध्यतीत्यत्राह[१] —

प्रधानगुणभावेन लब्धान्योन्यसमन्वयान्।
पदार्थानेव वाक्यार्थान् संगिरन्ते विपश्चितः॥ इति।

अन्विताभिधानानुपपत्तिशङ्का

अत्र केचित् आचक्षते — भवतु पदानां पदार्थेषु शक्तिज्ञानं, तथाप्यन्विताभिधानं न सिध्यति। तथा हि — प्रतियोगिनामनन्ततया अन्वयानामानन्त्यात्, तदानन्त्ये चान्वितानामप्यानन्त्यात् संबन्धग्रहणं दुष्करम्। अगृहीतसंबन्धस्य पदस्य वाचकत्वे एकस्माच्छब्दात् सर्वार्थप्रतीतिप्रसङ्गः। सामान्यान्वयाभिधानं च नाशङ्कनीयमेव, वाक्येभ्यो विशेषान्वयावगमात्। पदार्थस्वरूपमात्राभिधानेनापि च वाक्यार्थप्रतिपत्त्युपपत्तौ अन्विताभिधानाश्रयणे शक्तिकल्पनागौरवात्।

तथा पदेनान्वितः स्वार्थोऽभिधीयमानः किमभिहितेन पदार्थान्तरेणान्वितोऽभिधीयते, उतानभिहितेनेति विकल्पनीयम्, अनभिहितेन चेत्, पदान्तरप्रयोगवैयर्थ्यम्। एकस्माच्च सर्वान्वयप्रतीतिप्रसङ्गः। अभिहितेन चेत् तदपि तर्हि पदमन्विताभिधायितया पदान्तरोपात्तमर्थम् अभिधानायापेक्षत इति इतरेतराश्रयः प्राप्नोति। तस्मात् पदान्तराभिधानानपेक्षस्वरूपमात्राभिधानमेव अर्थानां पदैः क्रियते। ते च तथाभूताः पदैरभिहिताः पदार्थाः आकाङ्क्षासंनिधियोग्यतावन्तः वाक्यार्थमवगमयन्ति। न तेषां संबन्धग्रहणापेक्षा शङ्कनीया। यतः पदधर्मोऽयं,[२] नार्थधर्मः। तदाह भाष्यकारः[३] —

"पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्था अवगताः सन्तः वाक्यार्थमवगमयन्ति" इति।

उक्तानुपपत्तिशङ्कानिराकरणम्

तन्निराकर्तुमुपक्रमते[४] —

ओप्यन्ते चोद्ध्रियन्ते च स्वार्था अन्वयशालिनः।
अन्वितेष्वेव सामर्थ्यं पदानां तेन गम्यते॥

अन्वितादर्थादेव तद्धटकैकदेशानामावाप उद्वापश्च भवतीति अन्विताभिधान एव पदानां सामर्थ्यमित्याशयः।

---

[१] प्र.पं.पृ.३३७.
[२] संबन्धग्रहणापेक्षा पदधर्मः, न तु अर्थधर्मः। धर्मशब्दानुसारेण पुंलिङ्गनिर्देशः।
[३] शा.भा.१.१.७.२५.
[४] प्र.पं.पृ.३८३.

तत्र शङ्का

सत्यमन्वितपदार्थविषयकावेव आवापोद्वापौ, तथापि अन्विताभिधानमशक्यम्, पारम्पर्येणापि तदुपपत्तेः। तथा हि — पदैरनन्वितोऽप्यभिहितोऽर्थः अन्वितार्थप्रतिपत्तेर्निमित्तं भवतीति पदानां पारम्पर्येणान्वितेष्वपि हेतुत्वम्। तदाहुर्वार्त्तिककारमिश्राः[1] —

"न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः।
तन्मात्रावसितेष्वेषु[2] पदार्थेभ्यः स गम्यते॥" इति।

पदार्थप्रतिपादनं च वाक्यार्थप्रतिपत्तये प्रयुक्तानां पदानामवान्तरव्यापार इति च तेषामेव व्यवहारः[3] —

"वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥" इति।

आकाङ्क्षादीनामुपलक्षणता

एतां शङ्कामुपेक्ष्यैव तावत् दोषान्तरं परिहरति[4] —

आकाङ्क्षासंनिधिप्राप्तयोग्यार्थान्तरसंगतान्।
स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता यदा॥
आनन्त्यव्यभिचाराभ्यां तदा दोषो न कश्चन।

यत्तावदुक्तम् — आनन्त्याच्छब्दशक्त्यवधारणानुपपत्तिः, अगृहीतशक्तेश्च वाचकत्वे व्यभिचारप्रसङ्ग इति। तन्न। उपलक्षणाश्रयणेनापि संबन्धबोधसौकर्यात्, आकाङ्क्षितेन योग्येन संनिहितेन चान्वितं स्वार्थं पदं वक्तीति व्युत्पत्तिः आश्रीयते। तेन —

यद्यदाकाङ्क्षितं योग्यं[5] संनिधानं प्रपद्यते।
तदन्वितः पदेनार्थं स्वकीयः प्रतिपाद्यते॥[6]

आकाङ्क्षादिस्वरूपम्[7]

आकाङ्क्षा नाम प्रतिपत्तुः जिज्ञासा। सा चाभिधानापर्यवसानात् अभिधेयापर्यवसानाच्च उदेति। एकपदप्रयोगे हि "द्वारम्" इत्यादौ अभिधानमेव न पर्यव-

---

[1] श्लो.वा.वाक्य.२२९.
[2] एषु पदेषु = पदसामर्थ्येषु वा, तन्मात्रावसितेषु = पदार्थमात्रबोधनेन उपक्षीणेषु।
[3] श्लो.वा.वाक्य.३४३
[4] प्र.पं.पृ.३८४.
[5] संनिधानम् = उपस्थितिम्।
[6] प्र.पं.पृ.३८४.
[7] प्र.पं.पृ.३८५.

स्यति। न हि अनुच्चरितेऽन्वयप्रतियोग्युपस्थापके पदेऽन्विताभिधानं शक्यते वक्तुम्। वृद्धव्यवहारवशेन अन्वितार्थप्रतिपादनपरता पदानां निश्चितेति तदर्थं युक्तैव प्रतियोगिजिज्ञासा। यस्याप्यभिहितान्वय इति सिद्धान्तः, तन्मतेऽपि पदार्थस्य पदार्थान्तरमन्तरेण अन्वयासामर्थ्यात् तदुपपत्तये युक्तैव प्रतियोगिजिज्ञासा। तस्यां च सत्यामपरिपूर्णवाक्यपूरकतया लोकेऽध्याहारस्य विदितत्वात् प्रकरणादिवशेन योग्यप्रतियोग्यध्याहारः क्रियते।

"अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति" इत्यादिषु[१] अनेकपदप्रयोगात् अन्विताभिधानेऽपि कार्यस्य अपूर्वात्मकस्य अनुष्ठानं विना कार्यत्वानुपपत्तेः, अनुष्ठानस्य च कर्त्रा विना असंभवात्, अधिकारादृते कर्तृत्वायोगात्, नियोज्यमन्तरेण चाधिकारानुपपपत्तेः, अधिकारोपपत्तये तदन्वययोगिनियोज्यजिज्ञासा युक्तैव। जिज्ञासायां सत्यां वाक्यस्यापरिपूर्णत्वावगमात्, लोकवत् अध्याहारे कर्तव्ये सति स्वर्गकामो नियोज्योऽध्याह्रियते।

नन्वेवं तर्हि यत्र पदत्रयं प्रयुज्यते "गामानय शुक्लाम्" इति, तत्र हि कारकद्वयस्यासंभवात् नाकाङ्क्षास्तीति कथमन्विताभिधानम्। "गामानय" इत्येतावतैव परिपूर्णत्वात् वाक्यस्य।

सत्यम्। पदान्तरानुच्चारण एवम्। उच्चरिते तु तस्मिन् तस्याप्यानयतिसंनिधानात् एकवाक्यत्वावगमात् आनयत्यन्वितस्वार्थाभिधायित्वात् आकाङ्क्षां विना च तदसंभवात् आनयतेराकाङ्क्षा परिकल्प्यते। तथा चोक्तं भाष्यकारेण[२] "भवति च 'रक्तः पटो भवति' इत्यत्र रक्तं प्रत्याकाङ्क्षा" इति। तेनात्राप्यन्विताभिधानसिद्ध्यर्थमेवाकाङ्क्षा। परं त्वयं विशेषः, "द्वारम्" इत्यादौ तस्यैव पदस्यान्विताभिधानायाकाङ्क्षा। "गामानय शुक्लाम्" इत्यादौ तु पदान्तरस्येति।

सा चेयमाकाङ्क्षा भवन्ती व्युत्पत्तावुपलक्षणमाश्रीयते। निराकाङ्क्षाणामन्विताभिधानादर्शनात्। "अयमेति पुत्रो राज्ञः पुरुषोऽपनीयताम्" इत्यादौ पुत्रपदसंबन्धनिराकाङ्क्षो राजा न पुरुषेणान्वीयते। कस्मात् पुनरनयोः पुत्रपुरुषयोः संनिधियोग्यत्वाविशेषेऽपि पुत्रेणैव राज्ञः संबन्धः न पुरुषेण। उच्यते। वाक्यात् वाक्यार्थप्रतिपत्तेर्न्यायसापेक्षत्वात् नित्यसापेक्षेण पुत्रेणैव राजा संबध्यते। तत्संबन्धनिराकाङ्क्षश्च न पुरुषसंबन्धमनुभवतीति आकाङ्क्षापि व्युत्पत्त्युपलक्षणम् आश्रीयते।

यस्यार्थस्य श्रवणानन्तरमाकाङ्क्षायोग्यताभ्यामर्थान्तरे बुद्धिविपरिवृत्तिः सा संनिधिः। योग्यता = संबन्धार्हता।

---

[१] आ.श्रौ.२.६.१, पृ.७३.

[२] भाष्यवाक्यस्य अर्थतः अनुवादोऽयम् (शा.भा.१.२.१.७.)।

अभिहितान्वयेऽप्याकाङ्क्षादीनामुपलक्षणत्वस्यावश्यकता[१]

नन्वन्विताभिधानमते व्युत्पत्तावाकाङ्क्षाद्युपलक्षणाश्रयणमेव गौरवमिति चेन्न। अभिहितान्वयमतेऽपि तुल्यत्वात्। पदार्थानामन्योन्यान्वयबोधकत्वे "गामानय" इत्यत्र गोपदार्थः आनयनान्वयमेव बोधयति नान्यबन्धनाद्यन्वयमिति प्रतिनियतान्वयबोधसिद्धयर्थम् आकाङ्क्षासंनिधियोग्यतावन्त एव पदार्थाः वाक्यार्थं बोधयन्ति नान्ये इति। एतदेव कथम् इति पृष्टेन, वृद्धव्यवहारे तथा दर्शनादिति परिहारो वक्तव्यः। तस्मादुभयपक्षसाधारणत्वान्नेदं दूषणम्।

नन्वेवमपि केन विशेषेणाभिहितान्वयं परित्यज्य अन्विताभिधानमाश्रितम्। उच्यते। पदार्थानां हि शब्दात् अन्यतः प्रमाणात् प्रतीयमानानामन्योन्यान्वयबोधकत्वं न दृष्टमिति शब्दाभिधेयानां तेषामन्वयावगमशक्तिः कल्पयितव्या। तस्याः शक्तेः उत्पत्तौ शब्दसंस्पर्श एव हेतुरित्याश्रयणीयम्। शब्दो हि विशिष्टार्थबोधनपरतया लोकव्यवहारेषु प्रयुज्यमानो दृष्टः। न चासौ साक्षात् वाक्यार्थप्रतिपादने समर्थ इति पदार्थान् अवान्तरव्यापारीकरोति। ते च पदार्था यद्यन्योन्यान्वयबोधने समर्थाः स्युः तदा तेषामवान्तरव्यापारता स्यात् नान्यथेति, विशिष्टार्थावबोधपरशब्दसंबन्धादेव तेषामेषा शक्तिराविर्भवतीति शब्दस्यापि पदार्थगतान्वयबोधकत्वशक्त्याधानशक्तिराश्रयणीया। तथा च शक्तिद्वयकल्पनागौरवप्रसङ्गभिया अभिहितान्वयवादः परित्यज्यते।

प्रमाणान्तरावगतपदार्थानामन्वयबोधकत्वनिरासः

स्यादेवं — यदि मानान्तरावगतानां पदार्थानामन्योन्यान्वयावगमे सामर्थ्यं न स्यात्। अस्ति तु तत्। अनवधारिताश्रयविशेषस्य प्रत्यक्षदृष्टस्य श्वैत्यस्य, अप्रतिपन्नगुणविशेषस्य प्रत्यक्षहेषाशब्दखुरनिक्षेपशब्दाभ्यामनुमितस्याश्वस्य, अज्ञातकर्तृभेदस्य धावनस्य च "श्वेतोऽश्वो धावति" इत्यन्वयबोधकत्वदर्शनात्। तदाहुः वार्त्तिककारमिश्राः[२] —

"पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः॥
दृष्टा वाक्यविनिर्मुक्ता........................।" इति।

आरूपम् = अव्यक्तरूपम्। तेन गुणविशेषस्यानिश्चय उक्तो भवति।

अत्रोच्यते। किं येन पुरुषेण श्वैत्यसमानाश्रयकतया हेषाध्वनिपदनिक्षेपशब्दाववगतौ तस्येयं "श्वेतोऽश्वो धावति" इति धीः, यस्याश्रयानिश्चयः, तस्यापि।

---

[१] प्र.पं.पृ.३९१.
[२] श्लो.वा.वाक्य.३५८.

आद्ये इयं प्रतीतिः अनुमितिरूपा "श्वेतः अश्वः, हेषाशब्दवत्त्वात्, खुरनिक्षेप-शब्दवत्त्वाच्च" इति। द्वितीये अनुभवविरोधः। "भवितव्यमस्मिन् देशे नूनमश्वेन, भवितव्यं च केनचिद्धावता" इति ह्यनुभवः।

अन्विताभिधाने शक्तिकल्पनलाघवम्

अपि च यदि पदार्थावगतिमात्रात् परस्परान्वयावगमः तदा कस्मिन् प्रमाणे तस्यान्तर्भाव इति वक्तव्यम्। न तावत् शाब्दे। शब्दाभावात्। पदार्थाभि-धानावान्तरव्यापारेण यत् शब्दात् अन्वयज्ञानं तत् शाब्दम् इत्येष वो राद्धान्तः। तस्मान्नास्य शाब्देऽन्तर्भावः। प्रमाणान्तराभ्युपगमे तु शब्दावगतपदार्थविषयेऽपि तस्यैव प्रामाण्यप्रसङ्गात्।

तस्मात् शब्दाभिहितानां पदार्थानामन्यत्राद्दष्टं वाक्यार्थबोधनसामर्थ्यं कल्पनीयम्। तदाधानशक्तिश्च पदानामपीति कल्पनालाघवात् पदानामेवान्वितस्वार्थावबोधन-शक्तिमात्रं कल्पयितुं शक्यम्।

ननु अनन्तप्रतियोग्यन्वितस्वार्थबोधनविषयाः अनन्ता एव शब्दस्य शक्तयः कल्पयितव्याः स्युः। अभिहितान्वयवादे तु एकस्मिन्नर्थे एकस्य शब्दस्य एकैव शक्तिरिति।

तन्न। एकयैव आकाङ्क्षित-संनिहित-योग्यार्थान्वितस्वार्थाभिधानशक्त्या प्रति-योगिभेदेन कार्यभेदोपपत्तेः। चक्षुरादिवत्। चक्षुर्यथा एकयैव दर्शनशक्त्या घटादि-प्रतियोगिसहायभेदात् भिन्नानि घटपटादिज्ञानानि जनयति, तथा शब्दोऽपि प्रति-योगिभेदादिति मन्तव्यम्। किं च पदार्थेष्वपि तुल्यमेतदिति न किंचिदेतत्।

वाक्यार्थविषये नूतनं मतम्[१]

अन्ये त्वाहुः — आकाङ्क्षा-संनिधि-योग्यतावन्तः पदार्थाः वाक्यार्थीभवन्ति, न पुनर्वाक्यार्थमेव बोधयन्तीति।

तदिदमतिमन्दम्। वाक्यार्थावगतेः कारणाभावप्रसङ्गात्। अनुपायत्वे पदाना-मन्वयप्रतिपत्तौ, पदार्था अपि चेन्न कारणम्, अकारणिकैव वाक्यार्थावगतिः आपद्येत।

स्यान्मतं — क्रियापदेन कारकपदेन वा साकाङ्क्षेऽर्थे अभिहिते, यदेव पदा-न्तरेण योग्यं प्रतियोगिभूतं पदार्थान्तरं संनिधाप्यते, तदेव तस्य संबन्धित्वे-नावतिष्ठते इति।

---

[१] प्र.पं.पृ.३९४.

सत्यमेवम्। अवगतिस्तु तत्संबन्धस्य किंनिमित्तिका? अथ पूर्वपदार्थे साकाङ्क्षेऽभिहिते यत् पदान्तरमुच्चरितं तत् पूर्वपदार्थसंबन्धितयैव स्वार्थं बोधयति। प्रत्ययवत्। यथा प्रकृत्यर्थे पूर्वं प्रतीते सति उच्चार्यमाणः प्रत्ययः स्वार्थं प्रकृत्यर्थविशिष्टमेवाभिधत्ते, तथा पदान्तरमपि। तदुक्तं[१] "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः" इति। प्रकृतिः स्वार्थं प्रत्ययार्थविशेषणत्वेनोपनयतीति, प्रत्ययः प्रकृत्यर्थविशिष्टं स्वार्थमाहेत्यर्थः। इति चेत् —

अङ्गीकृतं तर्हि द्वितीयस्य पदस्यान्विताभिधायकत्वम्। तथापि प्रथमस्य पदस्य तन्नास्तीति चेत् — न। वाक्ये पदानां प्रयोगे क्रमनियमाभावात्। यदेव कदाचित् प्रथमं तदेव कदाचित् द्वितीयमिति सर्वपदानामेवान्विताभिधायकत्वमागतम्। अभिहितान्वयवादी तु प्रकृतिप्रत्यययोरपि पदवत् अभिहितान्वयमेवेच्छति।

"प्रकृतिप्रत्ययौ ब्रूतः प्रत्ययार्थं सहेति यत्।
भेदेनैवाभिधानेऽपि प्राधान्येन तथोच्यते॥
पाकं तु पचिरेवाह कर्तारं प्रत्ययोऽप्यकः।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचित्॥" इत्याह।

किं च प्रत्ययश्चेत् अन्विताभिधायी, तदा तदविशेषात् पदानामप्यन्विताभिधायिता कुतो नाङ्गीक्रियते? यत्र तु प्रातिपदिकार्थे प्रथमा, यथा "द्वारम्" इति, तत्र प्रातिपदिकार्थातिरिक्तप्रत्ययार्थाभावात् प्रत्ययस्य प्रातिपदिकार्थान्वितार्थाभिधायकत्वानुपपत्त्या अन्विताभिधानार्थमेव "विव्रियताम्" इति वा "संव्रियताम्" इति वा अध्याहियते। "द्वारं प्रविश" इत्यादौ तु "द्वारम्" इति द्वितीयान्तमात्रोक्तौ अभिहितार्थानुपपत्त्यैव "प्रविश" इत्यस्याध्याहारः, "विश्वजिता यजेत" इत्यादौ "स्वर्गकामः" इत्यध्याहारवत्।

भाट्टमतम्

वार्त्तिककारमिश्रास्तु लाक्षणिकान् सर्ववाक्यार्थान् इच्छन्तः पदार्थानामन्वयावबोधशक्तिकल्पनां निराकुर्वन्ति। पदैः अनन्वितावस्थाः अभिहिताः अर्थाः स्वसंबन्धिनीमन्वितावस्थां लक्षयन्ति। अवस्थावस्थावतोः संबन्धात् अवस्थावति अभिहिते अवस्थापि बुद्धिस्था भवति। सर्वत्र संबन्धिनि दृष्टे संबन्ध्यन्तरे बुद्धिर्भवतीति क्लृप्तमेव। तेन नास्ति पदानामन्वितबोधने शक्तिकल्पनेति। तदाहुः[२] —

"वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थितिः" इति।

---

[१] म.भा.३.१.६७.
[२] बृहट्टीका।

अत्रापरे ब्रुवते — नेयं लक्षणा, स्वार्थपरित्यागाभावात्। "गङ्गायां घोषः" इत्यादौ वाच्यार्थप्रवाहादिपरित्यागेन हि तीरादौ लक्षणा दृष्टेति।

तत्तु न युक्तम्। सर्वत्र लक्षणास्थले शक्यार्थत्याग इति निर्बन्धाभावात्। अजहल्लक्षणायां तदभावात्। "सृष्टीरुपदधाति" इत्यत्र सृष्टिवाचकशब्दघटितानां तदघटितानां च मन्त्राणां सृष्टिशब्देन लक्ष्यमाणत्वात्।

वाक्यार्थे लक्षणापक्षस्य दूषणम्

परं तु लक्षणालक्षणाभावात् पदानां वाक्यार्थे लक्षणा न संभवति।

वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः।
तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते॥[१]

"गङ्गायां घोषः" इत्यादिषु गङ्गापदवाच्यस्य प्रवाहस्य घोषाधिकरणत्वरूपे वाक्यार्थेऽन्वयानुपपत्तेः तं परित्यज्य वाच्यार्थप्रवाहसंबन्धात् बुद्ध्या संनिहितस्य तीरस्य वाक्यार्थेऽन्वयोऽस्तीति तीरे गङ्गापदस्य लक्षणा।

इह च "गामानय" इत्यादौ वाच्यार्थस्य गवादेः वाक्यार्थे आनयनकर्मत्वादान्वयानुपपत्तिर्नास्ति। तथा लक्ष्यार्थस्य संसर्गस्य पुनः वाक्यार्थे संबन्धोऽपि नास्ति। अन्वयस्य अन्वयान्तराभावात्।

अथ मा भूत् लक्षणा। किं तु क्रियायाः कारकाविनाभावात् क्रिया अवगता सती स्वस्याः कारकान्वयावस्थामवगमयति, अविनाभावादिति चेत् —

उच्यते। एवं सति अन्वयावगमस्य शाब्दत्वं न स्यात्। किं तु अनुमितित्वमेव स्यात्, अविनाभावमूलकत्वात्। अपि च विशिष्टान्वयावगतिरनुपपद्यमाना निर्मूला आपद्यते।

अथ विशेषान्वयं विना व्यवहारायोगात् शब्दोच्चारणमनर्थकमिति तदाश्रयणमिति चेत् — एवमपि आनर्थक्यमापद्यत इत्येतावता कारणेन उपायाद्विनापि न हि विशेषान्वयाध्यवसानं युक्तम्। न हि दग्धुकामस्य जलोपादानमनर्थकमिति जलस्य दाहशक्तिराविर्भवति। अथ आकाङ्क्षितसंनिहितयोग्यान्वयपरता वृद्धव्यवहारे पदानामवगतेति व्युत्पत्त्यनुसारेण विशेषान्वयावगमः। तन्न। वृद्धव्यवहार एव तत्परता पदानां पदार्थानां वा उपायाभावेन कथं निर्वहति। सा हि चिन्ता पदानां पदार्थानां वा शक्तिकल्पनां विनानुपपन्नेति मन्यामहे। सा च पदानामेवोचितेत्याह[२] —

---

[१] प्र.पं.पृ.३९८.
[२] प्र.पं.पृ.४००.

प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम् ॥

प्रथमावगतानि पदान्यतिक्रम्य नार्थे वाक्यार्थबोधनशक्तिराश्रयितुं युक्ता।

किं च पदानि तावदभिधायकानीति निर्विवादम्। तेन तेषामभिधानशक्तिः संप्रतिपन्नेति तस्या एवान्वयपर्यन्तता कल्पयितुं सुकरा। पदार्थानां बोधनशक्तिरेव कल्प्या। तेन 'धर्मिकल्पनातो वरं धर्मकल्पना लघीयसी' इति न्यायेन पदार्थेषु शक्तिरूपधर्मिकल्पनापेक्षया पदेषु क्लृप्तायां पदार्थशक्तौ अन्वयपर्यन्तत्वरूपधर्मकल्पनं लघु।

पदानां पदार्थस्वरूपाभिधायकत्वानुपपत्तिः

किं च पदान्यभिधायकानीति इष्यन्ते। तत्र यदि पदार्थस्वरूपमात्रविषयां बुद्धिं पदानि जनयेयुः, तदा अभिधायकता हीयेत। सा हि बुद्धिः संबन्धग्रहणसमये जातः यः पदार्थबोधकः संस्कारः तदुन्मेषात् जायते। अवश्यं हि संबन्धस्मरणसिद्ध्यर्थं संबन्धिभूतार्थस्मरणजनकसंस्कारोद्बोधः अङ्गीकरणीयः। तस्मात् पदार्थस्वरूपमात्रविषयकबुद्धिजनकत्वे पदानां स्मारकत्वमेव स्यात्, न त्वभिधायकत्वमिति, अभिधायकत्वोपपत्त्यर्थं संबन्धग्रहणसमयानधिगतान्वितार्थाभिधायकता आश्रयणीया।

यस्तु —

"पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते" इति,[1]

"भावनावचनस्तावत् तां स्मारयति लोकवत्"

इति[2] चाचार्यवचनदर्शनात् स्मारकत्वमेव पदानामभिधायकत्वमित्याह, तं प्रत्याह — तात्पर्योपगमादपीति।

येनापि वादिना पदानां पदार्थस्मारकत्वमेवाङ्गीकृतम्, सोऽपि वाक्यार्थप्रतिपत्तितात्पर्यं पदानामङ्गीकरोत्येव। अन्यथा वाक्यार्थस्याशाब्दत्वप्रसङ्गात्। एवं चेत् पदानामेव साक्षात् वाक्यार्थबोधनशक्तिरस्तु, किं परम्पराश्रयणेन।

पदानां पदार्थाभिधायकत्वे शक्तित्रयम्

ततश्च पदार्थेषु पदानां स्मारकत्वातिरिक्तं येऽभिधायकत्वमाहुः, तेषां शक्तित्रयकल्पना। एका तावत् पदानाम् अभिधायकत्वशक्तिः, अपरा च पदार्थगतान्वयबोधनशक्त्याधानशक्तिः, पदार्थानां चान्वयबोधनशक्तिः इति। स्मारकत्ववादिनस्तु

---

[1] श्लो.वा.शब्द.१०७.

[2] श्लो.वा.वाक्य.२४८.

अभिधानशक्तिं हित्वा शक्तिद्वयकल्पना। तदपेक्षया लाघवात् उक्तेन न्यायेन पदानामेव शक्तिकल्पनाया उचितत्वात् अन्विताभिधायीनि पदानीति स्थापितम्।

संप्रति पूर्वोक्तमन्योन्याश्रयदोषं परिहर्तुं यथा पदेभ्यो वाक्यार्थप्रतिपत्तिः तथा दर्शयति[१] —

पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम्।
न्यायसम्पादितव्यक्ति पश्चाद्वाक्यार्थबोधकम्॥

न्यायसंपादिता व्यक्तिः = अन्वयविशेषः, यस्य तत् न्यायसंपादितव्यक्ति। अत्र न्यायशब्देन वृद्धव्यवहारप्रवर्तितायां शब्दार्थप्रवृत्तौ ये न्यायाः शब्दार्थगोचराः एकवाक्यभिन्नवाक्यत्वादयः, साधारणाः, ये च द्वादशलक्षण्यां प्रतिपाद्याः वेदार्थनिर्णयेऽसाधारणाः शब्दान्तराभ्यासादयः, श्रुतिलिङ्गादयः, श्रुत्यर्थपाठादयः, वचननामधेयचोदनालिङ्गानि च, ते विवक्षिताः। तैः विमर्शदशायां सम्पादिते शब्दार्थानामन्वयार्हत्वविभागे सति पश्चात् स्मृत्युपनीतैः वाक्यार्थावगतिर्जायते। न्यायैः संपादिता = निर्णीतार्था, व्यक्तिः = वचनव्यक्तिः यस्य तत्।

यस्तावत् पूर्वं पदतदर्थयोः संबन्धं न ज्ञातवान्, यस्य च संबन्धग्रहणजन्यः संस्कारो नोत्पन्नः ध्वस्तो वा, तस्य वाक्यार्थज्ञाने नाधिकारः। अध्वस्तसंबन्धग्रहणजन्यसंस्कारवान् पुरुषः पदं श्रुत्वा इदं स्मरति — इदमस्य आकाङ्क्षितसंनिहितयोग्यप्रतियोग्यन्वितस्य वाचकमिति। एवं च स्मरता स्मृतमेव अन्वयभाजां पदार्थानामनन्वितमपि स्वरूपम्। न चैकपदमात्रश्रवणे वाक्यार्थावगतिरिति कश्चित् मन्यते। अभिहितान्वयवादिनोऽपि हि यावत् पदान्तरमर्थान्तरं नोपस्थापयति तावदन्वयबोधो नास्ति। अन्वयबोधकस्य पदार्थस्य पदार्थान्तरसापेक्षत्वात्, अन्वयस्य प्रतियोग्यपेक्षित्वात्। अतस्तन्मतेऽपि सर्वैः पदैः आदौ अनन्विताः स्वार्था अभिधातव्याः। पश्चात् तेभ्यः सर्वेभ्यः स्मृत्यारूढेभ्यः वाक्यार्थबोधोऽङ्गीकरणीयः। तदाहुः वार्त्तिककारमिश्राः[२] —

"तेऽपि नैवास्मृता यस्माद्वाक्यार्थं गमयन्ति नः।
तस्मात्तत्स्मरणेष्वेव संहतेषु प्रमाणता॥" इति।

अत एव तत्रभवत आचार्यस्य वाक्यलक्षणं[३] —

"संहत्यार्थमभिदधति पदानि वाक्यम्" इति।

---

[१] प्र.पं.पृ.४०१.
[२] बृहट्टीका।
[३] शा.भा.३.३.१४, भा.४.पृ.२११.

वाक्ये एकमेव पदमन्विताभिधायकम् इति मतस्य निरासः

येऽपि वादिन एवमाहुः — एकमेव पदमन्विताभिधायकमस्तु। इतराणि च पदानि अन्वयप्रतियोग्यर्थोपस्थापन एव व्याप्रियन्ताम्। न च किं तदेकं पदमित्यत्र नियामकं नास्तीति वाच्यम्। प्रथमं वा प्रधानं वा पदमिति नियमसंभवात्। अत एवाहुः[१] —

"पदमाद्यं वा वाक्यम्, प्रधानं पदं वा वाक्यम्"

इति। तान् प्रत्याह — पदजातं श्रुतं सर्वमिति। प्रथमस्यैव पदस्य यदि वाक्यता स्यात्, तदा सर्वपदार्थानां प्रथमपदार्थान्वितता स्यात्। न चायं नियमः। "अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्यत्र क्रयान्वयित्वात् आरुण्यादेः। किं च वाक्ये पदानां क्रमनियमाभावात् कदाचिदेकं प्रथमं पदं सत् अन्विताभिधायकम्, पश्चात्तदेव द्वितीयादिकं सत् न अन्विताभिधायकमित्यापद्येत। तथा प्रधानपदस्यापि वाक्यत्वमयुक्तम्। प्रधानेन सोमपदार्थेन आरुण्यादीनामनन्वयात्। आरुण्यादीनां सोमार्थत्वात् सोमयागस्य प्रधानता। क्रये एव हि आरुण्यादीनां क्रियाकारकभावेनान्वयः। क्रयद्वारेण तु तेषां सोमार्थत्वमात्रं, न तु तत्रान्वयः।

अथ यत्प्रतिपादनपरं वाक्यं तत् प्रधानमित्युच्यते। इह तु क्रय एव सर्वकर्मकरणादिकारकावच्छिन्नः प्रतिपाद्यते। तेन "क्रीणाति" इत्येतदेव प्रधानं पदम्। तदन्वयिता च सर्वेषामारुण्यादीनामिति चेत् —

अत्रोच्यते। वाक्यस्य यत्तावत् तात्पर्यं, तन्न व्यवस्थितम्। क्वचिदाख्यातपरत्वं, यथा "अग्निहोत्रं जुहोति" इति। क्वचित् गुणविधिपरत्वं, यथा "दध्ना जुहोति" इति। तेन प्रधानपदत्वस्यापि सर्वेषु पदेषु संभवात् सर्वेषामेव पदानामन्विताभिधानशक्तिराश्रयणीया। पदार्थेषु चैतत् तुल्यमेव।

नन्वेवं "गामानय" इत्यादौ सर्वशब्दानां परस्परपर्यायता स्यात्। यथा "गाम्" इत्यनेनानयनान्विताभिधानं, तथा "आनय" इत्यनेनापि गवान्विताभिधानमिति। न। द्वावेतावर्थौ यत् आनयनान्वितं गोत्वम्, गवान्वितं चानयनमिति। तेन एकैकेन एकैकस्यार्थस्याभिधानात् कुतः पर्यायता।

लाक्षणिकपदानां नान्विताभिधायिता[२]

यच्चेदं सर्वपदानामन्विताभिधायकत्वमुच्यते, तत् सर्वेषु मुख्यार्थपरेषु पदेषु। यस्मिन् वाक्ये लाक्षणिकगौणशक्तपदानां मिश्रणमस्ति, तत्र मुख्यार्थकं पदमेवा-

---

[१] वा.प.२.२.

[२] प्र.पं.पृ.४०५.

न्विताभिधायकम्, इतरत्तु पदम् अन्वयप्रतियोग्युपस्थापनमात्रपरम्। तत्र वाचकत्व-शक्त्यनवधारणात् स्वार्थस्यापि तत् तदानीमवाचकम्, अन्वयायोग्यत्वात्। किं तु स्मृतेन तच्छक्यार्थेन स्वसंबन्धि स्वसदृशं वा अन्वययोग्यं स्मार्यते, तदन्वितं स्वार्थं मुख्यार्थकपदमेवाभिधत्त इति प्रभाकरदर्शनरहस्यम्। यथा "गङ्गायां घोषः" इत्यत्र न गङ्गापदमन्विताभिधायकम्। अपि तु घोषपदमेव, गङ्गापदस्मारितप्रवाहस्मारित-तीरान्वितघोषाभिधायकं घोषपदमिति।

कथं पुनरन्विताभिधायिना अन्विते गृहीतशक्तिकेन पदेन पदार्थस्वरूपमात्रं स्मारयितुं शक्यमिति चेत् — उच्यते। अन्वयविशिष्टे विशेष्यस्य पदार्थस्वरूप-स्यापि सत्त्वात् तन्मात्रस्यापि स्मृतिर्भवितुमर्हति। तदुक्तम्[१] —

अन्वितस्याभिधानेऽपि स्वरूपं विद्यते सदा।
तेन स्वरूपमात्रेऽपि शब्दो जनयति स्मृतिम्॥

सामान्यान्विताभिधानवाद-तत्खण्डने[२]

येऽपि अन्विताभिधानवादिनः एवमाहुः — वृद्धव्यवहारात् गृहीतशक्तिकः खलु शब्दः अर्थस्य वाचकः। अन्वयव्यतिरेकाभ्यां च संबन्धावधारणम्। तौ च विशेषान्वयविषयकौ न संभवतः। क्रियापदं हि कारकसामान्यापेक्षम्, कारकपदं च क्रियासामान्यापेक्षम्। क्रियायाः कारकसामान्येन, कारकस्य च क्रियासामान्येन अन्वयव्यतिरेकौ स्तः। क्रियायाः कारकसामान्याव्यभिचारात् कारकस्य क्रिया-सामान्याव्यभिचाराच्च। विशेषेण तु व्यभिचारात्। अतः विशेषान्वयस्य पदानि नाभिधायकानि, किं तु सामान्यान्वयस्यैवाभिधायकानि इति।

तन्निराकरोति[३] —

सामान्येनान्वितं वाच्यं पदानां ये प्रचक्षते।
नियतेन विशेषेण तेषां स्यादन्वयः कथम्॥

दर्शितमिदं विशेषान्वयेऽप्याकाङ्क्षासंनिधियोग्यतात्मकोपाधिवशेन संबन्धग्रहणं सुकरमिति। तस्मात् विशेषान्वयाभिधायकतैव युक्ता पदानाम्। यदि चासौ नेष्यते तदा वाक्यार्थप्रतिपत्तिरेव नोपपद्यते। वाक्यार्थस्य विशेषान्वयरूपत्वात्।

ननु पदैः अभिहितः सामान्यान्वयः विशेषान्वयमाक्षेप्स्यति। 'निर्विशेषं न सामान्यम्' इति न्यायेन निर्विशेषस्य सामान्यस्य ज्ञातुमशक्यत्वात्। तथा चाक्षे-पादेव विशेषान्वयप्रतिपत्तिर्भविष्यतीति चेत् — उच्यते। यथा जातिर्व्यक्ति-

---

[१] प्र.पं.पृ.४०५.
[२] प्र.पं.पृ.४१२-४१४.
[३] प्र.पं.पृ.४१२.

माक्षिपन्ती प्रतिनियतं व्यक्तिविशेषं न आक्षिपति, तथा सामान्यं विशेषान्वयं विनानुपपद्यमानं कंचिद्विशेषान्वयमाक्षिपन्नपि न नियतं विशेषान्वयमाक्षेप्तुं शक्नोतीति विशेषान्वयात्मकवाक्यार्थप्रतिपत्तिरनुपपन्ना।

अथ विशेषमात्राक्षेपेऽपि आकाङ्क्षितः संनिहितो योग्यश्च यो विशेषः पदान्तरेण समर्प्यते स एव गृह्यते, तदतिक्रमे प्रमाणाभावात् इति चेत् —

सामान्यान्विताभिधानवादिनो हि मते पदानि तन्मात्र एव पर्यवसितशक्तिकानि। पदार्थानामप्यन्योन्यान्वयबोधनशक्तिर्नाङ्गीक्रियते। न च सामान्यं नियतं विशेषमाक्षेप्तुं शक्नोति। तेन आकाङ्क्षिते योग्ये च विशेषे पदान्तरेणोपस्थापितेऽपि तदन्वयबोधकप्रमाणाभावात् तदन्वयो न प्रतीयेतैव। अत आकाङ्क्षासंनिधियोग्यत्वान्यनुपयोगीन्येव। विशेषान्वयाभिधानवादिनां मते तु शक्तिग्रहं प्रति उपाधित्वेन प्रविष्टानि तानि वाक्यार्थप्रतिपत्तावुपयुज्यन्ते। विशेषान्विते शक्तेः स्वीकारात् तदन्वयबोधकप्रमाणाभाव इति दोषोऽत्र मते नास्ति।

क्रियाकारकादिवस्तुस्वभावपर्यालोचनेनैव कारकसामान्येन, क्रियासामान्येन चान्वयबोधसिद्धेः शब्दानां सामान्यान्विताभिधायकताश्रयणं वृथा।

तदयं संग्रहः[१] —

वाक्यमेकं न निर्भागं वाक्यान्त्यो वर्ण एव वा।
पदवृन्दं स्मृतिस्थं वा प्रथमं पदमेव वा॥
आख्यातपदमात्रं वा पदार्था वाप्यनन्विताः।
सामान्यान्वयबोधे वा हेतुर्वाक्यार्थबोधने॥
पदान्येव समर्थानि वाक्यार्थस्यावबोधने।
विशेषान्वयवादीनि भागशो भागशालिनः॥

अन्विताभिधानवादस्य साधकयुक्तयः[२]

(१) "गुणप्रधानभावेन लब्धान्योन्यसमन्वयान्।
पदार्थानेव वाक्यार्थान् संगिरन्ते विपश्चितः॥"[३]

अत एव च षष्ठाद्ये[४] "न पदं नाम किंचन वाक्ये, न पदार्था नाम केचन वाक्यार्थे" इत्युक्तम्। "पृथग्भूतं पदं नाम न किंचन प्रमाणमस्ति। पृथग्भूताश्च पदार्थाः न प्रमेयाः सन्तीत्यर्थः" इति च[१]।

---

[१] प्र.पं.पृ.४१३.
[२] शाब्दतरङ्गिणी.पृ.२२-३६.
[३] प्र.पं.पृ.३७७.
[४] बृ.टी.६.१.१.

व्युत्पत्तिनिरपेक्षः शब्दो नार्थमवगमयति। व्युत्पत्तिश्च वृद्धव्यवहारात्। वृद्धाश्च संसृष्टार्थविषयं वाक्यं प्रयुञ्जते। श्रोतारोऽपि संसृष्टार्थमेव बुध्यन्ते। वाक्यं च पदान्येव, नातिरिक्तम्। पदार्थ एव गुणभूतानेकपदार्थविशिष्टो वाक्यार्थः। यथा शिबिकायाः उद्यन्तारः सर्वे शिबिकामुद्यच्छन्ति, यथा वा त्रयोऽपि ग्रावाणः उखां बिभ्रति। तथा वाक्यघटकानि सर्वाणि पदानि वाक्यार्थमवगमयन्ति। इत्थं च शक्तिग्राहकप्रमाणमूर्धन्येन व्यवहारेण पदानाम् इतरान्वितार्थे शक्तिः इतरान्वितार्थानुभवजनकत्वरूपा सिध्यति। इयमेव पदानामानुभाविकी शक्तिः।

(२) "प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम्॥"

"प्रथमभावीनि पदान्यतिलङ्घ्य" इत्यादि[२]।

पदानां प्रथमश्रुतानां वाक्यार्थबोधनशक्तिः। न तु अनन्तरमवगम्यमानानां पदार्थानाम्।

(३) पदार्थाः वाक्यार्थमवगमयन्तीति वादिभिरपि पदानामभिधानशक्तिः संप्रतिपन्ना। तस्याः अन्वयपर्यन्ततामात्रं कल्पनीयमस्माभिः। पदार्थानां वाक्यार्थावगमशक्तिरेव तैः कल्पनीया। तस्मात् 'धर्मिकल्पनातो वरं धर्मकल्पना' इति न्यायात् पदार्थेषु शक्तिरूपधर्मिकल्पनापेक्षया क्लृप्तायाः पदनिष्ठाभिधानशक्तेः अन्वयपर्यन्तताकल्पनमेवोचितम्।

(४) यदि पदानि घटादिस्वरूपविषयिणीं बुद्धिं जनयेयुः तदा पदानामभिधायकता हीयेत। पदार्थबुद्धेः उद्बुद्धसंस्कारजन्यत्वेन स्मृतित्वात्। तस्मात् पूर्वानधिगतान्वितार्थबोधजनकत्वाभ्युपगम एव पदानामभिधायकता सिध्यतीति पदानामभिधातृत्वम् उपगच्छता अवश्यमन्विताभिधायकता स्वीकरणीया।

(५) वाक्यस्य वाक्यार्थप्रतिपत्तौ तात्पर्यमावश्यकम्। अन्यथा वाक्यार्थस्य शाब्दत्वमेव न स्यात्। परम्परया शब्दावगतपदार्थजन्यज्ञानविषयत्वेन शब्दप्रयोज्यत्वात् यदि वाक्यार्थस्य शाब्दत्वमिष्यते, तदा शब्दग्राहकश्रोत्रस्यापि वाक्यार्थबुद्धिप्रयोजकत्वात् वाक्यार्थस्य श्रौत्रत्वमपि स्यात्। तथा च वाक्यार्थप्रतिपत्तितात्पर्यवत्त्वस्वीकारे पदानां साक्षाद्वाक्यार्थबोधजनकत्वशक्तिरेवोचिता। तदुक्तं प्रकरणपञ्चिकायां[३] —

"प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम्॥" इति।

---

[१] प्र.पं.पृ.३७८.
[२] प्र.पं.पृ.४००.
[३] प्र.पं.पृ.४००.

(६) सामान्यतः अन्वये पदानां शक्त्यस्वीकारे एकपदश्रवणानन्तरम् एतत्पदार्थस्य केनान्वय इति विशेषजिज्ञासा न स्यात्। अन्वयविशेषजिज्ञासां प्रति अन्वयसामान्यज्ञानस्य कारणत्वात्, तस्य शब्दादन्यतोऽसंभवात्।

(७) प्रमेये प्रमाणस्य संबन्धोऽपेक्षितः। प्रमाणानां स्वप्रमेयसंबद्धानामेव प्रमेयावभासकत्वात्। तस्मात् वाक्यार्थे प्रमेये शब्दरूपप्रमाणस्य संबन्धः अनुभावकत्वरूपः आवश्यक इति अन्वित एव पदानां शक्तिः सिध्यति।

अस्मिन्मते बाधकयुक्तीनां समाधानप्रकारः

(१) प्रश्नः — गुरूणां मते न सर्वत्र विशिष्टज्ञानपूर्वको व्यवहारः। अख्यातिवादिभिस्तैः "इदं रजतम्" इति भ्रमस्थले अन्यथाख्यातिभीत्या इदंविशेष्यकरजतत्वप्रकारकज्ञानास्वीकारेण इष्टरजतभेदाग्रहेणैव व्यवहारसमर्थनात्। एवं च व्यवहारेण न तत्कारणतया संसृष्टार्थज्ञानमनुमातुं शक्यते इति कथं व्यवहारात् संसृष्टार्थे शक्तिग्रहः।

समाधानम् — विसंवादिप्रवृत्तावेव इष्टभेदाग्रहणं कारणम्। संवादिप्रवृत्तौ संसृष्टार्थज्ञानमेव कारणम्। मध्यमवृद्धप्रवृत्तिश्च संवादिनीति तया संसृष्टार्थज्ञानमनुमातुं शक्यत एव।

(२) प्रश्नः — वस्तुतो वह्निमति देशे धूमरहिते परिदृश्यमानं बाष्पं धूमं मत्वा वह्निमनुमाय वह्न्यर्थी तत्र प्रवर्तमानो न विसंवदते। तत्र पर्वते न धूमवैशिष्ट्यज्ञानम्, भ्रमस्वीकारापत्तेः। किं तु धूमासंसर्गाग्रहणमेव। तथा च संवादिप्रवृत्तिरपि अग्रहणनिबन्धना दृष्टेति व्यभिचारस्तदवस्थः।

समाधानम् — तत्र हि पुरोवर्तिदेशे वह्निमनुमायैव प्रवर्तते। वह्न्यनुमितिश्च प्रमात्मिकैव, पुरोवर्तिदेशे वह्निसंबन्धस्य अबाधितत्वात्। तथा च तत्रत्यायाः संवादिप्रवृत्तेः संसृष्टत्वज्ञानात्मकानुमितिजन्यत्वात् न व्यभिचारः।

(३) प्रश्नः — अभिहितान्वयवादे पदानां पदार्थाभिधानशक्तिः, पदार्थानां वाक्यार्थावगमशक्तिः, पदानां पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिरिति शक्तित्रयकल्पनवत्, अन्विताभिधानवादेऽपि पदानां स्वार्थस्मारकशक्तिः, तेषामेवान्वितानुभवजननशक्तिः, एकस्मृत्यारूढानामेव सर्वेषां पदानामन्वितानुभवजनकत्वेन पदगतान्विताभिधानशक्तिः तावत्पदविषयकस्मरण इति शक्तित्रयकल्पनम् अस्त्येवेति न लाघवावसरः।

समाधानम् — अभिहितान्वयवादिनोऽपि यावत् पदान्तरमर्थान्तरं नोपस्थापयति तावत् अन्वयावगमो नास्ति। अन्वयावबोधजनकस्य पदार्थस्य पदार्थान्त-

रापेक्षणात्, अन्वयस्य प्रतियोगिसापेक्षत्वात्। एवं च तन्मतेऽपि सर्वैः पदैः अनन्वितस्वार्था अभिधीयन्ते। ततः तावत्पदार्थविषयकस्मरणं जायते। एकस्मृत्यारूढेभ्यः सर्वेभ्यः पदाभिहितेभ्यः पदार्थेभ्यः वाक्यार्थप्रतिपत्तिः अङ्गीकरणीया। तथा च वार्त्तिकं[१] —

"तेऽपि नैवास्मृता यस्मात् वाक्यार्थं गमयन्ति नः।
तस्मात्तत्स्मरणेष्वेव संहतेषु प्रमाणता॥" इति।

तेऽपि = पदार्था अपि। तथा च पदे

(१) स्वार्थाभिधानशक्तिः,

(२) स्वार्थस्मरणशक्तिः,

(३) पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिः,

(४) पदार्थे वाक्यार्थावगमशक्तिः,

(५) एकस्मृत्यारूढानामेव पदार्थानामन्वयबोधकत्वात् तावत्पदार्थविषयकस्मरणे पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिः

इति शक्तिपञ्चकमभिहितान्वयवादे कल्पनीयम्। अन्विताभिधानवादे तु शङ्कितदिशा शक्तित्रयमेव कल्पनीयमिति लाघवम्।

अत एव तत्रभवत आचार्यस्य[२] वाक्यलक्षणं "संहत्यार्थमभिदधति पदानि वाक्यम्" इति।

(४) प्रश्नः — [३]पदेषु पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिः, पदार्थेषु वाक्यार्थावगमशक्तिश्च न कल्पनीया। पदगन्धं विनापि केवलं पदार्थैः वाक्यार्थावगमदर्शनेन पदार्थेषु वाक्यार्थावगमशक्तेः सिद्धत्वात्। पदाभिहितैरेव पदार्थैः अन्वयोऽवगम्यत इति नियमाभावात् पदेषु पदार्थगतशक्त्याधानशक्तिश्च न कल्पनीया। तथा हि — अनवधारिताश्रयविशेषस्य प्रत्यक्षदृष्टस्य श्वैत्यस्य, हेषाशब्दानुमितस्याश्वस्य अनवगतगुणविशेषस्य, पदनिक्षेपशब्दानुमितस्य अज्ञातकर्तृविशेषस्य धावनस्य चार्थस्य "श्वेतोऽश्वो धावति" इति वाक्यार्थावगमकत्वदर्शनात्। काव्यरचनाहेतुभूतवाक्यार्थावगमं प्रति चिन्तोपनीतपदार्थेषु कारणत्वस्य दर्शनात् पदार्थानां संसर्गयोग्यत्वेन संसर्गावगमसामर्थ्यस्य क्लृप्तत्वादिति चेत् —

---

[१] बृहट्टीका।
[२] शा.भा.३.३.१४, भा.४.पृ.२११.
[३] प्र.पं.पृ.३९२.

समाधानम्[१] — न तावत् पदं विना पदार्थमात्रेण "श्वेतोऽश्वो धावति" इति वाक्यार्थधीः भवितुमर्हति। तत्र यदि श्वैत्याधिकरणे हेषाध्वनिः खुरनिक्षेपशब्दश्चावगतः, तदानुमानेनैवाश्वप्रतीतिः "श्वेतोऽयमश्वः, हेषाशब्दवत्त्वात्" इति। यदि श्वैत्यं हेषाशब्दः खुरनिक्षेपशब्दश्च स्वरूपत एवावसिताः, न तेषां सामानाधिकरण्यमवगतं, तदा तत्र स्थले अश्वातिरिक्तद्रव्यस्य अभावनिश्चये देवदत्तस्य जीवतः गृहाभावज्ञानात् बहिस्सत्त्वज्ञानमिव अर्थापत्तिप्रमाणजन्या "श्वेतोऽश्वो धावति" इति प्रतीतिः।

यदि च द्रव्यान्तराभावनिश्चयो न जातः, तदा नोदेत्येव तादृशधीः।

किं च "श्वेतोऽश्वो धावति" इति धीः यदि पदार्थसामर्थ्यादेव जायते, तदा अस्य कस्मिन् प्रमाणेऽन्तर्भावः? न तावच्छब्दे। शब्दस्यैवाभावात्। नापि प्रमाणान्तरम्, प्रमाणपरिगणनावसरे भाष्यकारादिभिरनुक्तत्वात्। तथा सत्यपि प्रमाणान्तरत्वे शब्दावगतपदार्थस्थलेऽपि शब्दप्रामाण्यविलोपप्रसङ्गात्।

अपि च नायमवगमः शाब्दः। तदनन्तरं "धावन्तं श्वेतमश्वं शृणोमि" इति वा "शाब्दयामि" इति वा अनुव्यवसायाभावात्। न हि वस्तुसंसर्गावगाहि ज्ञानं सर्वं शाब्दमिति वक्तुं युक्तम्।

काव्यरचनाहेतुभूतमपि पदार्थसंसर्गज्ञानं मानसमेव भवति, न पुनः शाब्दरूपमिति न पदार्थस्य वाक्यार्थावगमसामर्थ्यं क्लृप्तमिति वक्तुं शक्यते।

यदपि पदार्थानामन्वयार्हत्वात् अन्वयावगमसामर्थ्यं क्लृप्तमिति। तन्न बुध्यामहे। पर्वतस्य वह्नेश्च संबन्धयोग्यत्वात् वह्निपर्वतयोः संसर्गावगाहिन्यां "पर्वतो वह्निमान्" इत्याकारिकायामनुमितौ पर्वतस्य वह्नेश्च कारणत्वं न हि कश्चित् उपैति।

(५) प्रश्नः[२] — "को गच्छति", "राजा गच्छति" इत्यादौ, कविकृतस्वभाववर्णनादौ च पदार्थानामन्वयबोधजननसामर्थ्यं क्लृप्तम्। न हि तत्र पदानामन्वितानुभावकता संभवति, कार्यतावाचकलिङाद्यभावेन कार्यान्वितार्थबोधजनकत्वस्यासंभवात्।

समाधानम् — शक्तिग्राहकप्रमाणमूर्धन्येन व्यवहारेण कार्यान्वित एवार्थे पदानां शक्तेर्निश्चयात् उपजीव्यविरोधेन कार्यांशस्यात्यागात् कार्यान्वितार्थविषयक एव सर्वत्र वाक्यार्थबोधः। यत्र कार्यतावाचि पदं न श्रूयते तत्रापि लिङादिपदमध्याहृत्यैव बोधः। "चैत्र पुत्रस्ते जातः" इत्यत्र "तं पश्य" इत्यध्याहारेणान्वय-

---

[१] प्र.पं.पृ.३९३.
[२] शा.त.पृ.२७.

बोधः। "जातो मृतश्च" इत्यत्र "तं पश्य" इत्यध्याहारासंभवेऽपि "जानीहि" इति योग्यक्रियाध्याहारः संभवति।

अतश्च उक्तस्थलेष्वपि "जानीहि" इत्यादियोग्यक्रियाध्याहारेण कार्यान्वितार्थानुभवस्यैव उपगमात् तत्र पदानामेव सामर्थ्यं, न पदार्थानाम्।

(६) प्रश्नः[१] — अन्वयवान् अन्वित उच्यते। अन्वयो विशेषणम्, तद्वान् विशेष्यः। एवं चान्विते शक्तिरित्युक्तौ विशेषणे विशेष्ये चोभयत्र शक्तिरवर्जनीयेति गौरवम्।

समाधानम् — अन्वयवत्तैवान्वितत्वम्। नान्वयमन्तरेणान्वितत्वस्य पृथगात्मलाभः। यथा घटमन्तरेण पटः पृथगवतिष्ठते न तथान्वयमन्तरेणान्वितत्वं पृथगवतिष्ठते। तस्मात् अन्वयमन्तरेणान्वितत्वस्य प्रत्येतुमशक्यत्वात् अन्वयप्रतीतौ च तत्प्रतीतेः एकैव शक्तिरन्वयपर्यन्ता। यथा जातिशक्तात् पदात् जातौ प्रतीयमानायां व्यक्तिरपि भासते, व्यक्तिं विना जातेरप्रतीतेः। जातिर्हि व्यक्तेराकारः, न ह्याकारिणं विना आकारस्य प्रतीतिः संभवति।

तदाहुः[२] —

"अन्वितेषु पदैरेव बोध्यमानेषु शक्तिभिः।
अन्वयोऽर्थगृहीतत्वान्नान्यां शक्तिमपेक्षते॥
प्रतीयन्नन्वयं यस्मात् प्रतीयादन्वितं पुमान्।
व्यक्तिं जातिमिवार्थोऽसाविति संपरिकीर्त्यते॥" इति।

किं च नैयायिकैः घटपदस्य घटत्वविशिष्टे शक्तिः स्वीक्रियते। घटत्वतदाश्रयतद्वैशिष्ट्येषु त्रिषु एका शक्तिरिति विवृण्वन्ति ते। तथैवान्वयविशिष्टे शक्तिस्वीकारे अन्वये पृथक् शक्तिर्नावश्यकी।

(७) प्रश्नः — यत्र पदस्यैकोऽर्थः तत्र शक्तिकल्पनासाम्येऽपि यत्र त्रयाणां पाणिहस्तकरशब्दानामेकोऽर्थः, तत्राभिहितान्वयवादे त्रयाणां शब्दानां कररूपार्थे तिस्रः शक्तयः, अर्थस्यैकस्य वाक्यार्थावगमशक्तिरिति चतस्रः शक्तयः कल्पनीयाः। अन्विताभिधानवादे तु त्रयाणां पदानाम् अन्वितस्वार्थे अन्वये च पृथक् शक्तिद्वयमिति षट् शक्तयः कल्पनीया इति गौरवम्।

समाधानम् — अन्विते एकस्या एव शक्तेः स्थापितत्वेन अन्वयांशे पृथक् शक्तेः अकल्पनात् त्रयाणां पदानामन्वितार्थे तिस्र एव शक्तयः कल्पनीया इत्यन्विताभिधानवादे लाघवस्यैव स्फुटं प्रतीतेः।

---

[१] शा.त.पृ.२९.
[२] प्र.पं.पृ.४१०.

(८) प्रश्नः — अन्विताभिधानं नोपपद्यते। अन्वयप्रतियोगिनामानन्त्यात् अन्वयस्य अप्यानन्त्यम्। ततश्चान्वितानामप्यानन्त्यात् तेषु पदानां संबन्धग्रहणमेव दुःशकम्। सामान्यतः अन्विताभिधानं तु नाशङ्कितुं शक्यम्। वाक्यात् विशेषान्वयस्यैवावगमात्।

किं च पदं किं पदान्तरानभिहितेनान्वितमर्थमभिधत्ते, उत पदान्तराभिहितार्थेन अन्वितमर्थम्। आद्ये पदान्तरवैयर्थ्यम्। एकेनैव पदेन सर्वान्वयप्रतीतिसंभवात्। द्वितीयेऽन्योन्याश्रयः। प्रथमपदमन्वितस्वार्थाभिधानाय द्वितीयपदकर्तृकमभिधानमपेक्षते। द्वितीयपदमप्यन्वितस्वार्थाभिधानाय प्रथमपदकर्तृकाभिधानमपेक्षते।

किं च सर्वेषां पदानामितरान्वितवाचकत्वे पदभेदेन वाक्यार्थभेदात् सर्वत्र वाक्यभेदापत्तिः।

समाधानम् — आकाङ्क्षा-संनिधि-योग्यत्वानां व्युत्पत्तावुपलक्षणत्वमङ्गीक्रियते। आकाङ्क्षितं संनिहितं योग्यं च यत् पदार्थान्तरं तदन्विते शक्तिग्रहः संभवति। अन्वयप्रतियोगिजिज्ञासा आकाङ्क्षा। संनिधिः न शब्देनैवेति निर्बन्धः। अध्याहृतेनाप्यन्विताभिधानसंभवात्। अन्विताभिधानानुपपत्तिवशात् खलु अध्याहारः। सा चानुपपत्तिः योग्यार्थोपस्थापनेन शान्तेति न शब्दकल्पनायां प्रमाणमस्ति। अत एव "घटेन जलमाहर" इत्यत्र छिद्रेतरत्वस्यापि शाब्दबोधे भानं स्वीक्रियते। योग्यत्वं संबन्धार्हत्वम्। यस्य योग्यत्वमवधारितं तेनान्वयः। अत एव "वह्निना सिञ्चति" इत्यत्र वह्निकरणकत्वस्य सेके नान्वयः। तदुक्तम्[१] —

"आकाङ्क्षासंनिधिप्राप्तयोग्यार्थान्तरसंगतान्।
स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता यदि॥
आनन्त्यव्यभिचाराभ्यां तदा दोषो न कश्चन।" इति।

किं च एकं पदं नान्विताभिधायकम्। प्रतियोगिनः अनुपस्थापनात्। संहतानि पदानि अन्विताभिधायकानि। अतः पदश्रवणे प्रथमम् अनन्वितस्वार्थस्मरणं जायते। न च व्यवहारेण संसृष्टे एव शक्तिग्रहात् संसृष्टस्यैव स्मरणं स्यान्न केवलस्यार्थस्येति वाच्यम्। अन्वितार्थे अनन्वितांशस्यापि सत्त्वात् तत्स्मरणोपपत्तेः। विशिष्टानुभवेनापि क्वचित् कारणवशात् विशेष्यमात्रस्मरणं बहुलं लोके दृश्यते। अभ्यासातिशयः संस्कारातिशयमाधत्ते। स च झटित्येवोद्बुद्धः स्फुटतरं स्मरणं जनयति। गवादिपदस्य गोत्वादिना साहचर्यानुभवः यथाभ्यासवान्, न तथार्थान्तरेण साहचर्यानुभवोऽभ्यासवान् दृश्यते। तथा चाभ्यासातिशयप्रयुक्तसंस्कारातिशयरूपकारणवशात् स्वार्थस्वरूपमात्रस्मरणमुपपद्यते। स्वार्थेन सह

[१] प्र.पं.पृ.३८४.

पदस्य स्वार्थान्वयानुभावकत्वं स्मरणप्रयोजको मूलभूतः संबन्ध इति ब्रह्मानन्दीये बृहन्मञ्जूषायां चोक्तम्।

एवं च एकैकपदश्रवणानन्तरमनन्विततत्तदर्थस्मरणे सति एकस्मृत्यारूढेभ्यः पदेभ्यः आकाङ्क्षितयोग्यसंनिहितार्थान्तरान्वितार्थप्रतीतिर्जायत इति नान्योन्याश्रयः। तदुक्तं[१] —

"स्मृतिसंनिहितैरेवमर्थैरन्वितमात्मनः।
अर्थमाह पदं सर्वमिति नान्योन्यसंश्रयः॥" इति।

नापि वाक्यभेदः, घटकर्मकानयनरूपस्यैकस्यैव वाक्यार्थस्य बोधात्।

नाप्यन्वितानन्त्यप्रयुक्तशक्त्यानन्त्यम्। यथा चक्षुः एकयैव घटपटादिगोचरया दर्शनशक्त्या प्रतियोगिभेदभिन्नतत्तद्दर्शनाख्यकार्यभेदहेतुः, तथा शब्दोऽप्येकयैव आकाङ्क्षितयोग्यसंनिहितगोचरया शक्त्या तत्तत्प्रतियोगिबोधाख्यकार्यभेदे हेतुः।

(९) प्रश्नः[२] — "पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्था अवगताः सन्तः वाक्यार्थमवगमयन्ति" इति शाबरं भाष्यं[३] पदार्थानां वाक्यार्थावगमसामर्थ्यप्रतिपादकं कथं संगच्छते?

समाधानम् — पदानामन्विताभिधायित्वे अन्वयस्य प्रतीतये अन्वये शक्त्यन्तरं पदानां कल्पनीयम् इति शङ्काया उत्तररूपेण भाष्यमिदं प्रवृत्तम्। गवादिपदानां गोत्वादिजातिः शक्या। जातिश्च व्यक्तिमन्तरा दुर्निरूपा। अतः शब्देन प्रतीयमाना जातिः व्यक्त्या सहैव प्रतीयते। शब्दस्य जातिप्रत्यायकत्वं स्वाभाविकं, तन्निमित्तकं व्यक्तिप्रत्यायकत्वमिति जातिप्रत्ययः व्यक्तिप्रत्ययस्य निमित्तमिति व्यवह्रियते। न तु शब्देन प्रथमं जातिप्रत्ययः, तदनन्तरं व्यक्तिप्रत्यय इति। तथा अन्विताभिधायिना पदेन अन्वयं विना अन्वितबोधनासंभवात् अन्वयो बोध्यते। स चान्वयः अन्वितार्थनिमित्तक इत्युच्यते। न तु अन्वितबोधानन्तरमन्वयावगमः।

भाष्ये वाक्यार्थपदेन अन्वयो विवक्षितः। अर्थशब्देनान्वितार्थो विवक्षितः। तथा च पदानि अन्वितमर्थमभिधाय निवृत्तव्यापाराणि भवन्ति, नान्वयं पृथक् अभिदधति। अथेदानीं पदार्थाः = अन्वितार्थाः, अवगताः सन्तः वाक्यार्थम् = अन्वयम्, अवगमयन्ति। अन्विता अन्वयमवगमयन्ति, पदानामन्वितप्रतिपादकत्वनिमित्तकमन्वयप्रतिपादकत्वमिति भाष्यस्य पर्यवसितोऽर्थः।

---

[१] प्र.पं.पृ.४०६.
[२] शा.त.पृ.३६.
[३] शा.भा.१.१.७.२५.

अन्वये पृथक्शक्त्यनङ्गीकारकथनेन पृथक्शक्तिस्वीकारशङ्का परिहृता भवति। पदानामन्विताभिधायित्वस्य युक्तिभिः व्यवस्थापितत्वेनेयमेव व्याख्या शोभते।

"...अर्थस्य तन्निमित्तत्वात्" इति सूत्रमपि[1] अर्थस्य अन्वितस्य अन्वयरूप-वाक्यार्थं प्रति निमित्तत्वं निरुक्तसरण्या प्रतिपादयति। तत् सिद्धं[2] —

"यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवाभिधीयते॥" इति।

न्यायरत्नमालानुसारेण अन्विताभिधानवादपरिशीलनपूर्वकमभिहिता-न्वयवादोपस्थापनम्

अथ पार्थसारथिमिश्रैः न्यायरत्नमालायां वाक्यार्थनिर्णयप्रकरणे यथा वादद्वयं निरूपितं तथात्र संगृह्यते।

अन्विताभिधानवादः[3]

तत्र टीकाकारस्तावदाह —

"पदार्थानेव वाक्यार्थं मिथःसंगतिशालिनः।
आचक्षतेऽभिधीयन्ते पदैस्ते च तथाविधाः॥"

इति। परस्परान्विताः पदार्था एव वाक्यार्थ इत्युच्यन्ते। ते च तथाभूताः = अन्विता एव स्वपदैरभिधीयन्ते। तेन पदमेव वाक्यार्थस्य प्रमाणम्। न चार्थ-स्वरूपमेव पदाभिधेयं नान्वितमिति वाच्यम्।

पदानामन्विते शक्तिग्रहः

पदानन्तरजाता हि संविदन्वितगोचरा।
अन्वितार्थाभिधायित्वं पदानामुपकल्पयेत्॥

विशिष्टार्थविषयकवाक्यजनितेन ज्ञानेन प्रवर्तमानस्य मध्यमवृद्धस्य विशिष्ट-वाक्यार्थविषयिण्येव संविदनुमीयते व्युत्पित्सुना। तदनन्तरं विशिष्ट एव वाचकत्व-शक्तिः निश्चीयते। सा च संवित् पदश्रवणानन्तरं जायमानत्वात् पदकारणिकैवेति निश्चीयते। यद्यपि च पदसंघातश्रवणानन्तरं विशिष्टज्ञानं जायत इति पदसंघा-तात्मकवाक्यमेव वाक्यार्थवाचकं युक्तम्, तथापि संघातस्य वाक्यार्थाभिधायकत्वे दोषसद्भावात् प्रथमावगतमन्वितवाचकत्वमावापोद्वापाभ्यां वाक्यार्थैकदेशान् प्रति

---

[1] जै.सू.१.१.७.२५.
[2] प्र.पं.पृ.३८४.
[3] न्या.र.मा.पृ.९९.

वाक्यैकदेशानां पदानां वाचकत्वमवसीयते। "गामानय", "अश्वमानय" इत्यादौ गवादिपदावापे गवादिपदार्थावापात्, तदुद्वापे चोद्वापात्, वाक्यभागानामेव वाक्यार्थभागवाचकत्वावगमात् न संघातस्य वाचकत्वं वाच्यत्वं वा संभवति। व्यभिचारात् = एकस्मिन् वाक्ये पदान्तरप्रक्षेपे सति तद्वाक्यस्य पूर्ववाक्यार्थातिपातरूपात्। संबन्धग्रहणासंभवाच्च। वाक्यानां वाक्यार्थानां चानन्त्यात् न संगतिग्रहः संभवति।

अन्वितानामनन्तानामेकपदाभिधेयत्वनिरूपणम्

ननु अन्विताभिधानपक्षेऽपि कथमनन्तानां वाक्यार्थानामेकपदाभिधेयत्वम्। अन्विताभिधायि हि पदम्। अन्यच्च गवान्वितादानयनात् अश्वान्वितमानयनम्। तत् कथमत्र संबन्धग्रहणमव्यभिचारो वा?।

उच्यते —

संनिध्यपेक्षायोग्यत्वैः उपलक्षणलाभतः।
आनन्त्येऽप्यन्वितानां स्यात् संबन्धग्रहणं मम॥

आकाङ्क्षितं संनिहितं योग्यं च यत् अर्थान्तरं तेनान्वितं स्वार्थमभिदधति पदानीति आकाङ्क्षायोग्यतासंनिधिमत्त्वरूपसामान्याकारेणानन्तानामपि वाच्यत्वं सुज्ञानमेव। अश्वाद्यर्थविशेषविवक्षायां हि गोपदस्यानन्तार्थत्वम्। व्यभिचारोऽपि नास्ति, आकाङ्क्षाद्युपलक्षणरहितस्थले प्रयोगप्रतिपत्त्योरसंभवात्।

वाक्यशक्तिवादनिराकरणम्

ननु पदसंघातरूपवाक्यस्याप्यनेनैव प्रकारेण वाक्यार्थे संबन्धग्रहणं सुलभम्। तत्पदसंघातस्तदर्थसंघातस्याभिधायक[१] इति न कश्चिद्विशेष इति चेत् —

मैवम्। वाक्यशक्तिवादे हि शक्तिकल्पनागौरवम्। अल्पैरेव पदैः आवापोद्वापभेदेन बहूनि वाक्यानि रच्यन्ते। यथा — "गामानय", "गां बधान", "गां मुञ्च", "अश्वमानय", "अश्वं बधान", "अश्वं मुञ्च" इत्यादिषु अल्पैरेव पदैः बहुवाक्यविरचनात् वाक्यस्यैव वाचकत्वाङ्गीकारे अनेकवाक्येषु अनेकशक्तयः कल्पनीयाः स्युः।

स्वरूपमात्राभिधायकत्वे लाघवमिति शङ्कायाः समाधानम्

ननु अन्विताभिधायकत्वापेक्षया स्वरूपमात्राभिधायकत्वं लाघवादाश्रयितुं युक्तमिति चेन्न। वाक्यार्थप्रतीतेः निर्मूलत्वप्रसङ्गात्। न च स्वरूपेणैवाभिहिताः पदार्थाः परस्परव्यतिषक्तमात्मानं प्रतिपादयन्तीति वाच्यम्। अदर्शनात्। न हि प्रत्यक्षादि-

---

[१] आकाङ्क्षितयोग्यसंनिहितपदान्तरसहितं गोपदं तादृशार्थान्तरान्विते स्वार्थे व्युत्पन्नं तादृशमर्थं वक्तुं शक्तम् इत्यर्थः।

प्रमाणान्तरावगताः पदार्थाः आकाङ्क्षादिमन्तोऽपि व्यतिषङ्गप्रतिपादका दृश्यन्ते। न हि देवदत्तमुपलभ्य कोऽस्य पिता इति आकाङ्क्षन् संनिहितं योग्यमपि यज्ञदत्तं सहसैवाध्यवस्यति पितरम्। अथ अन्यत्राविदितमपि शब्दप्रतीतानामेवार्थानाम् अन्वितप्रतिपत्तिकारणत्वं कल्प्यत इति ते मतम्, तदा शक्तित्रयकल्पना प्रसज्यते। पदानां पदार्थाभिधानशक्तिः, पदार्थानां चान्वितप्रतिपादनशक्तिः, पदानां च पुनः पदार्थगततच्छक्त्याधायकत्वशक्तिश्चेति। मन्मते तु अन्वितपर्यन्ता एकैव शक्तिः कल्प्यत इति लाघवम्।

अन्विताभिधानपक्षे वाक्यार्थस्य शाब्दत्वम्

अपि च पदार्थापेक्षया प्रथमावगतानामभ्युपेततात्पर्याणां च पदानामेवान्विताभिधायकत्वं युक्तमङ्गीकर्तुम्। एवं च शाब्दत्वमपि वाक्यार्थस्य समञ्जसं भविष्यति।

ननु शाब्दत्वं वाक्यार्थस्य न घटते, पदार्था एव वाक्यार्थाक्षेपकतया तत्र प्रमाणं स्युः। सर्वकारकान्वययोग्यं सामान्यम् आनयनं हि आनयपदार्थः। सामान्यं च नान्तरेण विशेषमात्मानं लभत इति तद्विशेषमाक्षिपति। विशेष एव च वाक्यार्थ इत्युच्यते। अन्वितता चास्यावस्थाविशेष इति पदार्थ एव वाक्यार्थे प्रमाणम् इति।

नैतद्युक्तम्। गोपदप्रतिपादितस्य सामान्यस्य अस्ति कश्चिद्विशेष इति यत्किंचिद्विशेषाक्षेप एव शक्तिः, न तु नियतविशेषाक्षेपे। पदान्तरोपस्थापितविशेषाक्षेपे तु शाब्दत्वप्रसङ्गः। मन्मते तु आकाङ्क्षाद्युपलक्षणशालिनैवार्थान्तरेण अन्वितं पदस्याभिधेयमिति गवान्वितानयनविशेषप्रतीतिः युज्यते। गौर्हि स्वपदेन संनिहितः, नार्थान्तरम् इति नियतावगतिसिद्धिः।

अन्विताभिधानपक्षे अन्योन्याश्रयपरिहारः

ननु यदि शब्दतः संनिहितेनार्थान्तरेणान्वितं स्वार्थमभिधत्ते तदा अन्योन्याश्रयः, गोपदस्य आनयत्यभिहितार्थान्विताथाभिधायकत्वे, आनयतिपदस्य गोपदाभिहितार्थान्वितार्थाभिधायकत्वे च, गोपदेन स्वार्थाभिधानं प्रति आनयतिना स्वार्थाभिधानस्य अपेक्षा, आनयतिना स्वार्थाभिधानं प्रति गोपदेन स्वार्थाभिधानस्य अपेक्षेति।

अत्रोच्यते। पदानि हि श्रुतानि प्रथमतः पदार्थस्वरूपमात्रं स्मारयन्ति। ततः स्मारितार्थान्वितस्वार्थमभिदधतीति स्वीकारात् नान्योन्याश्रयः।

अन्विताभिधानखण्डनम्[१]

पदानामन्विताभिधायित्वे हि अवश्यमेव विशेषणीभूतोऽन्वयोऽपि पदैरभिधातव्यः। अन्यथा अन्वयविशिष्टविषयकप्रतीतेरुत्पत्त्ययोगात्। ततश्च पदानामन्वयेऽन्विते च शक्तिरिति शक्तिद्वयं कल्पनीयमिति गौरवम्।

न च न पृथगन्वये शक्तिः कल्प्यते। किं तु एकैव शक्तिरन्वयविशिष्टे इति वाच्यम्। एकयैव शक्त्या अन्वयान्वितयोरुभयोः अभिधेयत्वासंभवात्।

यद्यपि विशिष्टरूपोऽर्थ एक एव। तथापि विशिष्टात् विशेषणमन्यदेव। तस्मिन् विशेषणेऽगृहीते तेन विशिष्टं विशेष्यं ग्रहीतुं न शक्यते। न च विशेषणस्यान्वयस्य ग्राहकं प्रमाणान्तरमस्तीति शब्देनैव तदभिधानपुरस्सरं विशिष्टमभिधातव्यमिति शक्तिद्वयकल्पनात् गौरवं स्यात्। तस्मात् पदार्थस्वरूपमात्रमभिधातव्यमिति युक्तम्। न चैवं वाक्यार्थप्रतीत्यनुपपत्तिरिति वाच्यम्। सर्वावस्थानां सामान्यात्मके पदार्थस्वरूपे पदेनाभिहिते सति पदार्थस्वरूपादेव आक्षेपतः अन्वितरूपावस्थाविशेषप्रतीतिसिद्धेः नान्वितावस्थापर्यन्ता अभिधानशक्तिः कल्पयितुं शक्यते।

यच्चैवं सति "गौरानीयताम्" इत्यत्र कारकेण क्रियासामान्यस्य क्रियया च कारकसामान्यस्याक्षेपात्, न नियमेन गौः आनयनेन, आनयनं च गवा अन्वयं लभेतेत्युक्तम्। तत्र दोषोऽयमन्वयस्याभिधानिकत्वपक्षेऽपि समानः। प्रमाणान्तरेण क्रियान्तरे स्थित्यादिके कारकान्तरे च अश्वादिके संनिहिते सति "गौरानीयताम्" इत्येतत् पदद्वयमुच्चारितं संनिध्यपेक्षायोग्यत्वानामविशेषात् स्थित्यन्वितां गाम्, अश्वान्वितं चानयनम् अभिदध्यादिति न नियमेन गवानयनान्वयसिद्धिः इति।

अभिहितान्वयपक्षे एकवाक्यत्वोपपादनम्

तत्र यदुक्तं — तथा सत्येकवाक्यत्वं बाध्येत। यावन्ति हि पदानि संहत्य प्रयुज्यन्ते, तावतां सति संभवे संहत्य एकविशिष्टार्थप्रतिपत्तिपरत्वं लोके दृष्टम्। तच्च श्रुतयोरेवान्वये निर्वहति। अन्यथा बाध्येतेति।

तत् पदार्थेऽपि समानम्। यद्यपि गोपदार्थेन क्रियामात्रान्वयः आक्षिप्यते, आनयत्यर्थेनापि कारकमात्रान्वयः, तथापि तत्प्रतिपादकयोः पदयोः एकविशिष्टार्थप्रतीतिजनकत्वलक्षणैकवाक्यत्वावगमात् तदबाधनार्थं श्रुतयोरेव परस्परमन्वयनियम इति। तथा च सामान्याक्षेपः पदार्थसामर्थ्यलभ्यः, विशेषनियमस्तु एकवाक्यताधीनः।

---

[१] न्या.र.मा.पृ.१०३.

सामान्यस्य पदार्थत्वं, विशेषस्य वाक्यार्थत्वम्

यत एव चायं विशेषनियमः पदान्तरसमभिव्याहाररूपाद्वाक्यादेव सिध्यति, न पदार्थसामर्थ्यमात्रात्, अत एव शब्दस्य प्रमाणान्तरत्वम्। अन्यथा शब्दोऽनुमानं स्यात्।

अतश्च पदार्थसामान्यस्य सर्वान्वयार्हत्वात् पदार्थसामान्यस्य अन्वयविशेषव्याप्तौ अविद्यमानायामपि परस्परसमभिव्याहाररूपाद्वाक्यादेव संसर्गविशेषरूपवाक्यार्थसिद्धिः। अत एव "सामान्यं पदार्थः। विशेषो वाक्यार्थ" इति भाष्यं संगच्छते। तथा च वार्त्तिकं[1] —

"तत्रानैकान्तिकानेकवाक्यार्थोपप्लवे सति।
अन्योन्यात्मव्यवच्छेदादेकत्र स्थाप्यते मतिः॥
अतोऽन्वयातिरेकाभ्यामनुमा नेयमिष्यते।
एकार्थैकान्तिकत्वं तदन्यथैवात्र लभ्यते॥" इति।

यत् अनुमाने व्याप्तेः फलमेकार्थनिर्णयलक्षणं, तदत्रान्यत एव पदान्तरसमभिव्याहारलक्षणात् वाक्यात् सिध्यतीत्यर्थः।

उभयोः विशेषः[2]

तेनैतदुक्तं भवति —

उभयोरपि वादिनोः अनेकसाधारणान्वितप्रतिपादकत्वशक्तिः एकवाक्यतया मिथो नियम्यत इत्येतावदवश्यं कल्पनीयम्। तत्र प्रमाणान्तरेण क्रियान्तरे संनिहिते पदान्तरेण चानयने गोपदमाकाङ्क्षाद्यविशेषात् उभयान्वितगोप्रतिपादनसमर्थमपि आनयत्येकवाक्यतया तदन्वितमेव स्वार्थमभिधत्त इति कल्प्यम्। मम तु गोपदार्थः स्वभावादेव येन केनचिदन्वितं स्वमात्मानं प्रतिपादयितुं समर्थः पदान्तरैकवाक्यतया तदर्थान्वितमेव स्वस्वरूपं प्रतिपादयतीति कल्प्यमिति एतावदावयोः तुल्यम्। पदस्य तु भवान् विशिष्टे शक्तिं कल्पयति, वयं तु पदस्य पदार्थस्वरूपमात्रे शक्तिं कल्पयाम इति महान् विशेषः।

स्यादेतत्। न वयं साधारणी पदशक्तिरेकवाक्यतया नियम्यत इति कल्पयामः। कथं तर्हि प्रमाणान्तरोपस्थापितेनार्थान्तरेणान्विताभिधानं न भवति? आकाङ्क्षाविरहात्। आकाङ्क्षा हि अन्विताभिधानस्योपलक्षणम्। न हि प्रमाणान्तरप्रतीतयोः क्रियाकारकयोराकाङ्क्षा विद्यते। श्रुतयोरेवाकाङ्क्षा। सा च श्रुतयोः अर्थयोः परस्परसंबन्धादपि निवर्तत इति नार्थान्तरान्वयप्रसङ्ग इति।

---

[1] श्लो.वा.वाक्य.२७१, २७२.
[2] न्या.र.मा.पृ.१०६.

एकवाक्यतायाः नियतैकान्वयबोधाय आवश्यकता

नैतदेवम्। सत्यामप्याकाङ्क्षायामन्वयादर्शनात्। भवति हि कदाचिदियमवस्था। यदैकस्मिन् देशे हेषादिशब्देन अश्वमनुमाय तस्य क्रियाविशेषं जिज्ञासते "किमश्वो गच्छति, तिष्ठति वा" इति। प्रदेशान्तरे च पदनिक्षेपशब्देन गतिमनुमाय कारकविशेषं जिज्ञासते "किमत्र गौः अश्वो वा गच्छति" इति। तस्यामवस्थायां "गौस्तिष्ठति" इति पदद्वयं कश्चिदुच्चारयति। तत्र यद्येकवाक्यत्वं नियामकं नेष्यते, तदा हेषादिशब्दानुमितस्याश्वस्य क्रियाविशेषापेक्षत्वात्, "तिष्ठति" इति पदावगतायाः क्रियायाः कारकविशेषापेक्षत्वात् परस्परान्वयः स्यात् "अश्वः तिष्ठति" इति।

तथा पदनिक्षेपशब्दानुमितस्य गमनस्य कारकापेक्षत्वात् गोपदावगतायाश्च गोः क्रियापेक्षत्वात् अन्योन्यान्वयः स्यात् "गौर्गच्छति" इति। न नियमेन "गौस्तिष्ठति" इत्यन्वयः सिध्येत्। संनिध्याकाङ्क्षायोग्यत्वानामविशेषात्।

न च पदसामर्थ्यमेव पदान्तरस्मारितार्थान्वितस्वार्थविषयावबोधनाय व्यवस्थापकं नैकवाक्यत्वमिति वाच्यम्। "द्वारम्" इत्यादौ अशाब्दैरपि पिधानादिभिः अन्विताभिधानस्येष्टत्वात्।

तस्मान्न पदसामर्थ्यान्नियमसिद्धिः। अत एकवाक्यतैव शरणीकरणीया अन्विताभिधायिभिरपि पदैः नियतैकान्वयबोधाय। सा च एकवाक्यता स्वभावसिद्धान्वयबोधनसामर्थ्यैः पदार्थैरपि तन्नियमायापेक्ष्यत इति कृतमन्विताभिधानपरिकल्पनश्रमेण।

पदार्थानां वाक्यार्थावगमकत्वे युक्त्यन्तरप्रदर्शनम्[1]

अपि च शक्तिकल्पनासाम्येऽपि पदार्था एव वाक्यार्थे प्रमाणमित्यङ्गीकर्तुं युक्तम्, न पदानीति। पदार्थप्रतीत्यनन्तरभावित्वात् वाक्यार्थप्रतीतेः। पदार्थप्रतीत्या व्यवहितत्वाच्च पदज्ञानस्य। तथा हि — अन्विताभिधानवादेऽपि हि पदैः पदार्थेष्ववगतेषु पश्चात् वाक्यार्थज्ञानं जायते। अन्यथा संनिधेः दुर्लभत्वात्, पदार्थस्वरूपज्ञानाभावे पदान्तरोपस्थापितेन पदार्थेनान्वितमभिधीयत इति सिद्धान्तस्य दुर्घटत्वात्। ते तु पदार्थाः पदैः अभिहिता वा स्मारिता वा इति तु अन्यदेतत्। सर्वथा तावत् पदज्ञानानन्तरं पदार्थेषु प्रतीतेषु वाक्यार्थावगतिरित्यत्र नास्ति विवादः। ततश्च वाक्यार्थाव्यवहितपूर्वपदार्थातिक्रमेण तद्व्यवहितानि पदानि न कथंचन वाक्यार्थं प्रतिपादयन्तीति पदार्थावगतिः वाक्यार्थावगतौ कारणमिति

---

[1] न्या.र.मा.पृ.१०७.

कल्पनं युक्तम्। न च पदार्थावगत्यनन्तरं पुनः पदानुसन्धानपूर्वकं वाक्यार्थावगम इति वाच्यम्। (पुनः) द्वितीयवारं पदानुसन्धाने प्रमाणाभावात्।

दीर्घतमेषु वाक्येषु पदार्थानामेव वाक्यार्थबोधे सामर्थ्यम्

किं च दीर्घतमेषु वाक्येषु पुनः पदानामनुसन्धानमशक्यम्। असत्यपि पदानुसन्धाने पदार्थानुसन्धानमात्रेण वाक्यार्थप्रतीतेः सर्वजनीनानुभवसिद्ध-त्वात्। उक्तं हि[१] —

"पदार्थानां च सामर्थ्यं गम्यमानमपह्नुतम्।
आनन्तर्याद्धि वाक्यार्थस्तद्धेतुत्वं न मुञ्चति॥" इति।

एतेन यत् पदानामेवान्विते सामर्थ्यमित्यत्र कारणमुक्तम्, प्राथम्यादिति, तत् विपरीतसाधनमिति वेदितव्यम्।

तात्पर्यवृत्त्या पदानामन्वितप्रतिपादकत्वमित्याक्षेपस्य समाधानम्

यत्तु तात्पर्यवृत्त्या पदानामेव साक्षादन्वितप्रतिपादकत्वं युक्तमित्युक्तम्। तन्न। तथा सति पाकतात्पर्येण प्रवृत्तानां काष्ठानामनपेक्षितज्वलनानां साक्षात् पाक-साधनत्वं स्यात्। आग्नेयादीनां च परमकार्यपरमापूर्वतात्पर्यकाणाम् अवान्तर-व्यापारं विनैव परमकार्यसाधनत्वं स्यात्।

अथ तत्राग्नेयादिस्वरूपेषु तिरोहितेषु (नष्टेषु) जायमानं परमापूर्वं न तैः साक्षात् जनयितुं शक्यते। तात्पर्यं तु अवान्तरव्यापारद्वारेणापि साधयतामविरुद्धमित्युच्यते, तदत्रापि समानम्। अत्रापि हि तिरोहितेष्वेव पदेषु पदार्थानुसन्धानानन्तर-मवगम्यमानस्य वाक्यार्थस्य पदार्था एव साक्षात् साधनम्। पदानि तु तद्द्वारैव साधनं, न तु साक्षात् इति।

पदानां पदार्थस्मारकत्वनिरूपणम्

ननु पदार्थप्रतीतेरेव वाक्यार्थप्रमाणत्वे पदानामभिधायकत्वं न स्यात्। पदानां स्मारकत्वेनापि पदार्थप्रतीतेरुपपत्तेः इति चेत् —

भवत्वेवमिति केचित्। उक्तं हि वार्त्तिककारैः[२] —

"भावनावचनस्तावत् तां स्मारयति लोकवत्" इति,
"पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते" इति,

---

[१] श्लो:वा.वाक्य.११४.
[२] श्लो.वा.वाक्य.२४८, शब्द.१०७, बृहट्टीका।

"तेऽपि नैवास्मृता यस्माद्वाक्यार्थं गमयन्ति नः।
तस्मात्तत्स्मरणेष्वेव संहतेषु प्रमाणता॥" इति च।

न पदानां पदार्थस्मारकत्वमिति मतस्योपन्यासः

अन्ये त्वाहुः — संबन्धनिमित्तकं स्मारकत्वम्। न च पदपदार्थयोः संयोग-समवायादिरूपः संबन्धोऽस्ति, यतः स्मारकत्वं स्यात्।

न च यथा संबन्धान्तराभावेऽपि वाचकत्वम्, तथा स्मारकत्वमपीति वाच्यम्। स्वाभाविकत्वाद्वाचकत्वस्य। प्रत्यायकत्वं हि वाचकत्वम्। तच्च स्वभावशक्त्याप्युपपन्नम्। चक्षुरादीनामिव रूपादिप्रत्यायकत्वम्।

न च तत्रापि संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवायरूपः संबन्धोऽस्त्येवेति संबन्धनिमित्तकमेव प्रत्यायकत्वमिति वाच्यम्। तस्य संबन्धस्य रसादिसाधारणत्वात्। सत्यपि संयुक्तसमवायलक्षणे संबन्धे चक्षुषा रसाज्ञानात्, न संबन्धमात्रं निमित्तम्। चक्षुरादिनिष्ठा शक्तिरेव त्वसाधारणं प्रत्यायकत्वे निमित्तम्। तद्वच्छब्दस्यापि स्वाभाविक्या शक्त्यैव प्रतिपादकत्वं भविष्यति।

स्मारकत्वं तु संस्कारोद्बोधेन। न च संबन्ध्यन्तरदर्शनं विना संस्कारोद्बोधः भविष्यति। क्वचिदप्यदर्शनात्।

ननु प्रत्यायकत्वमप्यसंबन्धिनो नैव दृष्टम्। स्वाभाविकशक्तिमतामपि चक्षुरादीनां संबध्यैव रूपादिप्रत्यायकत्वात्। अन्यथा दूरस्थितानामपि ग्रहणप्रसङ्गात्। शब्दस्य तु न कश्चित् अर्थेन सह संबन्धोऽस्ति। तत्कथमस्य प्रत्यायकत्वम्? अथान्यत्रादृष्टमपि संबन्धं विना प्रत्यायकत्वं शब्द एव कल्प्यते, तर्हि स्मारकत्वमपि किमिति न कल्प्यते इति चेत् —

तन्मतनिरासपूर्वकं पदस्याभिधायकत्वनिरूपणम्

उच्यते। सर्वथा तावदन्यत्रादृष्टमपि असंबन्धिनः स्मारकत्वं प्रत्यायकत्वं वा शब्दे कल्प्यम्। तत्र प्रत्यायकत्वकल्पनमेव ज्यायः। शब्दानन्तरमर्थप्रत्ययदर्शनात् तस्यैव (शब्दस्यैव) अर्थप्रत्यये कारणत्वं कल्पयितुं युक्तम्। न तु शब्दात् संस्कारोद्बोधः ततश्चार्थप्रतीतिरिति युक्तम्। प्रणाड्यां = परंपरायां, प्रमाणाभावात्। तस्मादभिधायकमेव पदं न स्मारकमिति।

ननु संबन्धग्रहणसमये योऽर्थो गृहीतः, स च पश्चादपि शब्देनाभिधीयत इति गृहीतग्राहित्वात् शब्दजन्यं विज्ञानं स्मरणमेवेति स्मारकत्वमेव शब्दस्य, न तु वाचकत्वमिति चेत् — न। अन्यलक्षणकत्वात् स्मरणस्य। न हि गृहीतग्राहित्वं स्मरणस्य लक्षणम्। किं तु संस्कारमात्रजन्यत्वम्। तत्कालोत्पन्नकारणजनितं तु

यत् गृहीतग्राहिज्ञानं तत् अनुवाद इत्युच्यते, न स्मृतिरिति। तदानीं संस्कारोत्पत्ति-नियमाभावात्।

वार्त्तिके, अनुवादात्मके ज्ञाने स्मरणत्वव्यवहारः गृहीतग्राहित्वात्मकसादृश्य-मूलको गौणः।

एवं चार्थस्वरूपमात्रं वाच्यमिति पक्षेऽप्यभिधायकत्वं पदस्य युक्तमिति सिद्धम्।

अन्विताभिधाने दूषणान्तरम्[१]

किं च यदि अन्वितप्रतिपत्तिः पदाभिधाननिमित्तिका, तदा "गङ्गायां घोषः" इत्यादिषु घोषाद्यन्वितस्य लाक्षणिकस्य तीरादेः प्रतिपत्तिः कथम्? न हि तीरादि-स्वरूपमपि गङ्गाशब्दाभिधेयं, सुतरां घोषाद्यन्वितम्।

ननु लाक्षणिकं पदं नानुभावकम्, किं तु स्मारकम्। तथा हि — गङ्गाशब्देन निमित्तभूते (वाच्यभूते) प्रवाहरूपेऽर्थस्वरूपे स्मारिते सति, तेन यत् संबन्धवशात् स्मारितं तीरस्वरूपं, तदन्वितं स्वार्थं घोषशब्दोऽभिधत्ते। गङ्गाशब्दस्तु तीरस्मरण-मात्रोपयोगीति चेत् —

सिद्धार्थस्थलेऽन्विताभिधानासंभवः

एवमपि यत्र सर्वपदानामेव लाक्षणिकार्थकत्वम्, न कस्यापि मुख्योऽर्थो विद्यते, तत्र कथमन्वितप्रतिपत्तिः।

अस्ति वा तादृशं वाक्यं? सत्यं, यत्र न विद्यते।
कार्यं, तदन्वितं वापि, यथा "गच्छति भूमिपः"॥

सर्वेषां पदानां कार्यं तदन्वितं वा अभिधेयम्। लिङादीनां कार्यं, तदन्येषां तु कार्यान्वितम्। यस्तु लोके कुतूहलप्रश्नप्रतिवचनरूपः सिद्धार्थविषयकः शब्दप्रयोगः कार्यशून्यो दृश्यते, यथा — "कोऽयं गच्छति", "भूमिपो गच्छति" इत्यादिः। कवीनां वा अर्थविशेषवर्णनात्मकः, यथा —

"नीलोत्पलवनेष्वद्य चरन्तश्चारुसंरवाः।
रामाः कौशेयसंवीताः प्रनृत्यन्तीव सारसाः॥"

इत्यादिः, स लाक्षणिक इति भवतां सिद्धान्तः। तत्रापि च अन्वित-प्रतीतिरस्त्येव। न चासौ पदैरुदेतुमर्हति, तेषां सिद्धार्थानभिधायकत्वात्। न हि भूमिपशब्दस्य गच्छत्यर्थान्वितस्वार्थाभिधायकत्वमस्ति। पदानां कार्यान्वितस्वार्था-भिधायकत्वात्। अत एव गच्छतिशब्दस्यापि न भूमिपशब्दार्थान्वितस्वार्थाभि-धायकत्वमस्ति।

---

[१] न्या.र.मा.पृ.११०.

तस्मात् सिद्धार्थस्थले पदस्मारितपदार्थनिमित्तिकैव अन्वितप्रतीतिरेषितव्या। ततश्च सर्वत्रैव तथास्तु, किमन्विताभिधानकल्पनया।

अन्विताभिधानवादे कल्पनागौरवम्[१]

अपि चान्विताभिधानवादे कल्पनागौरवम्। पदानां तावत् अर्थस्वरूपे शक्तिकल्पनमुभयोरपि पक्षयोरविशिष्टम्। अभिहितान्वयपक्षे पदार्थानामन्वितप्रतिपादकत्वसामर्थ्यं क्लृप्तमेव। नियममात्रमेकवाक्यतया कल्पनीयम्। अमुकार्थान्वितप्रतिपादकत्वसामर्थ्यममुकपदार्थस्येति नियमः समभिव्याहाररूपया एकवाक्यतया कल्पनीय इति यावत्। तच्च कल्पनं लघुतरम्। अन्विताभिधानपक्षे तु पदानामत्यन्ताक्लृप्तमेव अन्वितप्रत्यायकत्वं कल्प्यम्। तच्च गरीयः।

यत्तु — संनिध्यपेक्षायोग्यत्वानामविशेषेऽपि प्रमाणान्तरावगतानामर्थानां नियतान्वयनिमित्तत्वं न दृष्टम्। शब्दावगतानां च तत्कल्पने शक्तित्रयकल्पनप्रसङ्गः इत्युक्तम् — तत् संनिधिमात्रस्याङ्गतानङ्गीकारात् परिहृतम्। स्वाभिधायकेन पदेन सह एकवाक्यभूतं यत् पदान्तरं तदधीनः संनिधिः = उपस्थितिः, पदार्थानां, नियतैकान्वितबोधनेऽङ्गम्। न चेदृशः संनिधिः प्रमाणान्तरावगतेष्वस्तीति न तत्र नियतैकवाक्यार्थावगतिः।

श्रुतार्थापत्तेः शब्दगोचरत्वम्

यत एव च एकवाक्यभूतपदान्तराधीन एव संनिधिः पदार्थानामन्वितबोधनेऽङ्गं, न संनिधिमात्रम्। अत एव अधिकार्यश्रवणेन अपरिपूर्णेषु "विश्वजिता यजेत" इत्यादिवाक्येषु आकाङ्क्षितस्यार्थस्य शाब्दसंनिध्यर्थं "स्वर्गकामः" इति शब्दस्यैव कल्पनात् श्रुतार्थापत्तेः शब्दगोचरत्वसिद्धिः। 'शाब्दी ह्याकाङ्क्षा शब्देनैव परिपूर्यते' इति न्यायात्। अत एव ऊहोऽपि संगच्छते। "अग्नये त्वा जुष्टं निर्वपामि" इति प्रकृतौ आम्नातो मन्त्रः। स सौर्ययागेऽप्यतिदिष्टः। तत्र मन्त्रप्रकाश्यस्याग्नेरभावात् अग्निपदे निवृत्ते सूर्यादिपदाध्याहारात् ऊहसिद्धिरुपपन्ना। अशब्दोपस्थितस्यान्वयार्हत्वे तु पदोह एव न स्यात्।

अन्विताभिधाने शक्तिकल्पनागौरवम्[२]

पदानां पदार्थानां चोभयेषामपि सामर्थ्यमपूर्वमेव कल्पयितव्यमिति स्वीकारेऽपि पदार्थानामेव तत्कल्पनमुचितम्, न पदानाम्। तथा हि — यत्र तावदेकं पदम्,

---

[१] न्या.र.मा.पृ.११९.

[२] न्या.र.मा.पृ.१२०.

एकश्च पदार्थः, तत्रान्विताभिधानपक्षे पदस्य अन्विते अन्वये च द्वे शक्ती कल्पनीये। अभिहितान्वयपक्षेऽपि पदस्यैका पदार्थस्यैकेति द्वे एव शक्ती कल्पनीये इति तुल्यम्। यत्राप्येकशब्दस्यानेकेऽर्थाः वाच्याः, यथा अक्षशब्दस्य विदेवनं, विभीतकम्, इन्द्रियाणि इत्यर्थत्रयम्, तत्राप्यन्विताभिधानमते प्रत्यर्थं शब्दस्य अन्वितेऽन्वये च शक्तिद्वयकल्पनात् षट् शक्तयः कल्पनीयाः। अभिहितान्वयेऽपि शब्दस्य प्रत्यर्थमेकैकशक्तिकल्पनात् तिस्रः, पदार्थानां च त्रयाणामन्वयरूपवाक्यार्थे तिस्रः शक्तय इति षट् इति तुल्यम्।

यत्र तु बहवः शब्दाः एकस्यार्थस्य वाचकाः, यथा पाणि-कर-हस्तशब्दाः, तत्रान्विताभिधानपक्षे प्रतिशब्दमन्वितेऽन्वये च शक्तिद्वयकल्पनात् षट् शक्तयः स्युः। अभिहितान्वयपक्षे तु त्रयाणां शब्दानां तिस्रः शक्तयः, अर्थस्य एका शक्तिरिति चतस्रः शक्तय इति लाघवम्।

एवमेकार्थवाचकेषु चतुःपञ्चादिपर्यायेष्वयं न्यायो द्रष्टव्यः। तथा हि — चतुर्षु शक्तित्रयाधिक्यम्, पञ्चसु चतुष्काधिक्यं, षट्सु पञ्चकाधिक्यमिति। चतुर्षु शक्तित्रयाधिक्यमित्थम् — अन्विताभिधानपक्षे शब्दचातुर्विध्यात् प्रत्येकमन्वितेऽन्वये च शक्तिद्वयकल्पनात् अष्टौ शक्तयः। अभिहितान्वयपक्षे तु शब्दचातुर्विध्यात् चतस्रः, अर्थैक्यादेकेति पञ्च शक्तय इति, एतदपेक्षया अष्टशक्तिपक्षे शक्तित्रयाधिक्यम् इति। अन्यदप्येवमूह्यम्।

अथ क्रमशः न्यायरत्नमालायां कथिताः अभिहितान्वयवादस्य साधकयुक्तयः संकलय्य प्रदर्श्यन्ते

(१) "पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथेदानीं पदार्था अवगताः सन्तः वाक्यार्थमवगमयन्ति" इति शाबरभाष्यम्[१] अभिहितान्वये प्रमाणम्।

(२) पदकदम्बश्रवणानन्तरमपि व्युत्पत्तिग्रहाभावरूपात् मानसापराधात् अविदितपदार्थः कोऽपि न वाक्यार्थं जानाति, पदकदम्बजनितस्वस्वार्थोपस्थित्यनन्तरं तु जानाति। अतोऽन्वयव्यतिरेकाभ्यां पदार्थज्ञानस्य ज्ञायमानपदार्थस्यैव वा वाक्यार्थबुद्धौ कारणता स्वीकार्या।

(३) विनापि पदं पदार्थमात्रादन्वयबुद्धिरुदेति। स्वयमुत्प्रेक्षितमर्थं कवयः काव्ये निबध्नन्ति। वाक्यरचनायां वाक्यार्थज्ञानं हेतुः। 'अर्थं बुद्ध्वा शब्दरचना' इति न्यायात्। काव्यहेतुवाक्यार्थज्ञानं कवेः पदानि जनयन्तीति न युज्यते। परन्तु चिन्तावशेन उपस्थिता एव पदार्थाः परस्परमन्वयमवगमयन्तीति वक्तव्यम्। एवं

---
[१] शा.भा.१.१.७.२५.

येन पुरुषेणाज्ञाताश्रयविशेषं श्वैत्यं प्रतिपन्नम्, ह्रेषारवेणाज्ञातोऽश्वोऽनुमितः, खुर-निक्षेपशब्देन अज्ञातकर्तृकं धावनं चानुमितं, तस्य पुरुषस्य "श्वेतोऽश्वो धावति" इति अन्वयबुद्धिरुदेति। न च तत्र पदं श्रूयते। तस्मादत्र उपस्थिताः पदार्था एवान्वयमवगमयन्तीत्यकामेनापि स्वीकरणीयम्। तस्मात् पदार्था एव वाक्यार्थबुद्धौ करणं, न पदानि।

(४) अन्विताभिधानमतेऽपि पदैः पदार्थस्मरणानन्तरमेव वाक्यार्थज्ञानं जायत इति स्वीकरणीयम्। अन्यथा संनिधेर्दुर्लभत्वात्। एवं च वाक्यार्थावगमा-व्यवहितपूर्ववर्ती पदार्थावगम एव करणं, न पदम्। वाक्यार्थबोधपूर्वक्षणे पुनः पद-स्मरणकल्पनायां न किमपि प्रमाणं पश्यामः। दीर्घतमेषु वाक्येषु पुनः पदानु-सन्धानमशक्यं च। असत्यपि तस्मिन् पदार्थानुसन्धानमात्रेण वाक्यार्थः प्रतीयत इति सर्वजनीनमेतत्। तस्मात् दृष्टानुगुण्यात् पदार्थनिमित्तक एव वाक्यार्थबोधः, न पदनिमित्तकः।

(५) अन्विताभिधानवादिनापि पदार्थनिमित्तकः वाक्यार्थावगम इति स्वीकर-णीयमेव। ते किल कार्यान्विते पदानां शक्तिमुपगच्छन्ति। कार्यतावाचकलिङादि-घटितवाक्यादेव कार्यान्वितविषयकः शाब्दबोधो जायते। परं तु लिङादिरहितानि कुतूहलप्रश्नप्रतिवचनरूपाण्यपि वाक्यानि प्रयुज्यन्ते। यथा "कोऽसौ गच्छति" इति प्रश्ने "राजासौ गच्छति" इत्युत्तरम्। एवमेव कवीनामर्थविशेषवर्णनरूपः वाक्य-सन्दर्भोऽपि दृश्यते —

"नीलोत्पलवनेष्वद्य चरन्तश्चारुसंरवाः।
रामाः कौशेयसंवीताः प्रनृत्यन्तीव सारसाः॥"

इत्यादिः। सर्वमीदृशं लाक्षणिकमिति तेषां समयः। अत्रापि पदार्थानामन्योन्य-संसर्गप्रत्ययो भवत्येव। न चात्र पदानामन्विताभिधायिता शक्या वक्तुम्। कार्यता-वाचिपदाभावेन कार्यान्विताभिधायकताया असंभवात्।

तस्मादत्र पदस्मारितपदार्थेभ्यः आकाङ्क्षादिसहकृतेभ्यः संसर्गबुद्धिरुदेतीति अकामेनापि स्वीकरणीयम्। तथा चात्र पदार्थस्य वाक्यार्थावगमनिमित्तत्वे सिद्धे सर्वत्रापि तस्यैव निमित्तत्वकल्पनमुचितम्।

(६) पूर्वमीमांसासूत्रकारोऽपि "अर्थस्य तन्निमित्तत्वात्" इति[१] स्पष्टमेव पदार्थस्य वाक्यार्थावगमहेतुतामाचष्टे।

(७) शक्तिकल्पनालाघवं चाभिहितान्वयपक्षे वर्तते।

---

[१] जै.सू.१.१.७.२५.

(८) अभिहिताः पदार्थाः स्वसंबन्धिनीमन्विताववस्थां लक्षयन्ति। एवं च 'अनन्यलभ्यः शब्दार्थः' इति न्यायात् लक्षणया बुध्यमानस्य वाक्यार्थस्य न शब्दार्थता युक्तेति पदानामन्विते शक्तिर्न सिध्यति।

यथा "गङ्गायां घोषः" इत्यत्र गङ्गापदस्मारितेन प्रवाहेण तीरं स्मार्यते इति तीरं लक्ष्यमित्युच्यते, तथा पदजन्याभिधानविषयेण पदार्थेनान्वयोऽनुभूयत इति अन्वयरूपः वाक्यार्थः लक्ष्यः इत्युच्यते। इयांस्तु विशेषः — "गङ्गायां घोषः" इत्यत्र लाक्षणिकं तीरं स्मृतिविषयः, लाक्षणिको वाक्यार्थस्तु अनुभवविषयः इति।

(९) अत्र वादे पक्षत्रयं ब्रह्मानन्दीये अद्वैतसिद्धिव्याख्याने प्रतिपादितम्[१] —

१. "घटमानय" इत्यादौ घटपदेन घटत्वम्, अम्पदेन कर्मत्वं चानुभाव्यते। प्रकृतिप्रत्ययजन्यानुभवाभ्यां प्रकृतिप्रत्ययार्थयोः संसर्गशाब्दधीर्जायते, न तु प्रकृतिप्रत्ययाभ्याम्। घटत्वनिष्ठकर्मत्वप्रतीत्या आनयनक्रियायां घटत्वनिष्ठकर्मत्वस्य निरूपकत्वरूपसंसर्गविषयकः क्रियाकारकसंबन्धावगाहिशाब्दबोधो जायत इति आद्यः पक्षः।

२. प्रत्ययपूर्ववृत्तित्वविशिष्टप्रकृतेः कर्मत्वविशिष्टघटत्वानुभावकत्वमिति द्वितीयः पक्षः।

३. प्रकृत्युत्तरत्वविशिष्टप्रत्ययस्य घटत्वविशिष्टकर्मत्वानुभावकत्वमिति तृतीयः पक्षः।

अभिहितान्वयपक्षे बाधकयुक्तीनां समाधानम्

(१) प्रश्नः — पदाभिहितानामर्थानां वाक्यार्थज्ञानकारणतास्वीकारे शक्तित्रयकल्पनागौरवमापतति। एका पदानां पदार्थाभिधानशक्तिः, अन्या पदार्थानां वाक्यार्थावगमशक्तिः, अपरा पदानां पदार्थेषु वाक्यार्थावगमशक्त्याधानशक्तिः इति।

समाधानम् — अन्विताभिधानमतेऽपि शक्तित्रयकल्पना समाना। पदेन हि पदार्थः स्मार्यते। निर्विभक्तिकघटादिपदादपि घटत्वस्मरणमङ्गीक्रियते। अन्त्यपदोच्चारणानन्तरं तावत्पदविषयकमेकं स्मरणं जायते। तादृशस्मरणविषयीभूतानि पदानि अन्वितार्थमवगमयन्ति। एवं च पदानां पदार्थज्ञानजननशक्तिरेका, अन्वितार्थप्रतिपादनशक्तिरपरा, सकलपदविषयकस्मरणविषयीकृतस्यैव पदसमूहस्यान्वितार्थप्रतिपादनसामर्थ्यमिति पदगतान्वितार्थप्रतिपादनशक्त्याधानशक्तिरन्या तावत्पदविषयकस्मरणे कल्पनीया। तथा च न शक्तित्रयकल्पनागौरवमभिहितान्वयपक्षे। अन्विताभिधानपक्षेऽपि तत्साम्यात्।

[१] एतत्पक्षत्रयम् उत्तरत्र ब्रह्मानन्दीयमतनिरूपणावसरे विस्तृतं वर्तते।

(२) प्रश्नः — वाक्यार्थे लक्षणाभिधानमसंगतम्। लक्षणालक्षणविरहात्। शक्यार्थसंबन्धेन अनुपपत्त्या च लक्षणा भवति। "गङ्गायां घोषः" इत्यत्र गङ्गा-पदशक्यार्थस्य प्रवाहस्य वाक्यार्थान्वयो नोपपद्यते। अतः प्रवाहसंबन्धवशात् ज्ञातस्य स्मृतस्य तीरस्य घोषादावन्वयः स्वीक्रियते। तदुक्तं प्रकरणपञ्चिकायां[१] —

"वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः।
तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते॥"

इति। प्रकृते "चैत्रः पिठरे ओदनं पचति" इत्यादौ चैत्रपिठरादिपदार्थानां वाक्यार्थे न संबन्धानुपपत्तिरस्ति। नापि लक्ष्यस्य तीरस्य घोषादाविव, लक्ष्यायाः अन्वितावस्थायाः अन्यत्रान्वयोऽनुभूयते।

समाधानम् — वाक्यार्थे लक्षणा न भवतीत्येतावता पदानां वाक्यार्थे शक्तिर्न सिध्यति। पदाभिहितपदार्थैरेव वाक्यार्थबोधोपपत्तेः। वाक्यार्थे पदवृत्तिं विना कथं तद्बोध इति यद्याशङ्क्यते, तदा शक्तिलक्षणागौणीव्यतिरिक्ता चतुर्थी इयं पद-वृत्तिर्भवतु।

वस्तुतस्तु वाक्यार्थे लक्षणा संभवति। तथा हि —

पूर्वोक्तलक्षणालक्षणमव्याप्तं भवति। न हि सर्वत्र लक्षणास्थले वाच्यार्थान्वया-नुपपत्तिरस्ति, "काकेभ्यो दधि रक्ष्यताम्" इत्यादौ वाच्यार्थान्वयानुपपत्त्यभावात्। एवं वेदेऽपि "वायुर्वै क्षेपिष्ठा देवता" इत्यादेरर्थवादस्य प्राशस्त्ये लक्षणा सर्व-संप्रतिपन्ना। न हि वाच्यार्थवायुक्षेपिष्ठत्वादीनामन्वये काचनानुपपत्तिरस्ति। वाच्यार्थसंबन्धवशप्राप्तस्य वाक्यार्थे अन्वयोऽपि न सार्वत्रिकः। शत्रुगृहभोजन-निवृत्तितात्पर्येण "विषं भुङ्क्ष्व" इति वाक्यं प्रयुज्यते। तत्र वाक्यलक्ष्यस्य शत्रु-गृहभोजननिवृत्तिरूपस्य पुनः वाच्यार्थे वा अन्यत्र वा अन्वयो न दृश्यते। तस्मात् अनुपपत्तितः वाच्यसंबन्धवशप्राप्तस्य प्रतीतौ लक्षणेत्येव सर्वलक्षणानुगतं लक्षणम्। तदुक्तमाचार्यवाचस्पतिमिश्रैस्तत्त्वबिन्दौ[२] —

"मृष्यामहे वाच्यानुपपत्तितः इति, संबन्धवशप्राप्तस्येति च, न पुनः वाक्यार्थेति, संबन्धेति, अन्वयादिति च" इति।

पदानामनधिगतार्थप्रत्यायनप्रयुक्तः समभिव्याहारः संसर्गप्रत्यायनमन्तरेणानुप-पद्यमानः स्वाभिधेयसंबन्धिनीमवस्थां लक्षयति। संसर्गाबोधने अनधिगतार्थबोध-कत्वलक्षणप्रामाण्यानुपपत्त्या लक्षणा आक्षिप्यते। इयं चानुपपत्तिः सर्वलाक्षणिक-साधारणी।

---

[१] प्र.पं.पृ.३९८.
[२] त.बिं.पृ.१५७.

"वायुर्वै क्षेपिष्ठा" इत्यादौ वाच्यार्थानुपपत्त्यभावेऽपि तत्र कैमर्थ्याकाङ्क्षायाः सत्त्वात्, निष्प्रयोजनार्थबोधकत्वे अज्ञातप्रयोजनवदर्थबोधकत्वलक्षणप्रामाण्यानुपपत्त्या प्राशस्त्ये लक्षणा अङ्गीक्रियते।

"गङ्गायां घोषः" इत्यादौ प्रवाहबोधकत्वे घोषे प्रवाहवृत्तित्वस्य बाधितत्वेन अबाधितार्थबोधकत्वलक्षणप्रामाण्यानुपपत्तिरस्त्येव।

"काकेभ्यो दधि रक्ष्यताम्" इत्यत्र तात्पर्यविषयान्वयप्रतिपादकत्वरूपप्रामाण्यानुपपत्त्या काकपदस्य दध्युपघातके लक्षणा।

तदयं निष्कर्षः — शब्दार्थधीजन्यधीविषयनिष्ठः शब्दार्थप्रतियोगिकः संबन्धो लक्षणा। "गङ्गायां घोषः" इत्यादौ गङ्गाशब्दार्थप्रवाहधीबोध्यतीरनिष्ठः प्रवाहप्रतियोगिकः संयोगादिः संबन्धो लक्षणा। प्रकृते च शब्दार्थज्ञानबोध्यसंसर्गनिष्ठः शब्दार्थप्रतियोगिकः निरूपकत्वादिः संबन्धो लक्षणा। शाब्दधीप्रयोजकः बोध्यबोधकसंबन्धः वृत्तिः। वाक्यार्थे लक्षणा स्वरूपसती उपयुज्यते। संसर्गनिष्ठायाः लक्षणायाः पदार्थप्रतियोगिकत्वात्मकसंबन्धरूपायाः अज्ञातायाः संसर्गबोधे प्रमाणप्रमेयसंबन्धविधया प्रयोजकत्वम्। "भूतलं घटवत्" इत्याकारके घटप्रकारके संयोगसंसर्गके प्रत्यक्षे संयोगगतस्य इन्द्रियसंयुक्तसमवायस्य संबन्धस्य अपेक्षणात् सामान्यतः प्रमेयबोधे प्रमाणप्रमेयसंबन्धस्य प्रयोजकत्वात्।

(३) प्रश्नः — वाक्यार्थावगमं प्रति अभिधीयमानपदार्थस्य करणत्वे पदार्थस्यातिरिक्तप्रमाणत्वापत्तिः। एवं वाक्यार्थज्ञानस्य शब्दजन्यत्वाभावात् वाक्यार्थस्य शाब्दत्वं न स्यात्।

समाधानम् — पदार्थस्य शब्दप्रमाण एवान्तर्भावात् नातिरिक्तप्रमाणाभ्युपगमापातः। अङ्गताग्राहकप्रमाणानि श्रुतिलिङ्गादीनि। तत्र श्रुतिः, वाक्यं, समाख्या च शब्दरूपत्वात् शब्दरूपे प्रमाणेऽन्तर्भवन्ति। लिङ्गं, प्रकरणं, स्थानं च श्रुतिकल्पनयैवाङ्गतां ग्राहयन्तीति शब्दप्रमाणेऽन्तर्भवन्ति। तथैव पदाभिहितानां पदार्थानामन्वयबोधकत्वेऽपि शब्दप्रमाण एवान्तर्भावो मन्तव्यः। अन्वयप्रतीतेः शब्दजन्यत्वाभावेऽपि शब्दावगतपदार्थजन्यत्वात् शाब्दत्वम्। शाब्दधीविषयत्वात् वाक्यार्थस्य शाब्दत्वम्।

(४) प्रश्नः — शब्दावगतपदार्थजन्यत्वात् अन्वयबुद्धेः शाब्दत्वस्वीकारे चक्षुरिन्द्रियावगतधूमरूपानुमानप्रमाणजन्यायाः वह्न्यनुमितेरपि चाक्षुषत्वं स्यात्।

समाधानम् — वाक्यार्थावगमपराणि पदानि पदार्थज्ञानमवान्तरव्यापारीकृत्य अन्वयावगमं जनयन्ति। यथोक्तं[१] —

---

[१] श्लो.वा.वाक्य.३४३.

"पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्"

इति। न हि तथा चक्षुषः लिङ्गज्ञानमवान्तरव्यापारः। चक्षुषा लिङ्गेऽवगतेऽपि व्याप्तिज्ञानानुत्पत्तौ अनुमितेरनुत्पादात्। विनापि चक्षुषा धूमज्ञानं, व्याप्तिज्ञानेन अनुमित्युपत्तेश्च। तथा च वैषम्यात् न चक्षुरवगतधूमजन्यवह्निज्ञानस्य चाक्षुषत्वापत्तिः।

मीमांसातिरिक्तदर्शनेषु वादद्वयसरणिः

तत्र कुसुमाञ्जलावुदयनाचार्यैः तत्त्वचिन्तामणौ गङ्गेशोपाध्यायैश्च वादद्वयं विमृश्य ईषत् भाट्टात् भिन्नः अभिहितान्वयवादः प्रस्तुतः।

न्यायमञ्जर्याम् अनूदिता वादद्वयप्रक्रिया विचित्रा वर्तत इति तत्प्रक्रिया इदानीं प्रदर्श्यते।

न्यायमञ्जर्याम् अभिहितान्वयवादः[१]

ननु मा भूत् पदस्फोटः वाक्यस्फोटश्च वाचकः।
मा च भूतामिमौ वाक्यवाक्यार्थौ भागवर्जितौ॥
वर्णा एव भवन्त्वेते वाचकाः केनचित् पथा।
पदं वर्णसमूहोऽस्तु वाक्यं च पदसंहतिः॥
भवन्तु भवदाख्याताः पदवाक्यादिकल्पनाः।
पदार्थानां तु संसर्गे मार्गः क इति कथ्यताम्॥

असंसृष्टा हि "गौरश्वः पुरुषो हस्ती" इति पदार्थाः न वाक्यार्थभावमधिरोहन्ति। अन्त्यपदार्थज्ञानानन्तरभाविना हि स्मरणेन अनुव्यवसायेन वा विषयीक्रियमाणास्तु यथावगता एव विषयीक्रियन्ते। संसर्गावगमस्तु कुतस्त्य इति चिन्त्यम्।

उच्यते। अस्त्यत्र विवादः।

केचिदाचक्षते — अन्विता एव पदार्थाः पदैरभिधीयन्ते। अन्यथा पदानां वाक्यत्वायोगात् इति।

अन्ये तु मन्यन्ते — शुद्धानामेव पदार्थानां पदैरभिधानम्। ते तु तथाभिहिताः सन्तः परस्परमाकाङ्क्षासंनिधियोग्यत्वपर्यालोचनया संसर्गमधिगमयन्तीति।

तत्रेदं विचार्यम् — व्युत्पत्तिः[२] बलीयसी। न हि शब्दो व्युत्पत्तिनिरपेक्षः अर्थम् अवगमयति। व्युत्पत्तिश्च किं वाक्यस्य वाक्यार्थे, पदस्य वा पदार्थे इति।

---

[१] न्या.मं, आ.६.भा.२.पृ.२०१.

[२] व्युत्पत्तिः = शक्तिग्रहः।

यदि वाक्यस्य वाक्यार्थे व्युत्पत्तिः तदा अन्विताभिधानम्, पदस्य पदार्थे व्युत्पत्तौ अभिहितान्वयः इति।

अभिहितान्वयवादस्य युक्तत्वम्

किं तावत् प्राप्तम्, अभिहितान्वय इति। पदार्थप्रतिपत्तिपूर्वकत्वात् वाक्यार्थ-प्रतिपत्तेः। न हि यः पदार्थं नावगच्छति तस्य वाक्यार्थप्रतीतिर्दृश्यते।

किं च पदार्थविभागः लोके गम्यते, अस्य पदस्य जातिरर्थः, अस्य द्रव्यम्, अस्य गुणः, अस्य क्रियेति। स च विभागः जात्यादेः पदैरभिधाने सत्येव अव-कल्पते। पदान्तरार्थान्वितार्थस्य पदैरभिधाने तु पदार्थस्य इयत्तैव नावधार्यते, कदम्बाकारार्थप्रतीतेः[१]।

आवापोद्वापाभ्यां पदार्थावधारणमिति चेत् — न। आवापोद्वापपरीक्षावसरेऽपि कदम्बप्रतीत्यनपायात्। न ह्येकमेव किंचित् वाक्यमन्विताभिधायिपदग्रथितम्, अन्यत्र तु शुद्ध एव पदानामर्थः। किं तु सर्वत्र कदम्बकरूपादुपायात् कदम्बक-रूपमुपेयं प्रतीयत इति दुरवगमः पदार्थविभागः।

ततश्च पदार्थानामनपेक्षणे "गामानय" इति वाक्यात् अश्वानयननियोगः प्रतीयेत, "गां बधान" इति वाक्यात् अश्वबन्धननियोगः प्रतीयेत। अपेक्ष्यते च पदानामर्थः। सोऽपेक्ष्यमाणः इयानिति नियततया अवधारणीयः। तदवधारणं पदानां पदार्थ-स्वरूपमात्राभिधायकत्वेऽवकल्पते। तस्मात् पदपदार्थयोः स्वाभाविकः संबन्ध इष्यते।

वृद्धव्यवहारेषु व्युत्पत्तेः पदपर्यन्तत्वम्

वृद्धव्यवहारेषु च वाक्यादपि भवन्ती व्युत्पत्तिः पदपर्यन्ता भवति। इतरथा हि प्रतिवाक्यं व्युत्पत्तिरपेक्ष्येत। सा चानन्त्यात् दुरुपपादेति शब्दव्यवहारोच्छेदः स्यात्। दृश्यते च पदार्थविदामभिनवकविश्लोकादपि वाक्यार्थप्रतीतिः। सा पद-पदार्थव्युत्पत्त्या अवकल्पते। वाक्यवाक्यार्थयोस्तु व्युत्पत्तावपेक्ष्यमाणायां सा न स्यादेव। तस्मान्नान्विताभिधानम्।

अन्विताभिधानवादे पदान्तरोच्चारणवैयर्थ्यम्

अपि चान्विताभिधानवादे पदान्तरोच्चारणवैयर्थ्यम्। एकस्मादेव पदात् तदुप-रञ्जकद्वितीयपदार्थावगतिः[२] सिद्धैव। तदपि पदमन्यानुरक्तस्वार्थवाचीत्यनेनैव न्यायेन

---

[१] इतरपदार्थमिश्रितः आकारः यस्य तादृशस्यार्थस्य प्रतीतेः।

[२] तदुपरञ्जकः = तदनुयोगिकान्वयप्रतियोगी, यः द्वितीयः पदार्थः तस्य ज्ञानम्।

एकमेव पदमखिलपदाभिधेयार्थवाचि संपन्नमिति तेनैव व्यवहारोऽस्तु। न चेष्टापत्तिः। "गौः" इत्युक्ते सर्वगुणक्रियावगमात् न ज्ञायते किमुपादीयतामिति। सर्वावगमो हि अनवगमनिर्विशेष एव, व्यवहारानुपयोगात्। न हि रसविदां पूर्णोऽप्यब्धिः मरोः अतिरिच्यते, सलिलकार्यानिष्पत्तेः। गोशब्दस्य प्रतिनियतगुणक्रियान्वितार्थवाचकत्वे तु न हेतुमुत्पश्यामः। पदान्तरसंनिधानं नियमहेतुरिति चेत् तत्किं स्वरूपमात्रेण अर्थप्रतिपादनेन वा। स्वरूपेण संनिधानम् असंनिधानात् न विशिष्यते। अगृहीतसंबन्धस्य तत्कृतोपकाराभावात्। अर्थप्रतिपादनेन पदान्तरं यदि नियमहेतुः, तदा अभिहितानामर्थानामन्वय उक्तो भवति, प्रथममर्थस्याभिधानात्।

वाक्यार्थस्य पदार्थगम्यत्वमेव श्रेयः

तस्मात् स एव श्रेयान्, पदेभ्यः प्रतिपन्नाः निष्कृष्टाः[१] तावदर्थाः आकाङ्क्षासंनिधियोग्यतावशेन परस्परमभिसंबध्यन्ते। यो येनाकाङ्क्षितः, यश्च संनिहितः, यश्च संबन्धुं योग्यः स तेन संबध्यते। नातोऽन्यः।

अत एव "अङ्गुल्यग्रे हस्तियूथशतमास्ते" इति वाक्ये नास्ति संबन्धः। योग्यत्वाभावात्। अन्विताभिधानवादिनां तु अनन्वितस्यानभिधानात् तत्राप्यन्वयः प्राप्नोति। स च नास्ति। तस्मात् अभिहितानामेव पदार्थानामन्वय इति युक्तम्। तदुक्तं[२] — "पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीमर्था अवगताः वाक्यार्थं संपादयन्ति" इति।

वार्त्तिककारा अपि —

"वाक्यार्थे तु पदार्थेभ्यः संबन्धानुभवादृते।
बुद्धिरुत्पद्यते तेन भिन्नासावक्षबुद्धिवत्॥" [३]

"पदार्थपदसंबन्धनित्यत्वे साधितेऽपि वः।
नैव वेदप्रमाणत्वं वाक्यार्थं प्रति सिध्यति॥
पदानि गमयेयुस्तं प्रत्येकं संहतानि वा।
व्यतिरिक्तोऽथ वा शब्दः पदार्था वापि पूर्ववत्॥"

इत्यारभ्य —

"पदार्थानां तु मूलत्वं दृष्टं तद्भावभावतः।
सत्यं न वाचकं वाक्यं वाक्यार्थस्योपपद्यते॥"

---

[१] निष्कृष्टाः = अनन्विताः।
[२] शा.भा.१.१.७.२५.
[३] श्लो.वा.शब्द.१०९.

"पदार्थेषूपयुक्तानां पुनर्व्यापारकल्पना।
पदार्थानां च सामर्थ्यं गम्यमानमपह्नुतम्॥"

"आनन्तर्याद्धि वाक्यार्थस्तद्धेतुत्वं न मुञ्चति।"

"न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेषु पदानि नः।
तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते॥"

"पदार्थपूर्वकस्तस्माद्वाक्यार्थोऽयमवस्थितः।"

"साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥" — इति आहुः[१]।

अन्विताभिधानवादः[२]

एवं प्राप्तेऽभिधीयते। न व्युत्पत्तिनिरपेक्षो दीप इव शब्दः अर्थवमवगमयति। व्युत्पत्तिश्च वृद्धव्यवहारात्। वृद्धानां च व्यवहारः वाक्येन, न पदेन। केवलपदस्याप्रयोगात्।

वक्ता वाक्यं प्रयुङ्क्ते च संसृष्टार्थविवक्षया।
तथैव बुध्यते श्रोता तथैव च तटस्थितः॥

सेयं वाक्यस्य वाक्यार्थे व्युत्पत्तिः।

वाक्यस्वरूपम्

वाक्यं च किमुच्यते। "संहत्यार्थमभिदधति पदानि वाक्यम्, एकार्थः पदसमूहो वाक्यम्" इति वाक्यविदः[३]। तत्रायं पदसमूहः एकार्थको भवति। यद्येकैकस्य पदस्य सर्वत्र व्यापारः तर्हि न संहत्यार्थमभिदध्युः पदानि। यथा हि बाह्यानि कारकाणि काष्ठादीनि सर्वाण्येव पाके व्याप्रियन्ते, यथा च शिबिकायाः उद्यन्तारः सर्वे शिबिकाम् उद्यच्छन्ति, यथा त्रयोऽपि ग्रावाणः उखां बिभ्रति, तथा सर्वाण्येव पदानि वाक्यार्थमवबोधयन्ति। तदेतत् अन्विताभिधानम्। अन्यानन्वितनिष्कृष्टस्वार्थपर्यवसायित्वे हि सति न सर्वेषां वाक्यार्थे व्यापारः स्यात्।

---

[१] श्लो.वा.वाक्य.१-२, १११, ११४, ११५ ab, २२९, ३३६, ३४२-३४३.
[२] न्या.मं, आ.६.भा.२.पृ.२०५.
[३] शा.भा.३.३.१४.

पदान्तरावैयर्थ्यम्

नन्वेवमेकैकस्य पदस्य कृत्स्नकारित्वे एकस्मादेव कृत्स्नसिद्धेः पदान्तरोच्चारणं व्यर्थमिति चेत् — न। पदान्तरेण विनैव एकस्मात् कृत्स्नकार्यसम्पत्त्यभावात्। न तर्ह्येकं कृत्स्नकारीति चेत् — मैवम्। एकैकस्य कृत्स्नफलपर्यन्तव्यापारपतितत्वात् एकैकस्मिन् सति कृत्स्नफलपर्यन्तो व्यापारो निर्वर्तते, एकैकेन विना न निर्वर्तत इत्येवमेकैकं कृत्स्नकारि भवति।

नन्वेवं तर्हि समुदाय एव कर्ता भवतु, किं समुदायिभिः? ततश्च तदेवायातं निरवयवौ वाक्यवाक्यार्थाविति। नैतद्युक्तम्। संघातकार्यवत् स्वकार्यस्यापि दर्शनात्।

वाक्यार्थप्रतीतेः पदसंघातकार्यत्वम्

अथ किं संघातकार्यम्? किं च तत् स्वकार्यम्? वाक्यार्थप्रतिपत्तिः संघात-कार्यम्, स्वकार्यं तु पदार्थप्रतिपत्तिः। यथा पाकः संघातकार्यम्, स्वकार्यं ज्वलन-भरणादि काष्ठस्थाल्यादीनाम्।

ननु यदि पदार्थप्रतिपादनं पदानां स्वकार्यम्, शुद्धः (अन्यानन्वितः) तर्हि पदार्थः। संघातकार्यमकुर्वतां शुद्धानां पदानामदृष्टत्वात्। न ह्येषां स्वकार्ये संघातकार्ये च पृथक् प्रयोगोऽस्ति। संघातकार्ये एव प्रयोगात्। संघातकार्ये प्रयुक्तानामप्येषां स्वकार्यं न नावगम्यते। अत एव न निरवयवं वाक्यमिष्यते, स्वकार्यप्रत्यभिज्ञानात्।

संहतास्ते संघातकार्यं कुर्वन्तो दृश्यन्ते, न संघात एव। संहतेष्वपि कुर्वत्सु, स्वकार्यं पृथक् पृथगुपलभ्यते। यथा "शकटाङ्गानाम् अयमंशोऽनेन कृतः, अयमनेन" इति, न पृथक् पृथक् प्रयुज्यमानानि शकटाङ्गानि मनागपि शकटकार्यं कुर्वन्तीति। एवं न केवलं पदं प्रयुज्यते, प्रयुक्तमपि वा न तत्कार्याङ्गम्। पदान्तरेण तु सह व्यापारात् तदन्वितार्थकार्येव पदमिति युक्तम्। तदिदमुक्तं[१] "संहत्यार्थ-मभिदधति पदानि वाक्यम्, एकार्थः पदसमूहो वाक्यम्" इति।

तदेवमवयवकार्योपलम्भात् न वैयाकरणवत् निमित्तान्यपि (पदतदर्थान्) निह्नु-महे, कृत्स्नफलसिद्ध्यवधि व्यापारनिश्चयाच्च नान्यमीमांसकवत् (भाट्टवत्) शुद्ध-पदार्थाभिधानमुपगच्छामह इति।

---

[१] शा.भा.३.३.१४, भा.४.पृ.२११.

प्रतिवाक्यं व्युत्पत्तेर्नापेक्षा

यत् पुनरभ्यधायि — प्रतिवाक्यं व्युत्पत्तिरपेक्षणीया, अन्यथा नवकविश्लोकात् अर्थः पदार्थविदो न प्रतीयेतेति। तत्रोच्यते। न प्रतिवाक्यं व्युत्पत्तिरपेक्ष्यते। किं तु आकाङ्क्षितयोग्यसंनिहितार्थानुरक्तोऽस्यार्थ इति संनिहितयोग्याकाङ्क्षितार्थोपरक्त-स्वार्थाभिधायित्वेन हि क्वचित् गृहीतसंबन्धः सर्वत्र गृहीतो भवति। ततश्च नवकविश्लोकादप्यर्थप्रतिपत्तिरुपपत्स्यते।

पदान्तरोच्चारणसाफल्यम्

यदपि पदान्तरोच्चारणमफलमिति, तदपि परिहृतम्। पदान्तरसंनिधाने हि सर्वाणि पदानि कृत्स्नकारीणि भवन्तीत्युक्तत्वात्। किं पदान्तरसंनिधानेन क्रियत इति चेत् — सर्वकारकेष्वपि तुल्योऽयं प्रश्नः। यदि संहत्य सर्वाणि कारकाणि कुर्वन्तीत्युच्यते, तथा पदान्यपि। अर्थाभिधानेनापि चोपकुर्वत्सु पदेषु नाभिहितान्वयः। अनन्वितेऽर्थे व्युत्पत्त्यभावात्। अनुपगमे वा दुरुपपादः पदार्थानामन्वयः, उपायाभावात्।

ननु अन्वितप्रतिपत्तावाकाङ्क्षासंनिधियोग्यत्वानि उपाय इति चेत् — कस्येय-माकाङ्क्षा? शब्दस्य अर्थस्य प्रमातुर्वा? शब्दार्थयोस्तावत् अचेतनत्वात् नाकाङ्क्षायाः संभवः। फलत इयं तु तत्र तत्र वाचोयुक्तिः, 'शब्दः शब्दान्तर-माकाङ्क्षति, अर्थोऽर्थान्तरम्' इति। (पुरुषाकाङ्क्षोत्थापकत्वात् शब्द आकाङ्क्ष-तीति कथ्यते)। प्रमातुः पुनः स्वतन्त्रस्य आकाङ्क्षा न प्रमाणम्। पुरुषेच्छया वस्तुस्थितेरघटमानत्वात्। शब्दाख्यप्रमाणपृष्ठभावेन तु पुरुषस्याकाङ्क्षा भवन्ती[१] भवत्यर्थानां संसर्गहेतुः इत्येवं शब्दस्यायमिषोरिव दीर्घदीर्घो व्यापारः। उपरत-व्यापारे तु शब्दे पुरुषाकाङ्क्षामात्रं न संबन्धकारणम्।

वाक्यार्थबुद्धेः शाब्दत्वोपपादनम्

शब्दादनुपस्थितस्य शाब्दबोधविषयत्वे वाक्यार्थबुद्धेः अशाब्दत्वमापतेत्। साक्षाच्छाब्दत्वसंभवे पदार्थव्यवधानमयुक्तम्। एष एव हि संसर्गप्रतीतेः पन्थाः। व्यतिषक्तार्थबुद्ध्या व्यतिषङ्गः अवगम्यते, व्यतिषङ्गं विना व्यतिषक्तस्वरूपासिद्धेः।

आह —

अङ्गुल्यग्रादिवाक्येषु कथं तव समन्वयः।

उच्यते —

उक्तानामपि संसर्गे कथं तव समन्वयः॥

---

[१] शब्देनाकाङ्क्षायोग्यानामर्थानां प्रतिपादनात् शब्द एवाकाङ्क्षाजनकः।

आह —

नन्वत्र योग्यताभावादसंसर्ग उपेयते।
आकाङ्क्षादित्रयाधीनः संसर्गो हि मयेष्यते॥

उच्यते —

मयापि योग्यासन्नादिसंसृष्टस्वार्थवाच्यता।
पदानां दर्शिता, सा च तेषु नास्तीत्यनन्वयः॥

आह — अन्विताभिधानवादी हि भवान्। ततश्च —

भवतोऽनभिधानं स्यादन्वयासंभवादिह।

अहं त्वभिहितान्वयवादी। तेन —

मम त्वनन्वितत्वेऽपि नाभिधानं विरुध्यते॥

उच्यते —

कष्टं मीमांसकेनापि भवता सूक्ष्मदर्शिना।
नाद्यापि शब्दव्यापारपरमार्थोऽवधारितः॥
प्रकाशकत्वं शब्दस्य व्यापारो हि निसर्गतः।
पुंसस्तु गुणदोषाभ्यां तस्मिन् सदसदर्थता॥
क्रियाकारकसंसर्गबुद्धिरत्रापि शब्दजा।
तादृश्येवायथार्था तु नरबुद्धिप्रमादतः॥

यदि तु शाब्दोऽन्वयो न भवेत्, कचटतपादिवर्णनिर्देशमात्रमिदं स्यात्, दशदाडिमादिप्रवादतुल्यं वा स्यात्। एवं च "अङ्गुल्यग्रे यूथशतमस्ति" इति वाक्यादन्वयबोधो भवत्येव। स प्रमाणान्तरबाधितविषयत्वादप्रमेत्यावाभ्यामुपेयम्।

अन्विताभिधानवादखण्डनम्

तदेतदपि नानुमन्यते। यदुक्तं वृद्धव्यवहारात् व्युत्पत्तिरिति, तत्सत्यम्। वाक्येन व्यवहार इत्येतदपि सत्यम्। शिबिकोद्यन्तृनरवत् सर्वाणि पदानि कार्ये संहत्य व्याप्रियन्त इत्येतदपि सत्यमेव।

व्युत्पत्तेः पदार्थपर्यन्तत्वम्

व्युत्पत्तिस्तु चिन्तनीया — किमेकघनाकारसंघातकार्यनिष्ठैव सा, किं वा पदार्थपर्यन्ता इति। पूर्वस्मिन् कल्पे प्रतिवाक्यं व्युत्पत्तिरपरिहार्या। सा च बहुप्रमादा। पदार्थपर्यन्तायां तु व्युत्पत्तौ नूनं निर्धारणीयम् "इयान् पदस्यार्थः" इति। भवद्भिरपि शकटावयवदृष्टान्तवर्णनेन पदव्यापारनिर्धारणमङ्गीकृतमेव। इतरथा हि पदार्थनियमानपेक्षणे "गामानय" इति विवक्षावान् अश्वपदमपि निमित्ततयो-

पाददीत। न हि वैयाकरणानामिव भवतामनपेक्षितपदार्थ एव वाक्यार्थप्रत्ययः। तदसौ यावान् आवापोद्वापपर्यालोचनया गोपदस्यार्थो निर्धार्यते, तावानेव संघातेऽपि व्याप्रियमाणस्य तस्यार्थः।

संसर्गांशे न अभिधात्री शक्तिः

ननु आकाङ्क्षितयोग्यसंनिहितार्थान्वितः गोपदस्यार्थ इत्युक्तम्। नैतद्युक्तम्। सर्वदा संहत्य व्याप्रियमाणमेतत्पदं पश्यतस्तवायं भ्रमः। अर्थस्तावानस्य, यावति अभिधात्री तस्य शक्तिः। कियति तस्याभिधात्री शक्तिः? कियति तस्यानभिधात्री शक्तिः? यावत्तमर्थमन्योन्यमाकाङ्क्षितैश्च संनिहितैश्च संयुज्यमानं न मुञ्चति। कियन्तं च न मुञ्चति? गोत्वमात्रं, तद्वन्मात्रं वा इत्यतः तावत्येवाभिधात्री शक्तिरन्वयव्यतिरेकाभ्यामस्य निर्धार्यते। अतः परम् एकस्य पदस्याप्रयोगात् सर्वदा संघातकार्यरहितकेवलस्वकार्यचातुर्यानवधारणात् प्रधानकार्ये तात्पर्यशक्तिरस्य व्याप्रियते, नाभिधात्री। तां च पृथगविवेचयता भवता अन्विताभिधानमभ्युपगतम्। तच्च न युक्तम्। सर्वत्राभिधात्र्याः शक्तेरविशेषात्, पदार्थनियमानवधारणं, पदान्तरोच्चारणवैफल्यमित्यादिदोषाणामनपायात्। अन्विताभिधानाभ्युपगमे हि एकैकस्य सर्वार्थाभिधानशक्तिः अविशिष्टा। अन्यथा अभिधानाभावप्रसङ्गात्। ततश्च पदार्थेयत्तावधारणं पदान्तरोच्चारणसाफल्यं च न सिध्यति। तात्पर्यशक्त्यङ्गीकारे हि एतावति अभिधात्र्येव शक्तिः, न तात्पर्यशक्तिरिति पदार्थेयत्तासिद्धिः। अत एव पदान्तरोच्चारणमपि सफलम्। तदन्वितार्थाभिधानेऽभिधात्र्याः शक्तेरव्यापृतेः।

किं च येनार्थेनान्वितमर्थमभिदधाति गोशब्दः, तदनभिधाने तदन्वितानवगमात्, येन सह संसर्गः स न गृह्यते, तत्संसृष्टश्च गृह्यत इति विप्रतिषिद्धं स्यात्। तदभिधाने वा तद्वत् सर्वाभिधानमिति एकमेव गोपदं सर्वार्थं भवेत्। तस्मान्न संसर्गांशेऽपि अभिधात्री शक्तिः पदस्योपपद्यत इति नान्विताभिधानम्।

अन्विताभिधानपक्षे च कथम् "अङ्गुल्यग्रे यूथशतमस्ति" इति वाक्ये नान्वयः स्यात्? शाब्दोऽस्त्येव समन्वय इति चेत् — अर्थासंस्पर्शी शब्दः प्राप्नोति, बाह्यान्वयाभावात्। प्रकाशकत्वमात्रं व्यापार इति चेत् बाढम् — तत्तु अनन्वितविषयं वेदितुं, न पुनरन्वितविषयमेवेति शक्यते नियन्तुम्। दशदाडिमादिवाक्यमनन्वितार्थप्रतिपादकमपि दृश्यते यतः। न तद्वाक्यमिति चेत् — अङ्गुल्यग्रवाक्यमपि न वाक्यम्। आधाराधेयक्रियासंसर्गप्रतीतिस्तु भ्रममात्रम्। तस्मात् अन्वितमर्थमभिदधति पदानीत्यसमीचीनम्।

अभिहितान्वयवादः[१]

शब्दात् पदार्थप्रतिपत्तौ वाक्यार्थप्रतिपत्तिः इति अभिहितान्वयवादः। तथा च भाष्यं[२] — "पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीमवगताः पदार्था एव वाक्यार्थमवगमयन्ति" इति।

तत्खण्डनम्

न पदार्थेभ्यो वाक्यार्थावगतिः। अपि तु वाक्यादेव। तथा चायं वाक्यार्थ इति प्रसिद्धिः, न पदार्थार्थः इति। पदार्थनिमित्तकत्वे वाक्यार्थप्रत्ययस्य, पदार्थाख्यसप्तम-प्रमाणस्वीकारप्रसङ्गश्च।

तात्पर्यशक्त्या वाक्यार्थप्रत्यय इति स्वमतम्

तस्मात् पक्षद्वयमपि न क्षेमाय। तात्पर्यशक्त्या वाक्यार्थप्रत्यय इति पक्ष एव श्रेयान्। "स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि" इति कथयन् यदर्थतात्पर्यकानि पदानि तत्रानिवृत्तव्यापाराण्येवेति सूचयति। एवं हि शाब्दता वाक्यार्थप्रत्ययस्य न हास्यते। सर्वात्मना तु विरतव्यापारे शब्दे सा अवश्यं हीयते। शब्दावगति-मूलकत्वात्तु शाब्दत्वे श्रौत्रत्वमपि स्यात्, श्रोत्रस्य परम्परया मूलत्वात्। तस्मात् वर्णेभ्य एव कयाचित् कल्पनया पदभावमुपगतेभ्यः पदार्थवाक्यार्थप्रत्यय इति युक्तम्। अतः पदार्थजन्या न भवति वाक्यार्थबुद्धिः, किन्तु अनुपरतव्यापारात् वाक्यादेवोद्भवति।

अन्वीयमानाभिधानम्, अभिधीयमानान्वयश्चेति पक्षौ[३]

अन्या तु वाचोयुक्तिः कैश्चित् कृता, अन्वीयमानाभिधानम्, अभिधीय-मानान्वयश्चेति। अयं तेषामाशयः — पदार्थान्तरेणान्वयं गच्छन् पदार्थः पदैरभि-धीयत इति पक्षेऽन्वितस्यानभिधानात् पदार्थनियमानवधारणपदान्तरवैफल्यादि-दोषानवकाशः। अभिधीयमानानां = शब्दैः प्रतिपाद्यमानानाम्, अन्वय इति द्वितीयपक्षे अभिहितान्वयपक्षोक्तः वाक्यार्थस्याशाब्दत्वमिति दोषो नास्ति। अभि-धीयमानानाम् = अभिधाविषयत्वमजहतां, हि योऽन्वयः स कथमशाब्दः स्यादिति।

इयमुक्तिः न हृदयंगमा। अभिधानक्रिया अन्वयक्रियेति द्वयोः क्रिययोः पृथगनुपलम्भात्। ते हि क्रमेण वा स्यातां युगपद्वा? क्रमेणेति पक्षे पूर्वमन्वयक्रिया

---

[१] न्या.मं, आ.६.भा.२.पृ.१८७.
[२] शा.भा.१.१.७.२५.
[३] न्या.मं, आ.६.भा.२.पृ.२१४.

चेत् तदिदमन्विताभिधानमेव, नान्वीयमानाभिधानम्। अभिधानक्रिया पूर्वं चेत् अभिहितान्वय एव, नाभिधीयमानान्वयः। युगपत्तु क्रियाद्वयसंवेदनं नास्ति। अर्थगतायाः अन्वयक्रियायाः शब्दप्रयोगकालेऽनुपलम्भात्।

अभिधानक्रियैवैका तदभिज्ञैः परीक्ष्यते।
अन्वीयमानतार्थानामभिधानाद्विना कुतः॥

"गौः शुक्लः" इति जातिगुणयोः एकद्रव्यसमवेतयोरपि शब्दमन्तरेण कुतः अन्वयम् अवगच्छामः।

उक्तेर्नूतनतैवेयं न पुनर्वस्तु नूतनम्।
न चात्रापि निवर्तन्ते दोषाः पक्षद्वयस्पृशः॥

दोषा इति। अन्वीयमानाश्चेत् अभिधीयन्ते तदा एकेनैव पदेनेतरपदार्थान्वीयमानस्य अभिधानात् पदान्तरनैरर्थक्यमित्यादि समानम्। अभिधीयमानानां चान्वये पुनरपि अशाब्दत्वम्। शब्दव्यापारस्य शुद्धाभिधानक्रियायामेवोपक्षीणत्वात्।

सामान्येनान्विताभिधानं, विशेषतश्चाभिहितान्वय इति मतम्

अन्ये मन्यन्ते — सामान्येनान्विताभिधानम्, विशेषतश्च अभिहितान्वय इति। गोशब्दो हि स्वार्थम् अनवगतविशेषगुणक्रियासामान्यान्वितमभिधत्ते, तावता अन्विताभिधानम्। शुक्लादिगुणविशेषसंबन्धस्तु पदान्तरादवगम्यते। सोऽयं विशेषतः अभिहितान्वय इति।

एतदपि तादृगेव। क्रियापदेन कारकसामान्यान्वितस्वार्थप्रतिपादनात् कारकपदनैष्फल्यादि समानम्। न च कारकविशेषप्रतिपत्तये कारकपदोच्चारणमिति वाच्यम्। पदानां सामान्यप्रतिपत्तावेव चरितार्थत्वात् विशेषप्रतिपत्तेरशाब्दत्वम्, विशेषान्वयस्यैव वाक्यार्थत्वात्। तथा च —

दोषोऽन्विताभिधाने यः सामान्येऽपि स तादृशः।
दोषस्तुल्यो विशेषेऽपि यश्चोक्तोऽभिहितान्वये॥

न चेदमपूर्ववस्तु वर्णितम्, अभिहितान्वयवादिनो विशेष एवाभिहितान्वयमिच्छन्ति। सामान्येऽपि हि पदं, वर्तते विशेषे वाक्यम्। वाक्यार्थप्रतीतये एवाभिहितान्वयवाद आश्रीयत इति प्राक्तन एवेष्टः पन्था वेदितव्यः।

जयन्तभट्टस्य स्वमतम्[१]

कथं तर्हि आभिधानिको व्यवहारः। संकुलमिव एनं पश्यामः। सर्वत्र दोषसंभवात्। उच्यते। न कदाचिदत्र संकुलता। संहत्यकारीणि हि पदानीत्युक्तम्।

---

[१] न्या.मं, आ.६.भा.२.पृ.२१५.

समुदितैः पदैः एको वाक्यार्थः प्रत्याय्यते। स च गुणभूतेतरपदार्थसंसृष्टः पदार्थ एवेति किमत्र संकुलम्।

संहत्य पदानामर्थप्रत्यायकत्वम्

ननु किमयमन्विताभिधानपक्षः पुनरुत्थापयितुमिष्टः। मैवम्। नेदमन्विताभिधानम्। कथं तर्हि संहत्यकारिता पदानाम्। उच्यते। संहत्यकारिताप्यस्ति, न चान्विताभिधानम्। अन्वितमर्थं पदानि संहत्य संपादयन्ति, न त्वेकैकशोऽन्वितम् अभिदधति। किमिदानीं कुर्वन्ति वाक्यार्थं पदानि, घटमिव मृदादीनि। एतदपि नास्ति, ज्ञापकत्वात् तेषाम्। का तर्हीयं वाचोयुक्तिः संहत्यकारीणि पदानि, न चान्वितमभिदधतीति। इयं वाचोयुक्तिः पदान्यन्वितं प्रत्याययन्ति, नान्वितमभिदधति। नाभिधात्री शक्तिरन्वितविषया। किं तु अन्वयव्यतिरेकावगतनिष्कृष्ट(अनन्वित)स्वार्थविषयैव। तात्पर्यशक्तिस्तु तेषाम् अन्वितावगमपर्यन्ता, सह व्यापारात्। सह व्यापारस्य च तदीयस्य निराकाङ्क्षप्रत्ययोत्पादनपर्यन्तत्वात्।

यतो हि प्रत्यक्षाद्युद्भवा धियः कदाचित् पूर्णम्, कदाचित् अपूर्णं च पुरतः स्थितं वस्तु प्रदर्शयन्ति। दूरात् सामान्यमात्रग्रहणे नियतव्यक्तिपरिच्छेदकारित्वाभावात्। शाब्दी बुद्धिस्तु तद्विलक्षणा प्रतिपत्तुः अनाकाङ्क्षप्रत्ययोत्पादनावधिः। अत एव लोके केवलं पदं न प्रयुज्यते। तस्य निराकाङ्क्षबुद्ध्युत्पादकत्वाभावात्। संसर्गप्रत्ययस्तु वाक्यगततात्पर्यशक्त्या। तथा च —

अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः॥
संहत्यकारितापक्षे दोषो नैकोऽपि विद्यते।
तेनायमुपगन्तव्यो मार्गो विगतकण्टकः॥
तेनान्विताभिधानं हि नास्माभिरिह मृष्यते।
अन्वितप्रतिपत्तिस्तु बाढमभ्युपगम्यते॥

संहत्यकारकत्वाच्च पदानां न स्वार्थाभिधित्सयैव समुच्चारणम्, अपि तु प्रधानं कार्यमेव कर्तुम्। तदुक्तं[१] —

"वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥" इति।

---

[१] श्लो.वा.वाक्य.३४३.

चित्सुखाचार्येण संगृहीतः वाचस्पतिमतः अभिहितान्वयवादः[1]

तत्त्वबिन्दुग्रन्थरीत्या वाचस्पतिमतः अभिहितान्वयवादः चित्सुखाचार्येण संगृहीतः। यथा —

तत्त्वबिन्दौ वाचस्पतिमिश्राः अन्विताभिधानपक्षे इमान् दोषान् प्रदर्शयन्ति — पदानामेवान्योन्यान्वितस्वार्थाभिधायकत्वस्वीकारे "गामानय" इत्यत्र किमनभिहितेन पदार्थेनान्वितं स्वार्थमभिधत्ते गोपदम्? उत पदान्तराभिहितेनार्थेनान्वितं स्वार्थमभिधत्ते? नाद्यः, एकस्मादेव पदात्तत्तदर्थान्वितस्वार्थबोधसंभवेन पदान्तरवैयर्थ्यात्। न द्वितीयः। परस्पराश्रयप्रसङ्गात्। तथा हि — "गामानय" इत्यत्र यावत् आनयपदेन गोपदार्थान्वितस्वार्थो नाभिधीयते, न तावत् गोपदं तदन्वितस्वार्थमभिधातुं शक्नोति। एवमानयपदमपि यावत् स्वार्थान्वितमर्थं गोपदं नाभिदध्यात्, तावत् गोपदार्थान्वितस्वार्थं नाभिधत्ते। ततश्च गोपदेन आनयनान्वितस्वार्थेऽभिहिते पश्चादानयपदेन गवान्वितस्वार्थोऽभिधातव्यः। सति च तस्मिन् गोपदेन आनयनान्वितस्वार्थोऽभिधातव्य इति व्यक्तमेव परस्पराश्रयत्वम्।

न च नात्र परस्पराश्रयताया अवतारः, परस्परनिरपेक्षाणि प्रथमं पदानि पदार्थान् असंसृष्टानभिधाय पश्चात् अन्योन्यान्वितांस्तानेव पदार्थानभिदधत इति वाच्यम्। तथा सति द्विरभिधानमप्रमाणकमनुपपद्यमानं चापद्येत। तथा हि — संसृष्टांशेऽपि चेत् पदानि गृहीतसंगतिकानि, तदा तमपि प्रथममेवाभिदध्युः। अगृहीतसंगतिकत्वे पश्चादपि नाभिदध्युः इत्यस्त्येवानुपपत्तिः। सकृत् प्रयुक्तस्य शब्दस्य विरम्य व्यापारानुपपत्तिर्वा अनुपपत्तिपदेन विवक्षिता।

ननु न प्रथममभिधायकानि पदानि, येन द्विरभिधानं प्रसज्येत। अपि तु प्रथमं पदार्थेषु स्मृतिरेव जायते, सहचरितदर्शनात्। सहचरितानि हि पदार्थैः प्रथमं पदान्यनुभूतानि, देवदत्तदर्शनादिवत् तत्सहचरितयज्ञदत्ते। अनन्तरं तु संसृष्टदशायां स्मारितानां पदार्थानामभिधानमिति चेत् —

साहचर्यदर्शनदशायामन्वितानामेवानुभूततया तथैव स्मरणस्यावश्याश्रयणीयत्वात्। न हि पदं पदार्थमात्रप्रतिपत्तये प्रयुज्यते, किं तु व्यवहाराय। व्यवहारश्चान्वित एवेति कथमनन्वितानां पदार्थानां पदेभ्यः स्मृतिः स्यात्। एतदुक्तं भवति। व्यवहारसमर्थसंसृष्टपदार्थैः साहचर्यात् तादृगर्थस्मारकपदानां पदार्थमात्रस्मारकत्वम् अप्रसिद्धमिति। न चान्वितस्मारकत्वमेवास्तु पदानामिति वाच्यम्। तथा सति "गां पश्य" इति प्रयोगे गोपदेन, "गामानय" इत्यत्र पूर्वानुभूतानयनान्वितगोत्वस्य स्मारितत्वात् पश्येतिपदमनाकाङ्क्षितार्थकमसंगतं प्रसज्येत।

---

[1] तत्त्वप्रदीपिका, प्रथमपरिच्छेदे, पृ.१४५.

एवं "पश्य" इति पदेन, "प्रासादं पश्य" इत्यत्र पूर्वानुभूतप्रासादान्वितदर्शनस्य स्मारितत्वात् गोपदमनाकाङ्क्षितार्थकमसंगतं प्रसज्येत। एवं च वाक्यार्थः क्वापि परिनिष्ठितो न सिध्येत्।

ननु "गामानय", "गां पश्य", "गां बधान" इत्यादौ अव्यभिचारात् गोत्वस्य, गोपदं तदेव स्मारयति, न तु बन्धनादिकं व्यभिचारित्वादिति चेत् — मैवम्। पट्वभ्यासादरप्रत्ययैराहितायाः भावनायाः[१] प्रबोधवत्याः स्मरणहेतुत्वाङ्गीकारात्, तत्प्रबोधस्य च व्यभिचारिण्यर्थान्तरेऽपि स्मृतिहेतुत्वेन परिगणितसाहचर्यजन्यस्याविशेषात्। परिगणिता हि स्मृतिहेतवः "प्रणिधानाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसंबन्धानन्तर्यवियोगैककार्यविरोधातिशयव्याप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्माः" इति न्यायसूत्रकारेण[२]। इह च साहचर्यं योग्येतरान्वयस्यापि स्मरणहेतुः।

अन्विताभिधानवादे उक्तदोषसद्भावात् पदैः अभिहिताः पदार्थाः एव आकाङ्क्षादिमन्तः पदलक्षणया परस्परान्वयं बोधयन्तीति अभिहितान्वयवाद एव युक्तः।

अभिहितान्वयवादे आक्षेपः

पदार्था एव पदैः अभिधीयन्ते, तदन्वयस्तु लक्ष्यत इति यस्य अभिहितान्वयवादिनो मतं, तेनापि पदार्थविषयाः प्रत्ययाः प्रमात्वेन नाभ्युपगन्तुं शक्याः, अनधिगतार्थगन्तृत्वाभावात्। नापि विपर्ययत्वेन संशयत्वेन च। यथार्थनिश्चयत्वात्। अतः परिशेषात् स्मृतय एव एष्टव्याः। ताश्च न पदार्थमात्रगोचराः। सहचरितदर्शनात् खल्वयं संस्कारोद्बोधः। साहचर्यं चान्वितैः पदार्थैः, नानन्वितैरिति आयुष्मतैव आवेदितम्। तथा च कथं त्वन्मतेऽपि प्रथमं पदार्थमात्रस्य स्मरणम्।

ननु द्विविधा पदजनिता स्मृतिः, साहचर्यात् अभिधानाच्च। तत्र साहचर्यमन्विते। अभिधानं तु पदार्थमात्रे। अभिधानतः यत् स्मारितं तदेव वाक्यार्थान्वयोपयोगि नेतरदिति ब्रूमः। "देवदत्त गामानय" इत्यादौ देवदत्तसहचरितयज्ञदत्तादेः अन्वयादर्शनात् ततो वैषम्यमिति चेत् — न। "गङ्गायां घोषः प्रतिवसति" इत्यादौ पदानभिहिततीरादीनां वाक्यार्थानन्वयप्रसङ्गात्। एतदुक्तं भवति — यदि हि अभिधानेन स्मारितमेव वाक्यार्थोपयोगि, तर्हि तीरादिपदार्थानां वाक्यार्थान्वयो न स्यात्। तेषामभिधानाभावात् मुख्यार्थसाहचर्यादेव स्मृतत्वात् इति।

---

[१] भावना = संस्कारः। सकृत् गृहीतेऽपि तटिदादौ पटुप्रत्ययः। कण्डिकादावभ्यासप्रत्ययः। अद्भुतेष्वादरप्रत्ययः।

[२] न्या.सू.३.२.४२। परन्तु इदानीं "प्रणिधाननिबन्धाभ्यास°" इति पठ्यते।

अत एवं वक्तव्यम्। अभ्यासातिशयः पदार्थस्मरणहेतुः। अभ्यासश्च यथा पदानां स्वार्थेषु, न तथा अर्थान्तरेषु। तेषां व्यभिचारित्वात्। तथा च स्वरूपमात्रेणैव पदेभ्यः स्मारिताः पदार्थाः आकाङ्क्षादिमन्तः पदैरन्विता अभिधीयन्त इति न परस्पराश्रयता।

नापि पदान्तरानाकाङ्क्षा। आकाङ्क्षा हि प्रतिपत्तुः जिज्ञासा। सा चाभिधानापर्यवसानात् अभिहितार्थापर्यवसानाद्वा भवति। यथा "वृक्षः" इत्यत्र प्रातिपदिकार्थमात्रे प्रथमाविभक्तेः स्मरणात् वृक्षप्रातिपदिकार्थः केनान्वित इति विमर्शे, न तावत् "वृक्षं" "वृक्षैः" इत्यादौ कर्मकरणादिभिरिव विभक्त्यर्थेन। स्वस्य स्वेनान्वयासंभवात्। न चान्योऽभिहितोऽस्ति। अतस्तत्राभिधानपर्यवसानायैव आकाङ्क्षा। 'तिष्ठति' इत्यनेनाध्याहृतेनान्वयेन चाकाङ्क्षा शाम्यति। यथा वा "विश्वजिता यजेत" इत्यत्र कार्यस्य विषयकरणान्वितया प्रतीतस्यापि अपर्यवसानात् विशिष्टाधिकारिणः स्वर्गकामस्य कल्पना। विषयनियोज्यविशिष्टो हि नियोगः अनुष्ठानाय कल्पते इति विषयवत् नियोज्येऽप्यस्त्येवाकाङ्क्षा। तथैव प्रकृतेऽपि आकाङ्क्षावशात् पदानामन्विताभिधायकत्वं न विरुध्यते।

ननु तथापि पदानामन्विताभिधाने सामर्थ्यं न कल्पनीयम्, पदस्मारितानामेव पदार्थानामाकाङ्क्षादिवशादन्योन्यान्वयप्रत्यायकत्वसंभवात् इति चेत् —मैवम्। मानान्तराधिगतानां पदार्थानां वाक्यार्थप्रत्यायकत्वादर्शनात्।

ननु —

"पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः॥"

इति वार्त्तिकोक्तरीत्या[१] प्रत्यक्षाद्युपस्थितानामप्यर्थानां परस्परान्वयबोधकत्वमस्त्येव। अत्र हि दृश्यमानम् अव्यक्तं श्वेतरूपं श्रूयमाणौ च हेषाखुरनिक्षेपशब्दौ "श्वेतोऽश्वो धावति" इति संसर्गबुद्धिं जनयन्तीति चेन्न।

अनुमानादर्थापत्तेर्वा तत्र संसर्गावगमात्। तथा हि — यत्र हि एतत्त्रयमेकाश्रयवृत्तितयावगतं तत्राश्वत्वं दृष्टमिति व्याप्त्या संसर्गबोधकत्वेनानुमानानतिरेकात्। एकार्थवृत्तित्वं विना तेषां त्रयाणां विशकलिततया ज्ञाने च अश्वातिरिक्तार्थान्तराभावे निश्चितेऽर्थापत्तिरेव। तस्मिन्ननिश्चिते तु संसर्गावगम एव न भवतीति।

अपि च वाक्यार्थप्रत्ययस्य शब्दजन्यत्वाभावे पदार्थजन्यत्वे च पदार्थाख्यं सप्तमं प्रमाणमभ्युपगन्तव्यं स्यात्। प्रत्यक्षादिषु तस्यानन्तर्भावात्।

[१] श्लो.वा.वाक्य.३५८.

किं च पदार्थानां पदानभिहितानां संसर्गबोधकत्वाभावात् अभिहितानामेव तदेष्टव्यम्। तथा च पदार्थानां संसर्गप्रत्ययजननसामर्थ्यं, पदानां च पदार्थेषु तत्सामर्थ्याधानसामर्थ्यमिति द्वयं कल्पनीयम् इति कल्पनागौरवम् अभिहितान्वयवादिनः। अन्विताभिधानवादिनस्तु पदानां योग्येतरान्वितस्वार्थाभिधानसामर्थ्यमेकमेव कल्पनीयमिति लाघवम् इति।

अभिहितान्वयवादिसमाधानम्[1]

अत्राहुरभिहितान्वयवादिनः —

पदकदम्बकश्रवणसमनन्तरमपि कस्माच्चित् मानसापराधात् यस्य पुंसः पदार्थस्मृतिर्न जाता तस्य वाक्यार्थबुद्धिर्नोदेति, यस्य तु पदार्थस्मृतिर्जाता तस्य वाक्यार्थबुद्धिः उदेति इत्यन्वयव्यतिरेकाभ्यां पदार्थस्मृतीनां वाक्यार्थबुद्धिहेतुत्वं निश्चीयते।

न च पदार्थस्वरूपमात्रविषयकस्मृतीनामन्योन्यान्वयबोधकत्वमनुपपन्नम्, अन्यत्र अदृष्टत्वात् इति वाच्यम्। स्मरणमात्रस्य सामर्थ्याभावेऽपि समभिव्याहृतपदसमूहसमुपजनितपदार्थस्मृतीनाम् आकाङ्क्षादिसहकारिविशेषसंबन्धात् तद्बोधकत्वसंभवात्। यथान्यत्र विभिन्नविषयनिष्ठतया दृष्टयोश्चक्षुस्संस्कारयोः प्रत्यभिज्ञायां सहकारिवैचित्र्यवशात् पूर्वापरदेशकालसंसृष्टैकवस्तुबोधकत्वं, तथा अत्रापि संभाव्यते।

न च पदार्थस्मृतीनां स्मृतानां वा पदार्थानामन्वयबोधकत्वे सप्तमप्रमाणाङ्गीकारप्रसङ्ग इति वाच्यम्। लिङ्गप्रकरणस्थानानामिव शब्दप्रमाणान्तर्भावोपपत्तेः। यथा हि श्रुतिवाक्यसमाख्यानां शब्दरूपत्वेऽपि लिङ्गप्रकरणस्थानानां न शब्दरूपत्वम्, अथ च न शब्दात् पृथक्प्रमाणत्वं, तथेहापि।

ननु लिङ्गादिषु श्रुतिं कल्पयित्वैव विनियोगप्रतीतेः स्वीकारात् शाब्दत्वं न विरुध्यते। इह तु पदार्थस्मृतीनां स्मृतानां वा पदार्थानाम् अन्वयबोधकत्वमिति वैषम्यम्। शब्दावगतपदार्थजन्यत्वेनान्वयप्रतीतेः शाब्दत्वे चक्षुरवगतधूमजन्यवह्न्यनुमितेश्चाक्षुषत्वप्रसङ्ग इति चेत् —

न वयं शब्दावगतपदार्थजन्यत्वमात्रात् अन्वयप्रतीतेः शाब्दत्वं वदामः, येनानुमितेरपि चाक्षुषत्वप्रसक्तिः। किं तु शब्दावान्तरव्यापाररूपपदार्थस्मरणजन्यत्वात्। न च चक्षुषो लिङ्गज्ञानमवान्तरव्यापारः। उक्तं हि भट्टपादैः[2] —

> "साक्षात् यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
> वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥

---

[1] त.प्र.पृ.१४९.

[2] श्लो.वा.वाक्य.३४२, ३४३.

वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥" इति।

न च तथापि पदार्थस्मृतिभिर्व्यवधानात् कथं पदानामन्वयप्रतीतिं प्रति करणत्वम्। कार्याव्यवहितपूर्वभाविन एव करणत्वात् इति वाच्यम्। तथा सति अपूर्वव्यवहितानां यागादीनां फलं प्रति करणत्वाभावप्रसङ्गात्। गुरुमतानुसारिभिरपि लिङ्गप्रकरणादीनाम्, अन्तरेणैव श्रुतिकल्पनं विनियोजकानां शब्दप्रमाणान्तर्भावाभ्युपगमाच्च।

अभिहितान्वये दोषशङ्कापरिहारौ

ननु त्वयाप्यभिहितान्वयवादे तिस्रः शक्तयः कल्पनीयाः। पदानां तावत् अर्थस्वरूपानुभवजननशक्तिः, अर्थानां चान्योन्यान्वयानुभावनशक्तिः, अर्थगतताद‍ृशशक्त्याधानशक्तिश्च पदानामिति। पदानां साहचर्यवशादेवार्थस्मारकत्वं न तु शक्त्येति पक्षे च शक्तिद्वयं कल्पनीयं — पदार्थानामन्वयबोधनशक्तिः, तद्गततच्छक्त्याधानशक्तिश्च पदानामिति। अन्विताभिधानवादे तु पदानामन्योन्यान्वितस्वार्थाभिधानशक्तिरेकैवेति कल्पनालाघवमिति चेत् —

मैवम्। त्वयापि अर्थान्तरे तदन्वये स्वार्थे च पदशक्तीनां कल्पनीयत्वात्। न चार्थान्तरान्वितस्वार्थबोधकमपि पदं स्वार्थस्यैव वाचकम्, नार्थान्तरतदन्वययोः, जातिवाचकं पदं व्यक्तितदन्वययोरिवेति वाच्यम्। विकल्पासहत्वात्। जातिवाचकपदेन व्यक्तेर्लक्ष्यत्ववत् किम् अर्थान्तरतदन्वययोः लक्ष्यत्वम्, उत वाच्यत्वम्। नाद्यः, पदानामन्विताभिधानभङ्गप्रसङ्गात्। वाच्यत्वे तयोरपि शक्तेरवश्यकल्पनीयतया गौरवतादवस्थ्यात्।

किं च एकैकस्य पदस्य श्रूयमाणस्य स्मर्यमाणस्य वा तत्तत्पदार्थस्मरणोत्पादनशक्तिः, पुनः एकस्मरणगोचराणां च तेषामेव पदानामन्योन्यान्वितपदार्थाभिधानशक्तिः, सकलपदगोचरस्य स्मरणस्य पदेषु अन्विताभिधानशक्त्याधानशक्तिश्चेति शक्तित्रयकल्पनमन्विताभिधानवादेऽपि तुल्यम्। एषा हि तेषां परिपाटी —प्रथमं श्रूयमाणैः स्मर्यमाणैर्वा पदैः अन्योन्यासंसृष्टा अर्थाः प्रत्याय्यन्ते। अन्त्यपदोच्चारणानन्तरं च एकस्मृत्यारूढानि तान्येव पदानि पदार्थान् अन्योन्यान्विततया प्रतिपादयन्तीति। तथा च पदार्थमात्रेषु संसृष्टपदार्थेषु च प्रत्ययाधाने पदानां सामर्थ्यद्वयम्, सकलपदविषयकस्मरणस्य सकलपदेषु अन्विताभिधानसामर्थ्याधानसामर्थ्यं तृतीयम्, एकस्मृत्यनारूढपदानां तत्सामर्थ्याभावात् इति।

ननु शक्तित्रयकल्पनायामुभयोः समानायां कोऽयमाग्रहः यदभिहितान्वयवाद एव श्रेयान् इति, इति चेत् — विशिष्टार्थबोधनोद्देश्यकपदकदम्बकसमभिव्याहारान्यथानु-

पपत्त्या स्वीकार्यस्य पदस्मारितानामर्थानामन्योन्यान्वयस्य पदेभ्यः लक्ष्यमाणत्वेनोपपत्तेः, शक्तेः अकल्पनीयत्वात्। 'अनन्यलभ्यः शब्दार्थः' इति न्यायात्।

लक्षणालक्षणानुपपत्तिशङ्का, तत्समाधानं च[१]

ननु परस्परान्वये पदानां लक्षणा न भवितुमर्हति। लक्षणालक्षणाभावात्। तथा हि —

"वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः।
तत्संबन्धवशप्राप्तस्यान्वयात् लक्षणोच्यते॥"

इति[२] लक्षणायाः लक्षणम्। वाच्यस्यार्थस्य = प्रवाहादिरूपस्य, वाक्यार्थे = घोषप्रतिवासादिरूपे, संबन्धानुपपत्तौ सत्यां वाच्यार्थसंबन्धवशात् प्राप्तस्य = तीरादेः, वाक्यार्थान्वयात् हेतोः, या शब्दस्य तत्र प्रवृत्तिः सा लक्षणेति श्लोकार्थः। प्रकृते "चैत्रः पिठरे ओदनं पचति" इत्यादौ चैत्रपिठरादीनामर्थानां वाक्यार्थे संबन्धानुपपत्तिर्नास्ति। पदार्थसंबन्धवशात् प्राप्तायाः अन्वितावस्थायाः पुनर्वाक्यार्थेऽन्वयोऽपि नास्ति। न ह्यत्र वाक्यार्थद्वयमस्ति, येन लक्ष्यमाणवाक्यार्थस्य वाक्यार्थसंबन्धो भवेत्, स्वस्यैव स्वसंबन्धानुपपत्तेः इति चेत् —

नेदं लक्षणायाः लक्षणम्। "विषं भुङ्क्ष्व" इत्यादौ अव्याप्तेः। तत्र हि सर्वेषां पदानां भोजननिवृत्तौ लक्षणास्वीकारात् वाच्यार्थाभावात्, वाच्यार्थाविनाभूतस्य वाक्यार्थेन पुनरन्वयाभावाच्च। न हि भोजननिवृत्तिव्यतिरेकेणापरो वाक्यार्थः अस्ति, येनान्वियात्।

यदपि —

"मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे।
मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते॥"

इति[३] लक्षणायाः लक्षणमुक्तम्। तस्यायमर्थः — मुख्यार्थस्य परिग्रहे मानान्तरविरोधे सति मुख्यार्थेनाविनाभूते संबद्ध इति यावत्, "मञ्चाः क्रोशन्ति" इत्यत्राविनाभावादर्शनात्। तस्मिन् संबद्धे या प्रतीतिः सा लक्षणोच्यत इति। तदप्यव्याप्तिदुष्टम्। कुण्डपायिनामयने "मासमग्निहोत्रं जुहोति" इत्यत्र एतल्लक्षणाव्याप्तेः। "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" इति श्रूयमाणत्वात् प्रसिद्धाग्निहोत्रे चोपसदामभावात् कर्मान्तरेऽग्निहोत्रशब्दः प्रसिद्धाग्निहोत्रसाधर्म्यात् लक्षणया वर्तते। न च तत्र प्रमाणान्तरविरोधोऽस्ति। तदर्थस्य मानान्तरागोचरत्वात्।

---

[१] त.प्र.पृ.१५१.
[२] प्र.पं.पृ.३९८.
[३] उत्तरार्धम् "अभिधेयाविनाभूते" इति व्यत्यस्तं लभ्यते (तं.वा.१.४.१३.२३, भा.२.पृ.१८०)। पूर्वार्धं मृग्यम्।

तस्मात्पदानां पदार्थस्वरूपमात्रपरत्वे वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाक्षेपिकेति तदेव लक्षणं लक्षणायाः। सर्वलौकिकवैदिकलक्षणायां व्यापकत्वात्। तथा हि — "गङ्गायां घोषः प्रतिवसति", "आदित्यो यूपः", कुण्डपायिनामयने "मासमग्निहोत्रं जुहोति" इत्यादावस्ति पदार्थमात्रपरत्वे वाक्यप्रामाण्यानुपपत्तिः।

ननु तत्र वाच्यार्थान्वयानुपपत्तिरप्यस्ति, तत् कथमिदमेव लक्षणमिति नियम्यत इति चेत् — मैवम्।

[१]वाच्यार्थान्वयानुपपत्त्यभावेऽपि लोकवेदयोः लक्षणायाः दर्शनात्। तथा हि लोके —

"सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च योऽभिजानाति सेवितुम्॥" [२]

इत्यादौ पदार्थानामन्वयसंभवेऽपि निष्प्रयोजने तात्पर्यासंभवेन वाक्यप्रामाण्यानुपपत्तेः प्रतीयमानवाक्यार्थं त्यक्त्वा शूरत्वादिकं संपदो हेतुः इति ध्वनिना सूच्यते। तथा वेदे "वायुर्वै क्षेपिष्ठा" इत्यादौ वाच्यार्थानां परस्परान्वयसंभवेऽपि वायुक्षेपिष्ठत्वादिकथनस्य किं प्रयोजनमिति शङ्कायां, देवताप्राशस्त्ये लक्षणया कर्मणः प्राशस्त्यं लक्ष्यते। तस्मात् वाक्यप्रामाण्यानुपपत्तिरेव लक्षणायाः बीजम्।

प्रकृतेऽपि "ओदनं चैत्रः पचति पिठरे" इत्यत्र पदानां समभिव्याहारस्य विशिष्टार्थप्रत्यायनफलकत्वात् तेषां पदार्थस्वरूपमात्रपरत्वे प्रामाण्यानुपपत्तिः। अतः संसर्गे लक्षणा।

स्यादेतत्। न पदानां पदार्थाभिधायकत्वम्, येन तत्सामर्थ्यादधिकं न कल्पनीयं स्यात्। अपि तु साहचर्यवशात् संस्कारोन्मेषकतया स्मारकत्वम्। न चैतदेवाभिधायकत्वम्। अर्थानामपि साहचर्यवशात् शब्दस्मारकाणां शब्दाभिधायकत्वप्रसङ्गात्। ततश्च स्मारकत्वातिरिक्ताभिधाव्यापारस्वीकारे अन्विताभिधानवादस्वीकार इति।

तत्रोच्यते। पदानामेव पदार्थस्मारकाणामभिधातृत्वप्रसिद्धिरस्ति, न तु पदार्थानां पदस्मारकाणाम्। अपि च पदार्थस्मरणजननशक्तिविशिष्टं शब्दविज्ञानमेव अभिधाव्यापार इति स्वीक्रियते, अतो नार्थस्याभिधायकत्वप्रसक्तिः। विज्ञानादतिरिक्तस्य परिस्पन्दप्रयत्नरूपस्य व्यापारस्य विभौ विभुगुणे वा शब्दे चैतन्यानधिकरणे

---

[१] अयं विषयः यद्यपि तत्त्वबिन्दौ नास्ति, तथापि चित्सुखाचार्यस्य तत्त्वप्रदीपिकाग्रन्थात् अत्र संयोजितः। तत्त्वबिन्दूक्तयुक्तीनामेव प्रायः तत्त्वप्रदीपिकायां संकलनात्।

[२] त्रयः पुरुषाः सुवर्णमयपुष्पशालिनीं पृथिवीं चिन्वन्ति, अथ वा पृथिवीं सुवर्णपुष्पां चिन्वन्ति, पृथिव्येव सुवर्णपुष्पा यथा भवति तथा चिन्वन्ति = सम्पादयन्ति। एवं तु नाम बहु सुवर्णमुपार्जयन्तीत्यर्थः। तांस्त्रीन् पुरुषानाह — शूरश्चेति।

दुर्निरूपत्वात्। विभुत्वात् गुणत्वाद्वा परिस्पन्दायोगः। चैतन्यानधिकरणत्वात् प्रयत्नायोगः।

तस्मात् समभिव्याहृतपदकदम्बकस्मारितानां पदार्थानां परस्परान्वयप्रत्ययः लाक्षणिकः शाब्दश्चेति सिद्धम्। तथा चोक्तं मीमांसावार्त्तिककारमिश्रैः[१] —

"न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः।",

"वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थितिः।" इति[२]।

तत्त्वबिन्दौ च वाचस्पतिमिश्रैरुपसंहृतं[३] —

"तस्मादभिधातृत्वमपि नान्विताभिधान इति कल्पनालाघवात् आकाङ्क्षादि-लक्षणसहकारिप्रत्यासन्नैश्च समभिव्याहृतपदस्मारितैः पदार्थैः प्रत्यासत्त्या गम्यमानो वाक्यार्थो लाक्षणिकः शाब्दश्चेति रमणीयम्" इति।

अथ नैयायिकमतोपन्यासः

उदयनाचार्यसंमतः अभिहितान्वयवादः[४]

पूर्वं न्यायमञ्जर्यनुसारेण संहत्य पदानि वाक्यार्थं बोधयन्तीत्यादि तात्पर्य-शक्त्या संहतानां पदानामन्वयप्रतिपादकत्वमिति निरूपितम्। इदानीमुदयना-चार्याणां सिद्धान्तः प्रदर्श्यते। न्यायकुसुमाञ्जलौ तृतीयस्तबकेऽन्विताभिधानवादं खण्डयित्वा अभिहितान्वयवादः समर्थित इव दृश्यते। तथा हि —

अन्विताभिधानखण्डनम्

इदमत्र चिन्त्यते— परपक्षविलक्षणं भवदभिमतं पदानामन्विताभिधायकत्वं नाम किंरूपमिति। न तावत् संसृष्टार्थविषयकशाब्दबोधजनकत्वम्, अन्वितार्थतात्पर्येण पदार्थोपस्थापकत्वं वा; परपक्षाविशेषात्। नापि अन्वितार्थविषयकसंगतिमत्त्वं तत्। संगतिर्हि शक्तिः। तथा च तत्र तत्र वाक्यस्य श्रूयमाणस्य विभिन्नप्रकृतिप्रत्य-यात्मकत्वेन पूर्वमज्ञातत्वात् वाक्यार्थस्याप्यज्ञातत्वात् तच्छक्तेः पूर्वमज्ञातत्वेन संप्रति स्मरणायोगेन बोध एव न स्यादिति।

नापि पदार्थसंगतिबलेन वाक्यार्थप्रतिपादकत्वं तत्। विकल्पासहत्वात्। संगतिरियं पदार्थमात्रविषयिणी वा वाक्यार्थविषयिण्यपि वा। नाद्यः, तस्याः

---

१ श्लो.वा.वाक्य.२२९ ab.

२ बृहट्टीका।

३ त.बिं.पृ.१६१.

४ न्या.कु, तृ.स्त.पृ.२१६-२२२.

पदार्थविषयमात्रव्यापृतत्वेन अन्वयप्रतिपादनायोगात्। नान्त्यः, पदार्थप्रतीतिकाल एव कारणसत्त्वात् वाक्यार्थप्रतीत्यापत्तेः, प्रतीतिक्रमानुपपत्तेः। न चेष्टापत्तिः, योग्यताज्ञानादिरूपकारणाभावेऽपि पदार्थोपस्थितिवत् वाक्यार्थप्रतीत्यापत्तेः।

नाप्येकैव संगतिः अन्यनिरपेक्षं पदार्थप्रतीतिं जनयति, वाक्यार्थप्रतीतौ च पदार्थप्रतिपादनरूपव्यापारद्वारिका भवतीति युक्तम्। करणस्यैव हि लोके व्यापारापेक्षत्वात्। पदानामेव हि त्वन्मतेऽपि करणत्वात्, संगतेश्चाकरणत्वात्।

अथ वाक्यार्थप्रतिपादनानुगुणसंगतिशालित्वात् पदानां करणत्वमिति चेत् — किमिदं संगतिनिष्ठमनुगुणत्वम्? किं वाक्यार्थप्रतिपत्तिकरत्वाश्रयत्वम्, किं वा वाक्यार्थप्रतिपत्तिजनकव्यापारवत्त्वम्। नाद्यः, संगतेः त्वन्मते जातिमात्रविषयकत्वात् मन्मते जातिविशिष्टव्यक्तिमात्रविषयकत्वात् तत्प्रतिपादकत्वानुपपत्तेः। न द्वितीयः, संगतेः अकरणत्वात् व्यापारवत्त्वायोगात्।

अथ वाक्यार्थप्रतिपत्तिजनकपदार्थोपस्थितिरूपपदव्यापारोपयोगित्वमेव संगतेस्तदनुगुणत्वमिति चेत् — अस्मदिष्टमेवेदमन्विताभिधानमिति नावयोर्विवादस्य प्रसक्तिः।

ननु नास्मन्मते जातिमात्रविषयकत्वं शक्तेः, किं तु अन्वयविशिष्टविषयकत्वमिति चेत् दूषितमेवेदं वाक्यार्थापूर्वत्वप्रतीतिक्रमानुपपत्तिरूपहेतुभ्यामिति।

अन्विते पदानां शक्तिः इति आक्षेपः

ननु अन्वित एव संगतिः। तत्र न तावत् वाक्यार्थापूर्वत्वरूपदोषः। "गामानय" इत्यत्र गोपदस्यानयनान्विते शक्तिः इत्युक्तौ हि "गां बधान" इत्यत्र शक्तिग्रहो न स्यात्। न त्वेवम्, पदान्तरस्मारितक्रियान्विते शक्तिः इत्येवोच्यते। पदान्तरस्मारितक्रियात्वेन सर्वक्रियासंग्रहोऽस्त्येव। एवं धातोरपि पदान्तरस्मृतकारकान्वितक्रियायां शक्तिः।

एतेन — सर्वस्य पदस्य कार्यान्विते शक्तत्वे, कार्यवाचिपदस्य कथं कार्यान्विते शक्तिः। तस्य केवले कार्ये शक्तिश्चेत् अन्विते शक्तिरिति नियमभङ्गः — इति निरस्तम्।

सामान्यतः पदान्तरस्मारितार्थान्विते पदस्य शक्तिरिति सिद्धान्तात्, सर्वस्यापीतरान्विते शक्तेरक्षतेः। नापि प्रतीतिक्रमानुपपत्तिरूपदोषः। स्मृतान्विते शक्तेरुक्ततया, स्मृतेः प्रागपेक्षिततत्वात्। तथा च शक्तिर्द्विविधा स्मारिका, अनुभाविका चेति। प्रथमया विशकलितपदार्थस्मृतिः। द्वितीया अन्वितविषयिणी।

न च "गामानय" इत्यत्र गोपदेन क्रियान्वितकारकशक्तेन क्रिया कारकं चोच्यते, धातुनापि तदुभयमिति द्वयोः पर्यायता स्यादिति वाच्यम्। विशेषण-विशेष्यभावात्मकगुणप्रधानभावव्यत्यासात् अर्थविशेषे व्यवस्थितत्वात्। समान-विशेष्यकत्वे हि पर्यायत्वम्। न च "पर्वतोऽग्निमान्", "पर्वतेऽग्निः" इति वाक्य-द्वयेनेव एकेनोक्तस्यैवार्थस्य अन्येन कथनात् पदयोः पुनरुक्ततेति वाच्यम्। गोपदस्य सामान्यतः स्मृतक्रियामात्रान्वितगोपिण्डार्थकत्वात् आनयनरूपक्रिया-विशेषस्य धात्वभावेऽलाभेनापौनरुक्त्यात्।

न च कारकपदं, क्रियापदेन क्रियायां बोधितायां तद्विशिष्टं कारकं बोधयति; क्रियापदं च, कारकपदेन कारके बोधिते तद्विशिष्टां क्रियां बोधयतीति अन्यो-न्याश्रय इति वाच्यम्। कारकपदगतानुभावकशक्तेः क्रियापदगतस्मारकशक्त्य-पेक्षत्वेऽपि तदधीनक्रियास्मृतौ सत्यां स्वकार्यक्षमतया क्रियापदगतानुभावक-शक्त्यपेक्षत्वाभावात्। एवं क्रियापदेऽपि भाव्यम्।

तथा च स्मारकशक्त्या निरपेक्षया पृथक् पृथक् अर्थोपस्थितिः। अनुभाव-कशक्त्या पदान्तरगतस्मारकशक्त्यपेक्षया अन्वितबोध इति नान्योन्याश्रयः।

अन्वितशक्तिपक्षे वाक्यभेदापत्तिपरिहारः

न चैकैकस्यापि पदस्य एकवाक्यरूपतया वाक्यभेदापत्तिरिति वाच्यम्। किमेकैकमपि पदं यत्किंचित्क्रियान्तरकारकान्तरान्वितमपि बोधयतु, तथा च "गामानय" इत्यत्र "गां बधान", "अश्वमानय" इत्यपि बोधः स्यादिति वाक्यभेद आपाद्यते? किं वा एकेनापि पदेन वाक्यकृत्यस्य विशिष्टबोधस्य कृतत्वात् प्रतिपदं वाक्यभेदः स्यात् इति?। नाद्यः, आनयनपदार्थस्मृतिसंनिधौ संनिहितत्यागेन बन्धनपदार्थानपेक्षणात्। नान्त्यः, गोपदस्यानयपदार्थस्मृतिसत्त्वे एव क्रियान्तरा-पेक्षाभावात्। अन्यदा चावश्यं क्रियान्तरापेक्षणात् साकाङ्क्षस्थले वाक्यभेदा-योगात्। तदुक्तम् "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेत् विभागे स्यात्" इति[१]।

न च गोपदार्थे गोः विशेष्यत्वात्, धात्वर्थे च क्रियायाः तथात्वात् कथ-मर्थैक्यमिति शङ्क्यम्। एकपदेन अन्विताभिधानशक्त्या बोधितविशेष्यविशेषण-संबन्धरूपार्थानामन्यपदबोधितानां च तेषामेकत्वेन अर्थैकत्वस्याभिमतत्वात्।

तस्मादन्विते संगतौ न काचिदनुपपत्तिरिति चेत् —

[१] जै.सू.२.१.४६.

अन्वितशक्तिवादखण्डनम्

न। विकल्पासहत्वात्। अन्विते संगतिग्रह इत्यस्य किम् अन्वयांशे न शक्तिग्रहः, किं तु वस्तुगत्या यत् अन्वयवत् तत्रार्थे शक्तिग्रह इत्यर्थः, यथा चक्षुषा स्पर्शवद्ग्रह इत्युक्तौ चाक्षुषग्रहस्य न स्पर्शविषयकत्वं किं तु तदाश्रयविषयकत्वं तद्वत्? उतान्वयेऽपि पदार्थ इव शक्तिग्रह इत्यर्थः? नाद्यः, अविवादात्। नान्त्यः, प्रमाणाभावात्।

अर्थापत्तेः अन्वयशक्तौ प्रमाणत्वाभावः

नन्वस्ति प्रमाणम्। यथा पदार्थप्रतीत्यनुपपत्तिः पदार्थशक्तौ प्रमाणं, तथा अन्वयप्रतीत्यन्यथानुपपत्तिरन्वयांशेऽपि शक्तौ प्रमाणमिति चेत् — न। पदार्थमात्राभिधानेऽपि हि आकाङ्क्षावशादेवार्थानां मिथस्संबन्धावगतिरिति।

ननु जिज्ञासानुपपत्तिरूपार्थापत्तिः प्रमाणम्। आनयेत्यस्य सामान्यतः कर्मकारकान्विते शक्त्यभावे हि सामान्यतोऽपि कर्मणोऽज्ञानात् किमिति कर्मविशेषजिज्ञासा न स्यात्। अज्ञाते सामान्ये विशेषजिज्ञासाया अयोगादिति चेत् — न। सामान्यज्ञानस्यावश्यकत्वेऽपि पदादेव तज्ज्ञानमित्यत्र मानाभावात्। यथा चक्षुषा रसग्रहणाशक्तेन फलविशेषमात्रग्रहेऽपि, ततः, "फलं चेत् रसवत्" इत्यनुमानतः सामान्यावगतिः विशेषजिज्ञासा च, तथेहापि पदशक्त्या क्रियामात्रोपस्थितौ तस्याः कारकाविनाभूततया कारकसामान्यानुमितिः विशेषजिज्ञासा चेति।

पदशक्त्यैव संसर्गग्रह इत्याक्षेपः

नन्वेवं वस्तुनः वस्त्वन्तरसंबन्धित्वस्वभावादेव मिथोऽन्वयप्रतीतिरिति तत्र पदेन कर्तव्यं किमपि नास्तीत्युक्तं भवति। एवं च पदं विना स्मारकान्तरवशेन पदार्थोपस्थितावपि मिथोऽन्वयप्रतीतिः स्यात्। न हि यूनो देवदत्तस्य, बालस्य यज्ञदत्तस्य च परं स्मरणे सति "देवदत्तपुत्रोऽयं यज्ञदत्तः" इति कश्चिदनुभवो जायते। अतः पदपदान्तरप्रकृतिप्रत्ययाद्युपस्थापितानामेवार्थानामन्वयप्रतीतिरिति तस्याः पदार्थस्वभावायत्तत्वं विसृज्य पदशक्त्यधीनत्वमूरीकार्यमिति चेत् —

तस्य आक्षेपस्य समाधानम्

नायं नियमः पदशक्त्यैव संसर्गग्रह इति। तथा सति क्रान्तदर्शिनां कवीनां काव्यानि कुतो विलसेयुः। तत्र हि काव्यवाक्यैः ये संसर्गविशेषाः प्रत्याय्यन्ते ते कविभिः प्राक् ज्ञाता एवेति स्वीकार्यम्। संसर्गज्ञानपूर्वकत्वात् वाक्यप्रयोगस्य। तेषां प्रत्यक्षाद्यगोचरवर्णनप्रकाराणां चिन्तावशेन पदार्थस्मरणानि विना न प्रमा-

णान्तरं ग्राहकं भवितुमर्हति। अतो विशकलिततया पदार्थेषूपस्थितेषु, प्रतिभाबलात् तत्र चमत्कारानुगुणस्संसर्गग्रहस्तेषामिति प्रकारान्तरेण जायमानपदार्थोपस्थितेरपि संसर्गग्रहे हेतुत्वान्न पदशक्तिमात्राधीनत्वं तस्येति।

काव्यरचनायां पदशक्तिं विनापि संसर्गग्रहस्य हेतुत्वम्

ननु काव्यरचनं द्विविधं, वस्तुतस्संसृष्टपदार्थविषयकम्, आरोपितसंसर्गक-पदार्थविषयकं चेति। तत्राद्यं परोक्तानुवादरूपं वा प्रत्यक्षानुमानगोचरार्थविषयकं वा प्रागनुभूतविशिष्टपदार्थस्मरणमूलकमिति न तत्र काचिदनुपपत्तिः। यत् खलु वस्तुतः संसृष्टम् अस्मिन् जन्मन्यननुभूतं च, तदपि प्राक्तनसंस्कारबलात् स्मर्यत इति नान्वितग्रहासंभवः। अत एव विलक्षणप्राक्तनसंस्कारोद्बोधभाग्यशालिनामेव कवित्वम्। यत्पुनरसंसृष्टानामेव पदार्थानां संघटनं कविलोकप्रसिद्धं, तत्सर्वम् असंसर्गाग्रहमूलमेव कार्यान्तरविलक्षणतया क्रियत इति ब्रूमः। अस्मन्मते अन्यथाख्यात्यभावादिति चेत् —

त्वन्मते तथात्वेऽप्यस्मन्मतेऽन्यथाख्यातिस्वीकारात् संसर्गग्रह एवासाविति, पदशक्तिं विनापि संसर्गग्रहस्य भावात् नान्विते शक्तिरवश्यं सिध्येत्। तवापि मते काव्ये किंचित् अन्वयबोधकं, किंचिन्नेति विवेके गमकः को विशेषोऽस्ति। पदानां हि सामान्यतोऽन्वित एव शक्तिरवधृता त्वन्मते। न चैकत्र स्थितं गोपदमन्यत्र स्थितात् गोपदादन्यत्। वैदिकस्यापि पदस्य लौकिकादभेदे सुतरां लौकिके परस्परमभेद इति।

अन्विताभिधानपक्षे शक्तिकल्पनाधिक्यम्

ननु आप्तवक्तृकं पदमेवान्वितग्रहजननसमर्थम्, न त्वनाप्तवक्तृकमिति विशेष इति चेत् — प्रत्यक्षतस्तावत् आप्तोक्तस्यान्यस्य च गोपदस्य न किमपि वैलक्षण्यं लक्ष्यते। न वा तत्र पदभेदोऽपि। एवमपि तत्र विशेष उच्यमानः कीदृशः? किमाप्तेन तदा तत्र काचन शक्तिराधीयते, किं वा आप्तोक्तत्वविशिष्टपदमन्वित-ग्राहकमित्युक्त्या पदविशेषणतया आप्तोक्तत्वमेव विशेष इति पृच्छामः। प्रथमे अभिहितान्वयवादिभाट्टमते त्वदुक्तं शक्तिकल्पनागौरवं त्वन्मतेऽप्यस्ति। पदानां पदार्थबोधनशक्तिः, पदार्थानां संसर्गबोधनशक्तिः, पदबोध्यतादशायामेव तद्भावात् पदार्थगतायाः संसर्गबोधनशक्तेरनुकूलापि पदे काचिच्छक्तिरिति शक्तित्रयं भाट्टमते। तत्र शक्तिद्वयं तावत् तवापीष्टम्, पदानां पदार्थस्मारकशक्तिः, अन्विताभिधान-शक्तिश्चेति। संप्रति पदानामाप्तोक्तत्वदशायामेवान्वितबोधनशक्तिरिति वदता भवता, भाट्टैः पदे स्वीकृततृतीयशक्तिस्थाने आप्ते पदगतान्वितशक्त्याधानशक्तिः स्वीकृतेति

दोषस्तुल्यः इति। तदर्थमाप्ते शक्तिमनङ्गीकृत्य द्वितीयपक्षपरिग्रहे तु, त्वन्मते यथा पदस्यैकस्यैव आप्तोक्तत्वरूपविशेषणविशिष्टतया अन्विताभिधायकत्वं, तथा तन्मतेऽपि एकस्यैव पदार्थस्य पदोपस्थापितत्वरूपविशेषणविशिष्टतया संसर्गबोधकत्वमिति स्वीकारसंभवात् तन्मतेऽपि न तृतीया शक्तिः इति।

नन्वेवं तर्हि पदविशिष्टार्थेष्वेव संसर्गग्रहशक्त्यङ्गीकारे पदानामप्यन्विताभिधाने उपयोगः सिद्ध इति चेत् — सिद्ध एव। तत्र कः संदेहः? परं तूपस्थाप्योपस्थापकभावसंबन्धेनैव पदवैशिष्ट्यस्यार्थे कथनात् पदस्यार्थोपस्थापकत्वम्, पदार्थस्य अन्वयाभिधायकत्वमित्येतावदेवाभिमतम्। न पुनः पदेऽन्यत् किमपि साक्षादभिधायकत्वशक्तिरूपं वा, तदाधायकत्वशक्तिरूपं वा।

एवमेव खलु उच्चार्योच्चारकभावसंबन्धेनाप्तविशिष्टपदानामन्विताभिधानशक्तिं ब्रुवता त्वया आप्तरूपविशेषणे उच्चारकत्वातिरिक्तं नेष्यते। अन्यथा आप्तेऽपि शक्तेः स्वीकारे, भाट्टमते पदार्थे कांचन शक्तिं स्वीकृत्य तदनुकूलशक्तेः पदे स्वीकारापेक्षया पदानामेव साक्षादन्विताभिधानशक्तिः स्वीक्रियताम्। तत्र पदार्थापेक्षया पदानां ज्ञायमानतायां प्राथम्यं, पदार्थान् प्रति अभिधातृत्वस्य क्लृप्तत्वम्, अन्वितप्रतीतीच्छया उच्चरितत्वरूपं तात्पर्यं च साधकमिति बोधनाय यः श्लोकः भवता[१] पठितः —

> "प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
> पदानामेव सा शक्तिः वरमभ्युपगम्यताम्॥" इति,

स एव "पदानाम्" इत्यस्य स्थाने "आप्तानाम्" इति पदप्रक्षेपेण भवन्मतदूषणाय पठनीयः —

> "प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
> आप्तानामेव सा शक्तिर्वरमभ्युपगम्यताम्॥"

इति। पदेऽन्विताभिधानं स्वीकृत्य आप्ते तदनुकूलशक्तिकल्पनापेक्षया आप्त एवान्विताभिधानशक्तिस्वीकारस्योचितत्वात्। पदं प्रत्यपि आप्तस्य कारणत्वेन ततोऽपि प्राथम्यम्, अभिधानानुकूलकृतिमत्त्वादभिधातृत्वम्, अन्वयप्रतिपादनेच्छाशालित्वाच्च तात्पर्यं चेति गमकत्रयमप्यस्तीति। अतः पदानि द्वारीकृत्य आप्तानां शक्तिरुक्ता स्यादिति।

ननु किमनेन बहुनोक्तेन। नास्माभिराप्ते शक्तिः इष्यते। अपि तु उच्चारकत्वसंबन्धेन आप्तावच्छिन्नत्वमेव पदे विशेषः। तथा चाप्तोक्तस्थल एव संसर्गग्रहः, अन्यत्र असंसर्गाग्रह इति प्रकृतोऽसंसर्गाग्रहः समर्थित एवेति चेत् — पदातिरिक्तप्रकारेण संसर्गप्रत्ययो भवति न वेति नेदं मुख्यप्रकृतम्। किं तु पदाना-

---

[१] प्र.पं.पृ.४००.

मन्विताभिधायकत्वेऽन्यथानुपपत्तिरूपप्रमाणमस्ति न वेत्येतदेव प्रकृतम्। तत्र यथा आप्तानां पदोच्चारणमात्रोपक्षीणानामन्विताभिधानशक्तिमत्त्वं नास्ति, तथा पदानामपि पदार्थोपस्थानोपक्षीणानां नान्विताभिधानशक्तिः। किं तु तृतीयशक्तिकल्पनदोष-स्याप्यभावात् पदोपस्थापितत्वविशिष्टार्थानामाकाङ्क्षायोग्यतादिबलात् अन्वयबोध इति ब्रूमः। ततश्च शब्दमहिमानमन्तरेण यतः कुतश्चित् स्मृतेष्वन्वयप्रतीतिः स्यात् इत्यतिप्रसङ्गस्याभावात् न शब्दस्य अन्विताभिधायकत्वेऽर्थापत्तिरस्ति।

उदयनमतम्

न चैवमभिहितान्वयपक्षवर्णनात् भाट्टमतमेव किं भवदादृतमिति शङ्कनीयम्। तन्मतादप्यस्मन्मते विशेषात्। ते हि, अभिहिताः पदार्था एव बोधे करणमित्याहुः। तत्तु न। पूर्वकालसंबन्धिनमिव उत्तरकालभाविनम् उत्पद्यमानं च पदार्थमधि-कृत्यापि व्यवहारात्, तत्र बोधाच्च। न हि तस्य पूर्वकालासंबन्धिनः कारकत्वं ज्ञानक्रियानिर्वर्तकत्वं भवितुमर्हति, कुतः कारकत्वविशेषः करणत्वम्? यदि तावत् पदं विना पदार्थमात्रेण क्वचिदन्वयबोधो जायेत, स्यादपि पदार्थकरणकत्वपक्षः। न त्वेवम्। काव्यस्थले वस्तुतः संसृष्टपदार्थसंसर्गग्रहस्य अन्यथा साधितत्वात्। असंसृष्टपदार्थस्थले च क्वचित् दोषवशात् संसर्गभ्रमेण, क्वचित् बाधनिश्चये सति संसर्गारोपेण च निर्वाहात्। श्वेताश्वधावनधियश्चानुमानिकत्वात्।

अतः पदार्थाः शाब्दबोधे न करणम्। पदानां तु करणत्वं सुवचम्। अव्यव-हितपूर्ववृत्तित्वाभावेऽपि पदार्थस्मरणद्वारा पूर्ववृत्तित्वात्। व्यापारेण व्यवधानस्य चादोषत्वात्। मौनिश्लोकादौ च सूक्ष्मः शरीरान्तरुत्पन्नः शब्दोऽस्त्येवेत्यलम्।

अद्वैतवेदान्ते अन्विताभिधान-अभिहितान्वयवादविचारः

चित्सुखाचार्याः तत्त्वप्रदीपिकायां तत्त्वबिन्द्वनुसारेण अभिहितान्वयवादं समर्थ-यामासुरिति पूर्वमेवोक्तम्। इदानीं भामती-कल्पतरु-परिमलानुसारेण उच्यते।

"तत्तु समन्वयात्" इति सूत्रव्याख्यानावसरे शांकरभाष्ये[१] —

"अपि च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्येतदेकान्तेनाभ्युप-गच्छतां भूतोपदेशानर्थक्यप्रसङ्गः। प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण भूतं चेद्व-स्तूपदिशति भव्यार्थत्वेन कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः" इत्युक्तम्।

तत्र भामत्याम् —

---

१ ब्र.सू.शां.भा.१.१.४, पृ.१३६.

अयमभिसन्धिः — न तावत्कार्यार्थे एव स्वार्थे पदानां संगतिग्रहः नान्यार्थ इति नियम इत्युपपादितं भूतेऽप्यर्थे व्युत्पत्तिं दर्शयद्भिः[१]। नापि स्वार्थमात्रपरतैव पदानाम्। तथा सति न वाक्यार्थप्रत्ययः स्यात्। न हि प्रत्येकं स्वप्रधानतया गुणप्रधानभावरहितानामेकवाक्यता दृष्टा। तस्मात् पदानां स्वार्थमभिदधतामेकप्रयोजनवत्पदार्थपरतया एकवाक्यता। तथा च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति। यथाहुः शास्त्रविदः[२] —

"साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥" इति।

तथा चार्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानाम्। एवं च सति कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोषः — इति।

तत्र कल्पतरौ[३] —

कार्यान्वितभूतबोधित्वे विधिवाक्यस्य, कथं तन्न्यायेन ब्रह्मवाक्येष्वक्रियाशेषभूतवस्तुबोधित्वसिद्धिरत आह — अयमभिसन्धिरिति। कार्यान्वितबोधित्वनियमः शब्दानां किं व्युत्पत्तिबलात्, उत प्रयोजनार्थम्। तत्र केवलभूतवस्त्ववगमादपि प्रयोजनसिद्धिमुत्तरत्र वक्ष्यति। न तावद् व्युत्पत्तिबलादित्याह — न तावदिति। कार्यार्थे = कार्यशेषे। ननु कार्यान्वितपरत्वनियमाभावे पदानाम् अतिलाघवात् अन्वितपरत्वमपि त्यज्यताम्, अत आह — नापीति। तत्किमिदानीं विशिष्टे पदशक्तिः? नेत्याह — स्वार्थमिति। अयमभिसन्धिः — पदैः पदार्था एवाभिधीयन्ते अर्थान्तरान्विततया उपलक्ष्यन्ते। अन्यथा स्वरूपमात्रातिरेकिविशिष्टाभिधाने गौरवं स्यात्।

ननु अभिहितार्थस्वरूपाणां विशिष्टैः अविनाभावविरहात् कथं लक्षणा। न हि गोरूपार्थस्य आनयत्यन्वयाविनाभावः, चारयतिनाप्यन्वयात्। न चार्थान्तरमात्रान्वयो लक्ष्यः, तस्य व्यवहारानुपयोगात् इति चेत् — न। अविनाभावरहितैरपि मञ्चैः पुरुषलक्षणात्।

ननु मा भूदविनाभावनियमः, तथापि वाच्यस्य लक्ष्येण संबन्धः, वाक्यार्थे चानन्वयो वाच्यः। मञ्चा हि संबद्धाः पुंभिः न वाक्यार्थेऽन्वीयन्ते। यथाह शालिकनाथः[१] —

---

[१] ब्र.सू.शां.भा.व्या.भामती.पृ.१३१.
[२] श्लो.वा.वाक्य.३४२, ३४३.
[३] क.त.पृ.१३६.

"वाच्यार्थस्य च वाक्यार्थे संबन्धानुपपत्तितः।
तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते॥" इति।

तदिह "गामानय" इत्यादौ न वाच्यार्थस्य वाक्यार्थेनानन्वयः, नाप्यन्वितस्य लक्ष्यस्य अस्त्यभिधेयेन संबन्धः, अन्वितस्यान्वयान्तराभावात्। तत इह न लक्षणेति।

अत्रोच्यते। मुख्यार्थपरिग्रहेऽनुपपत्तिस्तावत् लक्षणाया निदानम्। तत्र यथा पदेन पदार्थलक्षणायां वाच्यार्थस्य वाक्यार्थे संबन्धानुपपत्तिः, एवं वाक्यार्थप्रत्ययोद्देशेन प्रयुक्तस्य पदवृन्दस्य येऽभिधेयाः अनन्वितपदार्थाः, तेषां वाक्यार्थीभावानुपपत्तिरेव अन्वितलक्षणायाः निदानम्। न चान्वितरूपस्याभिधेयस्वरूपेण संबन्धानुपपत्तिः। विशिष्टस्वरूपयोः तादात्म्यस्य कस्यापि स्वीकारात्।

नन्वेवमपि अभिहितार्थैरर्थान्तरान्वितलक्षणायां कथं नियमः, अर्थान्तराणामानन्त्यात्। तदुच्यते—

आकाङ्क्षासत्तियोग्यत्वसहितार्थान्तरान्वितान्।
पदानि लक्षयन्त्यर्थानिति नातिप्रसङ्गिता॥

प्रयोगस्तु — " 'गामानय' इति वाक्ये गोपदम् आनयत्यन्वितगोत्ववाचकम्, पदत्वात्, तुरगपदवत्" इति। एतत्सर्वमाह — एकेति। एकप्रयोजनसिद्ध्युपयोगित्वं हि पदार्थानाम् इतरेतरवैशिष्ट्यमन्तरेण न घटते। अतः प्रयोजनवत्त्वाय एकवाक्यत्वाय च लक्षणया अन्वितपरत्वं पदानां वक्तव्यमित्यर्थः।

ननु विशिष्टानामप्यर्थानां भेदात् कथमेकवाक्यता? अत आह — तथा चेति। गुणभूतनानापदार्थविशिष्टप्रधानपदार्थस्यैक्यात् एकवाक्यत्वमित्यर्थः।

पदानामनन्विातार्थापर्यवसानेऽन्वितार्थपर्यवसाने च भट्टसंमतिमाह — यथाहुरिति। यदा लक्षणया योग्येतरान्वितपरत्वं पदानां, पदार्थानां च वाक्यार्थलक्षणायां द्वारत्वेन तत्परत्वं, तदा वेदान्तानां कार्यानन्वितब्रह्मपरत्वोपपत्तिः इत्याह — एवं च सतीति।

परिमले च[2] —

ननु विशिष्टे पदशक्तिर्नास्ति चेत् कथमन्वितपदार्थप्रतीतिः, न हि वृत्त्यविषये शाब्दबोधो भवतीत्यत आह — अयमभिसन्धिरिति। अनविनाभाविभिरपीति। "मञ्चाः क्रोशन्ति" इत्यत्र हि मञ्चशब्देन मञ्चेषु शयानाः शिशवो लक्ष्यन्ते।

---

[1] प्र.पं.पृ.३९८.
[2] क.प.पृ.१३६-१३७.

अत्रोच्यत इति। ननु लक्षकस्य शब्दस्य यो वाच्योऽर्थः तस्य वाक्यार्थे-नानन्वयनियमशङ्कायाः किमुत्तरमिहोक्तम्। न चान्वितं लक्ष्यमेव वाक्यार्थेनान्वितं भवति, न त्वविशिष्टं वाच्यस्वरूपम् इत्युक्तनियमाविरोधः, 'विशिष्टस्वरूप-योस्तादात्म्यस्य कस्यापि स्वीकारात्' इति वाच्यलक्ष्यसंबन्धप्रतिपादनेन द्योतित इति वाच्यम्। विशिष्टस्य विशेष्यघटितमूर्तेर्वाक्यार्थान्वये, तद्घटकस्य विशेष्यस्यापि तदन्वयानिवारणात्।

न च विशिष्टस्वरूपयोः संबन्धोक्त्या स्वरूपभिन्नं तदघटितं विशिष्टमङ्गी-कृतमिति शङ्कनीयम्। तादात्म्यसंबन्धस्य विशिष्टे विशेष्यानुप्रवेशाविरोधित्वेन, संबन्धः स्वीकृत इत्येतावता तदनुप्रवेशविरोधिभेदाप्रसक्तेः। तस्मात् वाच्यार्था-नन्वयनियमाशङ्कायाः परिहारो न लब्ध इति चेत् — लब्ध एव।

'वाक्यार्थाभावानुपपत्तिरेवान्वितलक्षणाया निदानम्' इत्यन्वयानुपपत्तिमनादृत्य, अनुपपत्त्यन्तरस्य लक्षणाबीजत्वप्रदर्शनेन लक्ष्यार्थग्रहणसमाधेयानुपपत्तिमात्रं लक्ष-णाबीजं, न तु वाच्यार्थस्य वाक्यार्थेऽन्वयानुपपत्तिरेव, येन वाच्यार्थानन्वयनियमः स्यात्। "काकेभ्यो दधि रक्ष्यताम्" इत्याद्यजहल्लक्षणास्थले मुख्यार्थान्वयानुप-पत्त्यभावेऽपि, तात्पर्यानुपपत्तेः लक्षणाबीजत्वाङ्गीकारात् इति।

आकाङ्क्षासत्तीति। नन्वेवं सति अवश्यापेक्षिताकाङ्क्षादिवशादेव वाक्यार्थ-रूपान्वयप्रतीत्युपपत्तेः न लक्षणा कल्प्या। न च प्रमाकरणप्रत्यासत्तिमन्तरेण संसर्गरूपस्यापि प्रमेयस्य भानं न संभवति। प्रत्यक्षे प्रकारविशेष्ययोरिव संसर्गांशेऽपि संनिकर्षापेक्षादर्शनादिति वाच्यम्। तथा नियमाभावात्। अनुमिति-करणे धूमे वह्निव्याप्तिसत्त्वमात्रेण पर्वतसंबन्धिवह्न्यनुमितिदर्शनात्। पक्षधर्मता-बलात् साध्यस्य पर्वतसंबन्धभानमिति चेत् — इहाप्याकाङ्क्षादिबलात् प्रधानपदार्थे समभिव्याहृतगुणपदार्थान्वयप्रतीतिरस्त्विति चेत् —

एवमपि शब्दबोध्यस्य वृत्तिविषयत्वनियमस्य प्रत्याख्यानासंभवात्। प्रमाकरण-प्रत्यासत्तिमनपेक्ष्य अनुमितौ भासमानस्यापि पक्षसाध्यसंबन्धस्य शब्देन बोधने कर्तव्ये, "पर्वतो वह्निमान्" इति तदभिधायकमतुप्प्रत्ययापेक्षादर्शनात्।

"घटः पटो न" इत्यत्र अन्योन्याभावे, "घटे पटो न" इत्यत्र अत्यन्ताभावे च प्रतियोगिसंबन्धस्य शब्दवृत्तिविषयत्वं विनैव शाब्दबोधविषयत्वं दृष्टमिति चेत् — न। तदन्यवाचिनः नञः शक्तावधिकरणसंबन्धस्येव, तदन्यवाचिनः तद-भाववाचिनश्च नञः शक्तौ प्रतियोगिसंबन्धस्यापि शक्यत्वेनानुप्रवेशकल्पनात्। अन्याभावशब्दयोः शक्तौ तदननुप्रवेशात्, तदर्थवाचित्वेनाङ्गीकृतस्य नञः शक्ता-वपि न तदनुप्रवेश इत्यभ्युपगमे; तयोः प्रयोगे इव नञः प्रयोगेऽपि प्रतियोगिनि

पञ्चमीषष्ठ्योः, नञः प्रयोग इव तयोः प्रयोगेऽपि प्रतियोगिनि प्रथमाया वा निवारयितुमशक्यत्वात्। तस्मादन्वयांशेऽपि वृत्तिकल्पनं युक्तमेव।

न च तथापि प्राक् शक्यसंबन्धित्वेनाज्ञातस्य अपूर्वस्य वाक्यार्थस्य लक्ष्यत्वं न युज्यत इति वाच्यम्। प्रागविज्ञातहरिद्रानामकनदीविशेषेण "हरिद्रायां नद्यां घोषविशेषः" इति श्रुते वाक्ये, नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दस्य नदीविशेषशक्तिग्रहणेन, नदीलिङ्गात् तत्संबन्धित्वेनानुमितस्य तीरस्येव आकाङ्क्षाद्युपस्थापितस्य वाक्यार्थस्यान्वयस्य वृत्त्युपस्थापितत्वसिद्ध्यर्थं लक्ष्यत्वोपपत्तेः। एकवाक्यान्तर्गतानां सर्वेषां पदानाम् इतरपदार्थान्वितस्वस्वार्थलक्षकतायां वाक्यार्थान्वयभेदेन वाक्यभेदमाशङ्क्य समभिव्याहृतयावद्गुणान्वितप्रधानपदार्थरूप एक एव लक्षणीयो वाक्यार्थ इति परिहरति — नन्वित्यादिना। इयं च वाक्यार्थलक्षणा समभिव्याहृतसकलपदवृत्तिः प्रधानपदमात्रवृत्तिर्वेत्यन्यदेतत् — इति।

विशिष्टाद्वैतानुसारेण अन्विताभिधानवादः

वेदान्तदेशिकैः न्यायपरिशुद्धौ शब्दाध्याये प्रथमाह्निके वादद्वयमित्थं प्रस्तुतम् —

एताः सर्वा अपि वृत्तयः अन्विताभिधानवृत्त्यन्तर्भूताः। पृथक् पदानां पदार्थस्मारकत्वमेव। अभिहितान्वये हि पदानां पदार्थे, पदार्थानां वाक्यार्थे, पदानां च तत्रेति शक्तित्रयकल्पनागौरवं स्यात्। वाक्यार्थस्याशाब्दत्वप्रसङ्गो वा, पदार्थलक्षणसप्तमप्रमाणप्रसङ्गश्च। न चान्विताभिधानेऽन्योन्याश्रयणम्, मिथः स्मरणमात्रोपजीवनात्। यथाहुः[1] —

"पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम्।
न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकम्॥" इति।

नापि पौनरुक्त्यादिदोषः। तत्तदंशप्रतिनियतशक्तिवत्। नापि वाक्यभेदः। एकप्रधानतया स्वार्थाभिधानात्।

"पदार्थ एव वाक्यार्थः संसृष्टो ह्यभिधीयते" इत्युक्तम्।

तथा "नाना शब्दादिभेदात्" इत्यधिकरणे श्रीभाष्ये[2] —

"यद्यपि 'वेद' 'उपासीत' इत्यादयः शब्दाः प्रत्ययावृत्त्यभिधायिनः,[3] प्रत्ययाश्च ब्रह्मैकविषयाः; तथापि तत्तत्प्रकरणोदितजगदेककारणत्वापहतपाप्मत्वादिविशेषणविशिष्टब्रह्मविषयप्रत्ययावृत्त्यवबोधिनः प्रत्ययावृत्तिरूपा विद्या भिन्दन्ति।"

---

[1] प्र.पं.पृ.४०१.

[2] श्रीभा.३.३.२४.५६, भा.२.पृ.५२८.

[3] ब्रह्मविषयकज्ञानस्य अविच्छेदेनानुवृत्तिः प्रत्ययावृत्तिः। असकृदावृत्तसंततस्मृतिरूपज्ञानवाचका इति फलितोऽर्थः।

इति। वेदार्थसंग्रहेऽपि —

"शोधकेष्वपि[1] 'सत्यं ज्ञानमनन्तं ब्रह्म', 'आनन्दो ब्रह्म' इत्यादिषु सामानाधिकरण्यव्युत्पत्तिसिद्धानेकगुणविशिष्टैकार्थाभिधानमविरुद्धमिति[2] सर्वविशिष्टं ब्रह्मैवाभिधीयते" इति उक्तम्।

तत्रैवापूर्वभङ्गे —

"समभिव्याहृतपदान्तरवाच्यान्वययोग्यमेव इतरपदप्रतिपाद्यमिति अन्विताभिधायिपदसंघातरूपवाक्यश्रवणसमनन्तरमेव प्रतीयते। तच्च स्वर्गसाधनत्वरूपम्। अतः क्रियावत् अनन्यार्थता विरोधादेव परित्यक्ता" इति अभिहितम्।

एषां स्वारस्यमन्विताभिधाने। न चात्र पराभ्युपगमेनोक्तमिति ज्ञापकमस्ति। वरदविष्णुमिश्रैरपि —

"सत्यज्ञानादिपदानामखण्डैकरसार्थत्वे अन्विताभिधानानुपपत्तेश्च"

इत्यादिषु बहुषु प्रदेशेषु अन्विताभिधानमेव मायावादिनं प्रति उक्तम्। उक्तं चागमप्रामाण्ये —

"अन्यान्विताभिधानेऽपि व्यवहारोपपत्तितः।
अवश्याश्रयणीयेयमन्विातार्थाभिधायिता॥" इत्यारभ्य,

"तस्मादाकाङ्क्षितासन्नयोग्यार्थान्तरसंगते।
स्वार्थे पदानां व्युत्पत्तिरास्थेया सर्ववादिभिः॥" इति।

तत्त्वरत्नाकरेऽपि —

"अवश्याश्रयणीयेयमन्विातार्थाभिधायिता।
इत्याहुर्यामुनाचार्याः पदैरेवान्विताभिधाम्॥"

इत्यारभ्य प्रपञ्चेनोपपाद्योपसंहृतं —

"षड्भिः प्रतीतिप्रमुखोपपत्तिभिः निर्धूतचोद्याभिरिहान्विताभिधा।
सिद्धा पदैर्नाभिहितान्वयस्थितिः विपर्ययादित्यखिलं समञ्जसम्॥" इति।

प्रज्ञापरित्राण-न्यायसुदर्शनयोश्च बहुश उक्तम् —

"अन्विातार्थाभिधायित्वं शब्दशक्तिनिबन्धनम्।
व्युत्पत्त्यवगतं, पुंधीदोषतोऽस्य विपर्ययः॥" इत्यादिना।

---

[1] कारणत्वशङ्कितदोषनिरासकानि वाक्यानि शोधकानि। ब्रह्मणः जगत्कारणत्वे स्वीक्रियमाणे विकारजाड्यपरिच्छेदादयः दोषाः स्युः इति शङ्कायाः निरासकानि "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादीनि वाक्यानि शोधकवाक्यानीति परिभाषा।

[2] समानविभक्तिकपदद्वयसमूहरूपसमानाधिकरणवाक्यस्य अनेकगुणविशिष्टैकार्थप्रतिपादकत्वमिति नियमः सामानाधिकरण्यव्युत्पत्तिः। तया सिद्धम् अनेकगुणविशिष्टैकार्थाभिधानमित्यर्थः।

न्यायपरिशुद्धौ अभिहितान्वयवादः

ननु अभिहितान्वयद्योतकान्यपि वाक्यानि विद्यन्ते।

वेदार्थसंग्रहे तावत्—

"एवं बोधकानां पदसंघातानां संसर्गविशेषबोधनेन वाक्यशब्दाभिधेयानामुच्चारक्रमो यत्र पुरुषबुद्धिपूर्वकः" इत्याद्युक्तम्।

तथा तत्रैव —

"प्रकृतिप्रत्ययरूपेण पदस्यैवानेकविशेषणगर्भत्वात् अनेकपदार्थसंसर्गबोधकत्वाच्च वाक्यस्य" इति।

श्रीभाष्येऽपि —

"शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम्, पदवाक्यरूपेण प्रवृत्तेः। प्रकृतिप्रत्यययोगेन हि पदत्वम्। प्रकृतिप्रत्यययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीयम्। पदभेदश्चार्थभेदनिबन्धनः। पदसंघातरूपवाक्यस्य अनेकपदार्थसंसर्गविशेषाभिधायित्वेन" इत्याद्युक्तम्।

एवं व्युत्पत्तिनिरूपणे वेदार्थसंग्रहे —

"सिद्धवस्तुषु शब्दस्य बोधकत्वशक्तिग्रहणमत्यन्तसुकरम्" इत्युपक्रम्य, 'अपवरके दण्डः स्थितः' इति वाक्ये यादृच्छिकव्युत्पत्तिप्रकारमुपपाद्य, तथा 'बालः' 'तातोऽयम्' इत्यादिना बुद्धिपूर्वव्युत्पादनेन तत्तत्पदानां तत्तत्पदार्थेष्वेव बोधकत्वशक्तिग्रहणमुपपाद्य, पुनरपि, " 'अस्य शब्दस्यायमर्थः' इति पूर्ववृद्धैः शिक्षितः" इत्यादि चोक्त्वा, "एवमेव सर्वपदानां स्वार्थाभिधायित्वं संघातविशेषाणां च यथावस्थितसंसर्गविशेषवाचित्वं च जानाति" इत्याद्युक्तम्। भाष्येऽपि प्रथमसूत्रपूर्वपक्षनिराकरणे —

"एवं किल लौकिकाः शब्दार्थसंबन्धमवधारयन्ति। मातापितृप्रभृतिभिः अम्बातातमातुलादीन्" इत्यादिना पदव्युत्पत्तिः पूर्वमुपपादिता। तत्र च —

"तेषु तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति" इत्याद्युक्तम्। पुनश्च —

"व्युत्पन्नेतरशब्देषु अस्य शब्दस्यायमर्थः इति पूर्ववृद्धैः शिक्षिताः" इत्यादि।

यदि नामान्विताभिधानमभिमतं तदा कथमिव पदमात्रे व्युत्पत्तिः स्यात्। यदि च सा स्यात् कथमन्वितमभिधेयम्? व्युत्पत्तिवैपरीत्यप्रसङ्गात्।

अत्र केचित् —

"बोधकानाम्" इत्यादिवाक्यमन्विते संसर्गविशेषसिद्धेः उपपद्यते। पदवाक्यभेदाभिधानमपि तत्तद्विशेषवैशिष्ट्यप्रदर्शनमात्रार्थम्। पराभ्युपगमद्योतनार्थं वा। प्रत्येकपदव्युत्पत्त्यभिधानमपि अन्वितार्थबोधनोपयुक्तासाधारणद्वारप्रकाशनमात्रम्। पदार्थं स्मारयित्वैव हि पदानि वाक्यार्थं बोधयन्ति। स्मृतेश्च स्वानुभूतिमूलत्वान्न शक्त्यन्तरक्लृप्तिः।

व्याख्यातं च भाष्यादिकमन्वितपरतया विवरणे श्रीराममिश्रैः। तथा षडर्थसंक्षेपेऽपि —

"शब्दश्च स्वतः शक्यमन्विततया बोधयति, असंभवेऽर्थान्तरम् इति हि व्युत्पत्तिः" इत्याद्युक्तम्।

अतोऽन्विताभिधानं सिद्धान्तः इति।

तत्त्वमुक्ताकलापे बुद्धिसरे अन्विताभिधानवादसमर्थकौ श्लोकौ[1] —

"आचष्टे प्रत्ययश्च प्रकृतिरपि मिथःश्लिष्टमित्यभ्युपेतं
स्पष्टं दण्ड्यादिशब्देष्वपि तदितरथा धीविरोधप्रसङ्गात्।
अन्योन्यस्मारितार्थान्वितमभिदधति स्वार्थमेवं पदानि
स्यान्नातश्चक्रकादिर्न च पुनरभिधा नापि वाक्यस्य भेदः॥"

अत्र सर्वार्थसिद्धिव्याख्या —

द्विविधं हि वाक्यार्थप्रक्रियाभेदमाहुः तत्तन्त्रनिष्ठाः, अन्विताभिधानम् अभिहितान्वय इति। तत्र पदैरभिहिताः पदार्थाः वाक्यार्थं बोधयन्तीत्यभिहितान्वयः।

"पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम्।
न्यायसम्पादितव्यक्ति पश्चाद्वाक्यार्थबोधकम्॥"[२]

इत्यन्विताभिधानम्। अयमत्र श्लोकार्थः। पदानि तावत् श्रूयन्ते। श्रुतानि च व्युत्पत्त्यनुसारेण पदार्थस्वरूपाणि परस्परानन्वितानि स्मारयन्ति। स्मृतेषु च पदार्थेषु आकाङ्क्षादिपरामर्शः। तत्रैव न्यायप्रवृत्तिः। न्यायप्रवृत्त्या च वचनव्यक्तिविशेषाभिव्यक्तिः संपाद्यते। ततः सम्यङ्न्यायानुगृहीतानि पदानि नानापदार्थविशिष्टैकप्रधानपदार्थात्मकं वाक्यार्थमभिदधतीति।

अभिहितान्वयवादिनस्त्वेवमभ्यदधुः — पदैः पदार्थाः पृथक्पृथगभिधीयन्ते। तच्चाभिधानं विशेषव्यक्त्यभावात् स्मारकान्न विशिष्यते। ते चाभिहिताः पदार्थाः योग्यत्वेन परामृश्यमानाः स्वयमेव विशेषसंसर्गात्मकं वाक्यार्थमवबोधयन्ति। न

---

[१] त.मु.क.बुद्धि.४.९१-९२, पृ.६३०.
[२] प्र.पं.पृ.४०१.

तत्र पदव्यापारः। अर्थैरेवार्थविशेषसिद्धेः। यथा कविभिरालोच्यमानाः पदार्था एव वाक्यार्थरूपमर्थविशेषं संसर्गात्मकमवबोधयन्ति।

अत्रान्विताभिधानवादी आह — यथा पदे प्रकृतिप्रत्ययौ सहैवार्थं विशिष्टरूपमभिधत्तः, तथैव वाक्येऽपि सर्वे शब्दाः सहैवार्थं विशिष्टमभिदधति। तदिदमाह — आचष्ट इति। तदिदं मत्वर्थीयप्रत्ययसहितेषु दण्ड्यादिशब्देष्वपि समानमिति दर्शयति — स्पष्टमिति। उक्तार्थेऽनुग्राहकं तर्कमाह — इतरथेति। उपलम्भविरोधप्रसङ्ग एव हि सर्वेष्वपि तर्केषु सारतमः। यथा पदानि प्रकृतिप्रत्ययविभागेन विभक्तान्यपि विशिष्टमेकं पदार्थं वदन्ति, एवं पदान्यपि परस्परस्मारितार्थविशिष्टमेकमर्थं वदन्ति।

अयमर्थः — कार्यपरं चेद्वाक्यं, संहतान्येतानि पदानि कारकविशिष्टक्रियामभिदधति। सिद्धपरत्वेऽपि वाक्यस्य, समानाधिकरणवाक्यं नीलमुत्पलमितिवत् नानाविशेषणविशिष्टमेकं विशेष्यं सिद्धमेवाभिदधाति। वैयधिकरण्येऽपि व्यधिकरणविशेषणविशिष्टं सिद्धमसिद्धं वा विशेष्यमाचष्टे — "काष्ठैः स्थाल्यामोदनं पचति" इति, "काष्ठैः स्थाल्यामोदनः पक्वः" इति वा।

अत्रायं सारतमोऽर्थः — योग्येतरान्वितस्वार्थाभिधायीनि सर्वाण्यपि पदानि। तत्र कारकपदानि क्रियान्वितस्वार्थाभिधायीनि। क्रियापदं तु कारकान्वितस्वार्थाभिधायकम्। एवं सिद्धपरत्वेऽपि विशेष्यपदं विशेषणान्वितस्वार्थाभिधायकम्, विशेषणपदं च विशेष्यान्वितस्वार्थाभिधायकम्। सर्वमेतदन्विताभिधानान्न मुच्यते। गुणप्रधानभावेनैव पदार्थानां प्रतीतेः एकवाक्यत्वं न विरुध्यते। एवमभिधानाङ्गीकारे परवाद्युक्ताः सर्वे दोषाः निरस्ता इत्याह — स्यादिति। पदैरर्थप्रतीतिः, अनन्तरमाकाङ्क्षादिपरामर्शः, पश्चात् पदैः अर्थाभिधानं, ततोऽर्थप्रतीतिरिति चक्रकम्, आकाङ्क्षादिपरामर्शादर्थाभिधानम्, अर्थाभिधानानन्तरम् आकाङ्क्षादिपरामर्श इत्यन्योन्याश्रयः, उभयमपि नास्ति। प्रथममर्थाभिधानाभावात्, प्रत्येकमर्थानां स्मरणमात्रस्यैव जननात्। अत एव न द्विरभिधानप्रसङ्गः। विशेषणानां नानात्वेऽपि सर्वेषामपि पदानां विशिष्टैकार्थपरत्वेन वाक्यभेदप्रसङ्गोऽपि नास्ति।

अभिहितान्वयवाददूषणम्[१]

"स्वार्थे शब्दः स चासावपि मिलितमतौ व्यापृतावित्यनेकाः
कल्प्यास्ते शक्तयः स्युः कथमपि न भवेत्तादृशी शक्तिरेका।
अर्थेषु स्मारितेषु प्रथममथ च तद्योग्यतादौ विमृष्टे
शब्दैरेवान्विते धीर्मम भवति तव स्वार्थबोधव्यवेतैः॥"

---

[१] त.मु.क.४.९२.

शब्दः स्वार्थे व्यापृतः, शब्दः अर्थश्च संसृष्टमतौ व्यापृतौ इति हेतोः तव मते अनेकाः शक्तयः कल्पनीयाः। एका शक्तिस्तु कथमपि न भवेत्। एतदुक्तं भवति — पदानां स्वार्थबोधनशक्तिः, पदार्थानां संसर्गबोधनशक्तिः, पदानामेव पदार्थेषु संसर्गबोधनशक्त्याधानशक्तिः इति शक्तित्रयं कल्पनीयमभिहितान्वय-वादिनः। अन्विताभिधानवादिनस्तु प्रथमं पदैः पदार्थेषु स्मारितेषु, तदनन्तरं योग्यतादौ विमृष्टे सति पदैरेवान्विते बुद्धिरुदेति। तव मते तु पदार्थबोधव्यवहितैः पदैरुदेति। एतदुक्तं भवति — अन्विताभिधानवादिनः मम मते एकैव शक्तिः योग्येतरान्वितं स्वार्थमभिदधातीति लाघवम्। प्रथमं पदार्थस्मरणम्, न तत्राभिधा-व्यापारः। अथ च योग्यतादिपरामर्शः, तत्रापि न शब्दव्यापारः। केवलमन्वित एवार्थे शब्दव्यापारः। अत एव शाब्दत्वं वाक्यार्थज्ञानस्य अस्मन्मते। भवन्मते तु पदार्थप्रतिपादनद्वारेण कथंचिदेव शाब्दत्वम् इति।

अभिहितान्वयपक्षसमर्थनम्[१]

"संसर्गं वाक्यवेद्यं स्फुटमभिदधते कानिचित् भाष्यवाक्या-
न्याद्यव्युत्पत्तिरुक्ता प्रतिपदमिह च क्वापि नान्यस्य हानिः।
इत्थं मत्वा सयूथ्याः कतिचिदभिहितान्योन्यसंसर्गमीषु-
स्तत्तत्स्वारस्यलोकप्रतिपदनुगमात्तञ्च[२] नाधिक्षिपामः॥"

अयमत्र भावः — यद्यप्यन्विताभिधानं, तथापि निर्विशेषब्रह्मवादिनो न वेद-वेद्यत्वं निर्विशेषस्य सिध्येत्। यद्यभिहितान्वयः, तथापि तथा। अन्वितस्यान्वयस्य वा भेदगर्भत्वात्। अतो गुरुकुमारिलपरिगृहीतं पक्षद्वयमप्याश्रित्य परपक्षवादिनं प्रतिक्षिपामः, नास्माकं क्वापि निर्बन्ध इति। प्रधानार्थविरोधे हि प्रतिक्षेप्यत्वनिर्बन्धः।

द्वैतवेदान्तरीत्या अन्विताभिधानाभिहितान्वयवादौ

अनुव्याख्याने[३] —

"शक्तिश्चैवान्विते स्वार्थे शब्दानामनुभूयते।
अतोऽन्विताभिधायित्वं, गौरवं कल्पनेऽन्यथा॥
न चाशक्त्याभिधायित्वं प्रवृत्तिश्च द्विधान्यथा।"

इति कारिकाव्याख्यावसरे न्यायसुधायां जयतीर्थश्रीचरणाः वादद्वयमित्थं परि-शीलयन्ति, अन्विताभिधानपक्षं समर्थयन्ते च —

---

[१] त.मु.क.४.९३.
[२] प्रतिपत् = प्रतीतिः।
[३] अ.व्या.१.१.१, पृ.९६१.

वृद्धव्यवहारादिना हि शक्त्यवधारणम्। न च पदार्थस्वरूपमात्रे व्यवहारादिकं युज्यते, किं तु पदार्थान्तरान्विते। अतो व्यवहारादिना शब्दशक्तिमवधारयता अर्थान्तरान्वित एव स्वार्थोऽनुभूयत इत्यङ्गीकरणीयम्। यद्यप्येकस्मिन् प्रयोगे गौः आनयनान्वितः प्रतीयते, अपरस्मिन् बन्धनान्वितः, अन्यस्मिंश्च दर्शनान्वित इति पदार्थान्तरतदन्वयव्यभिचारः, तथाप्यव्यभिचारिणि योग्येतरान्विते स्वार्थे शक्तिग्रहणमुपपद्यत एव। न हि विशेषाणां व्यभिचारेण त्यागे सामान्यस्याव्यभिचारिणः निर्निबन्धनः त्यागो युज्यते। यत एवं व्युत्पत्तिसमयेऽन्वित एव स्वार्थे शब्दानां शक्तिरनुभूयते, अतोऽन्वितस्वार्थाभिधायित्वं शब्दानामभ्युपेयम्। शक्तिग्रहणानुरोधित्वात् अभिधानस्य।

यदा च पदैरेवान्वितस्वार्थप्रतिपादनं, तदा वाक्यार्थ एवावबुद्ध इति कथं तद्बोधस्य निर्निबन्धनता। गुणप्रधानभावेनान्योन्यान्विताः पदार्था एव, तदन्वयो वा वाक्यार्थ इति प्रामाणिकैः अङ्गीकृतत्वात् इति। अत्र 'पदानाम्' इत्यनभिधाय 'शब्दानाम्' इति वदता प्रकृतिप्रत्यययोरप्यन्विताभिधानसामर्थ्यं सूचितम्।

केचिदाहुः —एकमेव पदमन्विताभिधायि, इतराणि तु पदानि तत्प्रतियोगिसंनिधापनमात्र एवं व्याप्रियन्ते। तच्च प्रथमं वा प्रधानं वेति। तन्निरासार्थं 'शब्दानाम्' इति बहुवचनम्। तथा हि — यदेकत्र प्रयोगे प्रथमं, तदेवान्यत्राप्रथममिति न प्राथम्यनियमोऽस्ति। तथा च प्रथमं पदमिति वदता सर्वाण्यप्यन्विताभिधायीन्यङ्गीकृतानीति किमत्र वक्तव्यम्। प्रधानत्वमपि पदस्य किमुच्यते। यदर्थप्रतिपादनपराणीतरपदानि तत्प्रधानमिति चेत् —तर्हि वाक्यभेदेन प्राधान्यस्याव्यवस्थितत्वात् सर्वपदानामन्विताभिधानसामर्थ्यमेव आयातम्।

आख्यातपदं प्रधानमिति चेत् —न। "दध्ना जुहोति" इत्यादिगुणविधानेष्वनुपपत्तेः। आख्यातपदरहितेष्वपि अन्वयबोधदर्शनाच्च। न हि "परिणतिसुरसं पनसफलम्" इत्यादावन्वयो न प्रतीयत इति युक्तम्। अनुभवविरोधात्। न च तत्राध्याहारः। स हि लोकप्रतीत्यनुरोधाद्वा आश्रयणीयः, स्वसमयानुरोधाद्वा। नाद्यः, लोकप्रतीतेः पर्यवसितत्वात्। न द्वितीयः, तस्यैव निर्मूलत्वात्। समयान्तरानुरोधेन तत्परित्यागस्यापि संभवात्।

ये तु विशेषान्वय एव शक्तिः पदानामित्यास्थिषत, तन्मतनिरासाय 'अन्विते' इति सामान्येनोक्तम्।

ननु यदि "गामानय" इत्यादिवाक्ये "गाम्" इति पदेनैव आनयनान्वितः स्वार्थोऽभिहितः, तदा "आनय" इति पदं व्यर्थम्, उक्तार्थत्वात्। "आनय" इति पदेन आनयत्यर्थेऽभिहिते सति आनयत्यर्थान्वितः स्वार्थो गोपदेनाभिधीयते, तेन

"आनय" इति पदस्य न वैयर्थ्यमिति चेत् —तर्हि "आनय" इति पदं केवलं स्वार्थमात्रमभिदधत् अनन्विताभिधायि प्राप्तम्। यथा चेदमनन्विताभिधायि, तथा पदान्तरमपि स्यादिति दत्तजलाञ्जलिः अन्विताभिधानवादः।

अथ "आनय" इति पदेनापि गोपदाभिहितार्थेनान्वितः स्वार्थोऽभिधीयते, तदा यावत् पूर्वं पदं स्वार्थं नाभिधत्ते, तावत् उत्तरपदस्य पूर्वपदार्थान्वितस्वार्थाभिधानं नास्ति। यावच्चोत्तरपदं स्वार्थं नाभिधत्ते, तावत् पूर्वपदस्य उत्तरपदार्थान्वित-स्वार्थाभिधानं न संभवतीत्यन्योन्याश्रयत्वम्।

न च वाच्यं परस्परनिरपेक्षाणि पदानि प्रथमं पदार्थान् अनन्वितान् अभिधाय, पश्चादन्योन्यान्वितांस्तानेवाभिदधतीति क्वेतरेतराश्रयत्वमिति। द्विरभिधानकल्पनायाः अप्रामाणिकत्वात्। अचेतनेषु विरम्य व्यापारानुपपत्तेश्च।

किं च पदानामन्वितेष्वर्थेषु शक्तिः गृहीता चेत् तथाविधानेव प्रथममभिदध्युः, न चेत् पश्चादपि कथम् अभिदध्युरिति।

अत्र विशेषान्विताभिधानवादिनः परिहारमाहुः — प्रथमं पदानि साहचर्यवशात् अनन्वितस्वार्थान् स्मारयन्ति। पश्चात् इतरेतरस्मारितेनार्थेनान्वितस्वार्थान् अभि-दधतीति न पदान्तरवैयर्थ्यम्, नापीतरेतराश्रयत्वमिति।

एतदप्यसारम्। सर्वदैव हि पदानि अन्वितेनैव स्वार्थेन गृहीतसाहचर्याणि न केवलेन। तानि कथं केवलं पदार्थमात्रं स्मारयितुमीशते। यथानुभवं हि स्मरणेन उत्पत्तव्यम्, न तु परीक्षकप्रयोजनमनुसृत्य। न हि पदं पदार्थमात्रप्रतिपत्तये प्रयुज्यते, किं तु व्यवहाराय। व्यवहारश्च अन्विते एवेति अन्वितानामेव पदार्थानां पदेभ्यः स्मरणं स्यात्। तथा च "गां पश्य" इति प्रयोगे गोपदेन पूर्वानुभूता-नयनान्वितार्थस्य स्मारितत्वात् "पश्य" इति पदमनाकाङ्क्षितार्थमसंगतं स्यात्। एवं "प्रासादं पश्य" इत्यत्र प्रासादान्वितस्वार्थाभिधायकत्वात् "पश्य" इति पदस्य, न गोपदं तेन संबध्येत। तथा च वाक्यार्थः क्वापि परिनिष्ठितो न सिध्येत्।

न च वक्तव्यमव्यभिचारात् गोपदं स्वार्थमात्रं स्मारयति, नार्थान्तराणि, तेषां व्यभिचारित्वादिति। पट्वभ्यासादरप्रत्ययैः आहितस्य संस्कारस्य प्रबोधवतः स्मरण-हेतुत्वात्। तत्प्रबोधस्य च व्यभिचारिण्यप्यर्थान्तरे प्रणिधानसाहचर्यादिजन्यस्या-विशेषात्। न हि स्मरणमनुमानमिव साहचर्यनियममपेक्ष्योत्पद्यते। धूमदर्शनात्, अग्निवत्, रसवत्पाकादिप्रदेशस्य स्मरणदर्शनात्।

एतेन एतदपि निरस्तं — यथा पदानां स्वार्थेषु अभ्यासातिशयः न तथा-र्थान्तरेषु, तेषां व्यभिचारित्वात्। तथा च स्वरूपमात्रेणैव पदेभ्यः स्मारिताः पदार्थाः

आकाङ्क्षादिमन्तः पदैरन्विता अभिधीयन्त इति नान्योन्याश्रयः, नापि पदान्तरा-नाकाङ्क्षेति।

स्मरणस्यानुभववारनियमानपेक्षत्वात्। अन्यथा धूमदर्शनात् महानसादिस्मरणा-नुपपत्तिप्रसङ्गः। न हि यावान् धूमस्याग्नावभ्यासातिशयः तावान् महानसे। तस्मा-दपरिहार्यमितरेतराश्रयत्वमिति।

वयं तु ब्रूमः[१] — स्यादिदं विशेषान्विताभिधानवादिनां दूषणम्। सामा-न्यान्विताभिधाने तु नायं दोषः। प्रत्येकं हि पदानि आकाङ्क्षितसंनिहितयोग्ये-तरान्वितस्वार्थाभिधानसमर्थानि, न पदान्तरमपेक्षन्त इति नेतरेतराश्रयत्वम्। विशे-षान्वयप्रतिपत्त्यर्थं च पदान्तरसमभिव्याहारोपयोगः।

अत एव सामान्यान्विताभिधानवादे वाक्यार्थविशेषाप्रतिलम्भ इति निरस्तम्। पदान्तरसमभिव्याहारात् विशेषप्रतिपत्त्युपपत्तेः।

येऽपि विशेषान्विताभिधानमाचक्षते, तैरपि प्रतियोगिनां तदन्वयानां चानन्त्यात् संगतिग्रहण एव पुरुषायुषपर्यवसानभयात्, सामान्योपाधौ शक्तिग्रहणम् अङ्गीकर-णीयम्।

नन्वेवं तर्हि किमनया सामान्यान्विताभिधानशक्त्यापि। पदानि स्वार्थमात्रे शक्तिमन्ति पदान्तरसमभिव्याहारवशात् विशेषान्वितमेव बोधयन्तीत्यङ्गीकारोप-पत्तेरिति चेत् — न। संगतिग्रहणसमये सामान्यान्विताभिधानशक्तेः गृहीतत्वात्। पदान्तरसमभिव्याहारो हि सामान्यस्य विशेषपर्यवसान एव हेतुः, न पुनरविद्यमान-शक्त्याधाने इति।

ननु तथाप्यन्विताभिधाने समभिव्याहृतपदानां पुनरुक्तिदोष इति चेत् — न। अन्वयभेदात्। "आनयनान्वितो गौः", "गवान्वितमानयनम्" इत्यनयोर्हि स्फुटो भेदः। आर्थिकी तु पुनरुक्तिरदूषणम्। 'यश्चार्थादर्थो न स चोदनार्थः' इति न्यायात्। विशेषप्रतिपत्त्यङ्गतया उपयोगाच्च।

अभिहितान्वयवादनिरासः

अभिहितान्वयवादिनो वदन्ति — पदैरभिहिताः पदार्था एव आकाङ्क्षादिवशात् अन्योन्यान्वयं बोधयन्तीति।

तैरपि हि पदार्थानामन्वयबोधकत्वं क्वाप्यनुपलब्धं तावत् कल्पनीयम्। ननु —

> "पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः।
> खुरनिष्पेषशब्दं च श्वेतोऽश्वो धावतीति धीः॥"[२]

---

[१] अ.व्या.व्या.न्या.सु.१.१.१, पृ.९७०.
[२] श्लो.वा.वाक्य.३५८.

इत्युक्तन्यायेन अस्त्येव पदार्थानामन्वयबोधकत्वमिति चेत् — न। अनुमानात् अर्थापत्तेर्वा तत्रान्वयप्रतिपत्तेः। तथा हि — एतेषां पदार्थानामेकाधिकरणतयावगतानां वा प्रत्यायकत्वम्? विशकलिततया वा? आद्ये अनुमानत्वम्। द्वितीये तत्रार्थान्तराभावो निश्चितो न वा? आद्ये अर्थापत्तिर्भवताम्, अस्माकमनुमानमेव। द्वितीये त्वनध्यवसाय एव। प्रमाणान्तरावगतानां पदार्थानामन्वयबोधकत्वादर्शनेऽपि पदैरभिहितानां तत्किं न स्यादिति चेत् —तर्हि न केवलं पदार्थानामन्वयबोधकत्वशक्तिकल्पनम्। किं तु पदानां पदार्थाभिधानशक्तिः, तेष्वन्वयबोधकत्वाधानशक्तिश्च कल्पनीया। पदानां पदार्थेषु साहचर्यमात्रेण स्मारकत्वाङ्गीकारेऽपि शक्तिद्वयं कल्पनीयमेव। तदिदमुक्तं — गौरवं कल्पनेऽन्यथा इति।

ननु चान्विताभिधानवादिनोऽपि पदार्थेऽन्वये च शक्तिकल्पनात् गौरवं समानमिति चेत् — न। एकयैव शक्त्या अन्विितार्थस्यैवाभिधानाङ्गीकारात्।

तथापि, सामान्यान्विताभिधानवादे पदानामौत्सर्गिकी सामान्यान्वये शक्तिः, पदान्तरसंनिधानाच्च आगन्तुकी विशेषविषया शक्तिः, पदान्तरे च तदाधानशक्तिरिति शक्तित्रयं कल्पनीयमिति चेत् — न। आकाङ्क्षितसंनिहितयोग्यान्विताभिधानशक्तेरेकस्या एव पदान्तरसमभिव्याहारबलेन विशेषपर्यवसानस्य उक्तत्वात्।

ननु च पदकदम्बकश्रवणसमनन्तरं कुतश्चित् मानसापराधात् अनुपजनितपदार्थस्मृतेः वाक्यार्थप्रत्ययानुदयात्, उदयाच्चोपजातपदार्थस्मृतेः, अन्वयव्यतिरेकाभ्यां पदस्मारितपदार्थानां वाक्यार्थप्रत्यायकत्वमवसीयत इति चेत् — मैवम्। संगतिस्मरणभावाभावाभ्यामन्यथोपपत्तेः। पदनिचयश्रवणवाक्यार्थबोधावन्तरा पदार्थस्मृतीनामेवानभ्युपगमात्। एकैकपदश्रवणे पदार्थस्मृतिरस्ति तावदिति चेत् — किं तावता। किं सहकारिविरहिणो यत् कार्यं तदेव सहकारिलाभेऽपि? तथात्वे संस्कारस्येन्द्रियसहकारिलाभेऽपि प्रत्यभिज्ञानुभवजनकत्वं न स्यात्। किं च पदार्थबोध्यत्वे वाक्यार्थस्य, अनुमेयस्येवाशाब्दत्वम्; पदार्थाख्यसप्तमप्रमाणाङ्गीकारे गौरवं च स्यात्। तदेतदाह — गौरवं कल्पनेऽन्यथेति।

ननु नायं दोषः, पदानामेव पदार्थप्रतिपादनरूपावान्तरव्यापाराणाम् अन्वयप्रतिपादकत्वाङ्गीकारात्। न ह्यवान्तरव्यापारस्य व्यवधायकत्वमस्तीति चेत् — किमन्वयेऽप्यर्थे इव पदानां शक्तिरस्ति न वा? नास्तीति चेत् तत्राह — न चाशक्त्येति। न च तत्राशक्तं तदभिधत्त इति संभवति। व्याघातात्, अतिप्रसङ्गाच्च। तथा च तदवस्थं वाक्यार्थस्याशाब्दत्वम्, सप्तमप्रमाणापत्तिश्चेति भावः। अथ पदार्थेषु अन्वये चास्ति पदानां शक्तिः, तदा पदार्थान् अन्वयं च युगपत् प्रति-

पादयन्ति? उत क्रमेण? नाद्यः, अन्विताभिधानप्रसङ्गात्। पदार्थप्रतिपादनस्य अवान्तरव्यापारत्वानुपपत्तेश्च। द्वितीये दोषमाह — प्रवृत्तिश्चेति। द्विधाप्रवृत्तिः = विरम्यव्यापारः, 'प्रसज्यते' इति शेषः।

साहचर्यात् स्वार्थान् स्मारयन्ति अन्वयपराणि पदानि, अतो न दोष इति चेन्न। पदार्थाविषयाणां केवलतदन्वयपरत्वानुपपत्तेः। अन्वयो लक्ष्यत इति चेत् — तर्हि पदार्थेषु साहचर्यात् स्मारकत्वमात्रम्, अन्वये तु लक्षणैवेति पदानां न कुत्राप्यभिधानवृत्तिरिति स्यात्। तदभावे च लक्षणापि न संभवति, तद्द्वारकत्वात्तस्याः। एतदप्युक्तं — न चाशक्त्याभिधायित्वमिति। स्मारकत्वमेव अभिधायकत्वमिति चेत् — न। अतिप्रसङ्गादिति।

मणिग्रन्थरीत्या अन्विताभिधानवादपरिशीलनम्[१]

तत्त्वचिन्तामणौ शब्दखण्डे 'पदानां कार्यान्विते शक्तिः', 'अन्विते शक्तिः' इति पक्षद्वयं विस्तरेण परिपोष्यानूद्य, तत्खण्डनं कृत्वा, पदार्थस्वरूपमात्रे शक्तिं व्यवस्थाप्य, पदज्ञानमेव पदार्थोपस्थितिद्वारा आकाङ्क्षादिज्ञानसहकारेण शाब्दबोधकारणमिति सिद्धान्तितम्। तदत्र अनूद्यते।

पूर्वपक्षः

कार्यान्विते पदानां शक्तिरिति प्रतिज्ञा

अर्थवादानां "वायुर्वै क्षेपिष्ठा देवता" इत्यादीनां, "घटोऽस्ति" "पटोऽस्ति" इत्यादिलौकिकवाक्यानां, स्वरूपाख्यानमात्रपराणां काव्यनाटकादीनां च न विशिष्टानुभवजनकत्वरूपं प्रामाण्यम्, कार्यतावाचकलिङाद्यसमभिव्याहृतत्वात्। किं तु पदार्थोपस्थितिपदार्थासंसर्गाग्रहमात्रजनकत्वम्। कार्यान्वित एवार्थे पदानां शक्तिनिश्चयात्। शक्तिर्द्विविधा — कारणतारूपा, पदसंकेतरूपा चेति। संकेतरूपा शक्तिरेव स्मारिका शक्तिरिति गीयते। प्रकृते च शक्तिपदं कारणतापरम्, या आनुभाविकी शक्तिरिति गीयते। तथा च कार्यत्वान्वितघटविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति घटपदज्ञानं कारणम् इत्यादिक्रमेण सर्वेषां पदानां कार्यत्वान्वितस्वार्थविषयकशाब्दबोधं प्रत्येव जनकत्वमवधार्यते।

पदज्ञानस्य कार्यत्वान्वितशाब्दधीहेतुत्वं न संभवतीति शङ्कासमाधानम्

ननु घटादिपदज्ञानस्य न कार्यत्वान्वितघटादिशाब्दत्वं कार्यतावच्छेदकम्, अपि तु लाघवात् घटादिशाब्दत्वमेवेति चेत् — न। वृद्धव्यवहारादेव हि सर्वेषामाद्या

---

[१] त.चिं.म, च.भा.द्वि.प.पृ.४६०-५५५.

व्युत्पत्तिः = प्राथमिकः कार्यकारणभावग्रहः। स च पदत्वावच्छिन्नं कार्यत्वान्वित-विषयकबुद्धित्वावच्छिन्नं प्रति कारणमिति रीत्या, सामान्यतः पदत्वावच्छेदेन कार्यत्वान्वितशाब्दबुद्धिजनकताग्रह इति यावत्। घटादिपदानां घटादिशाब्दबुद्धि-जनकताग्राहकस्य उपायस्य प्रथमगृहीतसामान्यकार्यकारणभावोत्तरकालीनत्वात्। तथा हि — प्रयोजकवृद्धस्य "घटमानय" इत्यादिवाक्योच्चारणानन्तरं प्रयोज्यवृद्धस्य घटानयनादिविषयकप्रवृत्तिं पश्यन् व्युत्पित्सुः बालः "प्रेक्षावद्वाक्योच्चारणं प्रयो-जनवत्, प्रेक्षावद्व्यवहारत्वात्" इत्यनुमानेन "घटमानय" इति वाक्यस्य सामान्यतः प्रयोजनवत्त्वमवगम्य, किं तत् प्रयोजनम् इति प्रयोजनविशेषं जिज्ञासमानः, प्रवृत्तेः प्रयोजकवृद्धवाक्योच्चारणान्वयव्यतिरेकानुविधायित्वग्रहात्, तदानीमुपस्थितत्वाच्च प्रयोज्यवृद्धस्य प्रवृत्तिमेव प्रयोजकवृद्धवाक्यप्रयोजनत्वेन निश्चिनोति। ततः अकिं-चित्कुर्वतः = प्रवृत्त्यनुकूलं किंचित् अजनयतः, शब्दस्य प्रवृत्त्यनुकूलत्वं न संभवति, ममापि प्रवृत्तिप्रसङ्गादिति पर्यालोचयन्, प्रवृत्त्यनुकूलं कार्यताज्ञानमेव तादृशवाक्यजन्यमिति निश्चिनोति। स्वकीयप्रवृत्तौ कार्यताज्ञानस्यैव तेन बालेन प्रवृत्तिहेतुत्वेन निश्चितत्वात्।

शब्दस्य प्रवृत्तिहेतुत्वं नेति निरूपणम्

न चैवं कार्यताज्ञानहेतुत्ववत् कार्यताज्ञानद्वारा प्रवृत्तिहेतुत्वमपि शब्दस्य बालेन गृह्यतामिति वाच्यम्। बालेन स्वकीयप्रवृत्तौ शब्दाधीनस्य शाब्दबोधरूपस्य कार्य-ताज्ञानस्य हेतुत्वेनानिश्चयात्। तथा च शब्दाधीनकार्यताज्ञानं विनापि स्वकीय-प्रवृत्तेर्जायमानतया व्यतिरेकव्यभिचारेण, शब्दस्य कार्यताज्ञानद्वारा प्रवृत्तिहेतुत्वं न गृह्यते। न च तत्रैव व्यभिचारात् न शब्दस्य कार्यताज्ञानं प्रत्यपि हेतुत्वं ग्रहीतुं शक्यमिति वाच्यम्। ज्ञानस्य च प्रत्यक्षादिनानोपायकत्वदर्शनात्, शब्दोऽपि कार्य-ताज्ञाने हेतुरिति निश्चयसंभवात्। तथा चोक्तप्रणाड्या व्यवहारात् पदानां कार्यत्वा-न्वितार्थबोधकतारूपां शक्तिं कल्पयति। पश्चात् आवापोद्वापाभ्यां साक्षात् परंपरया वा कार्यत्वान्वितततत्तदर्थविषयकशाब्दबोधजनकतारूपां शक्तिं कल्पयति। प्रथम-गृहीतसामान्यशक्त्यनुरोधात् सामान्यकार्यकारणभावे कार्यत्वान्विततत्वस्य प्रवेशात्।

पदम् अन्वितबुद्धिं प्रत्येव कारणं, न तु कार्यान्वितबुद्धिं प्रति इति अवान्तर-शङ्का

स्यादेतत् — यद्यपि वृद्धव्यवहारात् आदौ कार्यान्वितधीरनुमिता, तथापि अन्वितविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति पदत्वावच्छिन्नं कारणमिति स्वीकारेणैव कार्यतावाचकपदसमभिव्याहारात् आकाङ्क्षादिमहिम्ना कार्यान्वितविषयकधीसंभ-

वात् न कार्यांशेऽपि शक्तिः (कार्यविषयकत्वावच्छिन्नं प्रति कारणत्वम्), गौरवात्। न च प्रामाणिकं गौरवं न दोषायेति वाच्यम्। प्रमाणाभावात्। अर्थापत्तिर्हि प्रमाणमिति वक्तव्यम्। अर्थापत्तिप्रयोजकान्यथानुपपत्त्यभावात् सा न प्रमाणम्। आकाङ्क्षाज्ञानसहकारेण, विनापि शक्तिं शब्दस्य कार्यान्वितज्ञानजनकत्व-संभवात्। कार्यांशेऽपि शक्तिस्वीकारेऽपि अवश्यमाकाङ्क्षाज्ञानादेः कारणत्वं वक्तव्यम्। आकाङ्क्षाज्ञानाभावे कार्यान्वितविषयकज्ञानाभावात्। तथा चाकाङ्क्षा-लभ्यत्वात् कार्यान्वयांशे न शक्तिः। 'अनन्यलभ्यः शब्दार्थः' इति न्यायात्। अन्यथा = प्रकारान्तरलभ्यार्थान्तर्भावेण शक्तिकल्पने, गवादिपदानां व्यक्तावेव शक्तिः स्यात्। यदि च जातिशक्तिज्ञानोद्बोधितव्यक्तिविषयकसंस्कारादेव व्यक्ति-लाभसंभवान्न व्यक्तौ शक्तिः, तदा आकाङ्क्षादिसहकृतात् कार्यवाचकपदादेव कार्यान्वितलाभसंभवात् किं कार्यान्वितशक्त्या?

न च वृद्धव्यवहारे नियमेन शब्दतः कार्यान्वितविषयकं ज्ञानं दृष्टमिति कार्यान्वयेऽपि शक्तिः इति वाच्यम्। वृद्धव्यवहारे शब्दोपस्थापितेनैवार्थेन सह शब्दोपस्थापितस्यैवार्थस्यान्वयबोधदर्शनात् शब्दजन्यपदार्थोपस्थितेरेव अन्वयबोध-हेतुत्वस्य कल्पनीयतया, "द्वारम्" इत्यादौ "पिधेहि" इत्यादिशब्दाध्याहरेणैव बोध इति वक्तव्यतया तवापसिद्धान्तापत्तेः।

न च क्वचिदसंपूर्णवाक्येऽपि = अन्वयप्रतियोग्युपस्थापकसकलपदाभावेऽपि, वृद्धव्यवहारात् प्राथमिकव्युत्पत्तेः जायमानतया व्यतिरेकव्यभिचारात् शब्दजन्यो-पस्थितिः न कारणमिति वाच्यम्। तर्हि सिद्धार्थकवाक्येऽपि अन्वयप्रतीतेर्दर्शनात् कार्यत्वान्वितविषयकत्वमपि शाब्दत्वाव्यापकमिति कार्यान्विते शक्तिर्न स्यात्। न च तत्र कुत्रचित् पदे कार्यत्वे लक्षणां स्वीकृत्य तदन्वितबोधकत्वं निर्वाह्यमिति वाच्यम्। शक्यान्वयबोधे बाधकाभावात्।

ननु अन्वितविषयकशाब्दबुद्धावपि अनुभावकशक्तिकल्पनारूपगौरवमेव बाधकम्, अन्यथा "गङ्गायां घोषः" इत्यादौ गङ्गादिपदस्यापि तीरादौ लक्षणा न स्यात्। तीरे स्मारकशक्तिकल्पनागौरवरूपबाधकादेव तत्र लक्षणाभ्युपगमादिति चेत् — न। तथापि कार्यान्विते शक्तिर्मास्तु। कार्यान्विततदनन्वितोभयसाधारणान्वितत्वावच्छिन्ने शक्तिरस्तु। सिद्धार्थशब्दस्थलेऽपि शाब्दबोधोपपत्तेः।

किं च कार्यवाचिलिङादीनाम् आकाङ्क्षाद्युपेतपदार्थान्वितस्वार्थे शक्तिर्वाच्या। कार्ये कार्यान्वयासंभवेन कार्यान्वितकार्ये शक्तिः इति वक्तुमशक्यत्वात्। तथा चाविशेषात् पदान्तराणामपि आकाङ्क्षाद्युपेतार्थान्तरान्वितस्वार्थे शक्तिरस्तु। तथा चान्विते पदानां शक्तिरित्येवोचितं, न तु कार्यान्विते शक्तिरिति।

उक्तावान्तरशङ्कासमाधानम्

व्यवहारेणानुमितं कार्यान्वितज्ञानम्। तत्रैव शब्दस्य साक्षात् कारणत्वं निश्चिनोति बालः। शब्दे सति कार्यान्वितज्ञानं, तदभावे तदभाव इत्यन्वय-व्यतिरेकाभ्याम्। न तु परंपरया (आकाङ्क्षादिसहकारेण) कारणत्वमिति निश्चिनोति। साक्षात्कारणत्वस्य औत्सर्गिकत्वेन, तत्संभवे परम्परया कारणत्वस्यान्याय्यत्वात्। अतः कार्यान्वितविषयकज्ञाने एव शक्तिं कल्पयति, न तु अन्वितविषयकज्ञाने पदार्थस्वरूपज्ञाने वा। अन्वितज्ञानपदार्थस्वरूपज्ञानयोः प्रवृत्तिं प्रति अहेतुतया, प्रवृत्त्या लिङ्गेन स्वकारणत्वेन तयोरननुमानात्।

न चान्वितज्ञाने शक्तिस्वीकारेऽपि परम्परया = कार्यवाचकलिङादिपदसमभिव्याहारादिना, कार्यत्वधीः संभवतीति अर्थापत्त्या = उभयसाधारणशाब्दबुद्धिजनकत्वं विना द्वारान्तररहितस्यास्य प्रवर्तकत्वमनुपपन्नमित्यनुपपत्तिकरणकार्थापत्त्या, अन्वितज्ञाने एव शक्तिः कल्प्यताम्, न तु विशिष्टज्ञाने (कार्यत्वान्वितज्ञानत्वावच्छिन्ने), अन्यलभ्यत्वात् इति वाच्यम्। प्रवृत्तिस्तावत् कार्यान्वितविषयकज्ञानं विनानुपपन्ना, तच्च ज्ञानं न शब्दमन्तरा, इत्येवमर्थापत्त्या कल्प्यमानं यत् कार्यान्वितज्ञानजनकत्वं शब्दस्य, तत्र न्यूनाधिकग्रहो न संभवति। एतदुक्तं भवति — अर्थापत्तिः साक्षादुपपादकमात्रविषयिणी न्यूनाधिकाविषयिणी च। असति बाधके यद्धर्मविशिष्टजनकत्वं विना नोपपद्यते इत्याकारकं यत् अनुपपत्तिज्ञानं, तत् तद्धर्मविशिष्टजनकत्वमेव कल्पयति, न तु तद्धर्मघटकीभूतयत्किंचिद्धर्मान्तर्भावेण तदघटकीभूतधर्मान्तर्भावेण वा कारणत्वं ग्राहयति। तथा च प्रवृत्तेः साक्षादुपपादके कार्यान्वितज्ञाने एव पदानां शक्तिः कल्प्यते।

अन्यलभ्यत्वात् कार्यत्वांशस्य न पदशक्यतेति शङ्कासमाधानम्

न च कार्यत्वांशस्य लिङादिलभ्यत्वात्, तदंशान्तर्भावेण न पदानां शक्तिरिति वाच्यम्। बालस्य "कार्यत्वे लिङादीनां शक्तिः" इति ज्ञानाभावात् लिङादिसमभिव्याहाररूपान्यलभ्यत्वप्रतिसंधानरूपबाधकतर्कस्याभावात्। तथा च कार्यत्वांशस्य अन्यलभ्यत्वज्ञानं तदंशे शक्तिग्रहस्य बाधकमिति वक्तुं न शक्यते।

किं च प्रवृत्तिकारणतया उपस्थितं कार्यान्वितविषयकज्ञानं त्यक्त्वा, अनुपस्थिते अन्वितविषयकज्ञानमात्रे शक्तिकल्पनमयुक्तम्। उपस्थितकार्यान्वितज्ञानपरित्यागे हेत्वभावात्। अन्वितविषयकशाब्दज्ञानस्योपस्थित्यन्तरकल्पने च गौरवात्।

अथ प्रवृत्तिहेतुतया कार्यान्वितज्ञानोपस्थितावपि अन्वितज्ञानमप्युपस्थितमिति लाघवात् कार्यांशमपहायान्विते शक्तिः गृह्यताम् इति चेत् — न। ज्ञाने हि पदानां शक्तिः, शक्यत्वात्; न त्वर्थेषु।

न च ज्ञानस्य शक्यत्वेऽपि, कार्यत्वान्वितज्ञानस्य उपस्थितिदशायामन्वित-शाब्दज्ञानस्याप्युपस्थितत्वात् तत्रैव शक्तिग्रह इति वाच्यम्। कार्यत्वान्वितज्ञान-अन्वितज्ञानयोः विषयभेदेन भेदात्। कार्यत्वान्वितज्ञाने हि कार्यत्वान्वितत्वविशिष्टं विषयः, अन्वितज्ञाने चान्वितत्वविशिष्टं विषयः। विशेषणभेदेन च विशिष्ट-मतिरिक्तम्। तदुक्तम् अभाववादे "अन्यत् भूतलज्ञानम्, अन्यच्च घटवद्भूत-लज्ञानम्" इति। न च वस्तुगत्या लघुनि धर्मे शक्यतावच्छेदके संभवति अन्यलभ्यकार्यत्वांशघटितस्य गुरुधर्मस्य न शक्यतावच्छेदकत्वमिति वाच्यम्। कार्यकारणभावग्रहप्राक्काले वास्तविकलघुगुरुधर्मयोर्द्वयोः युगपदुपस्थितिसत्त्वे एव, वास्तविकलघुधर्मस्य शक्यतावच्छेदकत्वे संभवति वास्तविकगुरुधर्मस्य न शक्यतावच्छेदकत्वमिति तर्कस्यावतारात्।

न चान्वितज्ञानमपि कस्यचित् पुरुषस्योपस्थितमेव, यस्य दोषो नास्तीति वाच्यम्। तथापि आद्यव्युत्पत्तिकाले पुरुषसामान्यस्य तदुपस्थित्यभावात्।

लिङादीनामपि कार्यान्विते शक्त्युपपादनम्

ननु तथापि सर्वेषां पदानां न कार्यान्विते शक्तिः, कार्यवाचिलिङादिषु तदसं-भवात् कार्ये कार्यान्वयाभावात् इति चेत् — सर्वेषां पदानां कार्यत्वविशिष्टविषय-कधीजनकत्वस्वीकारात्। तच्च जनकत्वम् इतरपदोपस्थापितकार्यत्वान्वितस्वार्थ-बोधकतया, इतरान्वितस्वोपस्थापितकार्यत्वविशिष्टकार्यप्रतिपादकतया वा। आद्यं घटादिपदानाम्, द्वितीयं लिङादीनाम्।

एवं च कार्यत्वान्विते शक्तिग्रहे सति अनाकाङ्क्षादिवाक्याच्छाब्दबोधरूप-कार्यानुत्पत्त्या आकाङ्क्षादेरपि शाब्दबोधप्रयोजकत्वमङ्गीक्रियते।

एवं च क्रियाकारकपदानां विशेषतस्तत्तदर्थे शक्तिज्ञानस्योपजीव्यः यः प्राथ-मिकः कार्यान्वितशक्तिग्रहः, तदनुरोधेन कार्यवाचकपदाश्रवणस्थलेऽपि तदध्याहारः, क्वचित् कार्ये लक्षणा, क्वचित् असंसर्गाग्रहः इति वक्तव्यम्।

ननु सिद्धपरवाक्यस्याप्यन्वयप्रतीतिजनकतादर्शनात्, प्रथमतः कार्यान्विते शक्तिग्रहेऽपि उत्तरकाले कार्यांशं परित्यज्य अन्वितमात्रे शक्तिः कल्प्यताम्, प्राचीनं कार्यान्वितज्ञानं बाध्यताम् = अप्रमात्वेन कल्प्यताम्, इति चेत् — न। पूर्व-कल्पनातः कल्पनान्तरप्रसङ्गात्। उत्तरकालभाविसिद्धार्थकवाक्यजन्यशाब्दबोधस्य

कार्ये लक्षणादिभिरप्युपपत्तेः अनन्यथासिद्धत्वाभावेन = अन्यथानुपपन्नत्वाभावेन, प्राचीनज्ञानाप्रामाण्याज्ञापकत्वात्। उपजीव्यविरोधाच्च।

सिद्धार्थेऽपि शक्तिः संभवतीति शङ्कायाः समाधानम्

अथ सिद्धार्थेऽपि व्युत्पत्तिः = शक्तिग्रहः, संभवति। तथा हि — चैत्रस्य पुत्रजन्म दृष्टवान् कश्चित् बालकः चैत्रपुत्रजन्मदर्शिना वार्ताहारेण साकं चैत्रसमीपं गतः "चैत्र पुत्रस्ते जातः" इति वार्ताहारवाक्यं शृण्वन् चैत्रस्य मुखप्रसादं पश्यन् तत्कारणभूतं चैत्रस्य हर्षमनुमिनोति। "चैत्रः हर्षवान् प्रसन्नमुखत्वात्" इति। हर्षाच्च तत्कारणं पुत्रजन्मज्ञानमनुमिनोति। "चैत्रः पुत्रजन्मविषयकज्ञानवान्, हर्षवत्त्वात्" इति। पुत्रजन्मन एवोपस्थितत्वात् पुत्रजन्मज्ञानस्य हर्षोपपादकत्वाच्च हर्षात् अर्थापत्त्या पुत्रजन्मज्ञानं कल्पयतीति वा। तदनन्तरं कार्यत्वाविषयकपुत्रजन्मज्ञानं प्रति वाक्यस्य कारणतां कल्पयति। लाघवात्, कारणान्तरकल्पने च गौरवादिति चेत् — न।

हर्षहेतूनां बहूनां संभवात्, हर्षेण लिङ्गेन पुत्रजन्मज्ञानस्य बालेनानुमातुमशक्यत्वात्। प्रियविषयकज्ञानमेव हि हर्षहेतुः। पुत्रजन्म यथा प्रियं तथान्यदपि प्रियं भवितुमर्हति। प्रियान्तरज्ञानादपि हर्षो भवितुमर्हति।

न च प्रियान्तरविषयकज्ञानाभावकालीनो हर्षः पुत्रजन्मरूपप्रियज्ञानस्य लिङ्गमिति वाच्यम्। बालेन तदानीं चैत्रस्य प्रियान्तरविषयकज्ञानं नास्तीति निश्चेतुमशक्यत्वात्। तथा च विशिष्टहेतोरज्ञानरूपा असिद्धिः।

अथ "चैत्र पुत्रस्ते जातः" इति वाक्यश्रवणानन्तरं चैत्रः पुत्रजन्मनिमित्तकं वृद्धिश्राद्धादिक्रियामनुतिष्ठति। तद् दृष्ट्वा च बालः चैत्रस्य पुत्रजन्मज्ञानमनुमिनोति, "चैत्रः पुत्रजन्मज्ञानवान्, पुत्रजन्मज्ञानाव्यभिचारिवृद्धिश्राद्धादिक्रियानुष्ठातृत्वात्" इति, इति चेत् —

यदि "चैत्र! पुत्रस्ते जातः" इति वाक्यश्रवणानन्तरं वृद्धिश्राद्धादिक्रियादर्शनं, तदा "तद्वाक्यं क्रियाकर्तव्यतातात्पर्यकम्" इति कार्यान्वितज्ञानजनकत्वमेव तस्य वाक्यस्य प्रथमतो गृह्यते। तदनन्तरं पुत्रजन्मज्ञानानुमानमिति न व्युत्पत्तिः कार्यं जहाति।

प्रसिद्धार्थकपदसमभिव्याहारस्थलेऽपि कार्यान्विते शक्तिः इति निरूपणम्

ननु यत्र प्रसिद्धार्थकपदसामानाधिकरण्यात् पिकादिपदस्य शक्तिः गृह्यते, यथा "इह सहकारतरौ मधुरं पिको रौति" इति, तत्र कार्यत्वाविषयकशाब्दबोधजनकत्वान्न पदमात्रस्य कार्यत्वान्विते शक्तिः इति चेत् — न। तत्रापि वृद्ध-

व्यवहाराधीना या व्युत्पत्तिः = पिकपदनिष्ठकार्यत्वान्वितपिकानुभावकशक्तिग्रहः, तत्पूर्विका कार्यान्वित एव पिकादिपदशक्तिः इति स्वीकर्तुमुचितम्। अन्यथा प्राथमिकपिकपदवाच्यनिष्ठकार्यत्वान्वितानुभवजनकशक्तिग्रहस्याप्रमात्वापत्तेः।

ननु पिकपदस्य स्मारकशक्तिग्रहात् पूर्वं, घटादिपदस्य कार्यान्वितघटाद्यानुभाविकायाः शक्तेः ग्रहेऽपि, पिकपदस्य कार्यान्वितशक्तिर्न गृहीतेति चेत् — न। "पिकमानय" इत्यादौ पिकादिपदे कार्यान्वितपिकानुभावकशक्तिः प्रथमं केनचित् पुरुषेण गृहीतेति, उपजीव्यजातीयतया तस्याः बलवत्त्वात् = प्रामाण्यग्रहात्।

किं च "पिकपदमपि कार्यान्वितज्ञानशक्तं, पदत्वात्" इति सामान्यतोऽवगतम्। स्वार्थविशेषः परं नावगतः। स इदानीं सुहृदुपदेशादिभिरवगम्यते। "पिकः कोकिलः" इत्यादिकमाप्तवाक्यम्।

पूर्वपक्षस्य निगमनम्

अतः सिद्धं "घटमानय" इत्यादौ प्रवृत्तिपराणां नामकारकविभक्तिधात्वाख्यातादिपदानां सर्वेषां कार्यत्वान्वितस्वार्थज्ञानजनकत्वम् (प्रवर्तकज्ञानजनकत्वम्)। तच्च क्वचित् आख्यातपदे साक्षात्कार्यत्वान्वयात्, क्वचित् नामादिपदे परंपरया कार्यत्वान्वयादिति। स्वार्थविषयतायाः साक्षात् कार्यत्ववैशिष्ट्यविषयतानिरूपकत्वं साक्षात्कार्यत्वान्वयः। स्वार्थविषयतायाः परंपरया कार्यत्ववैशिष्ट्यविषयतानिरूपकत्वं परंपरया कार्यत्वान्वयः।

अत एव विधिशेषभूतानामर्थवादानां स्वर्गादिपदशक्तिग्राहकाणां च "यन्न दुःखेन संभिन्नम्" इत्यादीनां प्रवृत्तिपरत्वेन परम्परया कार्यत्वान्वयात् कार्यत्वान्वितस्वार्थबोधकत्वमिति।

यत्र पुराणभारतादिपाठे फलश्रुतिरस्ति, तत्रार्थवादकल्पितः यः विधिः "भारतादि पठेत्" इत्येवंरूपः, तच्छेषभूतत्वेन प्रवृत्तिपरत्वमेव। तेषाम् अतिपरम्परया कार्यत्वान्वयात् कार्यत्वान्वितस्वार्थबोधकत्वम्। प्रवृत्तितात्पर्यरहितानां स्वरूपाख्यानपराणां तु काव्यनाटकादीनां पदार्थासंसर्गाग्रहेण संसर्गव्यवहारो, न संसर्गग्रहस्तत्रेति पूर्वपक्षः।

सिद्धान्तः

कार्यान्वितशक्तिवादखण्डनम्[१]

पूर्वपक्षिणा वृद्धव्यवहारात् प्रथमं वाक्यसामान्यस्य कार्यान्वितज्ञानसामान्यं प्रति हेतुत्वं व्युत्पित्सुना ज्ञातमिति मत्वा सामान्यतः पदानां कार्यान्विते शक्तिः इति

[१] त.चिं.म, च.भा.द्वि.प.पृ.४८४.

प्रोक्तम्। तदेव न युक्तम्। घटादिपदविशेषाणाम् आनयनादिकार्यविशेषान्वितार्थ-विशेषज्ञानं प्रति हेतुत्वस्यैव प्रथमं ग्रहात् इत्याशयेन मणिकारेण सिद्धान्तः प्रोच्यते।

"घटमानय" इति वाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य घटानयनगोचरप्रवृत्तिं दृष्ट्वा, व्युत्पित्सुः बालः घटकर्मकानयनविशेष्यककार्यत्वप्रकारकज्ञानमेवानुमिनोति, न तु सामान्यतः कार्यत्वान्वितज्ञानम् (कार्यत्ववैशिष्ट्यविषयकज्ञानम्)। प्रवृत्तिविशेषं प्रति कार्यविशेषान्वितज्ञानस्यैव हेतुत्वात्, सामान्यतः कार्यत्वान्वितज्ञानस्य अहेतुत्वात्। तन्मते अन्वितज्ञानकार्यत्वान्वितज्ञानयोरिव घटानयनकार्यज्ञानकार्यत्वान्वितज्ञानयोर्भेदात्। अनुमानप्रयोगश्च — "घटानयनं घटानयनकार्यताज्ञानजन्यं घटानयनगोचरप्रवृत्तिविषयत्वात्, यत् यद्गोचरप्रवृत्तिविषयः तत् तद्विशेष्यक-कार्यताज्ञानजन्यम्" इति।

किं च आवापोद्वापद्वारेण घटादिपदानां प्रत्येकं विशिष्य तत्तदर्थशक्तिग्रहे, कार्यान्वितशक्तिज्ञानस्यानुपयोगः।

एवं च आदौ " 'घटमानय' इति वाक्यं घटानयनविशेष्यककार्यताप्रकारक-ज्ञानहेतुः" इति निश्चिनोति। तदात्वे पदविभागः तत्तदर्थज्ञानजनकत्वं च पदानां बालेन न ज्ञायते। पश्चात् घटपदं, द्वितीयाविभक्तिः, धातुः, लिङादिविधिप्रत्ययः इत्येतेषां प्रत्येकमावापोद्वापद्वारेण घटज्ञान-कर्मत्वज्ञान-आनयनज्ञान-कार्यत्वज्ञानेषु घटादिपदानां प्रत्येकं कारणत्वमवगम्य तत्तदर्थे शक्तिं कल्पयति। पश्चात् प्रवृत्ति-सामान्येन हेतुना कार्यान्वितत्वावच्छिन्नविषयकज्ञानेऽनुमितेऽपि अन्यलभ्यत्वेन = प्रथमं विधिप्रत्ययानां कार्यत्वज्ञानशक्तेः गृहीतत्वेनान्यलभ्यत्वप्रतिसन्धानेन, कार्यांश-मपहाय अन्वितज्ञानमात्रे शक्तिं कल्पयति, न तु प्रथमं घटानयनकार्यताज्ञान-कारणताग्रहात् पूर्वं वाक्यमात्रस्य कार्यान्वितज्ञानमात्रहेतुत्वकल्पनम्।

अथ "घटानयनं क्रिया" इत्याकारकं घटानयननिष्ठक्रियात्वज्ञानं प्रथमतो भवति। ततः प्रवृत्तेरनुमानम्। ततः कार्यान्वितज्ञानस्यानुमानम्। ततः "घटमानय" इति वाक्यस्य कार्यान्वितज्ञानहेतुत्वानुमानम्। ततः पदानां कार्यान्वितज्ञानशक्तेः कल्पनम्। तदनन्तरं घटानयनकार्यताज्ञान-"घटमानय" इति वाक्ययोः कार्य-कारणभावज्ञानमिति चेत् — न। प्रथमं प्रवृत्तिमात्रस्य कार्यान्वितज्ञानमात्रस्य चानुमानं बालस्य क्रमशो भवतीत्यत्र प्रमाणाभावात्। न च घटादिपदानां विशिष्य तत्तदर्थे शक्तिग्रह एव तत्र प्रमाणमिति वाच्यम्। तस्य तेन विनापि संभवात्। न च कार्यान्वितज्ञानानुमानसामग्री तदानीमस्तीति सा सामग्री तत्र प्रमाणमिति वाच्यम्। तदानीं व्याप्त्यादिस्मृतिरूपसामग्रीसत्त्वे प्रमाणाभावात्।

सामान्यकार्यकारणभावस्यानुपयोगः

ननु सामान्ययोः कार्यकारणभावग्रहो विशेषयोः कार्यकारणभावग्रहे हेतुः इति चेन्न। विशेषयोः कार्यकारणभावग्रहानन्तरमेव सामान्ययोः कार्यकारणभावग्रहस्य लोके दर्शनात्। ननु यथा धूमविशेष-वह्निविशेषयोः कार्यकारणभावग्रहे तत्सामान्ययोः कार्यकारणभावो भासते, अन्यथा न सकृद्दर्शनगम्या व्याप्तिः स्यात्। तथात्रापि समानसंवित्संवेद्यत्वात् विशेषयोः कार्यकारणभाववित्तिविषयः सामान्ययोः कार्यकारणभाव इति चेत् —

न। प्रत्यक्षेण विशेषग्रहे सामान्यमपि योग्यत्वात् भासते। प्रकृते च कार्यविशेषेण कारणविशेषानुमितौ न सामान्यं = कार्यत्वान्वितज्ञानत्वावच्छिन्नं, भासते इति न कार्यान्वितज्ञानत्वघटानयनकार्यताज्ञानत्वरूपयोः सामान्यविशेषधर्मयोः युगपदुपस्थितिः। तथा च यत्र सामान्यविशेषधर्मयोः युगपदुपस्थितिः, तत्रैव विशेषकार्यकारणभावग्रहस्य सामान्यकार्यकारणभावविषयकत्वनियमः।

अथ विशेषयोः कार्यकारणभावात् सामान्ययोरपि कार्यकारणभावमनुमिनोतीति चेत् — तर्हि विशेषयोः कार्यकारणभावावगमः प्राथमिक इति तन्मूलकः प्रथमं घटादिपदविशेषस्य घटज्ञानादिषु शक्तिग्रह एव स्यात्। निष्प्रयोजनकसामान्यकार्यकारणभावानुमितौ मानाभावात्।

अन्विते पदानां शक्तिरिति निरूपणम्

यच्चोक्तं प्रवृत्तिकारणतयोपस्थितं कार्यान्वितज्ञानमपहाय अन्वितज्ञानं कल्पयित्वा तत्र शक्तिकल्पनमयुक्तम्, उपस्थितत्यागे अनुपस्थितकल्पनायां च गौरवादिति। तन्न। कार्यान्वितज्ञानेऽन्वितज्ञानत्वस्य सत्त्वात्। कार्यान्वितज्ञानस्य अन्वितज्ञानविशेषत्वात्। अतोऽन्वितज्ञानत्वावच्छिन्ने एव पदानां शक्तिग्रहः, न तु कार्यान्वितज्ञानत्वावच्छिन्ने, गौरवात्।

अत एव घटवद्भूतलज्ञाने भूतलज्ञानत्वमप्यस्तीति तद्भिन्नं तज्ज्ञानमभावव्यवहारे कारणमिति भवतापि स्वीकृतम्।

ननु कार्यान्वितज्ञाने अन्वितज्ञानत्वस्य सत्त्वेऽपि नान्वितज्ञानत्वरूपेण तदुपस्थितम्, अपि तु कार्यत्वावच्छिन्नज्ञानत्वेनैव तदुपस्थितम्। अतः अन्वितज्ञानत्वस्य उपस्थित्यन्तरं कल्पनीयमिति गौरवमिति चेत् — न। कार्यत्वान्वितज्ञानत्वे अन्वितज्ञानत्वं विशेष्यमिति कार्यत्वान्वितज्ञानत्वोपस्थितौ अन्वितज्ञानत्वस्यापि विषयत्वात् नोपस्थित्यन्तरं कल्पनीयम्। विशिष्टज्ञानसामग्रीतः यदा विशिष्टं भासते, तदा तदन्तर्गतविशेष्यस्यापि भानावश्यंभावात्।

अन्यथा जातिप्रकारकज्ञानत्वमन्यत्, व्यक्तिविशेष्यकजातिप्रकारकज्ञानत्वमन्यत् इति व्यक्तिविशेष्यकज्ञानत्वमपहाय जातिप्रकारकज्ञानत्वं क्वापि नोपस्थितमिति तव मते, जातिप्रकारकज्ञानत्वावच्छिन्न एव पदानां शक्तिग्रह इति न स्यात्। जाति-प्रकारकज्ञानत्वस्यानुपस्थितत्वात्[1]।

ननु केवलजातिविषयकज्ञाने एव जातिज्ञानत्वमुपस्थितमिति तदवच्छिन्ने एव शक्तिः लाघवादिति चेत् — न। तथा सति व्यक्तिसमानसंवित्संवेद्यत्वं जातेर्न स्यात्।

ननु जातिविशिष्टज्ञानोपस्थितेः = व्यक्तिविशेष्यकजातिप्रकारकज्ञानत्वेनोपस्थितेः, व्यक्तिविशेष्यकज्ञानविषयकत्वेऽपि, न जातिविशिष्टज्ञानत्वं शक्यतावच्छेदकम्, गौरवात्, व्यक्तेरन्यलभ्यत्वाच्च। अपि तु जातिज्ञानत्वमेव शक्यतावच्छेदकं लाघ-वादिति चेत् — तर्हि कार्यत्वान्वितविषयकज्ञानत्वेनोपस्थितेः अन्वितविषयक-ज्ञानविषयकत्वेऽपि न कार्यत्वान्वितविषयकत्वं शक्यतावच्छेदकं, गौरवात्, कार्य-त्वांशस्यान्यलभ्यत्वाच्च। अपि तु अन्वितविषयकज्ञानत्वमेव शक्यतावच्छेदकं, लाघवादिति तुल्यम्।

न च द्वयोर्युगपदुस्थितौ लाघवावतारः, न चात्र युगपदुपस्थितिरिति वाच्यम्। विशिष्टज्ञानस्य विशेष्यविषयकत्वनियमात् विशिष्टज्ञानोपस्थितिकाले विशेष्य-विषयकज्ञानस्याप्युपस्थित्यवश्यम्भावात्।

किं च "ममेदं कार्यम्" इति ज्ञानं विना प्रवृत्तिर्न संभवतीति प्रवृत्तिरूपेण लिङ्गेन कार्यताज्ञानमेव स्वकारणत्वेनानुमितमिति, तस्य च शब्दजन्यतया मत्कार्यताज्ञाने एव शब्दशक्तिं व्युत्पित्सुः बालः जानीयात्। भवन्मते प्रवृत्त्य-न्यथानुपपत्त्या क्रियमाणायाः कल्पनायाः प्रवृत्तेर्यत् साक्षादुपपादकं तद्विषयकत्वात्, मदंशमनन्तर्भाव्य "इदं कार्यम्" इति ज्ञाने शक्तिं न जानीयात्। "इदं मत्कृति-साध्यम्" इति ज्ञानस्यैव प्रवृत्तिं प्रति कारणत्वात्। "इदं कार्यम्" इति ज्ञानं तु साक्षादुपपादकस्य "ममेदं कार्यम्" इति ज्ञानस्योपपादकम्, न तु साक्षादुपपादकम्।

अथ "इदं कार्यम्" इति ज्ञाने शक्त्यङ्गीकारेणैव अनुमानद्वारा "ममेदं कार्यम्" इति ज्ञानसंभवात् अन्यलभ्यत्वेन न तत्र शक्तिकल्पनमिति चेत् — तर्हि इतरा-न्वितज्ञाने शक्त्यङ्गीकारेणैव कार्यवाचकपदसमभिव्याहारमहिम्ना कार्यान्वितज्ञान-संभवात् अन्यलभ्यत्वेन न कार्यान्वितज्ञाने शक्तिकल्पनमिति तुल्यम्। गौरवं च कार्यान्वितज्ञानशक्तिकल्पने।

ननु मदंशमनन्तर्भाव्य "इदं कार्यम्" इति ज्ञानं साक्षादेव प्रवर्तकम्। न च तथा सति पाकादौ स्वकृत्यसाध्यताज्ञानदशायामपि प्रवृत्तिप्रसङ्ग इति वाच्यम्। कर्तव्य-

---

[1] तन्मते जातिविशिष्टज्ञानं विना केवलजातिज्ञानाभावात् विशिष्टोपस्थितौ च न जातिज्ञानत्वोपस्थितिः उक्त-युक्त्या स्वीक्रियते इति कथं तत्र शक्तिग्रह इति भावः।

ताप्रयोजकसकलविशेषणानां स्वगतत्वप्रतिसन्धानस्य सहकारिकारणत्वात्। तानि च विशेषणानि ओदनकामना, तस्य = पाकस्य, ओदनसाधनताज्ञानतण्डुलाद्युपकरणवत्त्वादीनि। स्वकृत्यसाध्यताज्ञानदशायां च तेषु स्वगतत्वप्रतिसन्धानविरहात् न प्रवृत्तिप्रसङ्गः। न हि सहकारिकारणविरहेण कार्यानुत्पादे साक्षात् कारणत्वं निवर्तते इति चेत् —

लाघवेन "ममेदं कार्यम्" इति ज्ञानादेव प्रवृत्तेः संभवात्।

अपि च यादृशस्य ओदनकामनादिमतः पुरुषस्य "बलवदनिष्टाजनककृतिसाध्यमिदं पाकादिकं, तादृशोऽहम्" इति धीः न प्रवृत्तिकारणम्। सा हीच्छाद्वारा प्रवृत्तिहेतुर्वाच्या। सा चेच्छा नोत्पत्तुमर्हति। कृतक्रियमाणपरकीयपाकविषयककृतिसाध्यताज्ञानस्य सिद्धविषयकस्य असिद्धविषयकेच्छानुत्पादकत्वात्। इच्छायाः स्वप्रकारप्रकारकधीजन्यत्वेन "कृत्या साधयानि" इत्याकारिकायाः मत्कृतिसाध्यत्वप्रकारकेच्छायाः स्वकृत्यनन्तरभविष्यत्तारूपकृतिसाध्यताधीजन्यत्वाच्च।

कार्यत्वस्यान्यलभ्यत्वात् न पदशक्यता

किं चास्तु प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्कारणत्वज्ञानात् कार्यान्वितज्ञाने शक्तिग्रहः, तथापि पश्चात् आवापोद्धाराभ्यां पदविशेषस्येतरान्वितस्वार्थज्ञाने शक्तिं कल्पयति, लाघवात्। न तु कार्यत्वांशेऽपि, गौरवात्। अन्यलभ्यत्वाच्च।

न चैवं प्रथमोत्पन्नस्य साक्षात्कारणताज्ञानस्य तन्मूलककार्यान्वितशक्तिग्रहस्य च बाधा = अप्रमात्वं, स्यादिति वाच्यम्। इष्टत्वात्। अन्यथाप्युपपत्तिमपश्यतो हि बालस्य स साक्षात्कारणताग्रहः वृत्त इति तस्य अप्रमात्वात् (अबलवत्त्वात्)। गौरवान्यलभ्यत्वतर्कसहकृतप्रमाणजन्यस्य उत्तरकालीनस्य अन्वितज्ञानशक्तिग्रहस्य बलवत्त्वात् = प्रमात्वात्। न चोपजीव्यबाधप्रसक्त्या अन्वितस्वार्थज्ञानत्वावच्छिन्ने पदविशेषाणां शक्तिं न गृह्णातीति वाच्यम्। कार्यान्वितशक्तिग्रहस्योपजीव्यत्वे प्रमाणाभावात्। दैवाद्धि (सामग्रीवशात्) प्रथमं कार्यान्वितज्ञानकारणताज्ञानं वृत्तम्। न तु पदविशेषशक्तिग्रहे तस्य हेतुत्वम्, तेन विनापि तत्संभवात्। न च प्राथमिकत्वेन तस्य बलवत्त्वम्। भ्रमस्य प्राथमिकस्याप्यबलत्वात्। "इदं रजतम्" इति भ्रमस्य प्राथमिकत्वेऽपि तदुत्तरवर्तिनः "नेदं रजतम्, अपि तु शुक्तिः" इति ज्ञानस्यैव प्रमात्वात्।

न च सर्वेषामपि प्राथमिकं तत् ज्ञानमिति तस्य बलवत्त्वमिति वाच्यम्। शरीरेऽहम्प्रत्ययस्य सर्वेषां जायमानत्वेऽपि बलवत्त्वाभावात् (प्रमात्वाभावात्), चन्द्रतारकादिपरिमाणे सर्वेषामल्पत्वग्रहे च तदभावाच्च।

अत एव पूर्वकल्पनातः कल्पनान्तरप्रसङ्गः स्यादिति निरस्तम्। यत्र पूर्व-कल्पनायाः अनन्यथासिद्धतया उपजीव्यतया बलवत्त्वं, तत्रैव पूर्वकल्पनातः कल्पनान्तरस्य दोषत्वम्। प्रकृते तु पूर्वकल्पनायाः नोपजीव्यत्वं, न वा अनन्यथा-सिद्धत्वमिति पूर्वमेवोक्तम्।

किं च प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्परम्परोदासीनं कारणत्वमात्रं बालेन गृह्यते। न तु साक्षात्कारणत्वम्। कारणत्वग्राहकान्वयव्यतिरेकादेः साक्षात्परम्परासाधारणत्वात्। अत एव साक्षाद्वा परंपरया वेति संशयो भवति। औत्सर्गिकः साक्षात्कारणत्वग्रहोऽपि साक्षात्कारणत्वे बाधकाभावनिश्चयसहकारे-णैव भवति। बाधकं च कार्यत्वांशस्यान्यलभ्यत्वम्। तदभावं तु व्युत्पित्सुः बालः न निर्णेतुं शक्नोति।

अत एव प्रामाण्यस्यौत्सर्गिकत्वेऽपि बाधकाभावसहकृतनिश्चयादेव तस्य निश्चयः। अन्यथा "इदं ज्ञानं प्रमा अप्रमा वा", "इदं साक्षात्कारणं वा परंपरया कारणं वा" इति संशयः क्वापि न स्यात्।

सिद्धार्थबोधकत्वं पदानामिति निरूपणम्

यच्च "चैत्र पुत्रस्ते जातः" इत्यादौ पुत्रजन्मरूपसिद्धार्थबोधकत्वं न संभवति, हर्षहेतूनां बहूनां संभवात्, इत्यादि। तन्न। स्वतो हर्षहेतुत्वेन संभावितानां स्तन-पानादीनां प्रकृतेऽभावनिश्चयात् पुत्रजन्मातिरिक्तस्य हर्षहेतोरज्ञानाच्च उपस्थितत्वेन पुत्रजन्मज्ञानस्य हर्षोपपादकत्वाच्च पुत्रजन्मज्ञानस्यैव हर्षहेतुत्वेन कल्पनात्।

ननु पुत्रजन्मातिरिक्तप्रियविषयकज्ञानं हर्षकारणं भविष्यतीति शङ्कायां कथं पुत्रजन्मज्ञानमेव हर्षहेतुरिति निश्चीयत इति चेत् — न। एवं हि कार्यान्वितज्ञानेऽपि शब्दानां हेतुत्वं न गृह्येत। कारणान्तरादपि कार्यान्वितज्ञानसंभवात्। अनन्यथा-सिद्धान्वयव्यतिरेकवशात् शब्दस्य कार्यान्वितज्ञानहेतुत्वं निश्चीयत इति यदि, तदा हर्षहेतुज्ञाने शब्दस्यान्वयाद्यनुविधानात् पुत्रजन्मज्ञानं प्रति शब्दस्य हेतुत्वं निश्चीयत इति तुल्यम्। पुत्रजन्मातिरिक्तप्रियस्य तदानीमज्ञानात्, पुत्रजन्मज्ञानस्य हर्षहेतुत्वे एव तस्य शब्दजन्यत्वसंभवाच्च।

अपि च बाष्पे धूमभ्रमात् दैवात्संनिहितस्य वह्नेः अनुमानवत्, हर्षेण हेतुना व्यभिचारिणापि काकतालीयसंपन्नपुत्रजन्मज्ञानानुमानं संभवति — "अयं पुत्रजन्म-ज्ञानवान्, हर्षवत्त्वात्" इति। न च लिङ्गाभासजन्यानुमितेः भ्रमत्वात् अनुमिति-मूलकः शक्तिग्रहोऽपि भ्रमः स्यात् इति वाच्यम्। विषयस्य अबाधितत्वेन अनुमितिशक्तिग्रहयोः यथार्थत्वात्। यथा कश्चित् सूत्रसंचाराधिष्ठितं दारुपुत्रकं "घटमानय" इति नियुङ्क्ते, स च दारुपुत्रकः घटमानयति, तदा चेतनव्यवहारादिव

तद्दर्शी बालः शब्दशक्तिं गृह्णाति — "इयं क्रिया कृतिजन्या, सा कृतिः ज्ञानजन्या, तज्ज्ञानं वाक्यजन्यम्" इति। एतादृशानुमितिपरम्परायाः भ्रमत्वेऽपि तद्धेतुकः शब्दः, कार्यत्वान्वितज्ञानशक्तिग्रहः, तज्जन्यः शाब्दबोधश्च यथार्थ एव (प्रमैव), विषयस्याबाधितत्वात् इति। अतश्च सिद्धं सिद्धार्थेऽपि शक्तिग्रहः इति।

अत एव = शब्दस्य कार्यत्वानन्वितविषयकशाब्दबोधं प्रत्यपि कारणत्वादेव, विधिवाक्यश्रवणं विनापि

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदम्॥"[१]

इत्यर्थवादोपस्थिते सुखविशेषे स्वर्गपदस्य शक्तिग्रहः।

तथा "इन्द्रमुपासीत" इत्यादौ विद्यमानस्य इन्द्रपदस्य "इन्द्रः सहस्राक्षः" इत्याद्यर्थवादवशात् देवताविशेषे शक्तिग्रहः।

एवं वाक्यशेषोऽपि कार्यत्वानन्वितार्थविषयकशक्तिग्राहकः। तथा हि "यवमयश्चरुर्भवति" "वाराही चोपानत्" "वैतसे कटे प्राजापत्यं चरुं चिनोति" इत्यत्र "यववराहवेतसशब्दाः किं कङ्गुवायसजम्बूनां (सस्यविशेषकाकवृक्षविशेषाणां) वाचकाः, उत दीर्घशूकसूकरवञ्जुलानाम्" इति म्लेच्छार्यव्यवहारदर्शनात्[२] संदेहे सति; मुख्यार्थनिश्चयाभावात् (तत्तदर्थे शक्तिनिश्चयाभावात्) यवादिपदे तत्तदर्थप्रमाजनकत्वानिश्चये व्यवहारस्याविशेषात् शक्तिनिश्चयो न संभवतीति पूर्वपक्षे प्राप्ते;

"वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाः प्रदृश्यन्ते यवाः कणिशशालिनः॥"

"वराहं गावोऽनुधावन्ति" "अप्सुजो वेतसः" इति वाक्यशेषरूपवेदविरोधिनी म्लेच्छप्रसिद्धिः वेदविरुद्धा स्मृतिरिव हेयेति निरस्तायां म्लेच्छप्रसिद्धौ निष्प्रतिपक्षार्यव्यवहाराच्छक्तिग्रहः।

इतरान्विते शक्तिः इति मतस्य निरासः

कार्यत्वांशमपहाय लाघवात् अन्वितविषयकशाब्दज्ञानत्वावच्छिन्ने एव पदानां शक्तिः। अन्वितत्वं वैशिष्ट्यावगाहित्वमिति पूर्वमुक्तम्। इदानीमन्वितत्वांशमपि त्यक्त्वा पदार्थस्वरूपे एव पदानां शक्तिः इति निर्णीयते।

---

[१] अस्यायमर्थः — यत् सुखं न दुःखेन संभिन्नं = न दुःखसमानाधिकरणं, दुःखावच्छेदकशरीरावच्छेद्यम् इति यावत्। अन्यथा स्वर्गिणः सुखस्यापि आत्मनि भाविभूतदुःखसमानाधिकरणत्वात् असंभवापत्तेः। न च ग्रस्तम्= ग्रासः = लौकिकसुखापेक्षया अपकर्षः, तच्छून्यम्। अनन्तरम् = अन्तरा = विच्छेदः, तद्रहितम्। अभिलाषोपनीतम् = सुखाभिलाषानन्तरं तत्साधनार्जनविलम्बासहम्। स्वर्गिणां विलक्षणादृष्टवशात् सुखविषयकाभिलाषोत्पत्तिसमय एव तत्र कारणानां सर्वेषां संपत्तिः।

[२] कङ्ग्वादौ म्लेच्छव्यवहारस्य, दीर्घशूकादौ आर्यव्यवहारस्य दर्शनात्।

ननु वृद्धव्यवहारेण अनुमिते इतरान्वितज्ञाने पदानां कारणत्वग्रहात्, तत्रैव शक्तिं गृह्णाति, उपस्थितत्वात्। न चाग्रे तत्त्यागः, त्यागकारणाभावात्। न तु पदार्थज्ञानमात्रे शक्तिं गृह्णाति। व्यवहारात् पदार्थज्ञानस्यानुपस्थितेः। उपायान्तरात् तदुपस्थितिकल्पने मानाभावात्। अत इतरान्वितस्वार्थज्ञानशक्तत्वेन ज्ञातं पदं स्वार्थान्वयानुभावकम् इत्यन्विताभिधानसिद्धिः इति चेत् — न।

इतरान्वितपदार्थज्ञानोपस्थितौ पदार्थज्ञानं विशेष्यमिति तस्यापि तदुपस्थितौ विषयत्वमावश्यकम्। विशिष्टविषयकज्ञानस्य विशेष्यविषयकत्वनियमात्। तथा च उपस्थिते पदार्थज्ञाने एव शक्तिं कल्पयति लाघवात्, न तु अन्वयांशेऽपि, गौरवात्।

अस्तु वा प्रथममितरान्वितज्ञाने शक्तिग्रहः। तथाप्यग्रे तत्त्यागः, अन्वयांशस्यान्यलभ्यत्वप्रतिसन्धानात्। अनन्यलभ्यस्यैव शब्दार्थत्वात्। सर्वैः प्रथमगृहीतत्वमात्रं न बलमिति पूर्वमेवोक्तम्।

तस्मात् यत् प्राभाकरैः उच्यते — सर्वैः प्रथमं व्यवहारात् उपस्थिते कार्यान्वितज्ञानेऽन्वितज्ञाने वा पदानां कारणत्वग्रहात् तत्र शक्तिग्रहः। अग्रे गौरवान्यलभ्यत्वयोः प्रतिसन्धानेऽपि न त्याग उचितः, पूर्वकल्पनविरोधात् इति, तत् स्वशिष्यव्यामोहनम्।

अन्वयांशस्य त्यागो नोचित इति शङ्कायाः समाधानम्

ननु "घटमानय" इत्यादिवाक्ये कार्यत्वस्येतरलिङादिपदेन ज्ञानसंभवेन तत्त्यागेऽपि, अन्वयस्येतरपदाशक्यत्वात् तत्त्यागो नोचित इति चेत् — न।

घटशक्तत्वेन ज्ञातं पदं स्वार्थस्मरणद्वारा आकाङ्क्षादिसहकारिवशात् समभिव्याहृतपदार्थेन सह स्वार्थस्यान्वयानुभवं जनयति, तथैवान्वयव्यतिरेकाभ्यामाकाङ्क्षादेः कार्यकारणभावात् इति अन्यथैव आकाङ्क्षादिना अन्वयज्ञानलाभात् किमन्वयांशे शक्त्या। अन्वयमात्रशक्तावपि अन्वयविशेषज्ञानार्थमाकाङ्क्षादेः अवश्यमपेक्षणीयत्वात्।

अपि च क्रियाकारकपदयोः प्रत्येकमितरान्वितस्वार्थबोधकत्वे वाक्यार्थद्वयधीप्रसङ्गात्। यद्यप्येक एवान्वयः उभयप्रतियोगिक इति न वाक्यार्थद्वयधीप्रसङ्गः, तथापि घटान्वितानयनस्य आनयनान्वितघटस्य च विशेषणविशेष्यभावेन भिन्नत्वात् वाक्यार्थद्वयधीप्रसङ्गः दुर्वारः। न चैवमेकमेवान्विताभिधायकम्, इतरत्तु अन्वयप्रतियोगिस्मारकमिति वाच्यम्। अविशेषात्, किं पदमन्विताभिधायकं, किं पदमन्वयप्रतियोगिस्मारकमित्यत्र विनिगमकस्य दुर्वचत्वात्।

न च अशक्यस्यान्वयस्य शाब्दबोधविषयत्वस्वीकारे "घटमानय" इत्यत्र पटसंसर्गस्यापि बोधापत्तिः इति वाच्यम्। अशक्योऽप्यन्वयः पदान्तरशक्यप्रतियोगिक एव आकाङ्क्षया भासते इति स्वीकारेणोक्तदोषाप्रसक्तेः। अन्यथा आकाङ्क्षादेः अनियामकत्वे "घटमानय" इत्यत्र अन्वये शक्तिस्वीकारेऽपि पटसंसर्गबोधापत्तेः को निवारकः?

नन्वेवं पदानामन्वितज्ञानजनकत्वात् अन्वये शक्तिरस्त्येव, तत्राशक्तस्य पदस्य तज्ज्ञानाजनकत्वात्। नैयायिकमतेऽपि पदादन्वयबोधे ईश्वरेच्छारूपशक्तेः सत्त्वात् इति चेत् —

सत्यम्। अन्वयबोधे पदानां शक्तेः सत्त्वेऽपि सा स्वरूपसती बोधं जनयति, न तु ज्ञाता सती। घटज्ञानशक्तत्वेन घटपदज्ञानादेव = घटज्ञानजनकत्वप्रकारकेच्छाविषयत्वेन रूपेण घटपदज्ञानादेव, घटान्वयबोधोपपत्तेः। यथा तव प्राभाकरस्य मते जातिशक्तत्वेन ज्ञातस्य पदस्य जात्याश्रयव्यक्तिबोधकत्वं, तद्वत्।

दृष्टं च ज्ञायमानकरणस्थले सामान्यसंबन्धितया ज्ञातस्यापि विशेषबुद्धिजनकत्वम्, यथा वह्निसामान्यव्याप्ततया ज्ञातस्य धूमस्य वह्निविशेषबुद्धिजनकत्वम्।

अथ घटज्ञानत्वेन रूपेण शक्तिज्ञानस्य ("इदं घटज्ञानत्वावच्छिन्नशक्तम्" इत्याकारकस्य) हेतुत्वे, घटज्ञानत्वमितरान्वितघटज्ञानेऽप्यस्तीति अन्वितघटज्ञानेऽपि ज्ञातैव शक्तिः बोधं जनयतीति स्वरूपसती कारणमिति कथमुक्तमिति चेत्, सत्यम्। किं तु घटज्ञानत्वं शक्यतावच्छेदकं न तु अन्वितघटज्ञानत्वं गौरवात्, अन्वयांशस्यान्यलभ्यत्वाच्च।

एवं च जातिवाचकपदस्य व्यक्ताविव, एकैव शक्तिः अन्वयांशे स्वरूपसती पदार्थांशे च ज्ञाता सती उपयुज्यते। न च जातिव्यक्त्योः समानसंवित्संवेद्यत्वात् तथा भवतु। घटतन्निष्ठान्वययोस्तु न समानसंवित्संवेद्यत्वम्। अन्वयमविषयीकृत्यापि घटस्मरणस्योदयात् इति वाच्यम्। घटपदजन्यघटानुभवस्य अन्वयविषयकत्वनियमात्, केवलस्य घटस्य शब्देनाननुभवात्। तथा च "घटपदं घटशक्तम्" इति ज्ञानादेव अन्वयानुभवो भवतीति स्वीकारे न काचित् क्षतिः। घटस्मरणं प्रति तु न घटपदत्वेन हेतुता, किं तु संबन्धितया ज्ञातत्वेन।

अन्वये शक्तिः इति आक्षेपः

स्यादेतत् — अन्वयतात्पर्यकत्वज्ञानसहकारेण अन्वयप्रतिपादकं पदमित्यविवादम्। तात्पर्यनिर्वाहिका = तात्पर्यज्ञानाधीनतद्बोधनिर्वाहिका च वृत्तिः = तत्र तत्पदवृत्तिः। सा च वृत्तिः अन्वये न गौणी, न वा लक्षणेति शक्तिसिद्धिः।

अथान्वये लक्षणैव। पदानां स्वार्थसंबन्धित्वेन रूपेण अन्वये तात्पर्यग्रहात्। पदार्थोपस्थित्यनन्तरमन्वयज्ञानोदयाच्च। तथा च यथा "गङ्गायां घोषः" इत्यत्र प्रवाहोपस्थित्यनन्तरं तीरान्वयबोधात् तत्र लक्षणा, तथेहापि। न चैकेनैव पदेन शक्त्या पदार्थस्य, लक्षणया अन्वयस्य च बोधाङ्गीकारे वृत्तिद्वयविरोधः इति वाच्यम्। सर्वत्र अन्वयविशेषणतया पदार्थस्य बोधात् फलबलात् वृत्तिद्वय-विरोधानङ्गीकारात्। यत्र द्वाभ्यां वृत्तिभ्यां द्वयोः अनुभवः पृथक्, तत्रैव वृत्ति-द्वयविरोधः। न च लाक्षणिकानां पदानामन्वयाननुभावकत्वात् लक्षणया अन्वया-नुभवः कथमिति वाच्यम्। शक्यार्थस्य घटादेः स्मरणमात्राङ्गीकारात्, अन्वय-स्यैवानुभवस्वीकारात्। अन्वये लाक्षणिकस्यान्वयानुभावकत्वस्य अवर्जनीयत्वात्, प्रत्युत पदानां शक्त्या अननुभावकतया सर्वत्र वाक्ये लाक्षणिकपदानामेव अन्व-यानुभावकत्वाच्च इति चेत् — न। वृत्तिर्हि ज्ञाता उपयुज्यते, न स्वरूपसती, अतिप्रसङ्गात् = अगृहीतवृत्तिकादपि पदाच्छाब्दबोधप्रसङ्गात्। न चेहान्वयः स्वार्थ-संबन्धितया प्रागवगतः, वाक्यार्थस्यापूर्वत्वात्। तथा च अन्वये लक्षणाख्यवृत्तिग्रहः शाब्दबोधात् प्राक् दुर्घटः। किं च शक्यसंबन्धितया अन्वये लक्षणासिद्ध्ये पदार्थे पृथक् शक्तिकल्पनं वाच्यम्। तदपेक्षया लाघवात् अन्वये शक्तिः अस्तु, किं वृत्तिद्वयकल्पनया? एवं स्थिते प्रयोगोऽपि — "अन्वयः पदशक्यः, वृत्त्यन्तरं विनापि पदजन्यज्ञानविषयत्वात्, पदार्थवत्" इति।

आक्षेपसमाधानम्

उच्यते। वृत्तिं विनापि तात्पर्यज्ञानाधीनस्यान्वयबोधस्य निर्वाहात्। उक्तं हि "आकाङ्क्षादिज्ञानवशात् अन्वयबोधसंभवः" इति। तथा च किमन्वये वृत्तिस्वी-कारेण? अन्यथा क्वचित् तात्पर्यज्ञानाधीनस्य बोधस्य वृत्तिज्ञाननिर्वाह्यत्वदर्शनात् सर्वत्र तथा कल्पने, क्वचित् तात्पर्यज्ञानाधीनस्य बोधस्य शक्तिज्ञाननिर्वा-ह्यत्वदर्शनात् तीरादावपि गङ्गादिपदस्य शक्तिप्रसङ्गात् लक्षणायाः उच्छेदापत्तिः।

अथ गङ्गापदस्य तीरे शक्तिं विनापि शक्यसंबन्धात् तीरादिबोधनिर्वाहात् न तत्र शक्तिः इति चेत् — तर्हि वृत्तिं विनापि आकाङ्क्षया अन्वयबोधनिर्वाहात् किमन्वये पदानां शक्त्या लक्षणया वा वृत्त्या? अत एव भवदुक्तमनुमानम-प्रयोजकम्। शक्तिं लक्षणां च विनापि अन्वयस्य पदप्रतिपाद्यत्वसंभवेन व्यभिचार-शङ्कानिवर्तकतर्काभावात्।

अत एव "धूमोऽस्ति" इत्यत्र धूमपदस्य वह्निबोधपरत्वेऽपि न वह्नौ लक्षणा। शक्त्या धूमोपस्थितौ अनुमानद्वारा वह्निप्रतीतिसंभवात्।

तथा —

"गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयात् यत्र गतो भवान्॥"

इति वाक्यस्य 'मा गच्छ' इत्यत्र तात्पर्येऽपि, तद्बोधार्थं न लक्षणा। गमनस्य प्रियामरणहेतुत्वं हि वाक्यार्थः। तादृशवाक्यार्थबोधानन्तरं "गमनं मया न कर्तव्यं, प्रियामरणहेतुत्वात्" इत्यनुमानेनैव गमनेऽकर्तव्यताबोधतात्पर्यनिर्वाहात् गमनाकर्तव्यतायां लक्षणाया अनावश्यकत्वात्। यत्र हि मुख्यया वृत्त्या (शक्त्या) साक्षात् परंपरया वा तात्पर्यज्ञानाधीनबोधस्य निर्वाहो न भवति तत्र लक्षणा[१]।

अन्वयसामान्ये पदानां शक्तिः इति शङ्कायाः समाधानम्

ननु "घटमानय" इत्यत्र प्रत्येकमन्वयविशेषे जिज्ञासा भवति। सामान्यज्ञानं विना विशेषजिज्ञासा न संभवतीति अन्वयसामान्ये पदानां शक्तिरङ्गीकरणीयेति चेत् — न। कारकेण सामान्यतः क्रियासंसर्गस्य, क्रियया च सामान्यतः कारकसंसर्गस्य च आक्षेपादेव ज्ञानसंभवात् अन्वयसामान्ये शक्तेरनावश्यकत्वात्। यथा— 'यत् कारकं तत् सक्रियम्', 'या क्रिया सा सकारका' इति व्याप्त्या कारकेण सामान्यतः क्रियानुमानम्, क्रियया च सामान्यतः कारकानुमानम्; तथा 'यत् कारकं तत् क्रियासंसृष्टम्', 'या क्रिया सा कारकसंसृष्टा' इति व्याप्त्या सामान्यतः अन्वयमनुमाय ततो विशेषान्वये जिज्ञासोपपत्तेः।

अन्यदप्युदाहरणं श्रूयतां — यथा जम्बीरफले दृष्टे सति, "इदं रसवत्, फलत्वात्, इतरफलवत्" इति सामान्यतः रसेऽनुमिते सति, "कोऽस्य रसः" इतिं विशेषजिज्ञासा भवति, तद्वत् इति।

यच्चोक्तम् — अन्वितपदार्थे मम मते एकैव शक्तिः। तव मते तु पदार्थे एका शक्तिः, अपरा तु अन्वय इति शक्तिद्वयमिति। तन्न। मम मते अन्वये पदशक्त्यस्वीकारात्।

न चान्वये शक्तिज्ञानाभावे पदानामुपयोगो न स्यात् इति वाच्यम्। अन्वयानुभवार्थमेव पदार्थे पदानां शक्तिकल्पनात्। तथा च पदार्थस्मृतिद्वारा पदानामन्वयानुभवहेतुत्वात् न पदानामनुपयोगः।

तस्मात् वृत्तिलक्षणसंबन्धेन पदार्थविशेषणतया पदार्थविशेष्यतया वा पदावगाहिज्ञानं करणम्, पदार्थमात्रस्मरणं व्यापारः, आकाङ्क्षादिसहकारिवशात् स्मारितपदार्थान्वयानुभवः फलम्। पदार्थस्मरणं च पदज्ञानस्य नान्यथासिद्धिसम्पादकम्। व्यापारत्वात्। 'व्यापारेण व्यापारिणो नान्यथासिद्धिः' इति न्यायात्।

---

[१] अन्वये साक्षात् शक्त्या निर्वाहः। "धूमोऽस्ति" इत्यादौ वह्नौ परम्परया शक्त्या निर्वाहः।

न च स्मरणद्वारा पदार्थ एवान्वयानुभवकरणमस्तु इति वाच्यम्। अतीतानागतपदार्थान्वयानुभवस्यापि पदैर्जायमानतया, पदार्थस्य करणत्वे स्वीक्रियमाणे अतीतानागतपदार्थस्य अन्वयानुभवात् पूर्वमविद्यमानतया करणत्वासंभवात्।

पदार्थस्मरणमेव करणं, न तु पदज्ञानमित्याक्षेपस्य समाधानम्

ननु तथापि पदार्थस्मरणमेव करणमस्तु, तवापि व्यापारतया तस्य आवश्यकत्वात्। अत एव पदज्ञानं विनापि चिन्तावशेन उपस्थितानां पदार्थानामन्वयबोधात् काव्यादिरुद्भवति। काव्यादिकर्तुः काव्यादिवाक्यार्थज्ञानस्य पूर्वमपेक्षितत्वात् इति चेत् — न। पदार्थस्मरणस्य निर्व्यापारत्वेन अकरणत्वात्। फलायोगव्यवच्छिन्नं कारणं करणमिति स्वीकारेऽपि, शाब्देऽन्वयानुभवे अन्वयव्यतिरेकाभ्याम् आकाङ्क्षादिमत्पदज्ञानस्यैव कारणत्वात्। पदार्थोपस्थितेः संसर्गधीमात्रहेतुत्वेऽपि शाब्दे संसर्गधीविशेषे पदस्यैव हेतुत्वात्। अत एव "पदादमुमर्थं प्रत्येमि, शाब्दयामि" इति चानुव्यवसाय उपपन्नो भवति।

अपि च "गौः कर्मत्वमानयनं कृतिः" इत्यत्र वाक्ये पदजन्यपदार्थोपस्थितेः सत्त्वेऽपि अन्वयज्ञानं नोदेति इति तत्र तद्वारणाय "गामानय" इत्यादिपदविशेषजन्यपदार्थस्मरणस्य हेतुत्वं वक्तव्यमिति पदविशेषाणामेवान्वयबोधहेतुत्वं स्वीकरणीयम्, न पदार्थज्ञानानाम्।

काव्यस्थले अनुभवकरणस्य कथनम्

काव्यस्थले चोत्प्रेक्षासहकृतं मन एव पदार्थज्ञानद्वारा अन्वयानुभवकरणम्। न चैवमुत्प्रेक्षायाः पृथक् प्रमाणत्वं स्यादिति वाच्यम्। उत्प्रेक्षायाः भ्रमं प्रत्यपि जनकतया प्रमाकरणतावच्छेदकानतिप्रसक्तानुगतरूपशून्यत्वात् निर्व्यापारत्वाच्च प्रमाणत्वाप्रसक्तेः। किं तु प्रमाणसहकारिणी सा उत्प्रेक्षा।

अत एव मानसे लिङ्गपरामर्शे व्याप्तिस्मृत्यादि न पृथक् प्रमाणम्।

पदानां पदार्थस्मरणे उपक्षयः, पदार्थस्मरणमेवान्वयबोधकारणमिति शङ्कायाः परिहारः

अथ पदमन्तरेणापि योग्यतादिपरामर्शे सति अन्वयबोधो भवति। अतः पदार्थस्मरणे एव पदानामुपक्षयः। पदार्थस्मरणमेव चान्वयबोधकारणम्। तदुक्तं[१] —

"पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः॥"

---

[१] श्लो.वा.वाक्य.३५८.

इतीति चेत् — सत्यम्। प्रयोजकवृद्धवाक्योच्चारणानन्तरं प्रयोज्यवृद्धस्य व्यापारं दृष्ट्वा व्युत्पित्सोः बालस्यान्वितविषयकं ज्ञानं जायते। तदुपपत्त्यर्थं प्रथमतः पदस्यैव शक्तिः कल्प्यते। शाब्दबुद्धिसामान्यं प्रति पदस्यैव ज्ञानविषयतया कारणतावच्छेदकत्वावधारणात्।

पदज्ञानवत् पदार्थस्मरणस्यापि हेतुत्वमिति शङ्कायाः समाधानम्

नन्वस्तु पदज्ञानस्य करणत्वम्। तथापि पदार्थोपस्थितेरपि हेतुत्वं दुर्वारम्, अन्वयव्यतिरेकयोरविशेषादिति चेत् — न। तत्तच्छाब्दबुद्धिं प्रति ज्ञानविषयतया पदार्थानां कारणतावच्छेदकत्वान्तरकल्पने गौरवात्। तदाहुः[१] —

"प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम्॥"

इति। प्राथम्यमभिधातृत्वे हेतुः। अभिधातृत्वं = बोधकत्वम्। तथा च प्रथमगृहीतत्वेन पदानां बोधकत्वावश्यकत्वादित्यर्थः। तात्पर्योपगमादपीति। पदविशेष्यकतात्पर्यज्ञानस्य शाब्दबोधे विशिष्य हेतुत्वोपगमादपीत्यर्थः। 'पदानामेव' इति एवकारात् पदार्थव्यवच्छेदः। सा शक्तिः = ज्ञानविषयतया शाब्दबोधकारणतावच्छेदिका।

"श्वेतोऽश्वो धावति" इति अन्वयधीस्तु लिङ्गजन्या अनुमितिरूपा, न तु शाब्दबोधरूपा। शाब्दबोधकारणत्वेन क्लृप्तस्य पदस्य तत्राभावात्।

अनुमानं च — "अयं श्वेतः अश्वः, ह्रेषावत्त्वात्"। न च ह्रेषायाः ज्ञानेऽपि तद्वत्त्वं श्वेतेऽसिद्धम् इति वाच्यम्। ह्रेषायाः आश्रयशरीराकाङ्क्षायामुपस्थिते श्वेते एव मनसा तद्वत्त्वग्रहात्। तदनन्तरम् "अयं श्वेतोऽश्वः धावति, खुरनिक्षेपशब्दविशेषवत्त्वात्" इत्यनुमितिः। हेतोः पक्षधर्मतासिद्धिस्तु पूर्ववत्। इदमुपलक्षणं — क्वचिन्मनसापि तादृशधीः द्रष्टव्येति।

केचित्तु — "अयं श्वेतः धावदश्वः, ह्रेषावत्त्वे सति खुरनिक्षेपशब्दविशेषवत्त्वात्" इत्यनुमानप्रकारमाहुः। तन्न युक्तम्। तस्य "श्वेतोऽश्वो धावति" इत्याकारविरहात् इति मथुरानाथाः प्राहुः।

अत्रेदं बोध्यम्। शक्तिमत्पदज्ञानं करणम्, पदार्थस्मृतिर्व्यापारः, शाब्दबोधः फलम्। शाब्दबोधे आकाङ्क्षाज्ञानादिकं सहकारिकारणम्। पदार्थस्मृतौ वृत्तिज्ञानं सहकारिकारणमिति न्यायसिद्धान्तः। तदुक्तं कारिकावल्यां[२] —

---

[१] प्र.पं.पृ.४००.
[२] का.८१.

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥" इति।

मणिग्रन्थोक्तस्य विचारस्य सारांशः

मणिकारैश्चान्विताभिधानवादं निरस्यान्ते उक्तं[१] —

"तस्मात् पदं करणम्, पदार्थस्मरणं व्यापारः, आकाङ्क्षादिसहकारिवशात् पदस्मारितार्थान्वयानुभवः फलम्। पदार्थस्मरणं न व्यवधायकम्, व्यापारत्वात्। न च स्मरणद्वारा पदार्थ एव करणम्, तस्यानागतत्वादिना स्वस्मरणेऽन्वयानुभवे चाजनकत्वात्। तथापि पदार्थस्मरणमेव करणमस्तु, आवश्यकत्वात्। अत एव चिन्तावशेनोपनीतपदार्थानामन्वयबोधात् काव्यादिरिति चेत् — न। स्मरणस्य निर्व्यापारत्वेनाकरणत्वात्। अनन्यथासिद्धान्वयव्यतिरेकाभ्यामाकाङ्क्षादिमत्पदस्य अन्वयानुभवविशेषे कारणत्वात्। पदार्थोपस्थितेः संसर्गधीमात्रहेतुत्वेऽपि शाब्द-संसर्गधीविशेषे पदस्यैव हेतुत्वात्। "गौः कर्मत्वमानयनम्" इत्यत्र पदार्थज्ञानेऽपि अन्वयज्ञानानुदयात्, पदविशेषोपस्थितपदार्थस्य हेतुत्वे पदविशेषस्यैवावश्यकत्वेन हेतुत्वाच्च। काव्यस्थले पदार्थज्ञानव्यापारकमुत्प्रेक्षादिसहकृतं मन एवान्वयानुभव-करणम्" इत्यादि।

गदाधरभट्टाचार्यैः शक्तिवादे निरूपितः प्रकारः[२]

"अथ तत्र वृत्त्यनुपस्थितस्यापि पदार्थद्वयसंसर्गस्य शाब्दबोधोपगमे, संबन्धभाने नियामाकाभावात् सर्वत्राबाधितयावत्संसर्गभानापत्तिरिति चेत् —

न। कयोश्चित् पदयोः केनचित् संबन्धेन स्वार्थान्वयबोधसाकाङ्क्षतया आकाङ्क्षाज्ञानस्यैव पदार्थसंसर्गभाननियामकत्वात्। ययोः पदयोः नानासंबन्धेन स्वार्थान्वयबोधे आकाङ्क्षा तज्जन्यशाब्दबोधे संसर्गविशेषतात्पर्यज्ञानरूपकारण-बलादेव संबन्धभाननियमोपपत्तेः। अन्वयांशे शक्त्युपगमेऽपि एकैकस्य पदार्थस्य संसर्गविधया क्वचित् कस्यचित् भानं, क्वचित् कस्यचिदभानमित्यनियमेन सामान्य-रूपेणैवान्वयस्य शक्यकोटावन्तर्भावनीयतया उक्तस्यैव संसर्गभाननियामकत्वात्।

न च संसर्गविशेषानुपस्थितौ तात्पर्यज्ञानासंभवेन तदुपस्थितेरावश्यकतया तद् गोचरसंस्कारोद्बोधार्थमेव तत्र वृत्तिज्ञानमपेक्षितमिति वाच्यम्। उद्बोधकान्तरो-पस्थितेऽपि संसर्गे तात्पर्यग्रहसंभवात्। तस्मात् घटत्वगोत्वादिविशिष्टे घटगवादि-पदस्य शक्तिः। पदार्थद्वयसंसर्गस्तु आकाङ्क्षादिबललभ्य एवेति स्थितम्" इति।

---

[१] त.चिं.म, च.भा.द्वि.प.पृ.५४८-५५०

[२] श.वा.पृ.३८.

व्युत्पत्तिवादे[१] च आरम्भवाक्यं "शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते" इति। तदनुसारं समभिव्याहाररूपाकाङ्क्षाभास्यत्वं तत्तत्संसर्गाणां तत्र ग्रन्थे सुविशदं निरूपितमस्ति।

अद्वैतसिद्धिव्याख्यायां लघुचन्द्रिकायां ब्रह्मानन्दसरस्वतीभिरुक्ताः अभिहितान्वयान्विताभिधानवादयोः विशेषाः[२]

अद्वैतसिद्धौ अखण्डार्थलक्षणोपपत्तिनामके प्रकरणे "अपर्यायशब्दानां पदवृत्तिस्मारितातिरिक्तागोचरप्रमाजनकत्वम्" इति अखण्डार्थवाक्यलक्षणमुक्तम्। तत्र लक्षणे 'पदवृत्तिज्ञाप्य' इत्यनुक्त्वा 'पदवृत्तिस्मारित' इत्युक्तेः प्रयोजनमुक्तम् —

"अन्विताभिधानवादिमते शक्त्या, अभिहितान्वयवादिमते च लक्षणया वाक्यार्थभूतसंसर्गस्य वृत्तिज्ञाप्यत्वात् सर्वत्र प्रमाणवाक्येऽतिव्याप्तिः स्यात्, तद्वारणायोक्तं 'स्मारित' इति। आद्यपक्षे कुब्जशक्त्यङ्गीकारात्, द्वितीयपक्षे चाज्ञाताया एव पदार्थनिष्ठायाः लक्षणायाः वृत्तित्वाङ्गीकारात् न संसर्गस्य पदस्मारितत्वम्, किंतु अनुभाव्यत्वमित्यतिव्याप्तिपरिहारः" इति।

तद्व्याख्यायां लघुचन्द्रिकायामुक्ताः विशेषाः

संसर्गस्यान्विताभिधानमते शक्त्या ज्ञाप्यत्वात्, अभिहितान्वयमते लक्षणया ज्ञाप्यत्वात् अतिव्याप्तिः इति योजना। वाक्यार्थभूतसंसर्गस्येत्यत्र वाक्यार्थभूतेत्यनुक्तौ अभिहितान्वयमते प्रत्ययार्थनिष्ठस्य प्रकृत्यर्थसंसर्गस्य शक्तिलभ्यत्वात् लक्षणाज्ञाप्यत्वं नास्तीति लक्षणयेत्युक्तेरसंगतिः। अतः वाक्यार्थभूतसंसर्गस्येत्युक्तम्। क्रियाकारकयोः संसर्गस्येति तदर्थः। तदुक्तं संक्षेपशारीरके[३] —

"प्रत्ययप्रकृतिशब्दतो बहिः विद्यतेऽभिहितसंगतिश्च नः।
प्रत्ययप्रकृतिशब्दयोः पुनः नित्यमन्वितधियोर्निमित्तता॥" इति।

अभिहितसंगतिरिति। पदजन्यशाब्दधीमात्रजन्यानुभवविषयत्वमित्यर्थः। पदजन्यानुभवाविषयत्वे सति पदजन्यानुभवजन्यानुभवविषयत्वमिति यावत्। अभिहितान्वयमते प्रथमं पदात् पदार्थानुभवः, ततः संसर्गानुभवः इति क्रमः। सत्यन्तेनान्विताभिधानमतव्यवच्छेदः। प्रत्ययप्रकृतिशब्दतो बहिः इति। प्रकृतिप्रत्ययार्थयोः यः संसर्गः तदन्यसंसर्गस्यैव पदजन्यानुभवाविषयत्वे सति पदजन्यानुभवजन्यानुभवविषयत्वमित्युक्तं भवति।

---

[१] व्यु.वा.पृ.१.
[२] ल.चं.पृ.६६५-६७४.
[३] सं.शा.श्लो.३९३.

अभिहितान्वयवादे पक्षत्रयम्

तथा हि — अभिहितान्वयमते पक्षत्रयं वार्त्तिकादावुक्तम्। तथा हि तर्कचरणे वाक्याधिकरणीयवार्त्तिके[१] —

"भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया।
अनेकगुणजात्यादिकारकार्थानुरञ्जिता॥"

"अन्वयव्यतिरेकाभ्यां प्रत्ययार्थस्तु सेष्यते।
कैश्चिदन्यैस्तु धात्वर्थः सामीप्येनोपकारतः॥
अपरैः समुदायार्थस्तथैवाभ्युपगम्यते।
पाकादौ यन्न दृष्टास्ति भवत्यादौ तथैव च॥" इति।

वाक्यार्थः = वाक्याधीनशाब्दधीमुख्यविशेष्यः। आख्यातवत्तया = आख्यातसामान्यप्रतिपाद्यत्वात्। तेन वर्तमानत्वादौ लडादिमात्रप्रतिपाद्ये न व्यभिचारः। वाक्यार्थत्वं प्रकटयति — अनेकेत्यादिना। सामीप्येनेति। प्रत्ययस्येत्यादिः। तथा च प्रत्ययस्य पूर्ववृत्तित्वरूपसामीप्यसंबन्धेनावच्छिन्नं प्रकृतिनिष्ठायां शाब्दबोधहेतुतायामवच्छेदकत्वम्। पूर्ववृत्तितासंबन्धेन प्रत्ययविशिष्टप्रकृतेरेव भावनाविशिष्टपाकादिविषयकानुभवजनकत्वस्वीकारात्। तथा च भावनाविशिष्टपाकादिविषयकानुभवं प्रति प्रत्ययविशिष्टा प्रकृतिः हेतुः। प्रत्ययवैशिष्ट्यं च प्रकृतौ स्वपूर्ववृत्तित्वसंबन्धेन। अनुभवहेतुता प्रकृतिनिष्ठा। अनुभवहेतुतावच्छेदकता प्रत्ययनिष्ठा। सा च पूर्ववृत्तित्वसंबन्धावच्छिन्ना। अनुभवनिष्ठकार्यतानिरूपितप्रकृतिनिष्ठहेतुतानिरूपितस्वपूर्ववृत्तित्वसंबन्धावच्छिन्नावच्छेदकता प्रत्ययनिष्ठेति यावत्। स्वपूर्ववृत्तित्वसंबन्धावच्छिन्नप्रत्ययनिष्ठावच्छेदकतानिरूपकहेतुता प्रकृतिनिष्ठा इति विवेकः। समुदायार्थः = प्रकृतिप्रत्ययोभयार्थः, प्रकृतिविशिष्टप्रत्ययार्थ इति यावत्। प्रकृत्यर्थान्वितप्रत्ययार्थविषयकशाब्दबोधं प्रति उत्तरवृत्तितासंबन्धेन प्रकृतिविशिष्टप्रत्ययस्य हेतुतास्वीकारात्।

विशिष्टहेतुताग्राहकप्रमाणेन (विशिष्टं हेतुः इति ज्ञापकेन प्रमाणेन) विशेषणे विशेष्ये च हेतुत्वग्रहात् उभयोः हेतुता। पूर्वस्मिन् पक्षे प्रकृतेर्हेतुता, प्रत्ययस्य हेतुतावच्छेदकत्वम्, अस्मिन् पक्षे तु प्रकृतिप्रत्यययोरुभयोरपि हेतुत्वमेव, न तु प्रत्ययस्य हेतुत्वम्, प्रकृतेस्तु हेतुतावच्छेदकत्वमिति विवेकः। कार्यतावच्छेदकं तु पच्यादिधातोः पाकान्वितभावनाविषयकशाब्दत्वं वा पाकान्वितविषयकशाब्दत्वं वा। तिबादिप्रत्ययस्यापि कार्यान्वितभावनाशाब्दत्वं वा अन्वितभावनाशाब्दत्वं

---

[१] श्लो.वा.वाक्य.३३०, २४८-२४९.

वेति वक्ष्यते। अत्र प्रत्ययार्थत्वं प्रत्ययमात्रजन्यशाब्दधीविषयत्वम्। प्रकृतिप्रत्ययसमुदायार्थत्वपक्षस्य वक्ष्यमाणत्वात्। एवं धात्वर्थत्वादिकं धातुमात्रजन्यशाब्दधीविषयत्वरूपं बोध्यम्। तथा च भावनादिकं प्रत्ययमात्रवाच्यम्। तच्छाब्दबोधानुकूलशक्तेरेव तद्वाचकत्वरूपत्वात्। उपलक्षणमेतत्। एवं तद्रीत्या कर्मत्वादिकं सुबर्थो नामार्थ उभयार्थो वेत्यपि बोध्यम्।

प्रथमपक्षस्य विस्तरः

एवं च प्रथमपक्षे कर्मत्वादिकमाद्यर्थ इव, घटत्वादिकं घटादिनामार्थः। तथा च प्रकृत्या प्रत्ययेन च स्वार्थघटत्वादिमात्रं प्रथमतोऽनुभाव्यते। स्वार्थसंस्कारसहितस्य पदज्ञानस्य साक्षादेव स्वार्थानुभवे हेतुत्वात्। न तु तदर्थस्मृतिः द्वारं तत्र स्वीक्रियते। यथा पञ्चपाद्यां स्वीकृतं — "व्याप्तिसंस्कारविशिष्टं लिङ्गज्ञानमनुमितिहेतुः, न तु अन्तरा व्याप्तिस्मृतिः" इति। ताभ्यां प्रकृतिप्रत्ययजन्यानुभवाभ्यां प्रकृतिप्रत्ययार्थयोः संसर्गविषयकशाब्दधीः जायते, न तु प्रकृतिप्रत्ययाभ्याम्। तया प्रकृत्यर्थान्वितकर्मत्वादिसंसर्गस्य क्रियायां शाब्दधीर्जायत इति आद्यः पक्षः।

द्वितीयतृतीयपक्षयोः विस्तरः

प्रत्ययपूर्ववृत्तित्वविशिष्टप्रकृतेः कर्मत्वादिविशिष्टघटत्वादावनुभावकत्वम्, प्रकृत्युत्तरत्वविशिष्टप्रत्ययस्य घटत्वादिविशिष्टकर्मत्वादावनुभावकत्वमित्यपरं पक्षद्वयम्। तयोः आद्यं पक्षमादाय "करणत्वविशिष्टं दधि विधीयते" इति गुणकामाधिकरणे शास्त्रदीपिकादौ[1] उक्तम्। द्वितीयमादाय "दधिविशिष्टं करणत्वं विधीयते" इत्युक्तम्।

प्रत्ययार्थस्य विशेष्यत्वम्

तत्र कर्मत्वादिकारकस्य विशेष्यत्वमेव युक्तम्। "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, तयोस्तु प्रत्ययः प्राधान्येन"[2] इति नैरुक्तानुशासनात्।

अत एव भावार्थाधिकरणे[3] प्रत्ययार्थस्यैव प्राधान्यमुक्तम्। न च तथापि घटत्वान्वितकर्मत्वादेः घटादिपदमेव वाचकं, प्राथम्येन मुख्यत्वात्; न तु तदुत्तरप्रत्ययः, अनन्तरत्वेन जघन्यत्वात् इति वाच्यम्। तथा सति प्रत्ययार्थस्य निरुक्तकाराद्युक्तप्राधान्यानुपपत्तेः। प्रत्ययस्यावाचकत्वेन तदर्थस्यैवाप्रसिद्धेः। संभवत्यर्थ-

---

[1] शा.दी.२.२.११.

[2] "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः" इत्येतावत् महाभाष्ये (३.१.६७) लभ्यते। "तयोस्तु प्रत्ययः" इत्यंशः न लब्धः।

[3] जै.सू.२.२.१.

साधुत्वे पदसाधुत्वस्य द्योतकत्वमात्ररूपस्यान्याय्यत्वात्। अमौट्छसां भूयस्त्वेन भूयसां न्यायेन मुख्यत्वन्यायस्य प्रकृते बाधस्योचितत्वात्। "विप्रतिषिद्धधर्मसमवाये भूयसां स्यात् सधर्मत्वम्" इति न्यायेन[1] कर्मण्यमादिविधायकानुशासनसिद्धम् अमादीनां भूयसां कर्मत्वादिवाचकत्वरूपं धर्मं बाधितुं न युक्तम्; किं तु एकस्य घटपदस्य मुख्यत्वन्यायसिद्धं कर्मत्वादिवाचकत्वमेव बाध्यते।

अत एव एकत्वादिसंख्यापि अमाद्येकवचनादेरेवार्थः, न तु नामार्थः। नामार्थस्तु जातिरेव। व्यक्तिरपि लक्षणयैव बोध्यते। यत्र बहुषु धर्मो न प्राप्तः, किं तु संदिग्धः, यथा नव्यतार्किकमते शब्दसमवायित्वमेकस्यैवेश्वरस्य उत बहूनां जीवानामिति संदेहे, जीवेषु तस्याप्राप्तत्वेन बाधाप्रसक्त्या ईश्वरस्य प्राथम्यरूपमुख्यत्वाभावाच्च 'विप्रतिषिद्ध' इत्यादिन्यायाविषयत्वात् एकत्र तत्कल्पने लाघवात् न जीवेषु तत्कल्पनम्।

तस्मात् विभक्तेः द्योतकत्वं स्वीकृत्य पञ्चकं प्रातिपदिकार्थ इति मतमयुक्तमेव। अत एव निपातानां द्योतकत्वं भट्टवार्त्तिके दूषितम्। किं च घटपटादिपदानां घटत्वपटत्वादौ कर्मत्वकरणत्वादौ चानन्तशक्तिकल्पने महत् गौरवम् इति द्वितीयपक्षस्यैवावलम्बनं युक्तम्।

प्रथमपक्षे पदार्थबोधस्योपयोगः

ननु प्रथमपक्षे पदार्थसंसर्गाविषयकः पदार्थविषयकः शाब्दबोधः कुत्रोपयुज्यते? प्रवृत्ताविति चेत् न। उपादानतावच्छेदकप्रकारकप्रत्यक्षमिष्टसाधनत्वादिज्ञानं च प्रवृत्तौ हेतुः। यथा घटनिर्माणविषयकप्रवृत्तौ घटस्य यदुपादानं मृत् उपादानतावच्छेदकं मृत्त्वं तत्प्रकारकं प्रत्यक्षं कारणम्। मृदं साक्षात्कृत्यैव कुलालस्य घटार्थं प्रवृत्तेः जननात्। तत्रोक्तपदार्थविषयकशाब्दबोधः नाद्यः (उपादानतावच्छेदकप्रत्यक्षरूपः), सप्रकारकत्वप्रत्यक्षत्वयोरभावात्। न द्वितीयः (इष्टसाधनत्वज्ञानरूपः), "घटत्वादिकर्मकानयनमिष्टसाधनम्" इत्याद्याकारकत्वाभावात्।

अथ तत्र विशेषणधीविधया स पदार्थशाब्दबोध उपयुज्यते। तदुक्तं नामधेयचरणे भट्टैः[2] — "अनुपस्थितविशेषणा विशिष्टधीर्न जायते, न त्वनभिहितविशेषणापि" इति, इति चेन्न। 'न त्वनभिहितविशेषणा' इत्यनेनैव विशेषणस्य शाब्दबोधानपेक्षायाः सूचनात्। उक्तवार्त्तिकस्य हि अयमर्थः — विशेषणज्ञानं विना विशिष्टधीर्न भवति। विशेषणाभिधानं = शाब्दबोधरूपं विशेषणज्ञानं, विना

---

[1] जै.सू.१२.२.२२.

[2] तं.वा.१.४.१.२, भा.२.पृ.२६.

तु विशिष्टधीर्भवितुमर्हति इति। तथा च पदजन्यपदार्थस्मृत्यैव विशिष्टधीसंभवात् नोक्तशाब्दबोध आवश्यकः।

अत्रोच्यते। यथा, क्रियाकारकयोर्योऽन्वयः तद्विषयकबोधं प्रति किं कारणमित्यालोचने, न तावत् "घटम्" इत्यादिपदज्ञानं प्रकृतिप्रत्ययार्थयोर्योऽन्वयः तद्बोधद्वारा कारणमिति वक्तुं शक्यते; प्रकृतिप्रत्ययार्थान्वयबोधस्यैव क्रियाकारकान्वयबोधं प्रति कारणत्वसंभवेन तद्द्वारा "घटम्" इत्यादिपदज्ञानस्य हेतुत्वे गौरवात्। किं तु प्रकृतिप्रत्ययार्थान्वयबोधं प्रत्येव प्रकृतिप्रत्ययार्थस्मृतिद्वारा हेतुत्वमिति द्वितीयतृतीयपक्षयोः स्वीक्रियते। तथा उक्तस्मृतिद्वारा प्रकृतिप्रत्ययार्थान्वयबोधं प्रति हेतुत्वेऽपि, गौरवात् उक्तपदज्ञानस्य पदार्थमात्रविषयकशाब्दबोधं प्रति साक्षादेव हेतुता। पदार्थमात्रविषयकत्वं च शाब्दबोधस्य सांसर्गिकविषयत्वानिरूपितपदार्थनिष्ठविषयतानिरूपकत्वम्। न तु पदार्थान्तराविषयकत्वे सति पदार्थविषयकत्वम्। तेन "घटम्" इत्यादिपदज्ञानस्य घटत्वकर्मत्वादिविषयकसमूहालम्बनज्ञानजनकत्वेऽपि तस्य ज्ञानस्य संग्रहः। एतेन प्रकृतिप्रत्ययाभ्यां प्रकृत्यर्थविषयकं प्रत्ययार्थविषयकं च प्रत्येकं ज्ञानं, प्रकृत्यर्थप्रत्ययार्थोभयविषयकं समूहालम्बनज्ञानं च प्रति "घटम्" इत्यादिपदज्ञानं कारणमित्युक्तं भवति।

अन्यथा "ताभ्यां प्रकृतिप्रत्ययजन्यानुभवाभ्यां प्रकृतिप्रत्ययार्थयोः संसर्गशाब्दधीर्जायते" इति पूर्वग्रन्थविरोधापत्तेः। "घटम्" इत्यादिपदज्ञानस्य घटत्वविशिष्टकर्मत्वादिविषयकशाब्दबोधत्वं तु न जन्यतावच्छेदकम्। घटत्वादिविषयकशाब्दबोधत्वापेक्षया गुरुत्वात्। अपि च "श्वेतोऽश्वो धावति" इति शाब्दबोधः यथा वाक्यं विनाप्युत्पद्यते, तथा घटत्वविशिष्टकर्मत्वादिविषयकशाब्दबोधस्य "घटम्" इत्यादिपदज्ञानं विनापि जायमानत्वेन व्यतिरेकव्यभिचारो भवतीति, तद्वारणाय अव्यवहितोत्तरत्वसंबन्धेन "घटम्" इत्यादिपदज्ञानविशिष्टघटत्वविशिष्टकर्मत्वादिविषयकशाब्दज्ञानत्वावच्छिन्नं प्रति "घटम्" इत्यादिपदज्ञानं कारणमिति वक्तव्यतया कार्यतावच्छेदकेऽतिगौरवं भवति। तस्मात् पदार्थमात्रशाब्दबोधं प्रत्येव "घटम्" इत्यादिपदज्ञानं कारणम्। स च शाब्दबोधः पदज्ञानं विना नोत्पद्यत इति न व्यभिचारप्रसक्तिः, न वा तद्वारणाय कार्यतावच्छेदकशरीरे अव्यवहितोत्तरत्वनिवेशस्यावश्यकता।

प्रथमपक्षे गौरवशङ्कानिरासः

न च प्रथमपक्षेऽपि "घटम्" इत्यादिपदजन्यस्य घटत्वकर्मत्वादिपदार्थमात्रबोधस्य "आधेयतासंबन्धेन घटत्वविशिष्टा कर्मता" इत्याद्याकारकबोधं प्रति हेतुत्वस्वीकारात्, तादृशकारणस्य पदजन्यबोधाजन्ये "श्वेतोऽश्वो धावति" इति

बोधतुल्यबोधे "घटत्वविशिष्टा कर्मता" इत्याकारके व्यतिरेकव्यभिचारवारणाय, पदज्ञानकार्यतावच्छेदकशरीरे अव्यवहितोत्तरत्वसंबन्धेन तादृशकारणवैशिष्ट्यस्य निवेशनीयतया, प्रथमपक्षेऽपि गौरवं तुल्यमिति वाच्यम्। पक्षत्रयेऽपि पदजन्य-पदार्थधीरूपायाः आसत्तेः शाब्दबोधे कारणत्वमिष्टमिति, "घटत्वविशिष्टा कर्मता" इति बोधः यत्र पदजन्यपदार्थधियं विनापि जायते तत्र व्यतिरेकव्यभिचारवारणाय, पदज्ञानजन्यपदार्थधीविशिष्टघटत्वविशिष्टकर्मताविषयकबोधं प्रति पदजन्यपदार्थधी-रूपा आसत्तिः कारणमिति पक्षत्रयेऽपि वक्तव्यतया, न प्रथमपक्षमात्रे गौरव-प्रसक्तिरिति।

एतावांस्तु विशेषः — प्रथमपक्षे पदजन्यपदार्थशाब्दधीरेव आसत्तिः। इतरपक्ष-योस्तु पदजन्या पदार्थस्मृतिः आसत्तिः इति। वृत्त्या पदजन्यपदार्थज्ञानस्य अव्यव-हितोत्तरत्वसंबन्धेन स्वविशिष्टशाब्दबोधत्वं कार्यतावच्छेदकमिति तु पक्षत्रयेऽपि समानम्।

आसत्तेः पृथग्घेतुत्वे मूलम्

न च "घटम्" इत्यादिपदज्ञानं, घटपदतदर्थयोः वृत्तिरूपो यः संबन्धः तद्विष-यकसंस्कारसहितं सत्, घटादिनामार्थविभक्त्यर्थयोः यः संसर्गः तद्विषयकशाब्द-धीहेतुरस्तु। किं पदजन्यपदार्थधीरूपाया आसत्तेः शाब्दबोधहेतुत्वकल्पनयेति वाच्यम्। "घटः कर्मत्वम्" इत्यादिनिराकाङ्क्षपदजन्यपदार्थोपस्थित्या नामार्थ-विभक्त्यर्थसंसर्गविषयकपदप्रयोज्यशाब्दबोधवारणाय तादृशशाब्दबोधं प्रति "घटम्" इत्यादिवाक्यघटकपदजन्यपदार्थज्ञानस्य हेतुत्वकल्पनात्।

तादृशपदजन्यत्वं च वृत्त्या ग्राह्यम्। तच्च घटादिपदतदर्थवृत्तिज्ञानजन्यसंस्कार-सहकृतपदजन्यत्वम्। तथा च उक्तसंस्कारोक्तपदाभ्यां जनितं पदार्थज्ञानं घटत्व-विशिष्टकर्मत्वादिशाब्दबोधहेतुः।

अत एव 'वृत्तिज्ञानजन्यसंस्कार' इति निवेशात्, आकाशपदस्य आकाशस्य चाश्रयाश्रयिभावसंबन्धसत्त्वेन, तत्संबन्धज्ञानवतः आकाशपदश्रवणे सति तादृश-संबन्धसंस्कारवशादुपस्थितस्य आकाशस्य न आकाशशब्दात् "आकाशमेकम्" इत्याकारकशाब्दधीः।

अत एवार्थाध्याहारवादिभिरपि "घटः कर्मत्वम्" इत्यादिनिराकाङ्क्षपदजन्य-पदार्थोपस्थित्या सहित् "आनय" इति पदात् "घटमानय" इत्यादिवाक्यस्थलीयो बोधो न स्वीक्रियते। भट्टमतेऽपि वाक्याजन्यस्य शाब्दबोधस्य स्वीकारेऽपि न निराकाङ्क्षपदजन्यपदार्थोपस्थित्या शाब्दधीः स्वीक्रियते। पदाजन्याभिः साकाङ्क्ष-पदजन्याभिरेव वा तादृशोपस्थितिभिः शाब्दधीस्वीकारात्।

अत एव "आनय" इति पदमात्रश्रवणे, घटकर्मत्वस्य पदाजन्योपस्थित्या भट्टमते न आनयनक्रियाघटकर्मत्वयोरन्वयधीः। "शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते" इति भट्टोक्तेः। शाब्दी = शब्देन केनचित् शाब्दबोधे (महावाक्यार्थबोधे) जनयितव्ये तदुपयोगिनी, या आकाङ्क्षा सा शब्देनैव निष्पाद्यते। यत्र शब्दः कोऽपि न श्रुतः, तत्र शब्दः नाकाङ्क्षासम्पादकः। यथा "पश्यतः श्वेतमारूपम्" इत्यादौ भट्टैरुक्ते शाब्दबोधे शाब्दबोधेच्छारूपैवाकाङ्क्षा पदाद्यघटितैव (पदाद्यसंपादितैव)।

किं च "घटम्" इत्यादिपदे विस्मृतेऽपि तदर्थज्ञानात् तादृशार्थसंसर्गविषयकशाब्दबोधदर्शनात् नोक्तपदज्ञानं साक्षात् कारणम्। न चैवं "घटम्" इत्यादिसाकाङ्क्षपदात् निर्विकल्पकघटत्वादिपदार्थविषयकशाब्दबोधो जायते। तत्र कथं घटपदस्य अमादिपूर्ववृत्तित्वे विस्मृतेऽपि तादृशशाब्दधीः स्यादिति वाच्यम्। पदार्थमात्रधियः साकाङ्क्षपदधीजन्यपदार्थस्मृतिस्थानीयत्वेन घटादिपदे अमादिपूर्ववृत्तित्वरूपाकाङ्क्षाविस्मरणे सति तस्याः उत्पत्त्यसंभवात्। न हि तादृशविस्मरणे सति घटादिपदमात्रजन्या स्मृतिः साकाङ्क्षपदजन्या। एवं च साकाङ्क्षत्वेन ज्ञातपदजन्यज्ञानमेव शाब्दधीहेतुः।

अत एव अम्पदपूर्ववृत्तित्वविस्मरणे सति घटपदजन्या पदार्थधीः "घटत्वविशिष्टा कर्मता" इति शाब्दधीजनिका न भवति।

तस्मात् पदजन्योपस्थितिजन्ये पदार्थसंसर्गशाब्दबोधे पदार्थोपस्थितिरूपासत्तेः हेतुतया, पदार्थमात्रविषयकस्यापि शाब्दबोधस्य आसत्तिविधया उक्तसंसर्गविषयकशाब्दबोधोपयोगित्वं सिद्धम्।

प्रथमपक्षे पदजन्यपदार्थानुभवस्य आसत्तिविधया हेतुत्वम्

प्रथमपक्षे पदार्थस्मृतिः आसत्तिः इति न संभवति। पदार्थमात्रानुभवजनकत्वस्यैव पदे लाघवेन कल्पनात्। लाघवं तावदेवम्। ये पदानां पदार्थस्मारकत्वं स्वीकुर्वन्ति ते पदार्थस्मृतिद्वारा पदानां पदार्थसंसर्गानुभावकत्वं स्वीकुर्वन्ति। तथा च तस्मिन्ननुभवे पदार्थतत्संसर्गयोर्विषयतया पदार्थतत्संसर्गानुभवजनकत्वकल्पनापेक्षया पदार्थमात्रानुभवजनकत्वकल्पने लाघवमिति। पदात् पदार्थमात्रविषयकशाब्दानुभवस्यैव संभवेन स्मृतिकल्पनायाः व्यर्थत्वात्।

न च पदार्थमात्रं प्रति स्मारकत्वमेव पदस्य कल्प्यते, नानुभावकत्वमिति वाच्यम्। स्मारकत्वप्रयोजकस्य संबन्धस्याभावात्। यथा हि हस्तिहस्तिपकयोः संयोगादिसंबन्धेन मिथः संबन्धितया गृहीतत्वात् तयोरेकज्ञानस्यापरस्मारकत्वं युक्तम्। तथा पदस्य तु स्वार्थं प्रत्यनुभावकत्वस्याकल्पनात्, पदार्थसंसर्गानु-

भावकत्वस्य गौरवेणाभावात्, संबन्धान्तरस्य च तत्र तस्याभावात् स्मारकत्वासम्भवात्। न च स्मृतिशक्तत्वरूपं स्मारकत्वमेव स्मृतिप्रयोजकः संबन्धः। हस्तिहस्तिपकादिस्थले तददर्शनात्, तथाननुभवाच्च।

पदार्थज्ञानस्य विशेषणज्ञानविधया हेतुत्वम्

एतावता "घटम्" इत्यादिपदात् प्रथमतः पदार्थानुभवस्यैव उत्पादात् तस्य आसत्तिविधया पदार्थसंसर्गबोधं प्रति हेतुत्वमुपपादितम्। इदानीं विशेषणज्ञानविधयापि तस्य तद्धेतुत्वं संभवतीत्युच्यते। न च "घटम्" इति पदाज्ज्ञायमाने "कर्मता घटत्वविशिष्टा" इति बोधे कर्मताया अविशेषणत्वात् कथं तस्य ज्ञानस्य विशेषणज्ञानविधया हेतुत्वं संभवतीति वाच्यम्। विशिष्टबुद्धिं प्रति विशेषणज्ञानवत् विशेष्यतावच्छेदकप्रकारकज्ञानमपि कारणम्। यथा "भूतलं घटवत्" इत्याकारकविशिष्टबुद्धिं प्रति भूतलत्वरूपविशेष्यतावच्छेदकप्रकारकं "भूतलम्" इति ज्ञानमपि कारणम्। "घटम्" इतिपदज्ञानजन्यं घटत्वज्ञानं विशेषणज्ञानविधया, कर्मत्वज्ञानं च विशेष्यतावच्छेदककर्मत्वत्वप्रकारज्ञानविधया "घटत्वविशिष्टं कर्मत्वम्" इति विशिष्टबुद्धौ कारणम्। न च कर्मत्वत्वप्रकारकज्ञानस्य कथं निर्विकल्पकत्वमिति वाच्यम्। घटत्वकर्मत्वसंसर्गाविषयकत्वेन निर्विकल्पकत्वस्याभिप्रेतत्वात्। यद्वा — विशेष्यतावच्छेदकप्रकारकज्ञानविधया तस्य हेतुत्वसंभवात्। क्रियाकारकसंसर्गबोधे "घटत्वविशिष्टकर्मताकमानयनम्" इत्याकारके, आनयनं प्रति कर्मतायाः विशेषणतया तज्ज्ञानस्य विशिष्टबुद्धौ विशेषणज्ञानं कारणमिति रीत्या क्रियाकारकसंसर्गबोधे एवोपयोगः संभवति।

प्रथमपक्षे शब्दस्य प्रमाणत्वोपपादनम्

नन्वेवमपि पदार्थमात्रानुभवस्य ज्ञातविषयकत्वेन अज्ञातविषयकत्वरूपप्रमात्वाभावात् तज्जनकत्वेऽपि शब्दस्य प्रमाणत्वं न स्यात्, अज्ञातविषयकज्ञानजनकस्यैव प्रमाणत्वादिति चेत् — न। प्रमाकारणत्वाभावेऽपि प्रमाप्रयोजकत्वरूपस्यैव प्रमाणत्वस्य प्रथमपक्षे शब्दे स्वीकारात्। संसर्गानुभवस्तावत् अज्ञातविषयकत्वात् प्रमा, तत्कारणं पदार्थज्ञानं, तत्कारणं शब्द इति शब्दस्य प्रमाप्रयोजकत्वम्। प्रमाकारणकारणत्वं प्रमाप्रयोजकत्वम्। न च तथा सति इन्द्रियादीनामपि प्रत्यक्षादिप्रमाणत्वं न स्यात्। इन्द्रियं हि निर्विकल्पकं प्रति कारणम्। निर्विकल्पकं च सविकल्पकं प्रति। तत्र सविकल्पकमेव प्रमा। निर्विकल्पकं तु निष्प्रकारकत्वान्न प्रमा। प्रमात्वस्य तद्वति तत्प्रकारकत्वरूपत्वात्। तथा च प्रमां प्रति इन्द्रियस्य कारणत्वविरहात् प्रमाकारणत्वघटितप्रमाणत्वासंभव

इति वाच्यम्। इन्द्रियादीनामपि शब्दस्येव प्रमाकारणकारणत्वरूपप्रयोजकत्वरूपप्रमाणत्वस्यैव स्वीकारेणादोषात्। निर्विकल्पकीयतुरीयविषयतासंबन्धेनैव प्रत्यक्षं प्रति लाघवेन इन्द्रियस्य संयोगसंबन्धेन हेतुत्वम् इति कार्यकारणभावः।

शब्दजन्यज्ञानस्य निर्विकल्पकता

एवं च यथा इन्द्रियस्य तुरीयविषयताशालिज्ञानं प्रति एव (निर्विकल्पकं प्रत्येव) हेतुत्वम्, इन्द्रियजन्यता च तुरीयविषयताशालिप्रत्यक्षत्वावच्छिन्ना, तथा शब्दोऽपि जातिरूपपदार्थनिष्ठतुरीयविषयताशालिशाब्दत्वावच्छिन्नं प्रत्येव हेतुः इति, शब्दजन्यतापि जातिरूपपदार्थनिष्ठतुरीयविषयताशालिशाब्दत्वावच्छिन्ना।

तथा च निर्विकल्पधीरेव प्रथमपक्षे शब्देन्द्रियादिजन्या। अत एवालोचनात्मकं निर्विकल्पकमेवेन्द्रियजन्यमित्यन्येऽपि वदन्ति। संसर्गप्रमायां निर्विकल्पकमेव अयोगव्यवच्छिन्नकारणरूपं करणम्, न तु पदम् इन्द्रियं वा।

प्राथमिकस्य अनुमित्यादेः निर्विकल्पकता

एवम् अनुमित्यादिकमपि प्रथमं निर्विकल्पकं जायते, पश्चात् सविकल्पकम्। यद्वा प्रथमत एव सविकल्पकमनुमित्यादिकं जायते। तत्र परामर्शकाले व्याप्त्यादिघटकतया साध्यादिज्ञानसत्त्वेन अनुमित्यादिरूपविशिष्टधीसंभवेन निर्विकल्पकानुमितिवैयर्थ्यात्। 'तद्धेतोरेव तदस्तु, मध्ये किं तेन' इति न्यायात्। निर्विकल्पस्य यो हेतुः तत एव निर्विकल्पककार्यसविकल्पकानुमितिसंभवेन मध्ये निर्विकल्पकानुमितेः वैयर्थ्यमित्याशयः। 'तद्धेतोरेव तदस्तु मध्ये किं तेन' इति न्यायः। तत्र 'तद्धेतोः' इति पञ्चमीविभक्तिः इति स्वीकारे, तद्धेतोः = निर्विकल्पककारणादेव, तत् = निर्विकल्पककार्यं सविकल्पकमस्तु, मध्ये किं तेन = निर्विकल्पकेनेत्यर्थः। 'तद्धेतोः' इति षष्ठीविभक्तिः इति स्वीकारे, तद्धेतोः = निर्विकल्पककारणस्यैव, तत् = निर्विकल्पककार्यत्वेनाभिमतं सविकल्पकं प्रति हेतुत्वमस्तु, मध्ये निर्विकल्पकेन किं प्रयोजनमित्यर्थः। अत एवाभिहितान्वयवादः भट्टमते। तन्मते अभिहितेन पदार्थेन करणेन [1]पदार्थसंसर्गविषयकशाब्दधीः जायते। तया च व्यवहारो भवति।

द्वितीयतृतीयपक्षयोरपि अभिहितेन प्रकृतिप्रत्ययार्थयोः संसर्गेण करणेन क्रियाकारकयोः संसर्गशाब्दधीः (स च प्रथमपक्षे प्रकृत्यर्थप्रत्ययार्थानुभवः। पक्षान्तरे प्रकृत्यर्थप्रत्ययार्थसंसर्गानुभवः)। अभिधानं च पदजन्यानुभवः। तस्य करणत्वेन तद्विषयस्य करणत्वव्यवहारः। तदेवं प्रथमपक्ष उपपादितः।

---

[1] पदार्थेन = प्रकृत्यर्थेन प्रत्ययार्थेन च संसर्गः, पदार्थसंसर्गः = प्रकृतिप्रत्ययार्थसंसर्गः।

द्वितीय-तृतीयपक्षोपपादनम्

तत्र प्रथमपक्षखण्डनम्

द्वितीयतृतीयपक्षवादिनां त्वयमाशयः — यदुक्तं प्रथमपक्षवादिभिः, आदौ शब्दात् जात्यादिपदार्थमात्रविषयकनिर्विकल्पकबोधो जायत इति। तदयुक्तम्। पदार्थस्वरूपबोधस्य ज्ञातविषयकतया अगृहीतग्राहित्वरूपप्रमात्वासंभवात्, तज्जनकस्य प्रमाणत्वायोगात्। प्रमाणसामान्यम् अज्ञातविषयकधीजनकमिति नियमात्। न च प्रमाणसामान्यमगृहीतविषयकधीप्रयोजकमित्येव नियमः, न तु तादृशधीजनकमिति नियमः। भवति च शब्दस्याज्ञातसंसर्गविषयकबोधजनकपदार्थस्वरूपविषयकबोधजनकतया तादृशबोधप्रयोजकत्वमिति वाच्यम्। साक्षात्तादृशबोधजनकत्वसंभवे परम्परया जनकत्वस्याकल्पनात्।

न च निर्विकल्पकज्ञानीयतुरीयविषयतायाः शब्दजन्यतावच्छेदकत्वे लाघवात्, निर्विकल्पकं प्रत्येव शब्दस्य साक्षाज्जनकत्वमिति वाच्यम्। स्मृतावेव शब्दजन्यत्वतुरीयविषयत्वयोः संभवेन शब्दजन्यनिर्विकल्पकस्य शाब्दबोधत्वे प्रमाणाभावात्। न च "शाब्दयामि" इत्यनुव्यवसायस्तत्र प्रमाणमिति वाच्यम्। "पदार्थं स्मरामि" इत्यनुव्यवसायस्यैव तत्रोत्पत्तेः।

न च पदपदार्थयोः संबन्धाभावेन कथं पदं पदार्थस्मारकं स्यादिति वाच्यम्। पदार्थसंसर्गानुभावकत्वस्यैव पदे पदार्थसंबन्धत्वसंभवात्।

न च प्रमाणजन्यज्ञाने अगृहीतग्राहित्वमिति नियमे प्रमाणाभाव इति वाच्यम्। प्रमाणानां विषयव्यवस्थापकत्वं यत् सर्वाभ्युपगतं तस्यैव तत्र प्रमाणत्वात्। प्रमाणेन हि विषयः व्यवस्थाप्यते। अतः प्रमाणजन्यज्ञानस्य विषयव्यवस्थापकत्वमावश्यकम्। तत्त्वं च स्वविशेष्ये विशेषणाभावविषयकज्ञानाभावप्रयोजकत्वम्। ज्ञानान्तरेण विशेष्ये विशेषणस्य पूर्वं गृहीतत्वे, ज्ञानान्तरस्य विपरीतज्ञानाभावप्रयोजकतया गृहीतग्राहिज्ञाने तत्कल्पने मानाभाव इति, अगृहीतग्राहिज्ञानस्यैव विषयव्यवस्थापकत्वमिति प्रमाणजन्यज्ञानस्यागृहीतग्राहित्वमवश्याभ्युपेयम्। तस्मात् अगृहीतसंसर्गविषयकज्ञानस्य शब्दजन्यता सिध्यति।

किं च तुरीयविषयताशालिशाब्दत्वस्य शब्दकार्यतावच्छेदकत्वे, यत्र घटत्वांशे निर्विकल्पकप्रत्यक्षात्मकं वाक्याजन्य"श्वेतोऽश्वो धावति"इत्याकारकशाब्दबोधात्मकं चैकं ज्ञानं (स्मरणप्रत्यक्षात्मक"सोऽयम्"इतिज्ञानवत्) उत्पन्नम्, तत्र ज्ञाने तुरीयविषयताशालित्वस्य शाब्दत्वस्य च सत्त्वात्, तदवच्छिन्नस्य उक्तज्ञानस्य शब्दं विनापि जायमानतया व्यतिरेकव्यभिचारः प्रसजति। तद्वारणाय घटत्वनिष्ठतुरीय-

विषयत्वावच्छिन्नशाब्दत्वमेव घटादिपदकार्यतावच्छेदकमिति वक्तव्यम्। उक्तज्ञाने "श्वेतोऽश्वः" इत्याद्यंशविषयत्वावच्छिन्नशाब्दत्वस्य सत्त्वेऽपि, घटत्वनिष्ठतुरीयविषयत्वावच्छिन्नशाब्दत्वस्याभावात् न व्यभिचारः इति। परं तु एवमपि वक्तुं न शक्यते। अनधिगतो यो विशेषणविशेष्ययोः संबन्धः तन्निष्ठविषयतायाः शाब्दत्वावच्छेदकत्वाभावात्। "शुद्धघटत्वं शाब्दयामि" इत्यनुव्यवसायविरहात्। "कर्मतायां घटत्वस्य संबन्धं शृणोमि" "घटत्वीयकर्मतां शृणोमि" "घटत्वं कर्मताविशिष्टं शृणोमि, अथ वा शाब्दयामि" इत्यनुव्यवसायस्यैव वा, "घटत्वं स्मरामि" इत्यनुव्यवसायस्य चैव वा उदयात्।

अनुमानस्थलेऽपि "पर्वते वह्निसंबन्धमनुमिनोमि" इत्येवानुभवः, न तु "पर्वतमनुमिनोमि" इति वा, "वह्निसंयोगमनुमिनोमि" इति वा अनुभवः। अतस्तत्र पक्षसाध्यसंसर्गविषयतैव अनुमितित्वावच्छेदिका भवति। तस्मात् अज्ञातस्य विशेषणविशेष्यसंसर्गस्य विषयतैव प्रमाणप्रयोज्या भवतीति न प्रमाणजन्यं ज्ञानं ज्ञातपदार्थस्वरूपमात्रविषयकं भवितुमर्हति।

द्वितीयतृतीयपक्षयोः पदानां संसर्गानुभावकत्वोपपादनम्

ननु भवतु नामानुभवमात्रस्यागृहीतग्राहित्वम्। शब्दजन्यबोधस्तु अनुभवविलक्षणः, पदार्थमात्रेण सह पदस्य स्मृतिप्रयोजकसंबन्धाभावेन स्मृतिविलक्षणश्च। पदार्थसंसर्गानुभावकत्वे गौरवेण, पदार्थमात्रे तत्स्वीकारे च स्मारकत्वकल्पनायाः वैयर्थ्यात्, अभिधायकत्वस्यैव पदे स्वीकारात्। अभिधा च स्मृत्यनुभवविलक्षणो ज्ञानविशेषः। स्मृतिशक्तत्वं तु न स्मृतिप्रयोजकः संबन्धः, कुत्राप्यदृष्टचरत्वात्। अतः संबन्धान्तरमेव स्मृतिप्रयोजकः संबन्ध इति चेत् — न। निर्विकल्पके शाब्दत्वस्याप्रामाणिकत्वेन पदार्थसंसर्गानुभावकत्वमेव पदानामुचितमिति पूर्वमुक्तत्वात्। स्मृत्यनुभवविलक्षणानन्तबोधान् कल्पयित्वा तज्जनकत्वकल्पनापेक्षया पदार्थसंसर्गानुभावकत्वकल्पनस्यैव लघुत्वाच्च।

अपि च त्वयापि निर्विभक्तिकघटादिपदात् घटत्वादिस्मृतिः स्वीक्रियत एव। तथा च घटादिपदत्वावच्छिन्ने स्मृतिजनकत्वस्य त्वयापि स्वीकारात् शाब्दनिर्विकल्पकमपि स्मरणरूपमेव स्वीकर्तुमुचितम्। अतः तुरीयविषयत्वावच्छिन्नशाब्दत्वावच्छिन्नं प्रति शब्दस्य हेतुत्वान्तरकल्पनं व्यर्थम्। तस्मात् पदार्थद्वयविषयतानिरूपितसांसर्गिकविषयत्वावच्छिन्नशाब्दत्वावच्छिन्नं प्रति शब्दः कारणमित्येवोचितम्।

द्वितीयतृतीयपक्षयोः व्यवहारात् शक्तिग्रहप्रकारः

अपि च वृद्धयोर्व्यवहारं दृष्ट्वा यथा बालस्य शक्तिग्रहः, तथा "सुबन्त-तिङन्तसमुदायरूपं महावाक्यम् एकवाक्यम्" इत्याकारकस्य सुबन्ततिङन्त-समुदायविशेष्यकैकवाक्यत्वप्रकारकज्ञानस्य विशिष्टैकवाक्यार्थविषयकशाब्दबोध-हेतुत्वं बालः प्रथमतो गृह्णाति। तदनन्तरं समुदायघटकानां सुबन्ततिङन्तपदानां प्रकृतिप्रत्ययार्थसंसर्गबोधहेतुत्वं विना समुदायस्य महावाक्यार्थबोधहेतुत्वं नोपपद्यत इति अनुपपत्तिप्रतिसन्धानेन प्रकृतिप्रत्ययार्थसंसर्गबोधं द्वारतया कल्पयति। प्रकृति-प्रत्ययार्थसंसर्गबोधं प्रत्यपि सुबन्ततिङन्तपदानां साक्षात् जनकत्वं नोपपद्यते इति, तत्रापि द्वारतया पदार्थमात्रज्ञानं विभक्त्यन्तपदघटकनामादिजन्यं कल्पयति। तत्र पश्चात् विभक्त्यादिसहितस्य नामादिपदस्य पदार्थमात्रज्ञानजनकत्वं गृहीत्वा प्रकृतिप्रत्ययार्थसंसर्गधीजनकत्वं त्यज्यते चेत् उपजीव्यविरोधः प्रसजति।

एकवाक्यत्वप्रकारकज्ञानस्य शाब्दधीहेतुत्वम्

न चैकवाक्यत्वप्रकारकज्ञानस्य विशिष्टवाक्यार्थविषयकशाब्दधीहेतुत्वे माना-भाव इति वाच्यम्। एकवाक्यताज्ञानसत्त्वे विशिष्टार्थबोधः, तदभावे तदभाव इत्यन्वयव्यतिरेकज्ञानसहकृतप्रत्यक्षस्यैव तत्र प्रमाणत्वात्।

न च वाक्याजन्ये "श्वेतोऽश्वो धावति" इत्याकारके शाब्दबोधे एकवाक्यता-ज्ञानस्य व्यतिरेकव्यभिचार इति वाच्यम्। आकाङ्क्षायोग्यतासंनिधिसहकृतं पदार्थज्ञानं वाक्यार्थबोधे सामान्यसामग्री। तद्बलाच्च "श्वेतोऽश्वो धावति" इति शाब्दबोधः। पदसमूहविशेष्यकैकवाक्यताप्रकारकज्ञानं तु अव्यवहितोत्तरत्वसंबन्धेन स्वविशिष्टे वाक्यार्थबोधे विशेषसामग्री। तथा च "श्वेतोऽश्वो धावति" इत्या-कारकबोधस्य एकवाक्यताप्रकारकज्ञानविशिष्टत्वरूपकार्यतावच्छेदकानाक्रान्त-तया, तत्र एकवाक्यताज्ञानाभावेऽपि न व्यभिचारः। कार्यतावच्छेदकाश्रयस्य कारणं विना उत्पत्तावेव व्यतिरेकव्यभिचारात्।

"श्वेतोऽश्वो धावति" इति शाब्दबोधे तु श्वेतरूपदर्शनस्थले गवादिद्रव्या-भावनिश्चयसहकृता, "दृश्यमानं श्वेतत्वमश्वसंसर्गं विना अनुपपन्नम्" इति धीः विशेषसामग्री। यद्वा श्वेतरूपस्याश्वान्यद्रव्यवृत्तित्वाभावनिश्चयसहकृता द्रव्यवृत्ति-त्वधीः विशेषसामग्री। अथ वा, "धावनकर्तृत्वं विना उपलभ्यमानं खुरनिक्षेप-शब्दादिकमनुपपन्नम्" इति धीः, धावनकर्तृत्वस्य तादृशद्रव्यवृत्तित्वधीर्वा (अश्वा-न्यद्रव्यावृत्तित्वधीर्वा)।

सर्वमिदमभिप्रेत्यैव वार्त्तिककारमिश्राः[१] प्राहुः —

"पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः॥
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित्।" इति।

विशेषतो हेतुत्वविचारः

अत्र पदमात्रस्य सामान्यतः स्वघटितवाक्यतात्पर्यविषयशाब्दधीहेतुत्वेऽपि, विशेषतः कारणत्वं चिन्त्यते। प्रकृत्यर्थान्विते प्रत्ययार्थकर्मत्वादौ "घट" इत्यादि-प्रकृत्युत्तरप्रत्ययपदस्य अमादेः अनुभावकत्वरूपा शक्तिः, प्रत्ययपूर्ववृत्तिघटादि-पदस्य कर्मत्वान्वितघटत्वादौ सा शक्तिः इति यदि स्वीक्रियते, तदा पक्षद्वयस्य समुच्चयश्चेत् "घटत्वान्वितं कर्मत्वं" "कर्मत्वान्वितं घटत्वम्" इति युगपत् बोध-द्वयापत्त्या वाक्यभेदापत्तिः। यदि तु प्रकृत्यर्थान्वितकर्मत्वादौ प्रकृत्युत्तरस्य प्रत्ययस्यानुभावकत्वमित्येव स्वीक्रियते, तदा प्रकृतेरवाचकत्वापत्तिः। प्रत्ययपूर्व-वृत्तिप्रकृतेरेव कर्मत्वाद्यन्वितघटत्वाद्यनुभावकत्वमिति स्वीकारे च प्रत्ययस्यावाच-कत्वापत्तिः। प्रकृतिप्रत्यययोः द्वयोरपि विशिष्टानुभावकत्वस्वीकारे केवलप्रकृतिपदे प्रत्ययपदे च उभयवाचकत्वप्रसङ्गः। एकैकस्य एकैकार्थानुभावकत्वे पूर्वोक्तपक्ष-त्रयमध्ये प्रथमपक्ष एव स्वीक्रियेत।

प्रथमपक्षसमर्थकपार्थसारथिमिश्रादिमतनिरासपूर्वकम् अन्वितशक्तिवादोप-पादनम्

किं च वेदान्त"तत्त्वमसि"इत्यादिमहावाक्यस्थपदानामखण्डार्थबोधं प्रत्येव विशेषतो हेतुत्वस्य वाच्यतया कथं सर्वपदानामन्वितबोधकत्वम्? तस्मात् नान्विते पदानां शक्तिः। किं त्वनन्विते घटत्वादौ। पदजन्यात् तदनुभवात् अन्वितानुभव इति प्रथमपक्ष एव युक्त इति पार्थसारथिमिश्रादयः।

तदसत्। अन्वितशक्तिवादस्याशयानवबोधात्। अभिहितान्वयमते अन्विता-भिधानमते च आकृत्यधिकरणन्यायेन जातावेव पदानामनुभावकत्वरूपा शक्ति-रित्युच्यते। तस्य च घटत्वादिकमेव घटादिपदानुभाव्यमिति पक्षे यथाश्रुत एवार्थः। अन्यान्वितघटत्वादिकं तदर्थ इत्युक्तपक्षे तु, तादृशशक्तेः यदीयतया ग्रहः शाब्दधी-प्रयोजकः सोऽर्थो वाच्यतया व्यवह्रियते। सा च जातिरेवेति तत्रैव वाचकत्वं घटादिपदे व्यवह्रियते। न तु घटत्वाद्यन्विते अन्यान्वितघटत्वादौ वा। अत एव न नानार्थत्वप्रसङ्गः।

---

[१] श्लो.वा.वाक्य.३५८, ३५९ ab.

यत्र हि नानाधर्माणां प्रत्येकनिरूपितत्वेन पदे शक्तिग्रहाः तत्तद्धर्मविषयकशाब्दबुद्धिषु कारणानि, तत्रैव पदस्य नानार्थता, यथा हर्यादिपदे कपित्वविष्णुत्वादिधर्माणां मध्ये प्रत्येकनिरूपितशक्तिग्रहात् कपित्वादिविषयकशाब्दबुद्धीनां जननेन, हर्यादिपदस्य कपित्वादिनानाधर्मवाचकत्वम्।

अन्वितघटत्वं घटपदशक्यमित्युक्तेः आशयविवरणम्

तस्मात् "अन्यान्वितघटत्वं घटपदस्य शक्यम्, अन्यान्वितकर्मत्वममादिपदस्य शक्यम्" इत्याद्युक्तेरयमर्थः —

शाब्दत्वावच्छेदिका या विशेष्यतानिरूपितसंसर्गतानिरूपितघटत्वनिष्ठप्रकारता तच्छालित्वं घटपदज्ञानकार्यतावच्छेदकम्। घटपदज्ञानात् घटत्वप्रकारककर्मत्वादिविशेष्यकशाब्दबोधस्य जायमानतया कर्मत्वनिष्ठविशेष्यतानिरूपिताधेयत्वनिष्ठसंसर्गतानिरूपितघटत्वनिष्ठप्रकारत्वावच्छिन्नशाब्दत्वं घटपदज्ञानकार्यतावच्छेदकम्। शाब्दत्वावच्छेदिका कर्मत्वनिष्ठविशेष्यतानिरूपिताधेयत्वनिष्ठसंसर्गतानिरूपितप्रकारता भवति। विशेष्यता किंचिन्निष्ठत्वेन, संसर्गता च किंचिन्निष्ठत्वेन, शाब्दत्वावच्छेदकशरीरे न प्रवेश्यते। तथा च "अन्यान्वितघटत्वं घटपदशक्यम्" इत्यस्य घटपदजन्यतावच्छेदकशाब्दत्वावच्छेदकविशेष्यतानिरूपितसंसर्गतानिरूपितप्रकारताश्रय इत्यर्थः।

प्रकारतायां 'शाब्दत्वावच्छेदक' इति विशेषणानुपादाने, घटत्वीयकर्मतांशे अनुमित्यादिरूपस्य, पटत्वीयकरणत्वांशे शाब्दबोधात्मकस्य च ज्ञानस्य घटपदज्ञानं विनाप्युत्पत्त्या व्यतिरेकव्यभिचारः स्यात्, तद्वारणाय तद्विशेषणम्। तदुपादाने च उक्तज्ञानीयघटत्वनिष्ठप्रकारतायाः अनुमितित्वावच्छेदकत्वेन, शाब्दत्वावच्छेदकत्वाभावात् न व्यभिचारः। प्रकारतायां विशेष्यतानिरूपितसंसर्गतानिरूपितत्वानिवेशे केवलप्रकारतायाः केवलविशेष्यतायाः वा शाब्दत्वावच्छेदकत्वविरहात् केवलप्रकारत्वावच्छिन्नशाब्दत्वस्य कार्यतावच्छेदकत्वं न संभवति। अतः विशेष्यतानिरूपितसंसर्गतानिरूपितप्रकारतायां शाब्दत्वावच्छेदकत्वनिवेशः। तथा च विशेष्यतानिरूपितेत्यादिविशेषणविशिष्टप्रकारतात्वावच्छिन्ना शाब्दत्वनिरूपिता प्रकारतानिष्ठा अवच्छेदकतेति लभ्यते।

यद्वा घटपदजन्यशाब्दबोधानन्तरं "घटत्वान्वितं शाब्दयामि" इत्यनुव्यवसायात् घटत्वनिष्ठप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतात्वावच्छिन्नविशेष्यतानिष्ठावच्छेदकताकशाब्दत्वं घटपदकार्यतावच्छेदकम्।

घटत्वनिष्ठविषयतामात्रावच्छिन्नशाब्दत्वं तु न घटपदकार्यतावच्छेदकम्, शाब्दत्वस्य तन्मात्रानवच्छिन्नत्वात्। "घटम्" इत्यादिवाक्यजन्यधीस्थले "घटत्वं स्मरामि" इत्येव प्रत्ययेन "घटत्वं शाब्दयामि" इति प्रतीत्यभावात्।

अत एवानुवादवाक्यार्थे "स्मरामि" इत्येवानुभवात् अनुवादवाक्यात् प्रमोत्पत्तिवारणाय प्रमासामान्यं प्रति तत्तदर्थविषयकाज्ञानस्य हेतुत्वात्, शाब्दादिज्ञानस्य च प्रमात्वनियमात् अज्ञानरूपसामान्यसामग्रीविरहेण अनुवादवाक्यार्थे न प्रमोत्पत्तिः। तथा च पूर्वोक्तव्यभिचारवारणाय शाब्दत्वावच्छेदकविशेष्यतानिरूपितसंसर्गतानिरूपितप्रकारत्वावच्छिन्नशाब्दत्वं वा, शाब्दत्वावच्छेदकप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यत्वावच्छिन्नशाब्दत्वं वा घटादिपदकार्यतावच्छेदकमिति सिद्धम्।

तार्किकमते घटादिपदकार्यतावच्छेदकम्

तार्किकादिमते तु घटत्वीयकर्मतांशेऽनुमित्यादिरूपस्य, पटत्वीयकरणत्वांशे शाब्दज्ञानस्य अनङ्गीकारात्, उक्तव्यभिचाराभावेन घटत्वाद्यवच्छिन्नविषयताशालिशाब्दत्वेनैव घटादिपदकार्यता। तन्मते जातेः संस्थानव्यङ्ग्यत्वानियमेन अनुमितित्वशाब्दत्वादिजातिस्वीकारेण, अनुमित्यात्मकशाब्दज्ञानस्वीकारे जातिसांकर्यापत्तेः। अपि च तन्मते भिन्नविषयकानुमितिसामग्र्याः शाब्दज्ञानप्रतिबन्धकत्वस्वीकारात्, कथं भिन्नविषयकयोः अनुमितिशाब्दज्ञानयोर्युगपदुत्पत्तिः भवितुमर्हति।

मीमांसकमते घटादिपदकार्यतावच्छेदकम्

मीमांसकमते तु गुणादौ जात्यनङ्गीकारेण विषयताविशेषरूपशाब्दत्वानुमितित्वादिस्वीकारात्, तन्मते अनुमितित्वशाब्दत्वयोः एकत्र समावेशात्मकं सांकर्यं भवितुमर्हति।

तथा च "घटं" "घटेन" "घटाय" इत्यादिसाधारणघटत्वाद्यन्वितकर्मत्वादिविशेष्यत्वावच्छिन्नशाब्दत्वं घटादिपदज्ञानकार्यतावच्छेदकम्। अमादिपदकार्यतावच्छेदकं तु "घटं" "पटम्" इत्यादिसाधारण्येन अन्वितकर्मत्वादिविशेष्यत्वावच्छिन्नशाब्दत्वम्।

वस्तुतस्तु, विशेष्यतात्वेन विशेष्यता न निवेश्यते। अपि तु विशेष्यताप्रकारतासाधारणविषयतात्वेनैव सा निवेश्यते। तेन "घट" इत्यादावेकत्वद्वित्वादिप्रकारतानिरूपितघटत्वादिविशेष्यताया अपि संग्रहः। "घटः" "घटौ" इत्यादौ एकत्वद्वित्वादिप्रकारकघटत्वविशेष्यकशाब्दबोधस्यापि जायमानत्वात्।

अन्वितविषयकशाब्दं प्रति पदज्ञानं न कारणमित्याक्षेपः

ननु "घटं" "घटेन" इत्याद्यानुपूर्वीविशेषविषयकज्ञानत्वेन तादृशज्ञानस्य घटत्वादिनिष्ठकर्मताकरणतादिविषयकशाब्दं प्रति हेतुत्वमावश्यकम्। अन्यथा "अम् घट" इत्याद्यानुपूर्वीज्ञानादपि तादृशशाब्दबोधापत्तेः। तथा च घटादिपदज्ञानत्वेन घटत्वाद्यन्वितशाब्दं प्रति कारणत्वकल्पनं व्यर्थम्।

अथ "घटं" "घटेन" इत्याद्यानुपूर्वीविशेषाणामेकस्याप्यज्ञानदशायां घटत्वान्वितविषयकशाब्दसामान्याभावः दृश्यते। तादृशसामान्याभावं प्रति "घटम्" इत्याद्यानुपूर्वीविशेषज्ञानाभावकूटस्य प्रयोजकत्वकल्पने गौरवात्, घटत्वान्वितशाब्दसामान्यं प्रति घटपदज्ञानत्वावच्छिन्नस्य कारणत्वं कल्पयित्वा, घटपदज्ञानसामान्याभावप्रयुक्तत्वमुक्तशाब्दज्ञानसामान्याभावस्य कल्प्यते। तादृशकारणत्वाकल्पने तु न तत्प्रयुक्तत्वं तस्य सिध्यति। कार्यतावच्छेदकावच्छिन्नाभावस्यैव कारणतावच्छेदकावच्छिन्नाभावप्रयुक्तत्वादिति चेत् — न। निर्विभक्तिकघटादिपदज्ञाने सति घटत्वान्वितविषयकशाब्दसामान्याभावः दृश्यते। तत्र च घटपदज्ञानत्वावच्छिन्नाभावः प्रयोजक इति न वक्तुं शक्यते। घटपदज्ञानस्यैव सत्त्वात्। अतस्तत्रत्यः शाब्दसामान्याभावः "घटं" "घटेन" इत्याद्यानुपूर्वीज्ञानविशेषाभावकूटप्रयुक्त इत्येव वक्तव्यम्। एवं च घटपदज्ञानसामान्याभावकालीने घटत्वान्वितविषयकशाब्दसामान्याभावेऽपि उक्तानुपूर्वीज्ञानविशेषाभावकूटस्यैव प्रयोजकत्वसंभवेन घटत्वान्वितविषयकशाब्दं प्रति घटपदज्ञानं कारणमिति कार्यकारणभावकल्पनं व्यर्थमेवेति चेत् —

उक्ताक्षेपस्य समाधानम्

अत्रोच्यते। निर्विभक्तिकघटादिपदज्ञानदशायां घटपदज्ञानसामान्याभावस्यासत्त्वेन तस्य घटत्वान्वितविषयकशाब्दज्ञानसामान्याभावप्रयोजकत्वासंभवेऽपि घटादिपदज्ञानसामान्याभावकाले, यस्य यस्य पुरुषस्य घटत्वान्वितविषयकशाब्दसामान्याभावः तत्तत्पुरुषनिष्ठस्य तादृशशाब्दसामान्याभावाधिकरणत्वस्य घटादिपदज्ञानसामान्याभावप्रयुक्तत्वं लाघवेन संभवति। तथा च तदनुरोधेन उक्तकार्यकारणभावकल्पनात्।

अन्वितज्ञान-पदज्ञानयोः प्रकारान्तरेण कार्यकारणभावः

अथ वा सविभक्तिकघटपदज्ञानत्वावच्छिन्नं घटत्वान्वितविषयकशाब्दत्वावच्छिन्नं प्रति कारणमिति कार्यकारणभावोऽस्तु।

यदि तु विशेषकारणेष्वनुगतं यत् सामान्यरूपं तेन रूपेण कारणत्वस्य अस्वीकारेऽपि, तादृशसामान्यरूपावच्छिन्नाभावः विशेषकार्यानुगतसामान्यरूपावच्छिन्नाभावे प्रयोजकः स्वीक्रियते। तादृशलघुधर्मावच्छिन्नाभावस्यैव प्रयोजकतावच्छेदकत्वसंभवादिति चिन्त्यते, तदा आस्तां तथैव।

न चैवं घटादिपदोत्तरामादिपदज्ञानत्वेन हेतुत्वादीनां स्वीकारेऽपि घटादिपदज्ञानत्वेन हेतुत्वाभावात् घटादिपदे घटत्वादिशक्त्यभावेन तादृशशक्तिज्ञानस्य शाब्दधीहेतुत्वासंभवः। घटादिपदज्ञानत्वावच्छिन्नायाः हेतुताया एव मीमांसकमते शक्तिरूपत्वादिति वाच्यम्। घटपदोत्तराम्पदज्ञानत्वेनेव, अम्पदपूर्ववृत्तिघटपदज्ञानत्वेनापि घटत्वान्वितविषयकशाब्दत्वावच्छिन्नं प्रति विनिगमनाविरहात् हेतुत्वं स्वीकर्तव्यमिति पूर्वमुक्तत्वात्; घटत्वप्रकारतानिरूपितकर्मताविशेष्यकशाब्दत्वेनेव, कर्मताविशेष्यतानिरूपितघटत्वप्रकारताकशाब्दत्वेनापि अवच्छिन्नायाः कार्यतायाः स्वीकारात्, घटत्वीयानुभावकतारूपशक्तेः तादृशशक्तित्वेन घटपदज्ञानं हेतुः। अम्पदपूर्ववृत्तित्वस्य कर्मताविशेष्यकत्वस्य वा तत्र निवेशेऽपि घटत्वशक्तत्वस्य घटपदेऽक्षतत्वात्।

तथा च "घटम्" इत्यादिपदज्ञानस्य घटादिपदविशेष्यकघटत्वादिशक्तिज्ञानजन्यसंस्कारोद्बोधकस्वघटकघटादिपदज्ञानजनितघटत्वादिस्मृतिद्वारा घटत्वीयकर्मतादिविषयकशाब्दधीहेतुत्वम्।

"घटः कर्मत्वम्" इत्यादिनिराकाङ्क्षपदजन्यघटत्वादिस्मृतेः "घटम्" इत्यादिपदघटकघटादिपदाजन्यत्वात्, तादृशस्मृतिद्वारा "घटम्" इत्यादिपदज्ञानस्य नानुभावकतेति घटादिपदस्य 'स्वघटक' इति विशेषणम्। "घटम्" इत्यादिपदघटकेति तदर्थः। एवं च घटादिपदज्ञानत्वादिरूपेण घटत्वाद्यन्वितानुभावकत्वाभावेऽपि न क्षतिः।

संसर्गस्य लक्षणया बोधः

घटत्वीयकर्मतासंसर्गो निरूपकत्वरूपो दर्शनादिक्रियानिष्ठः उक्तकर्मताशाब्दबोधेन लक्षणया अनुभाव्यते।

ननु यथा गङ्गादिपदात् तीरादिविषयकशाब्दबोधस्थले तीरादौ गङ्गादिपदशक्यसंबन्धरूपलक्षणायाः ज्ञानं कारणम्; यथा वा तत्पदशक्योपस्थित्यधीनतीराद्युपस्थितिरूपा लक्षणा प्राचीनमते स्वरूपसती कारणम्; तथा प्रकृते उक्तनिरूपकत्वरूपसंसर्गे "घटम्" इत्यादिपदशक्यं यत् घटत्वीयं कर्मत्वादिकं तत्प्रतियोगिकत्वादिरूपसंबन्धज्ञानं, घटत्वीयकर्मत्वोपस्थित्यधीना निरूपकत्वोपस्थितिर्वा कारणमपेक्ष्यते। तदभावे तु तादृशसंसर्गविषयकशाब्दज्ञानासंभव इति चेत् — न।

तत्रैव हि बोध्यबोधकसंबन्धज्ञानं पूर्वमपेक्ष्यते, यत्र बोध्यप्रमातः पूर्वं बोध्योपस्थितिरपेक्ष्यते। यथा घटत्वाद्यन्वितशाब्दप्रमातः पूर्वं घटादिपदे घटत्वाद्यनुभावकत्वरूपशक्तिज्ञानं विना घटत्वाद्युपस्थितिरूपकारणाभावेन उक्तप्रमाविरहात् उक्तोपस्थितिहेतुतयोक्तशक्तिज्ञानमपेक्ष्यते। यथा वा गङ्गादिपदतीराद्योः संबन्धज्ञानं विना, गङ्गादिपदोपस्थापितप्रवाहादितीराद्योः संबन्धज्ञानं विना वा तीराद्युपस्थित्यभावेन तीराद्युपस्थितिहेतुकतीरादिशाब्दप्रमाविरहात् उक्तोपस्थितिरपेक्ष्यते। यत्र तु बोध्यप्रमातः पूर्वं तदुपस्थितिर्नापेक्ष्यते, तत्र तन्नापेक्ष्यते। यथा रूपादिविषयकचाक्षुषप्रमातः पूर्वं रूपाद्युपस्थितेरनपेक्षिततया, रूपादिचक्षुराद्योः संबन्धज्ञानं रूपाद्युपस्थितिहेतुतया नापेक्ष्यते। किं तु रूपादौ चक्षुरादिसंयुक्तघटादिसमवेतत्वं स्वरूपसत् कारणमपेक्ष्यते।

तथा च वाक्यार्थीभूतक्रियाकारकसंसर्गस्यापूर्वत्वात् तदुपस्थितेः तच्छाब्दप्रमायामनपेक्षिततया, तद्धेतुतया उक्तसंसर्गरूपे बोध्ये तद्बोधकस्य घटत्वीयकर्मत्वादिरूपार्थस्य संबन्धज्ञानं नापेक्ष्यते। किं तूक्तार्थस्य घटत्वीयकर्मत्वादेः दर्शनादिक्रियानिष्ठनिरूपकत्वरूपसंसर्गे संबन्धसत्तामात्रम्। अन्यथा तादृशक्रियाकारकसंसर्गज्ञानस्य प्रमात्वानुपपत्तिः।

लक्षणालक्षणविरहात् संसर्गे न लक्षणेत्याक्षेपः

ननु घटत्वनिष्ठकर्मत्वस्य आनयनानुयोगिकः यः निरूपकत्वरूपः संसर्गः, तत्र घटपदस्य लक्षणा न संभवति। लक्षणा हि शक्यसंबन्धो वा, बोध्यसंबन्धो वा। घटपदशक्यघटत्वसंबन्धः निरूपकत्वे नास्ति। कर्मत्वसंबन्धो यद्यप्यस्ति; तथापि कर्मत्वं न घटपदस्य शक्यं, न वा बोध्यम्। नापि "घटम्" इत्यादिपदस्य तत्र लक्षणा भवितुमर्हति। लक्षणया तत्पदबोध्यनिष्ठस्य तत्पदबोध्यप्रतियोगिकसंबन्धस्यैव तत्पदलक्षणात्वात्। कर्मत्वादिनिरूपकत्वरूपसंसर्गस्य चोक्तपदाबोध्यत्वात्। "गङ्गायां घोषोऽस्ति" इत्यादौ हि लक्षणया गङ्गादिपदबोध्यतीरादौ स्थितस्य गङ्गादिपदबोध्यप्रवाहादिप्रतियोगिकसंसर्गस्य लक्षणात्वं दृष्टम्। अतो निरूपकत्वात्मकस्य घटत्वीयकर्मत्वादिसंसर्गस्य लक्ष्यत्वानुपपत्तिरिति चेत् —न।

उक्ताक्षेपस्य समाधानम्

लाक्षणिकपदस्य लक्ष्यार्थाबोधकत्वेनोक्तरीत्या लक्षणात्वस्य निर्वचनायोगात्। स्वार्थधीद्वारा बोधकत्वं तु तीरादौ गङ्गादिपदस्येव घटत्वीयकर्मत्वादिसंसर्गे "घटम्" इत्यादिपदस्याप्यस्त्येव। गङ्गापदेन हि प्रथमतः प्रवाहस्य उपस्थितिः, तया तीरोपस्थितिः। तया तच्छाब्दबोधः। तथा "घटम्" इत्यादिपदेन प्रथमतः घटत्वीय-

कर्मत्वादेः शाब्दधीः। तया उक्तकर्मत्वादेः संसर्गस्य स्मृत्यभावेऽपि शाब्दधीरिति विशेषः। तस्मात् उभयसाधारण्येन लक्षणायाः लक्षणमेवं वक्तव्यं — शब्दार्थधीबोध्यनिष्ठः शब्दार्थप्रतियोगिकः संबन्धो लक्षणा। शब्दार्थश्च त्रिविधः — पदार्थः, प्रत्ययान्तपदार्थः, वाक्यार्थश्च। आद्यो "गङ्गायां घोषः" इत्यादौ प्रवाहादिः। प्रवाहधीजन्यधीविषयः तीरं, तन्निष्ठः शब्दार्थप्रवाहसंबन्धो लक्षणा। द्वितीयः प्रत्ययान्तपदार्थः "घटमानय" इत्यादौ घटकर्मतादिः। तद्विषयकधीजन्यधीविषयः निरूपकत्वं, तन्निष्ठः घटकर्मत्वप्रतियोगिकः निरूपितत्वाख्यः संबन्धो लक्षणा। तृतीयः अर्थवादवाक्यार्थः। लक्षकत्वं तादृशशब्दार्थनिष्ठं लक्ष्यविषयकशाब्दधीजनकज्ञानविषयत्वम्। तच्च पदार्थे लक्ष्यस्मृतिद्वारा। इतरयोः साक्षादिति विवेकः। तदिदमुक्तं सिद्धौ —

"अभिहितान्वयवादरूपे द्वितीयपक्षे चाज्ञाताया एव पदार्थनिष्ठायाः लक्षणायाः वृत्तित्वाङ्गीकारात् न संसर्गस्य पदस्मारितत्वम्"

इति। पदार्थनिष्ठायाः = घटत्वीयकर्मतादिरूपप्रत्ययान्तपदार्थसंबन्धरूपायाः। लक्षणायाः = प्रत्ययान्तपदार्थविषयकधीजन्यधीविषयः यः क्रियाकारकसंबन्धः (निरूपकत्वं) तदनुयोगिकसंबन्धरूपायाः। वृत्तित्वेति। शाब्दधीप्रयोजको यः बोध्यबोधकसंबन्धः तत्त्वमित्यर्थः। क्रियाकारकसंबन्धांशे शाब्दधियो निर्वाहे अज्ञातैव लक्षणा उपयुज्यत इत्यर्थः।

अन्विताभिधानवादे संसर्गस्य शक्यत्वम्

अन्विताभिधानवादे तु तादृशसंबन्धस्य पदशक्यत्वमेव, न तु घटत्वीयकर्मतादिविषयकशाब्दधीमात्रजन्यशाब्दधीविषयत्वम्। कार्यत्वाविधेयतानिरूपिता (कार्यत्वनिष्ठविधेयत्वानिरूपिता) या क्रियानिष्ठोद्देश्यतावच्छेदकता घटकर्मत्वादिकारकनिष्ठा, तत्संबन्धेन शाब्दबोधं प्रति, "घटः कर्मत्वम्" इत्यादिनिराकाङ्क्षपदाजन्या या घटकर्मत्वाद्युपस्थितिः तद्द्वारा "घटम्" इत्यादिपदज्ञानं, घटकर्मत्वाद्यर्थाध्याहाररूपं प्रमाणान्तरं वा हेतुः। "घटम्" इत्यादिपदाज्ञानकाले "आनय" इत्यादिपदज्ञानकाले तादृशप्रमाणान्तरात् उक्तसंबन्धेन शाब्दबोधोत्पत्तेः।

एवं कार्यत्वनिष्ठविधेयत्वनिरूपिता या क्रियानिष्ठोद्देश्यता तत्संबन्धेन शाब्दबोधं प्रति, "आनयनं कार्यत्वम्" इत्यादिनिराकाङ्क्षपदाजन्या या आनयनकार्यत्वाद्युपस्थितिः तत्संबन्धेन "आनय" इत्यादिपदज्ञानम्, आनयनकार्यत्वाद्यर्थाध्याहाररूपं मानान्तरं वा हेतुः।

कार्यत्वान्विते पदानां शक्तिरिति प्राभाकरवाक्यस्य अस्मिन्नेवार्थे पर्यवसानम्। साक्षात् परम्परया वा कार्यत्वान्वितत्वस्य दुर्वचत्वेन तदाश्रयविषयकत्वस्य पदकार्यतानवच्छेदकत्वात्।

संबन्धांशे कुब्जशक्तिरिति मतम्

तत्र च कार्यानुकूला शक्तिः तृणफूत्कारसंबन्धादौ, न तु तृणादौ, फूत्कारासंबद्धतृणादितोऽपि वह्न्यादिकार्योत्पत्त्यापत्तेः इति यथा स्वीक्रियते, तथा उक्ताध्याहारपदज्ञानयोः कारकक्रियापदयोर्वा मेलने तादृशशक्तिः, न तु पदज्ञानादाविति स्वीक्रियते। तेन क्रियापदज्ञानकारकाध्याहारयोः कारकपदक्रियापदयोर्वा मेलनं कृत्वैव शाब्दधीः, न तु कारकक्रियाध्याहारयोरेव मेलने। प्राभाकरसिद्धान्ते तथैव स्वीकारात्। तथा च क्रियाकारकसंबन्धविषयकशाब्दबोधानुकूला शक्तिः पदघटिते स्वीक्रियते। पदं तच्छक्तमित्युच्यते। तादृशशक्तेश्च "घटत्वकर्मकं दर्शनं कार्यम्" इत्याकारकशाब्दधीः यद्यपि निरूपिका। तथापि तस्यां घटत्वशाब्दधीत्वस्यापि सत्त्वात् घटत्वधीनिरूपितशक्तित्वेनैव शक्तेः घटादिपदे ज्ञानं कारणं लाघवात्, न तु क्रियाकारकसंबन्धशाब्दधीनिरूपितशक्तित्वेनेति संबन्धांशे कुब्जशक्तिवाद इत्युच्यते।

तदिदमुक्तम् — आद्यपक्षे कुब्जशक्त्यङ्गीकारात् इति। अङ्गीकारान्न संसर्गस्य पदस्मारितत्वमिति योजना। अज्ञाताया एव शक्तेः संबन्धांशे अनुभवजनकत्वेन, न संबन्धस्मारकत्वमित्यर्थः। संबन्धांशे अनुभवं प्रति पदस्य कारणत्वेन पदे तदनुकूला शक्तिरस्त्येव। परं तु सा यथा घटत्वादिजात्यंशे ज्ञाता सती तत्स्मृतिद्वारा क्रियाकारकसंबन्धशाब्दबोधं जनयति, तथा उक्तसंबन्धांशे ज्ञाता सती सा शक्तिः उक्तसंबन्धस्मृतिद्वारा तच्छाब्दबोधं न जनयति, तस्य संबन्धस्य वाक्यार्थत्वेन अपूर्वत्वात् तदनुभवस्मृती विनापि तच्छाब्दबोधोत्पत्तेः। प्रकृतिप्रत्ययाभ्यां योऽर्थो बुध्यते, तस्य द्वयोः संबन्धरूपत्वे तदंशेऽप्यज्ञातैव शक्तिः बोधं जनयति, यथा "घटेनानय" इत्यादौ घटत्वकरणत्वयोः आनयनकार्यत्वयोर्वा संबन्धांशे, तस्यापि वाक्यार्थत्वेन स्मरणानपेक्षत्वात्। तस्य वाक्यार्थत्वाभावे तु तदंशेऽपि शक्तिः ज्ञातैव तदीयशाब्दानुभवप्रयोजिका। यथा "तत्त्वमसि"इत्यादिमहावाक्ये तत्त्वम्पदाभ्यां बुध्यमानं शुद्धचैतन्यं ज्ञातयैव शक्त्या बुध्यते, विशिष्टशक्तस्य (सर्वज्ञत्वविशिष्टचैतन्ये अज्ञत्वविशिष्टचैतन्ये शक्तस्य च तत्पदस्य त्वम्पदस्य च) केवलचैतन्यरूपैकदेशेऽपि शक्तेः सत्त्वात्। अत एव तत्र पदाभ्यां प्रत्येकं स्मृतिद्वयमुत्पाद्य, तद्द्वारा शाब्दधीः जायते। पदतदर्थयोः शक्तिरूपसंबन्धस्य गृहीतत्वेन पदरूपसंबन्धिग्रहणे सति अर्थस्मृतिसंभवात्।

पदाभ्यां स्मृतिसमबोधः

नन्वेवम् अभिहितान्वयवादेऽपि तृतीयपक्षे तथा संभवात् अभिहितान्वयवादे पदाभ्यां स्मृतिसमबुद्धिद्वयम्, अन्विताभिधानवादे च ताभ्यां स्मृतिद्वयमिति विशेषः किमर्थमुक्तः संक्षेपशारीरके[१] —

"अभिहितघटना यदा तदानीं स्मृतिसमबुद्धियुगं पदे विधत्तः।
परदृशि पुनरन्विताभिधाने पदयुगलात् स्मृतियुग्ममेव पूर्वम्॥"

इति श्लोकेनेति चेत्—

उच्यते। अभिहितान्वयवादे प्रत्येकं विभक्त्यन्तपदाभ्यां स्मृतिद्वारा शाब्दधीद्वयं जन्यते। महावाक्यार्थधीस्तु तेनैव धीद्वयेन, न तु पदज्ञानेन। अत एव पदज्ञानासत्त्वे प्रमाणान्तरजन्याभ्यामाकाङ्क्षायोग्यतादिसहिताभ्यामर्थज्ञानाभ्यां वाक्यार्थबोधो जन्यते। अत एव —

"पश्यतः श्वेतमारूपं ह्रेषाशब्दं च शृण्वतः।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीतिः धीः॥
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित्।"

इति वार्त्तिकवाक्ये[२] पदज्ञानसामान्याभावेऽपि शाब्दधीः, पदार्थज्ञानाभावे तु न क्वापि सेत्युक्तम्।

तथा चाभिहितान्वयवादे पदज्ञानस्थले महावाक्यार्थधीकरणस्य शाब्दबोधस्य आवश्यकतया स्मृतिसमोऽपि स कल्प्यते। यद्यपि स्मृतिसमत्वं ज्ञातविषयकत्वम्। प्रमाणजन्यं ज्ञानं चाज्ञातविषयकमेव। अनुवादवाक्यस्थले वाक्यार्थज्ञानं स्मृतिरेव, प्रमाणादप्रमाया अनुत्पत्तेः। अत एव घटत्वीयकर्मतादिविषयकप्रमायां वाक्येन जननीयायां, तद्विषयकाज्ञानं सहकारित्वेन कल्प्यते। तथापि अगत्या महावाक्यादिस्थले पदजन्यो बोधः स्मृतिसमः कल्प्यते। तथा च स्मृतिप्रमाभ्यां विलक्षणमपि ज्ञानं प्रमाणजन्यं स्वीक्रियते, अन्यथानुपपत्तेः।

अत एव "घटोऽस्ति" इति वाक्यजन्ये "अस्तित्वं घटत्वीयम्" इति शाब्दबोधे घटत्वनिर्विकल्पकशाब्दबोधः स्मृतिसम एव करणम्। निर्धर्मितावच्छेदकक-शाब्दबोधासंभवेन एकत्वप्रकारकघटत्वविशेष्यकशाब्दबोधस्य तत्रासंभवात्। न हि शाब्दबोधीयविशेष्यता केनाप्यनवच्छिन्ना स्वीक्रियते।

---

[१] सं.शा.श्लो.३८४.
[२] श्लो.वा.वाक्य.३५८, ३५९ ab.

स्मृतिसमबोधस्य खण्डनम्

अन्विताभिधानवादिनस्तु नैतत् क्षमन्ते। क्रियाकारकसंबन्धादिरूपस्य महावाक्यार्थस्य ज्ञानं पदजन्यं वदन्ति ते। तदुक्तं[१] —

"यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥"

इति। संनिधानं = पदजन्यस्मृतिविषयत्वम्। तथा चाकाङ्क्षायोग्यतासंनिधिसहकृतपदैरेव क्रियाकारकसंबन्धादिरूपस्य शाब्दबोधोत्पत्तेः, नावान्तरवाक्यार्थस्य प्रकृतिप्रत्ययार्थसंबन्धादिरूपस्य शाब्दधीविषयत्वे प्रमाणमस्ति। 'विशेष्ये विशेषणं तत्र च विशेषणान्तरम्' इति रीत्या महावाक्यार्थधीसंभवात् कुतः स्मृतिसमबोधस्वीकारः? अन्यथानुपपत्त्यभावात्। यदि हि घटत्वीयकर्मतादिमात्रस्य शाब्दधीः स्वीक्रियते, तदा शाब्दबोधानां कार्यत्वविषयकत्वमिति नियमस्य प्राथमिकव्युत्पत्तिकाले क्लृप्तस्य भङ्गः स्यात्।

अथापि क्रियाकारकसंबन्धादिबोधात् पूर्वं प्रकृतिप्रत्ययार्थसंबन्धादिविषयकम् अवान्तरवाक्यार्थज्ञानं जायमानं मन्यसे; तादृशज्ञानस्यानुभाविकत्वात्, विशिष्टवैशिष्ट्यबोधात्मकस्य क्रियाकारकसंबन्धबोधस्य विशेषणतावच्छेदकप्रकारकज्ञानरूपं प्रकृतिप्रत्ययार्थसंबन्धादिविषयकमवान्तरवाक्यार्थज्ञानं विनानुपपत्तेः इति; तर्हि अवान्तरवाक्यार्थधियं प्रत्येकपदार्थस्मृतिजन्यामवान्तरस्मृतिं मन्यस्व। प्रत्येकपदार्थसंबन्धितया प्रकृत्यर्थविशिष्टप्रत्ययार्थस्य गृहीतत्वेन तत्स्मृत्या तत्स्मृतिसंभवात्। नैतावता अवान्तरवाक्यार्थस्य शाब्दबोधोऽपि मन्तव्यः।

यत्तु — वाक्यार्थकर्मके कुलकादौ चावान्तरवाक्यार्थधीपूर्विका महावाक्यार्थधीः, "घटमानय" इत्यादौ त्वनियमः इति; तन्न। वाक्यार्थकर्मके कुलकादौ च सकारकैकक्रियाबोधे पदैर्जाते तत्कर्मकक्रियान्तरबोधस्य पदैरेव जननं "पश्य मृगो धावति" इत्यादौ युक्तम्। "घटमानय" इत्यादावनियमस्तु न युक्तः। लाघवेन महावाक्यार्थबोधस्यैकस्य पदजन्यत्वस्वीकारात्। भट्टमते महावाक्यार्थबोधस्य नियमेन विशिष्टवैशिष्ट्यावगाहित्ववत् गुरुमते "विशेष्ये विशेषणं, तत्रापि विशेषणान्तरम्" इति बोधस्यैव सर्वत्र संभवात्। अशाब्दस्य विशेषणतावच्छेदकप्रकारकज्ञानस्य सत्त्वे तु विशिष्टवैशिष्ट्यावगाहिशाब्दबोधस्यापि क्वचित् संभवात्। तस्मादन्विताभिधानमते अवान्तरवाक्यार्थबोधाभावेन न स्मृतिसमो बोधः "तत्त्वमसि" इति वाक्यात्, किं तु अभिहितान्वयमते, इत्याशयेन "अभिहितघटना" इत्याद्युक्तिः संक्षेपशारीरके युक्तैव।

---

[१] प्र.पं.पृ.३८४.

अन्विताभिधानमतेऽपि क्रियाकारकसंबन्धबोधं प्रति पदस्योक्तरीत्या कारणत्वेन शक्तत्वात्, पदशक्तेः उक्तसंबन्धशाब्दधीप्रयोजकत्वात् उक्तसंबन्धस्य शक्तिरूपपदवृत्तिप्रयुक्तशाब्दधीविषयत्वरूपं पदवृत्तिज्ञाप्यत्वमस्त्येव। तथापि न पदवृत्तिप्रयुक्तस्मृतिविषयत्वरूपं पदवृत्तिस्मारितत्वम्।

ननु तादृशशक्तेः तादृशसंबन्धीयसंबन्धरूपायाः पदे पूर्वं ग्रहणे सति, पदरूपैकसंबन्धिज्ञानात् उक्तसंबन्धरूपापरसंबन्धिस्मृतिरपि कदाचित् जायत एवेति पदवृत्तिप्रयुक्तस्मृतिविषयत्वरूपं पदवृत्तिस्मारितत्वमुक्तसंबन्धेऽप्यस्त्येवेति स्मारितपददानेऽप्युक्तसंबन्धप्रमापकवाक्ये अखण्डार्थवाक्यलक्षणस्य अतिव्याप्तिः तदवस्थेति चेत् — न। स्मारितान्तेन स्वजन्यस्मृतिद्वारा यद्विषयकशाब्दबोधे पदवृत्तिः प्रयोजिका, तत्त्वस्य विवक्षितत्वात्।

तत्र यत्पदेन योऽर्थो ग्राह्यः तद्विषयकस्मृतिः स्मृतिपदेन ग्राह्या। तथा चोक्तसंबन्धशाब्दबोधे पदवृत्तेः प्रयोजकत्वं नोक्तद्वारा। तादृशस्मृतिं विनापि तस्य शाब्दबोधोत्पत्तेः।

जातिशक्तिज्ञानस्य जातिस्मृतिद्वारा व्यक्तिस्मृतिप्रयोजकत्वात्, तद्द्वारा च व्यक्तिशाब्दधीप्रयोजकत्वात् जातिशक्तेरप्युक्तप्रयोजकत्वमस्त्येव। तस्मादुक्तसंबन्धस्योक्तरीत्या पदवृत्तिस्मारितत्वेऽपि न क्षतिः।

आद्यपक्षे कुब्जशक्तिः, द्वितीयपक्षे लक्षणेति निरूपणम्

"तथाप्यन्विताभिधानवादिमते शक्त्या, अभिहितान्वयवादिमते च लक्षणया वाक्यार्थभूतसंसर्गस्य वृत्तिज्ञाप्यत्वात् सर्वत्र प्रमाणवाक्येऽतिव्याप्तिः स्यात्, तद्वारणाय —स्मारितेति। आद्यपक्षे कुब्जशक्त्यङ्गीकारात् द्वितीयपक्षे चाज्ञाताया एव पदार्थनिष्ठायाः लक्षणायाः वृत्तित्वाङ्गीकारात् न संसर्गस्य पदस्मारितत्वम्, किं तु अनुभाव्यत्वमित्यतिव्याप्तिपरिहारः"

इति सिद्धिग्रन्थः। आद्यपक्षे = अन्विताभिधानपक्षे, अन्वयांशे पदेषु कुब्जशक्तिरङ्गीक्रियते। सा चाज्ञातैव संसर्गानुभवं जनयति। तस्मात् पदवृत्तिज्ञानजन्यस्मृतिविषयत्वरूपं पदवृत्तिस्मारितत्वं संसर्गे नास्तीति भावः। द्वितीयपक्षे = अभिहितान्वयपक्षे, पदार्थनिष्ठायाः लक्षणायाः संसर्गानुभवहेतुत्वस्वीकारात्, संसर्गस्य न पदवृत्तिविषयकज्ञानजन्यस्मृतिविषयत्वम्। तथा च सखण्डार्थवाक्ये पदवृत्तिस्मारितातिरिक्तसंसर्गगोचरज्ञानजनकतया तदतिरिक्तागोचरज्ञानजनकत्वं नास्तीति न तत्राखण्डार्थलक्षणस्यातिव्याप्तिरिति भावः।

अत्र ब्रह्मानन्दीयं — कुब्जशक्त्यङ्गीकारादिति। यद्यपि संसर्गानुभवं प्रत्यपि पदस्य जनकत्वेन संसर्गांशेऽपि शक्तिरस्त्येव। तज्जनकस्यैव तच्छक्तत्वात्। तथापि संसर्गशक्तत्वेन प्रकृतिप्रत्ययपदज्ञानं न कारणम्। किं तु घटत्वकर्मत्वादिशक्तत्वेन तज्ज्ञानं कारणमिति अन्विताभिधानवादस्य निष्कर्षः। उक्तं हि शब्दमण्यादौ[१] —

"ननु पदानामन्वयज्ञानजनकत्वात् तत्र शक्तिरस्त्येव; (तज्जनकस्यैव तच्छक्तत्वात्), अशक्तस्याजनकत्वात् इति चेत् — सत्यम्। किं तु अन्वयबोधे स्वरूपसती सा व्याप्रियते, न तु ज्ञाता। घटज्ञानशक्तत्वेन ज्ञानादेव घटान्वयबोधोपपत्तेः। यथा जातिशक्तस्य पदस्य तव व्यक्तिज्ञाने शक्तिः स्वरूपसती उपयुज्यते, न तु ज्ञाता"

इति। मणौ "तव" इति प्राभाकरं प्रति मणिकारस्यान्विताभिधानमतपरिच्छिन्दिनः उक्तिः। कार्यान्वितशक्तौ हि खण्डितायामन्विताभिधानं प्राभाकरेण पूर्वग्रन्थे अवलम्बितम्। तत्रोक्तमतनिष्कर्षाभिधानेन प्राभाकरो निरस्तः।

अन्विताभिधानं च "नन्वर्थापत्तिरस्ति, यत् पदार्थव्यतिरिक्तमर्थमवगच्छामः। न च शक्तिमन्तरेण तत् अवकल्पते" इत्यनेन शाबरभाष्ये तद्भूताधिकरणे[२] आशङ्क्य,

"तन्न, अर्थस्य तन्निमित्तत्वात्। भवेदर्थापत्तिः, यद्यसत्यामपि शक्तौ नान्यन्निमित्तमवकल्प्येत। अवगम्यते तु निमित्तम्। किम्? पदार्थाः। पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथेदानीं पदार्था अवगताः सन्तः वाक्यार्थमवगमयन्ति" इत्यादिना "तस्मात् पदार्थप्रत्ययत एव वाक्यार्थो, नास्य पदसमुदायेन संबन्धः" इत्यन्तेन दूषितम्। तथा चोक्तनिष्कृष्टमतेन अखण्डार्थलक्षणकरणान्न दोषः। सिद्धौ — अज्ञाताया इति। शक्यसंबन्धरूपायाः लक्षणायाः संसर्गे सत्त्वेऽपि तज्ज्ञानं नापेक्षितमिति भावः। किं त्वनुभाव्यत्वमिति। आकाङ्क्षादिज्ञानस्यैव संसर्गानुभावकत्वम्, आकाङ्क्षादिघटकपदवृत्तिस्मारितो वस्तुगत्या योऽर्थस्तात्पर्यविषयः, तत्संसर्गानुभवत्वस्यैव तत्कार्यतावच्छेदकत्वात्, "घटमानय" इत्यादौ घटादिलक्षणायुक्तस्यापि कपालादेः न अनुभवप्रसङ्ग इति भावः।

लक्षणायाः ज्ञातायाः एव शाब्दधीहेतुत्वम्

वस्तुतस्तु — तात्पर्यज्ञान इव लक्षणाज्ञानेऽपि "घटम्" इत्यादिपदार्थत्वेनैव पदार्थभानसंभवात् घटकर्मताप्रतियोगिकानयननिष्ठसंबन्धविशेषत्वेन संबन्धस्य

---

[१] त.चिं.म, च.भा.द्वि.प.पृ.५३७.

[२] शा.भा.१.१.७.२५.

अभानेन क्षतिविरहात् लक्षणाया वाक्यार्थीभूतसंबन्धे ज्ञानमेव हेतुः। अज्ञाताया एव लक्षणायाः तच्छाब्दधीप्रयोजकत्वमिति ग्रन्थे अज्ञातपदमुक्तविशेषरूपेणाज्ञातार्थकम्। एवं च शाब्दबोधीयविषयतासामान्यस्य वृत्तिज्ञानविषयताप्रयोज्यत्वनियमो भग्नो न भवति। संभवति चोक्तनियमः, लक्ष्यार्थविषयकशाब्दधीसामान्यस्य लक्षणाधीजन्यत्वस्वीकारे, अभिहितान्वयमते आद्यपक्षे जातिविषयकशाब्दबोधस्य शक्तिज्ञानेनेव, व्यक्त्यादिविषयकशाब्दबोधस्य लक्षणाज्ञानेनैव जननात्। अन्यथा जातिशाब्दबोधेऽपि शक्तिज्ञानं प्रयोजकं न स्यात्। वाक्यार्थे इव जातावपि व्युत्पत्तिग्रहस्यानपेक्षायाः संभवात्। अज्ञातायाः लक्षणायाः इव, शक्तेरपि अज्ञातायाः प्रयोजकत्वसंभवात्।

पदार्थ इव वाक्यार्थेऽपि व्युत्पत्तिग्रहस्य हेतुत्वम्

पदार्थे व्युत्पत्तिग्रहस्यान्वयव्यतिरेकाभ्यां हेतुत्वं, वाक्यार्थे तु न तौ स्तः इति तु वासनामात्रम्।

अत एवान्विताभिधानवादिन आहुः —

"वाक्येनैव हि वाक्यार्थः साक्षादेवाभिधीयते।
उपलक्षणतश्चास्य संबन्धग्रहसंभवः॥
वाक्यं गोपदयुक्तं यत् तत् सास्नादिमदन्वितम्।
वाक्यार्थं वदतीत्येवं व्युत्पत्तिः सुकरैव हि॥"

इति। साक्षात् = वाक्यार्थस्मृतिम् अवान्तरवाक्यार्थशाब्दबोधं चाद्वारीकृत्य। उपलक्षणतः = सास्नादिमत्त्वादिरूपोलक्षणमन्तर्भाव्य। गोकर्मत्वान्वितानयनादिरूपस्य वाक्यार्थस्य शाब्दबोधात् पूर्वमज्ञानात् सास्नादिमत्कर्मत्वान्वितानयनस्य वाचकं "गामानय" इति वाक्यं, गोकर्मकस्य "आनय" इतिपदार्थस्य वाचकमुक्तवाक्यम् इत्येवंरीत्या शक्तिरूपव्युत्पत्तिग्रहे सास्नादिमत्त्वम्, "आनय" इतिपदार्थत्वादिकं वा उपलक्षणतया भासते, वाच्यकोटावप्रवेशात्। गोत्वादेरेव शाब्दबोधे भानेन तत्प्रवेशात्। तस्मात् वाक्यार्थेऽपि व्युत्पत्तिग्रहस्य अन्वयव्यतिरेकौ तान्त्रिकसंमतौ।

किं च तार्किकादीनामपि तौ संमतौ। तथा हि सद्व्युत्पन्नपुरुषीयशाब्दबोधे सद्व्युत्पत्तिधीः कारणम्। सा च "'घटम्' इति पदधीः घटवृत्तिकर्मताशाब्दधीकारणम्" इति धीरूपा। विपरीतव्युत्पन्नपुरुषीयशाब्दबोधे विपरीतव्युत्पत्तिधीः कारणम्। सा च, "'घटः कर्मत्वम्' इति वाक्यधीः तादृशशाब्दधीकारणम्" इति धीरूपा।

लक्षणाज्ञानं शाब्दधीहेतुः इति निगमनम्

तथा चानुभावकत्वस्यैव मीमांसकमते शब्दशक्तित्वात् " 'घटम्' इति पदं घटवृत्तिकर्मतावाचकम्" इति ग्रहे "घटवृत्तिकर्मता आनयतिपदार्थानयनानुयोगिकसंसर्गविशेषप्रतियोगिनी" इति ग्रहे च सति, "तादृशोक्तकर्मतावाचकं 'घटम्' इति पदम्" इत्याकारकं लक्षणाज्ञानं संभवतीति लक्षणाज्ञानस्य शाब्दबोधहेतुत्वं निर्दोषम्।

अभिहितान्वयमते प्रथमपक्षे घटपदाम्पदयोः प्रत्येकरूपेणैवानुभावकत्वेन "घटम्" इत्यस्यानुभावकत्वेऽपि तयोरेकवाक्यताज्ञानस्य न्यायरत्नादावनुभावकतास्वीकारेण "घटम्" इत्यस्य तत्रैकविशिष्टार्थबोधकत्वरूपैकवाक्यत्वांशे विशेष्यविधया अनुभावकत्वसत्त्वादिति।

एतावता प्रमाणभूतः शब्दः उपदेशरूपवाक्यात्मकः। वाक्यं च आकाङ्क्षादिमत्पदसमूहः। वाक्यार्थप्रमा फलम्। पदार्थानां संसर्गः, संसृष्टाः पदार्था वा वाक्यार्थः। वाक्यार्थबोधे पदानि, पदार्था वा निमित्तम्। आकाङ्क्षादिकं सहकारिकारणम्। वाक्यार्थबोधे अन्विताभिधानम् अभिहितान्वय इति प्रक्रियाद्वयं दार्शनिकैः आश्रीयते इति विविधग्रन्थसमालोचनपूर्वकं निरूपितम्।

इति अन्विताभिधानवाद-अभिहितान्वयवादौ

वाक्यार्थबोधे मुख्यविशेष्यविचारः

अथ शाब्दबोधे मुख्यविशेष्यः कः इति निरूप्यते।

अनेकपदार्थसंसर्गावगाहि ज्ञानं शाब्दबोध इति पूर्वं निरूपितम्। अप्रधानभूतानेकार्थविशिष्टः एकः प्रधानपदार्थः शाब्दबोधे भासत इति सर्वे वदन्ति। स एव च मुख्यविशेष्यः। इतरपदार्थाः साक्षात् परम्परया वा तद्विशेषणतया भासन्त इति तत्त्वम्। तत्र कः पदार्थः मुख्यविशेष्यतया भासत इति इदानीं विचार्यते। यद्यप्यानुषङ्गिकतया पूर्वमप्ययं विषयः अन्विताभिहितान्वयवादनिरूपणावसरे प्रस्तुतः, अथाप्यत्र ऐदंपर्येण सविस्तरं प्रस्तूयते।

न्यायमञ्जर्यां निरूपितः मुख्यविशेष्यविचारः[1]

न्याममञ्जर्यां जयन्तभट्टैः —

"एवं पदार्थे निर्णीते वाक्यार्थश्चिन्त्यतेऽधुना।
तत्र विप्रतिपत्तिश्च बहुरूपा विपश्चिताम्॥"

इत्युपक्रम्य —

केचिदाचक्षते — बाह्यस्य वाक्यार्थस्यासंभवात् पदार्थसंसर्गविषयकं ज्ञानमेव वाक्यार्थः इति।

अन्ये तु — वास्तवः पदार्थानां परस्परसंसर्गो वाक्यार्थ इत्याहुः।

अपरे तु — अन्यव्यवच्छेदो वाक्यार्थः, "शुक्लो गौः" इत्युक्ते सति गवि अशुक्लकृष्णादिव्यावृत्तेरवगमात् इत्याहुः।

अपरे संगिरन्ते — संसर्गस्यापह्नोतुमशक्यत्वात् तस्य च गुणप्रधानभावगर्भत्वात् गुणीभूतकारकसमूहनिष्पाद्या प्रधानभूता क्रिया वाक्यार्थः। न हि वाक्यघटकपदानि विशकलितस्वतन्त्रार्थबोधकानीति।

अन्ये मन्यन्ते — भाव्यनिष्ठः = धात्वर्थयागाद्याश्रितः, पुरुषव्यापारः कृधात्वर्थः अर्थभावनाशब्दवाच्यः वाक्यार्थः। लिङादिशब्दवाच्यस्तु शब्दव्यापाररूपशब्दभावनाख्यः पुरुषस्यार्थभावनानुष्ठाने प्रवर्तकः। सः 'विधिः' इत्युच्यत इति।

अन्ये ब्रुवते — अर्थभावना-शब्दभावनाद्वयाभिधाने लिङादेः प्रत्ययस्य भारगौरवात् विधिरेव वाक्यार्थः, स एव अनुष्ठेयः प्रवर्तकश्चेति।

---

[1] न्या.मं, आ.५. भा.२. पृ. ६९.

तत्रापि द्वयी विमतिः। कैश्चित् प्रेषणात्मकत्वं (प्रेषणव्यापारकत्वं) शब्द-स्याभ्युपगतम्। लिङादिशब्देभ्यः तथा तदवगमात्, कार्यान्तरानवगमात् भावार्थ-मात्रकार्यत्वपक्षस्य दुर्बलत्वात् विधिरेवानुष्ठेय इति अर्थात् तस्य कार्यत्वम्।

अन्यैस्तु — कार्यत्वेन नियोगप्रतीतेः अर्थात् नियोगस्य प्रेरकत्वमिति संश्रितम्। कार्यमवगतं सत् स्वसिद्धये पुरुषं नियुङ्क्ते इति नियोगः कार्यम्। "ममेदं कार्यम्" इत्यवगते हि तत्सिद्धये पुरुषः प्रवर्तते।

अपरे तु — उद्योगनामकमभिनवं वाक्यार्थं वर्णयांबभूवुः —

इत्यनेकशाखा विप्रतिपत्तिः।

ज्ञानस्यैव वाक्यार्थत्वमिति पक्षः

अत्राहुः बौद्धाः — वाक्यार्थो नाम पारमार्थिको बहिः नास्त्येव। स हि पदार्थेभ्यो व्यतिरिक्तो वा स्यात् ? अव्यतिरिक्तो वा ? नाद्यः, भेदानुपलम्भात्। न हि "गौः शुक्ल आनीयताम्" इत्यत्र पदसमूहे जातिगुणक्रियादिपदार्थातिरिक्ततया वाक्यार्थोऽवगम्यते। द्वितीये, पदार्थाः प्रत्येकं वा वाक्यार्थः स्यात्? सामस्त्येन वा? न प्रत्येकम्, तथानवगमात्। न हि "गौः" इति पदार्थ एव वाक्यार्थो भवति। सामस्त्यं च सत्तया? प्रतीत्या वा? सत्तया तु सामस्त्यं पदार्थराशेः नास्ति। प्रतीत्या सामस्त्यं तु न घटते। ज्ञानानामयुगपद्भावित्वेन एकपदार्थप्रतीतिसमये पदार्थान्तरप्रतीत्यसंभवात्।

अपि च पदार्थसमुदायः किं परस्परसंसृष्टः वाक्यार्थः? अन्यथा वा? न ताव-दन्यथा, "गौरश्वः पुरुषो हस्ती" इत्यादौ वाक्यार्थादर्शनात्। पदार्थानां संसर्गस्तु दुरुपपादः। स हि आकाङ्क्षानुसारेण भवति। न हि अर्थोऽर्थान्तरमाकाङ्क्षति, अर्थस्याचेतनत्वात्। बुद्धीनामपि क्षणिकत्वात् नान्योन्यमाकाङ्क्षा। अतः आकाङ्क्षाकृतः पदार्थानां संबन्धः न संभवति।

अत एव न संसर्गो वाक्यार्थः। उक्तरीत्या अर्थानां ज्ञानानां वा संसर्गस्या-संभवात्।

व्यवच्छेदस्य वाक्यार्थत्वमपि पूर्वोक्तनीत्या निराकार्यम्। व्यवच्छेदोऽपि हि न ज्ञानानाम्। क्षणिकत्वात्। यदि शुक्लबुद्धिजनिक्षणे गोबुद्धिस्तिष्ठेत् तदा सा अन्य-बुद्धिभ्यो व्यावर्त्येत संसृज्येत वा। संबन्धश्च बुद्धीनां न संभवति, कार्यकारण-भावसंयोगसमवायाद्यसंभवात्। एकार्थसमवायस्तु बुद्धीनां संभवन्नपि अतिप्रसङ्ग-मावहति।

अर्थानां तु संभवन्नपि कश्चित् संबन्धः शब्दैरनभिधीयमानत्वात् असत्कल्प एव। न च भेदसंसर्गयोर्वाचकं किंचित् पदमस्ति, अश्रवणात्। असति च तद्वाचके पदे, न भेदसंसर्गयोः पदार्थत्वम्। अपदार्थस्य च न वाक्यार्थत्वम्।

अपि च भेदसंसर्गयोर्वाचके पदे श्रुतेऽपि सुतरामसंगतिः। "गौः शुक्ल आनीयतां भेदः संसर्गः" इति पदसमूहादर्थानवगतेः।

तस्मात् बाह्यस्य वाक्यार्थस्य सर्वप्रकारैरसंभवात् पदार्थसंसर्गनिर्भासं ज्ञानमेव वाक्यार्थः। तेनैव लोकव्यवहारनिर्वाहः इति।

उक्तबौद्धमतनिरासः

तदिदमनुपपन्नम्। ज्ञानातिरिक्तस्य बाह्यार्थस्य पूर्वं साधितत्वात्।

यदुक्तं पदार्थव्यतिरिक्तो नास्ति वाक्यार्थ इति। तन्न। इदं तावत् पर्यालोचयतु भवान्। किं "गौः" इति पदात् यादृशी प्रतीतिः, तादृशमेव "गौः शुक्ल आनीयताम्" इति वाक्यात् प्रतीतिः? उत भिन्ने एते प्रतीती? इति। तत्र प्रतीत्योस्तुल्यत्वं तावत् अनुभवविरुद्धम्। प्रतीत्योस्तयोर्भिन्नत्वे तु विषयभेदोऽपि बलात् आयाति। असति विषयभेदे प्रतीतिभेदानुपपत्तेः। यश्च पदार्थातिरिक्तो विषयः स एव वाक्यार्थः। एवं केवलगुणक्रियापदोच्चारणेऽपि योजनीयम्। तदुक्तं[१] "यदत्राधिक्यं स वाक्यार्थः" इति। ततश्च पदार्थातिरिक्तस्य संसर्गस्य प्रतीत्या स एव वाक्यार्थः। पदात् असंसृष्टपदार्थप्रतीतिः इति विशेषः। तत्र को गुणः? कः प्रधान इति तु क्रमशः वक्ष्यते।

व्यवच्छेदस्य वाक्यार्थत्वनिरसनम्

यद्यपि अन्यव्यवच्छेदः बाह्यः, अथापि स न वाक्यार्थः। वाक्यार्थस्य विधिरूपेण (भावरूपेण) अवगमात्। संसर्गमन्तरेण चान्यव्यवच्छेदस्यापि दुरुपपादत्वात्। न हि शुक्लपदार्थेनासंसृष्टः गोपदार्थः कृष्णादिभ्यो व्यावृत्तः इति प्रतीयते।

गोशब्दात् सर्वगवीषु जायमाना बुद्धिः शुक्लपदसंनिधानात् कृष्णादेः व्यावर्तते इति चेत् — मैवम्। तत्संबन्धावगमपूर्वकत्वात् तदितरव्यावृत्तेः। तत्संबन्धावबोधेनैव वाक्यस्यार्थवत्त्वे सिद्धे पश्चाद्भवः कृष्णादिव्यवच्छेदावगमः न वाक्याधीनः, अपि तु आर्थिकः।

---

[१] म.भा.२.३.४६.

क्रियायाः वाक्यमुख्यार्थत्वपक्षः

क्रियैव वाक्यमुख्यप्रतिपाद्योऽर्थ इति केचित् मीमांसकाः। अयं तेषामाशयः — गुणप्रधानभावमन्तरेण पदार्थानां संसर्गो नावकल्पते। आख्यातरहितं च वाक्यं न प्रयोगयोग्यम्। अनुच्चरिते क्रियापदे आकाङ्क्षाया अनिवृत्तेः। श्रोतुः आकाङ्क्षा-निवृत्तये च वाक्यानां लोके प्रयोगः। लोकवच्च वेदादप्यर्थोऽवसीयते। आख्याताच्च पूर्वोत्तरभावमापन्नः साध्यरूपोऽर्थः अवगम्यते, न सिद्धरूपः। सिद्धसाध्यसमुच्चये कस्य किंपरतन्त्रतेति चिन्तायां साध्यसिद्धये सिद्धमुपात्तमिति प्रतीयते। साध्यं च साध्यमानत्वात् प्रधानम्। साध्या च क्रिया। तस्मात् सैव वाक्यस्य प्रधान-प्रतिपाद्यार्थः।

सर्वेषां क्रियापारतन्त्र्ये निदर्शनानि

क्रिया हि प्रतीयमाना स्वनिष्पत्तये साधनान्याक्षिपति। तैश्च योग्यैः सा संबध्यते। तानि च साधनानि कानिचित् पदान्तरोपात्तानि भवन्ति। कानिचित् वाक्यान्तरोपात्तानि। कानिचित् प्रकरणान्तरपाठलभ्यानि। कानिचिदारादुपकारकाणि। कानिचित् संनिपत्योपकारकाणि। कानिचित् अन्तिकोपनिपतितान्यपि योग्यताविर-हात् परिहरति, यथा पूषानुमन्त्रणादीनि। कानिचिदतिदूरवर्तीन्यपि योग्यानि स्व-निष्पत्त्यर्थमाहरति, यथा प्रकरणान्तरगतान्यपि पूषानुमन्त्रणादीनि पौष्णचरुकर्मणि इत्येवं दृष्टादृष्टोपकारकानेककारककलापनिष्पाद्यमानस्वरूपक्रियैव वाक्यार्थः।

कर्तुरपि क्रियाशेषत्वमेव

"स्वर्गकामः" इत्यादि अधिकारिसमर्पकपदमपि क्रियापेक्षितकर्तृसमर्पणेन तदु-पयोगि भवति 'अस्यां क्रियायामयं कर्ता, अनेनेयं क्रिया संपद्यते' इति। तत्र च क्रिया न स्वप्राधान्यं त्यजति। न हि क्रिया कर्त्रर्था, कर्ता तु क्रियार्थः। स हि तां निर्वर्तयति। शब्दोऽपि तथैवोपदिशति "एष इदं कुर्यात्" इति। क्रियाप्राधान्यं च "द्रव्यगुणसंस्कारेषु बादरिः" इति,[१] "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति[२] च सूत्राभ्यां जैमिनिना प्रदर्शितम्। द्रव्यादीनामेव क्रियां प्रति शेषत्वमनु-गम्यते, न क्रियाया अन्यशेषत्वमिति प्रथमसूत्रार्थः।

फलस्यैव प्राधान्यमिति जयन्तभट्टमतम्

अत्रोच्यते। कुत इदं क्रियायाः प्राधान्यमङ्गीक्रियते? वस्तुवृत्त्या वा? शाब्द-प्रत्ययमहिम्ना वा? नाद्यः, वस्तुतः फलस्यैव प्राधान्यावगमात्। न हि सचेताः

---

[१] जै.सू. ३.१.३.
[२] जै.सू. १.२.१.

निष्फलां क्रियामनुतिष्ठति। वेदाद्वा गुरुनियोगाद्वा राजाज्ञया वा क्रियां कुर्वन्तो जनाः न फलमनुद्दिश्य तां कुर्वन्ति। बालो माणवकोऽपि चपेटामात्रहानये मोदकादिप्राप्तये वा गुरुशासनमनुतिष्ठति।

अथोच्यते — न वस्तुतः प्राधान्यमिहाश्रीयते, अपि तु शब्दतः। शब्दप्रमाणका वयम्। तत्र यत् शब्द आह तदस्माकं प्रमाणम्। तद्यथा "राजपुरुषः" इति। वस्तुस्वरूपतः राजा जगतामीशितृत्वात् प्रधानम्। पुरुषः तदिच्छानुवर्तनेन जीवति। "राजपुरुषः" इति शब्दस्तु पुरुषप्राधान्यमाचष्टे, तत्पुरुषसमासस्य उत्तरपदार्थप्रधानत्वात्। एवमिहापि "यजेत" "दद्यात्" "जुहुयात्" इति क्रियां प्राधान्येनोपदिशति शब्दः। "स्वर्गकामः" इत्यपि क्रियां प्रति कर्तुरुपदेशः। वस्तुवृत्तेन तु कर्मणि क्रियमाणे कर्मस्वाभाव्यात् फलं भवति चेत् भवतु तत्। पुरुषोऽपि प्रीयतां नाम फलेन, न तु शब्दः फलोपदेशनिष्ठः। आह च "तस्मिंस्तु कृते स्वयमेव तद् भवति" इति[1]। 'स्वयमेव' इत्यस्य 'न शब्दः फलपारतन्त्र्यं क्रियायाः प्रतिपादयति' इत्यर्थः।

तदेतदयुक्तम्। एवं वर्ण्यमाने "स्वर्गकामः" इति पदस्यान्वयो दुरुपपादः। न च कर्तृवाचकपदमेतत्, कर्ता च क्रियार्थः, न कर्त्रर्था क्रियेत्युक्तमिति वाच्यम्। स्वर्गकामपदस्याधिकारिपरत्वेन कर्तृपरत्वाभावात्। न हि जात्यैव कश्चित् स्वर्गकामो नाम कुत्रचित् पुरुषोऽवगम्यते, योऽत्र कर्तृत्वेन नियुज्येत। 'स्वर्गे कामो यस्यासौ स्वर्गकामः' 'स्वर्गं कामयति' इति वा स्वर्गकामः। उभयत्रापि स्वर्गकामनाविशिष्टः पुरुषः तस्मात् पदादवगम्यते। तदत्र काम्यमानः स्वर्गः कथं यागक्रियया संबध्यते? दृष्टेनादृष्टेन वोपकारेण? यदि हि 'चन्दनं स्वर्गः' 'षोडशवर्षदेशीया अङ्गना स्वर्गः' इति चन्दनाङ्गनादिद्रव्यवाचकशब्दसामानाधिकरण्येन स्वर्गशब्दस्य प्रयोगात् द्रव्यवाचकः स्वर्गशब्दः, तदा "द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः" इति[2] सूत्रानुसारेण दध्यादिवत् साधनत्वेन स्वर्ग उपकरोति क्रियायाः। कामनापि द्रव्याहरणाङ्गत्वात् उपकारिणी, यतः कामनया द्रव्यमानेतुं यतत इति दृष्टोपकारकत्वम्।

तदेतदसारम्। स्वर्गशब्दस्य द्रव्यवाचकत्वाभावात्। प्रीतिवाची ह्येष स्वर्गशब्दः न द्रव्यवाची। तदेव चन्दनं शीतातुरेण अग्रीष्मोपहतेन वा "न स्वर्गः" इति व्यपदिश्यते। सैवाङ्गना विरतायां सुरततृषि "न स्वर्गः" इत्युच्यते। तदेवमेषः स्वर्गशब्दः प्रीतिं न व्यभिचरति, द्रव्यं तु व्यभिचरति। एवं स्वर्गस्याद्रव्यत्वात् न क्रियाङ्गत्वम्।

---

[1] शा.भा. ३.१.३.

[2] जै.सू. ६.१.१.

अथापि निरतिशयसुखप्रतीत्यन्यथानुपपत्त्या परिकल्पितः कनकगिरिशिखरादिर्देशः स्वर्गः, सुतरां तस्य न क्रियासाधनत्वमवकल्पते, दध्यादिर्यथोपादातुं शक्यते तथा उपादातुमशक्यत्वात्।

यदि चादृष्टद्वारा "समुद्रं मनसा ध्यायेत्" इतिवत् स्वर्गकामना क्रियायामुपकारिणीत्युच्यते, तदापि क्लिष्टकल्पनैव। निरतिशया प्रीतिर्हि स्वर्गः। प्रीतिश्च स्वयंप्रयोजनरूपा, नान्यार्था। प्रीत्यर्थं ह्यन्यत्, नान्यार्था प्रीतिः। तस्मान्न यागाय स्वर्गः। अपि तु स्वर्गाय यागः। इत्थं च क्रियासाधनानुपदेशात् न कर्तृसमर्पकत्वेन स्वर्गकामपदं समन्वेति।

स्वर्गकामादिपदानामन्वयक्रमः

कथं तर्हि अस्यान्वयः। अधिकारिवाचित्वेनेति ब्रूमः। कोऽयमधिकारी नाम? कर्मणः स्वामी। ननु कर्तैव कर्मणः स्वामी, नान्यः। मैवम्। स्वामी सन् कर्ता, न कर्ता सन् स्वामी।

ननु क्रियाकारकसंबन्धव्यतिरिक्तः कोऽन्यः कर्मणः पुरुषस्य च संबन्धः। उच्यते। "ममेदं कर्तव्यम्" "अहमत्र स्वामी" इति स्वस्वामिभावमवगत्य पश्चात् क्रियाकारकसंबन्धोऽवगम्यते।

अधिकारिणः कर्तुश्च विशेषः

ननु त्वयापि क्रियाकारकसंबन्धो नापह्नूयते, यथा जातिवादिना व्यक्तिप्रतीतिर्नापह्नूयते तद्वत्। स तु क्रियाकारकसंबन्धः पाश्चात्य इत्यत्र किं प्रमाणम्? अत्रोच्यते। अनुपादेयस्वर्गरूपविशेषणविशिष्टस्य पुंसः निर्देशात्। कारकत्वानुगुणविशेषणविशिष्टस्य हि पुंसः कर्तृतया योग्यः संबन्धः। तादृशं च विशेषणं लोहितोष्णीषादिकम्। तस्मात् यत्र कारकत्वानुगुणविशेषणतया निर्देशो नास्ति तत्राधिकारित्वेन पुंसोऽन्वयः। अतोऽधिकृतस्य कर्तृत्वं, न कर्तुरधिकारः।

इत्थं च स्वर्गकामस्याधिकृतत्वं निर्वहति। "यदि हि तत्कर्म स्वर्गाय स्यात् स्वर्गो मे भोग्यो भवेत्, कथमहं स्वर्गं प्राप्नुयाम्" इत्येवं साध्यत्वेन स्वर्गमिच्छन् "स्वर्गकामः" इत्युच्यते। यदि च न स्वर्गसाधनं तत्कर्म, तद्विरुद्धमेवेदमापतति 'स्वर्गं कामयते यागं करोति' इति, 'अन्यदिच्छति, तदसाधनमन्यत् करोति' इति हि स्यात्। अतः कर्मणः काम्यमानफलसाधनतामजानन् तत्र नैवाधिक्रियते, न चानधिक्रियमाणः तत्र संबध्यते।

तदेवमधिकृतत्वेन स्वर्गकामस्य कर्मणि संबन्धात् स्वर्गयागयोश्च साध्यसाधनभावज्ञानमन्तरा तस्याधिकारनिर्वाहासंभवात् अवश्यं क्रियायाः साधनत्वं स्वर्गस्य च साध्यत्वमुपगन्तव्यम्। अतश्च क्रियायाः फलं प्रति गुणत्वात् न प्राधान्यम्। अप्राधान्याच्च न वाक्यार्थत्वम्। तदुक्तं जैमिनिना[१] — "कर्माण्यपि जैमिनिः फलार्थत्वात्" इति।

क्रियायाः अपि फलशेषत्वमेव

अपि च का चेयं क्रिया या वाक्यार्थ इत्युच्यते? किं धातुवाच्यः भावार्थः यागादिः? उत तदतिरिक्तः प्रत्ययार्थः कश्चित्? तत्र भावार्थस्य काम्यमानफलसाधनत्वात् अप्राधान्यमुक्तमेव। प्रत्ययार्थोऽपि भावार्थगता या काम्यमानफलसाधनता तदपरित्यागेनैव प्रतीयमानः वाक्यार्थतां प्राप्नोति न स्वातन्त्र्येण = स्वयं पुरुषार्थत्वेन। परेषां मीमांसकानामपि संमतमेतत्। तस्मान्न क्रियामात्रपर्यवसायी, अपि तु फलपर्यवसायी वाक्यार्थः।

फलस्यापि वाक्यार्थत्वासंभवः इति पूर्वपक्षः

क्रियायाः कुतः वाक्यार्थत्वं न संभवति? अप्राधान्यादिति चेत् — फलेऽपि तत् समानम्। फलमपि पुरुषार्थत्वात् अप्रधानम्। न हि "स्वर्गः स्वतन्त्र एव सत्तां लभताम्" इति मत्वा यतते पुरुषः। किं तु स्वोपभोगयोग्यतयैव सर्वमभिलषतीति। अतः फलस्यापि पुरुषशेषत्वात् न प्राधान्यम्। आह च भगवान् जैमिनिः[२] — "फलं च पुरुषार्थत्वात्" इति।

तर्हि पुरुष एव वाक्यार्थो भवतु। स हि अनन्यनिष्ठः स्वतन्त्रः। उच्यते। पुरुषोऽपि औदुम्बरीसंभारादिषु (संमार्जनादिषु) विनियुज्यत एव। "यजमानसंमितौदुम्बरी भवति" इति तस्यापि तदर्थत्वम्। उक्तं[३] च — "पुरुषश्च कर्मार्थत्वात्" इति।

यद्येवं संकटे पतिताः स्मः। क्रिया हि फलार्था। फलं च पुरुषश्च क्रियार्थ इति परिवर्तमाने चक्रे कस्य प्राधान्यं? कस्य वाक्यार्थत्वम्?

पुरुषस्यपि वाक्यार्थत्वासंभवः

पुरुषस्तावन्न वाक्यार्थः। आख्यातवाच्यत्वे एव तस्य विवदन्ते, का कथा वाक्यार्थत्वस्य?

---

[१] जै.सू. ३.१.४.

[२] जै.सू. ३.१.५.

[३] जै.सू. ३.१.६

ननु "लः कर्तरि" इति[१] स्मरणात् कथं नाख्यातवाच्यः कर्ता?। उच्यते। कोऽयं लकारो नाम? स हि "वर्तमाने लट्" इति[२] विधाय "कर्तरि शप्"[३] "युष्मदि....मध्यमः" "अस्मद्युत्तमः" "शेषे प्रथमः"[४] "तिप्तस्झि..."[५] "बहुषु बहुवचनम्"[६] "द्व्येकयोर्द्विवचनैकवचने" इति[७] विभज्य सूत्रान्तरैर्विवृतः। एभिः सर्वैर्मिलित्वैव लकारार्थो बोधनीयः। तान्येतानि कारकसंख्याविभक्तिविधायीनि सूत्राणि एकवाक्यतया व्याख्येयानि। एको हि "पचति" इत्यादिः शब्दः तैर्व्याक्रियते। तदेवमेष वाक्यार्थो भवति 'कर्तृबहुत्वे बहुवचनं झि' इत्यादि। सेयं कर्तृसंख्या आख्यातवाच्या भवति, न कर्ता इति कुतस्तस्य वाक्यार्थत्वम्?

भावनायाः वाक्यार्थत्वम्

फलमपि न वाक्यार्थः। तद्धि सिद्धमसिद्धं वेति विकल्पासहत्वात्। सिद्धस्य तावत् फलस्याभिधानमेव नास्ति, साध्यमानत्वेन (काम्यमानत्वेन) निर्देशात्। साध्यमानत्वपक्षे तु साक्षात् तत्सिद्ध्यनवगमात् तत्सिद्ध्यर्थः व्यापार एव वाक्यार्थः भवतु। अत एव हि भावना वाक्यार्थ इति मीमांसकाः प्रतिजानते। भाव्यनिष्ठः भावकव्यापारः भावना। भाव्यं हि स्वर्गादि फलम्, साध्यमानत्वात्। साध्यत्वं चास्य भवनक्रियाकर्तृत्वात्। भवनक्रियाकर्तृत्वं च उत्पत्तिधर्मकस्य वस्तुनः दृष्टम्। न नित्यं भूतस्य, नापि नित्यमभूतस्य। यथाह भट्टः[८] —

"नित्यं न भवनं यस्य यस्य वा नित्यभूतता।
न तस्य क्रियमाणत्वं खपुष्पाकाशयोरिव॥" इति।

स्वर्गादिश्च काम्यरूपोऽर्थः ख-तत्पुष्पाभ्यां विलक्षण इति भाव्यो भवति। तदुत्पादकः पुरुषव्यापारः भावना। सा ण्यन्तेन भवतिना उच्यते। प्रकृत्यर्थस्य भवनस्य कर्ता स्वर्गादिः ण्यन्तस्य तस्य कर्मतां भजते। कर्ता त्वस्य प्रयोजकः पुरुषः। णेश्चार्थः प्रयोजकव्यापारः। पुरुषो हि भवन्तं स्वर्गादिकं स्वव्यापारेण भावयति = संपादयति। स तत्संपादको व्यापारो भावनेत्युच्यते।

---

[१] पा.सू.३.४.६९.
[२] पा.सू.३.२.१२३.
[३] पा.सू.३.१.६८.
[४] पा.सू.१.४.१०५,१०७,१०८.
[५] पा.सू.३.४.७८.
[६] पा.सू.१.४.२१.
[७] पा.सू.१.४.२२.
[८] तं.वा. २.१.१, भा.२.पृ.२६४.

भावना न क्रियारूपा

ननु व्यापारः क्रियैव। क्रिया वाक्यार्थ इति पक्षश्च पूर्वं निरस्त इति चेत् — न क्रियामात्रं भावना। अपि तु परिदृश्यमानपूर्वापरभावापन्नयागादिस्वरूपातिरिक्तः पुरुषव्यापारः आख्यातार्थः भावना। "पचति" "गच्छति" इत्यतः यथा पाकादिः धात्वर्थः प्रतीयते, तथा सर्वानुगतः कर्तृव्यापारोऽपि। पाकगमनादिधात्वर्थोपजनापायेऽपि व्यापारप्रतीतेरनपायात्। यथा हि "औपगवः" "कापटवः" "औपमन्यवः" इत्यादिषु तद्धितान्तेषु उपगुप्रभृतीनामावापे उद्वापे च सत्यपि प्रत्ययार्थोऽनुवर्तते, तथा तिङन्तेषु धात्वर्थस्योद्धारे निक्षेपे च सत्यपि प्रत्ययार्थोऽनुवर्तमानो दृश्यते।

अपि च "पचति" इत्याख्यातपदस्य यदा अर्थो व्याख्यातुमिष्टो भवति, तदा "पाकं करोति" इति वाक्यं व्याख्यातारः प्रयुञ्जते "पचतीत्यस्य कोऽर्थः?" "पाकं करोति" इति। पाकशब्देन द्वितीयान्तेन साध्यं धात्वर्थं व्याचक्षते। कर्तृव्यापारात्मकं प्रत्ययार्थं "करोति" इति पदेन। तेन धात्वर्थादन्यः प्रत्ययार्थः सिध्यति। ननु कर्तृसंख्यातिरेकेण प्रत्ययात् धात्वर्थातिरिक्तं व्यापारं न बुध्यन्ते। बुध्यन्ते चेत् "करोति" इति शब्दादपि बुध्येरन्। "पाकं करोति" इति व्यवहारात् यदि करोतिना आख्यातार्थविवरणं क्रियेत, तर्हि "करोति" इति व्यवहारे व्यापारस्यैव कृधात्वर्थत्वात् ततोऽन्यः आख्यातार्थः क इति चेत् — उच्यते।

"पाकं करोति" इति व्यवहारे पाकः तदनुकूलव्यापारश्च विभागतः प्रतीयते, स एव "पचति" इति समुदायेनापि प्रतीयते। "करोति" इत्यत्र न प्रतीयतां भावना। न वयं सर्वेभ्यः शब्देभ्यो भावना प्रतीयत इति वदामः, अपि तु विशिष्टेभ्यः शब्देभ्यः। के पुनस्ते विशिष्टशब्दाः, ये भावनामभिदधति? उच्यते।

भावार्थाः कर्मशब्दा ये तेभ्यो गम्येत भावना।
यजेतेत्येवमादिभ्यः स एवार्थो विधीयते॥

भवन्ति केचित् भावार्थाः न कर्मशब्दाः, यथा — "भावः", "भवनं", "भूतिः" इति। भवन्ति केचित् कर्मशब्दाः न भावार्थाः, यथा — "श्येनः, "एकत्रिकः" इत्यादयः कर्मनामधेयभूताः। ये तु भावार्थाः सन्तः कर्मशब्दाः, "यजते", "ददाति", "जुहोति" इत्यादयः, तेभ्यो भावनाख्या क्रिया गम्यते। तैरेव लिङादिविभक्त्यन्तैः सोऽर्थो विधीयते "यजेत", "दद्यात्", "जुहुयात्" इति। तदुक्तं[१] — "यज्याद्यर्थश्चातोऽवगम्यते भावयेदिति च" इति। करोतिशब्दादपि

---

[१] शा.भा. २.१.१.

केवलात् कर्तृव्यापारोऽवगम्यत एव, यत्र यागादिकर्मणाननुरक्तेन प्रयोगयोग्यतां प्रतिपद्यते। ततश्च विशिष्टेभ्य एव यजत्यादिशब्देभ्यः भावनाख्योऽनुष्ठेयः पुरुष-व्यापारः प्रतीयते।

आख्यातार्थवस्तुस्वरूपे पक्षभेदाः

आख्यातार्थः व्यापारः ज्ञातुः आन्तरः क्रियाविशेष एव स्पन्दात् विलक्षणः इति केचित्। पुरुषस्य प्रयत्नः भावना, येन पुरुषः औदासीन्यदशां न प्राप्नोति। स च प्रयत्नः यागहोमादिक्रियानिष्पत्तिकारणम्। तस्य धात्वर्थातिरिक्तत्वं प्रायः सर्वे-ऽनुमन्यन्ते। स च यत्नः साध्यरूपाभिसंबन्धात् विधिविषयो भवतीत्यपरे। याग-दानाद्यनुस्यूतं धात्वर्थसामान्यं भावना, गोत्वादिजातिवत् इत्यन्ये।

धात्वर्थानुगतं व्यापारसामान्यं भावना

यथा हि शाबलेयादिष्वनुगतं गोरूपमवभासते, व्यावृत्तं च शाबलेयादिरूपम्, एवमिहापि यागादिकर्मणामनुगतं व्यापाररूपं प्रतिभासते, परस्परविभक्तं च यागादिरूपम्। यत्तत् अनुगतव्यापाररूपं सा भावना। यथा शाबलेयाद्यननुरक्तं पृथक्त्वेन गोत्वं दर्शयितुमशक्यम्, तदुपरक्तत्वेन तस्य सर्वदावगमात्। तथा "किं करोति" इत्यनवगतविशेषव्यापारसामान्यप्रश्ने सति "पठति" "पचति" इति तद्विशेषोत्तरवचनं व्यापारसामान्यसत्त्वे प्रमाणम्। तच्च सामान्यरूपं न गोत्वादिवत् क्रियात्ववद्वा सिद्धतया भासते, येन विधेरविषयः स्यात्। तथा च सकलधात्वर्थ-साधारणं साध्यमानावस्थं व्यापारसामान्यं भावनेत्युच्यते। अस्मिंश्च पक्षे धातु-वाच्यत्वमपि भावनायाः वक्तुं शक्यते।

सर्वथा धातोर्वा प्रत्ययाद्वा भावना अवगम्यत इति सिद्धम्।

भावनायाः अंशत्रयम्

सा च भावना धातोः प्रत्ययाद्वा अवगता सती "किं" "केन" "कथम्" इत्यंशत्रयमपेक्षते। "भावयेत्" इत्यवगते नूनमपेक्षात्रयं भवति "किं भावयेत्" "केन भावयेत्" "कथं भावयेत्" इति। तत्र "किम्" इति साध्याकाङ्क्षायां स्वर्गकामपदेन सा अपेक्षा पूर्यते — "किं भावयेत्?" "स्वर्गम्" इति। ननु "स्वर्गकामः" इति पुरुषनिर्देशोऽयं न फलनिर्देशः। सत्यम्। स्वर्गपरस्त्वयं निर्देशः। स्वर्गशब्दो हि निरतिशयप्रीतिवाचकः। प्रीतिश्चानन्यार्था। साध्यत्वेन च स्वर्गः काम्यत इति स एव साध्यत्वेनान्वेतुं योग्यः।

करणाकाङ्क्षाविवरणम्

एवं "स्वर्गं भावयेत्" इत्यवगते "केन भावयेत्" इत्यपेक्षायां "यागेन" इति संबध्यते। ननु "यागेन" इति न श्रूयते, किं तु "यजेत" इति। तच्च आख्यातपदं प्रकृतिप्रत्ययसमुदायरूपम्। तत्र प्रत्ययस्य भावना वाच्येत्युक्तम्। "यज्" इति धातुरवशिष्टः। करणत्ववाचकपदं तु नास्ति। कथं "यागेन" इत्यर्थः लभ्यत इति चेत् — करणाकाङ्क्षापरिपूरणयोग्यतावशात् यागः करणत्वसंबन्धेन भावनाया-मन्वेतीति लाभात्। धातोरप्रातिपदिकत्वात् ततः तृतीया मा भूत्। भावना-वाचिशब्दसामर्थ्येन यागस्य करणता लभ्यते।

स्वर्गकामपदसार्थक्याय काम्यमानत्वेन प्रीत्यात्मकत्वेन च अनन्यार्थस्य स्वर्गस्य साध्यत्वेनान्वययोग्यत्वात् तदन्वयेन शान्तसाध्याकाङ्क्षायां भावनायां यागस्य साध्यत्वेनान्वयायोगात् योग्यतावशात् करणत्वेनान्वयः।

इतिकर्तव्यताकाङ्क्षाविवरणम्

एवं "यागेन स्वर्गं भावयेत्" इत्यवगते "कथम्" इत्यपेक्षायां, या इतिकर्तव्यता तद्वाक्यपठिता वाक्यान्तरनिवेदिता वा, सा संबध्यते। तद्वाक्योपात्ताया उदाहरणम् — "एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत" इति।

वाक्यान्तरोपात्ताया उदाहरणं — "व्रीहीनवहन्ति" "तण्डुलान् पिनष्टि" "समिधो यजति" "बर्हिर्यजति" "तनूनपातं यजति" इति।

इतिकर्तव्यता दृष्टोपकारद्वारेण अदृष्टोपकारद्वारेण वा भावनायां संबध्नाति। आद्या संनिपत्योपकारिणी द्वितीया आरादुपकारिणीत्युच्यते। पेषणादिकमाद्यायाः, समिदादिकं द्वितीयायाश्च उदाहरणमिति विवेकः।

तथा च "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति वाक्यस्य अयमर्थः संपन्नः 'दर्शपूर्णमासेन यागेन स्वर्गं भावयेत्, अनया अग्न्याधानादिकया इतिकर्तव्यतया' इति।

विधिप्रत्ययस्य न आवश्यकता इति शङ्का

किमर्थं पुनर्विधिराश्रीयते। वर्तमानापदेशिष्वप्याख्यातेषु भावना प्रतीयत इति भवता प्रदर्शितम्। अतः किं विधिना? तस्य हि आश्रयणं स्वर्गयागयोः साध्य-साधनभावबोधनाय, प्रवृत्तिनिवृत्तिसिद्धये वा? साध्यसाधनसंबन्धबोधः आकाङ्क्षा-संनिधियोग्यतापर्यालोचनया लडाख्यातादपि भावनावगमे सति भवत्येव अन्तरे-णापि विधिम्। प्रवृत्तिरपि पुरुषेच्छानिबन्धना। स्वर्गस्य साध्यत्वे यागस्य

साधनत्वेऽवधारिते यः स्वर्गमिच्छेत् स तत्सिद्धये प्रवर्ततैव। यस्तु नेच्छेत् तस्य विधिरपि किं कुर्यात्? न हि अप्रवर्तमानस्य पुंसः विधिः गले पाशं निदधाति, रज्ज्वा वा बाहू बध्नाति। निषेधस्थलेऽपि सुरापानब्राह्मणहननादेः प्रत्यवाय-साधनत्वावधारणात् तत्परिजिहीर्षया निवृत्तिर्भवति, न विधितः। यस्तु प्रत्यवायान्न बिभेति स विधौ श्रुतेऽपि न निवर्तत एव। तस्मात् प्रवृत्तिनिवृत्त्योर्न कारणं विधिरिति तदर्थमपि तदाश्रयणमयुक्तम्।

विधिस्वरूपविमर्शः

अपि च कश्चायं विधिर्नामेत्येतदपि न विद्मः। ननु चाहुः —

"विधेर्लक्षणमेतावदप्रवृत्तप्रवर्तनम्।
[१]अतिप्रसङ्गदोषेण नाज्ञातज्ञापनं विधिः॥"

बाढं श्रुतोऽयं श्लोकः। कोऽसावप्रवृत्तप्रवर्तक इति न जानीमः। प्रवर्तकस्वरूपे हि संशेरते प्रवादुकाः इति।

किं लिङादिः शब्द एव प्रवर्तकः? तद्व्यापारो वा? तदर्थो वा नियोगः? फलं वा स्वर्गादिः? श्रेयस्साधनत्वं वा? रागादिर्वा? प्रवर्तकस्वरूपानवधारणात् विधेर-प्यनवधारणम् इति।

समाधानम्

यत्तावदुक्तं किं विध्याश्रयणेनेति? तत्रोच्यते। योऽयं यागस्य साधनत्वेन स्वर्गस्य च फलत्वेनान्वयः उक्तः स विधिमहिम्नैव लभ्यते। "स्वर्गकामो यजेत" इति विधिवचनमन्तरेण हि समानपदोपात्तधात्वर्थमतिक्रम्य पुरुषोपसर्जनस्य स्वर्गस्य साध्यत्वं कथं लभ्येत?

कथं पुनः विधिरप्यमुं साध्यसाधनभावं बोधयति? इत्थम्। विधिर्हि चेतन-प्रवर्तकस्वभावः। न चापुरुषार्थरूपे व्यापारे पुरुषः प्रवर्तते। अतो विधिः पुरुषार्थ-स्वभावं स्वर्गं साध्यतया व्यवस्थापयति, यागं चास्य साधनतयेति। एवं हि अवबोधयतोऽस्य प्रवर्तकत्वं निर्वहति।

यत्तु, स्वर्गादौ फले दर्शितेऽपि न प्रवर्तते चेत् किं विधिः कुर्यात् इति। तदयुक्तम्। न हि वाय्वादिवत् पुरुषस्य प्रवर्तको विधिः। वाय्वादिः खलु चेतन-मचेतनं च प्रवर्तयति। विधिस्तु चेतनस्यैव प्रवर्तकः। चेतनस्य प्रवर्तनं नाम "प्रवर्तितोऽहम्" इति ज्ञानजननम्। न च फलमदर्शयता विधिना चेतनस्येदृशं ज्ञानं

---

[१] ज्ञातेऽप्यर्थे राजाज्ञादिना प्रवृत्तिदर्शनात् अतिप्रसङ्गः इत्यर्थः।

जनयितुं शक्यम्। फले तु दर्शिते सति तदस्य ज्ञानं जनितमेव। अनेन जनितं चेत् ज्ञानं प्रमाणवृत्तेन विधिना प्रवर्तित एवासौ पुरुषः। आलस्यादिना वा अनर्थित्वेन वा बहिःप्रवृत्तिपर्यन्ततया चेन्न प्रवर्तेत, मा प्रवर्तिष्ट। विधिना तु स्वकर्तव्यं कृतम्, "प्रवर्तितोऽहम्" इति ज्ञानजननात्। अन्यो हि प्रवर्तनावगमः, अन्यश्च बाह्यो (शारीरको) व्यापारः।

"यजेत" इत्यनेन प्रेरणा प्रतीयते। सा च विधेः साध्यसाधनसंबन्धानवबोधकत्वे न निर्वहति। अतः विधिकृतस्तदवबोध इत्युच्यते।

निषेधे च "न हन्यात्" इति निषेध्यमानस्य भावार्थस्य अनर्थतामनवबोधयन् विधिः न रागतः प्रवर्तमानं पुमांसं निरोद्धुं शक्नोतीति विधेयवत् निषेध्येऽपि तस्यैव व्यापारः।

यत्तु किमर्थं विधिराश्रित इति। प्रतिपत्तारो हि वयं वेदस्य, न कर्तारः। तत्र च सविधिकानि "यजेत स्वर्गकामः" इत्यादीनि श्रूयन्ते। तेषां विचार्यमाणोऽर्थ ईदृगवतिष्ठते स्वर्गः साध्यः, यागः साधनमिति। स चायं विधिसामर्थ्यलभ्य इति युक्तं विधेराश्रयणम्।

प्रवर्तकस्वरूपम्

यत्तु प्रवर्तकस्वरूपानिश्चयात् विधेरनिश्चय इति, तत्रोच्यते। फलं तावन्न प्रवर्तकम्, सिद्ध्यसिद्धिविकल्पानुपपत्तेः। सिद्धं फलं न प्रवर्तकम्, सिद्धत्वादेव। न हि यत् यस्यास्ति स तदर्थं यतते। नाप्यसिद्धस्य खरविषाणप्रख्यस्य फलस्य प्रवर्तकत्वं युक्तम्। अदृष्टत्वात्।

अथ कामनाविषयीकृतं फलं प्रवर्तकमिष्यते — तर्हि कामनैव प्रवर्तिका भवति, न फलम्। तस्माद्रागादिः प्रवर्तक इत्याहुः।

श्रेयस्साधनत्वस्य प्रवर्तकत्वम्

एतदपि न पेशलम्। समुपजातप्रवृद्धरागस्यापि इष्टसाधनताज्ञानमन्तरेण प्रवृत्त्यसंभवात्। तस्माद्वरं श्रेयस्साधनत्वं प्रवर्तकम्। लोकेऽपि चैवमेव व्यवहारो दृश्यते। हरीतक्यादीनामारोग्यसाधनतां वैद्याचार्यचोदनातोऽवगम्य तदुपयोगादौ आतुरजनः प्रवर्तते। तृप्तिसाधनतामोदनस्य मन्यमानः तद्भक्षणाय बुभुक्षितः प्रवर्तते। अतः श्रेयस्साधनत्वमेव प्रवर्तकम्।

तत्खण्डनम्, विधिप्रत्ययस्य प्रवर्तकत्वं च

श्रेयस्साधनत्वं हि अनवगतमवगतं वा प्रवर्तकं भवेत्? नाद्यः, श्रेयस्साधनतामजानतः प्रवृत्तेरदर्शनात्। यो हरीतक्यादीनामारोग्यसाधनतां कुतश्चिन्ना-

वगतवान्, नासावारोग्यकामोऽपि तामुपयुङ्क्ते। तस्मात् श्रेयस्साधनत्वबोधः प्रवर्तकः। स च बोधः दृष्टे भोजनादावन्वयव्यतिरेकाभ्यामपि संभवति। अदृष्टे तु विषये श्रेयस्साधनत्वावगमः शब्दैकनिबन्धन इति तदवगमोपायः शब्द एव प्रवर्तकः। स च शब्दः न स्वरूपमात्रेण प्रवर्तकः, वाय्वादितुल्यत्वप्रसङ्गात्। यदि हि पवन इव, पिशाच इव, कुनृप इव शब्दः प्रवर्तको भवेत्, अनवगत-शब्दार्थसंबन्धोऽपि शब्दश्रवणमात्रेण प्रवर्तेत। न च प्रवर्तते। तस्मादर्थप्रतीति-मुपजनयन्नेव शब्दः प्रवर्तक इत्यङ्गीकरणीयम्।

लिङादेः शब्दस्य प्रवर्तकत्वप्रकारः

वर्तमानार्थकलडन्तधातुघटितवाक्यात् प्रवृत्तेरजायमानतया लिङादिघटित-वाक्यात् प्रवृत्तेर्जायमानतया च लिङादिरेव शब्दः प्रवर्तकाभिधानद्वारा प्रवर्तको भवितुमर्हति। शब्दस्य ज्ञापकत्वात् चक्षुरादिकारकवैलक्षण्ये सत्यपि प्रतीतिजन्मनि करणत्वमपरिहार्यम्। करणं च कारकं च, न निर्व्यापारं स्वकार्यनिष्पत्तिक्षममिति व्यापारस्तस्य अवश्यंभावी। लिङादेश्च शब्दस्य न प्रतीतिजन्ममात्रे व्यापारः, किं तु पुरुषप्रवृत्तावपि। लिङा अर्थावगमे सति प्रवृत्तिः दृश्यत इति तत्रापि लिङ्व्यापारः प्रभवति। स चायं लिङादिव्यापारः शब्दभावनानामकः विधिः इत्युच्यते। स एव प्रवर्तकः।

भावनाद्वैविध्यम्

इह हि लिङादियुक्तेषु वाक्येषु द्वे भावने प्रतीयेते शब्दभावना अर्थभावना चेति। तत्र अर्थभावना तावत् धात्वर्थातिरिक्तः तत्प्रयोजकव्यापारः इति पूर्वमेवोक्तम्। यो भवनक्रियाकर्तृविषयः प्रयोजकव्यापारः पुरुषस्थः, यत्र भवनक्रियायाः कर्ता स्वर्गादिः कर्मतामापद्यते, सोऽर्थभावनाशब्देनोच्यते। यस्तु शब्दगतः प्रयोजकव्यापारः, यत्र पुरुषप्रवृत्तिः साध्यतां प्रतिपद्यते, सा शब्दभावना। तदुक्तम्[१] —

"अभिधां भावनामाहुरन्यामेव लिङादयः" इति।

अभिधा = शब्दव्यापारः।

शब्दभावनायाः अंशत्रयम्

शब्दभावनापि भावनात्मकत्वात् अर्थभावनावत् अंशत्रयमपेक्षते। तत्र पुरुष-प्रवृत्तिः भाव्यत्वेन संबध्यते। लिङादिपदज्ञानं करणत्वेनान्वेति। अर्थवादजनित-प्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वेति।

---

[१] तं.वा.२.१.१, भा.२. पृ. २६५.

विधेः (शब्दभावनायाः) वाक्यार्थेऽन्वयः

ननु लिङ्बोध्यविधेः आख्यातबोध्यभावनायाश्च विशकलिततयैवोपस्थितत्वेन प्रकृत्यर्थत्वप्रत्ययार्थत्वभेदाभावात् आकाङ्क्षाविरहात् कथं तयोरन्वयः इति चेत् — उच्यते। एकप्रत्ययोपादानलक्षणप्रत्यासत्त्या तयोरन्वयावगमात्। एकेनैव प्रत्ययेन लिङ्त्वेन विधेः, आख्यातत्वेन भावनायाश्चाभिधानात्। आहुश्च[१] —

"विधिभावनयोस्त्वेकप्रत्ययग्राह्यताकृतः।
धात्वर्थात् प्रथमं तावत् संबन्धो व्यवसीयते॥" इति।

विधिः भावनायां पुरुषं नियुङ्क्ते। यथाह[२] —

"स्वव्यापारे हि पुरुषः कर्तृत्वेन नियुज्यते।" इति।

विधेः प्रेरकत्वप्रकारः, अन्वयप्रकारश्च

ननु च त्वयैवोक्तं धात्वर्थात् पूर्वतरं भावनायाः विधेश्च संबन्धोऽवगम्यते। एकपदोपादानेऽपि धात्वर्थः प्रकृत्यंशाभिधेयः। विधिभावने तु द्वे अपि प्रत्यांशेनाभिधीयेते। अतश्च स्वच्छैव (धात्वर्थाननुरक्ता केवला) भावना विधिना स्पृश्यते। न विषयाद्यनुरक्ता। स्वच्छा च भावना न प्रयोगयोग्या भवति। या च फलकरणेतिकर्तव्यतांशपूरिता प्रयोगयोग्या, न तां विधिः स्पृष्टवान्। विधिना अस्पृष्टेषु च धात्वर्थकारकादिषु, किमिति सचेताः पुरुषः प्रवर्तेत?

उच्यते। यद्यपि विधिः धात्वर्थाननुरक्तां स्वच्छामेव भावनामेकाभिधानत्वात् प्रथममाक्रामति; तथापि तादृश्यां भावनायां सचेतःप्रवर्तनात्मकनिजस्वरूपनिर्वहणमलभमानः न तावत्येव विरमति। किं तु परिणीतबालकन्यको वर इव तावत् विलम्बमानः प्रसारितहस्त आस्ते, यावत् सर्वाङ्गसुन्दरी प्रयोगयोग्या भावना भवति। आह च वार्त्तिककारः[३] —

"यद्यप्यंशैरसंस्पृष्टां विधिः स्पृशति भावनाम्।
तथाप्यशक्तितो नासौ तन्मात्रे पर्यवस्यति॥
अनुष्ठेये हि विषये विधिः पुंसां प्रवर्तकः।
अंशत्रयेण चापूर्णां नानुतिष्ठति भावनाम्॥
तस्मात् प्रक्रान्तरूपोऽपि विधिस्तावत् प्रतीक्षते।
यावद्योग्यत्वमापन्ना भावनान्यानपेक्षिणी॥" इति।

---

[१] श्लो.वा.वाक्य. ७९.
[२] तं.वा. २.२.१, भा.२.पृ.२७०.
[३] श्लो.वा.वाक्य. २७४-२७६.

सा हि वाक्यान्तरोपात्तमप्यपेक्षते, प्रकरणान्तराधीतमपि वाञ्छति, प्रकृतिवद्भावलभ्यमपि याचते, अर्थसामर्थ्यगम्यं प्रमाणमपि स्पृहयति इत्येवंविध एष शब्दप्रमाणमहिमा।

तथा च विधिविषयः भावना वाक्यार्थः। सा च भावना एकयैव बुद्ध्या अनेकजातिगुणद्रव्यक्रियाद्यङ्गकलापकल्माषिततनुरवगम्यते। तादृशी एकैवेयं वाक्याद्वाक्यार्थबुद्धिः।

यथाह[१] —

"भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया॥
अनेकगुणजात्यादिकारकार्थानुरञ्जिता।
एकयैव च बुद्ध्यासौ गृह्यते चित्ररूपया॥
पदार्थाहितसंस्कारचित्रपिण्डप्रसूतया।" इति।

भावनायाः पूर्णं स्वरूपम्

एक एवायमतिदीर्घः क्रमेण विकस्वरः सकलाङ्गपरिपूरितभावनातत्त्वविषयकः प्रतिभासः। यथा हि स्थाल्यधिश्रयणात् प्रभृति ओदननिष्पत्तिपर्यन्तमेकैवेयं पाकक्रिया सलिलावसेकतण्डुलावपनदर्वीविघट्टनास्रावणाद्यनेकक्षणसमुदायस्वभावा, तथा प्रथमपदज्ञानात् प्रभृति निराकाङ्क्षवाक्यार्थपरिच्छेदपर्यन्तमेकैवेयं शाब्दी प्रमितिः।

आह च —

"पदात् प्रभृति या चैषा प्रज्ञा ज्ञातुर्विजृम्भते।
पुष्पिता सा पदार्थेषु वाक्यार्थेषु फलिष्यति॥" इति।

सोऽयं प्रधानीभूतः वाक्यार्थः भावनानामकः कर्तृव्यापारः। यस्तु व्यापारः प्रैषरूपः कार्यो वा लिङादेर्वाच्यः स विधिः इत्युच्यते।

शाब्दभावनायाः वाक्यार्थत्वविचारः

अन्ये त्वाहुः — योऽसौ शब्दभावनाख्यः शब्दव्यापारः शब्दस्य कार्योऽभिधेयश्च, तमभिदधतः कुर्वतो वा शब्दस्य व्यापारान्तरमस्ति न वा? यदि तावन्नास्ति, तदा एष व्यापारान्तरनिरपेक्षः स्वव्यापारमिव अर्थमपि वदतु। विश्राम्यतु व्यापारकल्पना। अस्ति चेत् अस्य तदभिधाने व्यापारान्तरम्, तदा अनवस्था स्यात्।

यश्चासौ व्यापारः क्रियते चाभिधीयते च, स किं पूर्वमभिधीयते पश्चात् क्रियते? अथ वा पूर्वं क्रियते पश्चात् अभिधीयते? अथ वा युगपत् करणमभिधानं च?

---

[१] श्लो.वा.वाक्य. ३३० cd, ३३१, ३३२ ab.

नाद्यः, अनुत्पन्नस्याभिधानानुपपत्तेः। न ह्यजाते पुत्रे नामकरणम्। शब्दस्यार्थासंस्पर्शित्वापत्तेश्च। न द्वितीयः, विरम्यव्यापाराननुभवात्। न तृतीयः, अनुत्पन्नत्वानपायात्, प्रयत्नगौरवप्रसङ्गाच्च।

अपि च विधेः शब्दभावनात्मकस्य भावनायाश्च वाक्यार्थे कथमन्वयः। न चैकप्रत्ययाभिधेयत्वं द्वयोः संबन्ध इति वाच्यम्। तस्यानुपयोगात्। पुरुषव्यापारात्मिकायाः अर्थभावनायाः प्रधानत्वेन वाक्यार्थत्वात् तदपेक्षितफलकरणेतिकर्तव्यतांशपूरणेन स्वर्गकामादिपदान्तराभिधेयोऽर्थः समन्वेति गुणत्वेन। शब्दव्यापारस्तु तदपेक्षितमन्यतममप्यंशं पूरयितुं नालमिति तत्र न गुणतामवलम्बते। न च द्वयोः प्रधानयोः संबन्धः उपलभ्यते। "घटः पटः" इत्यत्र वा "पचति पठति" इत्यत्र वा द्वयोः संबन्धाननुभवात्।

अथ अर्थभावना शब्दभावनाख्यविधेर्विषयसमर्पणेन गुणतामवलम्बते इति चेत् — तर्हि विधिर्वाक्यार्थः, न भावना, तस्या अप्राधान्यात्। अतो भावनाद्वयं प्रत्ययार्थ इति न हृदयंगममेतत्।

एकशब्दाभिधेयत्वं च न भावनयोः परस्परान्वये कारणम्, "अक्षाः" "पादाः" "माषाः" इत्यादावदर्शनात्।

भावनाद्वयसद्भावे प्रमाणाभावः

किं च कस्यानुरोधेन द्वे भावने प्रत्ययवाच्ये इष्येते? न च लिङादिश्रवणानन्तरं कार्ये प्रेरणायां च बुद्धेः उत्पत्त्या उभयोर्वाच्यत्वमिति शङ्क्यम्। तर्हि कार्यः प्रेरणारूपश्चैक एव लिङर्थो भवतु। तदेकत्वाच्च न परस्परान्वयप्रसक्तिः। न च प्रत्ययस्याप्यतिभार इति।

नियोगवाक्यार्थत्वविचारः

ननु कार्यरूपः प्रेरणारूपश्च कोऽसावेकः लिङर्थः? नियोगः (आज्ञा)। यस्मिन् सति "नियुक्तोऽहमत्र" इति प्रतिपद्यते पुरुषः, स नियोगः। स एव "विधिः" "प्रैषः" इत्युच्यते। विधौ हि लिङादिप्रत्ययं स्मरति पाणिनिः, न धात्वर्थे यागादौ, न कर्तृव्यापारे भावनायाम्। विधिश्च प्रेरणमेव। निमन्त्रणादयोऽपि प्रेरणायाः अवान्तरभेदाः।

णिजर्थ-लिङर्थयोर्वैलक्षण्यम्

ननु प्रयोजकव्यापारे णिच् विधीयते। प्रैषोऽपि प्रयोजकव्यापारः। प्रैषे च लोडादयो विधीयन्ते। तथा च यः "कुरु कुरु" इति यो ब्रूते स "कारयति"

इत्युच्यत इति चेत् — न। प्रतीतिभेदात्। अन्या हि "करोतु" "कुर्यात्" इति प्रतीतिः, अन्या च "करोति" "कारयति" इति प्रतीतिः। प्रयोजकव्यापारो णिजर्थः। ज्ञापकव्यापारस्तु लिङर्थः। प्रवृत्तक्रियाविषयश्च प्रयोजकव्यापारो णिजर्थः, इह तु तद्विपरीतः। अप्रवृत्तप्रवर्तनं हि विधिः। तत्र हि कार्यं जानतः प्रवर्तनम्, इह तु प्रवर्तितस्य कार्यदर्शनमिति महान् भेदः।

नियोगे व्युत्पत्तिप्रदर्शनम्

भवतु नियोगो नाम णिजर्थविलक्षणः। स तु प्रमाणान्तरावगम्यश्चेत् तदुपदर्श्यतामयमसावेवंरूप इति। प्रमाणान्तरानवगम्यश्चेत् कथं शब्दैकगोचरे तत्र संबन्धग्रहणम्? उच्यते।

सत्यं नियोगः शब्दगोचरः। तथापि व्युत्पत्तिस्तत्र सूपपादैव। यो हि "यजेत" "दद्यात्" "जुहुयात्" इति लिङादिभ्यो विधिः प्रतीयते कथमसौ लिङादीनामनवगम्य इतीष्येत। व्युत्पत्तिश्च व्यवहारात्। "गच्छ", "अधीष्व" इति शृण्वन् वृद्धः चेष्टमानो दृश्यते। चेष्टा च स्वात्मनि प्रवर्तनावगमपूर्विका दृष्टा। प्रत्यक्षदृष्टे चाम्रादौ सुखसाधनतया अन्वयव्यतिरेकाभ्यामवगते सति तदनुस्मरणात् प्रवर्तमानः प्रथमं कस्मिंश्चित् आत्माकूते जाते सति भौतिकं व्यापारमारभते। स चात्मधर्मः आत्मेव स्वसंवेद्यः। अहंप्रत्ययवेद्यो ह्यात्मा, नासौ परस्मै दर्शयितुं शक्यते। न च एतावता नानुभूयत इति वक्तुं शक्यम्। परोऽपि ह्येनमहंप्रत्ययेनानुभवत्येव। तथायमपि भौतिकव्यापारहेतुरात्माकूतविशेषो न प्रमाणान्तरवेद्यो भवति। न च न ज्ञायते। तज्ज्ञाने सति चेष्टायाः दृष्टत्वात्।

तस्मात् परमपि "गच्छ", "अधीष्व" इति शब्दश्रवणे सति प्रवर्तमानं दृष्ट्वा तस्यापि तादृक्प्रेरणावगमोऽनुमीयते। स च शब्दान्तरश्रवणे सति अदृश्यमानः तदर्थ एवेत्यन्वयव्यतिरेकाभ्यामवगम्यत इति अयं व्युत्पत्तिप्रकारः।

लिङर्थो नियोगो वाक्यार्थः। स एव धर्मः। स च न प्रमाणान्तरगम्यः। नियोग एव प्रेरकत्वात् प्रेरणात्मा। अनुष्ठेयत्वात् कार्यात्मकः धर्मः।

प्रेरकत्व-कार्यत्वयोरविरोधः

कथं द्वैरूप्यमस्य शब्दो वदतीति चेत् — प्रेरकत्वमेव शब्दार्थः। आर्थं तु कार्यत्वम्। यतो विधिरेवानुष्ठेयतयावगम्यते, "आचार्याज्ञां करोमि" "राजाज्ञां करोमि" इति।

किमर्थं तर्हि विषयानुष्ठानमिति चेत् — न ह्याज्ञा घटादिवत् स्वरूपेण कर्तुं शक्या, अपि तु विषयद्वारकं तत्संपादनम्। "कमण्डलुं बिभृहि" इति आचार्येण आज्ञप्तः कमण्डलुं भृत्वा आचार्याज्ञां कृतां मन्यते। सोऽयं नियोग एवानुष्ठेयः।

ननु "राजाज्ञया करोमि" इत्यपि व्यपदेशो दृश्यते, स चानुष्ठेयभिन्नां राजाज्ञां दर्शयति। मैवम्। तत्राप्याज्ञैव अनुष्ठेया। प्रेषणाभिप्रायेण तृतीयानिर्देशः इति केचित्।

अन्ये तु शाब्दं कार्यत्वं नियोगस्य, प्रेरकत्वं तु अर्थात् इत्याचक्षते। अनुष्ठेयता हि तस्य निजं रूपम्। स्वसिद्धये स तु नियोज्यं नियुञ्जानः प्रेरक इत्युच्यते। तदिदं कार्यत्वमपरित्यक्तप्रेरकभावमस्यावगम्यते। प्रेरकत्वं चापरित्यक्तकार्यभावमिति अन्यतरदत्र शाब्दं रूपम् अन्यतरच्चार्थं रूपम्[१]।

नियोगवाक्यार्थत्वनिरासः[२]

यदुक्तं लिङादेरवगम्यमानः कार्यरूपः प्रेरणात्मा च वाक्यार्थो नियोग इति, तन्न। भावार्थादिव्यतिरिक्तस्य नियोगस्य सद्भावे प्रमाणाभावात्। नियोगस्य प्रेरकत्वं नास्ति। फलस्यैव प्रेरकत्वम्। फलाभावे, सत्यामप्याज्ञायां प्रवृत्तेरदर्शनात्। "यमर्थमधिकृत्य पुरुषः प्रवर्तते तत् प्रयोजनम्" इति वदता सूत्रकृता[३] फलं प्रवर्तकमिति प्रदर्शितम्। "प्रमाणेन खल्वयं ज्ञाता अर्थमुपलभ्य तमीप्सति जिहासति वा। तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरुच्यते। सामर्थ्यं पुनरस्याः फलेनाभिसंबन्धः" इति च ब्रुवाणो भाष्यकारोऽपि[४] फलेप्सां प्रवर्तिकां प्रादीदृशत् इति तदीयां सरणिमनुसरद्भिरस्माभिरपि तथैव कथितम्।

अथ वा गुणीभूतेतरपदार्थानुगृहीतः एक एव प्रधानभूतः पदार्थो वाक्यार्थः। स च फलरूपः। न हि निष्प्रयोजनं किंचित् वाक्यमुच्चार्यते।

> क्वचित् साक्षात् पदोपात्तं क्वचित् प्रकरणागतम्।
> क्वचिदालोचनालभ्यं फलं सर्वत्र गम्यते॥ [५]

सकलेन च कारककलापेन क्रिया निर्वर्त्यते। क्रियया च फलम्। न तु फलेनान्यत् किमपि निर्वर्त्यत इति प्रधानत्वात् फलमेव वाक्यार्थः।

---

[१] एतावता लिङादिघटितवाक्ये नियोगप्राधान्येन वाक्यार्थबोधः। नियोगश्च आज्ञा, प्रेरणम् इत्येतावन्मात्रं न्यायमञ्जरीतोऽवगम्यते। नियोगः अपूर्वमिति तु गुरवः। अपूर्वपर्यायतया वर्णनं तु न न्यायमञ्जर्यां कृतम्।

[२] न्या.मं,आ.५.भा.२. पृ. १२१.

[३] न्या.सू. १.१.२४.

[४] न्या.भा. १.१.१

[५] न्या.मं, आ.५.भा.२. पृ. १३९.

ननु फलमपि पुरुषार्थमिति पुरुषः प्रधानं स्यात्। नैतदेवम्। फलं सुखात्मकत्वात् पुरुषाश्रितं भवति, सुखादीनामात्मगुणत्वात्। न तावता पुरुषः प्रधानम्। सोऽपि फलार्थमेव यतते। भावनापि फलोद्देश्यको व्यापारः। नियोगस्यापि फलं विना न प्रवर्तकत्वम्। क्रियाया अपि निष्फलाया न वाक्यार्थत्वम्।

तस्मात् फलस्य साध्यत्वात् सर्वत्र तदवर्जनात्।
क्रियादीनां च तादर्थ्यात् तस्य वाक्यार्थतेष्यते॥

इति जयन्तभट्टमतम्।

धात्वर्थक्रियाप्राधान्येन बोधः

वैयाकरणास्तु धात्वर्थक्रियाप्राधान्येन शाब्दबोधं वर्णयन्ति। तथा हि —

"यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टम्; तथापि 'भावप्रधानमाख्यातम्', 'सत्त्वप्रधानानि नामानि' इति निरुक्तात् भूवादिसूत्रादिस्थक्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसीयते"

इति भूषणसारे[१] निष्कर्षः कृतः।

दर्पणव्याख्यानुसारेणेदं विव्रियते। नामाख्यातोपसर्गनिपातभेदेन चतुर्धा पदं विभज्य तत्र नामाख्यातलक्षणप्रतिपादके इमे वाक्ये। अत्र आख्यातं भावप्रधानमिति योजना। आख्यातपदेन तिङन्तमुच्यते। "आख्यातमाख्यातेन क्रियासातत्ये" इत्यादौ[२] तत्रैव आख्यातशब्दस्य शक्त्यवधारणात्। "भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य, तत्र भावः प्रधानम्" इति प्रकृतनिरुक्तभाष्याच्च[३]। तिङन्ते धात्वर्थस्य भावस्य प्राधान्यमनेन बोध्यते। प्राधान्यं च उपस्थितत्वात् स्ववाचकधातुप्रकृतिकप्रत्ययार्थनिरूपितमेव। अतः "काष्ठैः पाकः" इत्यादौ प्रत्यार्थकरणनिष्ठप्रकारतानिरूपितविशेष्यताशालिबोधजनके पाकादिनामनि नातिव्याप्तिः। तथा च तिङ्बोध्यार्थनिष्ठप्रकारतानिरूपितविशेष्यताश्रयत्वं धात्वर्थभावस्य उक्तं भवति। तथा च भावप्रधानकत्वं नाम तिङर्थनिष्ठप्रकारतानिरूपितविशेष्यताशालिभावप्रतिपादकत्वमिति पर्यवस्यति।

सत्त्वं द्रव्यम्। तत्प्रधानानि नामानि। लिङादिनिष्ठप्रकारतानिरूपितविशेष्यताशाल्यर्थप्रतिपादकत्वं नामलक्षणमित्यर्थः।

---

१ वै.भू.सा. पृ. ४४.
२ ग.सू. २.१.७२.
३ नि.भा.१.१, पृ.४१.

भूवादिसूत्रेति। इत्थं हि तत्र भाष्यं "का तर्हीयं वाचोयुक्तिः, 'पचति भवति', 'त्वं पचसि भवसि', 'पक्ष्यति भवति' इति। सैषा वाचोयुक्तिः, पचादिक्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति" इति[१]। एतद्भाष्यग्रन्थात् "पचाद्यर्थक्रियाकर्तृकं भवनम्" इति शाब्दबोधो भवतीति लभ्यते। तेन भूधात्वर्थभवनक्रियायाः प्राधान्यं लभ्यते। प्रत्ययार्थस्य प्राधान्ये तु एतद्भाष्यविरोधः स्पष्ट एव। अपि च धात्वर्थक्रियायाः तिङर्थविशेषणत्वाभ्युपगमे तस्याः भवतिक्रियायामन्वयो न स्यात्, 'एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतया नान्वयः' इति व्युत्पत्तेः। तथा च भाष्यविरोधोऽपरिहार्यः।

ननु "भावप्रधानमाख्यातम्" इति निरुक्तेन तिङन्ते भावनापरपर्यायभावप्राधान्यं प्रतिपाद्यते। सा च भावना नैयायिकमते कर्त्राख्याते कर्तृत्वं कृतिः। कर्माख्याते कर्मत्वं फलम्। तन्निरूपिताश्रयत्वं वा। तैः संख्याकालातिरिक्तस्य आख्यातार्थस्य भावनापदव्यपदेश्यत्वोपगमात्। भावाख्याते तु धात्वर्थव्यापार एव भावना। आख्यातस्य तदनुवादकत्वात्। भावनायाः प्राधान्यं च प्रकृत्यर्थमपेक्ष्य, न तु प्रथमान्तपदार्थमपेक्ष्य। तत्र लडाद्यर्थकालान्वयोपगमे तु तदपेक्ष्यापि प्राधान्यम्। उक्तभाष्येऽपि क्रियापदार्थस्तत्संमतभावनैव। अत एव "क्रियां पृष्टस्तिङा आचष्टे" इत्येवोक्तम्, न तु 'तिङन्तेन' इति।

कृत्यादिरूपभावनायाः आख्यातार्थत्वे मानं तु भूवादिसूत्रस्थं "कथं ज्ञायतेऽयं प्रकृत्यर्थोऽयं प्रत्ययार्थः" इति प्रघट्टकेऽन्वयव्यतिरेकाभ्यां शक्तिग्राहकम् "इह 'पचति' इत्युक्ते कश्चिच्छब्दः श्रूयते। पच्शब्दश्चकारान्तः, अतिश्च प्रत्ययः श्रूयते। प्रत्ययार्थोऽपि कश्चित् गम्यते, विक्लित्तिः कर्तृत्वमेकत्वम्। 'पठति' इत्युक्ते कश्चिच्छब्दो हीयते, कश्चिदुपजायते, कश्चिदन्वयी। पच्शब्दो हीयते, पठ्शब्द उपजायते, अतिशब्दश्चान्वयी। अर्थोऽपि कश्चित् हीयते, कश्चिदुपजायते, कश्चिदन्वयी। विक्लित्तिर्हीयते, पठिक्रियोपजायते। कर्तृत्वमेकत्वं चान्वयि। तेन मन्यामहे यः शब्दो हीयते तस्यासावर्थः। योऽर्थो हीयते, यः शब्द उपजायते तस्याप्यसावर्थः। योऽर्थ उपजायते यः शब्दोऽन्वयी, तस्यासावर्थो योऽर्थोऽन्वयी" इति भाष्यम्। तत्र "अतेः प्रत्ययस्य कैश्चित् पूर्वाचार्यैः कल्पनात् अतिश्च प्रत्यय इत्युक्तम्" इति कैयटः। "पच्यते" "पठ्यते" इत्यादावपि उक्तान्वयव्यतिरेकोद्देशेन कर्मत्वस्याप्याख्यातार्थत्वं न्यायसाम्यात् तत एवावधार्यते।

किं च "भावप्रधानम्" इति निरुक्तं तद्भाष्यस्वरसात् सकलकारकसंख्याविशिष्टभावनायाः धात्वर्थत्वमाश्रित्य प्रवृत्तम्। अत एव नामलक्षणनिर्वचने न

---

[१] म.भा.१.३.१.

कारकस्य तत्र नामार्थत्वेनोल्लेखः। तस्य धातुलभ्यत्वेन नामार्थत्वाभावादिति तदाशयात् इति चेत् —

अत्रोच्यते। उक्तरीत्या उक्तभाष्यस्य कथंचिन्नयनेऽपि आख्यातार्थप्राधान्ये "पश्य मृगो धावति" इत्यत्र भाष्यसिद्धा एकवाक्यता न स्यात्। तथा हि "कर्मणा यम्.." इति सूत्रे[१] "क्रियापि कृत्रिमं कर्म, क्रियापि हि क्रियया ईप्सिता भवति, कया संदर्शनप्रार्थनादिक्रियया" इति भाष्यम्। त्वन्मते "धावनानुकूलकृतिमान् मृगः" इत्यवान्तरवाक्यार्थबोधस्य जायमानत्वेन धावनस्य कर्त्रवरुद्धतया अन्यत्र विशेषणतयान्वये आकाङ्क्षाविरहात् दर्शने कर्मतयान्वयो न स्यात्। धात्वर्थक्रियाप्राधान्ये तु "मृगकर्तृकं धावनम्" इति अवान्तरवाक्यार्थस्य स्वीकारात् धात्वर्थधावनस्य दर्शनक्रियायां कर्मत्वेनान्वयः संभवति। "मृगकर्तृकधावनकर्मकं दर्शनम्" इति बोधः। नैयायिकमते तु "धावनानुकूलकृतिमान्मृगः, दर्शनाश्रयस्त्वम्" इत्येव बोध एष्टव्यः।

एवं च एकमुख्यविशेष्यकबोधजनकत्वरूपैकवाक्यत्वाभावात् भाष्यविरोधः स्पष्टः।

न च धावनानुकूलकृतिमन्मृगस्यैव कर्मतया दृश्यर्थेऽन्वयात् न दोष इति वाच्यम्। तथा सति मृगपदोत्तरं कर्मणि द्वितीयाया आपत्तेः। कर्मतासंबन्धेन मृगस्य दर्शनक्रियायामन्वयस्तु न संभवति। नामार्थधात्वर्थयोः भेदेनान्वयस्याव्युत्पन्नत्वात्।

न च "पश्य" इत्यत्र "तम्" इति कर्माध्याहार्यम् इति वाच्यम्। वाक्यभेदप्रसङ्गात्। उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयान्वयस्य प्रतिपिपादयिषितत्वात् "तम्" इत्यध्याहारे तदनुपपत्तेश्च।

एवं च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणम् इति नैयायिकोक्तं नादरणीयम्।

किं तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिः भावनात्वावच्छिन्नविषयतासंबन्धेन कारणम् इति कार्यकारणभावो द्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवत् धात्वर्थभावनोपस्थितिरपि हेतुः। "पश्य मृगो धावति" "पचति भवति" इत्याद्यनुरोधात्।

एवं च "चैत्रः पचति" इत्यत्र धातोः फलं व्यापारश्चार्थः। तिङः आश्रयोऽर्थः। तत्राभेदसंबन्धेन चैत्रस्यान्वयः। आश्रयस्य आधेयतासंबन्धेन व्यापारेऽन्वयः। फल-

---

[१] पा.सू. १.४.३२.

स्यानुकूलतासंबन्धेन व्यापारेऽन्वयः इति "चैत्राभिन्नैकाश्रयकः पाकानुकूलो व्यापारः" इति बोधः। "पच्यते ओदनः" इत्यत्र ओदनस्याभेदेन तिङर्थे आश्रये, तस्य धात्वर्थे फले, तस्य च व्यापारेऽन्वय इति "ओदनाभिन्नैकाश्रयिका या विक्लित्तिः तदनुकूलः चैत्रकर्तृको व्यापारः" इति बोधः।

"घटो नश्यति" इत्यत्र "घटाभिन्नाश्रयको नाशानुकूलो व्यापारः" इति बोधः। स च व्यापारः प्रतियोगितानिरूपकनाशसामग्रीसमवधानम्। अत एव तस्यां सत्यां "नश्यति", तदत्यये "नष्टः", तद्भावित्वे "नङ्क्ष्यति" इति प्रयोगः। "देवदत्तो जानाति, इच्छति" इत्यादौ "देवदत्ताभिन्नाश्रयकः ज्ञानेच्छाद्यनुकूलः वर्तमानो व्यापारः" इति बोधः। स चान्तत आश्रयतैव।

नैयायिकमतम्

पूर्वमेव जरन्नैयायिकस्य जयन्तभट्टस्य फलमुख्यविशेष्यकः शाब्दबोधः संमत इति विस्तरेण न्यरूपि। नव्यनैयायिका वैयाकरणा वा तन्मतं नैव कटाक्षितवन्त इति भाति।

व्युत्पत्तिवादे गदाधरभट्टाचार्यैः प्रदर्शितं प्रथमान्तार्थमुख्यविशेष्यत्वम्

"प्रत्ययाश्च विभक्तिकृत्तद्धितादिभेदेन नानाविधाः। विभक्तिश्च सुप्तिङ्भेदेन द्विविधा। सुब्विभक्तयः प्रथमाद्वितीयादयः सप्त। तत्र प्रथमार्थः प्रकृत्यर्थे विशेषणविधया अन्वयिनी संख्यैव। अत एव यत्र विशेष्यवाचकसमानविभक्तिकपदं निपातपदं वा नास्ति, तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्यभावादसौ मुख्यविशेष्यतयैव भासते" इति प्रथमान्तार्थमुख्यविशेष्यकबोधं स्वसंमततया गदाधरभट्टाचार्याः व्युत्पत्तिवादे[१] प्रत्यपादयन्।

अत्र प्रकाशकाराशयः[२]

अत एवेति। प्रकृत्यर्थे विशेषणविधया अन्वययोग्यायाः संख्यायाः प्रथमार्थत्वादेवेत्यर्थः। यत्रेत्यादि। "चैत्रः" इत्यादौ समानविभक्तिकपदाद्यसत्त्वस्थले प्रथमान्तार्थस्य चैत्रादेः यद्विशेष्यं तद्भासकसामग्र्यभावात् असौ प्रथमान्तार्थश्चैत्रादिः विशेष्यतयैव भासत इत्यर्थः।

एतेन "चैत्रः" इत्यादौ एकत्वप्रकारकचैत्रादिमुख्यविशेष्यकबोधस्य जायमानत्वे, सति संभवेऽन्यत्रापि प्रथमान्तार्थस्यैव मुख्यविशेष्यत्वमिति सूचितम्।

---

[१] व्यु.वा. प्रकाशसहितपुस्तके पृ. ९३-९४, गू.त.पुस्तके ९१-९२.

[२] व्यु.वा.व्याख्या प्रकाशः पृ. ९४.

अत्र 'सति संभवे' इत्युक्तत्वात् "पचति" इत्यतः "पाकानुकूला कृतिः" इत्याकारकस्य, "चैत्रेण सुप्यते" इत्यादितः "चैत्रकर्तृकं शयनम्" इत्याद्याकारकस्य बोधस्य नैयायिकैरङ्गीकृतत्वात् क्वचित् प्रथमान्तार्थस्य मुख्यविशेष्यत्वविरहेऽपि न क्षतिः।

एतेनैव च — प्रथमान्तार्थस्य मुख्यविशेष्यत्वोपगमे "पश्य मृगो धावति" इत्यत्र धावनानुकूलकृतिमतो मृगस्य दर्शनक्रियायां कर्मत्वेनान्वितस्य मुख्यविशेष्यत्वानुपपत्तिः। "मृगः" इत्यत्र प्रथमानुपपत्तिश्च। कर्मणोऽनुक्तत्वेन कर्मबोधकमृगपदात् द्वितीयाया एव युक्तत्वेन "धावन्तं मृगं पश्य" इत्यस्यैव हि प्रयोगस्य साधुत्वं स्यात्। क्रियामुख्यविशेष्यकबोधाङ्गीकारे तु मृगकर्तृकधावनस्यैव "मृगो धावति" इति खण्डवाक्यार्थतया, तस्यैव दर्शनक्रियाकर्मतया तद्बोधकधातोः प्रातिपदिकसंज्ञाविरहेण द्वितीयाया असंभव इति न कश्चिद्दोषः — इति वैयाकरणोक्तमपि न नः क्षतिकारणम्।

प्रकृतस्थले वैयाकरणरीत्यैव बोधस्य स्वीकारात्। यदि हि सार्वत्रिकोऽयं प्रथमान्तार्थमुख्यविशेष्यताभाननियमः स्यात्, स्यादयं दोषः, न त्वेवमस्ति।

यदि चाश्रूयमाणक्रियापदस्थलेऽप्यस्त्यादिपदमध्याहृत्य क्रियामुख्यविशेष्यकबोध एव भवद्भिरङ्गीक्रियते, तदा अस्माभिरपि "चैत्रेण सुप्यते" इत्यादौ "त्वं जानीहि" इतिवाक्याध्याहारः, "पश्य मृगो धावति" इत्यत्र त्वंपदस्य इतिपदस्य चाध्याहारः कर्तुं शक्यः। इतिपदेन कर्मण उक्तत्वान्न द्वितीयाप्रसक्तिः। त्वंपदार्थस्यैव मुख्यविशेष्यत्वाच्च न बोधस्य प्रथमान्तार्थमुख्यविशेष्यकत्वानुपपत्तिः।

अथ वा इतिपदाध्याहारो नावश्यकः। यत्रैकस्यैव पदस्यार्थः कर्मत्वेन विवक्षितः तत्रैव हि द्वितीया, यथा "तण्डुलं पचति" इत्यादौ। न चैवं "शुक्लं तण्डुलं पचति" इति प्रयोगानुपपत्तिरिति वाच्यम्। तत्र कर्मत्वेन तण्डुलस्यैवान्वयः, तण्डुले शुक्लस्यान्वय इति 'विशेष्ये विशेषणं तत्रापि च विशेषणान्तरम्' इति रीत्यैव शाब्दबोधात्। "शुक्लस्तण्डुलः पचति" इत्यादौ तु शुक्लाभिन्नतण्डुलस्य कर्मत्वविवक्षणात् विशिष्टवैशिष्ट्यावगाह्येव बोधः। अतो वाक्यार्थस्य कर्मतया न द्वितीया।

अत एव —

"श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः।"

"जानामि सीता जनकप्रसूता, जानामि रामो मधुसूदनश्च।"

इत्यादयः प्रयोगा उपपद्यन्ते। वाक्यार्थस्यैव तत्र कर्मत्वात्। शुक्लाभिन्नतण्डुले शुक्लपदस्य तण्डुलपदस्य वा वृत्तिविरहेण वृत्त्या कर्मबोधकात् प्रातिपदिकात् विधीयमानायाः द्वितीयायाः अप्रसक्तेः।

किं च सर्वत्र धात्वर्थमुख्यविशेष्यकबोधस्वीकारे "पचन् पचति" इति प्रयोगप्रसङ्गः। "विद्यमानपाककर्तृकर्तृको विद्यमानपाकः" इत्यन्वयबोधोत्पत्तौ बाधकाभावात्। प्रथमान्तार्थमुख्यविशेष्यकबोधोपगमे तु उक्तवाक्यात् "वर्तमानकालिकपाकानुकूलकृतिमान् वर्तमानकालिकपाककर्ता" इत्यन्वयबोधः स्यात्। स च "घटो घटः" इत्यत्र प्रदर्शितरीत्यैव वार्येत।

एवं धात्वर्थस्य मुख्यविशेष्यत्वोपगमे "पाचको न पचति" इत्यादौ नञर्थभेदे पाचकस्य प्रतियोगितया, तिङर्थकर्तुश्चानुयोगितयान्वयेन "पाचकान्यकर्तृको विद्यमानपाकः" इत्यन्वयबोध एवोपेयः। स च न संभवति। पाकस्य पाचककर्तृकत्वनियमात्। प्रथमान्तार्थस्य विशेष्यत्वे तु नानुपपत्तिः। "वर्तमानकालिकपाकानुकूलकृत्यभाववान् पाचकः" इत्यन्वयबोधोत्पत्तौ बाधकाभावात्। स्पष्टीकृतं चैतत् विभक्त्यर्थनिर्णये गिरिधरोपाध्यायैः।

अपि च —

"शशी दिवसधूसरो विगतयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनः
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे॥"

इत्यत्र क्रियापदाभावेऽपि शाब्दबोधस्यानुभविकत्वात् सर्वत्र क्रियामुख्यविशेष्यकबोध इत्याग्रहमात्रम्।

एवं च 'सति संभवे प्रथमान्तार्थमुख्यविशेष्यकबोधः' इत्येव युक्तम्। तदुक्तं पदवाक्यरत्नाकरे —

ननु केन विनिगमकेनेदं परिच्छिद्यते, यत् प्रथमान्तार्थ एव प्रधानम् इति चेत् — उच्यते।

"प्रयाति पुरुषस्तस्य पादयोरभिवादय"।
इत्यादौ प्रथमान्तार्थः प्राधान्यान्मृश्यते तदा॥ [१]

यदि तिङ्प्रथमान्तार्थयोः प्रथमान्तार्थस्य प्राधान्यं न स्यात्, तदा "प्रयाति पुरुषस्तस्य" इत्यत्र तच्छब्देन पुरुषो न परामृश्येत। गुणीभूतार्थस्य तच्छब्देन परामर्शासंभवात् इति। न च प्रथमान्तार्थमुख्यविशेष्यताकबोधोपगमे "भावप्रधान-

---

[१] प.वा.र. ८२.

माख्यातम्'' इति निरुक्तविरोधः। भावशब्दस्य क्रियार्थकत्वेन क्रियाया एवानया स्मृत्या प्राधान्यावगमादिति वाच्यम्। 'भावयतीति भावः' इति णिजन्तादच्प्रत्ययेन निष्पन्नस्य भावशब्दस्य भावनावाचकत्वेन आख्यातार्थेषु कृतिकालसंख्यासु भावनात्मिकायाः कृतेरेव प्राधान्यमित्यर्थकत्वात्।

भावशब्दस्यात्र भावनार्थकत्वादेव मीमांसकैः एतत्स्मृतिमूलकः भावनामुख्यविशेष्यक एव बोधोऽङ्गीकृतः। सोऽपि न युक्तः। ''न पचति'' इत्यादौ शाब्दबोधानुपपत्तेः। न च तत्र तिङर्थभावनायामनुकूलतासंबन्धावच्छिन्नपाकाभावस्यान्वयात् ''पाकाभाववती भावना'' इति बोध उपपादयितुं शक्यः। भावनासामान्यशून्ये सुप्तपुरुषे ''नायं पचति'' इति प्रयोगानुपपत्तेः।

किं च ''सत्त्वप्रधानानि नामानि'' इत्यपि निरुक्तस्मृतिः अस्ति। तत्र सत्त्वपदस्य लिङ्गसंख्याद्यन्वययोग्योऽर्थः। एवं चात्र वैयाकरणमीमांसकयोः मते एतत्स्मृतेः प्रामाण्यं न निर्वहति। नैयायिकानां मते तूभयोरेव स्मृत्योः प्रामाण्यं निर्वहतीति संक्षेपः — इति।

शब्दशक्तिप्रकाशिकायां मुख्यविशेष्यविचारः

शब्दशक्तिप्रकाशिकायां शाब्दबोधे मुख्यविशेष्यतया कस्य भानमिति विषयो न विचारितः। तथापि तत्तद्वाक्यजन्यबोधप्रदर्शनकाले प्रथमान्तार्थमुख्यविशेष्यकतयैव बोधस्य प्रदर्शितत्वात् प्रथमान्तार्थमुख्यविशेष्यकबोध एव तत्संमत इति निर्णीयते।

न्यायकुसुमाञ्जलौ पञ्चमस्तबके ''कृताकृतेति'' कारिकाव्याख्यानावसरे[१] —

''अत एवानुभवोऽपि, यावदुक्तं भवति 'पाकानुकूलवर्तमानप्रयत्नवान्', तावदुक्तं भवति 'पचति' इति। एवं तथाभूतातिवृत्तप्रयत्नः 'अपाक्षीत्' इति। एवं तथाभूतभाविप्रयत्नः 'पक्ष्यति' इति'' इत्युक्तम्।

कर्तृविशेष्यकबोधे इदं प्रमाणं भवितुमर्हति।

न्यायकौस्तुभकाराः महादेवपण्डिताः अपि[२] —

''वस्तुतस्तु नैयायिकमते सर्वत्र प्रथमान्तार्थविशेष्यक एव बोध इति न नियमः। कैरप्यभियुक्तैः तथा अलिखनात्, अनिर्वाहाच्च। किं तु यथासंभवं तत्तद्विशेष्यकः'' इति निगमनं कुर्वन्ति।

व्युत्पत्तिवादव्याख्याने गूढार्थतत्त्वालोके बच्चा झामहोदयाः अपि[३] —

---

[१] न्या.कु.५.९, पृ. ३२४.
[२] न्या.कौ. पृ.६१२.
[३] गू.त.पृ.९१.

"न हि प्रथमान्तार्थमात्रस्य मुख्यविशेष्यत्वं कैश्चिदपि नैयायिकदेशीयैरपि प्रतिज्ञातम्। नञ्समभिव्याहारस्थले विशेषणविभक्तिस्थले च तदनभ्युपगमात्, तद्भङ्गमात्रफलकस्य उक्तस्थलान्वेषणक्लेशस्य विफलतैव" इत्याचख्युः।

"प्रथमान्तासमभिव्याहारे यथायथं बोधः। प्रथमान्तसमभिव्याहारे तु प्रथमान्तार्थमुख्यविशेष्यक एव बोधः" इत्यपि निरूपितं न्यायकौस्तुभे[१]।

न्यायकौस्तुभे "भावप्रधानमाख्यातम्" इति निरुक्तवचनतात्पर्यप्रदर्शनम्

वैयाकरणैः — प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारे "भावप्रधानमाख्यातम्" इति निरुक्तविरोधः, 'भावशब्दितधात्वर्थविशेष्यकबोधजनकमाख्यातम्' इति तदर्थात् — इत्युक्तम्। तत्र द्वेधा निरुक्तार्थवर्णनेन विरोधं परिहरन्ति कौस्तुभकृतः[२]।

१) भावयतीति भावना, न धात्वर्थः। धात्वर्थनिरूपितविशेष्यतया आख्यातार्थभावनायाः बोधः। भावनाविशेष्यकबोधजनकमाख्यातमिति निरुक्तवाक्यार्थः। यद्यपि आख्यातार्थस्य धात्वर्थं प्रति विशेष्यत्वं "तयोस्तु प्रत्ययः प्राधान्येन" इत्येतेनैव सिद्धम्। तथापि आख्यातार्थेषु कालसंख्याभावनासु मध्ये कस्यार्थस्य विशेष्यत्वमित्याकाङ्क्षायां भावनायाः विशेष्यत्वं बोधयतीदं वाक्यम्।

२) "सत्त्वप्रधानानि नामानि" इत्यनन्तरनिरुक्तवाक्ये प्रधानशब्दस्य वाचकाभिप्रायकतया "भावप्रधानम्" इत्यत्रापि वाचकपरतया भाववाचकमिति तदर्थान्न विरोधः।

अपि च "भावप्रधानम्" इति निरुक्तेन तिङन्तार्थबोधे भावस्य प्राधान्यलाभेऽपि, न सम्पूर्णवाक्यार्थबोधे भावस्य प्राधान्यं लभ्यते। तथा सति "भावप्रधानं वाक्यम्" इति स्यात्। अन्यथा "सत्त्वप्रधानानि नामानि" इत्युक्त्या सत्त्वशब्दितद्रव्यस्यैव वाक्यार्थबोधे विशेष्यता स्यात्। तथा चोभयोः निरुक्तवचनयोः परस्परविरोधः स्यात्। "यत्रोभे, भावप्रधाने भवतः" इति उत्तरनिरुक्तवाक्येन नामाख्यातसमभिव्याहारे भावप्राधान्यबोधनात् वाक्यार्थबोधे भावस्य प्राधान्यं लभ्यत इत्यपि न शङ्कनीयम्। "चैत्रः पचति" इत्यादौ आख्यातार्थभावनायाः विधेयतया भानात् विधेयत्वनिबन्धनप्राधान्यस्य भावशब्दितभावनायां तेन बोधनात् इति।

गूढार्थतत्त्वालोके विशेषाः[३]

व्युत्पत्तिवादव्याख्याने गूढार्थतत्त्वालोके बह्वा झामहाशयैः शाब्दबोधे मुख्यविशेष्यतया कस्य भानमिति विषये चर्चितानंशान् प्रतिपादयामः।

---

[१] न्या.कौ.पृ. ६१७.
[२] न्या.कौ.पृ. ६०४.
[३] गू.त.पृ. ९१-९४.

'सति संभवे प्रथमान्तार्थमुख्यविशेष्यत्वम्' इति कथनात् नैयायिकैः प्रथमान्तार्थमुख्यविशेष्यक एव बोधः सर्वत्राङ्गीक्रियत इति भ्रमो निराकृतो वेदितव्यः। तेन "पचति" इत्यत्र प्रथमान्तपदाभावात् पाककृतिमात्रस्य, "चैत्रेण सुप्यते" इत्यत्र च चैत्रकर्तृकशयनमात्रस्य प्रतीतावपि क्षत्यभावात्।

एवं यत्र प्रथमान्तार्थस्यान्वयबोधे न प्रवेशः तादृशस्थलस्य "पचति भवति", "पक्ष्यति भवति", "अपाक्षीत् भवति" इत्यादेरन्वेषणक्लेशः परेषां लेशतोऽपि न क्लेशातिरिक्तफलकः। "वर्तमानादिकालीनपाककृतिवृत्ति भवनयुक्तत्वाद्याश्रयत्वम्" इति बोधस्य क्षत्यभावेन अभ्युपगमात्। अत एव "पचन्ति भवन्ति" इत्यादयो न प्रयोगाः। संख्यान्वययोग्यस्याभावात् उत्सर्गत एकवचनस्यैव प्रसक्तेः।

येषामपि मीमांसकानां मते आख्यातस्य कर्तरि लक्षणा, तेषामपि कर्तुर्भावनायामेवान्वयेन तस्या एव भवनकर्तृत्वात् संख्यान्वययोग्यत्वाच्च "भवति" इत्येव सर्वत्र प्रयोगः इति स्थिते; कैव कथा कर्तृलक्षणानङ्गीकर्तृमते (वैयाकरणमते)।

एतेन यत्र न कंचिदभिमुखीकृत्य "चैत्रः पचति" इति प्रयोगः, तत्र "त्वं जानीहि" इत्यादेः अयोग्यतया अध्याहाराभावेऽपि न क्षतिः।

एवं — "पचतिकल्पम्" इत्यादितद्धितकल्पप्रत्ययस्थले प्रथमान्तपदसत्त्वेऽपि न तस्य प्रथमान्तार्थस्य मुख्यविशेष्यत्वम्। पाककृतिं प्रति ईषदसमाप्तत्वस्य एकपदोपात्तत्वेन मुख्यविशेष्यत्वासंभवात्। संभवेऽपि प्रथमान्तार्थस्य विशेष्यत्वे वा, संख्याया अपि तत्र प्रातिपदिकार्थत्वेनान्वययोग्यतया बहुत्वविवक्षायां "पचन्तिकल्पानि" इत्याद्यपि स्यादिति प्रथमान्तार्थमुख्यविशेष्यत्वनियमहानिः — इत्यपि परास्तम्। 'सति संभवे' इत्यस्योक्तत्वात्। तदर्थस्य पाकेऽन्वयात् ईषदसमाप्तपाकलक्षणातात्पर्यग्राहकतत्पदसमभिव्याहारवशाद्वा तत्र ईषदसमाप्तपाककृतेः तद्वतो ब्राह्मणादेर्वा बोधस्याभ्युपगमः स्यात्। ईषदसमाप्तपाकादेश्च संख्यान्वयायोग्यत्वात् वचनान्तरप्रसक्तेरप्यभावात्।

एवं — "पश्य मृगो धावति" इत्यत्र मृगविशेष्यकबोधस्वीकारे "धावन्तं मृगं पश्य" इत्येव स्यात्, मृगनिष्ठदर्शनकर्मत्वस्यानुक्तत्वेन अभिहिताधिकारीयप्रथमाया असंभवात्। क्रियामुख्यविशेष्यकबोधस्याभ्युपगमे तु तस्या एव दर्शनकर्मत्वेन, तद्बोधकधातुपदात् द्वितीयाया असंभवात् — इत्येतदप्युद्भावनं परेषां, न दूषणायालम्।

उक्तदोषेण प्रथमान्तार्थस्य तत्र मुख्यविशेष्यत्वासंभवेन तत्त्यागे क्षत्यभावात्। न हि प्रथमान्तार्थमात्रस्य मुख्यविशेष्यत्वं कैश्चिदपि नैयायिकदेशीयैरपि प्रतिज्ञातम्।

नञ्समभिव्याहारस्थले विशेषणविभक्तिस्थले च तदनभ्युपगमात्, तद्भङ्गमात्रफलकस्योक्तस्थलान्वेषणक्लेशस्य विफलतैव।

एवं "पश्य मृगो धावति" इत्यत्र अध्याहृत"त्वम्"इतिप्रथमान्तार्थस्य भवत्येव विशेष्यत्वम्। यद्वा इतिपदाध्याहारः कार्यः। तथा सति तेनैव निपातेन कर्मत्वस्याभिधानात् प्रथमोपपत्तिः। प्रथमान्तार्थविशेष्यत्वानुभवाविरोधश्च।

केचित्तु — वाक्यार्थस्य कर्मतया न द्वितीया। अत एव "जानामि सीता जनकप्रसूता" "श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः" इत्यादयः प्रयोगाः उपपद्यन्ते।

न च "शुक्लस्तण्डुलः पचति" इत्येव स्यात्, न स्याच्च "शुक्लं तण्डुलं पचति" इति वाच्यम्। प्रथमस्येष्टत्वात्। द्वितीये तु विशिष्टस्य न कर्मत्वम्, अपि तु शुद्धतण्डुलस्यैव। तस्य च विशेषणमात्रं 'शुक्लम्' इति। 'विशेष्ये विशेषणम्' इति रीत्या बोधाभ्युपगमेन वा; तण्डुलपदस्य शुक्लतण्डुले लक्षणा, शुक्लपदं तात्पर्यग्राहकम् इत्यभ्युपगमेन वा समाधेयत्वात् — इति वदन्ति।

यत्तु "मेघो गर्जति शृणु" इत्यत्र गर्जनकर्तुर्वाक्यार्थत्वे तच्छ्रवणस्य बाधितत्वादप्रामाण्यं स्यात्। अतो गर्जनक्रियाया एव वाक्यार्थत्वमङ्गीकार्यमिति। तत् "मृगः पलायते मारय" "मृगः सस्यमत्ति मारय" इत्यादिना तुल्यम्। पलायनादिक्रियायाः मारणासंभवात्। गतिरपि तुल्यैवोभयोः स्यात्।

मीमांसकमतानुवादः

"भावप्रधानमाख्यातम्" इति स्मृत्यनुसारात् भावपदस्य धात्वर्थपरतामभ्युपेत्य धात्वर्थस्यैव प्राधान्यं = मुख्यविशेष्यत्वं, वैयाकरणैः उच्यते। भाट्टैस्तु भावशब्दस्य भावनापरपर्यायकृत्यादिरूपाख्यातार्थपरतामभ्युपेत्य तस्याः प्राधान्यमुच्यते। तथा हि — "चैत्रः पचेत्" इत्यत्र लिङर्थप्रवर्तनायाः आख्यातार्थकृतौ स्वज्ञानजन्येष्टसाधनत्वानुमितिजन्यत्वरूपप्रयोज्यत्वसंबन्धेनान्वयः, प्रथमान्तार्थस्य स्वकर्तृकत्वसंबन्धेन आधेयत्वपर्यवसितेन तस्यामेवान्वयः। पच्यर्थव्यापारस्य विषयत्वसहितानुकूलत्वपर्यवसितेन स्वसाध्यतृप्त्यादिफलोद्देश्यकत्वपर्यवसितेन वा करणत्वेन संसर्गेण तस्यामेवान्वयः। "चैत्रविशिष्टा व्यापारविशिष्टा प्रवर्तनाविशिष्टा भावना" इति रीत्या बोधः।

"चैत्रः न पचेत्" इत्यत्र नञ्समभिव्याहारस्थले लिङर्थनिवर्तनायाः स्वज्ञानप्रयोज्यानिष्टसाधनत्वानुमितिप्रयोज्याभावप्रतियोगित्वसंबन्धेन भावनायामन्वयः।

"चैत्रस्तण्डुलं शुक्लं काष्ठेन स्थाल्यां पचति" इत्यत्र आख्यातार्थभावनायां चैत्रस्य स्वकर्तृकत्वसंबन्धेन, द्वितीयान्तार्थस्य तण्डुलनिष्ठकर्मत्वस्य शुक्लनिष्ठ-

कर्मत्वस्य च, तृतीयान्तार्थस्य काष्ठनिष्ठकरणत्वस्य, सप्तम्यन्तार्थस्य स्थालीनिष्ठाधिकरणत्वस्य च स्वनिरूपकपाकविषयकत्वसंबन्धेन आख्यातार्थकृतावन्वयः।

तत्रैव नञ्समभिव्याहारे चैत्रस्याधेयतासंबन्धेन नञर्थाभावे, तस्य प्रतियोगितासंबन्धेन आख्यातार्थकृतौ अन्वयः। तण्डुलकर्मत्वादीनां स्वप्रतियोगिकत्वसंबन्धेन अभावे, तस्याभावस्य स्वाश्रयपाकविषयकत्वसंबन्धेन कृतौ, अथ वा स्ववृत्त्यभावप्रतियोगित्वस्वाभाववत्पाकादिविषयकत्वोभयसंबन्धेन चैत्रतण्डुलकर्मत्वादेरपि तस्यामेवान्वयः। "घटोऽस्ति", "नीलो घटोऽस्ति" इत्यादौ नीलपदार्थस्य घटपदार्थस्य च सत्ताश्रयत्वरूपायां धात्वर्थान्विताख्यातार्थभूतायां भावनायामेवान्वयः।

एवं "पचत्येव चैत्रः", "पचत्यपि चैत्रः", "चैत्र एव पचति" इत्यादावपि स्ववृत्त्यभावप्रतियोगिक्रियाकर्तृनिष्ठभेदप्रतियोगित्वादिसंसर्गेण चैत्रादेः भावनायामेव अन्वयः।

एवं कर्माख्यातस्थलेऽपि, "चैत्रेण पच्यते तण्डुलः" इत्यादौ कर्त्राख्यातस्थले कर्तृलक्षणावत् कर्मलक्षणायामपि भावना प्रतीयत एव। तस्यामेव तण्डुलादेः स्वनिष्ठकर्मतानिरूपकपाकविषयकत्वसंसर्गेण, चैत्रकर्तृकत्वस्य चान्वयः। ततश्च सर्वत्रैवाख्यातार्थस्य विशेष्यतया भानेन 'भावनाविशेष्यकशाब्दबोधं प्रति आख्यातजन्योपस्थितिः कारणम्' इति एक एव कार्यकारणभावः। व्युत्पत्तेरपि नानेकत्वं न्यायमतवदिति महल्लाघवम्। अतः प्रथमान्तार्थस्य न कुत्रापि मुख्यविशेष्यत्वमिति।

उक्तमीमांसकमतपरिशीलनम्[१]

अत्रोच्यते। संबन्धभेदेन शाब्दबोधस्य विजातीयत्वे तत्र तत्र शाब्दबोधे तत्तदाकाङ्क्षाज्ञानानां पृथक् पृथगेव कारणत्वं वाच्यम्। अन्यथा संबन्धभाननियमो न स्यात्।

ननु शाब्दबोधे संबन्धत्वेनैव सामान्यतः संबन्धस्य भानम्। विशेषरूपेणावगाही बोधो मानस एव। तेनैव बाधबुद्धि-विरोध-प्रवृत्ति-निवृत्त्यादिनिर्वाहः। अत एव "वह्निमान् पर्वतः" इत्यतः शाब्दबोधेऽपि संबन्धविशेषसंशयः, संबन्धविशेषेण बाधग्रहेऽपि शाब्दबोधः उपपद्यते। एवं "राज्ञः पुरुषः" इत्यादावपि स्वस्वामिभावजन्यजनकभाव-स्वामिभृत्यभावादौ संबन्धविशेषे संशयः। एवं च न संबन्धभेदनिबन्धनो व्युत्पत्तिभेद इति चेत् — न।

---

[१] गू.त. पृ. ९२.

केषुचित् संबन्धविशेषेषु नियताभ्यो वृत्तिभ्यः आकाङ्क्षाभ्यश्च संबन्धविशेषभानस्य दुर्वारत्वात् योग्यतायास्तात्पर्यस्य च प्रागेव ग्राह्यत्वात्। "पर्वतो वह्निमान्" इत्यत्र मतुपः सामान्यतः संबन्धिशक्तत्वेन तत्र तद्विशेषसंशयस्योचितत्वात्। "राज्ञः पुरुषः" इत्यादौ पुरुषपदस्य पुत्रभृत्यादिपुरुषविशेषे तात्पर्यग्रहे सति जन्यजनकभावस्वामिभृत्यभावादिसंबन्धविशेषे संशयस्याभावात्। अनुभवविरुद्धप्रतिबध्यबुद्ध्यनुत्पादविलम्ब-प्रवृत्त्यादिविलम्बकल्पनायाश्च अप्रामाणिकत्वात्। तदनुरोधेन सर्वत्र तादृशमानसकल्पनाया अप्यनुचितत्वात्। सर्वत्र मानसबोधेनैव शाब्दसकलफलसंपादनेऽतिरिक्तशब्दप्रमाणविलयापत्तेश्च।

अपि च संबन्धस्य सामान्यतः भानेऽपि प्रकारे विशेष्ये च न्यूनाधिकभावः वैपरीत्यम् इत्यादितः कार्यवैलक्षण्यस्य, पदन्यूनाधिकभावपौर्वापर्यवैलक्षण्यस्य च दुर्वारतया कार्यकारणभावनानात्वं दुर्वारमेव।

यच्च धात्वर्थाख्यातार्थक्रियाकालादिकं प्रति भावनायाः विशेष्यत्वे सिद्धे, अन्यं प्रति विशेष्यत्वविमर्शे झटित्युपस्थितविशेष्यभावायाः एव विशेष्यत्वमुचितमिति; तदपि न रमणीयम्। विवक्षितार्थबोधस्य "पुत्रस्ते जातः", "कन्या ते गर्भिणी" इत्यादौ प्रयुक्तशब्दमात्रादेव निष्पत्तौ क्रियापदाध्याहारस्य निष्प्रमाणकतया, प्रथमान्तार्थस्यापि मुख्यविशेष्यतायाः क्लृप्तत्वात् विशेष्यतया प्रथमान्तार्थोपस्थितेरपि झटिति संभवात्।

न च "अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्ति" इति[१] स्मृतिप्रामाण्यात् तत्रापि "अस्ति" इति क्रियापदाध्याहार इति वाच्यम्। तस्याः स्मृतेः विधायकत्वाभावात्। अस्तित्वस्य चैत्रादौ विवक्षितत्वे विवक्षितबोधान्यथानुपपत्त्यैव "अस्ति" इत्यध्याहारस्य सिद्धत्वात् तस्याः अनुवादकत्वात्।

न च तथात्वे वैयर्थ्यं शङ्क्यम्। वेदे क्रियान्तरस्य योग्यत्वेऽपि अस्त्यध्याहारनियामकत्वेन सार्थक्यस्योपपादयितुं शक्यत्वात्।

विधायकत्वेऽपि वा स्वस्य परस्य शौर्यमात्रं यत्र प्रतिपिपादयिषितम्, अतीतस्य स्वपित्रादेर्वा, तत्र "त्वं शूरः, अहं च, मत्पिता च" इत्यत्र "अस्ति" इत्यस्यायोग्यतया तदध्याहारस्य असंभवात्।

न च 'अस्तिः' इति धातुमात्रस्य, 'प्रथमपुरुषः' इति मध्यमोत्तमपुरुषयोः 'भवन्ती' इति लकारमात्रस्योपलक्षकम्। अत उक्तस्थले "स्मः" इत्यध्याहारान्नानुपपत्तिरिति वाच्यम्। 'न विधौ परः शब्दार्थः'[२] इति भवतः सिद्धान्तात्।

---

[१] वा.११. पा.सू.२.३.१.

[२] विधिवाक्ये न लाक्षणिकः शब्दस्यार्थः इत्यर्थः।

न च प्रातिपदिकार्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्यायाः सुब्जन्यायाः वा उपस्थितेः विशेष्यतासंबन्धेन कारणत्वात्, न शूरप्रकारकस्य युष्मदर्थविशेष्यकस्य बोधस्य संभवः। "चैत्रः" इत्यत्र प्रथमार्थे स्वरूपे चैत्रादेरन्वयः, चैत्रपदं तात्पर्यग्राहकम्। प्रथमार्थ एव वा चैत्रः, प्रथमायाः प्रातिपदिकार्थेऽनुशिष्टत्वात् इति वाच्यम्।

अनुभवविरुद्धस्य तादृशकार्यकारणभावस्यायुक्तत्वात्। अपि च "सुन्दरश्चैत्रः शुक्लं तण्डुलं पचति" इत्यत्र चैत्रगतसौन्दर्यतण्डुलगतशौक्ल्ययोः प्रतिपिपादयिषितयोः प्रतिपत्त्यर्थं सर्वत्र मानसबोधतत्सामग्र्योः कल्पने मनसो विषयान्तरसंचारानुभवापलापः, "इदं श्रुतम्" इति श्रुतत्वानुभवस्य अनुपपत्तिश्च।

अपि च भावनामुख्यविशेष्यत्वे आग्रहेण इतरपदार्थानां परम्परासंबन्धेन भावनायामन्वयस्वीकारे औचित्यप्राप्तसाक्षात्संबन्धोल्लङ्घनम्, पदोपस्थितानां संसर्गघटकतया पुनर्भानम् इत्यादयः दोषाः प्रसज्यन्ते।

"प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोस्तु प्रत्ययः प्राधान्येन" इत्यादिस्मृतिपर्यालोचनया "भावप्रधानमाख्यातम्" इति स्मृतेरपि धात्वर्थं प्रत्येव कालादिकं प्रत्येव वा भावनायाः विशेष्यत्वज्ञापकत्वं, न तु सर्वथैवेत्यपि सुवचत्वात्, न ततोऽपि सर्वत्र भावनायाः मुख्यविशेष्यत्वसिद्धिः। तथात्वे "भावप्रधानं वाक्यम्" इत्येव ब्रूयात्। न हि धातुतिङ्संघातात्मके आख्याते क्रियायाः भावनायाः वा प्राधान्येऽपि वाक्यार्थे प्राधान्यं लभ्यते तस्याः। अन्यथा "सत्त्वप्रधानानि नामानि" इत्यतोऽपि वाक्यार्थे सत्त्वस्य प्राधान्यमवगतं स्यादिति निरुक्तस्मृतिवचने परस्परविरुद्धे प्रसज्येयाताम्। भावशब्दश्च क्रियायां भावनात्मिकायां कृतौ च वर्तते। यथाप्रयोगं च व्यवस्था।

अत एव भावशब्दस्य यत्नार्थकत्वे भावविहिताख्यातस्य यत्नार्थकत्वेन तृतीयाद्यनुपपत्तिप्रभृतिदोषमुद्भाव्य भावशब्दस्य क्रियार्थकत्वं व्यवस्थाप्य उक्तस्मृतेः क्रियाप्रधानत्वार्थकत्वव्यवस्थापनं वैयाकरणानां क्लेशैकफलकम्। तावता वाक्यार्थे प्राधान्यालाभात्। नामार्थं प्रति क्रियाया इव, क्रियां प्रति नामार्थस्याप्यन्वययोग्यत्वेनार्थतोऽपि वाक्यार्थे प्राधान्यालाभाच्च। भावश्बदस्य क्रियार्थकत्वेऽपि "लः कर्मणि..." इत्यादेः[१] भावाख्यातस्य भावार्थपरत्वे क्रियायाः द्विधा भानं दोष इति भावपदस्य कालातिरिक्तकर्तृकर्माद्यर्थकत्वव्यवच्छेदपरताया एव वाच्यत्वाच्च।

"क्रियाप्रधानमाख्यातम्" इति न्यायवार्त्तिकस्याप्युक्तार्थ एव तात्पर्यम्। कृतेरप्याख्यातार्थभूतायाः लिङ्गसंख्यान्वयायोग्यत्वरूपसाध्यावस्थात्वेन क्रियापदार्थत्वात्।

---

[१] पा.सू.३.४.६९.

किं च परत्र स्वबोधसंक्रान्तये शब्दप्रयोग इति सर्वसंप्रतिपन्नम्। यत्र हि स्वस्य स्वविशेष्यकं स्वकर्तृकपाककर्मत्वप्रकारकं ज्ञानं, स्वकृतिविशेष्यकं तण्डुलकर्मकपाकप्रकारकं वा ज्ञानं, "परस्य तादृशतादृशज्ञानं भवतु" इतीच्छया तत्तद्वाक्यं प्रयुङ्क्ते च, तत्र वाक्यमात्रस्यैव त्वन्मते तादृशज्ञानाजनकतया तदनुपपत्तिः। मन्मते तु "अहं पचामि" "मया तण्डुलः पच्यते" "तण्डुलकर्मकपाककृतिर्मम" इति वाक्यानां तादृशबोधानुकूलत्वात्तदुपपत्तिः।

न च व्यञ्जनाव्यापारमनभ्युपगच्छता भवतापि मानसबोधेच्छया वाक्यप्रयोगोऽभ्युपेय एव, मानसबोधस्यापि कथंचित् शाब्दत्वादिति वाच्यम्। संभवन्त्यामपि गतौ सर्वत्र तथा कल्पनस्यानुचितत्वेनाप्रामाणिकत्वात्। शाब्दभिन्नविषयकनक्षत्रादिबहिरर्थविषयकप्रत्यक्षसामग्रीवेधादिदृढव्यापृतं पुरुषं प्रत्यपि कार्यवशेन ज्ञात्वापि निरुक्तेच्छया उक्तवाक्यप्रयोगात् तस्य चोपपादनायोगात्।

भिन्नविषयके प्रत्यक्षे शाब्दसामग्र्याः बलवत्त्वात् शाब्दबोधस्य संभवेऽपि, मानसे बहिरर्थलौकिकप्रत्यक्षसामग्र्याः बलवत्त्वात् मानसस्योत्पत्तुमशक्यत्वात्। एतादृशबलाबलज्ञानस्य पूर्वोक्तवेधादिरूपदृढतरतादृशसामग्रीज्ञानस्य च प्रयोक्तुः विद्यमानत्वात्, विशेषदर्शिनः तादृशप्रयोक्तुः बलवत् प्रमाणं विना भ्रान्तिकल्पनायाः नितरामनुचितत्वात्।

किं च विवरणवाक्यविव्रियमाणवाक्ययोः सति संभवे समानार्थकत्वम्, तत्रापि यावत्संभवं विशेष्यविशेषणभावयोरनतिक्रमश्च युज्यते। दृश्यते च "पचति इति पाचकः" इति, "पच्यते इति पक्वः" इति विवरणं व्यवस्थितम्। उभयत्रापि क्रियामुख्यविशेष्यकबोधस्यैवोपगमे वैपरीत्येनापि तत् किं न स्यात्।

किं च "अधीते वेद वा यः" इत्येतद्वाक्यार्थे अध्ययनक्रियाकर्तृवाचकादण्प्रत्ययो विहितः। तत्रास्मन्मते व्याकरणाध्ययनकर्तुरेव वाक्यार्थत्वेन वैयाकरणपदात् तस्य बोधो युज्यते। भवन्मते तु सकर्तृकस्य व्याकरणाध्ययनस्य तद्भावनायाः वा वाक्यार्थत्वात् तद्बोधस्यैवौचित्यं स्यात्। एवं "तद्वहति" इत्यादिसूत्रेण[१] 'तद्वहति यः' इति वाक्यार्थे वहनक्रियाकर्तृपदात् यत्प्रत्ययो विहित इति "रथ्योऽश्वः" इत्यादौ रथकर्मकवहनकर्तुरश्वस्य बोधो न स्यात् वैयाकरणनये।

यत्त्वत्र वैयाकरणैः — क्वचित् गुणप्रधानत्वमर्थानामविवक्षितमित्युपक्रम्य,

"आख्यातं तद्धितकृतोर्यत्रार्थस्योपदर्शकम्।
गुणप्रधानभावस्य तत्र दृष्टो विपर्ययः॥"

---

[१] पा.सू. ४.४.७६.

इति हरिकारिकां,[१] "तद्वहति" इति[२] सूत्रभाष्यस्थां "य एवार्थो रथं वहति स एवार्थो रथस्य वोढा" इत्युक्तिं चाकलय्य तद्धितादिविवरणस्थले आख्यातस्थलात् विशेष्यविशेषणभावे वैपरीत्यमभ्युपगम्य वैयाकरणादिपदानां व्याकरणाध्ययन-कर्त्राद्यर्थकत्वमुपपादितं —

तत् तेषां स्वपक्षप्रतिकूलतामेवावहति। तथा हि —

"व्याकरणमधीते" इत्यस्य "रथं वहति" इत्यस्य च यो यदा विवरणत्वं प्रतिसंधत्ते, तदा तं प्रति प्रथमान्तार्थमुख्यविशेष्यकबोधजनकत्वम्, इतरं प्रति, तं प्रति अन्यदा च अतथात्वं (धात्वर्थक्रियामुख्यविशेष्यकबोधजनकत्वम्) इत्यङ्गी-कारे कार्यतावच्छेदके तत्तत्पुरुषतत्तत्कालप्रवेशस्यावश्यकत्वात् महागौरवं स्यात्। यदि तादृशस्थले सर्वत्रैव प्रथमान्तार्थमुख्यविशेष्यकबोध एवाङ्गीक्रियते, तदा "तण्डुलं पचति चैत्रः" इत्यत्र कुतः स नाङ्गीक्रियते? "क्रियाप्रधानमाख्यातं" "भावप्रधानमाख्यातम्" इत्यादिस्मृतेः वाक्यार्थे क्रियाप्रधानत्वार्थकतायाः सार्वत्रि-कत्वस्य त्वयैवोक्तस्थलानुरोधेन त्यागात्। द्वयोः स्थलयोः विशेषस्य चाना-कलनात्।

न च विवरणत्वं विवरणजातीयत्वं वा विशेष इति वाच्यम्। "पचति" इत्यत्रापि पाचकपदविवरणत्वस्य सत्त्वेन विशेषत्वासंभवात्।

एवं च "तण्डुलं पचति चैत्रः" "तण्डुलः पच्यते चैत्रेण" इत्यत्र प्रथमान्तार्थ-स्यैव मुख्यविशेष्यत्वं युक्तम्, अनुभवविरोधस्मृतिविरोधादेरभावात्। अनुभूयमान-वाक्यद्वयार्थवैलक्षण्यस्य अन्यथानिर्वाहाच्च।

"चैत्रेण सुप्यते" इत्यादौ क्रियाया एव मुख्यविशेष्यत्वम्, अध्याहारे गौरवात् अध्याहृतपदार्थस्यानाकाङ्क्षितत्वाच्चेति, यत्र यादृशबोधाभ्युपगमे न काचिदनुप-पत्तिस्तत्र तादृश एवाभ्युपेयते, न कुत्राप्याग्रह इति।

यत्तु — युष्मदस्मदर्थयोरेकत्वेऽपि वैकल्पिकं बहुवचनं विधाय सविशेषण-योस्तयोस्तत् प्रतिषिद्धम्। तत्प्रतिषेधश्च प्रयोगानुसारात् क्रियायोगस्थल एवाभ्युपेयते। धात्वर्थस्यैव मुख्यविशेष्यत्वे "पटुरहं ब्रवीमि" इत्यत्रेव "वयमपि कुब्जाः" "किमौदास्यम्" इत्यादावपि क्रियाध्याहारस्यावश्यकत्वेन एकवचनमेव स्यात्। प्रथमान्तार्थप्राधान्यपक्षे क्रियाध्याहाराभावेन क्रियायोगाभावान्न तथात्वम्।

किं च तदादेः वाक्यार्थप्रधानपरामर्शकत्वेन क्रियातिरिक्तस्य —

---

[१] वा.प.वाक्य. ३०६.
[२] पा.सू. ४.४.७६.

"प्रयाति पुरुषस्तस्य पादयोरभिवादय।"

इत्यादौ प्रातिपदिकार्थस्य परामर्शो न स्यात्। पूर्ववाक्ये क्रियाया एव प्राधान्यादिति —

तन्न युक्तम्। विशेषणत्वस्य विधेयत्वातिरिक्तस्य प्रतिषेधापेक्षितत्वात्। तत्र हि कुब्जत्वं विधेयमिति न प्रतिषेधप्रसक्तिः। तदादीनां प्रधानपरामर्शकत्वे प्राधान्यं वृत्तिग्रहमुख्यविशेष्यत्वमेव विवक्षितम्। अत एव न्यायमतेऽपि —

"दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः।"

इत्यत्र तच्छब्देन राजपरामर्शः। न हि भवति "प्रजावतीयं मे त्वं तस्मै देहि कम्बलम्" इत्यत्र च तदा भ्रात्रादिपरामर्शः[1]। न च प्रथमान्तार्थविशेष्यक-बोधाभ्युपगमे "कीदृशश्चैत्रः" इति प्रश्नस्य "चैत्रः पचति" इत्युत्तरापत्तिः। मन्मते तु चैत्रे पाककृत्यादिरूपधर्मावबोधकत्वान्नोत्तरत्वमिति वाच्यम्। प्रश्नवाक्ये हि "कीदृशः" इति पदात् "जिज्ञासितधर्मवान्" इति बुध्यते। तस्य चाभेदेन चैत्रपदार्थे अन्वयो भवति। एवं सति उत्तरवाक्ये चैत्रेऽभेदेनान्वयिनः धर्मविशेषवतः बोधकं यत् पदं तद्घटितत्वमपेक्षितम्। अतो न "पचति" इत्युत्तरापत्तिः। अपि तु "पाककर्ता" इत्येवोत्तरम्। अन्यथा मीमांसकमतेऽपि "कीदृशी कृतिः" इति प्रश्नस्य "चैत्रः पचति" इत्युत्तरं स्यात्।

यत्तु "कीदृशी कृतिः" इत्यतः लिङ्गसंख्यान्विता कृतिः प्रतीता। तादृश-कृतिप्रत्यायकस्यैवोत्तरत्वमुचितमिति "पचति" इति नोत्तरमिति। तन्न। संख्यायाः प्रश्नवाक्येऽविवक्षितत्वे तदबोधकस्याप्युत्तरवाक्यत्वे बाधकाभावात्। तस्माच्छब्द-मर्यादैव हि शरणीकरणीया।

यच्च "तद्भूतानां क्रियार्थेन समाम्नायः" इति जैमिनीयानुभवः[2] क्रियामुख्य-विशेष्यकबोधेऽस्ति प्रमाणम्। नैवं नैयायिकानां गौतमाद्यनुभवोऽस्ति प्रथमान्तार्थ-मुख्यविशेष्यत्वे प्रमाणमिति। तदपि न। उक्तार्थस्यालौकिकत्वाभावेन पारमर्षानुभ-वैकशरणत्वाभावात्, येन तदभावे तन्निर्णयो न स्यात्।

किं च तत्सूत्रमपि सिद्धार्थक्रिययोः क्रियाप्राधान्यपरमेव, न मुख्यविशेष्यत्व-परम्। तस्य मुख्यविशेष्यत्वस्य प्राधान्यानियतत्वात्। "पर्वतो वह्निमान्" "पर्वते वह्निः" इत्युभयत्रैव विधेयत्वनिबन्धनप्राधान्यस्य वह्नावेवानुभूयमानत्वादित्यलम्।

---

[1] प्रजावतीशब्दवृत्तिग्रहविशेष्यः भ्रातृपत्नी। तत्र शक्तिग्रहे भ्राता विशेष्यो न भवितुमर्हतीति 'तस्मै' इत्यत्र तच्छब्देन भ्रातुः परामर्शो न भवितुमर्हति।

[2] जै.सू. १.१.७.२५.

शाब्दतरङ्गिण्यां विशेषाः[१]

पदैः वृत्त्या स्मृतानां पदार्थानां संसर्गं वाक्यार्थाभिधमवगाह्य जायमानः विशेषणविशेष्यभावापन्ननानापदार्थविषयकशाब्दबोधः वाक्यार्थबोधः इत्यभिधीयते। तत्र मुख्यविशेष्यतया को भासत इत्यत्र विप्रतिपद्यन्ते तीर्थकराः।

तत्र प्राथमिकशाब्दबोधकारणतालाघवं मूलयुक्तिमवलम्बमानाः केचन दार्शनिकाः आख्यातार्थमुख्यविशेष्यकमेव सर्वत्र शाब्दबोधं मन्यन्ते।

अन्ये तु निरुक्तमहाभाष्यादिवचनं प्रमाणीकुर्वन्तः, तदुपोद्बलकयुक्तिजातं च निरूपयन्तः धात्वर्थमुख्यविशेष्यकं बोधं प्रतिपन्नाः।

परे तु व्यवहारातिप्रसङ्गाप्रसङ्गवारणे बद्धदृष्टयः, पदोपस्थापितानामनेकधा एकशाब्दबोधीयसांसर्गिकविषयतायां विद्वेषिणः, योग्येन साक्षात्संबन्धेन तत्तत्पदार्थस्य तत्र तत्रान्वयं स्वीकुर्वन्तः, अनुभवं च प्रमाणीकुर्वन्तः, प्रथमान्तसमभिव्याहारे प्रायः प्रथमान्तार्थमुख्यविशेष्यकं, क्वचित् निपातार्थमुख्यविशेष्यकम्, अन्यत्र धात्वर्थमुख्यविशेष्यकम्, अपरत्र आख्यातार्थमुख्यविशेष्यकं च बोधमुपपादयन्ति, वर्णयन्ति च तात्पर्यं तदनुसारेणानुशासनानामिति साररूपेण प्रतिज्ञाय — ततः क्रमशः पक्षत्रयं तत्तदनुगुणयुक्त्यनुशासनप्रदर्शनपूर्वकं विवेचितं शाब्दतरङ्गिण्यां वि. सुब्रह्मण्यशास्त्रिभिः। नैयायिकपक्षस्यानुभवानुसारित्वं च तत्र निरूपितम्।

तत्र मतत्रयरीत्या एकस्मिन् वाक्ये शाब्दबोधः

वैयाकरणमते —

"देवदत्तः तण्डुलं पचति" इत्यत्र तण्डुलपदोत्तरद्वितीयायाः आश्रयः (कर्म) अर्थः। तत्राभेदेन तण्डुलस्यान्वयः। कर्मणः स्वनिष्ठकर्मतानिरूपकत्वसंबन्धेन धात्वर्थे पाकेऽन्वयः। "पचति" इत्यत्र तिपः कर्ता अर्थः। तत्र देवदत्तस्याभेदेनान्वयः। कर्तुः पाके स्वनिष्ठकर्तृतानिरूपकत्वसंबन्धेनान्वयः। तथा च "देवदत्ताभिन्नकर्तृकः तण्डुलाभिन्नकर्मकः पाकः" इति धात्वर्थमुख्यविशेष्यको बोधः।

"देवदत्तेन पच्यते तण्डुलः" इत्यत्र तृतीयायाः कर्ता अर्थः। तत्र देवदत्तस्याभेदेनान्वयः। कर्तुश्च पाकेऽन्वयः। आख्यातस्य कर्म अर्थः। तत्र तण्डुलस्याभेदेनान्वयः। कर्मणश्च धात्वर्थे पाकेऽन्वयः। "देवदत्ताभिन्नकर्तृकः तण्डुलाभिन्नकर्मकः पाकः" इत्यन्वयबोधः।

---

[१] शा.त. पृ. १५९.

मीमांसकमते —

"देवदत्तः तण्डुलं पचति" इत्यत्र आख्यातस्य कृतिरूपा भावना अर्थः। तण्डुलपदोत्तरद्वितीयायाः अखण्डोपाधिरूपं कर्मत्वमर्थः। तत्राधेयतासंबन्धेन तण्डुलस्यान्वयः। कर्मत्वस्य स्वनिरूपकधात्वर्थपाकानुकूलत्वसंबन्धेन आख्यातार्थकृतौ अन्वयः। देवदत्तस्याधेयतासंबन्धेन कृतावन्वयः। धात्वर्थपाकस्य करणत्वसंबन्धेन कृतावन्वयः। स्वनिष्ठकरणतानिरूपकौदनोद्देश्यकत्वसंबन्धेन कृतावन्वय इति पर्यवस्यति। तथा च "देवदत्तसमवेता तण्डुलकर्मकपाकानुकूला पाककरणिका कृतिः" इति बोधः। यत्र तु द्वितीयान्तं विना "पचति" इत्येतावन्मात्रमुक्तम्, तत्र धात्वर्थपाकस्य आख्यातार्थकृतौ कर्मतासंबन्धेनान्वयः। "देवदत्तसमवेता पाककर्मिका कृतिः" इति बोधः।

"देवदत्तेन तण्डुलः पच्यते" इत्यत्र तृतीयायाः कर्तृत्वमर्थः। तस्य स्वनिरूपकपाकानुकूलत्वसंबन्धेन आख्यातार्थकृतावन्वयः। धात्वर्थस्य पाकस्य स्वकरणकौदनोद्देश्यकत्वसंबन्धेन कृतावन्वयः। आख्यातस्य तत्र कर्मत्वं भावना चार्थः। कर्मत्वे तण्डुलस्यान्वयः। कर्मत्वस्य स्वनिरूपकपाकानुकूलत्वसंबन्धेन कृतावन्वयः। तथा च "देवदत्तकर्तृकपाकानुकूला तण्डुलकर्मकपाकानुकूला पाककरणकौदनोद्देश्यिका कृतिः" इति बोधः।

नैयायिकमते —

"देवदत्तः तण्डुलं पचति" इत्यत्र द्वितीयायाः कर्मत्वमर्थः। तत्राधेयतासंबन्धेन तण्डुलस्यान्वयः। कर्मत्वस्य निरूपकतासंबन्धेन धात्वर्थे पाकेऽन्वयः। आख्यातस्य कृतिरर्थः। तत्र अनुकूलतासंबन्धेन धात्वर्थपाकस्यान्वयः। कृतेः आश्रयतासंबन्धेन देवदत्तेऽन्वयः। "तण्डुलनिष्ठकर्मतानिरूपकपाकानुकूलकृतिमान् देवदत्तः" इति प्रथमान्तार्थमुख्यविशेष्यको बोधः।

"देवदत्तेन पच्यते तण्डुलः" इत्यत्र तृतीयायाः कृतिरर्थः। तत्र देवदत्तस्य समवायेनान्वयः। कृतेर्जन्यतासंबन्धेन धात्वर्थपाकेऽन्वयः। आख्यातस्य कर्मत्वमर्थः। तत्र निरूपितत्वसंबन्धेन पाकस्यान्वयः। कर्मत्वस्याश्रयतासंबन्धेन प्रथमान्तार्थे तण्डुलेऽन्वय इति "देवदत्तसमवेतकृतिजन्यपाकनिरूपितकर्मतावान् तण्डुलः" इति बोधः।

जरन्नैयायिकेन जयन्तभट्टेन फलमुख्यविशेष्यको बोधः प्रत्यपादि। तदनुसारेण "देवदत्तः तण्डुलं पचति" इति वाक्यात् "देवदत्तसमवेतकृतिजन्यपाकजन्या तण्डुलनिष्ठा विक्लित्तिः" इति बोधः वर्णनीयः। कर्माख्यातेऽपि तथैव।

वेदान्तदेशिकैः आख्यातार्थकर्तृकर्ममुख्यविशेष्यकः बोधः स्वीकृतः।

शाब्दबोधे मुख्यविशेष्यविचारः

एतत्सर्वं संकलय्य अत्र सौकर्यार्थं विन्यस्यते।

शाब्दबोधो नाम शब्दजन्यं ज्ञानम्। शब्दो नाम परस्परान्वितार्थप्रतिपादकपदसमूहात्मकं वाक्यम्। "आप्तवाक्यं शब्दः" इति ह्याहुः[१]। "पदसमूहो वाक्यम्" इत्येतावन्मात्रोक्तौ "गौरश्वः पुरुषो हस्ती" इत्यादेः अनन्वितार्थकपदसमूहस्यापि वाक्यत्वं स्यात्। अतः 'परस्परान्वितार्थप्रतिपादक' इत्युक्तम्। "गौर्गच्छति" "अश्वो धावति" इत्यनयोः प्रत्येकं वाक्यत्वेऽपि तयोर्द्वयोर्मिलित्वा एकवाक्यत्वं न भवति, द्वयोर्वाक्यार्थयोः परस्परमनन्वयात्। तस्मात् साक्षाद्वा परंपरया वा स्वार्थविशेषणीभूतार्थप्रतिपादकयावत्पदविशिष्टं विशेष्यभूतार्थप्रतिपादकं पदमेकवाक्यम् इति पर्यवस्यति। इदमेव —

"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेत् विभागे स्यात्" इत्युक्तम्[२]। एकस्मिन्नर्थे अन्येषां विशेषणतया अन्वयः इत्येतत्सूचनायैव "साकाङ्क्षं चेद्विभागे स्यात्" इत्युक्तम्।

न च "गावो धावन्ति" इत्यत्र गोपदोपस्थाप्यानामनेकासां गवां विशेष्यत्वात् एकविशेष्यकत्वं नास्तीति कथमेकवाक्यत्वमिति वाच्यम्। 'एकविशेष्यक' इत्यस्य एकपदोपस्थाप्यविशेष्यकेत्यर्थात्। अथ वा एकधर्मावच्छिन्नविशेष्यकेत्यर्थः। "गावो धावन्ति" इत्यत्र अनेकगोविशेष्यकस्यापि बोधस्य एकगोत्वावच्छिन्नविशेष्यकत्वमस्तीति न दोषः।

"देवदत्तयज्ञदत्तौ गच्छतः" इत्यत्र द्वित्वविशिष्टयोरेव देवदत्तयज्ञदत्तयोर्विशेष्यत्वात् तादृशवाक्यजन्यबोधस्य एकधर्मावच्छिन्नविशेष्यकत्वमस्तीति एकवाक्यत्वमुपपद्यते।

न चैवमपि "देवदत्तः शुक्लां गां ददाति" इत्यत्र देवदत्तस्य क्रियां प्रतीव गोः शुक्लत्वं प्रति विशेष्यत्वात् एकविशेष्यकबोधजनकत्वाभावात् कथं तस्यैकवाक्यत्वमिति वाच्यम्। एकमुख्यविशेष्यकबोधजनकत्वमेकवाक्यत्वमिति विवक्षितत्वात्। प्रदर्शितवाक्यजन्यबोधे देवदत्त एक एव मुख्यविशेष्यः इति नानुपपत्तिः। मुख्यविशेष्यत्वं च इतराविशेषणत्वे सति विशेष्यत्वम्। शुक्लगुणं प्रति विशेष्यस्य गोः क्रियां प्रति विशेषणत्वात् न मुख्यविशेष्यत्वम्।

---

[१] त.सं. पृ. ६५.
[२] जै.सू. २.१.१४.४६.

तत्र एकस्मिन् वाक्ये पदेषु बहुषु प्रयुज्यमानेषु कस्य किं विशेषणम्? किं किमवान्तरविशेष्यम्? किं मुख्यविशेष्यमिति विचारणीयं भवति। तत्र वैयाकरणाः मीमांसकाः नैयायिकाश्च भिन्नभिन्नं पन्थानमाश्रयन्ते।

वैयाकरणमतम्

तथा हि वैयाकरणास्तावत् एवं मन्यन्ते —

कारकाणां क्रियायामन्वयः इत्यनुभवात् धात्वर्थक्रियायां सुबन्तार्थान्वय इति ज्ञायते। "नीलोत्पलमानयति" इत्यत्र समासार्थस्य नीलत्वविशिष्टोत्पलस्य द्वितीयार्थे कर्मणि, तस्य धात्वर्थे आनयनेऽन्वयः इति "नीलत्वविशिष्टोत्पलकर्मकमानयनम्" इति बोधो भवति। तथैव "नीलमुत्पलमानय" इति व्यासस्थलेऽपि "नीलकर्मकमानयनम्" "उत्पलकर्मकमानयनम्" इति पृथक् पृथक् बोधस्याननुभवात् द्विः कर्मत्वभानं विहाय, समानाधिकरणयोर्नीलोत्पलपदयोः नीलत्वविशिष्टोत्पलरूपैकार्थपरत्वमङ्गीकृत्य तस्य धात्वर्थे आनयने द्वितीयार्थकर्मत्वद्वारा अन्वयस्वीकारात्, "नीलत्वविशिष्टोत्पलकर्मकमानयनम्" इत्येव बोधः। एवं च सविशेषणानां विशेषणरहितानां वा कर्त्रतिरिक्तानां सर्वेषां कारकाणां धात्वर्थक्रियान्वयस्य नैयायिकादिभिरपि स्वीकृतत्वात् प्रथमान्तार्थस्य कर्तृकारकस्यापि तत्रैवान्वय उचितः, समानन्यायात् । तथा च "देवदत्तः नीलोत्पलमानयति" इत्यत्र द्वितीयार्थः कर्म, तत्र प्रकृत्यर्थस्य नीलत्वविशिष्टोत्पलस्य अभेदसंबन्धेनान्वयः। कर्मणः धात्वर्थे अन्वयः। तिङः कर्ता अर्थः। तत्राभेदसंबन्धेन प्रथमान्तपदार्थस्य देवदत्तस्यान्वयः। कर्तुरपि धात्वर्थे आनयनेऽन्वयः। तथा च "नीलत्वविशिष्टोत्पलाभिन्नकर्मकं देवदत्ताभिन्नकर्तृकं चानयनम्" इति धात्वर्थमुख्यविशेष्यको बोधः।

अत्र विषये प्रमाणमुपपत्तिश्चेत्थम् —

निरुक्तकारः[१] "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः" इत्युपक्रम्य "सत्त्वप्रधानानि नामानि" इति नामलक्षणं, "भावप्रधानमाख्यातम्" इत्याख्यातलक्षणं च वदति। "प्रकृतिः प्रत्ययो विभक्तिरित्येतावन्नाम, सत्ता द्रव्यं लिङ्गं संख्येति नामार्थः" इति निरुक्तभाष्यात्[२] सुबन्तं नामपदेन विवक्षितम्। एवम् आख्यातशब्देन तिङन्तमुच्यते। "आख्यातमाख्यातेन क्रियासातत्ये" इति कात्यायनवार्त्तिके[३] आख्यातशब्देन तिङन्तस्यैव बोधनात्। "सर्वमाख्यातजं नाम"

---

[१] नि.१.१.
[२] नि.भा. १.१, पृ. ४०,४१.
[३] ग.सू.२०, पा.सू. २.१.७२.

इत्यत्र[१] तु आख्यातशब्दः लक्षणया तिङन्तैकदेशं धातुमाचष्टे। न्यायवार्त्तिककारोऽपि "ते विभक्त्यन्ताः पदम्" इति[२] सूत्रव्याख्यानावसरे "द्वयी विभक्तिः स्वादयः तिबादयश्च। तत्र स्वाद्यन्तं नाम, तिबाद्यन्तमाख्यातम्" इति स्पष्टमभिदधे।

एवं च आख्यातेन तिङन्तेन चत्वारोऽर्था उच्यन्ते — भावः, कालः, कारकं, संख्या चेति। तत्र भावः धातुनोच्यते, कालकारकसंख्याः तिङा इति विवेकः। तेषु चतुर्ष्वर्थेषु कः शाब्दबोधे विशेष्यतया भासते इति जिज्ञासायामुक्तं — भावप्रधानमाख्यातमिति। भावो नाम धात्वर्थो व्यापारः तद्विशेष्यकबोधजनकं तिङन्तमिति निरुक्तवचनस्यार्थः। स्पष्टमुक्तं चेदं निरुक्तभाष्ये[३] "भाव-काल-कारक-संख्याश्चत्वारोऽर्था आख्यातस्य, तेषु भावः प्रधानम्" इति। तेन कालकारकसंख्याविशेषणकभावविशेष्यकबोधजनकत्वमाख्यातस्येति लभ्यते।

यद्यपि 'प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यम्' इति न्यायविरोधात् कथं प्रकृत्यर्थस्य भावस्य प्राधान्यमिति शङ्का अवतरति; तथापि "भावप्रधानमाख्यातम्" इति विशेषस्मृतिवचनबलात् प्रत्ययार्थप्राधान्यविषयको न्यायः सुबर्थविषयकतया संकोचनीयः, सुबर्थो हि कर्मत्वादिः प्रकृत्यर्थापेक्षया प्रधानो भवतीति। किं च "चैत्रेण सुप्यते" इत्यादिभावाख्यातस्थले धात्वर्थस्यैव प्राधान्यात् प्रत्ययार्थप्राधान्यन्यायो न सार्वत्रिकः।

अपि च "क्रियाप्रधानमाख्यातम्" इति महाभाष्यमपि धात्वर्थमुख्यविशेष्यकबोधे प्रमाणम्। न्यायभाष्यकारोऽपि पञ्चमेऽध्याये "प्रकृतादर्थादसंबद्धार्थमर्थान्तरम्" इति सूत्रे[४] "क्रियाकालयोगाभिधायि आख्यातम्, धात्वर्थमात्रं च कालाभिधानविशिष्टम्" इत्यभाषिष्ट। कालेन अभिधानेन = कारकेण, च विशिष्टं धात्वर्थमात्रमाख्यातार्थः इति तदर्थः। तेन च भाष्येण स्पष्टमेवावगम्यते यत् कालकारकान्वितो धात्वर्थ एव आख्यातजन्यबोधे मुख्यविशेष्य इति। न्यायवार्त्तिककारश्च "ते विभक्त्यन्ताः पदम्" इति[५] सूत्रव्याख्यानावसरे "क्रियाकालयोगाभिधायि क्रियाप्रधानमाख्यातम्, यथा 'पचति' इति" इति वदन् क्रियाप्राधान्यं मन्यते। एवं च प्राचीननैयायिकानामपि क्रियामुख्यविशेष्यकबोध एव संमतः।

ननु पूर्वोक्तवचनैः यत्र तिङन्तमात्रं प्रयुज्यते तत्र "एकाभिन्नकर्तृविशिष्टो व्यापारः" इत्याकारको भावविशेष्यको बोधो भवतीत्येतावन्मात्रमवगम्यते। यत्र

---

[१] नि.१.१२.
[२] न्या.सू. २.२.५८.
[३] नि.भा.१.१, पृ. ४१.
[४] न्या.सू. ५.२.७.
[५] न्या.सू. २.२.५८.

तिङन्तेन साकं प्रथमान्तमपि प्रयुक्तं, तत्र "देवदत्तः पचति" इत्यत्र "पाककर्त्रभिन्नो देवदत्तः" इति प्रथमान्तार्थमुख्यविशेष्यक एव बोधोऽस्तु इति चेत् — अत्रोच्यते। तत्रैव निरुक्ते "यत्रोभे, भावप्रधाने भवतः" इत्यनन्तरवाक्यात्[१] प्रथमान्तपदसमभिव्याहृततिङन्तादपि धात्वर्थविशेष्यकबोधस्यैव सूचितत्वात्। यत्र सुबन्ततिङन्ते पृथक् पृथक् प्रयुज्येते तत्र सत्त्वप्रधानं नाम, भावप्रधानमाख्यातम्। यत्र तु एकस्मिन् वाक्ये सुबन्तं तिङन्तं चोभयं प्रयुज्यते, तत्र कस्य प्राधान्यमिति शङ्कायामिदं वाक्यमवतीर्णं यत्रोभे इति। यत्र वाक्ये उभे = नामाख्याते, भवतः तत्र ते द्वे अपि भावप्रधाने इत्यर्थः। तथा च प्रथमान्तपदसमभिव्याहारस्थलेऽपि धात्वर्थस्यैव प्राधान्यं मन्यते निरुक्तकारः।

अपि च धात्वर्थक्रियाविशेषणकप्रथमान्तार्थमुख्यविशेष्यको बोधो यद्यङ्गीक्रियेत, तदा "पश्य मृगो धावति" इत्यत्र "तिङ्ङतिङः" इति[२] सूत्रस्थमहाभाष्यसंमता एकवाक्यता न स्यात्। "धावति मृगः" इत्यतो "धावनानुकूलकृतिमान् मृगः" इति बोधः, "पश्य" इत्यतः "दर्शनाश्रयस्त्वम्" इति बोधश्च वाच्य इति, वाक्यार्थस्य भिन्नत्वात् एकमुख्यविशेष्यकबोधजनकत्वरूपमेकवाक्यत्वं न निर्वहति। न च धावनानुकूलकृतिमन्मृगस्य कर्मतासंबन्धेन धात्वर्थे दर्शनेऽन्वयः, तस्य चाश्रयतासंबन्धेन त्वम्पदार्थेऽन्वय इति "धावनानुकूलकृतिमन्मृगकर्मकदर्शनाश्रयस्त्वम्" इत्याकारकस्य एकमुख्यविशेष्यकस्य बोधस्य जननात् एकवाक्यत्वमुपपद्यत इति वाच्यम्। नामार्थधात्वर्थयोः भेदेनान्वयस्याव्युत्पन्नतया कर्मत्वसंबन्धेन मृगस्य दर्शनेऽन्वयासंभवात्। अन्यथा तण्डुलस्य कर्मत्वसंबन्धेन पाकेऽन्वयविवक्षया "तण्डुलः पचति" इति वाक्यस्यापि साधुतापत्तेः। अतः कर्मत्वस्य संबन्धविधया भानासंभवात् प्रकारविधयैव भानं वक्तव्यमिति मृगपदोत्तरं कर्मत्वार्थकद्वितीयाविभक्तिः प्रसज्यते।

वैयाकरणमते तु "मृगो धावति" इत्यतः मृगकर्तृकं धावनं बोध्यते। तस्य कर्मतासंबन्धेन दर्शनक्रियायामन्वयः। तथा च "मृगकर्तृकधावनकर्मकं दर्शनम्" इति बोधो भवति। अत्र न कोऽपि व्युत्पत्तिविरोधो लक्ष्यते। दर्शनरूपैकमुख्यविशेष्यकबोधजनकत्वात् भाष्यसिद्धमेकवाक्यत्वं चोपपन्नं भवति।

मीमांसकमतम्

मीमांसकास्तु तिङर्थभावनामुख्यविशेष्यकं बोधं वर्णयन्ति। तथा हि — "तण्डुलम्" इत्यादीनि द्वितीयाद्यन्तानि पदानि क्रियापदं विना निराकाङ्क्षं बोधं न

---

१ नि.१.१.

२ पा.सू. ८.१.२८.

जनयन्तीत्यनुभवसिद्धम्। तेन तिङन्तपदं विशेष्यसमर्पकमिति लभ्यते। तत्रापि "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येन" इति व्युत्पत्तिबलात् प्रत्ययार्थस्यैव प्राधान्यं वक्तव्यमिति तिङर्थः भावनापरपर्याया कृतिरेव शाब्दबोधे मुख्यविशेष्यभूता। एवं च "चैत्रस्तण्डुलं पचति" इति वाक्ये द्वितीयायाः कर्मत्वमर्थः। तत्र तण्डुलस्याधेयतासंबन्धेन अन्वयः। कर्मत्वस्य निरूपकतासंबन्धेन (स्वनिरूपकधात्वर्थानुकूलत्वपर्यवसितेन) तिङर्थकृतावन्वयः। धात्वर्थस्य पाकस्य स्वकरणकौदनोद्देश्यकत्वसंबन्धेन कृतावन्वयः। चैत्रपदोत्तरप्रथमायाः "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इति[१] सूत्रानुसारात् प्रातिपदिकार्थश्चैत्रोऽर्थः। चैत्रपदं तात्पर्यग्राहकम्। प्रथमार्थस्य चैत्रस्य आधेयतासंबन्धेन भावनायामन्वयः। आख्यातार्थकालसंख्ययोरपि भावनायामेवान्वयः। संख्यायाः सामानाधिकरण्यसंबन्धेनान्वयः। कालस्याधेयतासंबन्धेनान्वय इति विशेषः। एवं च "चैत्रनिष्ठा तण्डुलकर्मकपाककरणकौदनोद्देश्यिका वर्तमाना एका भावना" इति बोधः। "भावप्रधानमाख्यातम्" इति निरुक्ते आख्यातशब्दः तिङ्परः। भावयतीति भाव इति व्युत्पत्त्या णिजन्तात् भूधातोः अच्प्रत्ययान्तत्वेन निष्पन्नः भावशब्दः भावनावाची। तिङश्च संख्या कालः भावना इति त्रयोऽर्थाः। तेषु भावना प्रधानभूतेति भावनामुख्यविशेष्यकबोधमेव निरुक्तकारो मन्यत इति।

नैयायिकमतम्

"पण्डितश्चैत्रः" इति वाक्यात् "पण्डिताभिन्नश्चैत्रः" इति बोधोऽनुभूयते। तत्र तिङन्तपदाभावात् धात्वर्थस्य वा तिङर्थभावनायाः वा मुख्यविशेष्यतया भानं न संभवति। तथा च क्वचित् प्रथमान्तार्थमुख्यविशेष्यकबोधस्य स्वीकरणीयतया तिङन्तसमभिव्याहारस्थलेऽपि तथैव बोधवर्णनं युक्तम्। दृश्यन्ते च बहुलं तिङन्तरहिताः प्रयोगाः —

"शशी दिवसधूसरो विगतयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनः
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे॥" इत्यादयः।

न च तत्रापि योग्यक्रियाध्याहारेणैव शाब्दबोध इति वाच्यम्। अनध्याहारेणैव निर्वाहेऽध्याहारस्यायुक्तत्वात्।

---

[१] पा.सू. २.३.४६.

अपि च वैयाकरणभूषणे "प्रायशो वाक्यस्य सुप्तिङन्तसमुदायत्वात् सुबन्तानां च प्रायः क्रियाविशेषणत्वात्" इति वदन्तः कौण्डभट्टाः तिङन्तशून्यमपि वाक्यमभ्युपगच्छन्ति। तथा आख्यातार्थव्यापाराश्रयत्वरूपस्य कर्तृत्वस्य निराकरणावसरे "आख्यातशून्ये 'देवदत्तः पक्ता' इत्यादौ देवदत्तस्याकर्तृत्वापत्तेः" इति भूषणसारेऽपि[१] तिङन्तरहितवाक्यप्रामाण्याङ्गीकारः प्रतीयते। अपि च "चैत्रेण शयितव्यम्" इति सुबन्तचयात्मकं वाक्यमपीष्यते वैयाकरणैः। अत एव "सुप्तिङन्तचयो वाक्यम्" इत्यस्य "सुबन्तचयः तिङन्तचयः सुप्तिङन्तचयः" इति मञ्जूषायां विवरणं कृतम्।

एवं च तिङन्तासमभिव्याहारस्थले प्रथमान्तार्थविशेष्यकबोधस्य स्वीकार्यत्वात् "चैत्रः पचति" इत्यादावपि तथैव बोधवर्णनं युक्तम्। तथा च "चैत्रस्तण्डुलं पचति" इति वाक्ये तण्डुलपदोत्तरद्वितीयायाः कर्मत्वमर्थः। कर्मत्वे प्रकृत्यर्थस्य तण्डुलस्याधेयतासंबन्धेनान्वयः। कर्मत्वस्य निरूपकतासंबन्धेन धात्वर्थे पाकेऽन्वयः। आख्यातार्थः कृतिः। तत्रानुकूलतासंबन्धेन धात्वर्थपाकस्यान्वयः। कृतेश्चाश्रयतासंबन्धेन प्रथमान्तार्थे चैत्रेऽन्वयः। आख्यातार्थस्य वर्तमानकालस्य कृतावन्वयः। आख्यातैकवचनस्य तु न एकत्वसंख्यार्थः। सुबेकवचनेनैव तल्लाभात्। तथा च "तण्डुलनिष्ठकर्मतानिरूपकपाकानुकूलकृतिमान् एकश्चैत्रः" इति बोधः।

किं च 'सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वम्' इति न्यायात् पूर्ववाक्यार्थे यः प्रधानं तस्यैव तच्छब्देन परामशो वक्तव्यः। धात्वर्थमुख्यविशेष्यकस्य आख्यातार्थकृतिमुख्यविशेष्यकस्य वा बोधस्याङ्गीकारे "आचार्यः प्रयाति, तस्य पादयोरभिवादय" इत्यत्रानुपपत्तिः। तथा हि — "आचार्यः प्रयाति" इति वाक्ये प्रधानस्य गमनस्य कृतेर्वा तच्छब्देन परामर्शे "पादयोरभिवादय" इत्यनेनान्वयानुपपत्तिः। नैयायिकमते तु आचार्यस्यैव प्रधानतया तस्य तच्छब्देन परामर्शे "पादयोरभिवादय" इत्यनेनान्वयः साधु संगच्छते।

एवं "व्याकरणमधीते वेत्ति वा" इत्यर्थे "तदधीते तद्वेद" इति सूत्रेण[२] अण्प्रत्यये वैयाकरणशब्दात् "व्याकरणाध्येता" इति बोधो भवति। तत्समानार्थकात् "व्याकरणमधीते" इति वाक्यादपि "व्याकरणाध्येता" इति बोध एवोचित इति प्रथमान्तार्थविशेष्यकबोधः पाणिनिसंमतश्च। न्यायकुसुमाञ्जलौ पञ्चमस्तबके उदयनाचार्यैः[३] —

---

[१] वै.भू.सा.पृ. ९५.

[२] पा.सू. ४.२.५९.

[३] न्या.कु.५.११, ९, पृ. ३३०, ३२४.

"न ह्यन्यतराकाङ्क्षा अन्वयहेतुः, अपि तूभयाकाङ्क्षा। प्रातिपदिकार्थो हि फलेनान्वयमलभमानः क्रियासंबन्धमपेक्षते। भावनापि व्यापारभूता सती व्यापारिणमिति उभयाकाङ्क्षा अन्वयहेतुः। अत एवानुभवोऽपि यावदुक्तं भवति 'पाकानुकूलवर्तमानयत्नवान्' इति तावदुक्तं भवति 'पचति' इति"

इति वदद्भिः प्रथमान्तार्थप्राधान्यं सूचितम्।

यत्तु "भावप्रधानमाख्यातम्" इति निरुक्तवचनमुदाहृतम्, तदप्याख्यातार्थेषु भावनाकालसंख्यासु कस्य प्राधान्यं कस्य वा अप्राधान्यमिति जिज्ञासायां भावनायाः = कृतेः, प्राधान्यमिति वदति। एवं च तद्वचनं भावनेतराख्यातार्थप्रकारतानिरूपितविशेष्यत्वरूपं प्राधान्यमेव बोधयति, न तु प्रथमान्तार्थप्रकारतानिरूपितविशेष्यत्वमपि। अतस्तद्वचनं न बोधस्य प्रथमान्तार्थमुख्यविशेष्यकत्वे बाधकम्। "यत्रोभे, भावप्रधाने भवतः" इति वाक्येनापि भावनायाः इतरकारकापेक्षया आर्थिकं प्राधान्यमेव बोध्यते, कारकाणां भावनिष्पत्त्यङ्गत्वात् इति न तद्विरोधः।

यदपि नैयायिकमते "पश्य मृगो धावति" इत्यत्र एकवाक्यत्वानुपपत्तिरिति। तत्र त्रेधा निर्वाह उच्यते। उक्तस्थले नैयायिकैरपि वैयाकरणमतरीत्या "मृगकर्तृकधावनकर्मकं दर्शनम्" इति बोधस्यैव स्वीकारात्। न हि सर्वत्र प्रथमान्तार्थमुख्यविशेष्यक एव बोध इति नियमः। उक्तं हि गदाधरभट्टाचार्यैः व्युत्पत्तिवादे[१] —

"अत एव यत्र विशेष्यवाचकसमानविभक्तिकपदं निपातपदं वा नास्ति, तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्यभावात् असौ मुख्यविशेष्यतयैव भासते"

इति। "चैत्रः" इत्यादौ समानविभक्तिकपदान्तरासत्त्वे प्रथमान्तार्थस्य चैत्रादेर्यद्विशेष्यं तद्भासकसामग्र्यभावात् असौ = प्रथमान्तार्थः चैत्रादिः, विशेष्यतयैव भासत इति तदर्थः। एतेन "चैत्रः" इत्यादौ एकत्वप्रकारकचैत्रविशेष्यकबोधात् सति संभवेऽन्यत्रापि तथैव बोधः। सति संभवे इति कथनात् "पचति" इत्यतः "पाकानुकूला कृतिः" इति कृतिमुख्यविशेष्यकस्य, "चैत्रेण सुप्यते" इत्यादौ "चैत्रकर्तृकः स्वापः" इति धात्वर्थमुख्यविशेष्यकस्य च बोधस्य नैयायिकैः स्वीकारात् क्वचित् प्रथमान्तार्थस्य मुख्यविशेष्यत्वाभावेऽपि न क्षतिरिति गम्यते। तेनैव न्यायेन "पश्य मृगो धावति" इत्यत्रापि बोधस्य धात्वर्थविशेष्यकत्वमिति प्रथमो निर्वाहः।

---

[१] व्यु.वा.पृ. ९१-९२.

"पश्य मृगो धावति" इत्यत्र इतिपदं त्वंपदं चाध्याह्रियते। "मृगो धावति इति त्वं पश्य" इत्यन्वयः। इतिशब्देन कर्मण उक्तत्वान्न द्वितीयाप्रसक्तिः। तिङ्कृत्तद्धितनिपातादिभिरनभिहिते कर्मण्येव द्वितीयाविधानात्। तथा च "धावनानुकूलकृतिमन्मृगकर्मकदर्शनाश्रयस्त्वम्" इत्येव बोध इति द्वितीयो निर्वाहः।

अथ वा इतिपदाध्याहारो नावश्यकः। यत्र पदार्थस्य कर्मत्वं तत्रैव द्वितीयाप्रसक्तिः, यथा "तण्डुलं पचति" इत्यादौ। अत्र तु धावनानुकूलकृतिमन्मृगरूपस्य वाक्यार्थस्य कर्मत्वात् न द्वितीयाप्रसक्तिः। वाक्यस्य प्रातिपदिकसंज्ञाविरहात्। अत एव "जानामि सीता जनकप्रसूता" इत्यादयः प्रयोगा अप्युपपद्यन्त इति तृतीयो निर्वाहः।

अपि च "आनय गौर्धावति" इत्यादौ वैयाकरणमतानुसारेण "गोकर्तृकधावनकर्मकमानयनम्" इति बोधस्य असम्भवात् "धावनानुकूलकृतिमद्गोकर्मकम् आनयनम्" इति बोधस्यैव वक्तव्यत्वात्, तस्य च बाधितार्थकत्वात् "गौर्धावति" इत्यतः प्रथमान्तार्थमुख्यविशेष्यक एव बोधः वैयाकरणैः स्वीकरणीयः। एवं "शृणु कोकिलः कूजति" इत्यादौ नैयायिकानामगतिः।

एवं च तत्र तत्र यथायोग्यं यथानुभवं च बोधः स्वीकरणीयः। प्रथमान्तार्थमुख्यविशेष्यको बोध इत्युत्सर्गः। सति बाधके धात्वर्थादिविशेष्यकोऽपि बोध इति नैयायिकानां सिद्धान्तः। भूषणसारकारैरपि सूचितमिदम्[१] —

"उत्सर्गोऽयम्। विशेष्यत्वादिना बोधस्तु तथा व्युत्पत्त्यनुरोधात्। अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः। अत एव 'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्' इति भगवान् पाणिनिः[२]। 'अशिष्यम्' इत्यनुवर्तते। प्रधानं प्रत्ययस्यार्थ इति वचनं न कार्यम्, अर्थस्य = तथा बोधस्य, अन्यप्रमाणत्वात् = व्युत्पत्त्यनुसारित्वादिति तदर्थः" इति।

अनेन स्पष्टमिदं यत् तत्तद्विशेष्यकबोधे नियामकं वचनं नापेक्षितम्, अनुभवानुसारिव्युत्पत्तिबलान्निर्णेयमिति।

किं च प्रत्यक्षानुभवे यस्य येन संबन्धः प्रतीतः तस्य तेन संबन्धं तथैव ज्ञापयितुं वाक्यं प्रयुज्यते। प्रत्यक्षेण च कारकाणां क्रियान्वय एवावगम्यते, न तु कृत्यपरपर्यायभावनान्वयः। अतो मीमांसकमतं नोचितम्। नापि वैयाकरणमतम्। प्रत्यक्षे धर्मस्य प्रकारतायाः, धर्मिणो विशेष्यतायाश्चानुभवसिद्धतया धर्मभूत-

---

१ वै.भू.सा.पृ. ८७.

२ पा.सू. १.२.५६.

धात्वर्थापेक्षया धर्मिणः प्रथमान्तार्थस्यैव विशेष्यत्वौचित्यात्। तत्रापि प्रकृतिप्रत्ययार्थयोर्मध्ये प्रत्ययार्थस्य प्रधानत्वात् तिङ्वाच्यायाः कृतेः धात्वर्थं प्रति विशेष्यत्वात् तादृशकृत्याश्रयस्य देवदत्तादेर्विशेष्यत्वमुचितम्। सकलकर्मादिकारकप्रेरकस्य क्रियाकर्तुः प्राधान्यं हि आनुभविकम्।

अपि च पाणिनिः "प्रातिपदिकार्थ..." इत्यादिना सूत्रेण[१] प्रथमायाः प्रातिपदिकार्थ एवार्थ इति वदन् कारकार्थकत्वं नानुमन्यते। तेन च प्रथमान्तार्थस्य क्रियायामन्वयं नानुमनुत इति स्पष्टम्। कारकार्थकत्वे हि क्रियाप्रधानकत्वनिर्बन्धः। तस्मात् प्रथमान्तार्थविशेष्यकबोध एवासति बाधके उचित इति नैयायिकसिद्धान्तसारः।

नूतनमतविचारः

एवमेतावता धात्वर्थमुख्यविशेष्यको बोधः, आख्यातार्थभावनामुख्यविशेष्यको बोधः, प्रथमान्तार्थविशेष्यको बोधः इति प्रकारत्रयं क्रमशो वैयाकरण-मीमांसक-नैयायिकमतसिद्धमधिकृत्य परिशीलनमकार्ष्म। जरन्नैयायिकेन जयन्तभट्टेन फलमुख्यविशेष्यको बोधो न्यायमञ्जर्यां सूत्रसंमततया उपपादित इति पूर्वमेवावोचाम। न केनापि नव्यनैयायिकेन जयन्तभट्टमतमुद्धृतम्।

अथ आख्यातार्थकर्तृकर्ममुख्यविशेष्यको बोध इति पञ्चमं प्रकारमद्य यावत् बोधग्रन्थेष्वनुट्टङ्कितं श्रीमद्वेदान्तदेशिकग्रन्थपरिशीलनेनावगतं विदुषां पुरतो निवेदयामः। न्यायपरिशुद्धिनामके ग्रन्थे[२] —

"प्रतिपत्तिप्रकारस्तु 'यजेत' इत्यादौ स्वव्यापारसाध्ययागादिविशिष्ट इति कर्तृप्राधान्येनैव" इत्युक्तम्।

तदिदं किंचिद्विव्रियते — द्वितीयाद्यन्तपदार्थानां विभक्त्यर्थद्वारा धात्वर्थेऽन्वय इत्यविवादम्। धात्वर्थस्य तिङर्थेऽन्वय इत्यपि 'प्रत्ययार्थः प्रधानम्' इति न्यायसिद्धम्। तिङर्थ एव क इति विचारे न तावत् कृतिः तिङर्थः। "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रेण[३] कर्तृकर्माद्यर्थे लकारानुशासनेन तद्विरोधात्। तथा च कर्तुः कर्मणो वा लकारार्थस्यैव विशेष्यत्वम्। प्रथमान्तार्थस्यापि तत्रैवाभेदेनान्वयः। तथा च "देवदत्तः तण्डुलं पचति" इति वाक्यात् "देवदत्ताभिन्नः तण्डुलकर्मकपाककर्ता" इति बोधः। "देवदत्तेन पच्यते तण्डुलः" इति वाक्यात्

[१] पा.सू. २.३.४६.
[२] न्या.प. पृ. २७१.
[३] पा.सू. ३.४.६९.

"तण्डुलाभिन्नं देवदत्तकर्तृकपाककर्म" इति बोधः। "आचार्यः प्रयाति तस्य पादयोः अभिवादय" इत्यत्र प्रधानस्य आख्यातार्थस्य कर्तुः तच्छब्देन परामर्शात् "पादयोरभिवादय" इत्यनेनान्वयोऽप्युपपन्नो भवति। "पश्य मृगो धावति" इत्यत्रापि "मृगो धावति" इत्यतः "मृगाभिन्नः धावनकर्ता" इति बोधात् तिङर्थस्य कर्तुः कर्मत्वेनान्वयः दर्शने इति नानुपपत्तिः कापि। तिङर्थस्य कर्मत्वेऽपि तिङन्तस्य प्रातिपदिकसंज्ञाविरहात् न द्वितीयापत्तिः। "त्वदभिन्नः मृगाभिन्नधावनकर्तृकर्मकदर्शनकर्ता" इति बोधः। "आनय गौर्धावति" इत्यत्रापि "गवाभिन्नधावनकर्तृकर्मकानयनकर्ता" इति बोध इति न काचिदनुपपत्तिः। "भावप्रधानमाख्यातम्" इति निरुक्तवचनं तु आर्थिकप्राधान्यपरतया कथंचिन्नेयम्। सर्वेऽपि कथंचिदेव हि तद्वचनं निर्वहन्ति।

अत इदं मतं युक्तियुक्तं प्रतिभाति।

एतावत्पर्यन्तं शाब्दबोधे मुख्यविशेष्यः क इति निरूपितम्। इतः उपरि एकवाक्यत्वादिलक्षणं निरूप्यते।

इति वाक्यार्थबोधे मुख्यविशेष्यविचारः

एकवाक्य-वाक्यभेदादिविचारः

एकवाक्यत्वविचारः

न्यायकोशे वाक्यादिलक्षणम्[1]

वाक्यं = पदसमूहः। वाक्यत्वं च विशिष्टार्थपरशब्दत्वम्[2]। वाक्यं द्विविधं प्रमाणवाक्यम्, अप्रमाणवाक्यं चेति। तत्र प्रमाणवाक्यम् आकाङ्क्षायोग्यतासंनिधिमतां पदानां समूहः। यथा "गामानय" इत्यादि[3]।

अथ वा यादृशशब्दानां यादृशार्थविषयिताकबोधं प्रति अनुकूला परस्पराकाङ्क्षा तादृशशब्दस्तोम एव तथाविधार्थे वाक्यम्[4]।

वैयाकरणास्तु "एकतिङ्" इत्याहुः[5]। एकतिङन्तार्थमुख्यविशेष्यकबोधजनकपदसमूह इत्यर्थः। तेन "पचति भवति" "पश्य मृगो धावति" "ब्रूहि ब्रूहि देवदत्त" इत्यादौ च क्रियापदस्यानेकत्वेऽपि नैकवाक्यताव्याघातः।

"सुप्तिङन्तचयो वाक्यम्" इत्यमरसिंह[6] आह। केचित्तु "स्वार्थबोधसमाप्तः पदसमुदायः" इत्याहुः।

"समभिव्याहारो वाक्यम्" इति मीमांसका आहुः। तदर्थश्च साध्यत्वदिवाचकद्वितीयाद्यभावेऽपि वस्तुतः शेषशेषिवाचकपदयोः सहोच्चारणम्। यथा "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति"[7]।

लिङादिपदघटितं वाक्यं द्विविधं — विधिः, निषेधश्च। तत्र विधिः "स्वर्गकामो यजेत" इत्यादिवाक्यम्। निषेधस्तु "न कलञ्जं भक्षयेत्" "न सुरां पिबेत्" इत्यादि[8]।

अप्रमाणवाक्यं तु आकाङ्क्षादिरहितं वाक्यम्। यथा "वह्निना सिञ्चति" "ह्रदो वह्निमान्" इत्यादिवाक्यम्।

---

[1] न्या.को.पृ.७३०. अत्र (प्र) इति चिह्नितं विना अन्यत्पृष्ठसंख्यादिकं न्यायकोशनिर्दिष्टपृष्ठसंख्ययैव निर्दिष्टम्।
[2] त.चिं.म. पृ. ४.
[3] तर्कभाषा. पृ. ४, (तर्कसंग्रह) (सा.द.).
[4] श.श.प्र. श्लो. १३, टी. पृ. ६३-६४. (प्र).
[5] व्या.वा. १२०१, म.भा.२.१.१, भा.२.पृ.३३६-३३७. (प्र).
[6] अ.को.१.६.२.
[7] तै.सं.३.५.७.
[8] अर्थसंग्रहे उत्तरभागे।

नैयायिकमते वाक्यं त्रिविधं — सुबन्तसमूहः, तिङन्तसमूहः, सुप्तिङन्त-समूहश्चेति। तत्राद्यः "त्रयः कालाः" इति। द्वितीयः "पचति भवति" इति। तृतीयः "चैत्रः पचति" इत्यादि। "त्रयः कालाः" इत्यत्र वर्तमानत्वासंभवेन "सन्ति" इत्येतस्य, दुर्ज्ञानत्वेन "ज्ञायन्ते" इत्येतस्य नाध्याहारसंभवः।

प्रकारान्तरेण वाक्यं द्विविधं — वैदिकं, लौकिकं च। तत्र वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकिकं तु आप्तोक्तं प्रमाणम्। अनाप्तोक्तमप्रमाणम्। तत्र वेदघटकं वाक्यं वैदिकम्[1]।

तस्येश्वरोक्तत्वे प्रमाणमनुमानम्। तच्च "वेदः पौरुषेयः, वाक्यत्वात्, भारतादिवत्" इति[2]। वैदिकं सर्वमेव प्रमाणमित्यत्र सर्वमेवेत्यस्य अबाध्यं वाक्यं सर्वमेवेत्यर्थः। तेन "आत्मा वै जायते पुत्रः" इति वेदस्य अप्रामाण्येऽपि न क्षतिः।

लौकिकं वाक्यं तु यत् धर्मबुध्या आप्तेनोक्तं तदेव प्रमाणमित्यर्थः। तेन बृहस्पतिप्रणीतनास्तिकसूत्रव्युदासः[3]।

प्रकारान्तरेणापि वाक्यं द्विविधं — महावाक्यम्, अवान्तरवाक्यं चेति (खण्डवाक्यम्)। तत्र महावाक्यं च स्वघटकानेकनामलभ्यतादृशार्थबोधकं वाक्यम्[4]।

एकवाक्यत्वं विशिष्टैकार्थप्रतिपादकत्वम्[5]। निरूप्यनिरूपकभावापन्नविषयताशालिबोधजनकत्वमित्यर्थः। यथा "देवदत्तो ग्रामं गच्छति" इति वाक्यस्यैकवाक्यत्वम्।

तत्प्रयोज्यविषयतया साक्षात् परम्परया वा निरूपिता या विषयता तत्प्रयोजकत्वम्[6]। अत्र तत्पदजन्यज्ञानरूपितत्वेन तत्पदप्रयोज्यत्वव्यवहारो विषयतायामिति बोध्यम्। अत्र विशेष्यताद्वयनिरूपितैकप्रकारताशालिज्ञानजनकवाक्ययोरेव एकवाक्यत्वमिति नियमो ज्ञेयः (कृष्ण०)।

तदुत्थाप्याकाङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्क्षोत्थापकत्वैतदन्यतरवत्त्वम्[7]। यथा प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते[8] इत्यादौ प्रतिज्ञा-

---

[1] वाक्यवृत्ति. ४ पृ. २०.
[2] तर्कसंग्रहदीपिका. पृ. ३४४. (प्र), सिद्धान्तचन्द्रोदय. ४. पृ. ३२.
[3] सिद्धान्तचन्द्रोदय. ४.३२.
[4] शब्दशक्तिप्रकाशिका. श्लो. ३. टी. पृ. ३८.
[5] ग.२. अव. पृ. २.
[6] ग.व्यु.का.१ पृ. २७.
[7] ग.२.अव.पृ. २.
[8] चि.२.अव.पृ.७६.

दीनां पञ्चानामेकवाक्यत्वम्। "तदुत्थाप्याकाङ्क्षानिर्वर्तकत्वं च तत्प्रतिपाद्यार्थ-विषयकज्ञानजन्या या आकाङ्क्षा तत्प्रतियोगिकनिवृत्तिजनकज्ञानजनकत्वम्। स्वभिन्नत्व-स्वानवच्छिन्नत्व-स्वसामानाधिकरण्यैतत्त्रितयसंबन्धेन विषयताविशिष्ट-विषयताशून्यबोधजनकवाक्यत्वम्" इत्यस्मद्गुरुभिक्षुशास्त्रिचरणाः प्राहुः।

एकवाक्यं द्विविधं पदैकवाक्यं वाक्यैकवाक्यं चेति। तत्राद्यं यथा "सोऽरोदीत्" इत्याद्यर्थवादसमुदायस्य पदस्थानीयतया विधिपदेनैकवाक्यता। द्वितीयं यथा यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोः आकाङ्क्षावशेन महावाक्यार्थबोध-कत्वम्। यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिवाक्यानां "समिधो यजति" इत्यादिवाक्यानां च परस्पराङ्गाङ्गिभावबोधकतया एकवाक्यता (वाच-स्पत्यम्)।

"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेत् विभागे स्यात्"[१]। अस्यार्थः — विभागे = वाक्यघटकपदानां विभागे, साकाङ्क्षम् = एकपदरहितस्यापरपदस्य शाब्दबोधा-जनकत्वं, तयोरेवार्थैकत्वम्, एकफलप्रतिपादकत्वम्। विभागे साकाङ्क्षत्वे सति एकफलप्रतिपादकत्वम्।

मीमांसाकोशे एकवाक्यादिलक्षणम्[२]

अथ मीमांसाकोशे स्थिताः एकवाक्यलक्षणादयः संगृह्यन्ते।

"वाक्यमपि क्रिययैव संबध्नीयात्"[३]।

"वाक्यम् आकाङ्क्षायोग्यतासंनिधिवशात् स्वार्थं प्रतिपादयति"[४]।

"वाक्यमेव अर्थप्रतिपादकम्। न केवलं पदं क्वचित् अर्थप्रतीतिं जनयति, वृद्धव्यवहारे तथा व्युत्पत्तिविरहात्, अन्वितस्वार्थाभिधानतयैव व्युत्पत्तेः। अर्थान्त-रापेक्षत्वाच्च। अन्वयस्य पदान्तरादृते तदनवगतेः। पदान्तरापेक्षत्वे च सिद्धं वाक्यस्यैव प्रतिपादकत्वम्, न केवलस्य पदस्य"[५]।

"वाक्यं कर्तृकर्मक्रियापदसमूहः"[६]।

"वाक्यं क्रियाप्रधानमेकार्थमेकप्रयोजनम्"[७]।

---

[१] जै.सू.२.१.४६.

[२] मी.को.भा.६, पृ.३४३८. अत्र (प्र) इति चिह्नितं विनान्यत्पृष्ठसंख्यादिकं मी.को.निर्दिष्टमेव।

[३] तं.वा.१.२.४.३१, भा.१. पृ. १८९. (प्र).

[४] जै.न्या.वि. १.१.७.

[५] ऋजु. पृ. १०३.

[६] वा.न्या.सु. २.१.१६.४८, पृ. ६९५ (चौ.पु.), भा.२.पृ. ५६५ (प्र).

[७] कणिका. पृ. ४३३.

"एकार्थः पदसमूहो वाक्यम्, यदि च विभज्यमानं साकाङ्क्षं पदं भवति। यावता क्रियाया उपकारः प्रकाश्यते तावत् वक्तव्यत्वात् वाक्यमित्युच्यते। तस्य विशिष्टस्य वाचकः एतावान् पदसमूहः तद् वाक्यम्।" [१]।

"एकार्थविधाने हि एकं वाक्यं भवति" [२]।

"यावन्ति पदानि एकं प्रयोजनमभिनिर्वर्तयन्ति तावन्ति एकं वाक्यम्" [३]।

"विभज्यमानसाकाङ्क्षसंहत्यार्थविशिष्टैकार्थप्रतिपादकपदसमुदायः" [४]।

"विशिष्टपदरचनात्मकं वाक्यम्" [५]।

"किं वाक्यं नाम? संहत्य अर्थमभिदधति पदानि वाक्यम्। एकार्थमनेकपदं वाक्यमित्युक्तमेव, तदेतत् सर्वेष्वेव वाक्येषु समवेतं विविक्तं च दृश्यते" [६]।

"संघातसिद्ध्यर्थं स्वस्वपदार्थमभिदधति पदानि वाक्यम्" [७]।

"सर्वमेव हि वाक्यं स्वार्थे पर्यवसिते अर्थान्तरापेक्षां न जहाति, न च तावता तदसमाप्तं भवति। या तु असावपेक्षा सा वाक्यान्तरेण पूरयिष्यत इत्यवगमात्, न वाक्यान्तरसंबन्धं न सहते" [८]।

"साकाङ्क्षपदसंनिधिमात्रं हि वाक्यम्" [९]।

"वाक्यानि लौकिकानि विज्ञातार्थे प्रयुज्यमानानि अध्याहार्यपदानि गौणानि विपरिणतव्यवहितार्थानि च प्रयुज्यन्ते" [१०]।

"ज्ञातं ह्यर्थं परस्मै प्रतिपादयितुं पुरुषाः प्रयुञ्जते वाक्यानि" [११]।

"वाक्येनान्वयानुभवजनने आकाङ्क्षायोग्यतासत्तिज्ञानं सहकारि। 'घटः कर्मत्वम्' इत्यादेः निराकाङ्क्षतया स्वरूपायोग्यात्, 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यादेः जनितान्वयबोधेन निराकाङ्क्षात्, 'वह्निना सिञ्चति' इत्यादेः अयोग्यात्, 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यादेः अनासन्नाच्च शाब्दबोधानुदयात्" [१२]।

---

[१] शा.भा. २.१.१४.४६.
[२] शा.भा. २.३.३.४.
[३] शा.भा. २.२.१२.२७.
[४] वा.न्या.सु.१.४.१९.३०, पृ. ५३३ (चौ.पु.), भा.२. पृ.२४६.(प्र).
[५] वा.न्या.सु. १.३.८.२४.
[६] शा.भा.३.३.७.१४, (चौ.पु.) पृ. ८२४-८२६, भा.४.पृ. २११. (प्र).
[७] वा.न्या.सु. ३.३.७.१४, (चौ.पु.) पृ. १२०९, भा.४.पृ. २५२. (प्र).
[८] तं.वा. २.२.६.१८, भा.३.पृ. १६९. (प्र).
[९] तं.वा.३.३.७.१४, भा.४.पृ. २४२. (प्र).
[१०] शा.भा. ४.३.१.२.
[११] बृहती पृ. २२.
[१२] भा.चिं.म.पृ. ६५.

वाक्यस्य पृथक् न वाचकत्वम्। लोकसिद्धेषु पदार्थेषु वर्तमानानामेव पदानां विशिष्टक्रियारूपवाक्यार्थज्ञानोपायत्वात्[१]।

मीमांसाकोशे वाक्यार्थस्वरूपम्[२]

"वाक्यार्थः अनेकपदार्थानुरक्तः। स च पदार्थमूलः, न निर्मूलः, न च संकेत-मूलः" [३]।

"वाक्यार्थोऽपि पदार्थोपजनितो भवति नान्यथा। तदुक्तं[४] 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्' " [५]।

"वाक्यार्थश्च पदार्थपूर्वको भवति" [६]।

"वाक्यार्थः पदार्थसामर्थ्यजनितो भवति" [७]।

पदज्ञानकरणको वाक्यार्थो द्विविधः भेदरूपः संसर्गरूपश्च, "राज्ञः पुरुषः" इत्यादौ "अराजसंबन्धिभिन्नः पुरुषः" इत्यन्वयबोधात् इति केचित्।

सर्वत्र संबन्ध एव वाक्यार्थः, उक्तरूपापोहस्य प्राचुर्येण भानाभावात्, अपोहस्याप्रसिद्धेश्च। अतः संसर्ग एव वाक्यार्थः। स च "घटमानय" इत्यादौ घट-कर्मकत्वादिरूपविशेषणविशिष्टं विशेष्यमेव वाक्यार्थः इत्याचार्याः।

तस्य च विशिष्टवैशिष्ट्यरूपवाक्यार्थस्य भानं चतुर्विधम्। विशिष्टस्य वैशिष्ट्य-रूपमेकम्। विशेष्ये विशेषणं, तत्र च विशेषणान्तरमित्यपरम्। यथा "नीलदण्ड-वान् पुरुषः"। एकविशिष्टे अपरवैशिष्ट्यमिति तृतीयं, "दण्डी देवदत्तः कुण्डली" इति। एकत्र द्वयमिति चतुर्थं, यथा "दण्डी कुण्डली देवदत्तः" [८]।

"वाक्यार्थः संसर्गः नैयायिकमते। अर्थभावनैव कारकविशिष्टरूपेण मीमांसक-मते" [९]।

"वाक्यार्थः सर्वकारकान्वितक्रियारूपः" [१०]।

---

[१] शाबरभाष्यस्य वैद्यनाथीयव्याख्या. १.१. ७.२५, भा.१.पृ. ११५. (मी.को.३४४७).
[२] मी.को.पृ. ३४६३.
[३] शा.भा. १.१.७.
[४] जै.सू.१.१.७.२५.
[५] शा.भा. ४.३.१.२.
[६] शा.भा. ५.१.५.४.
[७] शा.भा. ५.१.११.२.
[८] भा.चिं.म. पृ. ७९-८०.
[९] बाल. पृ. ७३.
[१०] वा.न्या.सु.३.३.४.११, (चौ.पु.) पृ. ११९०. भा.४.पृ.१९४. (प्र).

"आकृतिपदार्थपक्षे शुक्लगोत्वयोः स्वरूपेणाभिहितयोः संनिधानात् इतरेतरानुरञ्जनमर्थसिद्धभेदं वाक्यार्थः। स च गोत्वे शुक्लत्वसंसर्गः, शुक्लत्वे वा गोत्वसंसर्गः सामस्त्येन एकैकव्यक्त्युपसंहारात् उपलभ्यते इति नाना। अस्माकमाकृतिपदार्थकत्वात् नैव भेदो वाक्यार्थत्वेनाभिप्रेतः। यदा भेदवन्तः पदार्था एव वाक्यार्थः तदा सिद्धमेव नानात्वम्, न तु अर्थैकत्वं सिध्यति" [१]।

"नाप्रसिद्धे पदार्थे हि वाक्यार्थः संप्रतीयते" [२]।

"न चासंप्रतिपन्नपदार्थको वाक्यार्थः प्रमाणं भवति। पदार्थो हि वाक्यार्थस्य मूलम्, नास्य पृथक् सिद्धिरस्ति" [३]।

"न हि अनन्वितः पदार्थो भवति वाक्यार्थः" [४]।

"न हि द्वौ स्वतन्त्रौ पदार्थावगृहीत्वा वाक्यार्थः प्रतीयते" [५]।

"पदेभ्य एव पदार्थप्रत्ययः, पदार्थेभ्यो वाक्यार्थः" [६]।

"पदार्थैः संस्कृतः पिण्डितोऽर्थो वाक्यार्थः" [७]।

"पदेतरार्थेऽवगते पदार्थोऽवधार्यते, तदुत्तरकाले वाक्यार्थः" [८]।

"विशिष्टार्थसंप्रत्ययश्च वाक्यार्थः" [९]।

"संकेतानपेक्षैरेव पदैः पदार्थाः प्रतिपाद्यन्ते, तैरपि अनपेक्षितसंकेतैः वाक्यार्थः इत्युक्तम्" [१०]।

"सर्वत्र तु बोधिते पदार्थे वाक्यार्थ उपपद्यते नान्यथा। सामान्यवृत्ति हि पदम्, विशेषवृत्ति वाक्यम्। सामान्येनाभिप्रवृत्तानां पदानां यद्विशेषेऽवस्थानं स वाक्यार्थः। तदेतदुक्तं[११] 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्' इति" [१२]।

"वाक्यार्थे शक्तिः लक्षणा वा। वाक्यार्थे वाक्यस्य शक्तिरिति वैयाकरणाः। कार्यान्विताभिधानाङ्गीकारेण कार्यान्वयरूपे वाक्यार्थे पदानां शक्तिरिति गुरवः।

---

[१] तं.वा. २.१.१४.४६, भा.२.पृ. ५२९. (प्र).
[२] श्लो.वा. निरालम्बन. ५९.
[३] शा.भा. १०.७.९.२९.
[४] शा.भा.३.२.१.१, भा.४.पृ.१. (प्र).
[५] तं.वा.२.२.९.२३, भा.३. पृ. २१९. (प्र).
[६] शा.भा. १.१.७.२६.
[७] शा.भा. १.१.८.३२.
[८] मी.वा. ६.१.१.१, पृ.१३४६ (आ.पु.).
[९] शा.भा. १.१.७.२५.
[१०] शास्त्रदीपिका. १.१.८.
[११] जै.सू.१.१.७.२५
[१२] शा.भा. ३.१.६.१२, पृ. ६८९ (आ.पु.), भा.३.पृ.५५९. (प्र).

इतरान्विताभिधानाङ्गीकारेण अन्वयरूपे वाक्यार्थे शक्तिः इति वेदान्तिनः। संसर्गमर्यादया वाक्यार्थभानमिति नैयायिकाः। वाक्यार्थे लक्षणेति सिद्धान्तः"[१]।

"पदार्थैः पदविज्ञातैः वाक्यार्थः प्रतिपाद्यते।
लोकसिद्धैर्न तत्रास्ति वाक्यैकत्वनिमित्तता॥

यदि हि वाक्यं पदवद्वाचकं भवेत्, ततस्तदेकत्वानेकत्वानुवर्तिता वाक्यार्थस्य अभ्युपगम्येत कदाचित्। यदा तु पृथग्भूतैरेव पदैरितरेतरनिरपेक्षैः स्वेषु पदार्थेषूक्तेषु तत्संसर्गादेव पदव्यापारानपेक्षो वाक्यार्थप्रत्ययो भवति, तद्वशेन च तावन्ति पदान्येकं वाक्यमित्यवधार्यते, न तदा वाक्यतदेकत्वयोर्व्यापारं पश्यामः।

भावनैव च वाक्यार्थः स्वकारकविशेषिता।
तस्याश्च ज्ञायते नित्यं भेदः शब्दान्तरादिभिः॥"[२]

एकवाक्यत्वलक्षणाधिकरणम्[३]

"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति सूत्रकारः[४] एकवाक्यलक्षणमभिहितवान्। तत्र शास्त्रदीपिका —

ऋग्यजुस्सामरूपे वेदविभागेऽभिहितेऽधुना तदवान्तरभेदं कथयितुं प्रस्तावः। तत्र ऋक्साम्नामध्येतृसिद्धो भेदो न वक्तव्यः। यजुषां तु प्रश्लिष्टपठितानां भेदो न सुज्ञान इति तत्परिज्ञानाय यजुषः परिमाणलक्षणमुच्यते। यावत् एकप्रयोजनं विभागे च साकाङ्क्षं पदजातं, तावत् यागसाधनत्वात् यजुः, वक्तव्यत्वाच्च वाक्यम्। एतस्माच्चेत् कारणादेकवाक्यत्वं यत्ततोऽन्यत् वाक्यान्तरं यजुरन्तरं चेत्युक्तं भवति। उदाहरणं च "देवस्य त्वा सवितुः प्रसवे" इति। अत्र हि सर्वाणि पदानि निर्वापप्रकाशकानि, विभागे साकाङ्क्षाणि च। तस्मादेषाम् एकयजुष्ट्वम् — इति।

तत्र सोमनाथीयम् — अधुनेति। "ऋचः सामानि यजूंषि" इति मन्त्रगतऋगादिप्रातिपदिकार्थज्ञानानन्तरं बहुवचनावगतऋगादिभेदनिरूपणस्य प्राप्तावसरत्वादिति भावः। यद्येवम्, ऋक्सामयोरपि अवान्तरभेदो वक्तव्यः स्यादित्यत आह — तत्रेति। एकप्रयोजनमिति। अर्थशब्दोऽत्र नाभिधेयवाची, किं तु प्रयोजनवचन इति वार्तिके प्रपञ्चितमिति भावः। एकप्रयोजनत्वमात्रे कृते "भगो वां विभजतु"

---

[१] भा.चिं.म.पृ.८०-८३. उद्धृतं. मी.को. पृ. ३४६४.
[२] तं.वा.२.१.१४.४६, भा.२.पृ. ५२७. (प्र). उद्धृतं. मी.को. पृ. १२८५.
[३] शा.दी.२.१.१६.४६,पृ. ११७.
[४] जै.सू. २.१.४६.

"अर्यमा वां विभजतु" इत्यादीनां पुरोडाशविभागप्रदर्शनरूपैकप्रयोजनत्वात् एकयजुष्ट्वं स्यात्। तद्व्यावृत्त्यर्थं 'विभागे सति साकाङ्क्षत्वम्' इत्येतावदुक्ते "स्योनं ते सदनं कृणोमि" इत्यस्य कृत्स्नस्य एकयजुष्ट्वं स्यात्। "तस्मिन् सीद" इति तच्छब्दबलेन विभागे साकाङ्क्षत्वात्। अतः 'एकप्रयोजनत्वम्' इति। तत्र पूर्वभागस्य सदनकरणप्रकाशनम्, उत्तरभागस्य प्रतिष्ठापनं प्रयोजनमिति नातिप्रसङ्गः।

ननु यजुःपरिमाणविचारे एकवाक्यलक्षणमसंगतम् इत्याशङ्क्य, नात्र लौकिकसाधारण्येन एकवाक्यलक्षणमुच्यते, किं तु "तावदेकं यजुः" इत्येकयजुष एवेत्याशयेन सूत्रे वाक्यशब्दस्य यजुःपरत्वं यजुःशब्द-वाक्यशब्दयोरेकार्थपरत्वप्रदर्शनेनाह — यागेति। वक्तव्यत्वादिति। यागप्रयोगे उच्चारणीयत्वादित्यर्थः। ततश्चेदमपि यागसाधनत्वे पर्यवसितमिति भावः। वक्तव्यत्वादित्यनेनैव यावदेकं यजुः तावत् प्रयोगसमये प्रयोक्तव्यम्, न तु तदेकदेशः इति प्रयोजनमपि सूचितम्। एवं च तत्प्रयोजनसूचनायैव सूत्रे यजुःशब्दे प्रयोक्तव्येऽपि, वाक्यशब्दप्रयोग इति नाकौशलं सूत्रकारस्येति द्रष्टव्यम्। नन्वेवमपि कथं यजुर्वेदावगतिः इत्यत आह — एतस्मादिति। वाक्यान्तरमित्यस्य विवरणं यजुरन्तरमिति। एकयजुष्ट्वे उक्ते यजुरन्तरमिति चार्थादुक्तमित्यर्थः। ननु "अश्विनोर्बाहुभ्याम्" इत्यादेः निर्वापेऽसमर्थत्वात् तत्र कथमेकप्रयोजनत्वमित्यत आह — अत्र हीति। "अश्विनोः" इत्यादेरपि स्तुत्या निर्वापार्थत्वं वक्ष्यत इति भावः।

वाक्यभेदाधिकरणम्

"समेषु वाक्यभेदः स्यात्"[१]।

एकप्रयोजनं सर्वं विभज्यमानं साकाङ्क्षं पदजातमेकं यजुः इत्युक्तम्। अनेन लक्षणेन यत्र कर्मसमवेतार्थप्रकाशकं "निर्वपामि" इत्यादिपदमस्ति तत्रैतत् सुगमं परिमाणम्। अथ यत्र समवेतार्थप्रकाशकपदाभावेन लैङ्गिकविनियोगाभावे वाचनिको विनियोगः, परस्परनिराकाङ्क्षं च स्वरूपं गम्यते, यथा "इषे त्वोर्ज्जे त्वा" इति, यथा च "आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम्" इति, तत्र किं यदेकं यजुः इति चिन्त्यते। किं दृष्टार्थमन्त्रावधेः प्राक्[२] एकमन्त्रत्वम्? उत यावदेव मिथःसंबद्धम् "इषे त्वा" इति तावदेकं यजुः, अन्यच्च यजुरन्तरमिति? तदर्थं च किं सर्वमेकार्थम् उत भिन्नार्थमिति विचारः। तत्र तावत् —

> अदृष्टार्थत्वमेतेषामनुष्ठेयाप्रकाशनात्।
> तच्चैकं तत्र साकाङ्क्षाः सर्व इत्येकवाक्यता॥

---

[१] जै.सू.२.१.१५.४७.

[२] "वायुवत्स्थ" इत्यस्य वायुवत् शीघ्रगामिनो भवथेत्येवं वत्सानां मातृसकाशात् अपाकरणरूपार्थप्रकाशनार्थत्वेन दृष्टार्थत्वात् ततः प्रागित्यर्थः।

अदृष्टं हि कल्प्यमानमेकमेव युक्तम्। तावतैवोपपत्तेः। अतः सर्वे तावदेकार्थाः। तच्च सर्वेषां सह कल्पितमिति संभूयकारित्वात् विभज्यमानाः साकाङ्क्षा भवन्तीत्येकवाक्यता।

निश्चिते च मन्त्रैकत्वे यद्यपि प्रतीकभेदेनानेकत्र विनियोगः "इषे त्वेति छिनत्ति" "ऊर्जे त्वेत्यनुमार्ष्टि" इति, तथापि यावद्विनियोगं सकल आवर्तिष्यते।

उच्यते —

यद्यप्येषामदृष्टोऽर्थस्तथापि न तदेकता।
रूपतो हि निराकाङ्क्षा भिन्नत्वेनावधारिताः॥
अन्योन्यानादरेणैव प्रार्थयन्ते प्रयोजनम्।
यथापेक्षमतस्तेषां भिन्नादृष्टप्रकल्पनम्॥
यथा विश्वजिदादीनां भेदेन फलकल्पना।
यथा च समिदादीनामपूर्वं भिन्नमिष्यते॥
तद्वदत्र न चात्रैषामदृष्टार्थत्वसंभवः।
शाखाच्छेदप्रकाशेन दृष्टार्था हि विधेरमी॥

विनियोज्यस्वरूपाज्ञाने विनियोगस्यैवासंभवात्, प्रथमं विनियोज्यमन्त्रस्वरूपे पर्यालोच्यमाने, परस्परनिरपेक्षतया भेदस्यैव प्रतीतेः, तदनुसारेण परस्परनिरपेक्षतयैवादृष्टं कल्पनीयमित्यर्थः। एवं च यत्र मन्त्रैक्यं लिङ्गवशेनावगतं तत्रैव अन्त्यप्रतीकग्रहणेन विनियोगः। यथा —

"आ नः प्राण एतु परावत आन्तरिक्षाद्दिवस्परि।
आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा"

इति मन्त्रस्य "अमृतमसि प्राणाय त्वेति हिरण्यमभिव्यनिति" इति अन्त्यप्रतीकग्रहणेन विनियोगो, न तु सर्वत्रेति भावः।

किं च "इषे त्वेति छिनत्ति" इति शाखाच्छेदने करणत्वेन मन्त्रो विधीयते। क्रियानिर्वर्तकं च करणं भवति। न च मन्त्राणां क्रियानिर्वर्तकत्वमन्यतः प्रकाशनात्। तेन विधिबलादेषां प्रकाशनार्थत्वम् । तत्र यावता विना चोदितस्य प्रकाशनं न संभवति तावदध्याहर्तव्यं "छिनद्मि" इत्यादि। तत्रैकेन छेदनं प्रकाश्यते, अन्येनानुमार्जनम् इत्यर्थभेदात् मन्त्रभेदः।

तथा "आयुर्यज्ञेन कल्पताम्" इत्यादीनामपि स्वरूपतो निराकाङ्क्षत्वात् "क्लृप्तीर्वाचयति" इति च क्लृप्तिबहुत्ववचनस्य चोदितत्वात् तत्संपत्त्यर्थम् आयुरादिविशिष्टक्लृप्तिभेदप्रकाशनपरत्वात् अर्थभेदेन मन्त्रभेदः।

"क्लृप्तीर्वाचयति" इत्यत्र क्लृप्तिशब्दो न मन्त्रपरः, तत्र लक्षणापत्तेः। किं तु क्लृप्त्यर्थपर एव। ततश्च, क्लृप्त्यर्थं बहुधा वदन्तं यजमानं प्रयोजयतोऽध्वर्योर्व्यापारः विहितः अर्थात् यजमानकर्तृकक्लृप्तिबहुत्ववचनविधिं कल्पयतीति, कल्पितेन विधिना यजमानकर्तृकक्लृप्त्यर्थबहुत्ववचनस्य विहितत्वात्, तन्निर्वाहार्थम् "आयुर्यज्ञेन कल्पताम्" इत्यादेः आयुरादिविशिष्टक्लृप्तिप्रकाशनपरत्वमेव, न तु "भगो वां विभजतु" इत्यादौ विभागसामान्यप्रकाशनार्थत्वमिव क्लृप्तिसामान्यप्रकाशनार्थत्वमिति प्रकाशमानायुरादिविशिष्टक्लृप्तिविशेषरूपार्थभेदेन तत्रापि मन्त्रभेद आवश्यक इति तात्पर्यम्।

"सर्वमेव हि वाक्यं स्वार्थे पर्यवसितेऽर्थान्तरापेक्षां न जहाति, न च तावता तदसमाप्तं भवति। या तु असौ अपेक्षा सा वाक्यान्तरेण पूरयिष्यत इत्यवगमात् न वाक्यान्तरसंबन्धं न सहते"[१]।

"साकाङ्क्षपदसंनिधिमात्रं हि वाक्यम्"[२]।

अनुषङ्गाधिकरणम्[३]

अत्रापि यजुःपरिमाणमेव चिन्त्यते। यत्र बहूनां वाक्यशेषापेक्षिणां वाक्यानां संनिधावेकस्यानन्तरदेशे परिपूरणसमर्थो वाक्यशेषः श्रूयते, यथा "या ते अग्ने अयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीत्त्वेषं वचो अपावधीत्स्वाहा। या ते अग्ने रजाशया, या ते अग्ने हराशया" इति। अत्र उत्तरौ मन्त्रावुदाहरणम्। किमेतयोर्लौकिकः शेषोऽध्याहार्यः, उत योऽसौ पूर्वमन्त्रानन्तरं पठितः "तनूर्वर्षिष्ठा" इत्यादिः, स एव सर्वेषामर्थेनाम्नातः पूर्वस्येवोत्तरयोरप्यनुषङ्गेण शेष इति। अध्याहारपक्षे "या ते अग्ने रजाशया" इत्येतावानेव मन्त्रः, अध्याहृतस्य लौकिकस्य ऊहादिवत् अमन्त्रत्वात्। अनुषङ्गपक्षे तु तत्सहित एव मन्त्र इत्यस्ति परिमाणे महान् विशेषः। तत्र —

> एकत्रैव निबद्धो हि समाम्नायेन वैदिकः।
> शेषोऽन्यत्र न नेतव्यो लौकिकस्त्वनिबन्धनः॥

लौकिको हि शब्दः सर्वार्थो न क्वचिदेव विशेषेण निबद्धः। स यत्र यत्र कार्यं तत्र सर्वत्र यथेष्टं विनियुज्यमानो न विरुध्यते। वैदिकस्तु यदर्थमाम्नातस्तेनैव निबद्धो नान्यत्र नेतुं शक्यते। नीयमानो वा समाम्नायबहिर्भावात् लौकिक एव

---

[१] तं.वा.२.२.६.१८, भा.३.पृ.१६९.
[२] तं.वा.३.३.७.१४, भा.४.पृ. २४२.
[३] जै.सू.२.१.१६-१७, शा.दी. पृ. ११८.

स्यात्। यथास्थानमुच्चारणे हि तस्य वैदिकता, न तु तद्भेदे। न च सर्वार्थमाम्नात इति वाच्यम्। सकृदाम्नातस्यानेकार्थत्वानुपपत्तेः। सकृदर्थप्रत्यायकत्वमात्रेण वाक्यशेषनैराकाङ्क्ष्यात् सर्वार्थत्वे प्रमाणाभावात्। न चागृह्यमाणविशेषत्वम्। आनन्तर्येण देशभेदेन च विशेषग्रहणात्। प्रथमस्य ह्यसावनन्तरो, न तृतीयस्य। द्वितीयस्य तु यद्यप्यनन्तरः, तथापि परस्ताद्भावित्वेन वाक्यशेषस्यापेक्षिततत्वात् न पुरस्ताद्भाविना संबन्धः। प्रथमस्य तु अपेक्षित एव देशे पठितः, तस्मात्तस्यैवायं शेष इति प्राप्तेऽभिधीयते —

यथापेक्षितरूपे हि वाक्यशेषे समर्पिते।
वेदेन लौकिकः शेषो न मृग्यो निष्प्रमाणकः॥

बुद्धिविपरिवृत्तिमात्रेण साकाङ्क्षैः सर्वैः संबन्धसिद्धेः सर्वान्ते प्रत्येकमसकृत् पाठोऽनर्थकः। पुनः पुनरसमाम्नातोऽप्ययं शेषः सर्वार्थतयैवाम्नात इति युक्तमङ्गीकर्तुम्। एवं वेदसमर्पितेन शेषेण सर्वेषां नैराकाङ्क्ष्यसिद्धेः लौकिकोऽध्याहारो निष्प्रमाणकः। शक्नोति चायं सर्वैः संबन्धुम्। प्रथमेन हि संबद्धः द्वितीयस्याप्याकाङ्क्षावेलायां बुद्धौ विपरिवर्तमानस्तेनापि संबध्यते। तत्संबन्धाच्च बुद्धिविपरिवृत्त्यभङ्गात् तृतीयेनापि संबन्धसिद्धिः। तुल्यो ह्यस्य सर्वैर्योगः। आकाङ्क्षाद्यविशेषात्। एवं चैकत्र निबन्धनं नेतरान्वयप्रतिकूलमिति सर्वशेषता तस्य।

एवं तावत् साकाङ्क्षेषु अनुषङ्ग उक्तः। यत्र तु निराकाङ्क्षाणामेकार्थानां संनिधावेकस्यानन्तरं वाक्यशेषः श्रूयते, यथा "चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनातु" इति, सर्वे निराकाङ्क्षा यजमानपावनार्थाः सत्यप्येकार्थत्वे वचनात् समुच्चीयन्ते। तेषामन्ते "अच्छिद्रेण पवित्रेण" इति शेषः समाम्नातः। स किं पूर्वैरप्यनुषज्यते, किं वा परस्यैव मन्त्रस्य शेषः इति। तत्र शेषस्तावदेकेनैवानन्तरेण संबध्य निराकाङ्क्षः संपद्यते। शेषिणस्तु प्रागेव निराकाङ्क्षाः। तेन अनुषङ्गो निष्प्रमाणक इति।

उच्यते। पुनातुशब्देन एकवाक्यतामुपगतोऽयमच्छिद्रादिः करणद्वारेण पावनक्रियाप्रकाशनार्थः। सैव च क्रिया पूर्वाभ्यामपि मन्त्राभ्यां प्रकाश्यते। तदर्थश्च वाक्यशेषः प्रधानवशात् तत्राकृष्यत इत्यनुषङ्गसिद्धिः।

व्यवेतानुषङ्गाधिकरणम्[1]

"सं ते वायुर्वातेन गच्छतां, सं यजत्रैरङ्गानि, सं यज्ञपतिराशिषा" इति श्रूयते। तत्र "गच्छताम्" इत्ययं शब्दः "सं यजत्रैरङ्गानि" इत्यनेन बहुवचनान्तेनायोग्यत्वान्न

[1] जै.सू.२.१.१८.४९, शा.दी. पृ. १२०.

संबध्यते। "सं यज्ञपतिराशिषा" इत्यत्र तु योग्यत्वात् अनुषङ्गेण संबध्यत इत्याशङ्कायामुच्यते। पूर्वत्र = "सं यजत्रैरङ्गानि" इत्यत्र, असंबद्धत्वेन बुद्धिविपरिवृत्तिभङ्गात् नानुषङ्गः।

सर्वत्र तुल्ययोगित्वादनुषङ्गो हि वर्णितः।
असंबन्धितिरोधाने व्यवधानान्न तुल्यता॥

न च "सं यजत्रैरङ्गानि" इत्यत्र "गच्छताम्" इत्येकवचनस्यासंबन्धेऽपि, धातोः संबन्धसंभवात् तन्मात्रस्य सर्वत्रानुषङ्गोऽस्त्विति वाच्यम्। प्रकृतिप्रत्यययोः परस्परान्वितयोरेव पदान्तरेण संबन्ध इति तयोरेकस्यासंबन्धे सत्यपरस्याप्यसंबन्धनियमेन धातुमात्रस्य अनुषङ्गायोगात्।

शंकरमिश्रकृते मीमांसाबालप्रकाशे विशेषाः[१]

वाक्यमपि द्विविधं — महावाक्यम् अवान्तरवाक्यं चेति।
तदुक्तं[२] —

"स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते॥" इति।

तत्राद्यं प्रयोगविधिरूपं नित्यानुमेयमेव। कल्पिताङ्गवाक्यैकवाक्यताको हि प्रधानविधिरेव प्रयोगविधिः इति। द्वितीयं "समिधो यजति" "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादि। अवान्तरवाक्यमपि द्विविधं विधिर्मन्त्रश्चेति। अर्थवादस्तु तात्पर्याभावेऽपि स्तुतिलक्षकवाक्यार्थप्रतिपादकत्वमात्रेण पृथग्व्यपदिश्यते।

वेदान्तपरिभाषायां विशेषाः[३]

वेदान्तपरिभाषायामयं विषय ईषद्विस्तरेण प्रतिपादितः। तथा हि —

यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोः आकाङ्क्षावशेन महावाक्यार्थबोधकत्वं तत्र वाक्यैकवाक्यता। यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिवाक्यानां "समिधो यजति" इत्यादिवाक्यानां च परस्परापेक्षिताङ्गाङ्गिभावबोधकतया एकवाक्यता। तदुक्तं भट्टपादैः[४] —

"स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनस्संहत्य जायते॥" इति।

---

[१] मी.बा.प्र.पृ. ९.
[२] तं.वा.१.४.२२, भा.२.पृ. २४०.
[३] वे.प. पृ. २४७.
[४] तं.वा.१.४.२२, भा.२.पृ. २४०.

तत्र शिखामणिकाराः —

'विशेष्ये विशेषणम्' इति न्यायेन पदार्थविषयकसमूहालम्बनज्ञानादेव वैशिष्ट्यावगाहिमहावाक्यार्थज्ञानोपपत्तौ मध्ये नावान्तरवाक्यार्थबोध इति वाक्यैकवाक्यतायां लोके कश्चित् विप्रतिपद्येतापीत्यतः निःसन्दिग्धवैदिकवाक्यमुदाहरति — यथेति। परस्परेति। प्रकृतीनां दर्शपूर्णमासादीनां स्वप्रकरणस्थाङ्गैः निवृत्तोपकाराकाङ्क्षाणाम् अनारभ्याधीताङ्गैः विकृतीनां च अतिदिष्टाङ्गैः परिपूर्णांशानां शरमयादिभिः सह नष्टाश्वदग्धरथवत् उत्थिताकाङ्क्षाविरहेऽपि "रक्तः पटो भवति" इतिवत् उत्थापितपरस्पराकाङ्क्षासत्त्वात् इत्यभिप्रायः इति।

ननु वाक्यैकवाक्यतायां "घटमानय" इत्यादिलौकिकवाक्ययोः उदाहरणत्वसंभवेन अलं वैदिकवाक्योदाहरणेनेत्यत आह — विशेष्ये विशेषणमिति। "घटमानय" इत्यत्र आख्यातार्थकृतौ धात्वर्थः विशेषणम्, तत्र विशेषणं कर्मत्वं, तत्र घटः इत्यनेन प्रकारेण युगपदेव वाक्यार्थज्ञानोत्पत्तिरित्यर्थः। कश्चित् = प्राचीनः। विप्रतिपद्येतापीति। "घटमानय" इत्यादौ प्रथमं "घटीया कर्मता" इति बोधः, ततः "आनयनानुकूला कृतिः" इति बोधः इति प्रत्येकवाक्यार्थज्ञानानन्तरं महावाक्यार्थज्ञानं भवतीति न। किं तु तावत्पदार्थानां स्मरणात् एकदैव खले कपोतन्यायेन क्रियाकर्मभावादिरूपेणान्वयविषयशाब्दबोधो भवतीति प्राचीनाः। नवीनास्तु[१] —

"यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवाभिधीयते॥" ।

तथा च प्रथमं प्रत्येकवाक्यार्थबोधानन्तरमेव 'विशिष्टस्य वैशिष्ट्यम्' इति न्यायात् महावाक्यार्थबोधः इत्याहुः।

भाट्टचिन्तामणौ गागाभट्टेनापि इदं प्रकारद्वयमुक्तं, यथा[२] —

पदार्थानां च खले कपोतन्यायेनान्वयबोधः। तदुक्तं —

"वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत् पतन्ति।
तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति॥" इति।

क्वचित्तु राजपुरप्रवेशन्यायेनान्वयबोधः, यत्र खण्डवाक्यार्थबोधोत्तरं महावाक्यार्थबोधः, यत्र वा "दण्डी कुण्डली छत्री चैत्रः" इत्यादौ विशिष्टस्य वैशिष्ट्यबोधे तात्पर्यं, तत्र। तदुक्तं[३] —

---

[१] प्र.पं. पृ. ३८४.
[२] भा.चिं.म. पृ. ५३.
[३] प्र.पं. पृ. ३८४.

"यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवाभिधीयते॥"

इति संप्रदायः।

खण्डवाक्यार्थबोधोत्तरं चरमपदस्मृतिः, तत्पदार्थस्मृतिः, तत्रार्थस्मृतिकाले खण्डवाक्यार्थबोधनाशात् चरमपदस्मृतिरेव तावत्पदविषयिणी। चरमार्थस्मृतिरेव तावत्पदार्थविषयिणी। ततोऽन्वयबोध इति नव्याः — इति।

मुक्तावल्यामपि स्पष्टमित्थमेवोक्तम्। तत्र दिनकर्याम्[१] विशेषः लिख्यते। आशुतरविनाशिनीनां क्रमिकाणां पदजन्यपदार्थोपस्थितीनां मेलनासंभवात् सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः समूहालम्बनात्मिकैव कारणम्। एवं च सर्वत्र युगपदेव सकलपदार्थानां 'विशेष्ये विशेषणम्' इति न्यायेन शाब्दबोधः, न तु 'विशिष्टस्य वैशिष्ट्यम्' इति रीत्या। तज्ञनकस्य विशेषणतावच्छेदकप्रकारक-निर्णयस्य पूर्वमभावादिति प्राचीनाः। "वृद्धा युवानः" इत्यत्र वृद्धयुवशिशुभिः कपोतैः चिरतरचिरसंनिहितकालोक्तानां पदार्थानां साम्यम्।

नवीनास्तु — स्वार्थाकाङ्क्षितं = स्वार्थयोग्यं, यद्यत् संनिधानं प्रपद्यते = स्वार्थोपस्थित्यव्यवहितोपस्थितिविषयो भवति, तेन तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते। अनन्तरं च महावाक्यार्थबोधः। तथा च "घटमानय" इत्यादौ प्रथमं "घटीया कर्मता" इत्येवं बोधः। तदनन्तरं च "घटकर्मकानयनम्" इति बोधः। एवं च पूर्वोक्तसमूहालम्बनात्मकं पदार्थस्मरणं विनापि निर्वाहः।

न च "घटमानय" इत्यादौ चरमपदार्थस्मृतिकाले घटादिपदार्थस्मृतेर्नाशात् समूहालम्बनस्मृतिरावश्यकीति वाच्यम्। तत्र घटस्मरणनाशेऽपि "घटीया कर्मता" इत्याकारकावान्तरशाब्दबोधस्यैव पदजन्यपदार्थोपस्थितित्वेन, तैनैव "घटकर्म-कानयनम्" इत्यादि महावाक्यार्थबोधनिर्वाहात्। न हि पदजन्यपदार्थस्मृतित्वेन शाब्दबोधं प्रति हेतुत्वम्, अपि तु शाब्दबोधसाधारणतादृशोपस्थितित्वेनैवेति प्राहुः। एवं चैतन्मते खण्डवाक्यार्थबोधपूर्वक एव महावाक्यार्थबोधः। अत एव सर्वत्र खण्डवाक्यार्थबोधरूपस्य विशेषणतावच्छेदकप्रकारकनिश्चयस्य पूर्वं सत्त्वात् 'विशिष्टस्य वैशिष्ट्यम्' इति रीत्यैव बोध उपपद्यते।

यत्र खण्डवाक्यार्थबोधनाशोत्तरं महावाक्यार्थबोधः, तत्रापि खण्डवाक्यार्थ-समानाकारं स्मरणं कल्पयित्वा विशिष्टवैशिष्ट्यबोधनिर्वाहः।

अत्रेदं बोध्यं — यत्र खण्डवाक्यार्थबोधानन्तरं चरमपदस्मृतिः तदुत्तरं तदर्थ-स्मृतिः, तत्र खण्डवाक्यार्थानुभवस्य नाशात् समूहालम्बनस्मरणमावश्यकम्। एवं

---

[१] मु.व्या.दि. पृ. ४१४-४१६.

च यत्र न विशिष्टवैशिष्ट्यबोधसामग्री तत्र 'विशेष्ये विशेषणम् इति' रीत्यैव बोधः। यत्र तत्सामग्री तत्र 'विशिष्टस्य वैशिष्ट्यम्' इति रीत्या बोधः।

प्राभाकरास्तु — अवान्तरवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधेऽवान्तरवाक्यार्थ-स्मरणमेव कारणम्, न तु समूहालम्बनस्मृतिः। न हि शाब्दबोधे पदजन्य-पदार्थोपस्थितिः कारणम्। लाघवेन पदार्थोपस्थितेरेव हेतुत्वात्। अत एव "द्वारम्" इत्यादौ न "पिधेहि" इति पदाध्याहारः, किं तु अर्थाध्याहार एवेत्याहुः।

वाक्यभेदविचारः

मीमांसकाः एकस्मिन् वाक्ये एक एव पदार्थानां संसर्गो बोधयितुं शक्यते। अनेकसंसर्गबोधने तु वाक्यभेदाख्यो दोषो भवतीति मन्यन्ते। इदानीं कुत्र कुत्र कथं वाक्यभेदो भवतीति निरूप्यते। वार्त्तिककारेण[1] —

"श्रूयमाणस्य वाक्यस्य न्यूनाधिकविकल्पने।
लक्षणावाक्यभेदादिदोषो नानुमिते त्वसौ॥" इत्युक्तम्।

विवक्षितार्थापेक्षया न्यूनत्वाभ्युपगमे वाक्यभेद इत्यत्र उदाहरणं — "यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति" इति। अत्र हि विवक्षितोऽर्थः द्रव्यदेवताकालद्वयविशिष्टयागविधिः। तदपेक्षया न्यूनोऽर्थः पूर्णमास्यधिकरणे द्वितीयपूर्वपक्षे शङ्किते विद्वद्वाक्यविहितयोः द्रव्यदेवतमेव विधीयते न यागविधिरिति, तदभ्युपगमे वाक्यभेद इति।

न्यूनस्याधिकार्थविषयकत्वकल्पने वाक्यभेददोष इत्यत्र उदाहरणं — "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः" इति। अत्र हि स्वर्गकामपदाध्याहारं विश्वजिन्न्यायेन चतुर्थे शङ्कितं निरसितुमुक्तं — ब्रह्मवर्चसस्यान्वाचयत्वे प्रमाणाभावात्। ब्रह्मवर्चसमात्रस्य फलत्वेन स्वर्गस्य कल्पनया अधिकार्थत्वे फलद्वयसमावेशा-द्वाक्यभेदापत्तिरिति।

अधिकस्य सतो न्यूनत्वे वाक्यभेद इत्यत्रोदाहरणं — "वषट्कर्तुः प्रथमभक्षः" इति। अत्र हि प्राथम्यमात्रविधौ भक्षानुवादात् प्राथम्यस्य च विधानात् एकपदे चोभयासंभवात् वाक्यभेदः[2]।

---

[1] तं.वा.१.३.२, भा.२.पृ. ४६.
[2] मीमांसाबालप्रकाशात् अयं भागः उद्धृतः (मी.बा.प्र. पृ. २-४)।

मीमांसाकोशे वाक्यभेदविचारः[१]

एवं बालप्रकाशग्रन्थान्ते स्थितः वाक्यभेदविचारः मीमांसाकोशे सविस्तर-मुद्धृतः। अतः मीमांसाकोशात् उद्ध्रियते।

अथ द्वादशलक्षण्यां विप्रकीर्णा इतस्ततः।
वाक्यभेदभिदाः सर्वाः संक्षेप्येह ब्रवीम्यहम्॥

तत्र त्रिविधस्तावत् वाक्यभेदः आवृत्तिलक्षणः, विभागलक्षणः, वैरूप्यलक्षण-श्चेति। आवृत्तिलक्षणोऽपि त्रिविधः प्रकृत्यावृत्तिः, प्रत्ययावृत्तिः, उभयावृत्तिश्चेति। प्रकृत्यावृत्तिरपि द्विविधा प्रातिपदिकावृत्तिः, धात्वावृत्तिश्चेति। प्रातिपदिकावृत्तिरपि द्विविधा समासासमासभेदात्। प्रत्ययावृत्तिरपि चतुर्विधा सुप्तिङ्कृत्तद्धितभेदात्। तदुक्तम् "अर्थैकत्वादेकं वाक्यम्" इत्यत्र वार्तिके[२] "पदतदेकदेशतत्समूहा-वृत्तिप्रसङ्गात्मकः तद्विभागलक्षणो वाक्यभेदः" इति। तथा विभागलक्षणे "गम्य-मानसंबन्धत्यागः अनेकादृष्टकल्पना च दोषः। इतरत्र आवृत्तेः अवेदत्वादप्रा-माण्यम्" इति। एतद्व्याख्यातं भट्टसोमेश्वरेण[३] —

"वाजपेयगुणविधौ आख्यातपदावृत्तिः, ग्रहैकत्वविवक्षायां पदैकदेशप्रातिपदिका-वृत्तिः, हविरार्तेः उभयत्वेन विशेषणे 'हविरार्तिमार्च्छेत्' इति पदसमूहावृत्तिः, आरुण्यस्य कृत्स्नप्रकरणनिवेशे 'अरुणया' इति पदस्य पिङ्गाक्ष्यादिवाक्यात् विभागः" इति।

विभागलक्षणवाक्यभेदस्य तु अवान्तरभेदा न सन्तीति नोक्ताः।

वैरूप्यलक्षणोऽपि वाक्यभेदः अनेकविधः, वैरूप्यभेदात्। तत्र वैरूप्यं त्रिविधं — प्रकृतौ, प्रत्यये, वाक्ये चेति। आद्यं वाजपेयगुणविधिपक्षे यजौ कर्मत्वकरणत्व-रूपम्, उद्देश्यत्वोपादेयत्वरूपम्, गुणत्वप्रधानत्वरूपम्, विधेयत्वानुवाद्यत्वरूपं चेति चतुर्विधम्। द्वितीयं "ग्रहम्" इत्येकत्वस्य संमार्गं ग्रहं वा प्रति गुणत्वे द्वितीया-विभक्त्या लक्ष्ये, ग्रहापेक्षया प्राधान्यस्यापि श्रौतत्वात्। तृतीयं तु "अरुणया" इत्यत्र तृतीयया करणीभूताम् एकहायनीमुद्दिश्य अरुणप्रातिपदिकार्थविधौ भिन्न-पदोपात्ताया अपि एकहायन्याः एकवाक्ये वैरूप्यम्।

---

[१] मी.को. पृ. ३४६९-३४७३. अत्र (प्र) इति चिह्नितं विनान्यत्पृष्ठसंख्यादिकं मी.को.निर्दिष्टमेव।
[२] तं.वा.२.१.१४.४६, भा.२.पृ.५२६. (प्र).
[३] वा.न्या.सु.२.१.१४.४६, भा.२.पृ. ५३१.(प्र).

तथा अन्यान्यपि नानाविधानि वैरूप्याणि

अश्वप्रतिग्रहेष्टेः लौकिकवैदिकोभयदाननिमित्तकत्वे क्रत्वर्थत्वपुरुषार्थत्ववैरूप्यम्। षष्ठचतुर्थैकादशे[१] "यः सत्राय आगुरते, स विश्वजिता यजेत" इति विश्वजितः सत्रे प्रवृत्तम् अप्रवृत्तं च प्रति साधारण्येन विधौ, प्रवृत्तं प्रति क्रत्वर्थत्वात् अप्रवृत्तं प्रति च पुरुषार्थत्वात् वैरूप्यं स्यात् इत्युक्तम्[२]। तथा अवघातस्य आज्यौषधसांनाय्यर्थत्वे दृष्टादृष्टार्थत्ववैरूप्यम्। तथा सोमवमनेष्टेः लौकिकवैदिकसोमवमननिमित्तकत्वे अपेक्षितानपेक्षितविधिवैरूप्यम्।

तथा पूर्वोदाहृते "यः सत्रायागुरते" इत्यत्रापि।

तथा षष्ठे अभ्युदितेष्टौ[३] तण्डुलविवक्षायां दधिशृतयोः देवतानपनयनात् देवताविधौ आकाङ्क्षितानाकाङ्क्षितविधिवैरूप्यम्। तथा मातुलकन्यापरिणयने स्मृत्याचारतुल्यबलत्वे दोषजनकत्वाजनकत्वविरोधात् वस्तुवैरूप्यम्। इदं च विधिभेदात् आवृत्त्यभावेऽपि वैरूप्यप्रसङ्गादुदाहृतम्।

तथा अन्यदपीदृशमेव, वैश्वदेवस्यान्नसंस्कारकर्मत्वे पुरुषार्थत्वे च एकमेव कर्म प्रति एकमेवान्नं द्रव्यं गुणभूतं प्रधानभूतं चेति। तथा कृष्णलचरौ "घृते श्रपयति" इति श्रपणप्रतिप्रसवघृतनियमविधिवैरूप्यम्।

तथा "पूषा प्रपिष्टभागः" इति पेषणस्य चरुपुरोडाशार्थत्वे चरौ प्रतिप्रसवात् पशुपुरोडाशयोश्च अपूर्वविधित्वात् वैरूप्यम्। तथा नवमे[४] "पत्नीसंयाजान्तान्यहानि" इत्यत्र अपूर्वविधिनियमविधिवैरूप्यात् अन्त्याहवर्जं प्रवृत्तिः इत्युक्तम्। तथा उभयार्त्यधिकरणेऽपि[५]। तथा दशमतृतीयोपान्त्ये[६] "सोमचमसो दक्षिणा" इत्यत्रैकवाक्यत्वे सोमचमस एवेति नियमात् स ब्रह्मणे एवेति परिसंख्यापत्तेश्च वैरूप्यम्। तथा नित्यानित्यसंयोगविरोधात्मकं च वैरूप्यम्। तदपि भाव्यस्वरूपे द्वारे वा। आद्यं संस्थासामानविध्ये। द्वितीयं फलचमसासामानविध्यधिकरणे[७]।

तथा षष्ठतुर्याद्ये[८] एकस्यैव उपलक्ष्योपलक्षणत्ववैरूप्यम्। तत्र हि होमार्थचतुरवत्तनाशे शेषादेव पुनरवदेयम्, "यस्य सर्वाणि हवींषि नश्येयुर्दुःष्येयुरपहरेयुर्वा आज्येनैता देवताः परिसंख्याय यजेत" इति हविर्नाशे निमित्ते विहितं

---

[१] जै.सू.६.४.११.
[२] शा.दी. पृ. ४८९.(प्र).
[३] जै.सू.६.५.१.
[४] जै.सू.९.१.९.२९-३२.
[५] जै.सू.६.४.६.
[६] जै.सू.१०.३.१९.
[७] शा.भा.३.५.१९.४७-५१.
[८] जै.सू.६.४.१.

त्वाज्यं निःशेषनष्टे हविषि; उत अन्यायात् पुरोडाशान्तरोत्पादने प्रसक्ते हविर्नाशनिमित्तविहिताज्येन यष्टव्यम् इति संशय्य; पूर्वकोटिं पूर्वपक्षीकृत्य सिद्धान्तितं तन्त्ररत्ने — कृत्स्नस्य = अविकलस्य, पुरोडाशस्य मध्यपूर्वार्धे अवदानोपलक्षणमित्येव शास्त्रार्थः। कृत्स्नस्यैव शास्त्रवेलायां प्रकृतत्वात्। इतरथा यदि कृत्स्नपुरोडाशमध्यपूर्वार्धलक्षितमवदानद्वयं शास्त्रार्थ इति न गृह्यते, ततो द्व्यवदाननाशे सति इतरत् सर्वमवशिष्टं तस्योपलक्षणम्। नाशे तु सति तदेवोपलक्षणभूतमेव शिष्टम्। पुनरवदीयमानम् उपलक्ष्यं प्रसज्येतेति वैरूप्यं शास्त्रस्य स्यात्। एकरूपेण च शास्त्रेण भाव्यम्। तस्मात् अपादानत्ववाचिपञ्चमीबलात् यागाङ्गभूतद्व्यवदानोपलक्षणमेवेतरत् न तु स्वयं यागाङ्गभूतमुपलक्ष्यमिति।

तथा विधिप्रत्ययेऽपि विध्यनुवादवैरूप्यम्। तद्यथा द्वितीये[1] "वायव्यं श्वेतमालभेत" "सौर्यं चरुं निर्वपेत्" इति दार्शपौर्णमासिकौ "ईषामालभेत" "चतुरो मुष्टीन्निर्वपति" इत्यालम्भनिर्वापौ अनूद्य श्वेतचरुगुणौ विधीयेते। "वायव्यम्" इति ईषाया वृक्षप्रभवत्वात् वृक्षस्य च वायुसंबन्धात्, "सौर्यम्" इति च चरोः स्थाल्याः तेजस्वित्वेन सूर्यसादृश्यात् कथंचिदनुवादः इति पूर्वपक्षे; आलम्भनिर्वापयोः लोकेऽपि सत्त्वेन व्यभिचारात् न दार्शपौर्णमासिकयोरेवोपस्थितिः संभवति इति सिद्धान्तिना उक्ते, लिङा विहितौ यौ आलम्भनिर्वापौ इति विशेषणात् नायं दोष इत्याशङ्क्य, एवं तर्हि लिङोऽनुवादकत्वात् गुणविधिर्न लभ्यते, उभयाश्रयणे च युगपत् विध्यनुवादविरोधः इत्युत्तरितम् — इति[2]।

"अनेकार्थविधानात् वाक्यभेदः" [3]।

"अनेककल्पनानिमित्तः वाक्यभेदः" [4]।

"अनेकगुणविधानात् वाक्यभेदः" [5]।

"अनेकसंबन्धकरणात् वाक्यं भिद्येत" [6]।

"अप्रवृत्तिलक्षणः वाक्यभेदः" [7]।

"अर्थभेदात् वाक्यभेदः" [8]।

---

[1] जै.सू.२.३.५,१२-१५.

[2] मी.बा.प्र.पृ. १८०-१८३.

[3] तं.वा.२.२.११.२६.

[4] तं.वा. ३.१.७.१४.

[5] शा.भा. ३.६.७.२१.

[6] तं.वा. २.२.१३.२९.

[7] वा.न्या.सु. २.२.१२.२७, (चौ.पु.) पृ. ८६६, भा.३.पृ.२८४. (प्र).

[8] शा.भा. ३.२.१०.२७.

"आवृत्तिलक्षणः वाक्यभेदः" [१]।

"इन्द्रशब्दस्य महत्त्वतद्धितार्थौ प्रति वैरूप्यनिमित्तवाक्यभेदः। विध्यनेकव्यापारात्मकश्च वाक्यभेदः अपरः।

महत्त्वस्येन्द्रसंबन्धं तस्य च द्रव्यसंगतिम्।
विदधत् प्रत्ययो वाक्यं भिन्द्यात् पुनरपि श्रुतेः॥"

महेन्द्रः इन्द्र एवान्यो वेति विचारः प्रकृतः[२]।

"उभयविधाने वाक्यभेदः" [३]।

"उभयविशेषणत्वनिमित्तः वाक्यभेदः" [४]।

"एकस्मिन् वाक्ये संबन्धद्वयविधाने वाक्यभेदः" [५]।

"एकोद्देशेन प्रधानद्वयविधाने वाक्यभेदः" [६]।

"गौरवलक्षणः वाक्यभेदः" [७]।

"यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यस्य उत्पत्तिविधिपरत्वे अधिकारविधिपरत्वे च" [८]।

"दधिहोमसंबन्धं होमफलसंबन्धं च विदधत् वाक्यं भिद्येत" [९]।

"द्वयोश्च विधीयमानयोः परस्परेणासंबद्धयोः वाक्यभेदप्रसङ्गः" [१०]।

"द्विरुच्चारणनिमित्तवाक्यभेदः" [११]।

"नैव ह्यनेकसंबन्धाद्वाक्यभेदः प्रसज्यते।
अनेकविधिशक्त्या हि भेदः.......।

बहवोऽपि ह्यर्थाः युगपदेकेन संबध्यन्ते। न च तावता वाक्यं भिद्यते। अनेकविधितो हि वाक्यभेद उक्तः" [१२]।

---

१ वा.न्या.सु.२.२.११.२६, (चौ.पु.) पृ. ८५२, भा.३.पृ.२६१. (प्र).
२ तं.वा. २.१.५.१६.
३ शा.भा. १.४.१.२.
४ वा.न्या.सु. २.२.१२.२७, (चौ.पु.) पृ. ८६८, भा.३.पृ.२८५-२८६. (प्र).
५ शा.भा.३.४.१.७.
६ मी.न्या.प्र.
७ वा.न्या.सु. २.२.११.२६, (चौ.पु.) पृ. ८५२, भा.३.पृ.२६१. (प्र).
८ मी.न्या.प्र.
९ तं.वा. २.२.११.२६.
१० शा.भा.६.१.१.३.
११ तं.वा. २.१.५.१७.
१२ तं.वा. २.२.११.२६.

"न चैकपदोपात्तः अनेकोऽर्थः वाक्यं भिनत्ति। सर्वाख्यातेषु क्रियाकर्तृसंख्योपग्रहपुरुषविशेषभावनानां युगपदुपादानस्यापरिहार्यत्वात्" [१]।

"न च प्रकरणलभ्या विशेषा वाक्यं भिन्दन्ति" [२]।

" 'क्षौमे वसानौ' इत्यत्र न शक्यते उभयं विधातुं क्षौमं लिङ्गं च। भिद्येत हि तदा वाक्यम्" [३]।

"प्रत्येकवाक्यपरिसमाप्तिनिमित्तः वाक्यभेदः" [४]।

"पदान्तरगतार्थग्रहणनिमित्तोऽपि वाक्यभेदः" [५]।

"परस्परनिरपेक्षविधाने वाक्यभेदो भवति। 'यदग्नये च प्रजापतये च सायं जुहोति' इत्यत्र चशब्दश्रवणात् परस्परसापेक्षस्यैव पदद्वयस्य आख्यातान्वयान्न वाक्यभेदः। एवं 'गौश्चाश्वश्चाश्वतरश्च' इत्यादावपि न वाक्यभेदः" [६]।

"प्राप्ते कर्मणि गुणफलरूपानेकार्थविधौ वाक्यभेदः" [७]।

"प्राप्ते कर्मणि संबन्धद्वयकरणात् वाक्यं भिद्येत" [८]।

"यान्येकक्रियाविशेषणानि भवन्ति, तानि तया विधीयमानया क्रियया अर्थादाक्षिप्यमाणानि न विधायकव्यापारं भिन्दन्ति। क्रियान्तरविशेषणे पुनर्विधीयमाने तया क्रियया संबन्धरहितया आक्षिप्यमाणे अवश्यं विधायकस्य आवृत्तिरेष्टव्या इति वाक्यभेदः प्राप्नोत्येव" [९]।

"यदा हि भावनारूढं विधित्वं भावनार्थत्वेनैव गृह्यते तदा अर्थात् विशेषणविधौ सति अवाक्यभेदं वक्ष्यामः। यदा तु तत् विशेषणार्थमवधार्यते तदा भावनायाः संनिहितप्रोषितत्वात् अनेकविशेषणयोगे सति यदर्थं विधित्वमवसीयते तस्यैवैकस्य विधानं नान्यस्य तद्देशस्यापीति वाक्यभेदो भविष्यति" [१०]।

"यदि तत्र द्वावपि सामान्यविशेषसंबन्धौ इदमेकं वाक्यं कुर्यात् ततो वाक्यं भिद्येत" [११]।

---

[१] तं.वा. ३.८.११.१२.
[२] तं.वा.२.२.१३.२९.
[३] शा.भा. ६.१.५.२२.
[४] वा.न्या.सु.३.२.६.१९, (चौ.पु.) पृ. १११४, भा.४.पृ.६२. (प्र).
[५] तं.वा. १.४.२.३.
[६] मी.न्या.प्र.
[७] वा.न्या.सु.२.३.५.१३, (चौ.पु.) पृ. ९२७, भा.३.पृ.३८१. (प्र).
[८] तं.वा. ३.१.११.२१.
[९] तं.वा. २.२.१२.२७.
[१०] तं.वा. २.२.५.१६.
[११] तं.वा.३.२.८.२२.

"यदि फलं दध्ना कुर्यादिति ब्रूयात् न दध्ना होममिति, अथ दध्ना होमं साधयेदिति ब्रूयात् न फलमिति । उभयवचने भिद्येत वाक्यम्" [१]।

"वचनव्यक्तिभेदात् वाक्यभेदः प्रसज्यते" [२]।

"वाक्यपरिसमाप्तिलक्षणः तावत् एको वाक्यभेदः" [३]।

"वारवन्तीयस्य आश्रयान्वयविधिनिमित्तवाक्यभेदवत् आश्रयस्य अग्निष्टुद्विशेषणविधिनिमित्तोऽपि वाक्यभेदः स्यात्" [४]।

"विधिप्रत्ययावृत्तिलक्षणः वाक्यभेदः" [५]।

"विधेयभेदादपि वाक्यभेदो भवति" [६]।

"विभक्तिवैरूप्यादिनिमित्तः अपरः वाक्यभेदः" [७]।

"विवक्षितार्थापेक्षया न्यूनत्वाभ्युपगमे वाक्यभेदो यथा यदाग्नेयोऽष्टाकपालः अमावास्यायां पौर्णमास्यां चाच्युतो भवति इति। अत्र विवक्षितोऽर्थः द्रव्यदेवताकालद्वयविशिष्टयागविधिः, तदपेक्षया न्यूनोऽर्थः विद्वद्वाक्यविहितयोः यागयोः द्रव्यमेव विधीयते न यागविधिः इति।" [८]

"विशिष्टानुवादो न वाक्यं भिनत्ति" [९]

"विशिष्टानुवादलक्षणो वाक्यभेदः" [१०]

"विशिष्टार्थभेदेन वाक्यभेदात् यजुर्मन्त्रभेदः, यथा 'इषे त्वेति शाखां छिनत्ति, ऊर्जे त्वेत्यनुमार्ष्टि' 'आयुर्यज्ञेन कल्पतां, प्राणो यज्ञेन कल्पताम्' इत्यादौ च[११]।

"विशिष्टभावनाविधानस्य एकत्वे न वाक्यभेदो भवति" [१२]।

"विशिष्टविधाने वाक्यभेदो न भवति । द्वाभ्यां तु विशेषणाभ्यां विशिष्टमेकमाधानं विधायिष्यते । तेन (न?) भविष्यति वाक्यभेदः" [१३]।

---

[१] शा.भा. २.२.११.२६.
[२] शा.भा. ९.३.१२.३४.
[३] तं.वा.३.१.७.१४.
[४] वा.न्या.सु.२.२.१२.२७, (चौ.पु.) पृ.८५७, भा.३.पृ.२७७ (प्र).
[५] वा.न्या.सु.२.२.१२.२६, (चौ.पु.) पृ.८४५, भा.३.पृ.२५५ (प्र).
[६] मी.न्या.प्र.
[७] तं.वा.३.१.७.१४.
[८] बाल.पृ.३.
[९] तं.वा.२.२.१२.२७.
[१०] वा.न्या.सु.२.२.१३.२९, (चौ.पु.) पृ.८७६, भा.३.पृ.३०२. (प्र).
[११] जैमिनीयन्यायमालाविस्तर. २.१.१५.
[१२] वा.न्या.सु. २.२.१२.२७, (चौ.पु.) पृ. ८६८, भा.३.पृ.२८५. (प्र).
[१३] शा.भा. २.३.३.४.

"विशेषणवैशिष्ट्यांशे विशेष्यांशे च यदि विधिव्यापारः तर्हि वाक्यभेदः" [१]।

"विस्पष्टमर्थद्वयं, विभागे च निराकाङ्क्षता, तेन वाक्यभेदः" [२]।

अत्रेदमवधेयं विशेषतः। "वाक्यभेदापत्तिः पौरुषेये अदोषः" इत्यसकृदुक्तम्[३]।

वाक्यशेषः[४]

"न चापरिपूर्णेन वाक्येन व्यवहारोऽवकल्पते। तत्र तदन्यथानुपपत्या अवश्यं परिपूरणसमर्थो वाक्यशेषः कल्पनीयः। कुतः?

न्यूनवाक्यप्रयोगो हि वेदे नैव समाश्रितः।
कश्चित् क्वापि स्थितः शेषः सोऽन्वेष्टव्यः प्रयत्नतः॥

न हि वैदिकवाक्यानां प्रत्यक्षमेवैकं प्रमाणम्। तद्वदेव हि अनुमानादीन्यपि प्रमाणानि। सर्वप्रमाणप्रत्यस्तमये च षष्ठेनाभावः परिच्छिद्यते। तदिह प्रत्यक्षानुपलब्धे वाक्यशेषे न तावत्येव उपरन्तव्यम्। यदि अनुमानादीन्यपि निवर्तिष्यन्ते ततः एतावानेवायं मन्त्र इति कल्पयिष्यामः। अथ तु तैः कश्चिदवगम्यते ततः तत्तत्सहितोऽयं मन्त्रः सकलः, प्राक् तस्मादूनः इत्यध्यवस्यामः" [५]।

"वाक्यशेषः संदेहेऽपेक्षितः निर्णयहेतुतां प्रतिपद्यते" [६]।

"वाक्यशेषो हि भवन् पारतन्त्र्यात् गौणत्वाद्यपि प्रतिपद्यते" [७]।

"निःसन्दिग्धे विध्युद्देशे वाक्यशेषो न निर्णायकः" [८]।

"साकाङ्क्षस्य संनिधौ परस्तात् पुरस्ताद्वा परिपूरणसमर्थः श्रूयमाणो वाक्यशेषो भवति" [९]।

"प्राजापत्येषु यागानामेकानेकत्वसंशये।
कृतः प्रकृतिवच्छब्दवाक्यशेषेण निर्णयः॥" [१०]

"वाक्यशेषात् अर्थाच्च संदिग्धानामर्थानामध्यवसानमुक्तम्" [११]।

---

[१] सोम. ७.३.३.
[२] शा.भा. ३.१.१४.२५
[३] ऋजुविमला पृ. ७०.
[४] मी.को. पृ. ३४७६.
[५] तं.वा. २.१.१६.४८.
[६] कणिका. पृ. ३१६.
[७] तं.वा. १.२.३.२९.
[८] वा.न्या.सु.३.४.१२.३४, (चौ.पु.) पृ. १४९५, भा.४.पृ.६४९. (प्र).
[९] शा.भा. २.१.१६.४८.
[१०] तं.वा. ३.१.१.१.
[११] शा.भा. २.१.१.१.

"वाक्यशेषान्निर्णयः यत्र विध्युद्देशः संदिग्धः। यत्र तु असंदिग्धः तत्र तद्बलीयस्त्वात् वाक्यशेषबाधेनैव भवितव्यम्" [१]।

अध्याहारादिकम्

यत्र श्रूयमाणात् वाक्यात् निराकाङ्क्षार्थबोधो न भवति तत्र अध्याहारादिकमाश्रित्य अर्थबोधो वर्णनीयः। आदिपदेन विपरिणामः, सूत्रव्यवधिः, सूत्रान्यथाकरणम्, वाक्यभेदः, गुणकल्पना च गृह्यन्ते।

तत्र अध्याहारोदाहरणं —

"शेषभाजां भवेल्लोप इत्यध्याहारकल्पना।" इति[२]।

दर्शपूर्णमासयोः प्रधानार्थस्यावदानस्य नाशदोषापहारेषु सत्सु शेषावदानं पूर्वपक्षीकृत्य हविरन्तरोत्पादने सिद्धान्तिते, शेषकार्यार्थं गृहीतस्यावदानस्य नाशादौ सति किं कर्तव्यम् इत्यपेक्षायां सूत्रम् "अपि वा शेषभाजां स्यात्" इति[३]। अत्र किं स्यात् इत्यस्यानिर्देशात् अनन्तरोक्तं हविरन्तरोत्पादनं संबध्यते। तदप्ययुक्तम्। शेषस्य प्रतिपत्त्यन्तरगृहीतस्य नष्टावयवपूर्वप्रतिपत्तिसंबन्धाभावात्। तस्माल्लोप एवास्यां दशायां युज्यत इति लोपपदाध्याहारः कल्प्यते। शेषभाजां लोपः स्यात् इत्यर्थः।

विपरिणामोदाहरणम्

"विप्रकर्षात् पशोश्चेति विभक्तिः परिणम्यते।" इति[४]।

ज्योतिष्टोमे सौत्येऽहनि सवनीयः पशुः, सवनीयाश्च पुरोडाशाः। तत्र पशुतन्त्रस्य पुरोडाशेषु प्रसङ्गार्थं पशुतन्त्रमध्ये पुरोडाशानां विधानं प्रतिपादयितुं सूत्रं "पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात्" इति[५]। तत्र तन्त्रमध्ये विधानं साध्यत्वात् प्रथमाविभक्त्यर्हं न पञ्चमीविभक्त्यर्हमिति पञ्चमी प्रथमया विपरिणम्यते। तथा विप्रकर्षोऽपि "वपायाः प्रातस्सवनैः" इत्यादिप्रत्यक्षवचनसिद्धत्वात् हेतुत्वेन पञ्चमीमर्हति न प्रथमामिति पञ्चम्या विपरिणम्यते। तदयमर्थः — पशोश्च विप्रकर्षात् तन्त्रमध्ये पुरोडाशानां विधानमिति।

---

[१] तं.वा. ३.४.११.३०.
[२] श्लो.वा.प्रतिज्ञा.५४cd.
[३] जै.सू. ६.४.३.
[४] श्लो.वा.प्रतिज्ञा. ५५ ab.
[५] जै.सू. १२.२.३२.

व्यवहितकल्पना

अथ व्यवहितकल्पना। तत्र पदव्यवधेरुदाहरणं —

"पदेन व्यवधानं तु लोके संनियमादिति।" इति[१]।

लौकिकवाक्यवत् वैदिकवाक्यमपि पौरुषेयमित्युक्ते वैषम्यप्रदर्शनार्थं सूत्रं "लोके सन्नियमात् प्रयोगसंनिकर्षः स्यात्" इति[२]। अत्र 'लोके' इत्यस्य पदस्य सन्नियमप्रयोगपदव्यवहितेन सन्निकर्षपदेन संबन्धः। लोके चक्षुरादिसन्निकर्षात् अर्थस्य तद्विषयः शब्दप्रयोगः सन्नियम उपपद्यते, न तु वेदे, अतीन्द्रियत्वादर्थस्येति। तदिदं विपरिणामोदाहरणमपि संभवत् तस्योदाहृतत्वात् व्यवहितकल्पनाया एवोदाहरणमिति।

सूत्रव्यवधानस्योदाहरणम्

"सूत्रेण व्यवधानं तु पानव्यापदि कल्पितम्।" इति[३]।

अश्वप्रतिग्रहेष्टिः लौकिके अश्वप्रतिग्रहे, वैदिके वेति संशये "दोषात्त्विष्टिर्लौकिके स्यात्" इति[४] पूर्वपक्षमुक्त्वा "अर्थवादो वानुपपातात् तस्माद्यज्ञे प्रतीयेत" इति[५] सिद्धान्तितम्। ततः "सौमेन्द्रं चरुं निर्वपेत्" इति सोमपानव्यापदि विहितश्चरुः लौकिके वैदिके वेति संशये, "पानव्यापच्च तद्वत्" इति सूत्रम्। तत्र सूत्रत्रयव्यवहितो लौकिकपक्षः तद्वदिति परामृश्यते।

सूत्रान्यथाकरणम्

सूत्रान्यथाकरणस्योदाहरणं —

"पशुसामान्यविध्यादौ सूत्रमेवान्यथाकृतम्।" इति[६]।

ज्योतिष्टोमे पशुधर्मविधिः किं त्रयाणामपि पशूनां साधारणः, अथ वा सवनीयस्यैव, अथ वा अग्नीषोमीयसवनीययोः, उताग्नीषोमीयस्यैव इति संशये "तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात्" इति सूत्रम्[७]। तदिदं सर्वपशूनां समानो विधिरित्यस्य आद्यपक्षस्य प्रतिपादकमपि। स तु "स्थानाच्च पूर्वस्य"[८] इत्यादि-

---

[१] श्लो.वा.प्रतिज्ञा. ५५ cd.
[२] जै.सू. १.१.२६.
[३] श्लो.वा.प्रतिज्ञा. ५६ ab.
[४] जै.सू. ३.४.३४.
[५] जै.सू. ३.४.३५.
[६] श्लो.वा.प्रतिज्ञा. ५६ cd.
[७] जै.सू.३.६.१८.
[८] जै.सू.३.६.१९.

सूत्रासंगतिप्रसङ्गात् तत्संगतिसिद्ध्यर्थमाद्यपक्षमुत्सूत्रं कृत्वा सवनीयस्य इत्यस्मिन् पक्षेऽन्यथाकृत्वा योजितं — तुल्यः सर्वेषां पशुविधिः स्यात् यदि प्रकरणविशेषो न भवेत्, अस्ति तु प्रकरणविशेषः — इति।

वाक्यभेदः

वाक्यभेदोदाहरणं यथा —

"अग्रयश्च स्वकालत्वात् देयधर्मापयातनम्।
व्याख्यानं वाक्यभेदेन......................॥" इति[१]।

"ते सर्वार्थाः प्रयुक्तत्वादग्रयश्च स्वकालत्वात्" इत्येतत् सूत्रं[२] वाक्यभेदमाश्रित्याधिकरणान्तरपरतया व्याख्यातम् । तथा "अभ्युदये दोहापनयः स्वधर्मा स्यात् प्रवृत्तत्वात्" "शृतोपदेशाच्च" इति सूत्रद्वयेन[३] अभ्युदयेष्टौ दधिशृतयोः देयस्वधर्माः कर्तव्याः इत्युक्त्वा "अपनयो वार्थान्तरे विधानाच्चरुपयोवत्" "लक्षणार्था शृतश्रुतिः" इति सूत्रद्वयेन[४] देयधर्माणामपयातनमुक्तम्। तदिदं पूर्वयोः सूत्रयोः अनयोश्च वाक्यैकभावेन ऐकाधिकरण्यात् अभ्युदितेष्ट्यामेव देयधर्मापयातनमुच्यत इति प्रतिभासमानमपि ततो भित्त्वा अधिकरणान्तरं पशुकामेष्टिविषयं व्याख्यातम्।

गुणकल्पना

गुणकल्पनायामुदाहरणानि दर्शयति —

"............... गुणकल्पास्त्वमी कृताः॥
औत्पत्तिकस्तु गव्यस्य तथोष्णिक्ककुभोरिति।
दर्शनाच्च विशेषस्य तथाभ्युदय इत्यपि॥" इति[५]।

गुणकल्पास्त्विति। औत्पत्तिकसूत्रे लक्षणया उत्पत्तिशब्देन स्वभावोऽभिधीयते। "गव्यस्य च तदादिषु" इत्यत्र[६] गव्यशब्देन गोविकारतदवयववाचिना "गावो वा एतत्सत्रमासत" इत्यर्थवादोदितगोसंबन्धमात्रेण गवामयनस्य अभिधानम्। तदयमर्थः — गवामयनस्य विध्यन्तः संवत्सरसत्रेष्वतिदिश्यत इति।

---

[१] श्लो.वा.प्रतिज्ञा.५७ abc.
[२] जै.सू. ३.७.३९.
[३] जै.सू.९.४.४१,४२.
[४] जै.सू.९.४.४३,४४.
[५] श्लो.वा.प्रतिज्ञा. ५७d-५८.
[६] जै.सू. ८.१.१८.

तथा सामिधेनीविवृद्धावागम्यमानानामृचां सर्वासां "समिध्यमानवतीं समिद्धवतीं चान्तरा निवेशः" इति[१] पूर्वपक्षमुक्त्वा या एव धाय्याशब्दिताः तासामेव तत्र निवेशः नान्यासाम्, आगन्तूनामन्ते निवेशः इति सिद्धान्तमुक्त्वा, तल्लिङ्गमिद मुच्यते "उष्णिक्ककुभोश्चान्ते दर्शनात्" इति[२]। अत्र उष्णिक्ककुप्शब्देन "त्रिष्टुभो वा एतद्वीर्यं यदुष्णिक्ककुभौ" इत्यर्थवादात् कारणे कार्यवदुपचारात् त्रिष्टुबुच्यते। तदेष सूत्रार्थः — त्रैधातव्यायाम् अधाय्याशब्दिता "अग्ने त्री ते वाजिना त्री षधस्था" इति त्रिष्टुप् अन्ते दृश्यते "त्रिष्टुभा परिदधाति" इति। तस्मात् अधाय्याशब्दितानामन्ते निवेशः इति।

तथा "दर्शनाच्च विशेषस्य तथाभ्युदये" इत्यत्र अभ्युदयशब्देनाभ्युदयसाधनभूतो द्वादशाहो लक्ष्यते। तदयमर्थः — द्वादशाहे अर्धिनः पादिनः तृतीयिन इति समाख्याविशेषदर्शनात् तदनुरूपः प्रकृते दक्षिणाविभागः सर्वर्त्विजां न समः, न प्रयासानुरूप इति।

इति एकवाक्य-वाक्यभेदादिविचारः

---

[१] जै.सू. ५.३.४.
[२] जै.सू. ५.३.६.

आकाङ्क्षाविचारः

वाक्यघटकेषु पदेषु ज्ञातेषु वृत्तिज्ञानसहकारेण पदार्थेषूपस्थितेषु आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्यज्ञानवशात् पदार्थानां संसर्गरूपस्य वाक्यार्थस्य बोधो भवति। शाब्दबोधकरणस्य पदज्ञानस्य सहकारिकारणानि आकाङ्क्षादिज्ञानानीति नैयायिकसिद्धान्तः। तदुक्तं तात्पर्यटीकायां[1] —

"तस्मात् पदानि कृतसंकेतानि स्वार्थान् स्मारयन्ति, आकाङ्क्षायोग्यतासत्ति-सध्रीचीनानि अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न संगतिग्रहणमपि प्रतीक्षन्त इति दूरेऽनुमानात् भवन्ति" इति।

तथा "पदैरेव समभिव्याहारवद्भिरभिहिताः स्वार्थाः आकाङ्क्षायोग्यतासत्ति-सध्रीचीनाः वाक्यार्थधीहेतव इति आचार्याः (= शबरस्वामिनः भट्टाश्च)।

पदान्येव आकाङ्क्षितयोग्यसंनिहितपदार्थान्तरान्वितस्वार्थाभिधायीनीति प्राभा-कराः" इति तत्त्वबिन्दौ[2] वाचस्पतिमिश्रैरुक्तम्।

तत्र केयमाकाङ्क्षा नामेति विचार्यते।

तत्त्वबिन्द्वनुसारेण आकाङ्क्षानिरूपणम्

तत्त्वबिन्दौ अन्विताभिधानपक्षनिरूपणावसरे वाचस्पतिमिश्रैः[3] —

"आकाङ्क्षा च प्रतिपत्तुर्जिज्ञासा। सा च क्वचित् अभिधानापर्यवसानात् भवति, यथा 'द्वारम्' इति। न ह्यत्र प्रकृत्यर्थातिरिक्ते प्रत्ययार्थे प्रतीतिरस्ति, येनान्वितः प्रकृत्या स्वार्थोऽभिधीयते, प्रातिपदिकार्थमात्रे प्रथमोत्पत्तेः। तदत्राभि-धानपर्यवसानाय प्रतिपत्ता पदार्थान्तरं स्मारितान्वययोग्यं जिज्ञासते। क्वचि-च्चाभिहितार्थापर्यवसानात्। यथा 'विश्वजिता यजेत' इति। इह हि कार्यस्य विषयकरणान्वितस्याभिधानं पर्यवसितम्। न पर्यवस्यति हि तत्कार्यं नियोज्यभेद-मन्तरेण। न खलु कार्यमनुष्ठानं विनावतिष्ठते। तदेव नाकर्तृकम्। न चानधिकृतः कर्ता। न चानियोज्योऽधिकृत इत्यानुपूर्वीसिद्धम्। तेनात्रापि तत्पर्यवसानाय तदन्वययोग्यनियोज्यजिज्ञासा" इति।

---

[1] न्या.वा.ता.टी.१.१.७, पृ. ३७२.
[2] त.बिं.पृ. ८.
[3] त.बिं.पृ. १०५.

प्रकरणपञ्चिकायाम् आकाङ्क्षानिरूपणप्रकारः[१]

आकाङ्क्षाविषये प्राचीनग्रन्थेषु प्रकरणपञ्चिकायामेव किंचिद्विस्तरेणोक्तमस्ति। तदेव संग्रहेणानूदितं तत्त्वबिन्दौ। अतः पञ्चिकोक्ता रीतिरत्र अनूद्यते।

आकाङ्क्षासंनिधिप्राप्तयोग्यार्थान्तरसंगतान्।
स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता यदा॥
आनन्त्यव्यभिचाराभ्यां तदा दोषो न कश्चन।

यत्तावदुक्तं — प्रतियोगिनामनन्ततया अन्वयानामानन्त्यात्, तदानन्त्ये चान्वितानामप्यानन्त्यात् संबन्धग्रहणं दुष्करम्, अगृहीतसंबन्धस्य च पदस्य वाचकत्वे, एकस्माच्छब्दात् सर्वार्थप्रतीतिप्रसङ्गः इति। तदयुक्तम्। उपलक्षणाश्रयणेनापि संबन्धबोधस्य सुकरत्वात्, आकाङ्क्षितेन योग्येन संनिहितेन चान्वितं स्वार्थं पदं वक्तीति व्युत्पत्तिराश्रीयते। तथा च —

यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते।
तेनान्वितः पदेनार्थः स्वकीयः प्रतिपाद्यते॥

भवतु। का पुनरियमाकाङ्क्षा नाम? प्रतिपत्तुर्जिज्ञासा। किंहेतुका सा जिज्ञासेति चेत् — अविनाभावहेतुकेति केचिदाहुः। क्रिया हि कारकाविनाभाविनीति तां बुद्ध्वा कारकं जिज्ञासते। कारकं च क्रियाविनाभूतं बुद्ध्वा क्रियां जिज्ञासते। जिज्ञासितेनार्थेनान्वितः स्वार्थः पदेनाभिधीयते इति।

तदयुक्तमिति मन्यामहे। जिज्ञासाविरामानुपपत्तेः। तथा हि — यदा तावत् कारकजिज्ञासा तदा तज्जनक-तद्गुण-तत्क्रिया-तत्कारकान्तरजिज्ञासाप्यापद्यते। अथ प्रयोजनाभावात् कारकातिरिक्तमन्यन्न जिज्ञास्यते, तर्हि क्रियामात्रावगमेऽपि, यत्र कारकज्ञानेन प्रयोजनं नास्ति तत्र जिज्ञासा न स्यात्। अनुष्ठेयतया हि क्रियायामवगतायां कारकमन्तरेण तदनुष्ठानानुपपत्तेः कारकज्ञानं प्रयोजनवत्। वर्तमानापदेशादौ च अननुष्ठेयतया नास्ति कारकज्ञानेन प्रयोजनम्।

अपि च यत्रापि वाक्यमपरिपूर्णं मन्यन्ते, साकाङ्क्षार्थाभिधायितया चापरिपूर्णता। अत एव तत्राध्याहारमपि कुर्वन्ति तत्र तथा। यत्रापि चानुष्ठेयक्रियावगमः, तत्रापि निश्शेषकारकजिज्ञासा स्यात्। यथा "देवदत्त! गामानय" इति करणानुपादानात् अपरिपूर्णता स्यात्। अथ एककारकज्ञानेनापि क्रियानुष्ठानोपपत्तेः न कारकान्तरजिज्ञासा, तर्हि "देवदत्त! गामानय दण्डेन" इति दण्डशब्दे प्रयुक्तेऽपि तदाकाङ्क्षा न स्यात्। ततश्च अनाकाङ्क्षितत्वात्तस्य वाक्यार्थे तदन्वयो न स्यात्। अथ दण्डपदोच्चारणात् तत्राकाङ्क्षा कल्प्यते। अन्यथा दण्डपदार्थस्यानन्वये

---

[१] प्र.पं.पृ. ३८४-३८८.

तत्पदोच्चारणमनर्थकं स्यादिति चेत् — एवमपि "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्यत्राप्यनन्वयप्रसङ्गः। न हि वेदपदोच्चारणेनानर्थकेन न भवितव्यमित्यत्र किंचित् प्रमाणमस्ति। अतो न तत्राकाङ्क्षोदये किंचन प्रमाणमस्तीति "सोमं क्रीणाति" इत्यतोऽधिकस्य भागस्यानन्वितत्वं स्यात्।

अपि च लौकिकत्वात् क्रियाकारकयोः यत्किंचित्क्रियाकारकोपादानेऽपि तत्सिद्धेः अविघातात् नातीव विशेषजिज्ञासा घटते। अज्ञाते हि जिज्ञासा, न तु ज्ञातेऽपि।

पञ्चिकाकारमतम्

अभिधानापर्यवसानात् अभिधेयापर्यवसानाद्वा पदार्थान्तरे पुरुषस्य या जिज्ञासा समुत्पद्यते सा आकाङ्क्षा। तदुक्तम् —

"अभिधानावसाना हि जिज्ञासार्थाच्च जायते।
प्रयोजनावसानाच्च पदार्थे सा निवर्तते॥" इति।

एकस्य पदस्य प्रयोगे हि "द्वारम्" इत्यादावभिधानमेव न पर्यवस्यति। न ह्यनुच्चरिते अन्वयप्रतियोग्युपस्थापके पदे अन्विताभिधानं वक्तुं शक्यते। वृद्धव्यवहारवशेन पदानामन्वितार्थप्रतिपादनपरता निश्चितेति तदर्थं युक्तैव प्रतियोगिजिज्ञासा।

यस्याप्यभिहितान्वय इति राद्धान्तः, तस्यापि मते पदार्थस्य पदार्थान्तरमन्तरेणान्वयासामर्थ्यात् तदुपपत्तये युक्तैव प्रतियोगिजिज्ञासा। तस्यां च सत्यामपरिपूर्णवाक्यपूरकतया लोकेऽध्याहारस्य विदितत्वात् प्रकरणादिवशेन योग्यस्यान्वयप्रतियोगिनः अध्याहारः क्रियते। इदमभिधानापर्यवसानात् जिज्ञासायाः उदाहरणम्।

अभिधेयापर्यवसानात् जिज्ञासा यथा —

"अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति" इत्यादिषु अनेकपदप्रयोगात् अन्विताभिधानेऽपि अभिहितस्य अपूर्वात्मकस्य कार्यस्य अनुष्ठानं विना कार्यत्वानुपपत्तेः, कर्त्रा च विना अनुष्ठानासंभवात्, अधिकारादृते च कर्तृत्वायोगात्, नियोज्यं विना चाधिकारस्यानवकल्पनात् कार्यस्योपपत्तये युक्तैव नियोज्यस्य जिज्ञासा। जिज्ञासायां सत्यां वाक्यस्यापरिपूर्णत्वावगमात् स्वर्गकामो नियोज्योऽध्याह्रियते।

नन्वेवं तर्हि यत्र पदत्रयं प्रयुज्यते "गामानय शुक्लाम्" इति लोके, तत्र हि कारकद्वयस्यासंभवान्नाकाङ्क्षास्तीति कथमन्विताभिधानम्, "गामानय" इत्येतावतैव परिपूर्णत्वात् वाक्यस्य। सत्यम्। पदान्तरानुच्चारण एवम्। उच्चरिते तु

तस्मिन् तस्याप्यानयतिसंनिधानात् एकवाक्यत्वावगमात् आनयत्यन्वितस्वार्थाभिधायित्वात् आकाङ्क्षां विना च तदसंभवात् आनयतेराकाङ्क्षा कल्प्यते। तथा चोक्तमर्थवादाधिकरणे भाष्यकारेण "भवति च 'रक्तः पटो भवति' इत्यत्र रक्तं प्रति आकाङ्क्षा" इति[१]। तेनात्राप्यन्विताभिधानसिद्ध्यर्थमेवाकाङ्क्षा। परं त्वयं विशेषः "द्वारम्" इत्यादौ तस्यैव पदस्यान्विताभिधानाय आकाङ्क्षा, "गामानय शुक्लाम्" इत्यादौ तु पदान्तरस्येति।

अयमत्र संग्रहः

अन्वितस्याभिधानार्थमुक्तार्थघटनाय वा।
प्रतियोगिनि जिज्ञासा या साकाङ्क्षेति गीयते॥

सा चेयमाकाङ्क्षा व्युत्पत्तावुपलक्षणमाश्रीयते। न च योग्यतासत्तिद्वयमात्रमुपलक्षणम् अस्तु, आकाङ्क्षाया अपि उपलक्षणत्वं किमर्थमिति वाच्यम्। निराकाङ्क्षाणामन्विताभिधानादर्शनात्। "अयमेति पुत्रो राज्ञः, पुरुषोऽपनीयताम्" इत्यादौ पुत्रपदसंबन्धेन निराकाङ्क्षो राजा न पुरुषेणान्वीयते।

कस्मात् पुनरनयोः पुत्रपुरुषयोः संनिधियोग्यत्वाविशेषेऽपि पुत्रेणैव राज्ञः संबन्धः, न पुरुषेण। उच्यते। वाक्यात् वाक्यार्थप्रतिपत्तेः न्यायसापेक्षत्वात् नित्यसापेक्षेण पुत्रेणैव राजा संबध्यते। तत्संबन्धे निराकाङ्क्षश्च न पुरुषसंबन्धमनुभवतीति आकाङ्क्षापि व्युत्पत्त्युपलक्षणमाश्रीयते। तथा च —

परिपूर्णेन योग्यस्य समीपस्याप्यनन्वयः।
व्युत्पत्तौ तेन शब्दानामाकाङ्क्षाप्युपलक्षणम्॥

सा चेयमाकाङ्क्षा प्रतियोगिषु सर्वेषु न सहसैवोपजायते, किं तु कारणोपनिपातक्रमेण। तथा हि —

विषयमन्तरेणापूर्वं कार्यं प्रत्येतुमेव न शक्यत इति प्रतीत्यनुबन्धभूतविषयापेक्षा प्रथमं विधेः। अथ प्रतिपन्ने विषयसंबन्धिनि विध्यर्थे नियोज्यमन्तरेण तत्सिद्ध्यसंभवात् नियोज्याकाङ्क्षा। तथा विषयीभूते भावार्थे करणे लब्धे वैकृतापूर्वाणां करणोपकाराकाङ्क्षा, लब्धे च तस्मिन् तज्जनकपदार्थाकाङ्क्षेति। यथाहुः —

"प्रतियोगिषु सर्वेषु नाकाङ्क्षोदेति तत्क्षणात्।
कारणोपनिपातानुपूर्व्येण तु यथातथम्॥" इति।

---

[१] भाष्यवाक्यस्य अर्थतः अनुवादोऽयम् (शा.भा.१.२.१.७, भा.१.पृ.४१)।

आकाङ्क्षाविषये उदयनाचार्यमतम्

उदयनाचार्याः न्यायकुसुमाञ्जलौ विशेषणविशेष्यभावः, पदार्थयोरविनाभावः, श्रोतुः जिज्ञासा वा आकाङ्क्षा इति पक्षान् प्रतिक्षिप्य 'स्मारिततदाक्षिप्तयोरविनाभावे सति तदुत्पाद्यसंसर्गावगमप्रागभावः आकाङ्क्षा' इत्युपापीपदन्। एतत्सर्वं पूर्वं शब्दप्रामाण्यसमर्थनवादे विस्तरेण विवृतमिति नेह विव्रियते।

मणिग्रन्थस्थः आकाङ्क्षाविचारः[१]

गङ्गेशोपाध्यायाः कुसुमाञ्जल्युक्तरीत्या आकाङ्क्षास्वरूपं विमृश्य कुसुमाञ्जल्युक्तं लक्षणमपि दूषयित्वा स्वयं परिष्कृतं लक्षणान्तरं प्रादर्शयन्। तत्रत्यान् विचारान् सरलरीत्या प्रस्तौमि।

अविनाभावस्य आकाङ्क्षात्वनिरासः

अथ केयमाकाङ्क्षा? न तावत् एकपदार्थस्य अपरपदार्थेन साकमविनाभावः आकाङ्क्षा। "नीलं सरोजम्" इत्यादौ तदभावात्। अनीलस्यापि सरोजस्य सद्भावेन सरोजत्वावच्छेदेन नीलरूपाविनाभावविरहात् तत्र आकाङ्क्षानुपपत्तेः। न च सरोजत्वसामानाधिकरण्येन नीलाविनाभावोऽस्ति इति वाच्यम्। "विमलं जलं नद्याः कच्छे महिषश्चरति" इत्यत्र जलान्वितनदीसम्बन्धाविनाभावस्य कच्छविशेषे सत्त्वेन कच्छस्य नदीपदोत्तरषष्ठ्यर्थसम्बन्धसाकाङ्क्षतापत्तेः।

समभिव्याहृतपदस्मारितपदार्थजिज्ञासायाः आकाङ्क्षात्वनिरासः

अथ समभिव्याहृतपदस्मारितपदार्थजिज्ञासा आकाङ्क्षा। समभिव्याहृतं यत् पदं तेन स्मारितो योऽर्थः तद्विषयकज्ञानेच्छेति तदर्थः। तथा च प्रकृतपदसमभिव्याहृतयत्पदस्मारितार्थे येन संबन्धेन प्रकृतपदस्मारितस्य यस्यार्थस्यान्वयबोधः, तत्पदस्मारिते तत्र तेन संबन्धेन प्रकृतपदस्मारितस्य तस्य शाब्दबोधेच्छा तत्पदे तत्पदाकाङ्क्षेति फलितोऽर्थः। उदासीनपदस्मारितार्थजिज्ञासायाम् अतिव्याप्तिवारणाय समभिव्याहृतेति।

न च तत्पदस्मारितेति व्यर्थम्, तत्र तस्यान्वये तत्र तस्य शाब्दबोधेच्छा आकाङ्क्षा इत्यस्यैव सम्यक्त्वादिति वाच्यम्। प्रकारान्तरेणोपस्थिते घटादौ प्रकारान्तरेणोपस्थितस्य नीलादेः शाब्देच्छायामपि "नीलो घटः" इत्यादिवाक्यात् घटादौ नीलाद्यन्वयबोधापत्तेः, आकाङ्क्षासत्त्वात्। न च तत्राकाङ्क्षासत्त्वेऽपि

[१] त.चिं.म, च.भा. प्र.प. पृ. १८५.

कारणान्तरस्य पदजन्यपदार्थोपस्थितेर्विरहान्नान्वयबोधापत्तिरिति वाच्यम्। एतादृशाकाङ्क्षावादिना पदजन्यपदार्थोपस्थितेः पृथक् कारणत्वानभ्युपगमात्। स्मारितत्वं च वृत्त्या स्मारितत्वं बोध्यम्। तेन कार्यत्वकारणत्वादिसंबन्धेन घटादिपदस्मारिताकाशादिजिज्ञासा न आकाङ्क्षेति चेत् —

न। जिज्ञासारहितस्यापि पुंसः वाक्यार्थबोधोत्पत्त्या व्यतिरेकव्यभिचारात्।

किं च "विश्वजिता यजेत" "द्वारम्" इत्यत्र अपदार्थयोरपि स्वर्गकामरूपाधिकारिणः पिधानस्य च आकाङ्क्षितत्वमिष्टम्। उक्तजिज्ञासायाः आकाङ्क्षत्वे तु तन्न स्यात्, अध्याहृतस्य स्वर्गकामादेः पदस्मारितत्वाभावेन तज्जिज्ञासायाः आकाङ्क्षात्वाभावात्।

न च शब्दाध्याहारपक्षे नायं दोष इति वाच्यम्। तथापि "घटः कर्मत्वमानयनं कृतिः" इत्यत्र जिज्ञासितस्य = निरूपकत्वादिसंसर्गककर्मत्वादिपदस्मारितकर्मत्वादिप्रकारकशाब्देच्छाविषयस्य आनयनादेः आनयनादिपदस्मारितस्य, आकाङ्क्षितत्वापत्तेः = निरूपकतासंबन्धेन कर्मत्वपदस्मारितकर्मत्वसाकाङ्क्षतापत्तेः।

जिज्ञासायोग्यतायाः आकाङ्क्षात्वनिरासः

यत्तु उदयनाचार्यैरुक्तं — जिज्ञासायोग्यता आकाङ्क्षा। यतो हि जिज्ञासा विशेषाज्ञाने (शाब्दबोधेऽनुत्पन्ने) एव भवति, अतः जिज्ञासायोग्यतैव आकाङ्क्षा। यत्सत्त्वे यत् संभाव्यते तस्यैव तद्योग्यतात्वम्। न च शाब्दबोधे उत्पन्ने शाब्देच्छेति तदभाव एव योग्यता। तथा च श्रोतरि तद्वाक्यज्ञानजन्यशाब्दबोधप्रागभावः तद्वाक्यज्ञानेन शाब्दबोधे जननीये आकाङ्क्षेति फलितम्। एकस्मिन् पुरुषे तादृशशाब्दबोधप्रागभावस्य सत्त्वेऽपि अन्यपुरुषस्य तादृशशाब्दबोधानुत्पादात् सामानाधिकरण्यप्रत्यासत्त्या आकाङ्क्षायाः हेतुत्वलाभाय श्रोतृनिष्ठेति प्रागभावविशेषणम्, न तु तत् लक्षणान्तर्गतम्।

"घटः कर्मत्वम्" इत्यादौ "घटवत्कर्मत्वम्" इत्यादिभेदसंसर्गकशाब्दबोधाभावसम्पत्तये तद्वाक्यज्ञानजन्येति। इत्थं च तत्र तद्वाक्यज्ञानजन्यतादृशशाब्दबोधाप्रसिद्ध्या तत्प्रागभावाभावान्न तादृशान्वयबोध इत्यभिमानः। खण्डवाक्यार्थबोधानन्तरं तदर्थविषयकतद्धटितमहावाक्यार्थबोधात्, "नीलो घटः" इत्यादौ वक्तुः क्रमिकशाब्दबोधद्वयेच्छायां धारावाहिकशाब्दबोधद्वयोत्पादाच्च सामान्याभावत्वमपहाय प्रागभावत्वेनोपादानम्।

नन्वेववमपि नदीजलान्वयबुद्धिमात्रतात्पर्यके "अहो विमलं जलं नद्याः कच्छे महिषश्चरति" इत्यत्र नदीजलयोरन्वयबोधानन्तरं नदीकच्छयोः कथं नान्वयबोधः?

तद्वाक्यज्ञानेन नदीकच्छयोरन्वयबोधे तात्पर्यग्रहदशायां नदीकच्छयोरप्यन्वयबोधजननात् तद्वाक्यज्ञानजन्यतादृशान्वयबुद्धिप्रागभावसत्त्वात्। न च तात्पर्यज्ञानाभावान्न तदानीं तादृशान्वयबोध इति वाच्यम्। 'तदानीमाकाङ्क्षाभावान्नान्वयबोधः' इति सकलप्राचीनप्रवादविरोधापत्तेः इति चेत् — उच्यते। पूर्वप्रदर्शितलक्षणे तद्वाक्यज्ञानजन्येत्यत्र तत्पदं ज्ञानविशेषणम्। तद्वाक्यविषयकतज्ज्ञानव्यक्तिजन्यसंसर्गावगमप्रागभावः तत्संसर्गावगमे आकाङ्क्षा। उक्तस्थले तद्वाक्यविषयकयज्ज्ञानव्यक्त्या तात्पर्यवशात् नदीजलयोरन्वयबोधो जनितः तज्ज्ञानव्यक्त्या जलान्वितनद्याः कच्छे संसर्गो नावगम्यत इति तज्ज्ञानव्यक्तिजन्यतत्संसर्गावगमाप्रसिद्ध्या तत्प्रागभावरूपा आकाङ्क्षा नास्तीति न नदीकच्छयोरन्वयबोधः — इति।

तन्न। निराकाङ्क्षे "घटः कर्मत्वमानयनं कृतिः" इत्यादौ तद्वाक्यज्ञानजन्यसंसर्गावगमप्रागभावस्य सिद्ध्यसिद्धिपराहतत्वात्। तत्र तादृशप्रागभावस्य सिद्धौ तदभावरूपं निराकाङ्क्षत्वं न संभवति, तदसिद्धौ सुतरां तन्न संभवति। अभावबुद्धौ प्रतियोगिज्ञानस्य कारणत्वात्।

न च साकाङ्क्षे प्रसिद्धस्य संसर्गावगमप्रागभावस्य अभावः निराकाङ्क्षे ज्ञातुं शक्य इति वाच्यम्। एवमपि यत्र नदीजलयोरन्वयबोधतात्पर्येण "विमलं जलं नद्याः कच्छे महिषः चरति" इति प्रयुक्तम्, तत्र एकः पुरुषः "विमलं जलम्" इति वाक्यभागमश्रुत्वैव नद्याः कच्छान्वयपरत्वमवैति, अपरः पुरुषः समग्रं वाक्यं श्रुत्वापि नद्याः जलान्वयपरत्वमवधारयति, तत्र उभयोरपि = जले कच्छे च नद्याः संसर्गबोधात् "नद्याः" इत्येतत् जलकच्छोभयसाकाङ्क्षं स्यात्। न चेष्टापत्तिः, यस्मिन् अन्वयबोधे तात्पर्यं नास्ति, तत्र निराकाङ्क्षत्वव्यवहारस्यैव सर्वसंमतत्वात्।

यदि तु तद्वाक्यज्ञानजन्यवक्तृतात्पर्यविषयतादृशान्वयबुद्धिप्रागभावः तद्वाक्यजन्यतादृशान्वयबोधे आकाङ्क्षा, तथा चोक्तस्थले तात्पर्यांशे भ्रमादेवाकाङ्क्षाव्यवहारः इत्युच्यते, तदापि दोषान्तरमुक्तलक्षणे प्रसजति।

तथा हि — "विमलं जलं नद्याः कच्छे महिषश्चरति" इत्यादौ नदीजलान्वयबोधानन्तरं नदीकच्छान्वयबोधानुत्पत्तिस्थले तदुच्चारणजन्यनदीकच्छान्वयबुद्धिप्रागभावाभावस्य कारणान्तराभावव्याप्यतया = श्रोतृनिष्ठनदीकच्छान्वयबोधतात्पर्यज्ञानात्मककारणान्तराभावव्याप्यतया, तत एव = तात्पर्यज्ञानाभावादेव नदीकच्छान्वयबोधाभाव इति किमुक्तप्रागभावरूपायाः आकाङ्क्षायाः तादूप्येण हेतुतया? प्रमाणान्तरासत्त्वे प्राचीनप्रवादान्यथानुपपत्तिमात्रस्य कारणत्वासाधकत्वादिति।

ननु नदीजलान्वयबोधतात्पर्यके "विमलं जलम्" इत्यादौ नदीजलयोरन्वय-बोधानन्तरं नदीकच्छान्वयबोधवारणाय नोक्ताकाङ्क्षा हेतुः। अपि तु "घटः कर्मत्वम्" इत्यादौ "घटवत् कर्मत्वम्" इत्यादिभेदान्वयबोधस्य, "घटमानय" इत्यादौ वक्तृगतशाब्दबोधद्वयतात्पर्यं विनापि धारावाहिकशाब्दबोधस्य च वारणाय सा हेतुः। तत्र कारणान्तराभावस्य वक्तुमशक्यत्वादिति चेत् — एवमपि उक्तप्राग-भावरूपायाः आकाङ्क्षायाः हेतुत्वं न संभवति। तथा सति योग्यतासत्त्योः शाब्द-बोधाहेतुत्वप्रसङ्गात्। अयोग्ये अनासन्ने च संसर्गज्ञानानुत्पत्त्या संसर्गज्ञानप्राग-भावरूपायाः आकाङ्क्षायाः विरहादेव शाब्दबोधवारणसंभवेन, तदर्थं योग्यतायाः आसत्तेश्च हेतुतायाः अनावश्यकत्वात्।

अपि चैवं सति अनुमित्यादावपि बाधाभावस्य हेतुत्वं न स्यात्। न च बाधकालेऽनुमितिवारणाय बाधाभावस्य हेतुत्वमिति वाच्यम्। अनुमितिं प्रति अनुमितिप्रागभावस्य हेतुत्वस्वीकारेण बाधकालेऽनुमित्यनुत्पत्त्या तत्प्रागभाव-विरहादेवानुमितिवारणसंभवात्।

किं च प्रागभावस्य कार्यसामान्यं प्रति हेतुतया, प्रागभावरूपाकाङ्क्षायाः न शाब्दं प्रति असाधारणकारणता। आकाङ्क्षायाः तत्तच्छाब्दबोधप्रागभावरूपत्वे शाब्दबोधमात्रकारणतारूपा असाधारणकारणता तस्याः भज्येतेति यावत्।

अपि च उत्थिताकाङ्क्षा उत्कृष्टा, उत्थाप्याकाङ्क्षा अपकृष्टेति सर्वसिद्धम्। आकाङ्क्षायाः प्रागभावरूपत्वे तस्याम् उत्कर्षापकर्षौ न स्याताम्। प्रागभावे उत्कर्षापकर्षाभावात्।

सौन्दडीयम् आकाङ्क्षालक्षणम्

अथ ज्ञाप्यतदितरान्वयप्रकारकजिज्ञासानुकूलपदार्थोपस्थितिजनकत्वे सति अजनिततात्पर्यविषयान्वयबोधत्वम् आकाङ्क्षा। तत्पदोपस्थाप्यतत्पदोपस्थाप्ये-तरयोर्योऽन्वयः तत्प्रकारिका या जिज्ञासा, तदनुकूलपदार्थोपस्थितिजनकत्वे सति अजनितः = अनुत्पादितः, तात्पर्यविषयोऽन्वयबोधो येन तत्त्वम् आकाङ्क्षेति यावत्। "घटमानयति" इत्यत्र "घटम्" इत्येतावन्मात्रे उक्ते, "किम्, आनयति पश्यति वा?" (= 'किम् आनयनं घटनिष्ठकर्मतानिरूपकं, दर्शनं वा') इति जिज्ञासा भवति। एवम् "आनयति" इत्येतावन्मात्रे उक्ते "किं घटमन्यद्वा" (= 'किं घटनिष्ठकर्मत्वम् आनयननिरूपितम्, अन्यनिष्ठकर्मत्वं वा') इति जिज्ञासा भवति। आद्ये ज्ञाप्यम् आनयनं, तदितरत् दर्शनं, तत्प्रकारकजिज्ञासानुकूला पदार्थोपस्थितिः = घटनिष्ठकर्मत्वोपस्थितिः, तज्जनकत्वं "घटम्" इति पदे वर्तते।

द्वितीये ज्ञाप्यं घटनिष्ठकर्मत्वं, तदितरत् अन्यनिष्ठकर्मत्वम्, तत्प्रकारकजिज्ञासानुकूला पदार्थोपस्थितिः = आनयनोपस्थितिः, तज्जननकत्वम् आनयतिपदे वर्तते। अतः घटकर्मत्व-आनयनयोः निरूपकतात्मकसंबन्धप्रकारकजिज्ञासानुकूलोपस्थितिजनकता। एवमजनितान्वयबोधत्वं चोभयोः पदयोरस्तीति तयोः आकाङ्क्षा अस्ति। "घटः कर्मत्वमानयनं कृतिः" इत्यत्र घटकर्मत्वयोरभेदान्वयबोधानुकूलाकाङ्क्षासत्त्वेऽपि योग्यताविरहात् नाभेदान्वयबोधः। योग्यताभ्रमे तु भवत्येव। आधेयतासंबन्धेन घटप्रकारककर्मत्वविशेष्यकबोधस्तु न भवति। आधेयत्वरूपसंबन्धविशेषणत्वेन घटस्यानुपस्थित्या, तथा उपस्थितेरेव च घटकर्मत्वयोः आधेयत्वरूपसंबन्धप्रकारकजिज्ञासाजनकत्वात्, घटपदे च तज्जनकत्वाभावेन तादृशाकाङ्क्षाविरहात् नाधेयत्वसंसर्गकबोधः। "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यत्र "राज्ञः" इत्यस्य पुत्रेण सह जनितान्वयबोधत्वात् न पुरुषेण सह आकाङ्क्षा। एवं च सत्यन्तानुपादाने "घटः कर्मत्वम्" इत्यादावप्याकाङ्क्षा स्यात्। अतस्तदुपादानम्। तन्मात्रोक्तौ "अयमेति पुत्रो राज्ञः" इत्यत्र राजपुत्रयोरन्वयबोधानन्तरं राजपुरुषयोः अन्वयबोधः स्यात्, तद्वारणाय विशेष्यम्। राजपुत्रयोरन्वयबोधमात्रतात्पर्यके "अयमेति" इत्यादौ तात्पर्यभ्रमेण राजपुत्रयोरन्वयबोधानन्तरं तात्पर्यप्रमया राजपुरुषयोरन्वयबोधसम्पादनाय तात्पर्यविषयेति अन्वयबोधविशेषणम् इति चेत् —

सौन्दडीयलक्षणदूषणम्

न। आधेयत्वादिसंबन्धविशेषणत्वेन घटाद्युपस्थितेरेव घटकर्मत्वाद्योः आधेयत्वादिसंबन्धप्रकारकजिज्ञासाजनकत्वे नाम-विभक्ति-धातु-आख्यातार्थानां घटकर्मत्व-आनयन-कृतीनां स्वरूपेणोपस्थितिः अर्थात् आधेयत्वादिसंसर्गाविशेषणत्वेनोपस्थितिः न घटकर्मत्वाद्योः आधेयत्वादिसंबन्धप्रकारकजिज्ञासानुकूलेति तत्र आकाङ्क्षा न स्यात्। यदि स्वरूपेणोपस्थितिरेव तदनुकूला, तदा "घटः कर्मत्वमानयनं कृतिः" इत्यत्र, "घटमानयति" इत्यत्रेव "घटादिकर्मकानयनानुकूलकृतिमान्" इति बोधः स्यात्। स्वरूपेणोपस्थितेरुभयत्राविशेषात्।

अपि च "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यत्र त्रयाणां राजपुत्रपुरुषाणाम् एकदा स्वरूपेणोपस्थितौ सत्याम्, प्रथमम् = अजनितान्वयबोधदशायां, राज्ञः पुत्रेणैवान्वयधीः न पुरुषेणेति कस्य हेतोः? पुरुषेणान्वयबोधे तात्पर्यधीविरहात् इति चेत्, तर्हि तत एव पुत्रेणान्वयबोधोत्तरं पुरुषेणान्वयबोधस्य वारयितुं शक्यत्वात् व्यर्थम् अजनितान्वयबोधत्वदलम् इति।

आकाङ्क्षायाः सिद्धान्तरीत्या लक्षणम्

का तर्हि आकाङ्क्षेति चेत् — उच्यते। अभिधानापर्यवसानमाकाङ्क्षा। यस्य येन विना न स्वार्थान्वयानुभावकत्वं तस्य तत् अपर्यवसानम्।

अभिधानपदं करणव्युत्पत्त्या शब्दोच्चारणमभिधत्ते। तस्य अपर्यवसानं = फलानुत्पादः। तथा च तदुच्चारणजन्यशाब्दबुद्धौ तदुच्चारणजन्यताद्दशशाब्दधीप्रागभावः आकाङ्क्षेति फलितम्। तच्च पूर्वोक्तरीत्या दुष्टम्। अतः अभिधानापर्यवसानमित्यस्य पारिभाषिकोऽर्थ उक्तः — 'यस्य येन विना' इत्यादिना। तथा च 'यत्पदस्य यत्पदव्यतिरेकप्रयुक्तः याद्दशान्वयबोधाभावः तत्पदस्य तत्पदवत्त्वं ताद्दशान्वयबोधे अभिधानापर्यवसानम्' इति फलितार्थः। तत्पदवत्त्वं चाव्यवहितपूर्ववर्तित्व-अव्यवहितोत्तरवर्तित्वान्यतररूपसमभिव्याहारसंबन्धेन। प्रयुक्तत्वं च "कारणाभावात् कार्याभावः" इति प्रतीतिसाक्षिकः स्वरूपसंबन्धविशेषः, तत्प्रतियोगिजन्यप्रतियोगिकत्वं वा। नाम-विभक्ति-धातु-आख्यातपदानां न परस्परं विना परस्परस्य स्वार्थान्वयानुभवजनकत्वम्। भवति हि घटपदस्य "घटवत्कर्मत्वम्" इत्यन्वयबोधजनकत्वाभावः अम्पदव्यतिरेकप्रयुक्तः, अम्पदस्य तदभावश्च घटपदव्यतिरेकप्रयुक्त इति घटपदवत्त्वम् अम्पदे, अम्पदवत्त्वं च घटपदे आकाङ्क्षा। "घटः कर्मत्वम्" इत्यादौ तु घटपदस्य "घटवत् कर्मत्वम्" इति बोधजनकत्वाभावः न कर्मत्वपदव्यतिरेकप्रयुक्तः, कर्मत्वपदे सत्यपि बोधानुदयात्, इति न तत्राकाङ्क्षा।

इदं तु लक्षणं ज्ञायमानशब्दकरणतामते। शब्दज्ञानकरणतापक्षे तु अव्यवहितोत्तरत्वादिसंबन्धेन यत्पदविशेष्यकयत्पदप्रकारकज्ञानाभावप्रयुक्तः याद्दशान्वयबुद्ध्यभावः, तत्पदस्य तत्पदवत्त्वमाकाङ्क्षेति वक्तव्यम्।

केचित्तु — "नीलो घटोऽस्ति" "नीलं घटमानय" इत्यादौ प्रथमान्तनामार्थानां, कारकविभक्त्यन्तनामार्थानां च न परस्परमन्वयः। विशेषणवाचकनीलादिपदोत्तरप्रथमाद्वितीयादिविभक्त्यर्थस्य संख्याकर्मत्वादेः प्रकृत्यर्थतावच्छेदकनीलत्वाद्यवच्छिन्नेन सममनन्वयप्रसङ्गात्। अन्यपदार्थे घटादौ विशेषणतया उपस्थिते विभक्त्यर्थान्वयस्याव्युत्पत्तेः। अतः नीलविशिष्टघटवैशिष्ट्यं कर्मत्वादौ न भासते। अपि तु "नीलो घटोऽस्ति" इत्यादौ "एकनीलोऽस्ति" "एकघटोऽस्ति" इत्यन्वयबोधः। "नीलं घटमानय" इत्यादौ "नीलकर्मकघटकर्मकानयनानुकूलकृतिमान्" इत्यन्वयबोधः। अयमन्वयः आर्थः समाज इत्युच्यते। अर्थयोरयम् = आर्थः। अर्थयोः = नीलकर्मत्वयोः घटकर्मत्वयोः, समाजः = एकस्यामेवानयनादिक्रियायामन्वयः, — इत्याहुः। तथा चैतन्मते न नीलपदघटपदयोराकाङ्क्षा।

मणिकृतस्तु — नीलघटयोरभेदानुभवबलात् नीलपदार्थस्याभेदसंबन्धेन घटपदार्थेऽन्वयं स्वीकृत्य, अभेदसंबन्धेन नीलविशिष्टस्य घटस्य घटपदोत्तरविभक्त्यर्थेनान्वयं स्वीकुर्वन्ति। विशेषणविभक्तेश्च साधुत्वार्थकतां मन्यन्ते। तथा च नीलघटपदयोरपि आकाङ्क्षा अस्ति।

यद्वा समानविभक्तिकपदार्थयोरभेदानुभवबलात् विशेषणवाचकपदोत्तरविभक्तेः अभेदोऽर्थः। तथा च विशेषणवाचकपदतदुत्तरविभक्त्योः विशेषणविशेष्यभावेन स्वार्थानुभवजनकत्वम्। विशेषणवाचकस्य प्रकृत्यर्थस्य विभक्त्यर्थेऽभेदेऽन्वयः। अभेदस्य च विशेष्यवाचकपदार्थेऽन्वयः। "नीलो घटोऽस्ति" इत्यादौ "नील-प्रतियोगिकाभेदवान् घट" इत्यादिः बोधः। सर्वत्र भेदसंसर्गक एव बोधः इत्यपि निरूपयन्ति। एवं च तत्तत्प्रातिपदिकोत्तरतत्तत्प्रत्ययत्वं तत्तद्धातूत्तरतत्तत्प्रत्ययत्वं चाकाङ्क्षेति पर्यवस्यति।

"नन्वेवं कर्मधारयेऽप्येवं विशेषणविभक्त्यर्थे लक्षणा स्यात्। विग्रहवाक्यसमासयोः समानार्थत्वात्, तथा च निषादस्थपत्यधिकरणविरोध इति चेत् — न। कर्मधारयेऽभेदस्य संसर्गविधयैव भानाभ्युपगमात्, विग्रहसमासयोः समानार्थत्वनियमोऽसिद्ध एव, मानाभावात्" इति प्रकाशकृतः[१]।

"द्वारम्" इत्यादौ "पिधेहि" इति शब्दाध्याहारं विना अन्वयप्रतियोगिपदार्थोपस्थितेरलाभात् न स्वार्थान्वयानुभवजनकत्वम्। "विश्वजिता यजेत" इत्यत्र प्रवर्तकतात्पर्यविषयभूतं श्रोतृगतं "ममेदं कार्यम्" इत्याकारकं ज्ञानम् अधिकारिसमर्पकस्वर्गकामपदाध्याहारं विना न संभवतीति तदध्याहारेण तत्र आकाङ्क्षा निर्वाह्या।

यद्वा यत्र "पचति" इत्यादिपदमात्रं प्रयुक्तं, न तु "चैत्रः" इत्यादि, तत्र यथा पाककृत्योरन्वयबोधानन्तरम् अनुमानात् चैत्रादिकर्तृविशेष्यकान्वयबोधः, तथा "विश्वजिता यजेत" इत्यादौ अधिकारिणः स्वर्गकामस्यापि अनुमानादेव विध्यर्थकार्यत्वेऽन्वयबोधः।

गौणलाक्षणिकपदघटितवाक्ये आकाङ्क्षायाः उपपादनम्

ननु गौणलाक्षणिकपदयोः "सिंहो माणवकः" "गङ्गायां घोषः" इत्यादौ सिंहगङ्गादिपदयोः नानुभावकत्वम्, शक्तपदस्यैवानुभावकत्वमिति पक्षे तयोः पदयोः अन्वयानुभावकत्वाभावस्य स्वरूपायोग्यत्वप्रयुक्तत्वेन, वाक्यघटकपदान्तरविरहप्रयुक्तत्वाभावात् तत्राकाङ्क्षा न स्यादिति चेत् — न। तत्रापि शक्तस्य माणवक-

---

[१] त.चिं.म.व्या. प्रकाशः, पृ. १३.

घोषादिपदस्य गौणलाक्षणिकपदोपस्थापितार्थानुभावकत्वं गौणलाक्षणिकपदं विना न भवतीति शक्तपदं साकाङ्क्षमेव। लाक्षणिकादेः तन्निराकाङ्क्षत्वेऽपि न क्षतिः। अनुभावकपदनिष्ठाकाङ्क्षाया एव सहकारित्वात्।

"तदुपस्थापितस्याध्याहृतस्येवेतरपदं विना नानुभावकत्वम्" इति मणिग्रन्थः[१]। गौणलाक्षणिकपदोपस्थापितार्थस्य यत् शक्तपदजन्यानुभवविषयत्वं, तद् इतरपदं विना = गौणलाक्षणिकपदं विना न इत्यर्थः तस्य मणिग्रन्थस्य।

प्रकाशकृद्विवृतमाकाङ्क्षालक्षणम्

"अन्ये तु यदुपस्थापितस्यार्थस्य यत्पदव्यतिरेकेण नानुभवविषयत्वं तस्य तत्साकाङ्क्षत्वमिति लक्षणार्थः। एवं च तीरादेरनुभवविषयत्वं न घोषादिपदं विनेति गौणलाक्षणिकयोरपि साकाङ्क्षत्वमेवेत्यर्थ इत्याहुः" — इति प्रकाशकृतः[२]।

तत्र आक्षेप-समाधाने

ननु कर्मत्वादिविशेष्यकाधेयत्वादिभेदसंसर्गकघटादिप्रकारकान्वयबुद्धिं प्रति "घटम्" इत्याद्यानुपूर्वीविशेषस्याकाङ्क्षात्वात् "घटः कर्मत्वम्" इत्यादौ तादृशान्वयबुद्धिर्मास्तु। अभेदसंसर्गेण घटकर्मत्वयोः कुतो नान्वयबोधः इति चेत् — तत्र अभेदान्वयबोधौपयिकाकाङ्क्षासत्त्वेऽपि योग्यताज्ञानविरहात् न शाब्दबोधः। योग्यताभ्रमदशायां तु "घटाभिन्नं कर्मत्वम्" इति बोधो भवत्येव। अत एव धर्म्यभिन्नधर्मवादिनः योग्यताभ्रमात् तथा शाब्दबोधो जायते। "घटः कर्मत्वम्" इत्यादौ योग्यताज्ञानाभावेऽपि तत्तत्पदार्थोपस्थितिमात्रं भवति, न तूपस्थितानामर्थानामन्वयबोधः, अन्वयबोधे योग्यताज्ञानस्य कारणत्वात्।

ननु यस्य "घटः कर्मत्वम्" इत्यादौ आधेयत्वसंसर्गकघटप्रकारककर्मत्वविशेष्यकबोधेऽयथार्थं तात्पर्यमस्ति तदुच्चारिततद्वाक्यात् तथान्वयबोधापत्तिरिति चेत् — न। अयथार्थतात्पर्यसत्त्वेऽपि तथान्वयबोधो नापादयितुं शक्यते। नामविभक्तिधात्वाख्यातक्रियाकारकपदानामन्वयबोधे तान्येव पदानि समर्थानि, न तु तदर्थकानि पदान्तराणि। "अग्निः, करणत्वम्, ओदनः, कर्मता, पाकः, कृतिः, इष्टसाधनता" इत्यादिपदेभ्यः "अग्निना ओदनं पचेत" इत्यत्रेव "अग्निनिष्ठकरणतानिरूपक-ओदननिष्ठकर्मतानिरूपकपाकविषयककृतिः इष्टसाधनम्" इति शाब्दबोधस्यानुदयात्। तथा च नामादिपदसमभिव्याहृतविभक्त्यादिरूपाणि पदान्येव स्व-

---

[१] त.चिं.म, च.भा.प्र.प.पृ. २३०.

[२] त.चिं.म.व्या. प्रकाशः, पृ. १४.

रूपयोग्यानीति तदभावान्न "घटः कर्मत्वम्" इत्यादावन्वयबोधः। अतश्च तत्र स्वरूपायोग्यत्वप्रयुक्तमेवान्वयाननुभावकत्वं, न पदान्तरव्यतिरेकप्रयुक्तमिति आकाङ्क्षालक्षणविरहान्न तत्र आकाङ्क्षा।

ननु नामविभक्त्याद्यर्थानामभेदातिरिक्तसंबन्धेनान्वयबोधे नामादिपदसमभिव्याहृतविभक्त्यादेरेव स्वरूपयोग्यत्वे "अग्निकरणकौदनकर्मकपाकविषयककृतिरिष्टसाधनम्" इत्यतः "अग्निना ओदनं पचेत" इत्यत्रेव अन्वयबोधः कथं स्यादिति चेत् — "अग्निकरणक" इत्यादेः वाक्यत्वेन तत्र व्युत्पत्त्यन्तरस्वीकारेण ततोऽन्वयबोधात्। तथा हि — तत्र अग्निपदस्य अग्निनिष्ठे लक्षणा, करणपदस्य करणतानिरूपके लक्षणा। तदेकदेशकरणतायां चाभेदेन अग्निनिष्ठस्यान्वयः। तादृशकरणतानिरूपकस्य लक्षणया पाकपदार्थस्य पाकनिरूपितस्यैकदेशे पाकेऽभेदेनान्वयः। एवमोदनपदम् ओदननिष्ठपरम्। कर्मपदं कर्मतानिरूपके लाक्षणिकम्। तदेकदेशकर्मतायाम् ओदननिष्ठस्याभेदेनान्वयः। तादृशकर्मतानिरूपकस्य लक्षणया पाकपदार्थस्य पाकनिरूपितस्य एकदेशे पाकेऽभेदेनान्वयः। तादृशनिरूपितस्य तु लक्षणया विषयपदार्थस्य विषयिताश्रयस्य एकदेशे विषयितायाम् अभेदेनान्वयः। विषयिताश्रयस्य तु कृतावभेदेनान्वयः। इष्टपदं च इष्टनिरूपितपरम्। तस्य च साधनपदार्थसाधनतावदेकदेशसाधनतायां भेदेनान्वयः। साधनतावतश्च कृतावभेदेनान्वयः।

अभेदसंबन्धेन एकदेशान्वयासहिष्णुतायां तु विषयपदस्यैव अग्निनिष्ठकरणतानिरूपकओदननिष्ठकर्मतानिरूपकपाकविषयिणि लक्षणा। अन्यत् सर्वं तात्पर्यग्राहकम्। तादृशविषयिणः कृतावभेदेनान्वयः। इष्टसाधनमित्यत्र इष्टपदमपि तात्पर्यग्राहकम्। साधनपदस्येष्टसाधनमित्यर्थः। तस्याभेदेन कृतान्वयः।

"अग्निना ओदनं पचेत" इत्यत्र अग्निर्निष्ठतासंबन्धेन तृतीयार्थकरणत्वेऽन्वेति। करणत्वं च निरूपकतासंबन्धेन पाके, एवमोदनस्य निष्ठतासंबन्धेन द्वितीयार्थकर्मत्वे, कर्मत्वस्य निरूपकतासंबन्धेन पाके, पाकस्य विषयितासंबन्धेन आख्यातार्थकृतौ, तत्रैव लिङर्थस्येष्टसाधनत्वस्याश्रयतासंबन्धेनान्वय इति मथुरानाथीये[1]।

ननु पदत्वाविशेषेऽपि किंचिदेव स्वरूपयोग्यं किंचिन्नेत्यत्र किं नियामकमिति चेत् — स्वभावत एव असामर्थ्यम्। स्वभावो नामात्र तदानुपूर्वीविशेषरूपाकाङ्क्षात्मकस्वरूपयोग्यतावच्छेदकधर्माभावः। तादृशधर्माच्च सामर्थ्यम्।

ननु एवं सति अनासन्नस्यापि स्वरूपायोग्यत्वादेव शाब्दबोधाजनकत्वोपपत्तेः आसत्तेः किं पृथग्घेतुत्वेनेति चेत् — उच्यते। अनासन्नमपि = व्यवहितोच्चरितमपि, आसन्नतादशायाम् = अव्यवधानेनान्वयप्रतियोगिपदार्थोपस्थितिदशायाम्, अन्वय-

[1] त.चिं.म.व्या. रहस्यम्, च.भा. प्र.प. पृ. २३३.

बोधसमर्थमेव। इदमन्वयप्रतियोगिपदार्थोपस्थित्यव्यवधानस्य स्वरूपतो हेतुत्व-पक्षे। तज्ज्ञानस्य हेतुत्वपक्षे अनासन्नमपि आसत्तिभ्रमदशायामन्वयबोधसमर्थमेव। तथा चानासन्नस्य स्वरूपायोग्यत्वे ततः कदापि फलोपधानं न स्यात्। अनाकाङ्क्षं तु कदापि न फलोपधायकमिति विशेषः।

ननु नामविभक्तिधात्वाख्यातक्रियाकारकपदार्थानामभेदातिरिक्तसंबन्धेनान्वयबोधे नामादिसमभिव्याहृतविभक्तीनां स्वरूपयोग्यत्वे, "वह्निना सिञ्चति" इत्यत्र कुतो न तादृशान्वयबोध इति चेत् — तत्र स्वरूपयोग्यतायां सत्यामपि अयोग्यताज्ञानस्य प्रतिबन्धकस्य सद्भावान्न तादृशान्वयबोधः। यथा दाहस्वरूपयोग्यादप्यग्नेः मणि-रूपप्रतिबन्धकवशान्न दाहः, तद्वत्। अत एव अयोग्यताज्ञानरूपप्रतिबन्धकाभावे सति योग्यताभ्रमात् "वह्निना सिञ्चति" इति वाक्यादपि शाब्दबोधो भवति। न हि स्वभावतो दाहासमर्थम् आरोपितसामर्थ्यं वा वस्तु दहति पचति वा।

ननु "घटः कर्मत्वम्" इत्यादेः स्वरूपायोग्यत्वे तत्र शाब्दप्रमायाः अनुत्पादेऽपि क्वचिच्छाब्दभ्रमो जायमानः कथं स्यादिति चेन्न। तत्र शाब्दभ्रमस्याप्यनुत्पत्तेः। पदार्थस्वरूपज्ञानमात्रं तत्र, न त्वन्वयबोधोऽपि।

अजनितान्वयबोधत्वस्य आकाङ्क्षालक्षणे प्रवेशाभावः

ननु अजनितान्वयबोधत्वस्य आकाङ्क्षात्वाभावे "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यादौ राजपुत्रयोरन्वयबोधानन्तरं द्वितीयक्षणे राजपुरुष-योरन्वयबोधापत्तिः, उक्तायाः आकाङ्क्षायाः सत्त्वात्। पुरुषविशेष्यकराजप्रकार-कान्वयबोधस्याजनितत्वात्, अनुमितौ सिद्धेरिव, समानाकारकशाब्दबोधस्य प्रति-बन्धकताया अपि तत्र वक्तुमशक्यत्वात् इति चेत् — न। पुरुषपदं विनापि "राज्ञः" इति पदेन पुत्रेण समं स्वार्थानुभवस्य जनितत्वात् तादृशानुभवस्यैव पुनः पुरुषान्वयबोधे प्रतिबन्धकत्वात्। तत्पदजन्यशाब्दबोधे तत्पदजन्यशाब्दबोधसामा-न्यस्यैव प्रतिबन्धकत्वस्वीकारात्।

यद्वा, राज-पुत्र-पुरुषपदार्थानां त्रयाणां स्मरणे सति पुत्रेण सममजनितान्वय-बोधदशायां तात्पर्यनिश्चयाभावात् पुरुषेणान्वयबोधो न भवति, अपि तु पुत्रेणैवेति, पुत्रेण सममन्वयबोधे जनितेऽपि पश्चात् पुरुषान्वयबोधे तात्पर्यनिश्चयाभावादेव न तदन्वयबोधः। तात्पर्यनिश्चये सति भवत्येव पुरुषेण सममन्वयबोधः।

तत्र मतान्तरम्

अन्ये तु "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यादौ राजपुत्रयोरन्वय-बोधानन्तरं राजपुरुषयोरन्वयबोधवारणाय 'अन्वयबोधसमर्थत्वे सति अजनित-

तात्पर्यविषयान्वयबोधत्वमाकाङ्क्षा' इत्याहुः। अन्वयबोधसमर्थत्वं च तद्विशेष्यकतत्प्रकारकतत्संसर्गकान्वयबुद्धिजनकतावच्छेदकतत्तदानुपूर्वीविशेषविशिष्टत्वम्। अत्र सत्यन्तेन "घटः कर्मत्वम्" इत्यादिनिरासः। 'अजनित' इत्यादिना राजपुत्रान्वयबुद्धिमात्रतात्पर्यके "अयमेति" इत्यादौ राजपुत्रयोरन्वयबोधानन्तरं राजपुरुषयोरन्वयबोधस्य निरासः।

राजपुत्रान्वयबोधमात्रतात्पर्यके "अयमेति" इत्यादौ तात्पर्यभ्रमेण राजपुरुषयोरन्वयबोधे जातेऽपि राजपुत्रयोरन्वयबोधे आकाङ्क्षासम्पादनाय 'तात्पर्यविषय' इति अन्वयबोधविशेषणम्।

ननु "घटमानय" इति वाक्यं कदाचित् "घटविशिष्टं कर्मत्वम्" इत्यवान्तरवाक्यार्थज्ञानं जनयित्वापि "घटकर्मकानयनानुकूलकृतिमान्" इत्यन्वयबोधं जनयति; तत् अन्येतुमते कथं स्यात्? अजनितान्वयबोधत्वरूपाकाङ्क्षाविरहादिति चेत् — न। तत्र प्रकृतिप्रत्ययाभ्यां खण्डान्वयबोधे जनितेऽपि एकवाक्यतापन्नवाक्यद्वयवत् क्रियाकारकयोरन्वयबोधं प्रति अजनितान्वयबोधत्वरूपाकाङ्क्षा अस्त्येव।

एतदुक्तं भवति — स्वजनितापर्याप्त"घटकर्मकानयनानुकूलकृतिमान्"इत्याकारकबोधत्वरूपयत्किंचित्तात्पर्यविषयतावच्छेदककत्वमाकाङ्क्षा। स्वं = "घटम्" इति पदं, तज्जनिते "घटनिष्ठं कर्मत्वम्" इति खण्डवाक्यार्थबोधे अपर्याप्तमेव तात्पर्यविषयतावच्छेदकं घटकर्मकानयनबोधत्वमिति तत्राप्याकाङ्क्षानिर्वाह इति।

आकाङ्क्षाज्ञानस्य कारणत्वमेव नास्तीति नव्यमतम्

नव्यास्तु — पदविशेषजन्यपदार्थोपस्थितिः, "घटः कर्मत्वमानयनं कृतिः" इत्येवंविधपदाजन्यपदार्थोपस्थितिर्वा आसत्तिः अन्वयबोधकारणम्। तथा च आसत्त्यभावादेव "घटः कर्मत्वम्" इत्यादितो नान्वयबोधः। त्वयाप्येवंविधपदार्थोपस्थितेरेव आकाङ्क्षाज्ञानसहकारित्वेनावश्यमङ्गीकर्तव्यत्वात्। "अयमेति" इत्यादौ पुत्रेण सह जनितान्वयबोधात् राजपदात् न पुरुषेणान्वयबोधः, तात्पर्यज्ञानाभावात्। तथा च आकाङ्क्षाज्ञानस्य कारणत्वमेव नास्ति। किं तु शाब्दबोधजनकोपस्थितिपरिचायकत्वमात्रमाकाङ्क्षायाः। "घटमानय" इत्यानुपूर्वीविशेषघटकीभूततत्तद्घटादिपद-अम्पदादिजन्यघटकर्मत्वाद्युपस्थितेरेव शाब्दधीहेतुत्वात् — इत्याहुः।

तदुभयमतखण्डनम्

अत्र पूर्वोक्ते अजनितान्वयबोधत्वमाकाङ्क्षेति मते नव्यमते चास्वारस्यं मथुरा-

नाथीये प्रदर्शितम्। अतः 'यत्पदेन विना यस्यान्वयानुभावकत्वं नास्ति तत्पद-विशिष्टतत्पदत्वमेवाकाङ्क्षा' इति मणिकारसिद्धान्तः।

आकाङ्क्षाविषये रुचिदत्तमतम्

अत्र रुचिदत्तमिश्राः प्राहुः[१] —

अजनिततादृशान्वयबोधत्वमाकाङ्क्षा। न तु पदान्तरव्यतिरेकप्रयुक्तत्वगर्भा। न चैवं "घटः कर्मत्वम्" इत्यादौ तत्सत्त्वेन अन्वयबोधापत्तिः। क्रियाकर्मान्वयबोधे तादृशपदस्य स्वरूपायोग्यत्वात्। अत एव "तान्येव पदानि समर्थानि न तु तदर्थ-कानि पदान्तराणि, सामर्थ्यं तु स्वभावात्" इति पूर्वमुक्तं मणौ[२]। न हि स्वरूपायोग्यस्यापि सहकारिविरहप्रयुक्तं कार्याजनकत्वम्, तथा सति स्वरूपा-योग्यतैव न स्यात्।

ननु तत्राकाङ्क्षायाः सत्त्वे तस्य स्वरूपयोग्यत्वमपि स्यादेव, साकाङ्क्षपदत्वेन स्वरूपयोग्यत्वादिति चेत् — न। स्वतन्त्रान्वयव्यतिरेकानुविधायितया तस्याः पृथक् सहकारित्वेन स्वरूपयोग्यतानवच्छेदकत्वात्। अन्यथा पक्षतादेरप्यनुमिति-हेतुत्वं न स्यात्।

किं चाभेदान्वये "घटः कर्मत्वम्" इत्यादेरपि साकाङ्क्षत्वात् स्वरूप-योग्यत्वापत्तिः।

अथ अन्वयबोधविशेषे तत्पदव्यतिरेकप्रयुक्ततदन्वयाननुभावकत्वरूपाकाङ्क्षा-विशेषविशिष्टत्वेन स्वरूपयोग्यत्वमिति चेत् — हन्तैवं तदन्वयबोधविशेषे तत्पदविशेषत्वेनैव स्वरूपयोग्यत्वमस्तु, लाघवात्। पदविशेषस्याननुगमान्नैवमिति यदि, तदा आकाङ्क्षाविशेषेऽपि तुल्यम्।

यदि चान्वयबोधे आकाङ्क्षासामान्यं प्रयोजकम्, तद्विशेषे आकाङ्क्षाविशेषो विशेषसामग्रीति नाननुगमो दोषावह इति, तदा तत्सामान्ये पदसामान्यं, तद्विशेषे तद्विशेषस्तथेति तुल्यम्।

अन्यथा तत्राकाङ्क्षाविरहे स्वरूपायोग्यत्वम्, तस्मिन् सति आकाङ्क्षाविरहः, स्वरूपायोग्यत्वे तद्व्यतिरेकप्रयुक्ताननुभावकत्वस्याप्यावश्यकत्वादिति अन्योन्या-श्रयापत्तिः। अत एवेतरव्यतिरेकप्रयुक्तसिद्ध्यभावो न पक्षता।

तस्मात् यथा वह्निव्याप्यवत्त्वपरामर्शत्वेन वह्न्यनुमितिस्वरूपयोग्यता, तदन्य-परामर्शस्य स्वरूपायोग्यत्वात् न ततो वह्न्यनुमितिः न तु पक्षताविरहात्, तथा स्वरूपायोग्यत्वान्न तत्रान्वयबोधः, न त्वाकाङ्क्षाविरहात्।

---

[१] त.चिं.म.व्या. प्रकाशः, पृ. १५.

[२] त.चिं.म, च.भा. प्र.प.पृ. २३३, २३५.

यदि च सिषाधयिषायामिव तत्र ("अयमेति" इत्यादौ) अन्वयबोधान्तरतात्पर्यज्ञाने अन्वयबोधान्तरं भवति, तदा तात्पर्यज्ञानविरहसहकृतान्वयबोधाभाव एवाकाङ्क्षा अस्तु। सा च पक्षतावत् स्वरूपसत्येव हेतुः। अन्वयबोधान्तरे तात्पर्यज्ञानं विशेषसामग्रीति तदभावादेव तदभाव इति आकाङ्क्षाया हेतुतैव वा मास्तु। अत एव नव्यमते पदविशेषजन्यपदार्थोपस्थितित्वेन हेतुत्वे अननुगमो न दोष इति दिक् — इति।

आकाङ्क्षास्वरूपे मुक्तावलीदिनकर्युक्तः निर्णयः[१]

येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं = यत्पदविरहप्रयुक्तः यत्पदस्यान्वयानुभावकत्वाभावः अव्यवहितपूर्वत्व-अव्यवहितोत्तरत्वान्यतरसंबन्धेन तत्पदविशिष्टत्वं तत्पदस्य आकाङ्क्षा। "घटमानय" इत्यत्र घटपदं विना अम्पदस्यान्वयानुभावकत्वाभावात् घटपदविशिष्टत्वम् अम्पदे आकाङ्क्षा। अम्पदे घटपदविशिष्टत्वम् अव्यवहितोत्तरत्वसंबन्धेन। तत्रैव अम्पदं विना घटपदस्यान्वयानुभावकत्वाभावात् अव्यवहितपूर्वत्वसंबन्धेन अम्पदविशिष्टत्वं घटपदस्य आकाङ्क्षा। "घटः कर्मत्वम्" इत्यादौ कर्मत्वपदे घटपदवत्त्वं तु न आकाङ्क्षा, कर्मत्वपदनिष्ठायाः "घटीया कर्मता" इति शाब्दबोधाननुभावकतायाः घटपदविरहाप्रयुक्तत्वात्। घटपदसत्त्वेऽपि कर्मत्वपदे तथाविधशाब्दबोधाजनकतायाः सत्त्वेन व्यतिरेकव्यभिचारात्।

अत्र च अननुभावकत्वम् आकाङ्क्षाशरीरप्रविष्टपदपरिचायकमात्रम्, न तु आकाङ्क्षास्वरूपान्तर्गतम्। अम्पदे घटपदाव्यवहितोत्तरत्वज्ञानसत्त्वे अम्पदनिष्ठघटपदविरहप्रयुक्तान्वयबोधाजनकत्वज्ञानविलम्बेन शाब्दबोधविलम्बाभावात्।

यद्वा तस्य स्वरूपान्तर्गतत्वे जनितान्वयबोधस्थले पुनः शाब्दबोधापत्तिः। अतः तदपि आकाङ्क्षास्वरूपान्तर्गतम्। परं तु तस्य स्वरूपत एव शाब्दबोधे उपयोगः, न तु तज्ज्ञानस्य। एकपदेऽपरपदविशिष्टत्वांशश्च ज्ञात एवोपयुज्यते।

अत्र चैकपदेऽपरपदवत्त्वम् अपरपदाव्यवहितोत्तरत्वम्। तत्र चाव्यवधानांशस्य आसत्त्यैव लाभः। आसत्तेः पदाव्यवधानरूपत्वात्। उत्तरत्वं च क्रियाकारकपदयोर्नापेक्षितम्, "चैत्रः पचति" "पचति चैत्रः" इति वाक्यद्वयादप्यन्वयबोधात्। अतः क्रियाकारकपदयोराकाङ्क्षा नास्त्येव, किं तु प्रकृतिप्रत्यययोरेव। तत्राप्यव्यवधानांशस्य आसत्त्या लाभात् प्रत्यये प्रकृत्युत्तरत्वरूपा आकाङ्क्षा, तज्ज्ञानं शाब्दबोधे कारणमिति पर्यवसितम्।

---

[१] मु.व्या.दि.पृ. ६३८.

इदं तु बोध्यम्। आकाङ्क्षालक्षणे यत्पदपदं यत्पदज्ञानपरम्, तत्पदपदं तत्पदज्ञानपरम्। अन्यथा मौनिश्लोकादौ पदाभावात् आकाङ्क्षा न स्यात्। तथा च यत्पदज्ञानं विना यत्पदज्ञानस्यान्वयानुभावकत्वं नास्ति, अव्यवहितोत्तरत्व-संबन्धेन तत्पदज्ञानविशिष्टतत्पदज्ञानम् आकाङ्क्षा। इदं स्वरूपसदेव शाब्द-बोधकारणमिति।

ननु "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यत्र अजनितान्वयबोधदशायां राजपदस्य पुत्रपदेनेव पुरुषपदेनापि आकाङ्क्षासत्त्वात् "राज्ञः पुरुषः" इत्यन्वय-बोधः स्यादिति चेत् — तत्राकाङ्क्षासत्त्वेऽपि पुरुषान्वये तात्पर्याभावान्न तदन्वय-बोधः। तात्पर्यसत्त्वे तु पुरुषेणापि राज्ञः अन्वयबोधो भवत्येव। तथा च तात्पर्यमेव कदाचित् पुत्रेण, कदाचित्पुरुषेण राज्ञः अन्वयबोधे नियामकं, न त्वाकाङ्क्षा।

ननु पुरुषेण पुत्रेण च राजपदस्य तात्पर्यज्ञानेऽपि पुत्रपदराजपदयोरेव यत्र एकवाक्यतानिश्चयः = " 'राज्ञः' इति पदं पुत्रपदार्थेनान्वयबोधेच्छयोच्चरितम्" इति निश्चयः, पुरुषपदराजपदयोरेकवाक्यत्वाभावनिश्चयश्च = " 'राज्ञः' इति पदं पुरुष-पदार्थेनान्वयबोधेच्छया नोच्चरितम्" इति निश्चयश्च, तत्र पुरुषपदेन सह निरुक्ता-काङ्क्षायाः सत्त्वात् "राज्ञः पुरुषः" इति बोधापत्तिः इति चेत् — न। यत्पदेन विनेत्यस्य समभिव्याहृतयत्पदं विनेत्यर्थकतया समभिव्याहारस्याप्याकाङ्क्षाशरीरे प्रवेशात्। समभिव्याहारश्च "इदम्पदमेतत्पदेन सहान्वयं बोधयतु" इति पद-तात्पर्यम्। प्रकृते च तज्ज्ञानाभावात् तद्घटिताकाङ्क्षाज्ञानाभाव इति।

अन्ये तु — समभिव्याहारस्य पदतात्पर्यरूपस्य न आकाङ्क्षाशरीरे प्रवेशः। किं तु स्वातन्त्र्येण तज्ज्ञानं शाब्दबोधे कारणम् — इत्याहुः।

नव्यास्तु — अर्थतात्पर्यज्ञानस्य "राजपदं पुरुषविषयकराजसंसर्गप्रतीतीच्छया उच्चरितम्" इत्याकारकज्ञानत्वादिना हेतुत्वादेवातिप्रसङ्गाभावे समभिव्याहारज्ञानस्य हेतुत्वे मानाभावः। निरुक्तार्थतात्पर्यनिश्चये, पूर्वोक्तसमभिव्याहाररूपपदतात्पर्यस्य संशये तद्व्यतिरेकनिश्चये वा भवत्येव शाब्दबोधः — इत्याहुः।

इदमत्रावधेयं — न केवलं दिनकर्युक्तरीत्या प्रकृतिप्रत्यययोः पौर्वापर्य-माकाङ्क्षा, किन्तु अभेदसंसर्गकनीलादिप्रकारकघटादिविशेष्यकबोधे नीलादिपदा-व्यवहितोत्तरघटादिपदत्वम्, नीलादिघटादिपदयोः समानविभक्तिकत्वं वापि आकाङ्क्षा। एवं कर्तृत्वाद्यर्थकषष्ठ्या शाब्दबोधजनने कृदन्तपदसमभिव्याहारो-ऽप्याकाङ्क्षा। एवमाख्यातेन भावकर्मत्वयोर्विवक्षायां यगात्मनेपदसमभिव्याहारो-

ऽप्याकाङ्क्षा। अत एव व्युत्पत्तिवादे गदाधरभट्टाचार्यैरुक्तम् "अन्वयबोधौपयिकसमभिव्याहारस्यैवाकाङ्क्षात्वात्" इति[१]।

अत्राहुः **रामरुद्रभट्टाः दीपिकाव्याख्यायां**[२] —

मूले पदस्येति। घटादिपदनिष्ठामादिविरहप्रयुक्ता "घटीयकर्मता" इत्याकारकप्रकृतान्वयबोधानुपधायकता आकाङ्क्षा। भवति हि कारणाभावप्रयोज्यः कार्याभाव इति लक्ष्ये लक्षणसमन्वयः। "गौरश्वः" इत्यादिनिराकाङ्क्षस्थले गवाश्वयोः परस्परमन्वयाननुभावकत्वं न किंचित्पदविरहप्रयुक्तम्, गोपदाश्वपदयोः सत्त्वेऽपि तयोरन्वयाननुभावकत्वादिति न तत्राकाङ्क्षा।

यद्यपि केवलघटपदे अम्पदविरहप्रयुक्तान्वयाननुभावकत्वसत्त्वेन तज्ज्ञानात् केवलघटादिपदादपि "घटीयकर्मता" इति अन्वयबोधापत्तिः। न च (अम्पदजन्य) कर्मत्वोपस्थितेः तादृशशाब्दबोधकारणस्याभावेन तत्र न तादृशशाब्दबोधापत्तिरिति वाच्यम्। "घटः कर्मत्वम्" इत्यादौ तस्याः अक्षतेः। न च घटपदनिष्ठाम्पदविरहप्रयुक्तान्वयाननुभावकत्वज्ञानस्य अम्पदजन्यकर्मत्वोपस्थितिरेव सहकारिणीति वाच्यम्। "अम् घटः" इत्यादौ घटपदे तदुत्तराम्पदविरहप्रयुक्तान्वयाननुभावकत्वस्य सत्त्वेन तज्ज्ञानदशायामपि तादृशान्वयबोधापत्तेः। तत्र अम्पदजन्यकर्मत्वोपस्थितेरप्यक्षतत्वात्।

तथापि घटपदाव्यवहितोत्तराम्पदत्वमेव तत्राकाङ्क्षा, तादृशानुपूर्वीप्रकारकज्ञानमेव तादृशशाब्दबोधहेतुरिति नानुपपत्तिः। "घटान्" इत्यादौ घटपदोत्तरम् अम्पदाभावेऽपि, अन्पदत्वादिप्रकारकज्ञानादपि तादृशान्वयबोधोत्पत्त्यङ्गीकारान्न दोषः। तत्तत्कारणाव्यवहितोत्तरत्वस्य तत्तत्कारणजन्यतावच्छेदककुक्षौ निवेशात् न व्यतिरेकव्यभिचारः — इति।

प्रभाकृन्निष्कर्षः[३]

मुक्तावलीव्याख्याप्रभाकाराणां नृसिंहशास्त्रिणां व्याख्यानम् एवम् —

"येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेति" मुक्तावल्याः अयमर्थः — यत्पदव्यतिरेकप्रयुक्तः यत्पदनिष्ठः तात्पर्यविषयशाब्दबोधप्रयोजकत्वाभावः तत्पदनिरूपितनियतानुपूर्व्याश्रयत्वं तत्पदनिष्ठा आकाङ्क्षा। एकपदस्य अभिमतशाब्दबोधप्रयोजकत्वाभावः अपरपदव्यतिरेकप्रयुक्तः इत्यनेन परपदसहायेनैव एकपदस्याभिमतशाब्दबोधोपयोगित्वमित्यर्थो लभ्यते।

---

[१] व्यु.वा.पृ.११४.
[२] दी.व्या.रा. पृ. ३३९.
[३] मु.व्या.प्र. पृ. ६३८.

तथा च तात्पर्यविषयशाब्दबोधविषयतत्तदर्थविषयकस्मृतिनिरूपितज्ञाननिष्ठकारणतानिरूपितविषयतासंबन्धावच्छिन्नावच्छेदकताश्रयपदद्वयान्यतरनिरूपिततादृशपदद्वयान्यतरनिष्ठनियतानुपूर्व्याश्रयत्वं तादृशशाब्दबोधौपयिकाकाङ्क्षेति फलितम्। "घटमानय" इत्यादौ "घटकर्मकानयनानुकूलकृतिमान्" इत्यभिमतशाब्दबोधनिरूपिततादृशवाक्यज्ञाननिष्ठकारणतानिरूपितविषयतासंबन्धावच्छिन्नावच्छेदकताश्रयः द्वितीयान्तघटपदलोडन्तणीञ्धातुपदद्वयं, तयोर्मध्ये आङ्पूर्वकणीञ्धातोः द्वितीयान्तघटपदोच्चारणोत्तरकालीनोच्चरितत्वरूपनियतानुपूर्व्याश्रयत्वात् तादृशद्वितीयान्तघटपदस्य तादृशणीञ्धातुपदोच्चारणपूर्वकालीनोच्चरितत्वरूपनियतानुपूर्व्याश्रयत्वाच्च तादृशपदयोः परस्परसाकाङ्क्षत्वोपपत्तिः।

"वस्तुतस्तु क्रियाकारकपदानामव्यवधानमासत्तिविधयैव शाब्दबोधजनकमिति न तत् आकाङ्क्षा। परं तु 'घटनिष्ठा कर्मता' इति बोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारणम्" इति मुक्तावलीकाराः[१]।

तत्र प्रभाकाराः — आधेयतासंबन्धेन घटप्रकारककर्मत्वविशेष्यकशाब्दत्वावच्छिन्नं प्रति घटपदोत्तरत्वनियतानुपूर्वीप्रकारकद्वितीयाविशेष्यकाकाङ्क्षाज्ञानं कारणम्।

इदमुपलक्षणम्। द्वितीयापूर्वत्वरूपनियतानुपूर्वीरूपाकाङ्क्षाप्रकारकघटपदविशेष्यकज्ञानमपि कारणम्। एवमनुकूलतासंबन्धेन आनयनप्रकारककृतिविशेष्यकशाब्दबोधं प्रति णीञ्धातूत्तरत्वरूपनियतानुपूर्वीप्रकारकं लोट्पदविशेष्यकं ज्ञानं लोट्पदपूर्ववृत्तित्वरूपनियतानुपूर्वीप्रकारकाङ्पूर्वकणीञ्धातुविशेष्यकं च ज्ञानं प्रत्येकरूपेण तादृशज्ञानद्वयान्यतरत्त्वेन वा कारणमित्यपि बोध्यम्।

तथा च घटकर्मकानयनानुकूलकृतिप्रकारकशाब्दत्वव्यापकम् आधेयतासंबन्धेन घटप्रकारककर्मत्वविशेष्यकशाब्दत्वम्, अनुकूलतासंबन्धेन आनयनप्रकारक-कृतिविशेष्यकशाब्दत्वं च। तत्तद्व्यापकधर्मावच्छिन्नं प्रति तत्तदाकाङ्क्षाप्रकारकज्ञानानां हेतुत्वस्वीकारेणैव तत्तदाकाङ्क्षाज्ञानशून्यकाले व्यापकधर्मावच्छिन्नोत्पादकसामग्र्यभावेन विशिष्टशाब्दत्वरूपव्याप्यधर्मावच्छिन्नस्याप्यनुत्पत्त्या व्यभिचाराभावेन व्यापकधर्मावच्छिन्नोत्पादकसामग्र्याः निरुक्तव्याप्यधर्मावच्छिन्ननियतपूर्ववृत्तित्वमव्याहतमेव। परं तु किंचित्प्रयोजनाभावात् व्याप्यधर्मावच्छिन्नं प्रति अनन्यथासिद्धत्वघटितं कारणत्वं नाङ्गीक्रियते — इति व्याख्यानं चक्रुः।

एवं समासस्थलेऽपि अभेदसंबन्धेन राजसंबन्धिप्रकारकपुरुषविशेष्यकशाब्दबोधं प्रति राजपदपुरुषपदान्यतरनिरूपिततादृशान्यतरनिष्ठनियतानुपूर्वीरूपाकाङ्क्षा-

---

[१] मु.पृ.६३९.

ज्ञानं कारणम्। तेन "राजपुरुषः" इति वाक्यादिव "राजा पुरुषः" इति वाक्यान्न तादृशशाब्दबोधः। "राजा पुरुषः" इति वाक्यस्येव "पुरुषो राजा" इति वाक्यस्य अपि उच्चारयितुं शक्यत्वेन प्रथमान्तराजपदपुरुषपदयोः नियतानुपूर्वीरूपाकाङ्क्षाभावेन अभ्रान्तस्य तादृशाकाङ्क्षाज्ञानाभावादित्यपि बोध्यम् — इति न्यरूपि।

न्यायकौस्तुभोक्तरीत्या आकाङ्क्षाविचारः[१]

न्यायकौस्तुभे शब्दपरिच्छेदे महादेवपण्डितप्रदर्शितम् आकाङ्क्षास्वरूपं तावदेवं निरूपितम् —

"घटमानय" इत्यादित इव "घटः कर्मत्वमानयनं कृतिः" इत्यादिवाक्यात् घटकर्मकानयनानुकूलकृतिविषयकशाब्दबोधस्य वारणाय, आकाङ्क्षाज्ञानस्य शब्देन शाब्दबोधजनने सहकारित्वमङ्गीक्रियते। आकाङ्क्षा चानुपूर्वीविशेषः। आनुपूर्वी नाम पदानां पूर्वापरीभावः। तथा च यादृशयादृशानुपूर्वीतः यादृशान्वयबोधः भवति, तत्र तादृशानुपूर्वीज्ञानं हेतुरिति फलितम्।

आकाङ्क्षाज्ञानस्य शाब्दधीहेतुतायामाक्षेपः

नन्वेवं "घटम्" इत्यादिस्थले कर्मताविशेष्यकाधेयतासम्बन्धावच्छिन्नघटनिष्ठप्रकारतानिरूपकशाब्दत्वावच्छिन्नं प्रति घटपदोत्तराम्पदज्ञानत्वादिना हेतुतेति पर्यवसितम्। तच्च न संभवति, "कलशमानय" इत्यादिस्थलीयतादृशबोधे व्यभिचारात्, तत्र घटपदोत्तराम्पदज्ञानं विनापि कलशपदोत्तराम्पदज्ञाने "घटनिष्ठं कर्मत्वम्" इति बोधोदयात्।

न च घटार्थकपदोत्तराम्पदज्ञानत्वेन हेतुत्वान्न दोषः, तत्र घटार्थककलशपदोत्तराम्पदज्ञानसत्त्वादिति वाच्यम्। तथापि "घटस्यानयनम्" इत्यत्र व्यभिचारात्, तत्र षष्ठ्याः कर्मत्वार्थकतया घटार्थकपदोत्तराम्पदज्ञानं विनापि घटार्थकपदोत्तरस्यपदज्ञानात् "घटनिष्ठं कर्मत्वम्" इत्यन्वयबोधोदयात्।

न च घटार्थकपदोत्तरकर्मतार्थकविभक्तिज्ञानत्वेन तादृशशाब्दधीहेतुत्वात् नोक्तव्यभिचार इति वाच्यम्। यत्र, "घटम्" इत्यत्रत्यघटपदान्न घटस्मृतिः, किं तु "कलशोऽस्ति" इत्यादिकलशपदात्, एवं द्वितीयातोऽपि न कर्मत्वस्मृतिः, किं तु "पटस्यानयनम्" इति षष्ठीतः, तत्रापि "घटम्" इत्यानुपूर्वीतः कर्मताविशेष्यकाधेयतासंसर्गकघटप्रकारकशाब्दबोधप्रसङ्गादिति चेत् —

[१] न्या.कौ.पृ. ६६-८४.

तत्र समाधानम्

अत्रोच्यते। "घटम्" इत्यानुपूर्वीज्ञानजन्यघटोपस्थितिविशिष्टायां कर्मताविशेष्यकघटप्रकारकान्वयबुद्धौ स्वप्रयोज्यघटोपस्थितिसंबन्धेन "घटम्" इत्यानुपूर्वीज्ञानं कारणम्। एवं "कलशम्" इत्यानुपूर्वीज्ञानजन्यघटोपस्थितिविशिष्टायां कर्मताविशेष्यकघटान्वयबुद्धावपि स्वप्रयोज्यघटोपस्थितिसंबन्धेन "कलशम्" इत्यानुपूर्वीज्ञानं कारणमिति प्रत्येकमेकैकानुपूर्वीज्ञानस्य कारणत्वं वक्तव्यम्। वैशिष्ट्यं च एकक्षणावच्छेदेन एकात्मवृत्तित्वम्।

एवं च "तदस्ति" इत्यादौ घटविशिष्टकर्मताबोधकतदादिपदेन अपभ्रंशेन वा जनितायां "घटनिष्ठं कर्मत्वम्" इत्यन्वयबुद्धावपि न व्यभिचारः। "घटम्" इत्यानुपूर्वीज्ञानजन्यघटोपस्थितिविशिष्टत्वरूपकार्यतावच्छेदकानाक्रान्तत्वात् तादृशान्वयबुद्धेः। न च तथा सति कारणाभावात् "तदस्ति" इत्यतः "घटनिष्ठं कर्मत्वम्" इत्यन्वयबोधो न स्यादिति वाच्यम्। "तदस्ति" इत्याकारकानुपूर्वीज्ञानस्यापि तादृशशाब्दबोधं प्रति हेतुत्वकल्पनात्।

"घटः कर्मत्वम्" इत्यादिनिराकाङ्क्षस्थले च शक्तिज्ञानाद्यात्मकसामान्यसामग्र्याः सत्त्वेऽपि "घटम्", "कलशम्" इत्याद्यानुपूर्वीज्ञानात्मकविशेषसामग्रीविरहादेव "घटीयं कर्मत्वम्" इत्याद्याकारकबोधस्य नापत्तिः।

धात्वाख्यातयोरन्वयस्थले कार्यकारणभावनिरूपणम्

एवम् "आनयति" "प्रापयति" इत्यादौ धात्वाख्यातयोः अन्वयस्थलेऽपि "आनयति" इत्यानुपूर्वीज्ञानजन्यानयनाद्युपस्थितिविशिष्टे कृत्यादिविशेष्यकानयनादिप्रकारकान्वयबोधे "आनयति" इत्याद्यानुपूर्वीज्ञानत्वेन प्रत्येकरूपेण स्वप्रयोज्यानयनाद्युपस्थितिसंबन्धेन आनुपूर्वीज्ञानस्य कारणत्वं वक्तव्यम्। न तु कृत्याद्यंशे अनुकूलत्वविषयत्वसंबन्धेन आनयनादिप्रकारकान्वयबोधसामान्यं प्रत्येव आनयनोपस्थापकधातूत्तरकृत्युपस्थापकप्रत्ययज्ञानत्वेन कारणत्वमिति मतम् आदरणीयम्। यत्र आनयनार्थकधात्वनुत्तरवर्तिन एव तिपः तदुत्तरत्वभ्रमात् "आनयनविशिष्टा कृतिः" इत्यन्वयबोधः, तत्र व्यभिचारप्रसङ्गात्।

न चाव्यवहितोत्तरत्वसंबन्धेन आनयनोपस्थापकधातुप्रकारककृत्युपस्थापकप्रत्ययविशेष्यकज्ञानत्वेन तादृशान्वयबोधे कारणत्वान्नोक्तव्यभिचार इति वाच्यम्। प्रमेयत्वेन तादृशधातुप्रकारकज्ञानात् "प्रमेयवत् वाच्यम्" इत्याकारकात् धातुप्रकारकाख्यातविशेष्यकज्ञानात् "आनयनविशिष्टा कृतिः" इत्यन्वयबोधप्रसङ्गात्।

न च कृत्युपस्थापकाख्यातत्वाद्यवच्छिन्नविशेष्यकानयनोपस्थापकधातुत्वाव-

च्छिन्नप्रकारताशालिज्ञानत्वेन तादृशान्वयबोधे कारणत्वोक्तौ नोक्तापत्तिरिति वाच्यम्। "आनयति" इत्यानुपूर्वीविशेषस्याज्ञानेऽपि "कृत्युपस्थापकाख्यातम् अव्यवहितोत्तरत्वसंबन्धेन आनयनोपस्थापकधातुमत्" इति ज्ञानमात्रादपि अन्वयबोधापत्तेः। न चेष्टापत्तिः, अनुभवविरोधात्। धातुत्वाख्यातत्वाद्यग्रहेऽपि "घटमानयति" इत्यानुपूर्वीविशेषज्ञानमात्रादपि "घटकर्मकानयनानुकूलकृतिमान्" इत्यन्वयबोधोत्पत्त्या व्यतिरेकव्यभिचाराच्च।

किं च तत्र तत्र आनुपूर्वीविशेषनिश्चय एव हेतुः, तत्संशये तद्व्यतिरेकनिश्चये वा अन्वयबोधानुदयात्। 'यत्संशययद्व्यतिरेकनिश्चयौ वा यत्प्रतिबन्धकौ तन्निश्चयस्तद्धेतुः' इति नियमात् — इत्यादि।

गदाधरभट्टाचार्यकृतनिष्कर्षः

गदाधरभट्टाचार्या अपि व्युत्पत्तिवादे[१] "शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते" इति प्रथमप्रतिज्ञावाक्येन एकपदार्थविशेष्यकापरपदार्थप्रकारककिंचित्संसर्गकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्तत्पदसमभिव्याहाररूपाकाङ्क्षाज्ञानं कारणम् इति सामान्यतः कार्यकारणभावं प्रदर्श्य, ततः किंकिंपदार्थविशेष्यककिंकिंपदार्थप्रकारककिंकिंसंसर्गकशाब्दबोधं प्रति किंकिंपदसमभिव्याहारज्ञानं कारणमिति विशेषजिज्ञासायां "स च क्वचिदभेदः क्वचिच्च तदिरिक्त एवाधाराधेयभावप्रतियोग्यनुयोगिभावविषयविषयिभावादिः" इत्यादिना[२] विशिष्य विशिष्य प्रकृतिप्रत्ययानुपूर्वीपदद्वयसमभिव्याहारादीनां ज्ञानानि शाब्दबोधकारणत्वेन ग्रन्थसमाप्तिं यावत् न्यरूपयन्। अतस्तद्ग्रन्थस्य आनुपूर्व्या विशदाध्ययनेन सर्वं स्पष्टं भविष्यति।

तर्कताण्डवोक्तिपरामर्शः[३]

एवं स्थिते तर्कताण्डवाख्यग्रन्थे व्यासतीर्थैः यत् उक्तं तदपि परिशील्यते।

यत्तु मणावुक्तम् — अभिधानापर्यवसानमाकाङ्क्षा। यस्य येन विना स्वार्थान्वयाननुभावकत्वं तस्य तदेवापर्यवसानम्। अन्वयाननुभावकत्वं चान्वयानुभवप्रागभावः। अत एव जनितान्वयबोधं पदमनाकाङ्क्षम्, तदा प्रागभावाभावात्। आकाङ्क्षायाः प्रागभावरूपत्वादेव स्वरूपयोग्यतात इयं भिन्ना। सा हि जनितफलेऽप्यस्ति। इयं तु फलजननात् प्रागेव।

---

[१] व्यु.वा. पृ. १.
[२] व्यु.वा.पृ.३.
[३] त.तां, भा.२. पृ. ६.

न च प्रागभावस्य आकाङ्क्षारूपत्वे तस्मिंस्तारतम्याभावेन उत्थितोत्थाप्याकाङ्क्षयोः उत्कर्षापकर्षौ न स्यातामिति वाच्यम्। संसम्बन्धिकत्वासंबन्धिकत्वाभ्यां पदगताभ्यां तद्धटिताकाङ्क्षायामुत्कर्षापकर्षसंभवात्।

ज्ञाता चेयं हेतुः, न स्वरूपसती। निराकाङ्क्षे आकाङ्क्षाभ्रमादान्वयबोधस्यानुपपत्तेः।

समभिव्याहृतपदार्थविषयकजिज्ञासा तु नाकाङ्क्षा। अजिज्ञासोरपि शाब्दबोधोत्पत्त्या व्यभिचारात्। अजिज्ञासा च ज्ञाने इष्टसाधनताज्ञानविरहात्।

अपि च जिज्ञासायाः आकाङ्क्षात्वे आकाङ्क्षाज्ञानं शाब्दधीहेतुं न स्यात्। जिज्ञासाया अज्ञानेऽपि शाब्दबोधदर्शनात् — इति।

तन्न। गौणलाक्षणिकयोः "सिंहो माणवकः" "गङ्गायां घोषः" इत्यनयोरव्याप्तेः। न हि त्वन्मते तयोः पदान्तरविरहप्रयुक्तमननुभावकत्वं, किं तु स्वत एव। न च घोषपदमेव गङ्गापदेन साकाङ्क्षम्, गङ्गापदं तु न घोषपदेनेति संभवति। अनुभवविरोधात् — इति प्राथमिकं दूषणम्।

इदं च दूषणं मणिकारैरेव समाहितं "तदुपस्थापितस्याध्याहृतस्येवेतरपदं विना नानुभावकत्वम्" इति[१]। "यदुपस्थापितस्यार्थस्य यत्पदव्यतिरेकेण नानुभवविषयत्वं तस्य तत्साकाङ्क्षत्वमिति लक्षणार्थः। एवं च तीरादेरनुभवविषयत्वं न घोषादिपदं विनेति गौणलाक्षणिकयोरपि साकाङ्क्षत्वमस्त्येव" इति तद्व्याख्याने प्रकाशे[२]।

प्रागभावस्य सर्वकार्यहेतुत्वेन शाब्दासाधारण्यं न स्यादिति द्वितीयं दूषणम्।

तदपि न । न प्रागभावपर्यवसिता आकाङ्क्षा। अपि तु यत्पदस्य यत्पदविरहप्रयुक्तः अन्वयानुभवप्रागभावः तत्पदस्य तत्पदवत्त्वमेव आकाङ्क्षा। प्रागभावकथनं परिचायकमात्रमिति पूर्वमेव विस्तरेणोक्तम्।

ताण्डवकारैः स्वयमुक्तमाकाङ्क्षालक्षणमपि नव्यनैयायिकोक्तरीतावेव पर्यवस्यतीति पर्यालोच्य न तदनूद्यत इदानीम्।

नागेशीयमाकाङ्क्षानिरूपणम्[३]

नागेशा लघुमञ्जूषायामाकाङ्क्षास्वरूपमित्थं वर्णयन्ति —

वाक्यसमयग्राहिका चाकाङ्क्षा। सा च एकपदार्थज्ञाने तदर्थान्वययोग्यस्यार्थस्य

---

[१] त.चिं.म, च.भा.प्र.प. पृ. २३०.

[२] तत्त्वचिन्तामणिव्याख्या प्रकाशः, पृ. १४.

[३] ल.मं. पृ. ४९७-५०२.

यत् ज्ञानं तद्विषयकेच्छा "अस्यान्वयी अर्थः कः" इत्याकारा पुरुषनिष्ठैव। तथापि तस्याः आकाङ्क्षाविषयेऽर्थे आरोपः। एतदेव = आरोपितार्थनिष्ठाकाङ्क्षास्वरूपमेव अभिधानापर्यवसानमित्युच्यते। "अयमर्थोऽर्थान्तरसाकाङ्क्षः" इति व्यवहारात्। पदे तु नारोपः, प्रमाणाभावात्, अर्थबोधोत्तरमेव जिज्ञासोदयाच्च। "पदं साकाङ्क्षम्" इति व्यवहारस्तु पदं साकाङ्क्षार्थबोधकमित्यर्थकः।

आकाङ्क्षायाः अर्थविषयकत्वादेव समर्थसूत्रे भाष्ये[१] —

"परस्परव्यपेक्षायां सामर्थ्यमेके। का पुनः शब्दयोः व्यपेक्षा। न ब्रूमः शब्दयोरिति। किं तर्हि, अर्थयोः। इह राजा पुरुषमपेक्षते ममायमिति, पुरुषो राजानमपेक्षते अहमस्येति"

इति उक्तम्। ईदृशजिज्ञासाया उत्थापकं च एकपदार्थे(पदार्थज्ञाने?)ऽपरपदार्थ(ज्ञान)व्यतिरेकप्रयुक्तस्यान्वयबोधाजनकत्वस्य ज्ञानमिति तद्विषये तादृशबोधाजनकत्वेऽपि 'आकाङ्क्षा' इति व्यवहारं कुर्वन्ति। जिज्ञासोत्थापकस्य अन्वयबोधाजनकत्वज्ञानस्य शाब्दबोधहेतुत्वात् एकवारमन्वयबोधे जाते तदजनकत्वज्ञानरूपकारणविरहान्न पुनरन्वयबोधः। तदजनकत्वज्ञानस्य कार्यसहवर्तित्वेनैव हेतुत्वात् न सर्वत्र बोधद्वयम्। अन्यथा प्रथमबोधहेतोः तज्ज्ञानस्य द्वितीयबोधात् पूर्वमपि सत्त्वेन तत् बोधद्वयं दुर्वारं स्यात्। ज्ञानस्य द्विक्षणस्थायित्वात्।

न च अन्वयबोधाजनकत्वज्ञानस्य शाब्दबोधहेतुत्वे खण्डवाक्यार्थबोधानन्तरं महावाक्यार्थबोधो न स्यात्, खण्डवाक्यार्थबोधात्मकान्वयबोधजनकत्वज्ञानस्यैव तत्र तदा सत्त्वादिति वाच्यम्। अन्वयबोधाजनकत्वमित्यत्र अन्वयबोधपदेन आकाङ्क्षितसकलक्रियाकारकादिविषयकबोधस्य विवक्षितत्वात्, खण्डवाक्यार्थबोधस्य चातादृशत्वात्। खण्डवाक्यार्थबोधानन्तरमहावाक्यार्थबोधस्यापीष्टत्वादेव आलंकारिकोक्तं समाप्तपुनरात्तत्वस्य दोषत्वं संगच्छते। क्रियाकारकभावेनान्वयबोधकसकलपदोक्त्यनन्तरं तद्घटकयत्किञ्चिदन्वयिविशेषणोपादानं हि समाप्तपुनरात्तत्वम्।

किं च एकपदार्थेऽपरपदार्थव्यतिरेकप्रयुक्तान्वयबोधाजनकत्वज्ञानं समभिव्याहारकारणताज्ञानमूलकमिति समभिव्याहारकारणतापि आकाङ्क्षा। अतः स स समभिव्याहारस्तादृशान्वयबोधजनक इति ज्ञानमपि अन्वयबोधस्य कारणम्। अत एव यस्य यादृशान्वयबोधजनकत्वं यादृशसमभिव्याहारे गृहीतं तस्य तादृशान्वयबोधः इत्यनुभवसिद्धम्। स स समभिव्याहारः तत्तदन्वयबोधजनक इत्येव वाक्यविषये ऐश्वरः समयः। तत्परिपालिका च मीमांसा।

---

[१] म.भा.२.१.१.

अत एव "घटः कर्मत्वमानयनं कृतिः" इति वाक्यात् विपरीतव्युत्पन्नस्य = "अयं समभिव्याहारः अन्वयबोधकः" इति भ्रमवतः बोधो जायते, सद्व्युत्पन्नस्य = "अयं समभिव्याहारः नान्वयबोधजनकः" इति प्रमावतः, बोधाभावश्च उपपद्यते। सद्व्युत्पन्नत्वं च व्याकरणशास्त्रोक्तप्रकृतिप्रत्ययविभागतत्तदर्थविभागतत्तदन्वयबोध-विषयकज्ञानवत्त्वम्।

अन्वयानुभवश्च स्वरूपसन् तत्तत्समभिव्याहारजन्यान्वयबोधान्तरे प्रतिबन्धकः। तन्मूलकमन्वयबोधाजनकत्वज्ञानमपि वा हेतुरिति तन्मूलिकैव 'सकृदुच्चरितः' इति व्युत्पत्तिः।

तादृशबोधेच्छया उच्चरितत्वरूपतात्पर्यज्ञाने सत्यपि तत्समभिव्याहारे तादृश-बोधजनकत्वज्ञानाभावे बोधादर्शनात्, न तात्पर्येण अस्याः आकाङ्क्षायाः अन्यथा-सिद्धिः।

उत्थापकता-विषयतान्यतरसंबन्धेन वा तदुभयसंबन्धेन वा जिज्ञासाविशिष्टः साकाङ्क्ष इत्युच्यते। "पचति तण्डुलं चैत्रः" इत्यत्र उभयसंबन्धेन जिज्ञासा-विशिष्टत्वम्। क्रियाकारकयोर्द्वयोरपि परस्परं जिज्ञासोत्थापकत्वात्, जिज्ञासा-विषयत्वाच्च। "पश्य मृगो धावति" इत्यत्र अन्यतरसंबन्धेन जिज्ञासाविशिष्टत्वम्। तत्र पश्यार्थस्य कारकभूतधावनजिज्ञासोत्थापकत्वम्। धावनं तु जिज्ञासायां विषय एव, न जिज्ञासोत्थापकम्। ईदृशस्थले क्रियाकारकसंबन्धः वाक्यशक्य एव। विषयतासंबन्धस्यापि निवेशादेव "विभाषा साकाङ्क्षे" इति सूत्रे[१] भाष्ये "अस्त्यस्मिन्नाकाङ्क्षेति च साकाङ्क्षम्" इत्युक्तम्। अस्मिन्निति विषयसप्तमी।

आकाङ्क्षात्वेनानुगमादेक एव कार्यकारणभावः। समभिव्याहारस्य कारणत्वं च संबन्धं विनानुपपन्नमिति एतत्कार्यकारणबलादेव वाक्यशक्तिसिद्धिः। अन्यथा पदशक्तिरपि न सिध्येत् — इति।

नागेशमतपरिशीलनम्

अनेन नागेशीयनिरूपणेनेदं सिध्यति, यत् — वाक्यशक्तिबलात् "स स सम-भिव्याहारः तत्तदन्वयबोधजनकः" इति प्रथमतो ज्ञानम्। ततः एकपदार्थेऽपरपदार्थव्यतिरेकप्रयुक्तान्वयबोधाजनकत्वज्ञानम्। ततः "अस्य पदार्थस्यान्वयी अर्थः कः" इति जिज्ञासा। ततः शाब्दबोध इति क्रमः इति।

---

[१] पा.सू.३.२. ११४.

अत्र प्रथमतः वाक्यशक्तिः सविवादा। "एतत् पदम् एतत्पदसमभिव्याहृतम्" इति समभिव्याहारज्ञानमात्रात् शाब्दबोधोपपत्तौ "समभिव्याहारः शाब्दबोध-कारणम्" इत्याकारकस्य समभिव्याहारविशेष्यकशाब्दबोधकारणत्वप्रकारक-ज्ञानस्य शाब्दबोधकारणत्वं कुतः? अजिज्ञासोरपि शाब्दबोधोदयात् सर्वत्र जिज्ञा-सयैव शाब्दबोध इति नियमः किमर्थः? पदनिष्ठपदान्तरव्यतिरेकप्रयुक्तान्व-याननुभावकत्वस्यैव आकाङ्क्षोपयोगित्वे संभवति पदार्थनिष्ठपदार्थान्तरव्यतिरेक-प्रयुक्तान्वयाननुभावकत्वस्य आकाङ्क्षोपयोगित्वं कुतः? इत्यादि बह्वस्ति विचारा-स्पदम्।

अन्यदप्यत्रावधेयम् — "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति भगवता जैमिनिना[१] उक्तम्। "विभागे साकाङ्क्षम्" इत्येतदेव मनसिकृत्य "यत्पदेन विना यस्यान्वयानुभावकत्वविरहः" इति मणिकारेणोक्तम्। विभागे सति तु अवश्यमाकाङ्क्षा भवत्येवेति "अजिज्ञासोरपि शाब्दबोधात्" इति दूषणस्य नावसर इति प्रतिभाति। गदाधरभट्टाचार्यैरपि संगतिग्रन्थे उक्तं सूत्रमुद्धृत्य तदुत्था-प्याकाङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्क्षोत्थापकत्वान्यतरवत्त्वं तत्साकाङ्क्षत्व-मिति परिष्कृतम्। तदेव प्रकृतेऽपि स्वीकृतं चेत् समीचीनं भवितुमर्हतीति प्रतिभाति। अन्यथा नवीनपरिष्काराः सर्वेऽपि आकाङ्क्षापदार्थस्य सुदूरे वर्तन्त इति विमर्शकाः पृच्छन्ति।

वेदान्तपरिभाषोक्तरीत्या आकाङ्क्षाविचारः[२]

पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा। क्रियापदश्रवणे सति कारकस्य जिज्ञासाविषयत्वं, कारकपदश्रवणे सति क्रियायाः जिज्ञासाविषयत्वं, करणश्रवणे सति कथमिति जिज्ञासाविषयत्वमितिकर्तव्यतायाः = अङ्गस्य, इति पदार्थानां परस्परजिज्ञासाविषयत्वमस्ति। अजिज्ञासोरपि शाब्दबोधोदयात् जिज्ञा-साविषयत्वमित्यनुक्त्वा जिज्ञासाविषयत्वयोग्यत्वमित्युक्तम्। तच्च जिज्ञासाविषय-तावच्छेदकधर्मवत्त्वम्। स च धर्मः क्रियात्वकारकत्वादिः।

क्रियाकारकभावरहितेषु "नीलो घटः", "नीलमुत्पलम्", "तत्त्वमसि" इत्यादि-सिद्धपरवाक्येषु समानविभक्तिकपदप्रतिपाद्यत्वमवच्छेदकम्। अत एव तत्र "नीलः" इत्युक्तेः "कः" इति, "घटः" इत्युक्ते "कीदृशः" इति च जिज्ञासा जायते।

---

[१] जै.सू.२.१.१४.४६.

[२] वे.प. पृ. २१२.

एतादृशाकाङ्क्षाभिप्रायेणैव बलाबलाधिकरणे "सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इत्यत्र वैश्वदेवयागस्य आमिक्षान्वितत्वेन न वाजिनाकाङ्क्षा इति व्यवहारः। तथा हि तृतीयाध्याये "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति सूत्रम्[१]। अत्र श्रुत्यादीनामेकत्र समावेशेन विरोधे सति परस्य दुर्बलत्वं, पूर्वस्य प्राबल्यं चोच्यते। तत्र श्रुतिवाक्यविरोधोदाहरणं — "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति। तप्ते दुग्धे दधि प्रक्षिपेत्। तत्प्रक्षेपेण जायमानः घनीभूतो भागः आमिक्षेत्युच्यते। परिशिष्ट-द्रवांशः वाजिनशब्दवाच्यः। सा आमिक्षा विश्वेदेवदेवताका। वाजिनं वाजि-संज्ञकदेवेभ्यो देयमित्यर्थः। तत्र संदेहः — किं वाजिनस्य विश्वेदेवशेषत्वम्, उत वाजिनामकदेवताशेषत्वमिति। किं तावत् युक्तम्, विश्वेदेवशेषत्वमिति। न च "वाजिभ्यः" इति देवतान्तरश्रवणात् कथं वाजिनस्य विश्वेदेवसंबन्ध इति वाच्यम्। वाजम् = अन्नम्, आमिक्षाख्यमेषामस्तीति व्युत्पत्त्या वाजिशब्दस्य आमिक्षा-संबन्धिविश्वेदेवप्रतिपादकत्वात्। न चामिक्षाया एव श्रुत्या देवतासंबन्धः, न वाजि-नस्य, तस्य दुर्बलप्रमाणभूतवाक्यगम्यत्वादिति वाच्यम्। वैश्वदेवीपदस्य आमिक्षा-पदसापेक्षत्वेन आमिक्षायाः देवतासंबन्धस्यापि वाक्यगम्यत्वात्। तस्मात्तुल्य-बलत्वात् न आमिक्षया वाजिनबाधः, किं तु तया सह वाजिनस्य विकल्पः समुच्चयो वेति पूर्वपक्षे प्राप्ते;

सिद्धान्तः — विश्वेषां देवानामामिक्षयैव संबन्धः युक्तः, तस्याः "वैश्वदेवी" इति तद्धितश्रुत्या अवगम्यमानत्वात्। न चामिक्षापदसापेक्षत्वात् वाक्यगम्यत्वमिति वाच्यम्। "सास्य देवता" इति पाणिनिस्मृत्या[२] 'अस्याः' इति सर्वनामार्थे तद्धितस्य विधानेन तद्धितस्यामिक्षावाचकत्वात्। न च तद्धितेनैव आमिक्षाया उक्तौ आमिक्षापदवैयर्थ्यमिति वाच्यम्। 'अस्याः' इति सर्वनाम्नः कोऽर्थ इत्याकाङ्क्षायाम् आमिक्षापदस्य विशेषसमर्पकतया सार्थकत्वात्।

अत एव "अयं घटः" इत्यत्र 'अयम्' इति पदस्य विशेषसमर्पकघटपदा-पेक्षायामपि न श्रुतित्वहानिः। न च वाजिनपदं विशेषसमर्पकम्, वाक्यान्तर-स्थत्वात्। ततश्च विश्वेदेवानां तद्धितश्रुत्यवगतामिक्षावरुद्धत्वेन नैराकाङ्क्ष्यान्न वाक्येन वाजिनसंबन्धः। तदुक्तं भट्टपादैः[३] —

"श्रुत्यामिक्षैव शेषो हि नैषां वाक्येन वाजिनम्।
तद्दुर्बलप्रमाणत्वात्तया श्रुत्या निराकृतम्॥"

---

[१] जै.सू.३.३.७.१४.
[२] पा.सू.४.२.२४.
[३] तं.वा.३.३.७.१४, भा.४.पृ.२३३.

अत्र विश्वेदेवदेवताकयागस्य द्रव्यजिज्ञासायां श्रुत्यवगतया आमिक्षया तच्छान्तेः, न दुर्बलवाक्यावगतद्रव्यसंबन्धः, तत्र आकाङ्क्षाविरहात् इत्युक्ततया जिज्ञासापरतयैव आकाङ्क्षाशब्दः प्रयुक्त इत्याशयः।

ननु तत्रापि वाजिनस्य जिज्ञासाया अविषयत्वेऽपि तद्योग्यत्वमस्त्येव, प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वात्। प्रदेयद्रव्यत्वं च आमिक्षायामिव वाजिनेऽप्यविशिष्टमिति कथं नैराकाङ्क्ष्यमिति चेत् — न। स्वसमानजातीयपदार्थान्तरान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव यागनिरूपितजिज्ञासाविषयत्वयोग्यतावच्छेदकत्वात्। वाजिनद्रव्यस्य स्वसमानजातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेन तद्विरहसहकृतप्रदेयद्रव्यत्वविरहात् न योग्यत्वमिति।

अत्राहुः वेदान्तपरिभाषाव्याख्याशिखामणिकाराः —

अत्रेदमालोचनीयं — जिज्ञासाविषयत्वयोग्यत्वं नाकाङ्क्षा। "घटः कर्मत्वमानयनं कृतिः" इत्यत्र क्रियात्वादेस्तदवच्छेकस्य सत्त्वेन साकाङ्क्षत्वापत्तेः। न च स्वरूपायोग्यत्वान्न ततोऽन्वयबोध इति वाच्यम्। साकाङ्क्षत्वेनैव शब्दस्य स्वरूपयोग्यताया अप्यापातात्।

किं चान्वयबोधोत्तरकालमपि पदार्थेषु योग्यतालक्षणाकाङ्क्षासत्त्वात् पुनरन्वयबोधापत्तिः। न चान्वयबोधविरहसहकृतजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षेति विवक्षितम्, अतो न दोष इति वाच्यम्। अन्वयबोधानन्तरम् "अनेन शब्देन पुनर्जानीयाम्" इतीच्छया अन्वयबोधदर्शनात्।

किं चैवमाकाङ्क्षैव हेतुर्न स्यात्। अन्वयबोधाभावस्य प्रतिबन्धकाभावतया पृथक् कारणत्वेन कारणतावच्छेदकत्वायोगात्। अन्यथा सिद्ध्यभावसहकृतसिषाधयिषाविषयत्वयोग्यत्वमेवानुमितिहेतुः स्यात्। तथा च सिषाधयिषाविरहकृतसिद्ध्यभावः पक्षतेति भज्येत। ततश्च न युक्तं जिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षेति।

अत्र ब्रूमः। जिज्ञासाविरहसहकृतान्वयबोधाभावः आकाङ्क्षा। अजिज्ञासितान्वयबोधके वाक्ये (मुमुक्षोः अनिष्टान्वयबोधजनके गणिकावाक्ये) अन्वयबोधजनकत्वरूपविशेष्याभावात्, जनितान्वयबोधकवाक्ये जिज्ञासाविरहरूपविशेषणाभावात् विशिष्टाभावसत्त्वेन नान्वयबोधानुपपत्तिः। न चैवं "घटः कर्मत्वम्" इत्यादावपि उक्ताकाङ्क्षासत्त्वेन अन्वयबोधापत्तिरिति वाच्यम्। तादृशपदानां स्वरूपायोग्यत्वात्। न च साकाङ्क्षत्वेन स्वरूपयोग्यत्वमप्यापाद्यमित्युक्तमिति वाच्यम्। अन्वयबोधविशेषे = "निरूपकतासंबन्धेन कर्मतावत् आनयनम्" इत्यन्वयबोधे, पदविशेषत्वेन = द्वितीयान्तपदाव्यवहितोत्तरानयपदत्वेन हेतुत्वात्।

नन्वजिज्ञासितेऽपि वाजिनादौ विशेष्याभावसत्त्वेन साकाङ्क्षत्वापत्तौ बलाबलाधिकरणोक्तं नैराकाङ्क्ष्यं विरुध्येतेति चेत् — न। न हि नैराकाङ्क्ष्यपदेन शाब्दज्ञानोपयोग्याकाङ्क्षाऽभावः तत्राभिप्रेतः, किं तु श्रुतिकल्पनानुकूलजिज्ञासारूपाकाङ्क्षाविरहः।

इयं चाकाङ्क्षा स्वरूपसती हेतुः।

नन्वियं पक्षतापर्यवसन्नेति कथं शाब्दज्ञानासाधारणकारणमिति चेत् — न। पक्षतायां हि अनुमितिगोचरेच्छारूपा सिषाधयिषा प्रविष्टा। अत्र तु शाब्दज्ञानेच्छारूपा जिज्ञासा "अनेन शब्देनामुमर्थं जानीयाम्" इत्येवंरूपा प्रविष्टा। एवं सिद्धिसामान्याभावः पक्षतायां प्रविष्टः। अत्र तु शाब्दज्ञानरूपसिद्धिविशेषाभावः इति पक्षतातो विलक्षणत्वादुक्ताकाङ्क्षायाः। न चैवमप्यन्वयबोधाभावस्य अन्वयबोधप्रागभावरूपतया, प्रागभावस्य च कार्यसामान्यहेतुत्वेन न शाब्दबोधासाधारणकारणत्वमिति वाच्यम्। प्रागभावत्वेन साधारणकारणत्वेऽपि जिज्ञासाविरहरूपविशेषणघटितप्रागभावत्वेन तस्यासाधारणकारणत्वात्।

तस्मात् जिज्ञासाविरहसहकृतान्वयबोधाभाव एव आकाङ्क्षा, सैव च शाब्दज्ञानकारणम् — इति।

शिखामण्युक्तिपरिशीलनम्

अत्रेदमालोचनीयं — मणिकारैः आकाङ्क्षाज्ञानस्यैव शाब्दबोधकारणत्वम्, न तु स्वरूपसत्याः आकाङ्क्षायाः इति सोपपत्तिकमुक्तत्वात् स्वरूपतः कारणत्वकथनं न युक्तिसहम्।

अपि च आकाङ्क्षाया अभावरूपत्वे उत्थितोत्थाप्याकाङ्क्षयोरुत्कर्षापकर्षौ न स्याताम्, न ह्यभावे उत्कर्षापकर्षौ स्त इति मणिकारोक्तदूषणं शिखामणिकृदुक्ताकाङ्क्षायां दुर्वारम्। परिभाषोक्तमाकाङ्क्षालक्षणं तु शिखामणिकारैरेव दूषितम्। तस्मान्मण्युक्तमाकाङ्क्षालक्षणमेव सुष्ठु।

न्यायकोशे आकाङ्क्षाविचारः[१]

स्वरूपयोग्यत्वे सति अजनितान्वयबोधजनकत्वमाकाङ्क्षा। तेन "घटः कर्मत्वमानयनं कृतिः" इत्यत्र नान्वयबोधः, स्वरूपायोग्यत्वात्। तथा "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यत्र "राज्ञः पुरुषः" इति नान्वयबोधः, पुत्रेण जनितान्वयबोधत्वात्[२]।

---

[१] न्या.को. पृ. १११. अत्र (प्र) इति चिह्नितं विना अन्यत्पृष्ठसंख्यादिकं न्यायकोशनिर्दिष्टपृष्ठसंख्ययैव निर्दिष्टम्।
[२] तर्कामृत. ४, पृ. १०.

यत्पदं यत्पदेन सह यादृशानुभवजनकं भवेत् तत्पदस्य तत्पदसमभिव्याहारः तादृशान्वयबोधे आकाङ्क्षा। भवति हि नामपदम् उत्तरवर्तिविभक्तिपदेनैव सहान्वयबोधकम्। अतस्तत्समभिव्याहारस्तादृशान्वयबोधे आकाङ्क्षा[१]।

पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वम् आकाङ्क्षा[२]।

तदर्थश्च "यत्पदस्य यत्पदाभावप्रयुक्तमन्वयबोधाजनकत्वं तत्पदसमभिव्याहृत-तत्पदत्वम्" इति[३]।

प्रकृतान्वयबोधसमानाकारस्वजन्यान्वयबोधविरहः आकाङ्क्षा। अतो "घटम् आनयति" इति पदम् एकदान्वयबोधे जनिते नान्वयबोधान्तरं जनयति[४]।

समभिव्याहृतपदस्मारितपदार्थजिज्ञासा (आकाङ्क्षा)। यथा "घटम्" इत्युक्ते "आनय" "पश्य" इति, "आनय" इत्युक्ते "घटं" "पटं वा" इति जिज्ञासा[५]।

एकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्य यत् ज्ञानं तद्विषयकेच्छेति शाब्दिकाः।

आकाङ्क्षा च शाब्दबोधगोचरेच्छा शब्देनैव विषयसिद्धिद्वारा निवर्त्यते। अत्रायं न्यायः, 'शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते' इति। अनेन शब्दकल्पना आवश्यकीति विज्ञेयम्[६]।

इति आकाङ्क्षाविचारः

---

[१] न्यायसिद्धान्तमञ्जरी. पृ. २१.
[२] तर्कसंग्रह. पृ. ६७. (प्र).
[३] नीलकण्ठी. पृ. ३३९. (प्र).
[४] न्यायसिद्धान्तमञ्जरी ४, पृ. २२.
[५] न्यायकुसुमाञ्जलिटीका. पृ. १३.
[६] तर्कप्रकाश. खं.४. पृ. २.

योग्यताविचारः

"तस्य निराकाङ्क्षादौ संसर्गज्ञानाजनकत्वात् आकाङ्क्षादिकं सहकारि" इति शब्दप्रामाण्यसमर्थनवादान्ते[1] उक्तम्। तत्र आकाङ्क्षायाः सहकारित्वमुपपादितम्। आदिपदग्राह्ययोग्यतायाः सहकारित्वमिदानीमुपपाद्यते। तत्र योग्यता नाम का इति विषये प्राचीनप्रकरणपञ्चिकोक्तमादौ प्रतिपाद्यते।

प्रकरणपञ्चिकारीत्या योग्यतानिरूपणम्[2]

किं पुनरिदं योग्यत्वं नाम? उच्यते। यत् संबन्धार्हं तत् योग्यम्। संबन्धार्हमिदमिति कथमवगम्यते? संबन्धित्वेन दृष्टत्वात्। नन्वेवं तर्हि कथमपूर्वे कार्येऽन्विताभिधानं वेदे, तेन सह कस्यचित् संबन्धस्यादर्शनात्। उच्यते। सामान्यतो योग्यतावधारणं विशेषप्रतिपत्तावुपाय इत्यदोषः। यदपि तदपूर्वं तदपि कार्यमेवेति दृष्टचरकार्यसंबन्धं यत् तद्योग्यमित्यवसीयते।

सामान्येनैव योग्यत्वं लोके यदवधारितम्।
तदन्विताभिधानस्य व्युत्पत्तावुपलक्षणम्॥

अन्ये तु — यत् अयोग्यतया नावधारितं तत् योग्यम्। तेनालौकिकेनापि विध्यर्थेनान्विताभिधानं सिध्यतीत्याहुः। तदिदमसारम्। यथा प्रमाणान्तरावेद्ये वस्तुनि कस्यचित् योग्यता अवधारयितुं न शक्यते, तथैवायोग्यतापीति, सर्वेण अप्रतीतेनापि सर्वप्रकारेण, तस्मिन्नन्वयः स्यात्। भावार्थस्यैव विषयत्वेनान्वयः, अनुपादेयविशेषणविशिष्टस्यैव स्वर्गकामादेः नियोज्यतयान्वय इति नियमो नोपपद्यते — इति प्रकरणपञ्चिकायामुक्तम्।

अनेन इदं सिध्यति यत् — यत् संबन्धार्हं तद्योग्यम्। यत् संबन्धित्वेन दृष्टं तत् संबन्धार्हम् इति। तेन 'एकपदार्थे अपरपदार्थसंबन्धो योग्यता' इति निष्कर्षो लभ्यते।

मणिग्रन्थोक्तरीत्या योग्यतानिरूपणम्[3]

तत्र सजातीयेऽन्वयदर्शनं योग्यता इति मतम्, तत्खण्डनं च

ननु का नाम योग्यता? अत्र केचित् — सजातीयेऽन्वयदर्शनं योग्यता। तत्सजातीये तत्सजातीयस्यान्वयदर्शनं संसर्गनिश्चयः तत्र तच्छाब्दबुद्धौ योग्यतेति

---

[1] त.चिं.म, च.भा.प्र.प.पृ. १८१.
[2] प्र.पं.पृ. ३९०-३९१.
[3] त.चिं.म, च.भा.प्र.प. पृ. २४५.

तदर्थः। अस्ति च "पयसा सिञ्चति" इत्यादौ प्रकृतसेकसजातीये पयोऽन्तरकरणकसेके प्रकृतपयःकरणकत्वसजातीयस्य पयोऽन्तरकरणकत्वस्य संसर्गनिश्चयः। "वह्निना सिञ्चति" इत्यादौ तु सेकजातीये क्वापि सेके वह्निकरणकत्वसजातीयस्य कस्यापि वह्निकरणकत्वस्य संसर्गनिश्चयो नास्ति, बाधितत्वात्।

न च तत्र तत्संसर्गनिश्चयः तत्र तच्छाब्दबोधे योग्यतेत्येव सम्यक्, किं सजातीयत्वपर्यन्तनिवेशेनेति वाच्यम्। "गेहवृत्तिघटो नीलः" इत्यादौ गेहवृत्तिघटव्यक्तौ तन्नीलव्यक्तेः शाब्दबोधानुपपत्तेः, शाब्दबोधात् पूर्वं तद्घटव्यक्तौ तन्नीलव्यक्तेः संसर्गनिश्चयाभावात्। सजातीयत्वोपादाने तु तद्घटसजातीये व्यक्त्यन्तरे तन्नीलव्यक्तिसजातीयस्य नीलव्यक्त्यन्तरस्य संसर्गनिश्चयो वर्तत एवेति नानुपपत्तिः — इत्याहुः।

तन्न। अत्र येन केनापि धर्मेण साजात्यं विवक्षितम्? पदार्थतावच्छेदकेन = अन्वयितावच्छेदकेन धर्मेण वा?। आद्ये तन्निष्ठधर्मावच्छिन्ने तन्निष्ठधर्मावच्छिन्नस्य संसर्गनिश्चयः तत्र तच्छाब्दबोधे योग्यतेति फलितार्थः। द्वितीये अन्वयितावच्छेदकरूपेण तत्सजातीये अन्वयितावच्छेदकरूपेण तत्सजातीयस्य संसर्गनिश्चयो योग्यतेति पर्यवसितार्थः।

तत्र न प्रथमः। अव्यावर्तकत्वात्। एतदुक्तं भवति। "वह्निना सिञ्चति" इत्यादौ "सेको न वह्निकरणकः" इति बाधनिश्चयदशायां शाब्दबुद्धिर्न वारयितुं शक्यते। तादृशबाधनिश्चयसत्त्वेऽपि "क्रिया वह्निकरणिका" "प्रमेयं वह्निकरणकं" "सेकः द्रव्यकरणकः" "सेकः प्रमेयकरणकः" "सेकः प्रमेयवान्" इत्याकारकस्य सेकनिष्ठक्रियात्वाद्यवच्छिन्ने वह्निकरणकत्वसंसर्गनिश्चयस्य, सेकत्वावच्छिन्ने प्रमेयकरणकत्वसंसर्गनिश्चयस्य च संभवेन "सेकः वह्निकरणकः" इति शाब्दप्रसङ्गात्।

न च तदानीं तादृशनिश्चयसंभवेऽपि बाधनिश्चयस्य प्रतिबन्धकत्वादेव नान्वयबोध इति वाच्यम्। तथा सत्यावश्यकत्वात् बाधनिश्चयाभाव एव हेतुरस्तु, किं योग्यतायाः हेतुत्वेन।

न द्वितीयः; "अद्यजातः पयः पिबति" इत्यादावभावात्। तत्र शाब्दबोधात् पूर्वम् अन्वयितावच्छेदकेन अद्यजातत्वरूपेण क्वाप्यद्यजाते पयःपानकर्तृत्वत्वेन रूपेण पयःपानकर्तृत्वसंसर्गनिश्चयाभावात्।

अपि च संसर्गरूपस्य वाक्यार्थस्य पूर्वमज्ञातत्वात् "पयसा सिञ्चति" इत्यादावपि शाब्दबोधात् पूर्वं सेकत्वाद्यवच्छिन्ने पयःकरणकत्वत्वाद्यवच्छिन्नसंसर्गस्य अनिश्चयात् तन्निश्चयरूपा योग्यता दुरुपपादा।

अन्ये तु — समभिव्याहृतपदार्थसंसर्गव्याप्यधर्मवत्त्वं योग्यता। 'समभिव्याहृत'

इत्यस्य प्रकृतेत्यर्थः। तदीयतत्संसर्गव्याप्यधर्मवत्त्वं तत्संसर्गेण तद्योग्यतेति फलितोऽर्थः — इत्याहुः।

तदपि न। प्रकृतपदार्थसंसर्गव्याप्यधर्मवत्त्वरूपयोग्यताज्ञानात् प्रकृतपदार्थसंसर्गरूपवाक्यार्थज्ञानं भवतीत्युक्तौ वाक्यार्थज्ञानस्यानुमितिरूपत्वापत्तेः। व्याप्यधर्मज्ञानजन्यज्ञानं ह्यनुमितिः। तथा च जितं वैशेषिकैः। तैः वाक्यार्थस्यानुमेयत्वाङ्गीकारात्।

न च वस्तुगत्या तदीयतत्संसर्गव्याप्यो यो धर्मः तद्वत्त्वं योग्यता। तच्च न ज्ञातं सत् वाक्यार्थबोधकारणम्, अपि तु स्वरूपसत्। अतो नानुमेयः संसर्गरूपो वाक्यार्थ इति वाच्यम्। वस्तुतो योग्यताविरहेऽपि योग्यताभ्रमात् शाब्दबोधभ्रमः अङ्गीक्रियते। स्वरूपसद्योग्यतायाः शाब्दधीहेतुत्वे तु स न स्यादिति।

न च स्वरूपसद्योग्यता शाब्दप्रमायां हेतुरिति वाच्यम्। बाधनिश्चय(भ्रम?) दशायां शाब्दप्रमापत्तेः।

अनन्वयनिश्चयविरहो योग्यता इति मतखण्डनम्

अपरे तु — अनन्वयनिश्चयविरह एव योग्यता। सा च स्वरूपसती शाब्दधीहेतुः। तद्विशेष्यकतत्संसर्गकतद्धर्मप्रकारकशाब्दबोधं प्रति तद्विशेष्यकतत्संसर्गावच्छिन्नतद्धर्मप्रतियोगिताकाभावनिश्चयः प्रतिबन्धकः। तदभावश्च योग्यता स्वरूपसन्नेव हेतुः — इत्याहुः।

तदपि न। निरुक्तानन्वयनिश्चयाभावस्य स्वरूपसद्धेतुतया योग्यताभ्रमात् शाब्दबोधभ्रमानुपपत्तेरेव।

अनन्वयव्याप्यधर्मशून्यत्वं योग्यता इति मतनिरासः

अन्ये तु — समभिव्याहृतपदार्थसंसर्गाभावव्याप्यधर्मशून्यत्वं योग्यता। प्रकृतपदार्थीयतत्संसर्गाभावव्याप्यधर्मशून्यत्वं तेन संसर्गेण तद्योग्यतेति फलितार्थः। इदं च ज्ञातमुपयुज्यते। अतः न शाब्दभ्रमानुपपत्तिः। शाब्दभ्रमस्थले वस्तुगत्या एतस्यासत्त्वेऽपि एतद्भ्रमादेव शाब्दभ्रमोपपत्तेः — इत्याहुः।

तदपि न। "प्रमेयमभिधेयम्" इत्यादौ प्रमेयादितादात्म्यरूपस्य संसर्गस्य केवलान्वयितया तदभावस्य अप्रसिद्धतया तद्व्याप्यधर्मशून्यत्वरूपयोग्यताज्ञानासंभवात्।

अपि च गेहे घटाभावनिश्चये सति, उक्तयोग्यतानिश्चयेऽपि "गेहे घटोऽस्ति" इति वाक्याच्छाब्दबोधो न जायते। उक्तरूपस्य योग्यतात्वे तु "गेहे घटोऽस्ति" इत्यादौ बाधनिश्चयसत्त्वेऽपि उक्तयोग्यतानिश्चयसत्त्वे शाब्दबोधापत्तिः।

न च बाधनिश्चयस्य विशिष्टबुद्धिसामान्ये प्रतिबन्धकत्वात् न तदानीं शाब्दबोध इति वाच्यम्। तर्हि आवश्यकत्वात् बाधनिश्चयाभाव एव हेतुरस्तु। किमेतज्ज्ञानस्य हेतुत्वेन। बाधनिश्चयाभावसत्त्वे एतज्ज्ञानाभावे एतदभावज्ञाने वा शाब्दबोधाभावस्यानुभवसिद्धत्वाभावात्।

बाधकप्रमाणाभावो योग्यता इति मतखण्डनम्

अन्ये तु — बाधकप्रमाणाभावो योग्यता। तत्र तत्संसर्गाभावप्रकारकप्रमाविशेष्यत्वाभावस्तत्र तद्योग्यता। एतस्या ज्ञानं शाब्दधीहेतुः इति न शाब्दभ्रमानुपपत्तिः। बाधनिश्चयदशायां च नैतज्ज्ञानसंभवः इति बाधनिश्चयदशायां न शाब्दबोधापत्तिः — इति मन्यन्ते।

तदपि न। अन्यत्र यद्बाधकं तदभावस्यायोग्येऽपि सत्त्वात्। अयमाशयः — अन्यनिष्ठं यत् वह्निकरणकत्वसंसर्गाभावप्रमाविशेष्यत्वं तदभावस्य सेकेऽपि सत्त्वात् "वह्निना सिञ्चति" इत्यतः शाब्दबोधप्रसङ्ग इति।

न च प्रकृतसंसर्गबाधकाभावः योग्यता। तन्निष्ठं यत् तत्संसर्गाभावप्रमाविशेष्यत्वं तस्य तत्राभावः तत्र तद्योग्यतेति यावत्। एवं च "वह्निना सिञ्चति" इत्यादौ सेकादिनिष्ठं यत् वह्निकरणकत्वादिसंसर्गाभावप्रमाविशेष्यत्वं, तदभावस्य सेकादावभावान्नातिप्रसङ्ग इति वाच्यम्। "पयसा सिञ्चति" इत्यादौ प्रतियोगिसिद्ध्यसिद्धिभ्यां योग्यताव्यवहारव्याघातात्। पयःकरणकत्वसंसर्गाभावप्रकारकप्रमाविशेष्यत्वं यदि सेकादिनिष्ठं, तदा न तदभावः; यदि च तत्र नास्त्येव तादृशविशेष्यत्वं, तदा सेकादिनिष्ठतादृशविशेष्यत्वस्य अलीकतया तदभावस्याप्यसिद्धिरिति व्याघातात् इति।

न च प्रकृतसंसर्गे अन्यत्र सिद्धस्य बाधकप्रमाणस्याभावः योग्यता। तदीयप्रकृतसंसर्गे अन्यत्र प्रसिद्धायाः तद्वृत्तित्वाभावप्रमायाः अभावः तत्र तद्योग्यतेत्यर्थः। "पयसा सिञ्चति" इत्यत्र सेकीयपयःकरणकत्वसंसर्गे, वह्निकरणकत्वसंसर्गे प्रसिद्धायाः सेकवृत्तित्वाभावप्रमायाः अभावस्य सत्त्वेन तस्याः योग्यतात्वमिति वाच्यम्। प्रकृतसंसर्गस्य शाब्दबोधात् प्रागप्रतीतेः। तदीयप्रकृतसंसर्गत्वं हि तन्निष्ठतदीयसंसर्गत्वम्। शाब्दबोधात् पूर्वं च एकपदार्थनिष्ठतया नापरपदार्थसंसर्गस्य ज्ञानमिति। अपि च अन्यनिष्ठतादृशप्रमाव्यक्तेरभावमादाय अयोग्येऽपि तत्सत्त्वात् तत्रापि योग्यतापत्तिः।

तत्परिहाराय यदि प्रकृतसंसर्गबाधकस्याभावः योग्यतेत्युच्यते तदा अप्रसिद्धिः। एतदुक्तं भवति — तत्प्रतियोगिकेऽन्वयितावच्छेदके संबन्धे वर्तमानायाः तद्वृत्तित्वाभावप्रमायाः अभावः तत्र तद्योग्यत्वम्। तत्र सेके पयःकरणकत्वयोग्यत्वं नाम

पयःकरणकत्वप्रतियोगिकस्वरूपसंबन्धे या सेकवृत्तित्वाभावप्रमा तदभावः। वह्निकरणकत्वसंबन्धे तु सेकवृत्तित्वाभावप्रमायाः एव सत्त्वान्न तदभावरूपा योग्यतेति यद्युच्यते, तदा योग्यस्थले "पयसा सिञ्चति" इत्यादौ प्रतियोग्यप्रसिद्ध्या अभावरूपयोग्यतायाः अप्रसिद्धिः। न खलु पयःकरणकत्वसंबन्धे सेकवृत्तित्वाभावप्रमा प्रसिद्धा, येन तदभावरूपा योग्यता तत्र स्यात्।

अत एव तत्र बाधकस्याप्यनिरूपणम्। योग्यस्थले अप्रसिद्धत्वादेव पयःकरणकत्वसंबन्धे सेकवृत्तित्वाभावप्रमारूपबाधकस्याप्यज्ञानम्।

एकपदार्थप्रतियोगिकसंसर्गाभावप्रकारकप्रमाविशेष्यत्वाभावो योग्यता इति मतनिरासः

यत्तु — एकपदार्थप्रतियोगिकसंसर्गाभावप्रकारकप्रमाविशेष्यत्वाभावः अपरपदार्थे विद्यमानः योग्यता। अस्ति हि "पयःकरणकत्वसंबन्धाभाववान् सेकः" इति प्रमाया अभावात् पयःकरणकत्वसंबन्धाभावप्रकारकप्रमाविशेष्यत्वाभावः सेके इति समन्वयः — इति। तन्न। "प्रमेयमभिधेयम्" इत्यादौ प्रमेयादिप्रतियोगिकतादात्म्यरूपसंबन्धाभाव एवाप्रसिद्ध इति तत्प्रमाविशेष्यत्वाभावस्य दुर्घटत्वात्।

एतेन — यत्रासंबन्धग्राहकं प्रमाणं नास्ति तद्योग्यम् — इति निरस्तम्। "प्रमेयमभिधेयम्" इत्यादौ प्रमेयतादात्म्याभावरूपस्य असंबन्धस्याप्रसिद्धेः।

बोधनीयसंसर्गाभावप्रमाविरहो योग्यता इति मतनिरासः

यत्तु — बोधनीयसंसर्गाभावप्रमाविरहः योग्यता। बोधनीययोर्द्वयोः यः अन्वयितावच्छेदकः संबन्धः,[१] तदभावप्रकारकप्रमायाः विषयतासंबन्धेनाभावः तत्र तद्योग्यतेति तदर्थः — इति। तन्न। प्रतियोग्यप्रसिद्धेः। केवलान्वयिनि "प्रमेयमभिधेयम्" इत्यादौ प्रमेयनिष्ठस्याभिधेयतादात्म्यसंसर्गस्याभावाप्रसिद्धेः तत्र योग्यताविरहप्रसङ्गात्।

किं च बोधनीयैकपदार्थनिष्ठतया बोधनीयापरपदार्थसंसर्गस्य शाब्दबोधात् प्रागप्रतीतेः तदभावघटितयोग्यतायाः ज्ञातुमशक्यत्वात्। न चेयं योग्यता स्वरूपसती कारणमिति वाच्यम्। योग्यताभ्रमाच्छाब्दभ्रमानुपपत्तेरिति पूर्वमेवोक्तत्वात्।

किं च अयोग्ये "वह्निना सिञ्चति" इत्यादौ सेकनिष्ठस्य वह्निकरणकत्वसंसर्गस्याप्रसिद्ध्या तदभावप्रमायाः ज्ञानासंभवात् तत्र अयोग्यत्वव्यवहारानुपपत्तिः। व्यवहारे व्यवहर्तव्यज्ञानस्य हेतुतया तत्र तादृशप्रमारूपायोग्यत्वस्य ज्ञानासंभवात्।

---

[१] तन्निष्ठतदन्वयितावच्छेदकसंबन्ध इति यावत्।

अपि च तदीयान्वयितावच्छेदकसंबन्धे तत्तत्पुरुषीयतद्वृत्तित्वाभावप्रकारकप्रमासामान्याभावः तत्र तदन्वयबोधे योग्यता इति विवक्षायां, यस्य पुरुषस्य अयोग्ये "वह्निना सिञ्चति" इत्यादौ वह्निकरणत्वीयनिरूपकत्वसंबन्धे कदापि सेकवृत्तित्वाभावप्रमा न जाता, तस्य तादृशप्रमाभावमादाय योग्यताप्रसङ्गः। यदि तु पुरुषविशेषमनिवेश्य तदीयान्वयितावच्छेदकसंबन्धे तद्वृत्तित्वाभावप्रकारकप्रमासामान्याभाव इति विवक्ष्यते; तदा तादृशप्रमासामान्याभावस्य अयोग्यप्रतियोगिकतया, योग्ये "पयसा सिञ्चति" इत्यादावपि ज्ञातुमशक्यता। परप्रमाया अपि प्रमासामान्यान्तर्गततया तस्या अयोग्यत्वात्।

ननु अन्वयप्रयोजकरूपवत्त्वेन बाधकप्रमाविरहोऽनुमेयः। एतदुक्तं भवति — अन्वयप्रयोजकरूपवत्त्वम् = अन्वयस्वरूपयोग्यतावच्छेदकधर्मवत्संबन्धत्वम्। तेन हेतुना बाधकप्रमाविरहोऽनुमेयः। अनुमानाकारस्तु "जलसंसर्गः सेकनिरूपितकरणत्ववृत्तित्वाभावप्रमामात्रविरहवान्, द्रवद्रव्यसंबन्धत्वात्" इति, इति चेत्। न। सेकानन्विततोये = सेकाकरणजले, द्रवद्रव्यत्वसत्त्वेन, द्रवद्रव्यसंबन्धत्वस्य सेकाकरणतोयसंबन्धेऽपि सत्त्वेन तत्र बाधकसत्त्वेन = सेकनिरूपितं यत्करणत्वं तद्वृत्तित्वाभावप्रमायाः एव सत्त्वेन, तद्विरहरूपसाध्याभावात् व्यभिचारप्रसक्तेः।

इदमुपलक्षणं — सेककरणीभूततोयसमवाये स्वीयरूपादिनिष्ठे सेककरणत्ववृत्तित्वाभावप्रमायाः सत्त्वात् व्यभिचारो बोध्यः।

किं च उपजीव्यत्वेन = भवदुक्तयोग्यतानुमापकज्ञानविषयत्वेन, अन्वयप्रयोजकरूपवत्त्वस्यैव योग्यतात्वापत्तिः। न चेष्टापत्तिः। आकाङ्क्षासत्त्योः अन्वयप्रयोजकरूपस्य च ज्ञानसत्त्वेऽपि अनाप्तोक्तवाक्यात् बाधकप्रमायां "सेको न जलकरणकः" इत्याकारायां सत्यां शाब्दबोधानुदयात्। न च बाधकप्रमाविरहोऽपि स्वरूपसद्धेतुरिति वाच्यम्। तर्ह्यावश्यकत्वात् सैव योग्यता स्यादिति।

बाधकप्रमाविरहो योग्यता इति सिद्धान्तः

उच्यते। बाधकप्रमाविरहो योग्यता। बाधकप्रमाविरहो नाम इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावः। "पयसा सिञ्चति" इत्यादौ पयोनिष्ठकरणतायाः निरूपकत्वसंसर्गे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावः अस्ति, "पयोनिष्ठकरणतानिरूपकत्वं सेकनिष्ठात्यन्ताभावप्रतियोगि" इति प्रमाविरहात् इति समन्वयः। "वह्निना सिञ्चति" इत्यादौ वह्निनिष्ठकरणतानिरूपकत्वे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वस्यैव सत्त्वात् न तत्र योग्यता।

न च श्रोतुर्यदा वह्निनिष्ठकरणतायाः निरूपकत्वसंबन्धे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रमा नास्ति, तदा अतिव्याप्तिरिति वाच्यम्। स्वपरसाधारणप्रमामात्रविशेष्यत्वाभावस्य निवेशात्। अनादौ संसारे तदानीमपि अवश्यं कस्यचित् पुरुषस्य तत्र तादृशप्रतियोगित्वप्रमायाः सत्त्वात्, अन्ततो भगवत्प्रमायाः सत्त्वाच्च। "पयसा सिञ्चति" इत्यादौ पयोनिष्ठकरणतायाः निरूपकतारूपसंबन्धे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकभ्रमविशेष्यत्वसंभवात् तत्राव्याप्तिवारणाय ज्ञानपदमुपेक्ष्य प्रमापदोपादानम्।

अत्र इतरत्वमपरत्वं चाविवक्षितम्, तद्बुद्धेरहेतुत्वात्। "अयं घटः" इत्यादौ विशेषणविशेष्ययोरभेदस्थले योग्यत्वानुपपत्तेश्च, इदन्त्वावच्छिन्नस्यैव घटतया, घटस्यैव इदंतया च इतरत्वाप्रसिद्धेः। तथा च तदीयान्वयितावच्छेदकसंबन्धे तन्निष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वसामान्याभावस्तत्र तद्योग्यतेत्येव विवक्षितम्।

"प्रमेयमभिधेयम्" इत्यत्र यत्किंचित्प्रमेयनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वं गोत्वे प्रसिद्धम्। तदभावश्च वाच्यतादात्म्येऽस्तीति योग्यतायाः उपपत्तिः।

मणौ योग्यतायाः लक्षणान्तरम्

अत्र प्रमाविशेष्यत्वघटितत्वेन गौरवम्, तादृशप्रतियोगित्वप्रमात्वेन तादृशप्रतियोगित्वप्रमानुपस्थितिदशायां दुर्ज्ञेयत्वं च। न हि सर्वत्र शाब्दबोधात् पूर्वं तादृशप्रतियोगित्वप्रमात्वावच्छिन्नस्योपस्थितिनियमः इत्यालोच्य प्रमाविशेष्यत्वत्यागेन लक्षणान्तरमुक्तं मणौ[१] —

"वस्तुतस्तु इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं योग्यता, लाघवात् शक्यज्ञानत्वाच्च" इति।

अत्रापीतरत्वमपरत्वं चाविवक्षितम्। तथा च तत्तद्व्यक्तीयान्वयितावच्छेदकसंबन्धे तत्तद्व्यक्तौ वा तत्तद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं तत्तद्व्यक्तेः योग्यतेत्यर्थः। "पयसा सिञ्चति" इत्यादौ पयोनिष्ठकरणतानिरूपकत्वे सेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वमस्तीति समन्वयः।

ननु "नरशिरःकपालं शुचि, प्राण्यङ्गत्वात्, शङ्खवत्" इत्यनुमित्यात्मकशुचित्वप्रकारकबाधबुद्धिरूपप्रतिबन्धकसत्त्वात् "नरशिरःकपालमशुचि" इति वेदवाक्याच्छाब्दबोधो न स्यात्, प्रतिबन्धकसत्त्वेन निरुक्तयोग्यताज्ञानासंभवादिति चेन्न।

---

[१] त.चिं.म, च.भा.प्र.प. पृ. २७१.

भवदुक्तशौचानुमानस्य उपजीव्यो यो दृष्टान्तः शङ्खः, तत्र शुचितारूपसाध्यनिश्चायको यो वेदः तस्य निश्चितप्रामाण्यकतया तज्जातीयत्वेन अशुचित्वबोधकवेदस्य बलवत्त्वात् = निश्चितप्रामाण्यकत्वात्, तद्वेदवाक्यजन्यज्ञानेनैव तदनुमानबाधात् = शौचानुमानस्य अप्रामाण्यज्ञापनात्।

योग्यताज्ञानस्य शाब्दधीकारणत्वोपपादनम्

ननु आकाङ्क्षा-आसत्तिज्ञानसहकारेणैव शब्दस्य शाब्दप्रमाजनकता, न तु योग्यताज्ञानस्यापि सहकारिकोटौ निवेशः। न च बाधनिश्चये सति "वह्निना सिञ्चति" इत्यादौ कुतो नान्वयबोधः इति वाच्यम्। बाधनिश्चयाभावस्य प्रमासामान्यं प्रति हेतुत्वात् शाब्दबोधेऽप्यपेक्षितत्वात् इति चेत् — न। बाधे हि सति = "वह्निना सिञ्चति" इत्यादौ बाधबुद्धौ सत्यां, प्रमाणदोषः = शाब्दबुद्धिकारणीभूतज्ञानस्य प्रतिबन्धः, भवतीति अवश्यं वक्तव्यम्। अन्यथा प्रमाणविषये बाधबुद्धावपि शाब्दबुद्धिकारणीभूतयावज्ज्ञानसत्त्वे बाधासंभवात् = बाधबुद्धेः शाब्दबुद्धिप्रतिबन्धकत्वासंभवात्, कारणीभूतं ज्ञानं विघटयत एव ज्ञानस्य परोक्षानुभवप्रतिबन्धकत्वात्। तथा च बाधनिश्चयस्य योग्यताज्ञानरूपकारणप्रतिबन्धद्वारैव शाब्दधीविघटकत्वमिति योग्यताज्ञानस्य कारणत्वमवर्जनीयम्। तत्र दृष्टान्तः "यथानुमाने बाधादुपाधिकल्पनद्वारा व्याप्तिविघातः, निरुपाधौ बाधानवकाशात्" इति[१]।

अयमाशयः — "वह्निरनुष्णः, कृतकत्वात्" इत्यनुमानस्थले "वह्निरुष्णः" इति बाधबुद्ध्या वह्नीतरत्वरूपोपाधिकल्पनद्वारा अनुमितिकारणीभूतव्याप्तिज्ञानप्रतिबन्धः क्रियते। एतच्च यत्राबाधितसाधनवान् पक्षः तत्र बोध्यम्। अन्यत्र तु पक्षधर्मताज्ञानप्रतिबन्धः। न च बाधबुद्धेः कथमुपाधिकल्पकत्वम् = उपाधिज्ञानहेतुत्वम्, इति शङ्कनीयम्। निरुपाधौ बाधानवकाशात्। पक्षधर्महेतौ निरुपाधौ सति बाधासत्त्वात्। तथा च व्याप्येन बाधेन व्यापकस्य उपाधेरनुमानमिति।

उक्ता योग्यता न स्वरूपसती शाब्दबुद्धिहेतुः, "वह्निना सिञ्चति" इत्यादौ शाब्दभ्रमस्यानुपपत्तेः। तत्र स्वरूपसदुक्तयोग्यतायाः विरहात्।

ननु शाब्दबोधात् पूर्वं सर्वत्र उक्तयोग्यतानिश्चयो न संभवति, ततः पूर्वं निश्चयसामग्रीविरहात् इति चेन्न। संशय-विपर्यय-प्रमा-साधारणस्य योग्यताज्ञानस्य कारणत्वात्। शाब्दबोधात् प्राक् एतत्त्रितयान्यतमस्य नियमेन सत्त्वात्। विपर्ययः = निश्चयरूपो भ्रमः। प्रमा = निश्चयात्मकप्रमा।

---

[१] त.चिं.म, च.भा.प्र.प. पृ. २७६.

न च योग्यतायाः संशय एव कथं स्यात्, अयोग्यतानिश्चयस्य प्रतिबन्धकस्य सत्त्वात् इति वाच्यम्। अयोग्यतानिश्चयस्य सर्वत्राभावात्। यत्र स वर्तते तत्र शाब्दबोधस्याप्यभावात्।

न च संशयनिश्चयसाधारणस्य योग्यताज्ञानस्य तदा हेतुत्वं संभवति, यदि तन्निश्चयोऽपि क्वचिद्धेतुर्भवति, न चैवं, कुत्रापि तन्निश्चयस्यासंभवात् इति वाच्यम्। एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वरूपयोग्यतायाः निश्चयः योग्यानुपलब्ध्या भवितुमर्हति। धर्मस्यानुपलब्ध्या तच्छून्यत्वस्य निश्चयादिति।

मथुरानाथीयं विवेचनम्[१]

अत्राहुः मथुरानाथतर्कवागीशाः "अत्र नव्याः" इत्यादिना। तत्संग्रह इत्थम् —

अन्वयितावच्छेदकसंबन्धेन तद्व्यक्तौ तद्व्यक्तिमत्त्वमेव तद्व्यक्तौ तद्व्यक्तेर्योग्यता, अतिलाघवात्। "घटत्वाश्रयैतद्व्यक्तिः नीलत्वाश्रयैतद्व्यक्तिमती" इत्यादिक्रमेण च संशयनिश्चयसाधारणं तज्ज्ञानं हेतुः। तेन सामान्यतः पदार्थतावच्छेदकरूपेणायोग्यतानिश्चयेऽपि न शाब्दबोधः, न वा शाब्दबोधात् पूर्वं सर्वत्र तादृशनिश्चयविरहेऽपि कापि क्षतिः।

वस्तुतस्तु अन्वयितावच्छेदकसंसर्गेण तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नवत्त्वमेव तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नान्वयबोधे योग्यता। तेन प्रातिस्विकरूपेण सर्वत्र शाब्दबोधात् पूर्वं निखिलतत्तद्व्यक्तिषु तत्तद्व्यक्तिमत्त्वग्रहाभावेऽपि न क्षतिः — इति।

विश्वनाथोक्तरीत्या योग्यताज्ञानस्य शाब्दधीहेतुत्वम्

एतदेवाभिसन्धाय विश्वनाथपञ्चाननैः

"पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता।"

इति कारिकावल्याम्,[२] "एकपदार्थेऽपरपदार्थसंबन्धो योग्यतेत्यर्थः" इति मुक्तावल्यां[३] चोक्तम्। योग्यताविषयकं संशयनिश्चयसाधारणं ज्ञानमात्रं कारणमिति तु मणिकारवत् मुक्तावलीकारैरपि प्रोक्तम्। निश्चयरूपनिरुक्तयोग्यताज्ञानस्य प्रसिद्धिस्तु दिनकर्यां[४] प्रदर्शिता —

---

[१] त.चिं.म.व्या.रहस्यम्, च.भा.प्र.प.पृ. २७३.
[२] का.८३.
[३] मु.पृ. ६३२.
[४] मु.व्या.दि.पृ. ६३३.

"अत एव निश्चयमपि दर्शयति — क्वचिदिति। 'भूतले घटः' इति प्रात्यक्षिकनिश्चयोत्तरभाविनि शाब्दबोध इत्यर्थः" इति।

अपि च मुक्तावल्यां[१] —

"नव्यास्तु — योग्यताज्ञानं न शाब्दबोधहेतुः। 'वह्निना सिञ्चति' इत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः। तदभावनिश्चयस्य लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम्। योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इत्याहुः"

इति नव्यमतमुपन्यस्तम्।

माथुरीरीत्या अयोग्यतानिश्चयस्य प्रतिबन्धकत्वविमर्शः

तत्त्वचिन्तामणिव्याख्यायां मथुरानाथतर्कवागीशास्त्वत्र मते एवं विमर्शं कुर्वन्ति[२] —

शाब्दधीसाधारणविशिष्टबुद्धित्वावच्छिन्नं प्रति बाधनिश्चयस्य प्रतिबन्धकत्वं न विचारसहम्। तथा सति "मुखं चन्द्रः" इत्यादिरूपकस्थले, "मुखं न चन्द्रः" इति बाधनिश्चयसत्त्वेऽपि मुखे चन्द्रान्वयबोधोत्पत्त्या अनुभवसिद्धस्य तस्य बोधस्य अपलापापत्तिः। कलहादौ मिथ्याभिशापवचनात् शाब्दबोधानुपपत्तिश्च। तत्र शाब्द-बोधाभावे क्रोधाद्यनुपपत्तेः। अत एवोक्तम् —

> "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि।
> बाधात्तु न प्रमा तत्र अतः प्रामाण्यनिश्चयः॥" इति।

बाधितत्वेन निश्चितेऽप्यर्थे शब्दो ज्ञानं जनयति। किं तु तदानीं तज्ज्ञाने प्रामाण्याभावज्ञानमात्रं जायते। अतः प्रामाण्यनिश्चयो निष्कम्पप्रवृत्तिप्रयोजकः। अन्यथा तत्रापि प्रवृत्त्यापत्तेरिति तदर्थः।

तथा च शाब्दान्यविशिष्टबुद्धिं प्रत्येव बाधनिश्चयस्य प्रतिबन्धकतया "वह्निना सिञ्चति" इत्यादौ बाधनिश्चयसत्त्वे शाब्दबोधवारणाय योग्यताज्ञानस्य शाब्दहेतुत्वम् आवश्यकम्।

न च योग्यताज्ञानस्य हेतुत्वेऽपि बाधितार्थकरूपकादौ कथं शाब्दधीः। बाधनिश्चयसत्त्वेन तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नवत्त्वरूपयोग्यताज्ञानस्यैवासंभवात्। अन्यथा "वह्निना सिञ्चति" इत्यादावपि बाधनिश्चयसत्त्वे शाब्दबोधस्य दुर्वारत्वा-

---

[१] मु.पृ. ६३३.
[२] त.चिं.म.व्या.रहस्यम्, च.भा.प्र.प.पृ.२७७.

दिति वाच्यम्। बाधनिश्चयसत्त्वेऽप्याहार्ययोग्यताज्ञानादेव तत्र शाब्दबोधसंभवात्। "वह्निना सिञ्चति" इत्यादावपि आहार्ययोग्यताज्ञानात् शाब्दबोधस्येष्टत्वात्। तथा च शाब्देतरतद्वत्ताबुद्धावेव बाधनिश्चयः प्रतिबन्धक इति सिद्धन्तानुयायिनः।

उच्छृङ्खलास्तु — "मुखं चन्द्रः" इत्यादिबाधितार्थकरूपकादौ बाधनिश्चयदशायां मुखादौ चन्द्रादेर्नाभेदान्वयबोधः, किं तु चन्द्रादिपदस्य चन्द्रसदृशादौ लक्षणया तस्यैव मुखादावभेदान्वयः। प्रहसनादौ, कलहादिस्थलीयमिथ्याभिशापवचनादौ च न शाब्दबोधः, अपि तु तत्तत्पदेभ्यस्तत्तत्पदार्थोपस्थितौ दोषजन्यो मानसो विशिष्ट-साक्षात्कारः। तथा च शाब्दबुद्धिसाधारणविशिष्टबुद्धिसामान्यं प्रति बाधनिश्चयस्य प्रतिबन्धकत्वादेव "वह्निना सिञ्चति" इत्यादौ बाधनिश्चयदशायां नान्वयबोध इति योग्यताज्ञानस्य शाब्दधीहेतुत्वे मानाभावः। बाधनिश्चयप्रतिबध्यतावच्छेदककोटौ शाब्दान्यत्वं प्रवेश्य बाधनिश्चयस्थले शाब्दबोधवारणाय अतिरिक्तयोग्यताज्ञान-कारणत्वकल्पनायाः 'प्रक्षालनाद्धि' इति न्यायेनानुचितत्वात् इत्याहुः।

मतान्तरेण योग्यताज्ञानस्य हेतुत्वाभावः, अयोग्यतानिश्चयस्य प्रतिबन्धकत्वा-भावश्च

केचित्तु — "मुखं चन्द्रः" इत्यादिबाधितार्थकरूपकादौ बाधनिश्चयदशायामपि मुखादौ चन्द्रादेरभेदान्वयबोधस्याप्यनुभवसिद्धत्वात् शाब्दबोधे बाधनिश्चयो न प्रतिबन्धक इति सत्यमेव। परं तु योग्यताज्ञानमपि न हेतुः, मानाभावात्।

न चैवं "वह्निना सिञ्चति" इत्यादावपि बाधनिश्चयदशायां शाब्दबोधापत्तिरिति वाच्यम्। तदानीं शाब्दबोधो जायत एव। किं तु तस्मिन् शाब्दबोधे उत्तर-कालमप्रमात्वज्ञानमात्रं जायत इत्यभ्युपगमात्। तवाप्याहार्यादियोग्यताज्ञानसत्त्वे तदानीं तत्र शाब्दबोधस्येष्टत्वात्। न हि बाधनिश्चयसत्त्वे आहार्ययोग्यताज्ञानं विना न शाब्दबोध इत्यनुभवो लोकानाम्। तथा सति अन्वयव्यतिरेकबलादेव योग्यता-ज्ञानस्य हेतुत्वसिद्धेः संभवात् बीजान्तरानुसरणवैफल्यापत्तेः।

न चैवमनुमित्यादावपि बाधनिश्चयस्याप्रतिबन्धकत्वापत्तिः, बाधनिश्चयदशाया-मप्यनुमित्यादिर्जायत एव, किं तु तस्यामनुमित्यादावग्रे अप्रमात्वज्ञानमात्रं जायत इत्यस्य सुवचत्वादिति वाच्यम्।

"अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि"

इत्यादिना शाब्दबोधस्थल एव तथानुभवस्य सकलप्राचीनैर्निर्णीतत्वादिति आहुः — इति।

नागेशोऽपि मञ्जूषायामित्थमेव निरूपयति।

एवं च शाब्दबोधं प्रति अयोग्यतानिश्चयस्य प्रतिबन्धकत्वमपि नास्ति, योग्यताज्ञानस्य कारणत्वमपि नास्तीत्यायातम्।

दिनकर्यां योग्यताज्ञानस्य अयोग्यतानिश्चयाभावस्य च कारणत्वं सिद्धवत्कृत्य तयोः लाघवगौरवविचारः कृतः। स नातीवोपयुज्यत इति त्यज्यते।

तर्कताण्डवोक्तरीतिः[१]

तर्कताण्डवकारास्तु 'सजातीयेऽन्वयदर्शनं योग्यता' 'समभिव्याहृतपदार्थसंसर्गाभावव्याप्यधर्मवत्त्वं वा अन्वयप्रतियोगितावच्छेदकधर्मवत्त्वं वा योग्यता' इति पक्षान् मणिकारोक्तरीत्यैव दूषयित्वा मणिकारोक्तलक्षणमपि दूषयन्ति स्म। अन्ततः "योग्यताज्ञानं न शाब्दधीहेतुः, न वा अयोग्यतानिश्चयः शाब्दधीप्रतिबन्धकः" इति न्यरूपयन्। तदत्र अनूद्यते, परिह्रियते च।

न तावत् मण्युक्तरीत्या एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावो वा, एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं वा योग्यता। एकत्वापरत्वयोः पदार्थविशेषणत्वे "प्रमेयत्वे प्रमेयत्वम्" इत्यादावव्याप्तेः, तत्र पदार्थभेदाभावात् इति।

अत्रोच्यते। "प्रमेयत्वे प्रमेयत्वम्" इति वाक्यात् "प्रमेयत्वनिरूपिताधेयतावत् प्रमेयत्वम्" इति बोधो जायते। तत्र एकपदार्थे आधेयत्वे अपरपदार्थप्रमेयत्वनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावसत्त्वात् योग्यता निर्वहति, आधेयत्वप्रमेयत्वयोर्भेदात्। अतः "नीलो घटः" इत्यादौ दोषः प्रदर्शनीयः। तत्र नीलपदार्थघटपदार्थयोर्भेदाभावात्। परं तु पूर्वमस्माभिः परिष्कृतरीत्या मण्यर्थदर्शने दोषो न प्रसजतीत्यवधेयं विद्वद्भिः। एकत्वापरत्वे अविवक्षित्वैव पूर्वमर्थस्य वर्णितत्वात्। अत एव तयोः पदविशेषणत्वमाश्रित्य प्रदर्शितदोषाणामपि नावकाशः।

यदुक्तं — "द्रव्यं संयोगि" इति वाक्यमयोग्यं स्यात्, संयोगस्य द्रव्यनिष्ठात्यन्ताभावप्रतियोगित्वात् इति। तन्न। अत्यन्ताभावस्याव्याप्यवृत्तित्वेऽपि अत्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वस्य व्याप्यवृत्तितया एतद्दोषाप्रसक्तेः।

द्वितीयलक्षणेऽपि, संयोगस्याव्याप्यवृत्तित्वेऽपि संसर्गस्य संयोगितादात्म्यस्य व्याप्यवृत्तितया न दोषः। तस्याव्याप्यवृत्तित्वेऽपि अत्यन्ताभावे प्रतियोगिवैयधिकरण्यनिवेशनान्न दोषः।

यत्तत्रोक्तं — "गन्धप्रागभावसमानकालीनो घटो गन्धवान्" इति वाक्यमपि

---

[१] त.तां, भा.२.पृ. ३३-४७.

योग्यं स्यात्, गन्धवति गन्धप्रागभावस्य सत्त्वेऽपि गन्धात्यन्ताभावस्यासत्त्वात् — इति। तदपि न। ध्वंसप्रागभावाधिकरणेऽप्यत्यन्ताभावस्य नवीनैः समर्थितत्वात्, गन्धप्रागभावावच्छिन्ने घटे गन्धात्यन्ताभावस्य सत्त्वात् तत्प्रतियोगितावच्छेदकधर्मशून्यत्वरूपाया योग्यतायाः तत्रासत्त्वात्।

यत्तु — योग्यतायाः संसर्गात्मकत्वेन तज्ज्ञानस्य शाब्दसंसर्गज्ञानहेतुत्वे आत्माश्रयः। अयोग्यतानिश्चयविरहोऽपि न शाब्दधीहेतुः, तथात्वे हि अयोग्यत्वेन निश्चितस्य प्रतिवादिवाक्यस्याबोधकतया कथा बधिरकलहरूपः स्यात्। "अग्निना सिञ्चति" इत्यादिवाक्यादपि आकाङ्क्षासत्तिरूपसामग्रीसत्त्वात् अप्रमात्वेन निश्चितं प्रवृत्त्यजनकं ज्ञानं जायत एव। कथमन्यथा तन्निराकरणम्।

एतेन संशयसाधारणं योग्यताज्ञानं शाब्दधीहेतुः इति, योग्यताभ्रमः शाब्दभ्रमहेतुः इति च निरस्तम्। अयोग्यत्वनिश्चयेऽपि शाब्दधीदर्शनात्। दृश्यते च परोक्तस्य योग्यतासंदेहस्याभावेऽपि "गेहे घटः" इति वाक्यात् झटिति संसर्गधीः — इत्यादि।

तत्तु मथुरानाथादीनां नव्यतरनैयायिकानामपि संमतमेव।

वेदान्तपरिभाषोक्तं योग्यतालक्षणम्[१]

परिभाषाकारास्तु —

तात्पर्यविषयसंसर्गाबाधः योग्यता। "वह्निना सिञ्चति" इत्यादौ तादृशसंसर्गबाधान्नातिव्याप्तिः। 'तात्पर्यविषय' इति निवेशात् "स प्रजापतिरात्मनो वपामुदखिदत्" इत्याद्यर्थवादवाक्ये वाच्यार्थसंसर्गबाधसत्त्वेऽपि तात्पर्यविषयीभतस्य वपायागप्राशस्त्यस्याबाधात् योग्यता निर्वहति। "तत्त्वमसि" इत्यादिवाक्येष्वपि वाच्यार्थाभेदसंसर्गस्य बाधेऽपि तात्पर्यविषयीभूतलक्ष्यस्वरूपाभेदे बाधाभावात् योग्यता — इत्याहुः।

शिखामणिकाराः अपि —

तात्पर्यविषयसंसर्गो योग्यतेत्यर्थः। इयं योग्यता न स्वरूपसती हेतुः। योग्यताभ्रमात् शाब्दभ्रमोच्छेदप्रसङ्गात्। स्वरूपसत्याः योग्यतायाः शाब्दधीहेतुत्वे "वह्निना सिञ्चति" इत्यादिवाक्यात् भ्रमात्मकशाब्दबोधो न स्यात्, योग्यतायाः तत्राभावात्। किं तु योग्यताज्ञानं कारणम्। तदपि संशयनिश्चयसाधारणं कारणम्। ततश्च योग्यतासंशयभ्रमयोः न शाब्दज्ञानानुपपत्तिः — इत्याहुः।

मणिकारोक्तैव रीतिरियम्।

---

[१] वे.प. पृ. २२६.

नागेशोक्ता रीतिः[१]

नागेशास्तु शाब्दबोधं प्रति योग्यताज्ञानं न कारणं, नाप्ययोग्यतानिश्चयः प्रतिबन्धकः, अपि तु अयोग्यतानिश्चयः शाब्दबोधेऽप्रामाण्यग्राहक इति सयुक्तिकं न्यरूपयन् लघुमञ्जूषायाम्। तथा हि —

यत्तु नैयायिकाः आहुः — अर्थनिष्ठा योग्यतापि शाब्दबोधे कारणम्। सा च तात्पर्यविषयीभूतधर्मे संसर्गतावच्छेदकाख्ये संबन्धिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावः। "जलेन सिञ्चति" इत्यत्र सेकनिष्ठः जलकरणकत्वस्य स्वरूपाख्यः विशेष्यविशेषणभावः संबन्धः, संसर्गतावच्छेदकं विशेष्यविशेषणभावत्वं, तत् संबन्धिसेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभाववत्। सेके जलकरणकत्वसंसर्गस्य सत्त्वेन तदभावविरहात्। अतस्तत्र तात्पर्यविषयधर्मे विशेष्यविशेषणभावत्वरूपे संसर्गतावच्छेदके संबन्धिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावरूपा योग्यता वर्तते। "वह्निना सिञ्चति" इत्यत्र तु सा नास्ति, सेके वह्निकरणकत्वसंसर्गविरहात् वह्निकरणकत्वीयविशेष्यविशेषणभावत्वे सेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वस्यैव सत्त्वात्।

"जलेन सिञ्चति" इत्यादावपि सेके जलकरणकत्वसंसर्गघटोभयाभावस्य सत्त्वेन तत्प्रतियोगित्वमेव संसर्गेऽस्ति। एवं घटत्वविशिष्टजलकरणकत्वसंसर्गाभावमादाय तत्प्रतियोगित्वमेव संसर्गेऽस्तीति तत्र योग्यता न स्यात्। तत्र योग्यतासंपत्तये तात्पर्यविषयसंसर्गे संबन्धिनिष्ठात्यन्ताभावाप्रतियोगित्वमुपेक्ष्य तात्पर्यविषयसंसर्गतावच्छेदके संबन्धिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावनिवेश आदृतः। उक्तयोग्यताज्ञानं शाब्दबोधं प्रति कारणम्।

न च संसर्गे शक्तिलक्षणान्यतररूपवृत्तिविरहात् कथं तस्य ज्ञानमिति वाच्यम्। तात्पर्यविषयतया आकाङ्क्षाज्ञानविषयतया वा संसर्गस्य ज्ञातुं शक्यत्वात्। एतावता अयोग्यत्वाभावः योग्यता, तज्ज्ञानं शाब्दबोधे कारणमित्युक्तं भवति।

यद्वा अयोग्यतानिश्चयः शाब्दबोधप्रतिबन्धकः, तदभावः कारणम्। अयोग्यता च तात्पर्यविषयीभूतसंसर्गवृत्तिधर्मे संबन्धिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वम् — इति।

तन्न। शब्दप्रयोज्ये बोधे बाधरूपायोग्यताज्ञानस्य अप्रतिबन्धकत्वात्, तदभावरूपयोग्यताज्ञानस्याकारणत्वाच्च। सत्यपि बाधज्ञाने "अस्य क्षोणिपतेः परार्द्धपरया लक्षीकृताः संख्यया" "एष वन्ध्यासुतो याति" इत्यादितो बोधदर्शनात्। आद्ये, अस्य राज्ञः अकीर्तयः परार्धाधिकसंख्यया लक्ष्या इत्यर्थः। तत्र परार्धाधिकत्वस्य

---

[१] ल.मं. पृ. ५०६.

बाधेऽपि बोधो जायते। द्वितीये, "वन्ध्यासुतो नास्ति" इति बाधज्ञानेऽपि बोधो जायते।

"अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरात्
मूकानां प्रवरेण कूर्मरमणीदुग्धोदधे रोधसि॥"

"एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः॥" इति परिपूर्णश्लोकौ।

किं च "वह्निना सिञ्चति" इत्यादितोऽयोग्यार्थकवाक्यात् यदि बोध एव न जायते, तदा तद्वाक्यश्रवणानन्तरं तद्वाक्यप्रयोक्तारं प्रति "अद्रवेण वह्निना कथं सेकं ब्रवीषि" इत्युपहासः श्रोतृभिः क्रियमाणः असंगतः स्यात्। एतदर्थकद्र-विडभाषाश्रवणानन्तरं तदनभिज्ञस्य पाश्चात्त्यस्येव मूकता स्यात्।

किं चैवं सति वादे अयोग्यार्थकत्वेन निश्चितस्य प्रतिवादिशब्दस्य अबोधकत्वे सति वादिनः तत्खण्डनकथोच्छेदः स्यात्।

न चैतादृशवाक्येभ्यः नान्वयबोधो जायते, अपि तु पदार्थज्ञानमात्रं जायत इति वाच्यम्। "घटमानय" इत्यादावपि तथापत्तेः। तथा च शब्दप्रामाण्योच्छेदप्रसङ्गः।

न च प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वात् तदनुरोधेन "घटमानय" इत्यादौ विशिष्टज्ञानसिद्धिरिति वाच्यम्। दुःखद्वेषेच्छासुखादिकं प्रत्यपि विशिष्टज्ञानस्य हेतुत्वेन सत्यपि बाधज्ञाने मिथ्याभिशाप-गालिदान-रूपकादिकाव्यजन्यदुःख-द्वेषेच्छासुखाद्यनुरोधेन तत्रापि विशिष्टज्ञानोत्पत्तेरावश्यकत्वात्।

मिथ्याभिशापः = अविद्यमानं दोषमारोप्य निन्दनम् ।

गालिदानं = द्वेषजनककटुशब्दैः निन्दनम्।

रूपकं = मुखचन्द्रादि (उपमानोपमेययोरभेदवर्णनम्)।

मिथ्याभिशापरूपकादौ अन्वयबोधं विनापि पदार्थोपस्थितिमात्रस्य स्वीकारे "मुखं चन्द्रः" इति वाक्यादिव "मुखत्वमाश्रयश्चन्द्रत्वमाश्रयः" इत्यतोऽपि चम-त्कारापत्तिः। पदार्थानामुपस्थितेः उभयत्र समानत्वात्। "वह्निना सिञ्चति" इत्यादौ विभक्त्यर्थस्यैवान्वयतया, तद्बोधो न भवतीत्यस्यात्यन्तमसंगतत्वाच्च।

दैववशसंपन्नात् कलहादिसदृशशब्दात्तु न दुःखम्। तादृशवक्तृतात्पर्याभाव-ज्ञानात्।

अपि च "नेदं रजतम्" इति भ्रमवतः ततो निवृत्तौ "इदं रजतमेव" इत्याप्ते-

नोक्ते बाधज्ञानकालेऽपि ततो बोधात् प्रवृत्तेर्दर्शनाच्च न बाधज्ञानस्य शाब्दधी-प्रतिबन्धकत्वम्।

उक्तस्थले असंसर्गग्रहसत्त्वेऽपि प्रवृत्तिदर्शनादेव असंसर्गाग्रहमात्रादेव प्रवृत्ति-सिद्धिरित्यपास्तं वेदितव्यम्।

किं च असंसर्गाग्रहो नाम संसर्गाभावविषयकग्रहाभावः। स च बाधज्ञाना-भावरूपः। तस्मिन् सति प्रतिबन्धकविरहेण विशिष्टबुद्धेः उत्पत्तिसंभवात् तस्य हेतुत्वे; पदार्थोपस्थितिमात्रं, न विशिष्टबुद्ध्यात्मकः शाब्दबोध इति वक्तुमनुचितं नैयायिकेन। प्राभाकरमतानुयायिनापि नैवं वक्तुं युक्तम्। येन दोषेण विद्यमान-स्यासंसर्गस्याग्रहः तेन दोषेण अविद्यमानस्य संसर्गस्य ग्रह इति वक्तुं शक्यत्वात्। तथा चायोग्यार्थकस्थले पदार्थोपस्थितिमात्रं, नान्वयबोधः इति गतम्।

किं च प्रवृत्तिं प्रति विशिष्टज्ञानस्य कारणत्वे संभवति अभावरूपस्यासंसर्गा-ग्रहस्य कारणत्वकल्पने गौरवम्।

न चायोग्यार्थकस्थलेऽपि शाब्दबोधाङ्गीकारे "वह्निना सिञ्चति" इत्यतः जातात् विशिष्टज्ञानात् प्रवृत्त्यापत्तिरिति वाच्यम्। तत्र जातशाब्दबोधे बाधज्ञानेन अप्रा-माण्यज्ञानोत्पत्त्या प्रवृत्तेरप्रसक्तेः। अप्रामाण्यज्ञानाभावविशिष्टस्यैव विशिष्टज्ञानस्य प्रवृत्तिहेतुत्वात्।

एवं च बाधज्ञानं न क्वापि ज्ञाने प्रतिबन्धकम्। तत्कालेऽपि सत्यां सामग्र्यां जायत एव ज्ञानम्। तत्र स्वस्वसामग्रीवशात् द्वयोरपि ज्ञानयोर्जातयोः, यत्र ज्ञाने सदोषसामग्रीजन्यत्वग्रहः तत्राप्रामाण्यग्रह इत्येव मर्यादा ज्यायसी। यथा "गेहे घटो-ऽस्ति" "गेहे घटो नास्ति" इति परस्परविरुद्धयोः द्वयोः वाक्ययोः द्वाभ्यां प्रयुक्तयोः।

यत्तु, तत्र संशय एव, तदुत्तरं विशेषदर्शने सति निश्चयः इति। तन्न। बोधं विना संशयस्यैवासंभवात्। किं तु विशेषदर्शनेन अन्यतरकोटावप्रामाण्यग्रह एव जायते।

किं च "लटः शतृशानचौ" इति सूत्रे —

"भवति वै प्रत्यक्षादप्यनुमानबलीयस्त्वम्। तद्यथा अलातचक्रं प्रत्यक्षं दृश्यते। अनुमानाच्च गम्यते नैतदस्तीति" इति भाष्यम्[१]।

"आशुसंचारात् अलाते चक्रभ्रान्तिरुत्पद्यते। रूपसहचारिणस्तु स्पर्शस्यानेक-दिक्कस्य युगपदग्रहणात् अनन्यथासिद्धानुमानेन प्रत्यक्षाभासो बाध्यते" इति कैयटः। अनन्यथासिद्धानुमानात् तदभावज्ञाने जाते सति पूर्वज्ञानस्य भ्रमत्वं कल्प्यत इति तदर्थः।

---

[१] म.भा.२.२.१२४.

किं च "इदं रजतम्" इति भ्रमोत्तरं जायमानस्य "नेदं रजतम्" इति बाधज्ञानस्य रजतज्ञाननिष्ठाप्रामाण्यविषयकज्ञानं प्रति कारणता अवश्यं वाच्या। एवं स्फटिके रक्तत्वाभावज्ञानस्य सोपाधिकतद्रक्तत्वज्ञानेऽप्रामाण्यग्रहं प्रत्येव कारणता वाच्या। तत्र ज्ञानस्य जातत्वेन तत्प्रतिबन्धायोगात्। एवं च सर्वत्र तथैवास्तु, किं क्वचित् ज्ञानप्रतिबन्धकत्वं, क्वचित् ज्ञानेऽप्रामाण्यग्राहकत्वमिति द्वयकल्पनेन।

एवं योग्यताज्ञानस्य शाब्दबोधोपयोगित्वप्रकार इत्थम् — अप्रामाण्यज्ञानाभाव-विशिष्टस्य बोधस्यैव प्रवत्त्याद्युपयोगितया योग्यताज्ञानेन अप्रामाण्यज्ञानस्य प्रतिबन्धात् तदभावविशिष्टबोधः संपद्यते। तेन च प्रवृत्त्यादिकं भवति। योग्यता-संदेहादिना अप्रामाण्यज्ञानस्य प्रसक्तिः। आदिशब्देन अयोग्यतानिश्चयः। एवं च योग्यतासंदेहेनायोग्यतानिश्चयेन वा प्रसक्तं यत् अप्रामाण्यज्ञानं तदभावविशिष्टो यः प्रवृत्त्याद्युपयोगी बोधः तत्प्रयोजकत्वं योग्यतानिश्चयस्य, प्रवृत्त्युपयोगी यो बोधः तद्विशेषणीभूतः यः अप्रामाण्यज्ञानाभावः तत्प्रतियोगि यत् अप्रामाण्यज्ञानं तत्प्रति-बन्धकतया। एतावतैव योग्यतानिश्चयस्य शाब्दबोधकारणत्वोक्तिः प्राचाम्।

लक्षणायाः मूलमपि, शक्यार्थविषयकबोधे शक्यार्थबाधज्ञानजन्यमप्रामाण्य-ज्ञानमेव।

प्राभाकरमतसंवादि भर्तृहरिमतम्

परे तु अन्वयप्रयोजकसमभिव्याहृतकार्यशक्तिमत्त्वं योग्यता। समभिव्याहृतपद-बोध्यं यत्कार्यं तदनुकूलशक्तिमत्त्वमिति तदर्थः। सापि शब्दबोधे भासते। "घटेन जलमाहर" इत्यत्र छिद्ररहितघटस्यैव जलाहरणशक्तिमत्त्वेन "छिद्ररहितघटकरणकं जलाहरणम्" इति बोधः। तथा च घटस्य छिद्ररहितत्वं योग्यता। तादृशशक्तेरपि शाब्दबोधे भानादेव प्रतिनिधेः श्रौतत्वं = श्रुतिविहितत्वम्, उपपद्यते। यथा "खादिरे बध्नाति" इत्यत्र अस्वातन्त्र्यफलकसंयोगरूपं यत् बन्धनं तत्समर्थस्य खादिरस्यालाभेऽन्यः तत्समर्थः प्रतिनिधिः उपादीयते। अतस्तादृशबन्धन-सामर्थ्यवत्त्वेन खादिरबोधोऽवश्यमङ्गीकार्यः। एवं च खादिरबाधेऽपि तत्सामर्थ्य-त्यागे मानाभावात् प्रतिनिधेः श्रौतत्वोपपत्तिः। सर्वत्र शब्दप्रवृत्तिनिमित्तं घटत्वादिकं स्वाश्रयनिष्ठायाः समभिव्याहृतकार्यानुकूलशक्तेरप्युपलक्षणमिति प्रवृत्तिनिमित्ताश्रय-वृत्तितया शक्तेरपि बोधे भानम्। एवं च उपलक्षकखादिरत्वजात्यवच्छिन्नस्य बन्धनाशक्ततया परित्यागेऽपि उपलक्ष्यायाः शक्तेस्त्यागस्यानुचितत्वात् अन्यगता = प्रतिनिधिगता, सा शक्तिः ज्ञायते। वर्णादिसादृश्येन प्रतिनिधिबर्बुरादावपि खादि-रत्वबुद्धेः, तदुपलक्ष्यशक्तेः ग्रहणसंभवात्।

ननु "घटेन जलमाहर" इत्यादौ घटत्वेन सामान्यरूपेण सच्छिद्रेतरघटरूपविशेषस्य बोध इत्यनेनैव उपपत्तौ सच्छिद्रेतरत्वस्य भानं किमर्थम्? प्रतिनिधेः श्रौतत्वमपि "खादिरे बध्नाति" इत्यत्र खादिरपदस्य अपूर्वसाधने लक्षणाङ्गीकारादुपपद्यत इति चेन्न। तथा सति घटपदस्य लक्षणाप्रसङ्गात्। सामान्यरूपेण विशेषबोधेऽपि लक्षणेत्यर्थस्य "त्वामस्मि वच्मि" इत्युदाहरणे काव्यप्रकाशकृता[१] स्पष्टमुक्तत्वात्।

"त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥"

अर्थान्तरसंक्रमितवाच्यध्वनेरुदाहरणमिदम्। विद्वत्सभां गच्छन्तं प्रति कस्यचिदाप्तस्योक्तिरियम्। अस्मीत्यहमर्थेऽव्ययम्। यतोऽत्र विदुषां समुदायस्तिष्ठति तत् = तस्मात्, स्वकीयां मतिमवलम्ब्य सावधानस्थितिं कुरु इति त्वाम् = उपदेशार्हम्, आप्तोऽहं वच्मि = उपदिशामि, इत्यर्थः। अत्र वचनादि उपदेशादिरूपतया परिणमति। लक्षणामूलगूढव्यङ्ग्यप्राधान्यस्य ध्वनेः अविवक्षितवाच्यः इति प्रथमो भेदः। तस्य, अर्थान्तरसंक्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्य इति प्रभेदद्वयम्। तत्राद्यस्येदमुदाहरणम्। तेन "वच्मि" इत्यस्य उपदेशे लक्षणाभिप्रेता। वचनं सामान्यम्, उपदेशः वचनविशेषः।

सर्वमिदमभिप्रेत्योक्तं हरिणा[२] —

"केषांचित् साहचर्येण जातिः शक्त्युपलक्षणम्।
खदिरादिष्वशक्तेषु जातिः प्रतिनिधीयते॥
अस्वातन्त्र्यफलो बन्धः प्रमाणादौ च शिष्यते।
अतो जात्यभिधानेऽपि शक्तिहीनं न गृह्यते॥" इति।

केषांचित् = जातिशक्तिवादिनाम्। साहचर्येण = सामानाधिकरण्येन एकार्थनिष्ठतया। जातिः = घटत्वादिः। शक्तेः = सामर्थ्यस्य, उपलक्षणम्। प्रतिनिधीयते = अप्रतिनिधिः प्रतिनिधिर्भवति। प्रमाणादौ = हिंसादौ विषये। मीङ् हिंसायाम् इति धातोर्भावे ल्युटि प्रमाणमिति रूपम्। एवं च जातिशक्तिवादे जातिसमानाधिकरणसामर्थ्यं पदशक्यम्। बोधे जातिसामर्थ्योभयविशिष्टव्यक्तेर्भानम्। व्यक्तिशक्तिवादे वस्तुगत्या जातिसामर्थ्योभयविशिष्टा केवला व्यक्तिः पदशक्या।

इति योग्यताविचारः

---

[१] का.प्र. ४.२४.

[२] वा.प.जातिसमुद्देशे का.३-४.

आसत्तिविचारः

आकाङ्क्षायोग्यताज्ञानवत् आसत्तिज्ञानमपि शाब्दबोधकारणम्। तत्र केयमासत्तिर्नामेति माथुरीसहितमणिग्रन्थोक्तरीत्या निरूप्यते।

मणिग्रन्थे आसत्तिनिरूपणम्[१]

अव्यवधानेन अन्वयप्रतियोग्युपस्थितिरिति मणिग्रन्थस्य केषांचिन्मतेन व्याख्यानम्

आसत्तिर्नाम अव्यवधानेन अन्वयप्रतियोग्युपस्थितिः। अन्वयप्रतियोगिनोः पदार्थयोः अव्यवधानेनोपस्थितिः आसत्तिरित्यर्थः। स्वाव्यवहितत्वसंबन्धेन तत्पदार्थोपस्थितिविशिष्टा तत्पदार्थोपस्थितिः तत्पदार्थे तत्पदार्थस्यासत्तिः इति फलितार्थः।

न चैवम् आसन्नानासन्नविभाग एव न स्यात्। समूहालम्बनरूपपदार्थोपस्थितेरेव सर्वत्र शाब्दबोधाव्यवहितपूर्वक्षणे स्वीकर्तव्यतया "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यादावपि समूहालम्बनतावत्पदार्थोपस्थितिमादायाव्यवधानेनोपस्थितिसत्त्वात् शाब्दबोधप्रसङ्गः। उपस्थितेरेकत्वेन व्यवधानासंभवादिति वाच्यम्। भेदगर्भाव्यवधानस्य पूर्वोत्तरक्षणसाधारणस्यात्र प्रवेशात्। तच्च स्वध्वंसाधिकरणभिन्नत्वे सति यः स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणक्षणः तदवच्छेदेन स्वसमवायिदेशोत्पत्तिकत्वे सति स्वभिन्नत्वम्। यथा "नीलो घटः" इत्यत्र स्वपदेन नीलोपस्थितिग्रहणे तदव्यवहितत्वं घटोपस्थितेः, तत्पूर्वक्षणजातायाः वा उत्तरक्षणजातायाः वा भवति। स्वं = नीलोपस्थितिः, तद्ध्वंसाधिकरणं तृतीयक्षणः, तद्भिन्नत्वं द्वितीयक्षणस्य, स्वक्षणस्य, स्वपूर्वक्षणपरंपरायाश्च भवति। तत्र व्यवहितपूर्वक्षणान् व्यावर्तयितुं स्वप्रागभावेत्यादि। नीलोपस्थितिप्रागभावाधिकरणं तत्पूर्वक्षणः, तत्प्रागभावाधिकरणं ततः पूवः क्षणः, तदनधिकरणक्षणः पूर्वक्षणमारभ्य तदुत्तरक्षणाः सर्वेऽपि। तत्र उत्तरतृतीयक्षणादिव्यावृत्त्यर्थं स्वध्वंसाधिकरणभिन्नत्वनिवेशः। तथा च विशेषणद्वयाक्रान्तः क्षणः पूर्वक्षणः उत्तरक्षणो वा। तदवच्छेदेन नीलोपस्थितिसमवायिन्यात्मनि उत्पत्तिमती घटोपस्थितिः भवति। सा च नीलोपस्थितिभिन्नैव। समूहालम्बनात्मकनानापदार्थोपस्थितिस्तु स्वभिन्ना न भवतीति तद्व्युदासः।

इत्थं च प्रथमं या प्रत्येकपदेभ्यः प्रत्येकपदार्थानां क्रमिकस्मृतिः सैवासत्तिः।

---

[१] त.चिं.म, च.भा.प्र.प. पृ. २८६.

न चैवं "दण्डी कुण्डली वासस्वी देवदत्तः" इत्यादौ एकविशेष्यकनानाविशेषणकान्वयबोधस्थले आसत्त्यभावप्रसङ्गः, तत्रैकविशेषणोपस्थितेर्विशेषणान्तरोपस्थित्या व्यवधानात् इति वाच्यम्। प्रकृतान्वयबोधाननुगुणो यः स्वध्वंसाधिकरणक्षणः तद्भिन्नत्वस्य अव्यवधानघटकीभूतसत्यन्तदलार्थत्वात्। अननुगुणत्वं च फलबलकल्प्यम्। यादृशयादृशक्षणव्यवधानेऽपि अन्वयबोधोऽनुभवसिद्धः तत्क्षणभिन्नत्वस्यैवाननुगुणत्वरूपत्वात्।

अत एव "गिरिर्भुक्तम्" इत्यादौ भुक्तादिपदार्थोपस्थितिक्षणः, यत्र वा एकपदोच्चारणानन्तरं चिरतरं विलम्ब्यापरपदमुच्चारितं तत्र व्यवधायकक्षणश्चाननुगुणः, तत्रान्वयबोधानुत्पत्तेरिति तदुभयत्र नासत्तिः।

न चैवं यत्र पदोपस्थितिर्व्यवधानेन, पदार्थोपस्थितिश्चाव्यवधानेन, तत्राप्यासत्त्यापत्तिरिति वाच्यम्। तत्पदोपस्थित्यवहिततत्पदोपस्थितिजन्या या तत्पदार्थोपस्थित्यव्यवधानेन तत्पदार्थोपस्थितिः सा तत्पदद्वयजन्ये तत्पदार्थयोरन्वयबोधे आसत्तिरिति विवक्षणीयत्वात्। एवं च यत्र पदोपस्थितिरव्यवधानेन पदार्थोपस्थितिश्च व्यवधानेन, यत्र वा पदार्थोपस्थितिरव्यवधानेन पदोपस्थितिश्च व्यवधानेन, तत्रोभयत्रापि नासत्तिः।

किं तु एकपदोपस्थितिजन्यपदार्थोपस्थितिः अपरपदोपस्थितिश्च समूहालम्बनरूपा, ततोऽपरपदार्थोपस्थितिः पदान्तरोपस्थितिश्च समूहालम्बनरूपा इत्यादिक्रमेण यत्र पदार्थोपस्थितिः तत्रैवासत्तिः। पदोपस्थितेरव्यवधानमपि पूर्वोत्तरक्षणसाधारणप्रकृतान्वयबोधाननुगुणक्षणघटितं बोध्यमिति केचित् व्याचक्षते।

तस्य खण्डनम्

तदसत्। एकलडुपस्थाप्यकृतिवर्तमानत्वयोरन्वयबोधस्थलेऽव्याप्तेः। तत्र भेदगर्भाव्यवधानविशिष्टपदजन्यपदार्थोपस्थितेरभावात्। एवं यत्र लिप्यादिना एकदैव पदजातमनुमितं स्मृतं वा ततः समूहालम्बनं पदार्थवर्गस्मरणं जातं तत्राव्याप्तेश्च। तत्र प्रत्येकपदार्थोपस्थितेरभावात्।

न च तत्रापि क्रमिकप्रत्येकपदार्थोपस्थितिः कल्प्येति वाच्यम्। अनुभवविरोधात्, प्रत्येकपदार्थोपस्थितिमन्तरेणापि तत्र शाब्दबोधस्यानुभविकत्वात्।

किं च पदार्थोपस्थितिरूपायाः आसत्तेः स्वरूपसद्धेतुत्वं न संभवति, क्रमिकपदार्थोपस्थितेः शाब्दबोधात् पूर्वं चिरविनष्टत्वात्। नाप्युपस्थितिविषयकं ज्ञानं कारणम्, मानाभावात्। न हि उपस्थितौ सत्याम् उपस्थितिविषयकज्ञानविलम्बात् शाब्दबोधविलम्बोऽनुभवसिद्धः।

मतान्तरेण व्याख्यानम्

अन्ये तु मणिग्रन्थमेवं व्याचक्षते — अन्वयप्रतियोगिपदम् अन्वयप्रतियोग्युपस्थापकपदपरम्। तथा च तदुपस्थापकपदोपस्थित्यव्यवधानेन तदुपस्थापकपदोपस्थितिः तयोरासत्तिः, न तु पदार्थोपस्थितीनामव्यवधानम् अपेक्षितम् — इति।

तदपि न। श्लोकादौ व्यवहितपदैरपि शाब्दबुद्ध्युदयात्। समूहालम्बनपदोपस्थितिमादाय सर्वत्र ईदृशासत्त्याः सत्त्वेन आसन्नानासन्नविभागानापत्तेश्च। न च भेदगर्भमव्यवधानं विवक्षितमिति वाच्यम्। एकलडुपस्थाप्यकृतिवर्तमानत्वयोरन्वयबोधस्थलेऽव्याप्तेः।

नव्यमतम्

नव्यास्तु — वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिः। इयं च स्वरूपसत्येव हेतुः। न चैतस्या अपि कारणत्वे मानाभाव इति वाच्यम्। तथा सति "आनय" इति वाक्यमाकर्णयतः प्रत्यक्षेण घटं पश्यतः घटस्य शाब्दबोधापत्तेः। "घटमानय" इति वाक्यमाकर्णयतः कारणतया घटपदादाकाशस्मरणवतः आकाशविषयकशाब्दबोधापत्तेश्च।

मथुरानाथीयं मणिव्याख्यानम्

मूलार्थस्तु — अव्यवधानेन वृत्तिसंसर्गकपदप्रकारकज्ञानाव्यवधानेन (तादृशपदप्रकारकज्ञानजन्येति यावत्) अन्वयप्रतियोग्युपस्थितिः पदार्थोपस्थितिः। अत एव वक्ष्यति "अत्र वदन्ति, संनिधिर्न पदजन्यैवान्वयबोधे हेतुः" इति[१]। अन्यथा तदनुत्थितिः। तत्र पदार्थोपस्थितिपरतयैव संनिधिपदप्रयोगात्।

न चैवं "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यादितो "गिरिरग्निमान्, भुक्तं देवदत्तेन" इत्यन्वयबोधापत्तिरिति वाच्यम्। तथा तात्पर्यादिग्रहसत्त्वे इष्टापत्तेः। न चैवं क्वचित् काव्यादौ योजनायाः कुतोऽपेक्षेति वाच्यम्। तात्पर्यग्रहार्थं तदुपयोगात् — इति प्राहुः। इति माथुरी रीतिः[२]।

मण्युक्तायामासत्तौ अन्योन्याश्रय-तत्परिहारौ

नन्वव्यवधानेन अन्वयप्रतियोग्युपस्थितिरासत्तिरुक्ता। सा च शाब्दबुद्धिरूपैव। तथा च शाब्दबुद्धौ जातायां तज्ज्ञानं, तज्ज्ञाने च शाब्दबुद्धिः, आसत्तिज्ञानस्य शाब्दधीहेतुत्वात् इत्यन्योन्याश्रय इति चेत् — न। उपस्थितिपदेन स्मृतेः

---

[१] त.चिं.म, च.भा.प्र.प. पृ. ३००.
[२] त.चिं.म.व्या. रहस्यम्, च.भा.प्र.प.पृ. २९१.

विवक्षितत्वात्। तथा च अन्वयप्रतियोगिविषयकस्मृतिः आसत्तिः, तद्विषयकः अनुभवः शाब्दबोधः इति नान्योन्याश्रयः।

पदार्थोपस्थितीनां यौगपद्यसंपादनम्

अथ कर्मकर्तृकरणाधिकरणादिकारकक्रियादिवाचकानि यानि पदानि तद्विषयकैः क्रमेण जायमानैः ज्ञानैः क्रमेण जायमानानां नानाविशेषणकानां पदार्थस्मृतीनां न यौगपद्यं संभवति, आशुतरविनाशिनां क्रमिकाणां मेलनानुपपत्तेः इति कथं तावत्पदार्थान्वयबोधः। अन्वयबोधस्य वृत्त्या पदजन्यपदार्थस्मृतिसाध्यत्वात् इति चेत् — न।

श्रोत्रेन्द्रियजन्यप्रत्येकपदश्रवणजन्यसंस्कारसमूहात् एकदा तावत्पदविषयकसमूहालम्बनस्मृतिः भवति। ततः एकदैव तावत्पदार्थविषयिका समूहालम्बनस्मृतिः भवति। ततः वाक्यार्थानुभवः भवति इति स्वीकारात्।

न चान्यमात्रविषयकसंस्कारेण नान्यविषयकस्मरणं भवितुमर्हति, तदविषयकसंस्कारेण कथं तद्विषयकस्मृतिरिति यावत् इति वाच्यम्। वाक्यार्थबोधानुपपत्त्या कल्प्यमानं यत् सकलपदार्थगोचरैकस्मरणरूपं फलं, तदन्यथानुपपत्त्या प्रत्येकपदार्थमात्रगोचरसंस्काराणामपि परस्परसहकारेण सकलपदार्थविषयकैकस्मरणजनकत्वकल्पनात्, प्रत्येकवर्णविषयकसंस्काराणां तावद्वर्णविषयकपदस्मरणजनकत्ववत्।

खण्डवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधे समूहालम्बनस्मृतेः उपयोगः

अथ —

"यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥" [१]

स्वार्थाकाङ्क्षितं स्वार्थयोग्यं यद्यत् संनिधानं प्रपद्यते = स्वार्थोपस्थित्यव्यधानेनोपस्थितिविषयो भवति, तेन तेनैवान्वितः स्वार्थः पदैरेवाभिधीयते = पदैः प्रथममनुभाव्यते, अनन्तरं महावाक्यार्थबोधः। तथा च किं पदपदार्थयोः समूहालम्बनस्मरणेन।

न च "घटमानय" इत्यत्र 'घटम्' इत्यनेन एकवारमवान्तरवाक्यार्थबोधजनने पुनस्तस्मात् महावाक्यार्थज्ञानं न स्यात्, विरम्य व्यापाराभावात्, शब्दबुद्धिकर्मणाम् एकवारं फलं जनयित्वा पुनः फलान्तरजनकत्वाभावात् इति वाच्यम्। एवमपि भवता प्रथममवान्तरवाक्यार्थबोधानुत्पादे हेत्वनुपन्यासात्, न हि प्रयोजनक्षतिभिया

---

[१] प्र.पं. पृ. ३८४.

सामग्री कार्यं नोत्पादयेत्। उत्तरकालिकस्य महावाक्यार्थबोधस्य हीदं सामग्रीवैकल्यं, न पूर्वस्येति चेत् —

अस्तु तावत् क्वचित् विनापि समूहालम्बनस्मरणं खण्डवाक्यार्थबोधद्वारा महावाक्यर्थबोधः, तथापि यत्र चरमोक्तं धात्वर्थमादाय कर्तृकर्माधिकरणादीनां मिथो विशेष्यविशेषणभावमनापन्नानां चरमोपस्थितायामेकस्यामेव क्रियायाम् 'एकत्र द्वयम्' इति न्यायेनान्वयबोधः, तत्र समूहालम्बनपदार्थस्मृतिरेव गतिः। न हि तत्र कर्त्रादीनां परस्परमवान्तरान्वयबोधः संभवति, परस्परमयोग्यत्वात्।

यद्वा चरमं खण्डवाक्यार्थबोधोत्तरक्रमिकचरमपदोपस्थितिचरमपदार्थोपस्थित्योरनन्तरं तावत्पदार्थघटितमहावाक्यार्थबोधे समूहालम्बनोपस्थितिरेव गतिः। खण्डवाक्यार्थानुभवस्य चरमपदार्थोपस्थितिसमये नाशात्।

एतदुक्तं भवति — यत्र "घटमानय" इत्यादौ घटकर्मत्वयोरन्वयबोधानन्तरं नीधात्वर्थस्यैवोपस्थितिः, न तु तिपदोपस्थितिः, उद्बोधकविरहात्, ततो घटविशिष्टकर्मत्वस्य नीधात्वर्थेऽन्वयबोधः, तदुत्तरमेव तिपदोपस्थितिः, ततः तिपदार्थोपस्थितिः, तदनन्तरं महावाक्यार्थबोधः, तत्र चरमतिपदार्थोपस्थितिसमये खण्डवाक्यार्थबोधस्य नाशात् पुनः खण्डवाक्यार्थबोधविषयपदार्थानां समूहालम्बनोपस्थितिमन्तरा महावाक्यार्थबोधो न निर्वहतीति।

खण्डवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधे मतान्तरम्

अत्र मथुरानाथीये[1] "प्राञ्चस्तु" इत्यादिना मतविशेषमनूद्य तत्खण्डितम्, तदप्युपयुक्तत्वात् लिख्यते।

प्राञ्चस्तु — भवतु सामग्रीवशात् प्रथमं खण्डवाक्यार्थबोधः, तथापि चरमं तावत्पदार्थघटितमहावाक्यार्थबोधे समूहालम्बनपदपदार्थस्मृतिरेव गतिः। तथा हि — पदजन्यपदार्थस्मृतेरेव शाब्दधीहेतुतया खण्डवाक्यार्थानुभवरूपपदार्थोपस्थितिवशात् महावाक्यर्थबोधासंभवात्।

अत एव सर्वत्र 'विशेष्ये विशेषणम्' इति न्यायेनैव अन्वयबोधो, न तु विशिष्टवैशिष्ट्यविधया। पदजन्यविशेषणतावच्छेदकप्रकारकविशेषणस्मृतेरभावात्। अत एव च —

"वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति।
तथा हि सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति॥"

इति प्राभाकरा वदन्ति।

---

[1] त.चिं.म.व्या. रहस्यम्, च.भा.प्र.प.पृ. २९८.

पदार्थोपस्थितिनिष्ठकारणतावच्छेदकविषयको विचारः

अथ पदार्थोपस्थितेः वृत्त्या पदजन्यपदार्थस्मृतित्वेन न कारणता। किं तु स्मृतिशाब्दानुभवसाधारणेन पदज्ञानविशिष्टपदार्थज्ञानत्वेनैव। अस्य स्मृतित्वापेक्षया व्यापकधर्मत्वेऽपि निश्चिताव्यभिचारकत्वात् कारणतावच्छेदकत्वम्। वैशिष्ट्यं च वृत्तिलक्षणसंबन्धेन पदार्थप्रकारकपदविशेष्यकज्ञाननिरूपितपदार्थस्मृतिशाब्दानुभव-वृत्तितत्तज्जन्यताविशेषसंबन्धेन। तेन पदज्ञानजन्यानुमितिरूपपदार्थोपस्थितेः, सम-वायेन संबन्धितया घटादिपदजन्याकाशस्मृतेश्च न शाब्दबोधे हेतुत्वम्। तत्तज्जन्य-तानामननुगमेऽपि तासां संबन्धविधयैव प्रवेशाददोषः। इत्थं च खण्डवाक्यार्थ-बोधात्मकपदार्थोपस्थितितोऽपि महावाक्यार्थबोधे बाधकाभावः। तस्याः अपि तादृशजन्यतासंबन्धेन पदज्ञानविशिष्टत्वादिति चेत् — न।

शाब्दानुभवनिष्ठजन्यतायाः कारणतावच्छेदकघटकत्वे गौरवात्। स्मृतिनिष्ठ-जन्यतामात्रसंबन्धेन पदज्ञानविशिष्टस्मृतित्वेन वा तादृशजन्यतामात्रसंबन्धेन पद-ज्ञानविशिष्टपदार्थज्ञानत्वेन वा लाघवात् हेतुत्वात्। निश्चिताव्यभिचारकरूपस्य अगुरुत्वे सत्येव संदिग्धव्यभिचारकरूपेण कारणत्वस्य त्याग इति सिद्धान्तात्।

वस्तुतस्तु पदज्ञानविशिष्टपदार्थस्मृतित्वादिकमपि न प्रवेश्यते। परं तु विलक्षण-तत्तदर्थविषयकत्वेनैव तत्तदर्थविषयकशाब्दत्वावच्छिन्नं प्रति हेतुता। वैलक्षण्यं च पदजन्यपदार्थस्मृतिनिष्ठशाब्दबुद्धिसामान्यजनकतावच्छेदकतया, पदजन्यतत्तत्पदार्थ-स्मृतिनिष्ठतत्तत्पदार्थशाब्दबुद्धिजनकतावच्छेदकतया वा लाघवात् सिद्धः स्मृतित्व-व्याप्यो जातिविशेषः।

न च तवापि वैजात्येन हेतुत्वे यत्र पदजन्यपदार्थस्मृतावुद्बोधकान्तरवशात् उच्छृङ्खलपदार्थान्तरस्यापि भानं तत्र तत्पदार्थस्यापि शाब्दबोधापत्तिः, जातेः आंशि-कत्वाभावात् इति वाच्यम्। शाब्दबोधोपधायकपदजन्यपदार्थस्मृतौ उच्छृङ्खल-पदार्थान्तरभाने मानाभावात् — इति प्राहुः।

तदसत्। अस्तु लाघवात् सर्वत्र पदार्थस्मृतेरेव शाब्दधीहेतुत्वम्, तथापि 'विशेष्ये विशेषणम्' इति न्यायेनैव शाब्दबोधः, न तु विशिष्टवैशिष्ट्यविधयेत्युक्त-मयुक्तमेव। यत्र हि खण्डवाक्यार्थबोधोत्तरं समूहालम्बनपदार्थस्मृतिः, तत्रार्थ-समाजग्रस्तस्य विशिष्टवैशिष्ट्यविधया महावाक्यार्थशाब्दबोधस्य दुर्वारत्वात् खण्ड-वाक्यार्थबोधात्मकस्यैव विशेषणतावच्छेदकप्रकारकनिश्चयस्य सत्त्वात्। न हि सामान्यतो विशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकनिश्च-यस्य हेतुतायामपि स्मृतित्वं तन्त्रम् — इति।

प्राभाकरमतम्

पदार्थोपस्थितेः पदजन्यत्वनिर्बन्धाभावः

अत्र[१] वदन्ति प्राभाकराः — पदजन्यैव पदार्थोपस्थितिः शाब्दबुद्धिहेतुरिति नास्ति निर्बन्धः। "द्वारम्" इत्यादौ अध्याहृतेनापि = पदज्ञानं विना स्मृतेनापि, पिधानादिना सह अन्वयबोधस्य दर्शनात्। किं तु तदुपस्थितिमात्रं तदन्वयप्रतियोग्युपस्थापकयत्किंचित्पदज्ञानं च शाब्दधीहेतुः। तथा च किं सकलपदगोचरस्मरणेन? कुतो वा वृत्त्या पदजन्यपदार्थोपस्थितेरासत्तित्वम्? "द्वारम्" इत्यादौ व्यभिचारात्।

न च तत्र "पिधेहि" इति शब्द एवाध्याह्रियते = स्मर्यते, इति वाच्यम्। अप्रयोजनकत्वात्, अर्थस्यैवान्वयबोधविषयत्वेन तदुपस्थितेरेवावश्यकत्वाच्च।

किं च "अस्य पुरुषस्य पिधानोपस्थापकपदोपस्थितिं विना 'द्वारम्' इति वाक्यात् पिधानविषयकशाब्दबुद्धिरनुपपन्ना" इत्याकारकानुपपत्तिकरणकार्थापत्त्यैव पिधेहिशब्दोपस्थितिः कल्पनीया। तच्च न संभवति, अर्थापत्तेः साक्षादुपपादकमात्रविषयकत्वात्। न च पिधानोपस्थापकशब्दोपस्थितिमात्रमुपपादकम्, अपि तु तदर्थोपस्थितिः। अवश्यकल्प्या या अर्थोपस्थितिः तयैव तद्विषयकशाब्दबुद्धिसंभवे तद्भिन्नायाः अर्थोपस्थितिसहचरिततया दैववशसंपन्नायाः शब्दस्मृतेः अन्यथासिद्धत्वात्। अन्यथा पदबोधितस्यैवार्थस्य अन्वयबोधकत्वमिति नियमशक्तिकल्पनापत्तेः[२]। नियमशक्तिः = कारणता। गुरुधर्मस्य कारणतावच्छेदकत्वकल्पनापत्तेरिति फलितम्। अर्थोपस्थितित्वापेक्षाया पदजन्यार्थोपस्थितित्वस्य गुरुत्वात्।

---

[१] अयं तावत् प्रकरणपञ्चिकाग्रन्थः प्राभाकरसिद्धान्तप्रतिपादकोऽत्रानुसन्धेयः (प्र.पं. पृ. ३८९)।
अथ संनिधिः कः? यस्यार्थस्य श्रवणानन्तरमाकाङ्क्षायोग्यताभ्यामर्थान्तरे बुद्धिरुदेति सा। सा च न शब्दनिबन्धनैव केवलमन्विताभिधानव्युत्पत्तावुपलक्षणम्, अध्याहृतेनापि लोके अन्विताभिधानदर्शनात्। न च वाच्यं शब्द एवाध्याह्रियते, स चार्थमुपस्थापयतीति। अनुपयोगात्, अप्रमाणत्वाच्च। यद्यप्यर्थापत्तिप्रमाणकोऽध्याहारः, तथापि शब्दकल्पनमनुपपन्नम्। येन हि विनानुपपत्तिः तदेवार्थापत्तिप्रमेयम्। न चार्थानां शब्दमन्तरेणानुपपत्तिः।

संनिधिः शब्दजन्मैव व्युत्पत्तौ नोपलक्षणम्।
अध्याहृतेनाप्यर्थेन लोके संबन्धदर्शनात्॥
सहसैव न सर्वेषां संनिधिः प्रतियोगिनाम्।
संनिधापकसामग्रीक्रमेण क्रमवानसौ॥
यथा यथा संनिधानं जायते प्रतियोगिनाम्।
तथा तथा क्रमेणैव शब्दैरन्वितबोधनम्॥ इति संग्रहः।

[२] पदजन्यपिधानाद्युपस्थितित्वेनैवान्वयबोधजनकत्वमिति गुरुधर्मेण कारणतायाः कल्पनापत्तेरित्यर्थः।

न च शब्दानां स्वशक्यार्थविषयकशाब्दबोधजनकत्वात् "द्वारम्" इत्यस्य कथं पिधानशाब्दबोधजनकत्वम्, तच्छक्तपदज्ञानस्य तच्छाब्दबुद्धौ हेतुत्वात्। तथा च पिधानान्वयबोधार्थं पिधेहिशब्दोपस्थितिकल्पनमावश्यकमिति वाच्यम्। लक्षणास्थले "गङ्गायां घोषः" इत्यादौ तीरशक्तपदज्ञानं विनापि तीरान्वयबुद्धेरुत्पत्त्या व्यतिरेकव्यभिचारात्, तच्छक्तपदज्ञानस्य तच्छाब्दबोधे हेतुत्वायोगात्।

न च तद्वृत्तपदज्ञानं तच्छाब्दबोधे हेतुः, अतो लक्षणायां न व्यभिचारः, तीर निरूपितलक्षणाख्यवृत्तिविशिष्टगङ्गापदज्ञानस्य तत्र सत्त्वात्। "द्वारम्" इत्यत्र पिधान वृत्तपदज्ञानं विना कथं पिधानबोध इति वाच्यम्। नैयायिकमतेऽपि "पचति" इत्युक्ते कृत्या आक्षिप्तेन कर्त्रा अन्वयबोधस्वीकारात्। तत्र कर्तृवृत्तपदज्ञानं विनापि कर्तृविषयकशाब्दबोधोत्पत्त्या व्यभिचारात्।

किं च "पिधेहि" इतिशब्दकल्पनेऽपि तदर्थोपस्थितिरवश्यं कल्पनीया, तां विना अन्वयाबोधात्। तथा चार्थोपस्थितिरेव हेतुः, न तु शब्दज्ञानजन्यार्थोपस्थितिः, गौरवात्।

न च श्रुतपदानि जनितान्वयबोधानीति कथमध्याहृतार्थे तेषां तात्पर्यमिति (आकाङ्क्षेति) वाच्यम्। तात्पर्यविषयीभूतान्वयबोधानुपपत्त्या अध्याहृतार्थेऽप्याकाङ्क्षायाः सत्त्वात्।

ननु यदि शब्दानधीनपदार्थोपस्थितिरपि हेतुः, तदा "ओदनं पचति" इत्यत्र कथंचित् स्मृतस्य कलायादेरप्यन्वयबोधापत्तिः। तथा च समभिव्याहृतपदार्थमात्रान्वयबोध इति अनुभवस्य भङ्ग इति चेत् — न। तात्पर्यज्ञानस्य नियाम कत्वात्। 'यत्परः शब्दः स शब्दार्थः' इति नियमात्। यत्तात्पर्यकः शब्दः स एव शब्दजन्यज्ञानविषय इति तदर्थः। तथा च कलाये (धान्यविशेषे) तात्पर्य विरहात् स्मृतस्यापि तस्य नान्वयबोधविषयत्वम्। अन्यथा = तात्पर्यज्ञानस्या नियामकत्वे, तव = नैयायिकस्य, मतेऽपि "ओदनं पचति" इत्यत्र दैववशस्मृतं यत्कलायपदं ततः स्मृतेन कलायेन सहान्वयबोधः स्यात्।

ननु प्राभाकरमते "देवदत्तः ओदनम्" इत्यत्र क्रियापदाध्याहाराभावेन आख्यातादिना कर्तुरनभिधानात् कर्तृवाचकदेवदत्तपदोत्तरं तृतीयाविभक्तिः स्यात्, कृदाख्याताद्यन्यतमेनानभिहिते कर्तरि तृतीयाविधानात् इति चेन्न। शब्दाध्याहारमतेऽपि पचतिपदेन कर्तुरनभिधानात् तृतीयापत्तेः। कृतिर्हि आख्यातेनाभि धीयते, न कर्ता।

न च तन्मते कृदाख्यातादिभिः कर्तृतद्गतसंख्यान्यतरानभिधाने तृतीयेति सूत्रार्थः। "पचति" इत्यत्र आख्यातेन कर्तुरनभिधानेऽपि तत्संख्यायाः अभिधानात्

न देवदत्तपदोत्तरं तृतीया, "देवदत्तस्य पाचकः" इत्यादौ कृत्प्रत्ययेन कर्तृसंख्याया अनभिधानेऽपि कर्तुरभिधानान्न तृतीयेति वाच्यम् । एवमपि "देवदत्तस्य पाकः" इत्यत्र घञा भावार्थकेन कर्तुः तत्संख्यायाश्चानभिधानात् तृतीयापत्तेः।

ननु अनभिहिताधिकारीयतृतीयाविधायकसूत्रं "देवदत्तस्य पाकः" इत्येतत्स्थलातिरिक्तस्थलपरम्, घञादिकृद्योगे "कर्तृकर्मणोः कृति" इति[१] षष्ठ्यास्तृतीयापवादकत्वात्।

न च तथापि "देवदत्तस्य पाकः" इत्यर्थे बोधनीये यत्र 'देवदत्तस्य' इतिमात्रमुच्चरितं, तत्र तृतीयापवादककृद्योगाभावात् आख्यातकृद्भ्यां कर्तृतद्गतसंख्यानभिधानाच्च तृतीयापत्तिरिति वाच्यम्। तत्रापि घञन्तपाकादिपदस्य वक्तुरभिप्रेततया तदतिरिक्तस्थलस्यैव तृतीयाविधायकसूत्रविषयत्वादिति चेत् — न।

मम मतेऽपि "देवदत्तस्य पाकः" इत्याद्यतिरिक्तस्थले यत्र कर्तृतद्गतसंख्यान्यतराभिधायककृदाख्यातान्तक्रियापदं वक्तुरभिप्रेतं तत्र न तृतीया, यत्र तु न तदभिधायककृदाख्यातान्तक्रियापदं वक्तुरभिप्रेतं तत्र तृतीयेति व्याकरणसूत्रतात्पर्यादेव "देवदत्तः ओदनम्" इत्यादौ न तृतीया। तत्र पचतिपदस्य वक्तुरभिप्रेतत्वात्। न चैवं शब्दाध्याहारमतप्रवेश इति वाच्यम्। पदस्य वक्तुरभिप्रेतत्वेऽपि श्रोत्रा तदनध्याहारात्।

ननु "द्वारं पिधेहि" इत्यादौ पिधानविषयकशाब्दबोधं प्रति पिधानोपस्थापकपदत्वेन कारणत्वदर्शनात् "द्वारम्" इत्यत्र तदभावात् कथं पिधानान्वयबोध इति चेन्न। पिधानान्वयप्रतियोग्युपस्थापकपदत्वेनैव हेतुतया, तादृशद्वारपदज्ञानसत्त्वेन पिधानान्वयबोधोपपत्तेः। पिधानोपस्थापकपदत्वेन न हेतुता। तथा सति तच्छाब्दबुद्धिं प्रति तदुपस्थापकपदत्वेन हेतुतायां गौणलाक्षणिकस्थलेऽन्वयबोधानुपपत्तेः। गौणलाक्षणिकपदयोः पदार्थानुपस्थापकत्वात्, प्रवाहादिरूपशक्योपस्थितिरेव लक्ष्यार्थस्मारिका, न तु लाक्षणिकपदोपस्थिरिति प्राचीनसिद्धान्तात्।

पूर्वपक्षसंग्रहः

तदयमर्थाध्याहारपूर्वपक्षनिष्कर्षः — तच्छाब्दबुद्धौ पदजन्यैव तदुपस्थितिर्हेतुरिति न नियमः, तद्विषयकशाब्दबुद्धौ पदज्ञानविशिष्टतदुपस्थितित्वेन विजातीयतद्विषयकत्वेन वा हेतुत्वकल्पनामपेक्ष्य लाघवेन तदुपस्थितित्वेन हेतुत्वकल्पनौचित्यात्। पदज्ञानविशिष्टत्वाप्रवेशात् अतिरिक्तजातिकल्पनाविरहाच्च। "द्वारम्"

[१] पा.सू.२.३.६५.

इत्यादौ अर्थाध्याहारेणापि अन्वयबोधदर्शनेन तथा कार्यकारणभावे व्यभिचाराच्च। न च तत्रापि पिधेहिशब्द एवाध्याह्रियत इति वाच्यम्। गौरवात्, मानाभावाच्च।

न च पिधानविषयकशाब्दबोधं प्रति शक्तिलक्षणान्यतरसंबन्धेन पिधानप्रकारकवृत्तितावच्छेदकधर्मावच्छिन्नशब्दविशेष्यकज्ञानत्वेन हेतुतया पिधेहिशब्दस्मृतिः आवश्यकीति वाच्यम्। तादृशकार्यकारणभावे मानाभावात्।

न चैवम् "ओदनं पचति" इत्युक्ते कारणतया स्मारितस्य आकाशस्य, प्रत्यक्षादिनोपस्थितस्य कलायादेश्चान्वयबोधापत्तिरिति वाच्यम्। सति तात्पर्यग्रहे इष्टापत्तेः। अन्यथा तवापि "ओदनं पचति" इत्युक्ते दैववशस्मृतकलायपदोपस्थितेन कलायेनान्वयबोधस्य दुर्वारत्वादिति।

आसत्तिवादसिद्धान्तः, अर्थाध्याहारखण्डनं च

अत्रोच्यते। क्रियापदेन धातुना उपस्थापिता क्रिया, कारकपदेन अमादिना उपस्थापितं कारकं च परस्परं साकाङ्क्षम्, न तु यथाकथंचिदुपस्थितम्। अन्यथा "द्वारं कर्मता पिधेहि", "द्वारं पिधानं कृतिः" इत्यत्रापि अर्थाध्याहार इवान्वयबोधप्रसङ्गः। क्रियायाः कर्मणश्चोपस्थितेस्तुल्यत्वात्।

न च "द्वारं कर्मता पिधेहि" इत्यादिपदोपस्थितेऽर्थे परस्परमाकाङ्क्षाविरहान्न शाब्दबोध इति वाच्यम्। तर्हि आकाङ्क्षां प्रति अर्थस्य पदविशेषोपस्थापितत्वं कारणं न तूपस्थितिमात्रमिति स्वीकरणीयम्। एवं च पदविशेषजन्योपस्थितिविषयत्वाभावे आकाङ्क्षैव नास्तीति कथं "द्वारम्" इत्यादौ शाब्दबोधः?

न च "द्वारं कर्मत्वम्" इत्यादौ भेदान्वयबोधेऽसाधुत्वज्ञानमेव "द्वारनिष्ठं कर्मत्वम्" इति भेदान्वयबोधप्रतिबन्धकं, न तु निराकाङ्क्षत्वं, पदविशेषानुपस्थापितत्वं वेति वाच्यम्। "पिधेहि" इति पदं विना "द्वारम्" इत्यस्याप्यसाधुत्वात्। साधुत्वज्ञानस्यान्वयबोधेऽप्रयोजकत्वाच्च। एतदुक्तं भवति — जनकीभूतं ज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकतया साधुत्वज्ञानस्याजनकतया नासाधुत्वज्ञानस्य जनकज्ञानप्रतिबन्धकत्वमिति।

किं च अपभ्रंशादप्यन्वयबोधो जायते, न हि तत्र साधुत्वज्ञानमस्ति। अतो व्यतिरेकव्यभिचारान्न साधुत्वज्ञानस्य शाब्दबोधहेतुत्वम्।

न चापभ्रंशस्थलेऽसंसर्गाग्रहमात्रम्, नान्वयाख्यसंसर्गबोध इति वाच्यम्। संसर्गग्रहे बाधकाभावात्।

तस्मात् क्रियापदस्य कारकपदेन, कारकपदस्य क्रियापदेन सह अन्वयबोधजनकत्वम्, न त्वेकं विना अपरस्य।

अपि च सकर्मकक्रियापदयोगं विना "द्वारम्" इति द्वितीयाविभक्तेरनुपपत्तिः। पाणिन्यादिभिस्तथैवानुशासनात्। न हि सकर्मकक्रियापदस्य योऽर्थस्तदन्वितस्वार्थ-बोधकत्वे द्वितीयेति वक्तुं शक्यते। "घटः आनयनं कृतिः" इत्यत्रापि द्वितीयापत्तेः।

अपि च "पुष्पेभ्यः" इत्यत्र स्पृहयतिपदाध्याहारं विना चतुर्थ्यनुपपत्तिः। "स्पृहेरीप्सितः" इति सूत्रेण[१] स्पृहधातुयोग एव चतुर्थीविधानात्। यदि स्पृहयतिपदार्थयोगे चतुर्थी तदा "पुष्पमिच्छति" इत्यत्रापि चतुर्थी स्यात्। स्पृहयति-इच्छतिपदयोः एकार्थत्वात्।

अथ द्वितीयादेः साधुत्वार्थं "द्वारम्", "पुष्पेभ्यः" इत्यत्र पिधेहि-स्पृहयति-पदयोरध्याहारः, न तु अन्वयबोधार्थम्, अन्वयबोधस्यान्वयप्रतियोग्यर्थविषयक-ज्ञानादेवोपपत्तेरिति चेत् — तर्हि क्रियापदयोगं विना न कारकविभक्तिः, कारक-पदयोगं विना न तदन्वययोग्यं क्रियापदम् इति केवलकारकपदे प्रयुक्ते क्रिया-पदाध्याहारः, केवलक्रियापदे प्रयुक्ते कारकपदाध्याहारश्चावश्यक इति अध्या-हृतपदजन्यार्थोपस्थितिरेव शाब्दधीहेतुः।

तस्मात् क्रियाकारकपदोपस्थापितयोरेव क्रियाकारकयोः परस्परमन्वय इति शब्दाध्याहार एव युक्तः। "पचति" इत्यादावपि न आक्षिप्तकर्त्रा अन्वयबोधः, अपि तु प्रथमान्तचैत्रादिपदाध्याहारादेवान्वयबोधः इति।

अत्रेदं विचार्यते। एतावता माथुर्यादिसहितमणिग्रन्थपरामर्शेन "अव्यवधानेन वृत्त्या पदजन्यपदार्थोपस्थितिरेव आसत्तिः, सा च स्वरूपसती शाब्दबोधहेतुः" इति पर्यवसन्नम्।

मुक्तावल्यनुसारेण आसत्तिनिरूपणम्

विश्वनाथन्यायपञ्चाननास्तु —

"आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते।
कारणं, संनिधानं तु पदस्यासत्तिरुच्यते॥"

इति कारिकावल्याम्,[२] "यत्पदार्थेन यत्पदार्थस्यान्वयोऽपेक्षितः तयोः पदयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम्" इति मुक्तावल्यां[३] च अन्वय-प्रतियोग्युपस्थापकपदयोः अव्यवधानेन ज्ञानमासत्तिरित्याहुः।

---

[१] पा.सू.१.४.३६.
[२] का.८२.
[३] मु. पृ. ६२०.

दिनकर्यां[१] मुक्तावलीखण्डनपूर्वकं नव्यमतमुपन्यस्तम्। तथाहि —

"नव्यास्तु — उक्तासत्तिः मौनिश्लोके न संभवति, तत्र पदाभावेन पदाव्यवधानासंभवात्। उक्तासत्तिज्ञानविलम्बेन शाब्दबोधविलम्बाभावाच्च। किं तु अव्यवधानेन वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिः। तत्राप्यव्यवधानांशो न निवेश्यते। शाब्दबोधं प्रति पदजन्यपदार्थोपस्थितेः कारणतया अव्यवधानेनैव तत्संभवात्। पदद्वयजन्योपस्थित्योर्व्यवहितत्वे शाब्दबोधाव्यवहितप्राक्क्षणे एकोपस्थितिव्यक्तिनाशस्य आवश्यकतया उपस्थितिरूपायाः आसत्तेः शाब्दबोधात् प्राक् दुर्घटत्वात्। तस्मात् वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिरित्याहुः"

इति।

तत्र रामरुद्र्यां नव्यमतेऽस्वारस्यं प्रदश्र्य मुक्तावलीकारमतं समर्थितम्। तथा हि —

"आहुरित्यनेन नव्यमतेऽस्वरसः सूचितः। तद्बीजं तु एवं सति पदजन्यपदार्थोपस्थितेः कारणत्व एव पर्यवसानात् आसत्तेः शाब्दबोधकारणतायाः सर्वसिद्धायाः विलयप्रसङ्गः इति। न च मौनिश्लोकादौ पदाभावात् कथमासत्तिरिति वाच्यम्। पदाभावेऽप्यानुमानिकपदज्ञानस्य आवश्यकत्वात्। अन्यथा पदज्ञानरूपकारणाभावेन मौनिश्लोकादौ शाब्दबोधस्यैवानुपपत्तेः। एवं च ययोः पदयोः अन्वयबोधजनकत्वे मौनिनस्तात्पर्यमुपगम्यते तयोरव्यवधानेनानुमानिकज्ञानं वर्तत एवेति न ग्रन्थकृन्मते शाब्दबोधानुपपत्तिरिति विभावनीयम्" इति।

तर्कसंग्रहे[२] "पदानामविलम्बेनोच्चारणं संनिधिः" इत्युक्तम्।

दीपिकायाम्[३] "अविलम्बेन पदार्थोपस्थितिः संनिधिः। उच्चारणं तु तदुपयोगितयोक्तम्" इत्युक्तम्।

न्यायकौस्तुभानुसारेण आसत्तिनिरूपणम्

न्यायकौस्तुभकारास्तु[४] एकपदार्थोपस्थित्यव्यवधानेनापरपदार्थोपस्थितिरासत्तिः इति पक्षे एवं दूषणं प्रादर्शयन् —

उक्तासत्तेः स्वरूपसत्याः हेतुत्वं, ज्ञातायाः वा? नाद्यः, आसत्तिभ्रमेण शाब्दबोधानुपपत्तेः। नान्त्यः, उपस्थितीनामनुपस्थितावपि शाब्दबोधस्य आनुभवि-

---

[१] मु.व्या.दि.पृ. ६२२.
[२] त.सं.पृ. ६७.
[३] त.सं.दी.पृ. ३४२.
[४] न्या.कौ.पृ. ९५.

कत्वात्। वस्तुतस्तु निरुक्तासत्तेः शाब्दबोधोपयोगित्वे मानाभावः, "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यादौ गिर्यग्निमतोरन्वये तात्पर्यज्ञानाभावादेव तयोरन्वयबोधानुदयात्, तात्पर्यज्ञानसत्त्वे चेष्टापत्तेः। अत एव श्लोकादौ तात्पर्यग्राहकतया योजनावाक्यस्योपयोगः। यत्र च प्रकारान्तरेण तात्पर्यग्रहः, तत्र योजनां विनैव शाब्दबोधः — इति।

एवं "तत्तत्पदयोरव्यवधानमेवासत्तिः। तस्याश्च ज्ञानमेव शाब्दबोधजनकम्। व्यवहितानामपि पदानाम् अव्यवधानभ्रमेण शाब्दबोधात्" इत्यपि न युक्तम्। तात्पर्याग्रहेणैव "गिरिर्भुक्तमग्निमान्" इत्यादौ शाब्दबोधानुदयनिर्वाहे पदाव्यवधानरूपासत्तेरपि हेतुत्वे मानाभावात् — इति।

ततः "अत्र वदन्ति" इत्यादिना स्वमतं प्रादीदृशन् — पदवृत्तिज्ञानजन्यपदार्थोपस्थितिरेवासत्तिः, न तु अव्यवधानेन पदार्थोपस्थितिः, पदयोरव्यवधानं वा। सा च स्वरूपसत्येव उपयुक्ता,[१] अगृहीतवृत्तिकस्य पदज्ञानादिसत्त्वेऽपि शाब्दबोधानुदयात्। उपस्थितिः स्मृतिरूपा ग्राह्या। तत्रोद्बोधकविधया वृत्तिज्ञानस्य हेतुत्वम् — इति स्वमतमदर्शयन्।

परं तु स्वरूपसत्याः आसत्तेः उपस्थितिरूपायाः हेतुत्वे आसत्तिभ्रमात् शाब्दबोधानुपपत्तेः इति प्रश्नस्य समाधानं नोक्तम्। तथा रामरुद्रोक्तप्रश्नस्यापि समाधानं न केनाप्युक्तम्।

मम तु प्रतिभाति। उपस्थितिरूपासत्तिपक्षे आसत्तिभ्रम एव नाङ्गीक्रियते। शाब्दभ्रमस्य योग्यताभ्रमेणैवोपपत्तेः। रामरुद्रोक्तदूषणमपीष्टापत्त्या परिहरणीयम्। एतत्पक्षे पदजन्यपदार्थोपस्थित्यतिरिक्तायाः आसत्तेः शाब्दधीकरणत्वानङ्गीकारात् इति।

तर्कताण्डवानुसारेण आसत्तिनिरूपणम्[२]

तर्कताण्डवे तु —

ननु संनिधानापरपर्यायासत्तिर्न तावत् मण्युक्तरीत्या अव्यवधानेन पदार्थस्मृतिः। अनासन्ने आसत्तिभ्रमेण अन्वयबोधस्थले त्वत्पक्षे पदार्थोपस्थितेः विशेषणज्ञानत्वेन हेतुत्वात् हेतोश्चाव्यवहितत्वनियमेन आसत्तेरेव सत्त्वेन आसत्तिभ्रमानुपपत्तेः।

किं च नानाविशेषणकैकविशेष्यकबोधस्थले "दण्डी कुण्डली वासस्वी चैत्रः" इत्यादौ चैत्रपदेन वासस्विपदमासन्नं, दण्डिपदं कुण्डलिपदं चानासन्नमिति विभागो-

---

[१] पदार्थोपस्थितेरुपस्थितिः नापेक्ष्यते।

[२] त.तां,भा.२.पृ. २४.

ऽस्ति। पदार्थस्मृतेरेवासत्तित्वे तावत्पदार्थगोचरसमूहालम्बनैकस्मृतेरेव तत्र स्वीकरणीयतया[१] आसन्नानासन्नविभागः कथं स्यात्।

किं च —

> "श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।
> वसन् ददर्शावतरन्तमम्बरात्..... "

इत्यादिपद्ये,

> "ततः सपत्नापनयस्मरणानुदयस्फुरा"

इत्यादिमाघस्थाष्टश्लोकात्मककुलकादौ च क्रियाकारकपदानामतिव्यवहितत्वात् तत्र त्वदुक्ताव्यवहितपदार्थस्मृतेरयोगः।

नाप्यव्यवहितपदोपस्थितिरासत्तिः, व्यवहितपदोपस्थितिकपद्यादावव्याप्तेः।

नापि पदाव्यवधानमासत्तिः। अव्यवधानं हि पदे लिप्युच्चारणादिनिबन्धनमेव वक्तव्यम्। तथा च व्यवहितोच्चरिते लिखिते वा योजनयाप्यन्वयबोधो न स्यात्। व्यवधानस्य दृष्टत्वेन योजनयाप्यव्यवधानबोधासंभवात्। लिप्यनुमिते पदस्यैवाभावेन पदाव्यवधानासंभवाच्च।

न चाव्यवहितत्वेन पदतात्पर्यमासत्तिः, व्यवहितपदकपद्ये कुलकादौ च पदानां व्यवधानेनोच्चारणे लेखनेऽपि च अव्यवहितत्वेन वक्तृतात्पर्यगोचरत्वात्तेषां तत्र नाव्याप्तिरिति वाच्यम्। अतात्पर्यकशुकादिवाक्येऽव्याप्तेः। अव्यवहितपदतात्पर्यकं व्यवहितमुच्चारयतो वादिनः अनासन्नाभिधानरूपापार्थकाख्यनिग्रहस्थानानुपपत्तेश्च। "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यनासन्नोदाहरणे अतिव्याप्तेश्च। तत्राप्यव्यवहिततात्पर्यकत्वसंभवात्। तस्मादासत्तिर्दुर्निरूपेति।

उच्यते। पदोपस्थित्यनुकूलवक्तृव्यापारे निष्फलस्यान्वयबोधविरोधिव्यवधानस्याभाव आसत्तिः। पदग्रहणं शब्दमात्रपरम्। तेन प्रकृतिप्रत्यययोरवान्तरवाक्ययोश्चासत्तौ नाव्याप्तिः। पदयोः पदानां चोपस्थितेरनुकूलो यो व्यापारः लिपिः, उच्चारणं, तात्पर्यं वा, तस्मिन् निष्फलस्य अन्वयबोधविरोधिव्यवधानस्याभावः आसत्तिः। निष्फलान्वयबोधविरोधिव्यवधानशून्यशब्दोपस्थित्यनुकूलवक्तृव्यापारविषयता आसत्तिरिति यावत्। मौनिश्लोकादौ उच्चारणाभावेऽपि लिप्यभिप्राययोः सत्त्वान्नाव्याप्तिः।

---

[१] क्रमेणोपस्थितौ हि पूर्वस्मृतविशेषणान्वयानन्तरं चरमस्मृतविशेषणान्वयः स्यात्। न च स युक्तः। विशेषणविशिष्टे विशेषणान्तरान्वये विशेषणयोरप्यन्वयापत्त्या तदसंभवात्। विशेष्येणासन्नं विशेषणं स्वासन्नेन विशेषणेन स्वयमन्वितं सत् पश्चाद्विशेष्येणान्वेतीत्यस्यापि विशेषणयोरन्वयायोगेनासंभवात्। तथा च समूहालम्बनस्मृतेरेव स्वीकरणीयता इति भावः।

नापि पद्यकुलकादावव्याप्तिः। तत्रापि 'मया छन्दोऽनुरोधाय अलंकाररसविशेषयोराधानाय च व्यवधाने कृतेऽपि श्रोता एवं योजयिष्यति' इति अभिप्रायस्य सत्त्वात्। अपौरुषेयेऽपि वेदेऽस्माकमुक्तरीत्या ईश्वराभिप्रायोऽस्त्येव। मीमांसकानामपि अनादौ संसारेऽर्थाभिज्ञाध्यापकस्योक्ताभिप्रायोऽस्त्येव। व्यवधानस्य तु वेदेऽदृष्टविशेषः फलम्। "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यादिलौकिकवाक्ये तु व्यवधानस्य निष्फलत्वान्नातिव्याप्तिः।

अत एवाव्यवहिततात्पर्यके वादिवाक्ये नातिव्याप्तिः, तत्र वस्तुतो व्यवधानस्य सत्त्वेन तदभावविरहात्।

इयं चासत्तिर्ज्ञातैव शाब्दधीहेतुः, आसत्तिभ्रमेण शाब्दभ्रमात् — इति निरूपितम्।

नागेशोक्तमासत्तिस्वरूपम्

नागेशास्तु लघुमञ्जूषायां[१] —

मन्दस्य अविलम्बेन शाब्दबोधे आसत्तिरपि कारणम्। अमन्दस्य तु आसत्त्यभावेऽपि बोधो भवति। एवं चानासन्नस्थले योजनावाक्यात् विलम्बेन बोध इत्येतावतैव अनासन्नत्वव्यवहारः। आसत्तिर्नाम अन्वयिनां पदार्थानां तद्बोधकपदानां च अव्यवधानेन प्राथमिकी उपस्थितिः। काव्येऽन्यत्र च सर्वान् प्रति प्रायेण प्राथमिकबुद्धेरेव वक्तुरुद्देश्यत्वात्। "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्याद्यनासन्नस्थले योजनावाक्यात् मन्दस्य बोधेऽपि विलम्बोऽस्त्येवेति तावन्मात्रेणानासन्नत्वव्यवहारः।

न च तत्र योजनावाक्यस्यैव बोधकत्वात् "अस्मात्पदादयमर्थो बुद्धः" इत्यनुभवो विरुध्येतेति वाच्यम्। योजनावाक्यसंपादनद्वारा तस्यापि बोधे उपयोगेनादोषात्।

अमन्दस्य तु आसत्त्यभावेऽपि पदार्थोपस्थितौ सत्यामाकाङ्क्षाज्ञानवतः बोधाऽविलम्बेनैव भवतीति अमन्दस्य बोधे आसत्तेर्न कारणत्वम्।

ध्वनितं चेदं "न पदान्त॰" इति सूत्रे भाष्ये[२]। तत्र हि – "स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् इति। आनुपूर्व्येण संनिविष्टानां यथेष्टं संबन्धः शक्यते कर्तुम्। न चैतान्यानुपूर्व्येण संनिविष्टानि। अनानुपूर्व्येणापि संनिविष्टानां यथेष्टं

---

[१] ल.मं. पृ. ५२४-५२६.
[२] पा.सू. १.१.५८.

संबन्धो भवति। तद्यथा – 'अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीः' " इत्युक्तम्।

"पदान्तरेणाव्यवधानरूपा आसत्तिः आनुपूर्व्यम्, तत्र पदार्थानां समन्वयावगमात्। पाठक्रमात् आर्थक्रमो बलीयानिति यथेष्टमभिसंबन्ध इत्युक्तम्" इति कैयटः।

"यथेष्टं संबन्धः इष्टवाक्यार्थबोधजनकत्वरूपः। आर्थक्रमो नाम राजपुरप्रवेशन्यायेन स्वस्वाकाङ्क्षितार्थान्वयक्रमः। एवं चासत्त्यभावेऽपि पदार्थोपस्थितौ आकाङ्क्षावशात् बुद्ध्युत्पत्त्यनुसारेणान्वयबोध इति भावः। साचीनं = तिर्यग्गच्छन्तम्" इत्युद्द्योतश्च।

वस्तुतस्तु योजनावाक्यकल्पना व्यर्था। तत्कल्पकाभ्यामाकाङ्क्षातात्पर्याभ्यामर्थयोजनकल्पनस्यैवोचितत्वात्। परं तु मन्दमतेः सा अर्थयोजना विलम्बेन, अमन्दस्य तु सा शीघ्रमित्येवोचितम्। (अर्थयोजना नाम अन्वयिनामर्थानामुपस्थितिः) — इति न्यरूपयन्।

वेदान्तपरिभाषोक्तमासत्तिस्वरूपम्

वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्राः[१] —

आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः। मानान्तरेणोपस्थापितपदार्थस्य अन्वयबोधाभावात् पदजन्येति। अत एवाश्रुतपदार्थस्थले तत्तत्पदाध्याहारः "द्वारम्" इत्यादौ "पिधेहि" इति। अत एव "इषे त्वा" इत्यादौ "छिनद्मि" इति पदाध्याहारः। अत एव विकृतिषु "सूर्याय जुष्टं निर्वपामि" इति पदप्रयोगः —

इति प्राहुः। प्राय इदं सर्वं मणिकारोक्तमनुसरति।

अत्र व्याख्यातारः शिखामणिकाराः —

प्राभाकरास्तु — न पदजन्यपदार्थोपस्थितिः शाब्दज्ञानाङ्गम्। किं तूपस्थितिमात्रं, लाघवात्। न चासत्तेः पदविशेषजन्योपस्थितित्वेनाहेतुत्वे "घटः कर्मत्वम्" इत्यादावन्वयबोधप्रसङ्गः, तस्य स्वरूपायोग्यत्वात्। न चैवम् "ओदनं पचति" इत्यत्र मानान्तरोपस्थितकलायस्याप्यन्वयबोधापत्तिः, तात्पर्यज्ञानेनैव तन्निवारणोपपत्तेः। अन्यथा दैववशस्मृतकलायपदोपस्थितस्य कलायस्य (धान्यविशेषस्य) तव मतेऽप्यन्वयबोधापत्तिर्दुर्वारा। किं च पदजन्या सा न शाब्दधीहेतुः, "द्वारम्" इत्यादौ व्यभिचारात् — इत्याहुः।

---

१ वे.प. पृ. २२६.

तन्मतं निराचष्टे — आसत्तिश्चेति। अयं भावः — पदज्ञानजन्यान्वयप्रतियोगिपदार्थोपस्थितिरेवासत्तिः। सैव चान्वयबोधाङ्गम्। अन्यथा संस्कारोपस्थितं तीरमादाय घोषादिपदैरेवान्वयबोधसंभवे लक्षणोच्छेदापत्तिः।

किं च यदि वृत्त्यानुपस्थितस्यान्वयबोधः, तदा समवायसंबन्धेन घटादिपदैरेवाकाशोपस्थितिसंभवात् आकाशादिपदानां तत्र शक्तिर्न कल्प्येत। न च वृत्तिधीरपि शाब्दधीहेतुः। लाघवेन पदजन्यपदार्थोपस्थितित्वेन हेतुत्वे अतिरिक्तकारणाकल्पनादिति।

इषे त्वेत्यादाविति। भेदलक्षणे = द्वितीयाध्याये, "समेषु वाक्यभेदः स्यात्" इति सूत्रे[1] शब्दाध्याहारः उक्तः। तत्र च भाष्यं — "यावता विना चोदितकरणसामर्थ्यं नास्ति तावदनाम्नातमपि कल्पनीयं 'छिनद्मि' इत्यादि" इति।

विकृतिष्विति। विकृतौ सौर्ययागे "अग्नये" इति पदस्य स्थाने "सूर्याय" इति पदप्रक्षेपरूपमूहं कृत्वा "अग्नये त्वा जुष्टं निर्वपामि" इति प्राकृतो मन्त्रः "सूर्याय त्वा जुष्टं निर्वपामि" पठनीयः इति नवमे[2] सिद्धान्तितम्। अर्थाध्याहारपक्षे तु मानान्तरोपस्थितसूर्यादिकमादाय मन्त्रस्यान्वयबोधकत्वसंभवान्न सूर्यादिपदोहप्राप्तिरिति तदधिकरणविरोधः स्यात् — इत्याहुः। तदत्रानुसन्धेयम्।

एवं च धर्मराजाध्वरीन्द्रा अपि मण्युक्तरीत्यैव आसत्तिस्वरूपं स्वीचक्रुः।

न्यायकोशे आसत्तिनिरूपणम्[3]

तर्कभाषायाम्[4] —

"एकेनैव पुंसा पदानामविलम्बेनोच्चारितत्वमासत्तिः" इत्युक्तम्।

"एतस्य ज्ञानं च शाब्दबोधस्य जनकम्। अत एव एकैकशः प्रहरे प्रहरे असहोच्चरिते 'गामानय' इत्यादौ नान्वयबोधः" इति तर्ककौमुदी[5]।

तर्कसंग्रहव्याख्यायां वाक्यवृत्तौ[6] —

"तत्पदे तत्पदाव्यवहितत्वमासत्तिः। तथा च गोपदनिष्ठम् अम्पदाव्यवहितत्वं गोपदे अम्पदस्य संनिधिरित्यर्थः" इति निरूपितम्।

---

[1] जै.सू. २.१.१५.४७.
[2] जै.सू. ९.१.१२.
[3] न्या.को. पृ. १३४. अत्र पृष्ठसंख्यादिकं न्यायकोशनिर्दिष्टरीत्यैव वर्तते।
[4] त.भा. पृ. ४८.
[5] त.कौ. पृ. १७.
[6] वा.वृ. पृ. ६७.

न्यायसिद्धान्तमञ्जर्यां, तद्व्याख्याने प्रकाशे च आसत्तिविचारः[१]

"प्रकृतान्वयबोधानुकूलव्यवधानाभावः आसत्तिः इति प्राञ्चः। अन्वयप्रतियोग्य-नुयोग्यर्थोपस्थापकपदयोरव्यवधानमित्यर्थः। तेन 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यादौ नातिव्याप्तिः। इदं च प्राचां मते। नव्यास्तु नैतादृश्या आसत्तेर्ज्ञानं शाब्दबोधे कारणम्। किन्तु अव्यवहितपदतात्पर्यमासत्तिः, तज्ज्ञानं शाब्दबोधे कारणमित्याहुः। तत्तात्पर्यं च 'एतत्पदमेतत्पदाव्यवहितोत्तरमभिसंदधातु' इत्यभिसन्धापयितुरिच्छा। अत एव मौनिश्लोकेऽप्यासत्तिः। वक्तुरभावेऽप्यनुसन्धातुः सत्त्वात्। शुकवाक्ये च भगवत्तात्पर्यमादायैव गतिः।

पदादनुपस्थितस्यापि शाब्दबोधविषयत्वमिति भाट्टमतम्

भाट्टास्तु — प्रकृतवाक्यार्थानुप्रविष्टानां सर्वेषामर्थानां पदात् अनुपस्थितावपि शाब्दबोधो जायते। अत एव —

"पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः॥" इत्युक्तं[२] संगच्छते।

आ इत्यस्य ईषदित्यर्थः। ईषत् श्वेतरूपं पश्यतः, श्वेतं रूपमीषत् पश्यत इति वा। अत्र श्वेतरूपस्य चाक्षुषप्रत्यक्षेणोपस्थितिः। हेषाशब्दश्रवणखुरनिक्षेपशब्द श्रवणाभ्यामश्वधावनयोरनुमित्यात्मकोस्थितिः। तदनन्तरं "श्वेतोऽश्वो धावति" इति वाक्यार्थबोधः जायते। एवं च यत्र पदज्ञानजन्यपदार्थोपस्थित्या शाब्दबोधो भवति तत्र पदज्ञानजन्यपदार्थोपस्थितिः कारणम्। यत्र तु पदज्ञानाजन्यपदार्थोपस्थित्या शाब्दबोधो भवति तत्र पदज्ञानाजन्यपदार्थोपस्थितिः कारणम्। कार्यतावच्छेदक कोटावव्यवहितोत्तरत्वनिवेशान्न व्यभिचारः। तथा च शाब्दसामग्री द्विविधा — एका पदज्ञानजन्यपदार्थोपस्थितिघटिता, अन्या पदज्ञानाजन्ययावदर्थोपस्थितिघटिता च। पदज्ञानजन्ययत्किंचित्पदार्थोपस्थितितदजन्ययत्किंचिदर्थोपस्थितिघटिता शाब्द सामग्री तु नास्त्येवेति, केषांचित् पदात्, केषांचित् प्रकारान्तरेणोपस्थितौ न शाब्दबोधः — इत्याहुः।

तस्य विमर्शः

तन्न। "पश्यतः श्वेतमारूपम्" इत्यत्रापि कथंचित् आनुमानिकस्य संसर्गज्ञानस्य संभवे, द्वितीयसामग्रीकल्पने प्रमाणाभावात्। तादृशशाब्दबोधानन्तरं "शाब्दयामि" इत्यनुव्यवसायस्यासिद्धत्वात्। अनुमानप्रकारस्तु —

---

१ न्या.सि.मं.प्र.४. पृ. ५८.

२ श्लो.वा.वाक्य.३५८.

"अयं श्वेतः अश्वः, हेषावत्त्वात्" इति वा,

"अयं श्वेतोऽश्वो धावति, खुरनिक्षेपशब्दवत्त्वात्" इति वा,

"अयं श्वेतः धावदश्वः, हेषावत्त्वे सति खुरनिक्षेपशब्दवत्त्वात्" इति वा बोध्यः।

इति आसत्तिविचारः

अथ तात्पर्यविचारः

आकाङ्क्षादिज्ञानवत् तात्पर्यज्ञानमपि शाब्दबोधकारणम्। तत्र किं नाम तात्पर्यमिति विचार्यते।

कुसुमाञ्जल्युक्तं तात्पर्यलक्षणम्[१]

न्यायकुसुमाञ्जलौ उदयनाचार्यैः तात्पर्यमधिकृत्य किंचिद्विचारितं पञ्चमस्तबके। तत् अर्थतोऽनूद्यते —

तात्पर्यादपीश्वरः सिध्यति। पुंसां प्रवृत्तिनिवृत्तिविषयविवेचनाय हि कृत्स्नोऽप्याम्नायः प्रवर्तते। तदुक्तम् "आम्नायस्य क्रियार्थत्वात्..." [२] इति। तत्र साध्यं क्रियारूपमर्थं प्रतिपादयतः आम्नायस्य "यजेत स्वर्गकामः" "न कलञ्जं भक्षयेत्" इत्यादेः प्रवृत्तिनिवृत्तिरूपकार्यबोधकत्वं स्पष्टम्। ये तु तत्संनिहिताः सिद्धार्थबोधका अर्थवादाः तेषां साक्षात् तदबोधकत्वेऽपि तत्तात्पर्यकत्वेनैव प्रामाण्यं वक्तव्यम्। तथा हि — विधिश्रवणे यो यागादौ द्वेषान्न प्रवर्तते, कलञ्जभक्षणादौ चोत्कटरागात् प्रवर्तते, तद्विषये विधिगता प्रवर्तननिवर्तनशक्तिः अक्षमा भवति। स्तवननिन्दनाभ्यां तत्तद्द्वेषरागयोः विघटने सति क्षमा भवति। प्रशस्ते हि सर्वः प्रवर्तते, निन्दिताच्च निवर्तते। अतोऽर्थवादाः विधेयनिषेध्यगतप्राशस्त्याप्राशस्त्यबोधनद्वारा कार्यभूतप्रवृत्तिनिवृत्तितात्पर्यकाः। तस्मात् अर्थवादानां प्रवृत्तिनिवृत्ती तात्पर्यार्थः। तत्र तात्पर्यपदार्थशोधने ईश्वरः सिध्यति।

तथा हि — पदार्थवाक्यार्थापेक्षया क्वचित्तात्पर्यार्थो भिद्यते। पदशक्तिस्तावत् अभिधा, तद्बलावगम्योऽर्थः पदार्थः। आकाङ्क्षादिमत्त्वे सति अन्वयशक्तिः पदानां पदार्थानां वा वाक्यम्, तद्बलायातो वाक्यार्थः। आकाङ्क्षासंनिधियोग्यताविशिष्टः समभिव्याहारो वाक्यमिति यावत्। स एव पदानामन्वयशक्तिः। तत्र योग्यतादेरर्थनिष्ठत्वात् समभिव्याहारस्य च शब्दनिष्ठत्वात् एकतरप्राधान्यविवक्षया अन्वयशक्तिरियं पदनिष्ठतया पदार्थनिष्ठतया वा व्यवह्रियते। तात्पर्यार्थस्तु चिन्त्यते। तदेव परं यस्य तत् तत्परम्, तस्य भावस्तात्पर्यम्। परशब्दस्य साध्यम्, प्रतिपाद्यम्, प्रयोजनम्, उद्देश्यमिति चत्वारोऽर्थाः। तत्परत्वेन कथ्यमानं पदं वाक्यं वा उक्तेषु चतुर्षु यद्विषयकं भवति स तात्पर्यार्थः।

---

[१] न्या.कु.५.६, पृ. ३१२.
[२] जै.सू. १.२.१.

तत्साध्यकत्वं न तात्पर्यम्

तत्र साध्यं न तात्पर्यार्थः, प्रमाणस्य प्रमेयकारकत्वाभावेन कर्मतत्प्रवृत्ति-निवृत्तीनामर्थवादजन्यत्वाभावेन अर्थवादानां कार्यपरत्वायोगापत्तेः। ननु तर्हि प्रमाण नैष्फल्यम् — न। अर्थप्रतिपत्तिरूपफलसद्भावात्। अतस्तदन्यफलकत्वाभावात् कर्मसाध्यकत्वं न भवति। ननु अर्थवादजन्यार्थप्रतिपत्तिजन्यत्वात् प्रवृत्त्यादेः, परम्परया प्रवृत्त्यादिसाध्यकत्वरूपतात्पर्यमक्षतमिति चेत् — न। "गङ्गायां घोषः" इत्यत्र गङ्गापदस्य तीरे तात्पर्यस्य वक्तव्यत्वात् तीरे परंपरयापि जन्यत्वरूप साध्यत्वाभावात् गङ्गापदस्य तीरसाध्यकत्वाभावेन तीरतात्पर्यानुपपत्तेः। ननु स्व परत्वं नाम स्वविषयकप्रवृत्त्यादिसाध्यकत्वम्, लक्षिततीरज्ञानस्य च किंचित्प्रवृत्ति निवृत्त्युपयोगित्वात् तात्पर्यमक्षतमिति चेत् — न। "पुरा गङ्गायां घोष एक आसीत्" इति सिद्धपरवाक्येऽपि तीरपरत्वस्यावश्यकत्वात्, तत्र प्रवृत्त्यादेर प्रसक्तेः। अतः तत्साध्यकत्वं तत्परत्वमिति प्रथमः पक्षो न युक्तः।

तत्प्रतिपाद्यकत्वं न तात्पर्यम्

नापि कर्मप्रतिपाद्यकत्वं कर्मपरत्वम्। "वायुर्वै क्षेपिष्ठा देवता" इत्यादेरर्थ-वादस्य कर्मबोधकत्वाभावात् कर्मपरत्वानुपपत्तेः। पदशक्त्यन्वयशक्तिभ्यां वायु-देवतातत्संबन्धादेरेव प्रतिपाद्यत्वात् तदतिरिक्तकर्मप्रतिपाद्यकत्वविरहात्। न च शक्त्या तदबोधनेऽपि शक्यार्थदेवताऽविनाभावात् कर्म गम्यत इति कर्मपरत्वमिति वाच्यम्। अविनाभावगम्ये सर्वत्र शब्दतात्पर्याभावात्। न हि यत् यत् शब्दार्था-विनाभूतं तत्र तत्र तात्पर्यं शब्दस्य। अतिप्रसङ्गात्। "गङ्गायां जलम्" इत्य-त्राप्यविनाभावेन तीरस्य गम्यमानतया गङ्गापदस्य तीरपरत्वापत्तेः। ननु मुख्यार्थ-बाधज्ञानाधीनतत्प्रतिपाद्यकत्वं तत्परत्वम्, "गङ्गायां जलम्" इत्यत्र मुख्यार्थ-बाधज्ञानविरहात् न तीरतात्पर्यमिति चेत् — न। मुख्यार्थबाधकेऽसत्यपि तात्पर्य-स्येष्टत्वात्।

"गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयात् यत्र गतो भवान्॥"

इत्यत्र श्लोके मुख्यार्थबाधाभावेऽपि "मा गच्छ" इति गमनवारणतात्पर्य-स्वीकारात्। ननु गमनवारणतात्पर्यकत्वे "गच्छ" इति गमनानुमत्ययोगात् बाधितार्थकत्वमेवात्रेति चेत् — एवमपि "काकेभ्यो दधि रक्ष्यताम्" इत्यत्र का गतिः? तत्र हि मुख्यार्थाबाधेऽपि दध्युपघातकतात्पर्यमङ्गीक्रियते। किं च अन्यार्थ-गमकत्वमेव कुतो हेतोः इति पृच्छामः। अविनाभावादिति चेन्न। तेन हि व्यापक-मेव गम्यं भवेत्। अव्यापकतत्परत्वमपि वाक्ये दृश्यते, यथा "मञ्चाः क्रोशन्ति"

इत्यत्र मञ्चपदस्य मञ्चाव्यापकपुरुषे तात्पर्यम्। न हि मञ्चपुरुषयोरविनाभावः, न वा मञ्चक्रोशनपुरुषयोः।

तत्प्रयोजनकत्वं न तात्पर्यम्

नापि तत्प्रयोजनकत्वं तात्पर्यमिति तृतीयः पक्षो युक्तः। प्रयोजनं हि यः प्रतिपाद्यपुरुषः श्रोता तदिष्टं विवक्षितम्? उत यः प्रतिपादको वक्ता तदिष्टम्?। नाद्यः, श्रोतुः प्रयोजनाभावेऽपि वाक्यस्य क्वचिदर्थे तात्पर्यप्रामाण्ययोः सत्त्वात्। अन्यथा सर्वस्यापि वाक्यस्य तत्तच्छ्रोत्रभिमतप्रयोजनपरत्वकल्पनया आप्तानाप्त-विभागाद्यनापत्तेः।

ननु यत् श्रोतृप्रयोजनं वाक्यार्थसाध्यं तदेव ग्राह्यमिति तत्प्रयोजनसाध-कार्थबोधकत्वं तत्परत्वमिति चेत् — न। साध्यस्य कार्यज्ञाप्यभेदेन द्विरूपत्वात् कार्याणां ज्ञाप्यानां च बहूनां संभवात्, एकस्यापि वाक्यस्यानेकपरत्वापत्त्या वाक्यभेददोषापत्तेः। धूमस्य हि प्रदेशश्यामलता-मशकनिवृत्त्यादि अनेकं कार्यम्, आर्द्रेन्धन-दहनादि अनेकं ज्ञाप्यम्। तथा च "इह प्रदेशे धूमोद्गमः" इत्यभिहिते तात्पर्यतः को वाक्यार्थो भवेत्? श्रोतृचेतनानामनेकतया तदपेक्षायाः नियन्तु-मशक्यत्वात्। ननु वक्तुरेकत्वात् तदपेक्षितप्रयोजनकत्वं तत्परत्वमिति द्वितीय-पक्षोऽस्त्विति चेत् — न। भवन्मते वेदे वक्तुरभावात् तात्पर्याभावप्रसङ्गात्। किंच "गङ्गापदस्य तीरे तात्पर्यम्" इति प्रयोगात् तीरप्रयोजनकत्वस्य च गङ्गा-यामभावात् नायं पक्षः संभवति।

तदुद्देश्यकत्वं तात्पर्यमिति सिद्धान्तः

तस्मात् तदुद्देश्यकत्वं तात्पर्यमिति चतुर्थपक्ष एव संभवति। यदुद्देशेन यः शब्दः प्रवृत्तः स तत्परः। उद्देशः = इच्छा। तथा च तद्विषयकेच्छाधीनत्वं तत्परत्वम्। समन्वेति चेदं प्रशंसानिन्दापरेषु लौकिकवाक्येषु। तेषाम् "अयमिदमुपादत्ताम्" "अयमिदं जहातु" इति उपादानहानरूपार्थेच्छया प्रवृत्तत्वात्। यद्यपि तीरतत्परत्वं न तीरेच्छाधीनत्वम्, तथापि तज्ज्ञानेच्छाधीनत्वमेव तत्परत्वं सर्वत्र बोध्यम्। तथा च "वैदिकार्थवादाः कार्याभिप्रायपूर्वकाः,[१] कार्यशेषार्थवादत्वात्, लौकिकार्थवाद-वत्" इत्यनुमानेन अभिप्रायानुमितौ ततः तदाश्रयत्वेनेश्वरः अनुमीयते। न चाप्रयोजकशङ्का। आम्नायस्य क्रियार्थत्वात् अतदर्थत्वे आनर्थक्यप्रसङ्गरूपस्य विपक्षे बाधकस्य तर्कस्य सद्भावात्।

---

[१] अत्र कार्यपदेन हानमुपादानं च ग्राह्यम्।

तथा चार्थवादवाक्यानां क्रिया तात्पर्यार्थः पदार्थवाक्यार्थातिरिक्तः। यद्विषयकज्ञानेच्छया यः शब्दः प्रयुक्तः स तच्छब्दार्थ इति उदयनाचार्याशयः अवगम्यते।

अथ मणिग्रन्थानुसारेण तात्पर्यनिरूपणम्[१]

तात्पर्याधीनं शब्दप्रामाण्यम्। शब्दस्य प्रमात्मकानुभवजनकत्वं तात्पर्यज्ञानाधीनम्। तात्पर्यज्ञानमपि शब्दस्य सहकारीति फलितोऽर्थः। एतेन आसत्त्या सह शाब्दधीलक्षणैककार्यानुकूलत्वं संगतिः इति सूचितम्। अत उक्तसंगत्या आसत्तिनिरूपणानन्तरं तात्पर्यनिरूपणमिति भावः।

यद्यपि शब्दप्रामाण्यवादान्ते मणौ[२] —

"वस्तुतस्तु इतरपदस्य इतरपदार्थसंसर्गज्ञानपरत्वं तात्पर्यम्। तच्च वेदे न्यायादवधार्यते। लोके न्यायात् प्रकरणादेर्वा। अत एव शाब्दबोधे नानियतहेतुकत्वम्। तच्चेतरपदार्थसंसर्गज्ञानं वाक्यार्थज्ञानमेवेति सामान्याकारेण तत्परत्वग्रहो हेतुः, न तु विशिष्य। तच्च स्वपरपदार्थयोः संसर्गानुभवजननं विनानुपपन्नमिति पदानि संभूय जनयन्ति। अत एव नानार्थे विनिगमना। तदनुपपत्तिरेव लक्षणाबीजम्। तदभावादेव पचतिपदे न स्मृतकलायान्वयबोध इति सिद्धं शब्दस्य प्रमाणान्तरत्वम्। तस्य च निराकाङ्क्षादौ संसर्गज्ञानाजनकत्वात् आकाङ्क्षादिकं सहकारि"

इति ग्रन्थेन तात्पर्यस्वरूपम्, तात्पर्यज्ञानस्य शाब्दज्ञानजनकत्वप्रकारश्चोपवर्णित एव; तथापि परमतनिराकरणाय पुनरयमारम्भः।

अत्र मणिकाराः प्रथमतः कुसुमाञ्जलावुदयनाचार्योक्तरीत्या तात्पर्यस्वरूपं निरूप्य, ततः नानार्थस्थले क्रमेणानेकार्थबोध इति पक्षमनूद्य, "वयं तु ब्रूमः" इत्यादिना तत्र स्वमतं प्रतिपादयाम्बभूवुः। तदनन्तरं मीमांसकमतमनूद्य तदपि दूषितवन्तः। तत्सर्वं क्रमशोऽत्र अनूद्यते।

किं नाम तात्पर्यम्, अथ वा तत्परत्वम्?

तत्साध्यकत्वं तत्परत्वम् इति मतनिरासः

न तावत् तत्साध्यकत्वं तत्परत्वम्। साध्यपदेन जन्यं कार्यम् इत्यर्थविवक्षायां तत्कार्यकत्वं तदुत्पादकत्वरूपं तज्जनकत्वं तत्परत्वमित्युक्तं भवति। तथा सति पदार्थस्य पदार्थसंसर्गस्य च शब्दाजन्यत्वात् शब्दस्य पदार्थतत्परत्वं पदार्थसंसर्गतत्परत्वं च न स्यात्।

---

[१] त.चिं.म, च.भा.प्र.प. पृ. ३१९.

[२] त.चिं.म, च.भा.प्र.प.पृ. १७९-१८२.

ननु तद्विषयकप्रवृत्तिनिवृत्त्यात्मकप्रयत्नसाध्यकत्वं तत्परत्वम्। तच्च यागादिपरत्वं "यजेत" इत्यादिविधिवाक्यस्य इष्टसाधनताज्ञानद्वारा यागादिविषयकप्रयत्नजनकत्वात् वर्तते। अर्थवादवाक्यस्य विधेयनिषेध्ययोः उत्कृष्टत्वापकृष्टत्वप्रतिपादनद्वारा विधेयनिषेध्यविषयकप्रवृत्तिनिवृत्तिरूपप्रयत्नजनकत्वात् वर्तते। लाक्षणिकस्य गङ्गादिपदस्य लक्ष्यार्थबोधद्वारा तद्विषयकप्रवृत्तिनिवृत्तिजनकत्वात् वर्तत इति चेन्न। "यजेत" इत्यादिवाक्यात् यागादिविषयकप्रयत्नजनकत्वरूपतात्पर्यज्ञाने सत्येव यागादिविषयकः शाब्दबोधः, यागादिविषयकशाब्दबोधे सत्येव तद्विषयकप्रयत्नोत्पादकत्वमित्यन्योन्याश्रयणात्। लाक्षणिकपदस्याननुभावकत्वेऽपि लक्ष्यार्थपरत्वाच्च। किं च काव्यादौ अर्थस्वरूपविषयकज्ञानमात्रजनकत्वेनापि तात्पर्यमङ्गीक्रियते। तद्विषयकप्रयत्नजनकत्वं तु तत्र नास्तीत्यव्याप्तिः।

ननु तद्विषयकबुद्धिजनकत्वं तत्परत्वम्। "परिणतिसुरसमाम्रफलम्", "परिणतिविरसं पनसफलम्" इत्यादिप्रशंसानिन्दावाक्यमपि प्रशस्तनिन्दितार्थधीहेतुतया तत्परमेव। न च तद्वाक्यं प्रवृत्तिनिवृत्तिपरमिति व्यवहारो न स्यात्, तस्य प्रवृत्तिनिवृत्तिगोचरज्ञानाजनकत्वादिति वाच्यम्। प्रशस्तनिन्दितस्वार्थज्ञानं प्रवृत्तिनिवृत्ती जनयतीति तज्जनकज्ञानजनकतया प्रवृत्तिनिवृत्तिपरत्वव्यवहारस्य भाक्तत्वात्, प्रशस्तत्वेन ज्ञाते हि प्रवर्तते, निन्दितत्वेन ज्ञाताच्च निवर्तते इति चेत् —

न। गौणलाक्षिणकयोरननुभावकत्वेन तद्विषयकानुभवजनकत्वरूपतत्परत्वाभावप्रसङ्गात्। तद्विषयकानुभवजनने सति तत्परत्वज्ञानम्, तत्परत्वज्ञाने सति तद्विषयकानुभव इत्यन्योन्याश्रयाच्च।

ननु तद्विषयकबुद्धिजननयोग्यत्वं तत्परत्वम्, योग्यत्वं च जनकतावच्छेदकानुपूर्वीविशिष्टत्वम्। तच्च लाक्षणिकगङ्गापदेऽस्तीति तत्परत्वोपपत्तिरिति चेन्न। एकार्थमात्रप्रतीतीच्छयोच्चरितस्य नानार्थपदस्य अर्थान्तरप्रतीतिजननयोग्यतासत्त्वेन अर्थान्तरपरत्वापत्तेः। लाक्षणिकगङ्गापदस्य प्रवाहबुद्धिजननयोग्यत्वसत्त्वेन मुख्यार्थप्रवाहपरत्वापत्तेश्च।

तत्प्रतिपाद्यकत्वं तत्परत्वम् इति मतनिरासः

नापि तत्प्रतिपाद्यकत्वं तत्परत्वम्। प्रतिपाद्यत्वं प्रतीतिविषयत्वम्। तथा च तन्निष्ठस्वजन्यप्रतीतिविषयताकत्वं तत्परत्वम् इति वाच्यम्। स्वजन्यप्रतीतौ सत्यां तद्घटिततात्पर्यज्ञानं, तात्पर्यज्ञाने सति प्रतीतिः इत्यन्योन्याश्रयात्। प्रशंसानिन्दावाक्यस्य प्रवृत्त्याद्यप्रतिपादकतया प्रवृत्त्यादिपरत्वानुपपत्तेश्च। लाक्षणिकस्य तीराद्यननुभावकतया तीरादिपरत्वानुपपत्तेश्च।

न च शक्यार्थवत्, शक्यार्थाविनाभूतमर्थं यत् बोधयति तदपि तत्परमेव। गङ्गापदं स्वार्थाविनाभूतं तीरं प्रतिपादयतीति तीरपरमिति वाच्यम्। "मञ्चाः क्रोशन्ति" इत्यत्र मञ्चपदस्य पुरुषपरत्वानुपपत्तेः। मञ्चपदशक्यार्थाविनाभूतत्वाभावात् पुरुषस्य।

"गङ्गायां घोषः" इत्यत्र गङ्गापदस्य मुख्यार्थमात्राभिप्रायेण प्रयोगे सति गङ्गापदं मत्स्यपरं तीरपरं च स्यात्। मत्स्यस्य तीरस्य च गङ्गापदार्थप्रवाहाविनाभूतत्वात्। न च मुख्यार्थप्रतीतीच्छयानुच्चरितत्वे सति मुख्यार्थाविनाभूतार्थप्रतिपादकत्वं तत्परत्वम्, अतो नोक्तदोष इति वाच्यम्। एवं सति मुख्यार्थपरतैव न स्यात्। न स्याच्च

"गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्॥"

इत्यत्र व्यञ्जनया गमनाभावपरत्वम्, मुख्यार्थप्रतीतीच्छयानुच्चरितत्वविरहात्।

तत्प्रयोजनकत्वं तात्पर्यमिति सिद्धान्तः

उच्यते। तत्प्रयोजनकत्वं तत्परत्वम्। तच्छब्दार्थश्च प्रतीतिः, प्रवृत्तिनिवृत्ती च। प्रयोजनत्वं च न साध्यत्वम्। पूर्वोक्तान्योन्याश्रयात्।

नापि प्रतिपाद्येच्छाविषयत्वम्, प्रतिपाद्यः श्रोता। श्रोतुः या "अस्माच्छब्दादेतत्प्रतीतिर्भवतु" इतीच्छा तद्विषयत्वं प्रतीतेरस्तीति तस्याः प्रयोजनत्वम्। तथा च तद्विषयकप्रतीत्यादिनिष्ठश्रोतृसमवेतेच्छाविषयताकत्वं तत्परत्वमिति वाच्यम्। तथा सति श्रोतुः यद्यदर्थप्रतीतीच्छा भवति शब्दस्य तत्तदर्थपरत्वापत्तेः। न च प्रकृतवाक्यसाध्या यद्विषयकप्रतीत्यादिः श्रोतुरिच्छाविषयभूता भवति तदेव प्रयोजनमतो नोक्तदोष इति वाच्यम्। "इह धूमः" इत्यत्र साध्यपदार्थस्य ज्ञाप्यजन्यभेदेन बहुविधतया वाक्यभेदप्रसङ्गात्। धूमशब्दात् किल अविनाभावेन प्रदेशश्यामलतामशकनिवृत्त्याद्यनेकार्थप्रतीतिः जायते इति तत्तदर्थपरत्वेन वाक्यभेदः स्यादिति। धूमविषयकप्रतीतेः वाक्यज्ञाप्यत्वाभावेन ज्ञाप्यत्वघटिततात्पर्यस्य बाधितत्वाच्च। किं च श्रोतुरिच्छा एतत्प्रतीतावेव भवतीति नियन्तुमशक्यतया, यत्र वक्तुरेकार्थप्रतीताविच्छा श्रोतुश्चान्यार्थप्रतीतौ, तत्र विरुद्धप्रतीतिपरत्वप्रसङ्गः। किं तु प्रतिपादकेच्छाविषयत्वं प्रयोजनत्वम्। प्रतिपादको वक्ता। तथा च वक्ता यदर्थगोचरप्रतीतिप्रवृत्तिनिवृत्तीच्छया यं शब्दं प्रयुङ्क्ते स शब्दः तत्परः। जनकतासंबन्धेन तद्गोचरप्रतीत्यादिप्रकारकवक्त्रिच्छाविशेष्यत्वं वा, जन्यतासंबन्धेन तद्गोचरप्रतीत्यादिविशेष्यकेच्छाप्रकारत्वं वा तत्परत्वम्। भवति च "अयं शब्दोऽमुकप्रतीतिमान् भवतु" इतीच्छायाः जनकतासंबन्धेन प्रतीतिप्रकारिकायाः विशेष्यः

शब्दः, "अमुकगोचरप्रतीतिरेतच्छब्दात् भवतु" इति इच्छायाः जन्यतासंबन्धेन प्रतीतिविशेष्यिकायाश्च प्रकारः शब्द इति प्रतीतिपरत्वं शब्दस्य। एतेन प्रवृत्त्यादिपरत्वमपि व्याख्यातम्। किं तु प्रतीतिपरत्वमेव च शाब्दबोधोपयोगि, न तु प्रवृत्त्यादिपरत्वम्। अर्थपरत्वव्यवहारस्तु तद्गोचरप्रतीतिपरत्वनिबन्धनो भाक्तः।

नन्वेवं वक्तृवाक्यस्य श्रोतृगतशाब्दबोधप्रवृत्त्यादिपरत्वं न स्यात्, वक्तुरिच्छायाः श्रोतृशाब्दबोधाद्यविषयकत्वादित्याशङ्क्योक्तम् — सा चेच्छा प्रतिपाद्यधीप्रवृत्तिनिवृत्तिविषयेति। प्रतिपाद्यः = श्रोता। तन्निष्ठा या धीः, प्रवृत्तिर्निवृत्तिश्च, तद्विषयापीत्यर्थः।

नानार्थात् हर्यादिपदात्, श्लिष्टात् "श्वेतोऽश्वो धावति" इत्यादौ श्वेतादिपदात्, अनेकपदार्थान्वितैकक्रियापदघटितात् "घटं पटं चानय" इत्यादिवाक्यात्, मुख्यलक्ष्योभयबोधकात् "गङ्गायां घोषमत्स्यौ स्तः" इत्यादौ गङ्गादिपदाच्च आवृत्त्या[१] क्रमेणानेकपदार्थज्ञानं, न त्वेकदैव। सकृदुच्चरितस्य = एकपदविषयकैकज्ञानस्य, सकृदर्थपरत्वम् = एकार्थमात्रानुभवजनकत्वम्, इति नियमनिश्चयेन एकदा अनेकार्थानुभवजनकत्वतात्पर्याभावात्।

एतावता कुसुमाञ्जल्युक्तरीत्यनुवादः मणिस्थः अनूदितः। इतः परं "वयं तु ब्रूमः" इत्यादिना यदुक्तं[२] नानार्थादिस्थलविषयकं, तदनूद्यते।

मणिकारमतम्

नानार्थादिस्थले मणिकारा "आवृत्त्या क्रमेणानेकार्थबोधकत्वम्" इत्येतत् न सहन्ते। तथा हि — अनेकपदार्थप्रतीतीच्छया एकमुच्चारणं भवत्येव, पुरुषेच्छायाः नियन्तुमशक्यत्वात्। यदि च तदुच्चारणं नानेकार्थपरम्, तदा आवृत्तिरपि न स्यात्, तात्पर्यविषयान्वयबोधनिर्वाहार्थमावृत्तिकल्पनात्। अन्यथा एकपरेऽपि तदापत्तेः। अत एव = शब्दस्य एकमात्रविषयकशाब्दबुद्धिजनकत्वमिति नियमाभावादेव नानार्थादिपदोच्चारणस्य उभयपरतायां सत्यां नावृत्तिकल्पनम्। तस्मात् युगपदनेकार्थोपस्थितौ तात्पर्यादिज्ञाने सति युगपदनेकान्वयबोधो भवति। एकदा अनेकार्थानुभवजनकसामग्रीसत्त्वात्, प्रथममेकस्यान्वयबोधः, अनन्तरं तदन्यस्येति नियन्तुमशक्यत्वाच्च।

---

१ तत्स्थानस्थितस्य पदस्य पुनरनुसन्धानमावृत्तिः। नेदीयःस्थलान्तरस्थितस्य पदस्य पुनरनुसन्धानमनुषङ्गः। दवीयःस्थलान्तरस्थितस्य पुनरनुसन्धानमनुवृत्तिः। सा च सिंहगुहावलोकन-मण्डूकप्लुति-गङ्गास्रोतोवदिति त्रिधा। अश्रुतशब्दानुसन्धानमध्याहारः।

२ त.चिं.म, च.भा.प्र.प.पृ.३२९.

अथ "विवादाध्यासितम् = अनेकार्थतात्पर्याकाङ्क्षादिज्ञानसमवहितमक्षपदोच्चारणम् एकदैकशक्तिविषयैकमात्रविषयकानुभवजनकम्, एकपदोच्चारणत्वात्, घटपदोच्चारणवत्", यद्वा "विवादाध्यासितम् एकत्रोच्चारणे नानाशक्त्या नानार्थाननुभावकं, नानार्थत्वात्, एकपरनानार्थपदवत्" इति चेत् — न। अनेकार्थानुभवसामग्रीसत्त्वेन बाधितत्वात्। नानार्थानुभवसामग्रीविरहस्य उपाधित्वाच्च।

अत एव = एकदा एकस्मात् पदात् अनेकार्थबोधसामग्रीसत्त्वादेव "अक्षमानय" इति वक्त्रा कथिते द्वयोः श्रोत्रोः भिन्नभिन्नेऽर्थे तात्पर्यप्रमायां भ्रमे वा यथा एकदैवानेकार्थबोधः विनैवावृत्तिं भवति, तथैव एकस्यापि। अन्यथा लाघवात् एकदा नानार्थाननुभावकत्वव्युत्पत्त्या नानापुरुषस्यापि स न स्यात्।

एवं "गङ्गायां जलं घोषश्च प्रतिवसति" इत्यत्र गङ्गापदस्य युगपत् प्रवाहतीरयोः तात्पर्यग्रहे तयोर्द्वयोरप्येकदोपस्थितौ जलघोषयोरेकदैवान्वयबोधः। न च युगपत् वृत्तिद्वयज्ञानस्य .शाब्दबोधजनकत्वापत्तिरिति वाच्यम्। इष्टत्वात्। मुख्यार्थानुभवसामग्रीलक्ष्यार्थानुभवसामग्र्योः सत्प्रतिपक्षवत् परस्परविरोधित्वे मानाभावात्।

नन्वेवं "यष्टीः प्रवेशय" इत्यादौ मुख्यार्थान्वयानुपपत्तिविरहस्थले लक्ष्यार्थशाब्दबुद्धिदशायां नियमतो मुख्यार्थशाब्दबोधापत्तिः, लक्षणायाः शक्यसंबन्धात्मकत्वेन लक्षणालक्ष्यार्थयोरुपस्थितिकाले शक्तिशक्यार्थयोः अवश्यमुपस्थितेः इति चेत् — उच्यते। तात्पर्यज्ञानसहकाराद्धि वृत्तिः शाब्दबोधोपधायिका भवति। तथा च मुख्यार्थे तात्पर्यज्ञानाभावदशायामेव लक्ष्यार्थमात्रशाब्दबोधः। उभयत्र तात्पर्यज्ञानसत्त्वे तु मुख्य-लक्ष्योभयविषयकबोध इष्ट एव।

न च वृत्तिज्ञानार्थमेव तात्पर्यज्ञानस्यापेक्षिततत्वात् अन्यतः सिद्धे वृत्तिज्ञाने, तात्पर्यज्ञानसत्त्वमकिंचित्करमिति वाच्यम्। वृत्तिज्ञानार्थं तात्पर्यज्ञानस्य अनपेक्षितत्वात्। शाब्दबोधहेतुतयैव तात्पर्यज्ञानस्यापेक्षिततत्वात्।

तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वादेव गौणी वृत्तिः, लक्षणा च कल्प्यते। "चन्द्रं पश्य" "यष्टीः प्रवेशय" इत्यत्र मुख्यार्थान्वयानुपपत्तिविरहेऽपि चन्द्रपदस्य चन्द्रसदृशे गौणी वृत्तिः, यष्टिपदस्य यष्टिधरे लक्षणा च स्वीक्रियते। तात्पर्यज्ञानानुरोधात्। तात्पर्यज्ञानस्य शाब्दबोधाहेतुत्वे तु उक्तस्थलयोः भवन्मते मुख्यार्थानुभवसामग्रीलक्ष्यार्थानुभवसामग्र्योः सत्प्रतिपक्षवत् परस्परं प्रतिबन्धकत्वात् गौणार्थविषयकशाब्दबोधस्य लक्ष्यार्थविषयकस्य च शाब्दबोधस्य अनुपपत्तिः।

कुत्र तर्हि युगपत् वृत्तिद्वयविरोध इति चेत् — यत्र मुख्य-लाक्षणिकयोः एकैकमात्रपरत्वग्रहः, तत्र वृत्तिद्वयज्ञानस्य शाब्दबोधजनकत्वाभावः। अनेकान्वयबोध-

परत्वग्रहे तु नास्ति वृत्तिद्वयज्ञानस्य परस्परशाब्दधीप्रतिबन्धकत्वम्, अपि तु भवत्येव मुख्य-लक्ष्योभयविषयकः शाब्दबोधः।

यत्र मुख्यार्थस्य प्रथममुपस्थितत्वेन प्रथममन्वयबोधः, अनन्तरं लक्ष्यार्थान्वयबोधः तत्र आवृत्तिरेव पदस्य। प्राथमिकपदज्ञानस्य नष्टत्वात्।

तस्मात् मुख्यार्थ-लक्ष्यार्थयोः युगपत्तात्पर्यग्रहे सति न आवृत्तिः। किं तु अनेकार्थपरत्वे सत्येव यत्र तात्पर्यज्ञानक्रमात् अन्वयबोधक्रमः, तत्र आवृत्तिः। प्रथमोत्पन्नस्य पदज्ञानस्य नष्टत्वात्।

एवं च लोके क्लृप्तत्वात् वेदेऽपि वक्त्रिच्छागर्भं तात्पर्यमिति वेदस्य पौरुषेयत्वम्।

न्यायकौस्तुभोक्ताः विशेषाः[१]

नन्वेवमपि = नानार्थकस्थले तात्पर्यनिर्णयस्य हेतुत्वेऽपि, शाब्दसामान्ये तस्य हेतुत्वे मानाभाव इति चेत् —

अत्राहुः — लवणादिशक्तनानार्थकसैन्धवादिपदस्थले लवणादितात्पर्यज्ञानस्य हेतुत्वे कल्पनीये, नानार्थशक्तसैन्धवादिपदजन्यलवणादिशाब्दत्वस्य कार्यतावच्छेदकत्वे गौरवेण, सैन्धवादिपदजन्यलवणादिशाब्दत्वमेव कार्यतावच्छेदकम्, लाघवात्। तच्च लक्षणया शक्तिभ्रमेण वा घटादिपदजन्यलवणादिशाब्दबोधसाधारणमिति तत्रापि तत्कारणत्वं निर्व्यूढम्[२]।

एवं लक्षणास्थले शक्तिलक्षणाभ्यां शक्यलक्ष्यार्थयोरुपस्थितौ लक्ष्यार्थस्यैव शाब्दबोधः, न तु शक्यार्थस्येति नियमनिर्वाहाय, लक्षणयैव नानालक्ष्यार्थोपस्थितौ एकस्यैव लक्ष्यार्थस्य शाब्दबोधनिर्वाहाय च तात्पर्यनिर्णयस्य हेतुत्वमावश्यकमिति सर्वत्र शाब्दबोधे तस्य हेतुत्वसिद्धिः। अत एव तात्पर्यानुपपत्तिर्लक्षणाबीजमिति प्रवादोऽपि संगतः।

केचित्तु[३] — तात्पर्यज्ञानं न हेतुः, नानार्थस्थले तात्पर्यविषयस्यैव शाब्दबोध इति नियमस्तु, एकतत्पदार्थशाब्दबोधे अन्यतत्पदार्थे तात्पर्यज्ञानस्य प्रतिबन्धकतया उपपादनीयः। एवं च लक्ष्यार्थे तात्पर्यज्ञानदशायां मुख्यार्थस्य शाब्दबोधासंभवेन

---

[१] न्या.कौ. पृ. १०७.

[२] अत एव दिनकर्यामप्युक्तम् (पृ. ६४७) — "आहुरित्यस्वरसोद्भावनम्। तद्बीजं तु गृहीतनानार्थवृत्तिकपदजन्यानुभवत्वापेक्षया लाघवेन पदजन्यानुभवत्वस्यैव तात्पर्यज्ञानजन्यतावच्छेकत्वमुचितम्" इति।

[३] न्या.कौ. पृ. ११४.

लक्षणावृत्तेः कल्पनमिति संगच्छते। अत एव = तात्पर्यज्ञानस्य शाब्दबोधाहेतुत्वादेव तात्पर्यज्ञानविरहदशायां शाब्दबोधोदयेऽपि न क्षतिः — इत्याहुः।

तन्न। तात्पर्यज्ञानस्य प्रतिबन्धकत्वे, अर्थद्वये तात्पर्यज्ञानसत्त्वे अनुभवसिद्धस्य अर्थद्वयविषयकशाब्दबोधस्यानुपपत्तेः। एकतात्पर्यज्ञानप्रतिबन्धकतायामपरतात्पर्यज्ञानस्योत्तेजकत्वं स्वीकृत्य एकार्थविषयकतात्पर्यज्ञानाभावविशिष्टापरार्थतात्पर्यज्ञानं प्रतिबन्धकमित्युक्तौ गौरवात्।

नानार्थस्थले क्रमेण वा युगपद्वा अर्थद्वयबोध इति मतभेदः[१]

अत्रेदं बोध्यम्। "सैन्धवमानय" इत्यादौ लवणतुरगादिनानार्थे यत्र तात्पर्यग्रहः तत्र द्वितीयार्थशाब्दबोधः, प्राचां मते पदस्य वाक्यस्य च पुनरनुसन्धानरूपया आवृत्त्यैव भवति। 'सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति' इति व्युत्पत्तेः। तादृशव्युत्पत्त्यनङ्गीकर्तृनवीनमते च आवृत्तिं विनैव एकदोभयार्थबोधः[२]।

तत्र मतद्वयस्याप्याशयमित्थं वर्णयन्ति —

तत्र प्राचामयमाशयः — नानार्थबोधनेच्छया नानार्थादिशब्दविषयकैकानुसन्धाने अनेकार्थप्रत्यायकत्वप्रकारिका अविसंवादिनी वक्तुरिच्छा न संभवति। 'सकृदुच्चरितः शब्दः' इत्यादिनियमबलेन स्वसमानार्थकपदान्तरानुसन्धानासमवहितस्य पदानुसन्धानस्य नानार्थाबोधकत्वनिश्चयेन नानार्थशब्दविषयकैकानुसन्धाने नानार्थप्रत्यायकत्वस्य वस्तुतोऽभावात्।

न च तादृशनियमे मानाभाव इति वाच्यम्। तथा सति एकपदानुसन्धाने युगपत् नानास्वार्थबोधकत्वस्य दुर्वारतया तत्र वाक्यभेदव्यवहारानुपपत्तेः। वाक्यजन्यशाब्दबोधभेदस्यैव वाक्यभेदव्यवहारप्रयोजकत्वात्। एवं चेच्छागर्भतात्पर्यज्ञानाभावात् न नानार्थकशब्दात् युगपदनेकार्थप्रतीतिः। एकानुसन्धानान्तर्भावेणानेकार्थप्रत्यायनेच्छागर्भं तु तात्पर्यम् आवृत्त्या क्रमोत्पन्ननानार्थबोधेनापि चरितार्थं भवतीति तत्र आवृत्त्यैव अर्थान्तरबोध इति।

नवीनानां तु अयमाशयः — एकदा नानार्थाबोधकत्वनिश्चयरूपबाधस्य विरोधित्वे मानाभावः, विरोधित्वे वा तस्य न सार्वत्रिकत्वम् इति। "एतत्पदविषयकमनुसन्धानम् एतत्पदस्य अर्थद्वयं बोधयतु" "एतत्पदमर्थद्वयविषयकैकबोधं जनयतु" इत्याकारिका नानार्थादिशब्दविषयकैकानुसन्धाने अनेकार्थप्रत्यायकत्वप्रकारिका वक्तुरिच्छा क्वचित् (उक्तबाधनिश्चयाभावस्थले) संभवत्येव। तद्बलात् नानार्थादिस्थले एकदा अनेकार्थबोधो दुर्वारः।

---

[१] न्या.कौ. पृ. ११६.

[२] तत्त्वचिन्तामणावप्युट्टङ्कितोऽयं विषयः पूर्वम्।

न च तात्पर्यसत्त्वेऽपि "सकृदुच्चरितः" इत्यादिनियमभङ्गभयान्नोक्तबोधाभ्युपगमः संभवतीति वाच्यम्। सामग्र्या कार्यजनने उक्तनियमभङ्गस्याकिंचित्करत्वात्।

किं च कस्यार्थस्य प्रथमं बोधः, कस्य वा पश्चात् इत्यत्र विनिगमकाभावेन आवृत्त्या क्रमिकबोधोपगमायोगेन युगपत् नानार्थबोधोपगम एवोचितः। न चैवं तत्र वाक्यभेदव्यवहारानुपपत्तिः, वाक्यजन्यशाब्दबोधभेदस्यैव वाक्यभेदे प्रयोजकत्वादिति वाच्यम्। वाक्यार्थभेदस्यैव वाक्यभेदप्रयोजकत्वात्। साक्षात्परंपरासाधारणनिरूप्यनिरूपकभावशून्यविषयताद्वयशालिबोधपरवाक्ये वाक्यभेदः। अतादृशे च वाक्ये एकवाक्यत्वम्। "एतद्भूतलं घटवत् पटवच्च" इत्यत्र घटपटविषयतयोः निरूप्यनिरूपकभावविरहात् वाक्यभेदः। "घटपटावानय" इत्यत्र घटपटविषयतयोः आनयनविषयताद्वारा निरूप्यनिरूपकभावसत्त्वात् एकवाक्यतेति।

तात्पर्यं किं पदस्य उत वाक्यस्य?

एवं च तत्प्रतीतीच्छया उच्चरितत्वं तात्पर्यमिति तात्पर्यस्वरूपम्। तत्र तत्प्रतीतिपदेन पदार्थप्रतीतिः गृह्यते वा, वाक्यार्थप्रतीतिर्वा इति संशयः। उभयं ग्रहीतुं शक्यमिति प्रतिभाति। परं तु "वक्तुरिच्छा तु तात्पर्यम्" इति[१] कारिकाभागमुपादाय —

"घटमानय" इत्यादौ कर्मत्वविशेष्यकाधेयतासंसर्गकघटप्रकारकप्रतीतीच्छा वक्तुस्तात्पर्यम्। "तादृशेच्छया उच्चरितमिदं वाक्यम्" इत्याकारकं श्रोतुस्तात्पर्यज्ञानं शाब्दबोधे कारणमित्यर्थः —

इति व्याख्यातं दिनकर्याम्[२]। अतः तात्पर्यघटकतत्पदेन वाक्यार्थप्रतीतिर्ग्राह्येति प्रतीयते।

तर्कसंग्रहदीपिकायां[३] तु — "तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यम्। तात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुः, नानार्थानुरोधात्" इत्युक्तम्। 'तत्प्रतीति' इति प्रतीकमुपादाय नीलकण्ठप्रकाशिकायां "तीरादिरूपार्थप्रतीतीत्यर्थः" इति व्याख्यातम्। तेन पदार्थप्रतीतिरपि तत्पदेन ग्रहीतुं शक्येति प्रतीयते। अत एव प्रभायामपि[४] —

"एतत्पदादेतदर्थबोधो भवतु इति प्रयोक्तृसमवेतेच्छेत्यर्थः। उच्चरितत्वसंबन्धेन तादृशतात्पर्यप्रकारकं, तादृशतात्पर्याधीनोच्चरितत्वप्रकारकं वा पदविशेष्यकं श्रोतृनिष्ठं ज्ञानं वा शाब्दबोधकारणमिति मूलाभिप्रायः" इत्युक्तम्।

---

[१] का. ८४.
[२] मु.व्या.दि. पृ. ६४३.
[३] त.सं. पृ. ३३१.
[४] मु.व्या.प्र. पृ. ६४३.

नागेशीया तात्पर्यनिरूपणसरणिः[१]

नागेशस्तु तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वमाशङ्क्य तन्निराचक्रे। तथा हि —

यत्तु — तत्र तत्र वाक्ये "घटमानय" इत्यादौ घटकर्मकानयनबोधेच्छयोच्चरितत्वाभावज्ञाने अन्यबोधेच्छयोच्चरितत्वज्ञाने वा घटकर्मकानयनबोधानुदयात् तयोः प्रतिबन्धकत्वकल्पने गौरवात्, लाघवेन घटकर्मकानयनविषयकबोधं प्रति "इदं 'घटमानय' इति वाक्यं घटकर्मकानयनप्रतीतीच्छया वक्त्रा उच्चरितम्" इत्याकारकस्तात्पर्यग्रहो हेतुः। नानार्थकपदस्थले पदविषयकोऽपि तात्पर्यग्रहः "इदम्पदमेतदर्थविषयकप्रतीतीच्छया वक्त्रा उच्चरितम्" इत्याकारकः शाब्दबोधहेतुः। (पद)तात्पर्यग्राहकं च प्रकरणादिकम्। अत एव प्रकरणादिज्ञानाभावे "इदम्पदमेतदर्थकम्, एतदर्थकं वा" इति संदिह्यते। मौनिलिखितवाक्यस्थलेऽपि सूक्ष्ममुच्चारणं पदानामस्त्येवेति।

तन्न। शुकादिवाक्यात् देवताप्रसादेन पूर्वजन्मसंस्कारेण वा मूर्खेण बालेन च कृतोत्तमकाव्याच्च वक्तृतात्पर्यव्यतिरेकनिश्चयेऽपि बोधोदयेन तात्पर्यज्ञानस्य शाब्दबोधे हेतुत्वासंभवात्। तात्पर्याभावनिश्चयश्च, वक्तुः शुकादेः तद्वाक्यात् तदर्थाबोधात्।

नन्वीश्वरतात्पर्यं शुकादिवाक्येऽप्यस्ति। तज्ज्ञानादेव च ततः शाब्दबोधः। अत एव वेदवाक्यादर्थबोध इति चेन्न। तस्य शाब्दबोधरूपफलैकोन्नेयत्वेन बोधात् प्राक् ज्ञातुम् अशक्यत्वात्।

ननु तात्पर्यज्ञानस्याहेतुत्वे तद्ग्राहकप्रकरणादिप्रतिपादकमीमांसोच्छेदापत्तिरिति चेत् — न। मीमांसाबोधितलाघवगौरवादितर्केण गृहीतं यत् तत्तदर्थबोधकत्वं तज्ज्ञानस्य वेदजन्यबोधे तद्गतप्रामाण्यनिश्चये वा हेतुत्वात् लाघवादिन्यायप्रतिपादकतया मीमांसायाः सार्थक्यात्।

किं च तात्पर्यज्ञानस्य हेतुत्वे "अस्मात्पदाद्वाक्याद्वा अर्थद्वयविषयको बोधो जायते, तात्पर्यं तु क्वेति न जानीमः" इत्यनुभवविरोधः। तेन तात्पर्यज्ञानं विनैव बोधोत्पत्तेः विषयीकरणात्। अत एव = तात्पर्यज्ञानस्य बोधाहेतुत्वेन, अर्थद्वयविषयकबोधोत्पत्तेरेव "पय आनय" इत्युक्ते अप्रकरणज्ञस्य = प्रकरणमजानतः, "दुग्धं जलं वा आनेयम्" इति प्रश्नः संगच्छते। ज्ञानस्य प्रश्नहेतुत्वेन तदभावे तदसंगतेः। स्पष्टं चेदं सर्वं संख्यासंज्ञासूत्रे भाष्ये[२]। तत्र हि —

---

[१] ल.मं. पृ. ५२६.
[२] म.भा. १.१.२३.

"इहार्थमुत्तरार्थं चोद्देश्यकोटौ संख्याग्रहणं कर्तव्यम्। इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथा लोके" इत्युक्त्वा

"आद्यफलार्थं न कर्तव्यम्। अर्थात् प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति। अर्थो वास्यैवंसंज्ञकेन भवति, प्रकृतं वा तत्र भवति इदमेवंसंज्ञकेन कर्तव्यमिति। आतश्चार्थात्[१] प्रकरणाद्वा। अङ्ग हि भवान् ग्राम्यं पांसुलपादमप्रकरणज्ञमागतं ब्रवीतु 'गोपालकमानय' 'कटजकमानय' [२] इति। उभयगतिस्तस्य भवति, साधीयो वा यष्टिहस्तं[३] गमिष्यति"

इत्याद्युक्तम्। प्रदीपे च —

"उभयगतिरिति। किं संज्ञेयं यस्य कस्यचिन्निर्दिष्टा स्यात्, उत यष्टिहस्तोऽस्य विवक्षितः स्यात् इति संदेहवान् भवतीत्यर्थः"

इति। उद्द्योते —

"उभयगतिः उभयविषयकं ज्ञानं तात्पर्यसंदेहरूपम्"

इति। बोधं विना च कुत्र तात्पर्यमिति संदेहो न भवति।

बोधस्य च तात्पर्यज्ञानाधीनत्वे बोधानन्तरं तात्पर्यसंदेहः कथं स्यात्। अत उक्तभाष्यं तात्पर्यज्ञानस्य बोधाहेतुत्वे प्रमाणम्।

न च तत्र पदार्थोपस्थितिरेव, न शाब्दबोध इति वाच्यम्। सर्वत्रैवमेवापत्तौ शाब्दबोधोच्छेदापत्तेः। एतेन तत्र मानस एव बोध इति, उपस्थितपदार्थानामसंसर्गाग्रहमात्रेण प्रश्नादिसिद्धिरिति च परास्तम्। शब्दजन्यमानसबोधस्यैव शाब्दबुद्धित्वात्। "शाब्दयामि" इत्यनुव्यवसायाच्च।

तात्पर्यनिर्णयस्योपयोगस्तु शाब्दज्ञाने प्रामाण्यनिश्चयद्वारा प्रवृत्तौ, क्वचिदनेकपदार्थस्यान्वययोग्यत्वे कस्य अध्याहारः इत्यत्र च। यथा "द्वारम्" इत्युक्ते "द्वारनिष्ठं कर्मत्वम्" इति बोधे जाते, "किं 'पिधेहि' इत्यध्याहार्यम्, अथ वा 'उद्घाटय' इति" इति संदेहे, तात्पर्यवशात् अन्यतरस्य अध्याहारः क्रियते। ततश्चाध्याहारे तात्पर्यज्ञानस्योपयोगः, न तु बोधे।

ननु तात्पर्यज्ञानस्य बोधं प्रत्यहेतुत्वे (अश्वतात्पर्यकत्वेन निर्णीतात्) "गेहे सैन्धवमस्ति" इति वाक्यात् "गेहे लवणमस्ति न वा" इति संदेहानुपपत्तिः। उभयविषयकबोधस्य ततो जननात्, लवणबोधात्मकनिश्चयरूपप्रतिबन्धकसत्त्वात्।

---

[१] "अतश्च" इत्यस्य इतश्च इत्यर्थः। बाहुलकश्चायं प्रयोगः महाभाष्ये।

[२] "कटजकमानय" इत्युक्तौ कटजनयितारं जानाति इत्यर्थः।

[३] गोपालनाय यष्टिहस्तः यः तदानयनाय गमिष्यतीत्यर्थः।

तात्पर्यज्ञानस्य हेतुत्वे तु अश्वे तात्पर्यज्ञानेनाश्वबोधस्यैव उत्पत्त्या लवणाबोधेन तत्संशयोपपत्तिरिति चेत् — न। तात्पर्यज्ञानेन एकतर(अश्व)विषयकज्ञाने प्रामाण्यनिश्चये सति, तदितरलवणविषयकज्ञानेऽप्रामाण्यबुद्ध्युत्पत्त्या "गेहे लवणमस्ति न वा" इति संदेहस्य संभवात्। अप्रामाण्यज्ञानाभावविशिष्टस्यैव निश्चयस्य संशयप्रतिबन्धकत्वात्।

यत्तु तत्परत्वाभावज्ञान-तदन्यपरत्वज्ञानयोः सत्त्वे तदर्थविषयकबोधाननुभवेन, फलबलात् तयोः प्रतिबन्धकत्वमेव, प्रामाणिकगौरवस्यादोषत्वादिति।

तन्न। तयोर्ज्ञानयोरपि तदर्थविषयकबोधे अप्रामाण्यग्रहजनकतैव; न तु बोधप्रतिबन्धकता इति।

किं च न केवलं तात्पर्यनिश्चय एव बोधे प्रामाण्यग्रहहेतुः। अपि तु तत्तद्वाक्ये आप्तोक्तत्वज्ञानमपि तत्तद्वाक्यार्थज्ञाने प्रामाण्यग्रहे हेतुः। आप्तत्वं च भ्रमप्रमादविप्रलिप्साशून्यत्वम्। वक्तुराप्तत्वज्ञानं च "अयं प्रकृतविषये भ्रमादिशून्यत्वरूपाप्तत्ववान्, आप्तत्वविरोधिधर्मानधिकरणत्वात्" इत्यनुमानेन। तत्र भ्रमः = वाक्यार्थभ्रमः। प्रमादः = अन्यार्थकत्वभ्रमः। विप्रलिप्सा = प्रतारणा, ज्ञातविपरीतप्रतिपिपादयिषा।

वेदस्यापौरुषेयत्वमते तु अनाप्तोक्तत्वाभावज्ञानं प्रामाण्यग्रहहेतुः।

वस्तुतः सर्वः शब्दः प्रमाणमेव। अनाप्तोक्तत्वज्ञानं तु शब्दजन्यज्ञाने अप्रामाण्यग्राहकम्।

वेदान्तपरिभाषोक्तरीत्या तात्पर्यस्वरूपम्[१]

तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम्; अर्थज्ञानशून्येन पुरुषेणोच्चरितात् वेदात् अर्थाज्ञानप्रसङ्गात्। न चैश्वरतात्पर्यज्ञानात् तत्र शाब्दबोध इति वाच्यम्। ईश्वरानङ्गीकर्तुरपि तद्वाक्यार्थप्रतिपत्तिदर्शनात्।

उच्यते। तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्। "गेहे घटः" इति वाक्यं गेहे घटसंसर्गप्रतीतिजननयोग्यम्, न तु पटसंसर्गप्रतीतिजननयोग्यमिति, तद्वाक्यं घटसंसर्गपरम्, न तु पटसंसर्गपरम् इति व्यपदिश्यते।

ननु "सैन्धवमानय" इत्यादिवाक्यं यदा लवणानयनप्रतीतीच्छया उच्चरितं तदाप्यश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वात् लवणपरत्वज्ञानदशायामपि अश्वादिसंसर्गज्ञानापत्तिरिति चेत् — न। तदितरप्रतीतीच्छयानुच्चरितत्वस्यापि

---

[१] वे.प. पृ. २५१.

तात्पर्यशरीरे प्रवेशात्। तथा च यद्वाक्यं यत्प्रतीतिजननयोग्यत्वे सति यदन्यप्रतीतीच्छयानुच्चरितम्, तद्वाक्यं तत्संसर्गपरमित्युच्यते। शुकादिवाक्ये, अव्युत्पन्नोच्चारितवेदवाक्यादौ च तत्प्रतीतीच्छाया एवाभावेन तदन्यप्रतीतीच्छया उच्चरितत्वाभावेन लक्षणसत्त्वान्नाव्याप्तिः।

न चार्थद्वयप्रतीतीच्छयोच्चरितेऽव्याप्तिः, एकार्थान्य-अर्थान्तरप्रतीतीच्छयोच्चरितत्वस्यैव सत्त्वात् इति वाच्यम्। तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वस्य विवक्षितत्वात्। तच्च तत्प्रतीतीच्छयानुच्चरितत्वे सति तदन्यप्रतीतीच्छयोच्चरितत्वस्य अभावः। सत्यन्तरूपविशेषणाभावाच्च विशिष्टाभावः उक्तस्थले बोद्धव्यः।

तत्प्रतीतिजननयोग्यत्वं च तत्प्रतीतिजनकतावच्छेदकशक्तिमत्त्वम्। उक्तशक्तौ प्रमाणं च "वाक्यनिष्ठवाक्यार्थज्ञानकारणता किंचिदवच्छिन्ना, कारणतात्वात् वह्निनिष्ठदाहकारणतावत्" इत्यनुमानम् — इति वेदान्तपरिभाषायां निरूपितम्। एतत्परिशीलनेन वाक्यनिष्ठा शक्तिरेव तात्पर्यमिति पर्यवस्यति।

अपि तात्पर्यं वृत्तिः ?

एतावता प्रबन्धेन न्यायव्याकरणादिग्रन्थपरिशीलनेन इदमवगतं भवति, यत् वाक्यघटकपदानां श्रवणानन्तरं वृत्तिज्ञानजन्यसंस्कारेण पदार्थानामुपस्थितौ सत्याम्, उपस्थितानां पदार्थानामन्वयबोधः आकाङ्क्षायोग्यतासत्तितात्पर्यज्ञानैः, आकाङ्क्षाज्ञानादिसहकृततात्पर्यज्ञानेन वा जायत इति।

अत्राहुः आलंकारिकाः — तात्पर्यं नाम शक्तिलक्षणाभ्यामतिरिक्ता काचन वृत्तिः, तज्ज्ञानेन आकाङ्क्षाज्ञानादिसहकृतेन पदार्थानामन्वयबोधो भवतीति। तदुक्तं काव्यप्रकाशे[१] —

"स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।
वाच्यादयस्तदर्थाः स्युस्तात्पर्यार्थोऽपि केषुचित्॥

आकाङ्क्षायोग्यतासंनिधिवशात् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये (बुभुत्सिते) तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम्" इति।

जात्यादिस्वरूपाणां पदवृत्तिविषयाणामर्थानां परस्परसंबन्धे बुभुत्सिते तात्पर्याख्यवृत्तिप्रतिपाद्यः वाच्याद्यर्थविलक्षणः संसर्गात्मकः वाक्यार्थः अनुभवविषयो भवति इति तदर्थः।

---

१ का.प्र.२.६.

उक्तं च काव्यप्रदीपादावपि[१] —

"लाघवात् पदानां पदार्थमात्रे शक्तिर्न त्वन्वयांशेऽपि, गौरवादन्यलभ्यत्वाच्च। अन्वयांशो हि तात्पर्यार्थः वाच्याद्यर्थविलक्षणशरीरः आकाङ्क्षादिवशात् अपदार्थोऽपि प्रतीयते। न चापदार्थप्रतीतावतिप्रसङ्गः। स्वरूपसतः शक्यान्वयत्वस्य नियामकत्वात्" इति।

"अतिप्रसङ्गः इति। पदवृत्त्यविषयस्यापि शाब्दबोधविषयत्वे कथंचिदुपस्थितस्य गगनादेरपि तद्विषयतापत्तिरित्यर्थः। शक्यान्वयत्वस्य = वृत्तिविषयान्वयत्वस्य (वृत्तिविषयप्रतियोगिकान्वयत्वस्य), नियामकत्वात् = वृत्त्यविषयस्य शाब्दबोधविषयतायां प्रयोजकत्वात्" इति काव्यप्रदीपव्याख्या प्रभा नागेशकृता।

अनेन पदवृत्त्यविषयं संसर्गं वाक्यनिष्ठतात्पर्याख्या वृत्तिर्बोधयतीति अभिहितान्वयवादिनां पक्ष इति मम्मटाशयः प्रतीयते।

कुमारिलभट्टैः तात्पर्याख्यवृत्तेः अनुक्तिः

परं तु अभिहितान्वयवादप्रवर्तकैः कुमारिलभट्टपादैः न कुत्रापि तात्पर्याख्यवृत्तिगम्यत्वं वाक्यार्थस्योक्तम्। तथा हि —

"न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः।
तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते॥"[२]
"वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥"[३]

इति वदतां भट्टपादानां 'परंपरया पदानामन्वितप्रतिपत्तौ हेतुत्वेऽपि, पदानि पदार्थप्रतिपादनमात्रेणावसितानि भवन्ति। अभिहिताः पदार्था एव वाक्यार्थं गमयन्ति' इत्याशयः। पदेषु वाक्यार्थावगमशक्तेः तदभिमतत्वे "तन्मात्रावसितेषु" इति कथनं न संगच्छन्ते। 'पदार्थप्रतिपदानं नान्तरीयम्' इत्युक्तेरपि नायमाशयः, 'यत् पदानि पदार्थप्रतिपादनद्वारा वाक्यार्थं गमयन्ति' इति। अपि तु पदैरभिहिता एव पदार्था वाक्यार्थं गमयन्तीति वाक्यार्थमितेः शाब्दत्वोपपादने तात्पर्यं भट्टपादानाम्। अत एव —

"पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्था अवगताः सन्तः वाक्यार्थं गमयन्ति" इति भाष्यं,[४]

---

[१] का.प्रदी.उ.२. का.६.
[२] श्लो.वा.वाक्य. २२९.
[३] श्लो.वा.वाक्य. ३४३.
[४] शा.भा. १.१.७.२५.

"वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थितिः" [१]

इति भट्टानामुक्तिश्च संगच्छते। एवं च पदार्थो वाक्यार्थं लक्षणया बोधयति। तत्र तात्पर्यज्ञानं सहकारि भवतु नाम। न तावता तात्पर्यवृत्त्या वाक्यार्थो बोध्यते। अपि तु पदार्थगतलक्षणया। अत एव पार्थसारथिमिश्रैः न्यायरत्नमालायां[२] —

"तस्मान्न वाक्यं न पदानि साक्षात् वाक्यार्थबुद्धिं जनयन्ति किं तु।
पदस्वरूपाभिहितैः पदार्थैः संलक्ष्यतेऽसाविति सिद्धमेतत्॥"

इत्यभ्यधायि। तथा च कथं तात्पर्याख्यवृत्तेः भाट्टाभिमतत्वोक्तिः संगच्छताम्? अपि च "तात्पर्यार्थोऽपि केषुचित्" इति काव्यप्रकाशकारिकाव्याख्यातृभिः कैश्चित् गोकुलनाथोपाध्यायादिभिः "केषुचित्" इति प्रतीकं धृत्वा "न्यायवैशेषिकमीमांसकैकदेशिषु" इति व्याख्यातम्[३]। तत्र मीमांसकानां तात्पर्याख्या वृत्तिः न संमतेत्युक्तम्। न्यायवैशेषिकमतानुसारिणामपि न संमतम्। कुत्रापि तैस्तात्पर्यस्य वृत्तित्वानुक्तेः।

तात्पर्याख्यवृत्तौ जयन्तभट्टाशयः

यत्तु न्यायमञ्जर्यां जयन्तभट्टाः[४] —

किं तु पदान्येव तत्प्रतिपादनद्वारेण वाक्यार्थप्रतिपत्तौ पर्यवस्यन्ति। कथमात्मीयमेव ग्रन्थं नावबुध्यन्ते भवन्तः?

"वाक्यार्थप्रत्यये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥" [५]

अवान्तरव्यापारो हि न कारकस्य प्रधाने व्यापारे कारकतां व्याहन्ति। पदानां हि द्वयी शक्तिः अभिधात्री तात्पर्यशक्तिश्च। तत्राभिधात्री शक्तिरेषां पदार्थेषूपयुक्ता। तात्पर्यशक्तिश्च वाक्यार्थे पर्यवस्यतीति।

भाष्यकारोऽपि[६] "पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि" इति वदन् अभिधाव्यापारे एव शक्तेः विरतिमाह, न तात्पर्यशक्तेः। अभिधाय निवृत्तव्यापाराणि पदानि यदर्थपराणि तत्रानिवृत्तव्यापाराण्येव। एवं हि शाब्दता वाक्यार्थ-

---

[१] बृहट्टीका।
[२] न्या.र.मा. पृ. १२९.
[३] का.प्र.व्या.विवरणे. पृ.४०.
[४] न्या.मं, आ.६.भा.२. पृ. १९०.
[५] श्लो.वा.वाक्य. ३४०.
[६] शा.भा.१.१.७.२५.

प्रत्ययस्य न हास्यते। सर्वात्मना तु विरतव्यापारे शब्दे सावश्यं हीयते। शब्दावगतिमूलत्वात्तु शाब्दत्वे श्रौत्रत्वमपि स्यात्, श्रोत्रस्य पारंपर्येण तन्मूलत्वात् —

इत्यन्विताभिधाननिरूपणावसरे तात्पर्यशक्त्या वाक्यार्थप्रतीतिमुपपादयामासुः। इदं चोपपादनं —

"प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम्॥"[१]

इति प्रकरणपञ्चिकामनुसृत्य। एतत्कारिकाविवरणे पञ्चिकायां —

"तात्पर्योपगमादपीति। येनापि वादिना पदानां स्मारकत्वमेव पदार्थेष्वङ्गीकृतम्, सोऽपि वाक्यार्थप्रतिपत्तिपरतां पदानामभ्युपेत्यैव। अन्यथा वाक्यार्थस्याशाब्दत्वप्रसङ्गः। एवं चेत् पदानामेव साक्षात् वाक्यार्थबोधनशक्तिरस्तु, किं परंपराश्रयणेन" इत्युक्तम्। एवं च भाट्टैरपि पदानां वाक्यार्थप्रतिपत्तितात्पर्याङ्गीकारात् तात्पर्यशक्तिरिति पदस्य तात्पर्यानुगुणा शक्तिः = आनुभाविकी इत्येवार्थः। न तु तात्पर्यरूपा शक्तिः इति जयन्तभट्टाशयः।

"अभिधाव्यापार एव शक्तेर्विरतिमाह" इत्यस्यापि 'स्मरणरूपं यत् पदार्थाभिधानं तत्रैव शक्तेः विरतिमाह भाष्यकारः। न तु तात्पर्यविषयीभूतान्विताभिधाने' इत्यर्थः।

यच्च न्यायमञ्जर्यामेव अन्विताभिधानपक्षे अभिहितान्वयवादे च क्लेशमुपपाद्य स्वपक्षवर्णनावसरे[२] —

"नाभिधात्री शक्तिरन्वितविषया, किं त्वन्वयव्यतिरेकानुगतनिष्कृष्टस्वार्थविषयैव। तात्पर्यशक्तिस्तु तेषामन्वितावगमपर्यन्ता सहव्यापारात्, व्यापारस्यैतदीयस्य निराकाङ्क्षप्रत्ययोत्पादनपर्यन्तत्वात्" इति, तदपि तात्पर्याख्यवृत्तेर्न साधकम्। तत्रापि तात्पर्यशक्तिरित्यस्य तात्पर्यरूपं बलमित्यर्थः। अत एव संसर्गस्य पदसमभिव्याहारलभ्यत्वमुक्तमुपरिष्टात्[३] —

"न हि संसर्गोऽभिधीयते, प्रतीयते च वाक्यात्........., संहत्यकारित्वादेव संसर्गावगतिसिद्धेः......, एवं पदान्यपि परस्परापेक्षीणि संहत्य कार्यं करिष्यन्ति, न च परस्परमर्थमभिधास्यन्ति" इत्यादि।

यदपि तत्त्वबिन्दौ वाचस्पतिमिश्रैः अन्विताभिधानवादानुवादावसरे[४] —

---

[१] प्र.पं. पृ. ४००.
[२] न्या.मं, आ.६.भा.२. पृ. २१६.
[३] न्या.मं, आ.६.भा.२. पृ. २१७.
[४] त.बिं. पृ. १११.

"अन्विताभिधानवादिनस्तु प्रथमावगतानां पदानामभिधायकानां वाक्यार्थप्रत्ययोपजनपर्यवसिततात्पर्यवृत्तीनामेकमेवाकाङ्क्षायोग्यतासत्तिरूपोपाध्युपायगृहीतार्थान्तरान्वितस्वार्थाभिधानसामर्थ्यमिति लाघवम्। अतोऽर्थाभिधायिनां पदानामेव वाक्यार्थधीहेतुभाव इति चतुरस्रम्"

इति तात्पर्यवृत्तिपदं प्रयुक्तं, तदपि तात्पर्यानुगुणशक्त्याख्यव्यापारपरम्, न तु तात्पर्याख्यव्यापारपरम्। शक्तिरपि कारणत्वरूपा। अत एव तन्मतखण्डनावसरे तत्त्वबिन्दावेव[१] —

"अन्वितेऽर्थे तात्पर्याभ्युपगमात् तदभिधायित्वं पदानामिति चेत्, तत्किं 'गङ्गायां घोषः' इत्यत्र गङ्गापदं तीराभिधायि भवेत्, तत्र तात्पर्यात्। न, स्मारितस्वार्थप्रत्यासत्त्यापि तदवगतेर्न तत्परस्यापि तदभिधानमिति यद्युच्येत, तदितरत्रापि समानमुक्तेन क्रमेण। तस्मादनेकान्तं तात्पर्यं न बीजं सामर्थ्यसाधने" इति प्रतिपादितम्।

असंमतं च भाट्टानां तात्पर्याख्यवृत्त्या वाक्यार्थप्रतिपादनम्। पदार्थैः लक्षणया वाक्यार्थप्रतिपादनस्यैव तदिष्टत्वात्। अत एव तत्त्वबिन्दौ भाट्टमतस्थापनावसरे[२] —

"तस्मादभिधातृत्वमपि नान्विताभिधान इति कल्पनालाघवात् आकाङ्क्षादिलक्षणसहकारिप्रत्यासन्नैश्च समभिव्याहृतपदस्मारितैः पदार्थैः प्रत्यासत्त्या गम्यमानो वाक्यार्थो लाक्षणिकः शाब्दश्चेति रमणीयम्" इति निगमितम्।

सारस्वतीसुषमापत्रिकायां तात्पर्यविचारः[३]

अत्राहुः —

आचार्यखण्डदेवः मीमांसाकौस्तुभे स्पष्टतः तात्पर्याख्यां वृत्तिं स्वीचक्रे, परं तु लक्ष्यार्थस्य शाब्दत्वप्रतिपादनाय, न तु वाक्यार्थप्रत्यायनायेति तत्प्रकरणतोऽवसीयते। तद्यथा[४] —

"न चैवं विभक्त्यर्थस्याभिधेयार्थान्वयित्वव्युत्पत्तिभङ्गः। 'गङ्गायां घोषः' इत्यादौ लक्ष्येऽप्यर्थेऽधिकरणत्वाद्यन्वयदर्शनेन तादृशव्युत्पत्तेरेवासिद्धेः। अतो वृत्त्या

---

[१] त.बिं. पृ. १५३-१५४.
[२] त.बिं. पृ. १६१.
[३] वायुनन्दनपाण्डेयः, सा.सु.पत्रिकायां २९ वर्षे ,२ अङ्के पृ.१४८-१६९, "तात्पर्यवृत्तिविमर्शः" इति प्रबन्धे।
[४] आकृत्यधिकरणे "तदर्थत्वात् प्रयोगस्याविभागः" इति सूत्रे मी. कौ. १.३.३५, पृ. १५०.

प्रकृत्युपस्थापितार्थान्वयित्वमेव विभक्त्यर्थस्य क्वचिदाद्यबोधे, क्वचित् पार्ष्ठिकबोधे व्युत्पत्तिसिद्धम्। इदमेव फलबलेन कल्पनीयम्। यदपि चार्थस्य लक्षकत्वपक्षे लक्ष्यस्याशाब्दस्य विभक्त्यर्थानन्वय इत्युक्तम्। तदप्यस्मिन् पक्षे तात्पर्याख्य-वृत्तिविषयत्वेन शाब्दत्वस्य लक्ष्येऽपि स्थापयिष्यमाणत्वात् अकिंचित्करम्।"

यदपि, द्वितीयाध्यायस्य प्रथमे पादे भावार्थाधिकरणे "भावार्थाः कर्मशब्दा-स्तेभ्यः क्रिया प्रतीयेत एष ह्यर्थो विधीयते" इति[१] सूत्रव्याख्याने तन्त्रवार्त्तिकस्य[२] 'गम्यमान' इति प्रतीकमुपादाय, न्यायसुधायां भट्टसोमेश्वरेण[३] —

"गम्यमानाया अपि भावनायास्तद्वाचिनश्चाख्यातस्य अपेक्षया तात्पर्यावगतिरिति तात्पर्यसूचनायापेक्षोक्ता। गम्यमानस्यापि तात्पर्यवृत्त्या शाब्दत्वात् सामानाधि-करण्योपपत्तौ कर्त्रधिकरणसिद्धदृष्टान्ताभिधानं तथाभूतयेत्यपेक्ष्यमाणत्वेन तात्पर्य-वृत्त्या शाब्दीभूतयेत्यर्थः"

इत्यादिना तद्ग्रन्थे तात्पर्यवृत्तेः स्फुटप्रतिपादनम्, तदपि "पक्तव्यम्" इत्यादि-कृदन्तस्थलेऽवाच्याया अपि भावनायाः शाब्दत्वप्रतिपादनायेति।

परं तु श्लोकवार्त्तिकव्याख्याने न्यायरत्नाकरे वाक्याधिकरणे "साक्षाद्यद्यपि कुर्वन्ति" इति वार्त्तिकव्याख्यानावसरे[४] पार्थसारथिमिश्रः वाक्यार्थावगतौ तात्पर्यं स्वीकरोति। तद्यथा —

"पदार्थरूपस्य प्रमाणान्तरसिद्धत्वात् तन्मात्रप्रतिपादनं निष्फलम्। अतः पदार्था-वसिताभिधाव्यापाराणामपि पदानां तत्रानवसिततात्पर्याणां वाक्यार्थावगतावेव तात्पर्यमिति युक्तं तेषां क्रियार्थेन समाम्नायः" इति।

सारस्वतीसुषमास्थविचारस्य परिशीलनम्

अत्रेदमालोचनीयम् — मीमांसाकौस्तुभे व्याकरणाधिकरणे तात्पर्यस्य वृत्ति-त्वनिराकरणपूर्वकं नैयायिकवत् आकाङ्क्षाभास्यत्वं संसर्गरूपवाक्यार्थस्य निर-टङ्कि। स ग्रन्थस्तथैवात्र लिख्यते[५]। —

अतश्च पदानामेव पदार्थेषु शक्तिकल्पनात्, वाक्यार्थस्य च समभिव्याहारादेव लक्षणया भानोपपत्तेः न तत्र वाक्यस्य शक्तिर्युक्ता।

---

[१] जै.सू. २.१.१.१.

[२] तं.वा.२.१.१, भा.२.पृ.२६७.

[३] वा.न्या.सु.२.१.१, भा.२.पृ.३०६.

[४] श्लो.वा.वाक्य. ३४२, पृ. ६६४.

[५] मी.कौ. १.३.२४, पृ. १२१-१२३.

ननु वाक्यार्थः संसर्गः। न च तस्य लक्षणया भानं संभवति। तथा हि — स्वबोध्यसंबन्धो हि लक्षणा। सा च ज्ञातैव कारणं, न स्वरूपसती। "गङ्गायां घोषः" इत्यादौ प्रवाहसंबन्धज्ञानाभावे तीरानुपस्थितेः। तदत्र "घटः शुक्लः" इत्यादौ तत्तत्पदबोध्ययोः जातिगुणयोः लक्ष्येण एकार्थसमवायेन यः संबन्धः स्वरूपसंबन्धरूपः, स किं ज्ञातो न वा। आद्ये संबन्धज्ञानं प्रति संबन्धिज्ञानस्य कारणत्वात्, लक्षणाज्ञानात् पूर्वम् एकार्थसमवायसंबन्धस्य ज्ञातत्वाभ्युपगमे तस्यानधिगतत्वाभावात् तत्र शब्दस्यापि प्रामाण्यानुपपत्तिः। अन्त्ये लक्षणाज्ञानाभावान्न तज्जन्यत्वं संसर्गरूपवाक्यार्थबोधस्य युक्तमिति चेत् —

सत्यं लक्षणानुपपत्तिरस्ति। अत एव "समभिव्याहारनिमित्ता लाक्षणिकी" इत्यादिशास्त्रदीपिकाग्रन्था अपि न यथाश्रुता एव नीयन्ते, अपि तु शक्त्यभावेऽपि गम्यमानत्वपरतया। कथं तर्हि शक्तिलक्षणयोरभावे वाक्यार्थबोधः। तदुच्यते। पदानि तावत् पदार्थानेव शक्त्या लक्षणया वा प्रतिपादयन्ति, न तु वाक्यार्थम्। स तु पदजन्यपदार्थज्ञानेनैव आकाङ्क्षायोग्यतासंनिधिज्ञानसहकृतेन ज्ञाप्यते। न तु तत्र शक्तिलक्षणान्यतरवृत्तिरूपपदव्यापारकल्पना, अन्यलभ्यत्वात्।

नन्वेवं पदानां पदार्थबोधनमात्रेण व्यापारपर्यवसाने वाक्यार्थबोधस्य शब्दजन्यत्वाभावात् वाक्यार्थस्याशाब्दत्वापत्तिः।

अत्र न्यायरत्नाकरे[1] पार्थसारथिः —

"पदार्थेषु पदानां पदार्थबोधजनकीभूतवृत्तिरूपव्यापारपर्यवसानेऽपि पदार्थबोधमात्रस्य प्रमाणान्तरसिद्धत्वेन निष्फलस्यानुद्देश्यत्वात् वाक्यार्थबोधस्यैवातज्जन्यत्वेऽपि शब्दप्रयोगोद्देश्यत्वावगतेः शब्दस्य वाक्यार्थे तात्पर्यावगमात् तात्पर्यविषयत्वेन वाक्यार्थस्य शाब्दत्वोपपत्तिः" इत्याह।

न चैतादृशतात्पर्यविषयत्वस्य शाब्दत्वप्रयोजकत्वे पदार्थानामनुद्देश्यत्वेन तदसंभवात् अशाब्दत्वापत्तिः। तेषामपि शक्तिलक्षणान्यतरविषयत्वेन शाब्दत्वोपपत्तेः। न चैवं तात्पर्यस्यावृत्तिरूपत्वेन शाब्दत्वप्रयोजकाननुगमः शङ्क्यः। तात्पर्यस्यापि वृत्तित्वाङ्गीकारात्।

अत एव न्यायसुधाकृतापि भावार्थाधिकरणादौ "कृदन्तशब्दस्थलेऽवाच्यत्वेऽपि भावनायास्तात्पर्यवृत्त्या शाब्दत्वम्" इत्यादिग्रन्थे तात्पर्यस्यापि वृत्तित्वमङ्गीकृतम्।

---

[1] न्यायरत्नाकरवाक्यस्य अर्थत अनुवादोऽयम् (श्लो.वा.वाक्य. ३४२, पृ. ६६४)।

वस्तुतस्तु उद्देश्यताख्यतात्पर्यस्वीकारे शुकादिवाक्यस्थले वेदे चोद्देश्यताख्य-तात्पर्यासंभवेन वाक्यार्थस्य शाब्दत्वानापत्तिप्रसङ्गः।

अथोद्देश्यताख्यतात्पर्यानङ्गीकारेऽपि शब्दनिष्ठस्य तात्पर्याख्यधर्मविशेषस्यैव शब्दत्वानुमेयस्य स्वीकारात् तद्विषयत्वमेव शाब्दत्वप्रयोजकमित्युच्येत, ततोऽक्लृप्त-धर्मान्तरस्वीकारे प्रमाणाभावात् वैयाकरणमततुल्यमेव गौरवम्।

अतो यथाश्रुतवार्त्तिकानुसारेणैवं परिहर्तव्यम् — वाक्यार्थस्य पदजन्यपदार्थोप-स्थितिजन्यज्ञानत्वेन स्वतोऽशाब्दत्वेऽपि, पदार्थानां शक्तिलक्षणागौण्यन्यतम-रूपवृत्तिगम्यत्वेन स्वतः शाब्दत्वोपपत्तिः। अत एवोक्तं वार्त्तिककृता —

"तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते॥
अशाब्देऽपि च वाक्यार्थे न पदार्थेष्वशाब्दता।
वाक्यार्थस्येव नैतेषां निमित्तान्तरसंभवः॥"[१] इति।

एवं "संसर्गं शाब्दयामि" इत्यनुव्यवसायोऽपि शब्दप्रयोज्यत्वात् शब्दानुपूर्वी-ज्ञानकारणकत्वात् वाक्यार्थबोधस्य नानुपपन्नः। अत्र च संसर्गबोधः शक्य-पदार्थसंबन्धबोधव्यतिरेकेणैव जायत इति न तत्र लक्षणा अङ्गीकृता। तीरादि-बोधस्य तु शक्यसंबन्धबोधव्यतिरेकेणाजायमानत्वात् लाक्षणिकत्वव्यवहारः, आनु-पूर्वीज्ञानाजन्यत्वादपि वेति वैषम्यम्।

एवं च शाब्दत्वप्रयोजकाननुगमोऽप्यापाद्यमानः नातीव दोषमावहतीति सर्व-मनवद्यम्। — इति न्यायकौस्तुभकाराः।

तात्पर्याख्यवृत्तिविषये निष्कर्षः

अन्विताभिधानवादिनः प्राभाकाराः "पदनिष्ठस्मारकशक्त्या पदार्थाः स्मृता भवन्ति। ततः आकाङ्क्षादिपरामर्शसहितया पदनिष्ठया आनुभावकशक्त्या वाक्यार्थबोधो जायते" इति वदन्ति।

अभिहितान्वयवादिनस्तु "पदशक्तिः पदार्थाभिधानमात्रेण पर्यवसिता भवति। अभिहितैः पदार्थैः लक्षणया वाक्यार्थः प्रतिपाद्यते" इति वार्त्तिकन्यायरत्नमालानु-सारेण अतिष्ठन्ते। वार्त्तिकन्यायसुधा-न्यायरत्नाकरयोः परिशीलने पदनिष्ठा तात्पर्याख्या वृत्तिः वाक्यार्थमवगमयतीति अवगम्यते। परं तु पदार्थाभिधान-शक्त्यतिरिक्ता तात्पर्याख्यवृत्तिर्यदि स्वीक्रियते वाक्यार्थबोधानुगुणा, तदा प्राभाकर-मतापेक्षया किमत्र वैशिष्ट्यम्? आनुभावकशक्तिस्थाने तात्पर्यवृत्तिस्वीकारात्।

---

[१] श्लो.वा.वाक्य. २२९ cd,२३०.

अतः पदशक्त्या पदार्थेष्वभिहितेषु तेषां संसर्गः पदसमभिव्याहाररूपया आकाङ्क्षया भासत इति नैयायिकमतमेव ज्यायः। खण्डदेवभट्टाचार्यैरपि लाक्षणिकत्वं तात्पर्यवृत्तिगम्यत्वं च निरस्य, समभिव्याहारापरपर्यायपदानुपूर्वीगम्यत्वमेव संसर्गस्य आस्थितं व्याकरणाधिकरणान्ते पूर्वोद्धृतकौस्तुभग्रन्थे।

न्यायमञ्जरीं न्यायसुधां चावलम्ब्य आलंकारिकैः "तात्पर्यार्थोऽपि केषुचित्" इत्युक्तमिति प्रतीयते।

कुसुमाञ्जलिकारा अपि अभिहितान्वयवादं स्वीकुर्वन्तोऽपि वाक्यार्थस्य आकाङ्क्षागम्यत्वमेवावदन् न तात्पर्यवृत्तिगम्यत्वम्। तथा हि तृतीयस्तबकेऽन्विताभिधानखण्डनावसरे[१] तेषां सूक्तिः —

"तस्मात् प्रकारान्तरेण संसर्गप्रत्ययो भवतु मा वा, पदार्थानामाकाङ्क्षादिमत्त्वे सति अभिहितानामवश्यमन्वय इति कुतोऽतिप्रसङ्गः" इति।

मम तु प्रतिभाति। यत्केषुचित् तात्पर्यवृत्तिः इति वा, तात्पर्याख्या वृत्तिरिति वा प्रयुक्तं, तत्र सर्वत्रापि शब्दतात्पर्यमनुसृत्यैव सर्वत्र शाब्दबोधो भवति। यत्र यत्र यादृशवृत्तिस्वीकारे तात्पर्योपपत्तिर्भवति तत्र तत्र तादृशी वृत्तिः स्वीकरणीया। सा पदार्थाभिधानार्था पदशक्तिर्वा भवतु, वाक्यार्थबोधार्था लक्षणा वा भवतु इत्येवाशयः। अत एव तन्त्रवार्त्तिके कुमारिलैः —

"प्राधान्येनाभिधानम्, तात्पर्येणाभिधानम्" [२]

इत्युल्लिखितम्। न्यायसुधायां च —

"तात्पर्यावधारणं विना शब्दप्रवृत्त्ययोगः" [३]

"तात्पर्याख्यशब्दव्यापारस्य सर्वत्र भावात्" [४]

इत्युक्तम्। अत एव मणावपि —

"तात्पर्याधीना हि वृत्तिः, न तु वृत्त्यधीनं तात्पर्यम्"

इत्युक्तम्। अतः शक्तिलक्षणातुल्यं वृत्तित्वं न तात्पर्यस्य। अपि तु शक्तिलक्षणोपपादकमिदं तात्पर्यमन्यत्, यस्य ज्ञानम् आकाङ्क्षादिज्ञानसहकृतं शाब्दबोधकारणम् — इति।

---

[१] न्या.कु.३, पृ. २२१.
[२] तं.वा. ३.४.१२, भा.४.पृ. ४६४.
[३] वा.न्या.सु.२.२.३.५, (चौ.पु.) पृ. ७३७, भा.३.पृ.७१ (प्र).
[४] वा.न्या.सु.३.४.३.१९, (चौ.पु.) पृ. १४४५, भा.४.पृ.५८५ (प्र).

पदार्थोपस्थितिद्वारा शाब्दबोधोपायभूतः पदनिष्ठो व्यापारो वृत्तिः, तात्पर्यं तु साक्षात् शाब्दबोधप्रयोजको व्यापारः, न वृत्तिः।

अत एव गदाधरभट्टाचार्यैः शक्तिवादे[१] —

"न चाधुनिकसंकेतस्य वृत्तित्वे तात्पर्यस्यापि तथात्वप्रसङ्गः, तस्यापि बोधकत्वेन पदविषयकतया संकेतरूपत्वात्। न चेष्टापत्तिः, तथा सति लक्षणा-स्थलेऽपि तात्पर्यस्य वृत्तितया लक्षणाया वृत्तित्वोच्छेदप्रसङ्गात् इति वाच्यम्। यतः पदार्थोपस्थितिव्यापारकः संकेतो वृत्तिः। तात्पर्यज्ञानं च साक्षादेव शाब्द-बोधोपयोगि, न तु पदार्थोपस्थितिद्वारा। वृत्त्युपस्थापितपदार्थ एव प्रकरणादिना वक्तृतात्पर्यावधारणात्। तथा च लक्षणायाः वृत्तित्वानुपगमे गङ्गादिपदात् तीराद्यनु-पस्थितौ तत्र तत्पदव्यक्तेः तात्पर्यग्रहाभावात् शाब्दबोधानुपपत्तिरिति तस्याः वृत्तित्वमावश्यकम्।

न च तात्पर्यग्रहार्थं लक्षणाधीनोपस्थितेः आवश्यकत्वेऽपि, लक्षणाधीनो-पस्थितित्वेन शाब्दबोधहेतुत्वे मानाभावात् तस्याः वृत्तित्वासिद्धिः, लक्षणास्थले तात्पर्यात्मकसंकेताधीनोपस्थितित एव शाब्दबोधनिर्वाहात्, आधुनिकसंकेतस्थले तात्पर्याधीनोपस्थितेः शाब्दबोधजनकतायाः क्लृप्तत्वादिति वाच्यम्।

लक्षणाधीनपदार्थोपस्थितिसत्त्वे मुख्यार्थबाधादिना तत्तदर्थे तत्तत्पदव्यक्ते-स्तात्पर्यग्रहे उपस्थित्यन्तरमन्तरेणैव तत्तदर्थानुभवस्य सर्वानुभवसिद्धत्वात्।

आधुनिकसंकेतस्थले पूर्वसंकेतकर्तृपुरुषवाक्यतः अर्थविशेषे डित्थादिपदस्य संकेतग्रहात् तत्तत्पदेनार्थविशेषोपस्थितौ प्रकरणादिना तत्तत्पदव्यक्तेः तत्र तात्पर्य-ग्रहे सति शाब्दबोधस्य वृत्त्यन्तराधीनोपस्थितिमन्तरेणैव उत्पत्त्या आधुनिक-संकेतस्य वृत्तित्वम्" इत्याद्युक्तम्।

मणिकारैरपि शक्तिवादे[२] "स्यादेतत् अन्वयतात्पर्यकतया तत्प्रतिपादकं पदम् इत्यविवादम्। तात्पर्यनिर्वाहिका च वृत्तिः। सा चेह न गौणी न वा लक्षणेति शक्तिसिद्धिः" इति तात्पर्यनिर्वाहाय वृत्तिः स्वीक्रियते, न तु तात्पर्यमेव वृत्तिः इति स्पष्टमावेदितम्।

अत्रेदमवधेयम् — न्यायमञ्जरी-काव्यप्रकाशादिषु शब्दवृत्तित्वेन निर्दिष्टं तात्पर्यमन्यत्, शाब्दबोधसहकारिकारणेषु आकाङ्क्षादिषु मध्ये परिगणितं

---

[१] शक्तिवाद. पृ. १३.
[२] त.चिं.म, च.भा.द्वि.प. पृ. ५४१.

तात्पर्यमन्यत्। आद्यं नानार्थकपदघटितेषु तदघटितेषु च सर्वेषु वाक्येषु साधारणम्, वाक्यघटकपदार्थानां संसर्गरूपो यो वाक्यार्थः तद्बोधोपयोगि संहत-सकलपदनिष्ठम्। द्वितीयं नानार्थकपदघटितेषु वाक्येषु पदार्थनियन्त्रणोपयोगि इति।

इति तात्पर्यविचारः

एतावता शब्दप्रामाण्य-लक्षण-वाक्य-वाक्यार्थस्वरूपविचारः, वाक्यस्य वाक्यार्थबोधकत्वोपयोगिनौ अन्विताभिधान-अभिहितान्वयवादौ, तथा वाक्यार्थबोध-सहकारिणः आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्यादयश्च विचारिताः। इतः परम् अग्रिमभागे पदपदार्थविचारः निरूप्यते ।

इति महामहोपाध्यायेन एन्. एस्. रामानुजताताचार्येण विरचितायां शाब्दबोधमीमांसायां वाक्यवाक्यार्थविचारो नाम प्रथमो भागः संपूर्णः

। श्रीः।

उदाहृतग्रन्थानां सूची

अद्वैतसिद्धिः मधुसूदनसरस्वतीकृता, बलभद्रकृतसिद्धिव्याख्या-गौडब्रह्मानन्द-सरस्वतीकृतगौडब्रह्मानन्दी-विठलेशकृतविठलेशी-मधुसूदनसरस्वतीकृताद्वैत-मतसंरक्षण-संपादककृतचतुर्ग्रन्थीसहिता, संपा. एन्. एस्. अनन्तकृष्णशास्त्री, निर्णयसागरप्रेस्, मुम्बयी, १९१७.

अनुमानमणिः द्र० तत्त्वचिन्तामणिः.

अनुव्याख्यानम् द्र० न्यायसुधा.

अभाववादः (तत्त्वचिन्तामणिप्रत्यक्षखण्डे एकं प्रकरणम्) द्र० तत्त्वचिन्तामणिः

अमरकोषः अमरसिंहविरचितः, भानुजिदीक्षितकृतसुधाव्याख्यासहितः चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, १९९७. (निर्णयसागरमुद्रितपुस्तकस्य मुद्रणप्रतिकृतिः).

आगमप्रामाण्यम् न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम्

आश्वलायनश्रौतसूत्रम् नारायणकृतवृत्तिसमेतम्, संपा. पट्टाभिरामशास्त्रि-रामनाथदीक्षितौ, लालबहादूरशास्त्रिकेन्द्रीयविद्यापीठम्, नूतनदिल्ली, १९८४-१९८५

उद्द्योतः द्र० महाभाष्यम्.

ऋग्वेदप्रातिशाख्यम् शौनकविरचितम्, उवटभाष्यसहितम्, संपा. अनुवादकश्च वीरेन्द्रकुमारवर्मा, काशीहिन्दूविश्वविद्यालयग्रन्थमाला, शोधप्रकाशनयोजना पुष्पम् ५, वाराणसी, १९७०.

ऋजुविमला द्र० बृहती.

कल्पतरुः द्र० ब्रह्मसूत्रशांकरभाष्यम्.

कारिकावली (मुक्तावलीसहिता) श्रीविश्वनाथतर्कपञ्चाननकृता, प्रभा-मञ्जूषा-दिनकरी-रामरुद्री-गङ्गारामीव्याख्याभिः समन्विता, सम्पादकः श्री सी. शंकर-रामशास्त्री, (व्रजजीवनप्राच्यभारतीग्रन्थमाला सं० २९) चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, १९८८. (बालमनोरमाग्रन्थावलि सं० ६, १९२३, संस्करणस्य मुद्रणप्रतिकृतिः).

काव्यप्रकाशः मम्मटप्रणीतः, गोकुलनाथोपाध्यायकृतविवरणसहितः, संपा. बद्रीनाथः झा, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी, १९६१.

काव्यादर्शः दण्डिप्रणीतः, रङ्गाचार्यविरचितप्रभाव्याख्योपेतः, भण्डार्कर् प्राच्य-विद्यासंशोधनालयः (Government Oriental Series: class A; no. 4) पुणे, १९३८.

